क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥२॥

नित्यसम्बन्धयोरुपमानत्वेनोपादानम्। "नित्यः शब्दार्थसम्बन्धः" इति मीमांसकाः। जगतो लोकस्य पितरौ माता च पिता च पितरौ। पिता मात्रेति (१,२,७० पा०) द्वन्द्वैकशेषः * "मातापितरौ पितरा"वित्यमरः। एतेन शर्वशिवयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वञ्च सूच्यते। पर्वतस्यापत्यं स्त्री पार्वती। तस्यापत्यम् (४,१,९२ पा०) इत्यण्, टिड्ढाणञित्यादिना (४,१,१५ पा०) † ङीप्। पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ परमशब्दः सर्वोत्तमत्वद्योतनार्थः। मातुरभ्यर्हितत्वादल्पाच्तरत्वाच्च ‡ पार्वतीशब्दस्य पूर्वनिपातः। वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वन्दे अभिवादये। अत्रोपमालङ्कारः स्फुटएव यथोक्तं "स्वतः सिद्धेन भिन्नेन सम्पन्नेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकधोपमेति"। प्रायिकश्चोपमालङ्कारः कालिदासोक्तकाव्यादौ। भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगात् शुभलाभः सूच्यते तदुक्तं "शुभदो मो भूमिमय इति। वकारस्यामृतवीजत्वात् प्रचयगमनादिसिद्धिः ॥ १ ॥

सम्प्रति कविः स्वाहङ्कारं परिहरति क्व सूर्य्येत्यादिश्लोकद्वयेन। क्वेति। प्रभवत्यस्मादिति प्रभवः कारणम्। ऋदोरप् **(३,३,५७पा०)

---

* द्वन्द्वसमासापवादैकशेषः। माता सहोक्तौ पिता शिष्यते।

† टिदन्तात् ढान्तादणन्तादञाद्यन्ताच्च स्त्रियां ङीप् स्यात्। इत्यणन्तत्वेनेह ङीप्।

‡ अल्पाच्तरम् (२,२,३४ पा०वा०) अभ्यर्हितञ्च (२,२,३४ पा० वा०) सूत्रवार्त्तिकाभ्यामिति शेषः।

** ऋदन्तादुवर्णान्ताच्चाप् स्यात्। इतोह भुवउवर्णान्तत्वेनापादाने अप्।

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥ ३॥

अकर्तरि च कारके संज्ञायाम्* इति च। (३,३,१९ पा०) घञ्। सूर्यः प्रभवो यस्य स सूर्यप्रभवः वंशः क, अल्पो विषयो ज्ञेयोऽर्थो यस्याः सा मे मतिः प्रज्ञा च क, द्वौ कशब्दौ महदन्तरं सूचयतः। सूर्यवंशमाकलयितुं न शक्नोमीत्यर्थः। तथा च तद्विषयप्रबन्धनिर्माणं दूरापास्तमिति भावः। तथाहि दुस्तरं तरितुमशक्यम्। ईषद्दुःसुषु(३,३,१२६पा०) इत्यादिना खल्प्रत्ययः। सागरं मोहादज्ञानादुडुपेन प्लवेन। "उडुपन्तु प्लवः कोल" इत्यमरः। अथ वा चर्मावनद्धेन पानपात्रेण। "चर्मावनद्धमुडुपं प्लवः काष्ठं करण्डवदिति" सज्जनः। तितीर्षुः तरीतुमिच्छुरस्मि भवामि। तरतेः सन्नन्तादुप्रत्ययः। अल्पसाधनैरधिकारम्भो न सुकर इति भावः। इदञ्च वंशोत्कर्षकथनं स्वप्रबन्धमहत्त्वार्थमेव। तदुक्तं "प्रतिपाद्यमहिम्ना च प्रबन्धो हि महत्तर" इति॥ २॥

मन्द इति। किञ्च मन्दो मूढः। "मूढाल्पापटुनिर्भाग्या मन्दा" इत्यमरः। तथापि कवियशःप्रार्थी कवीनां यशः काव्यनिर्माणेन यत् जातं तत्प्रार्थनाशीलोऽहं प्रांशुनोन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये लोभात् उद्बाहुः फलग्रहणायोच्छ्रितहस्तो वामनः खर्व इव। "खर्वो ह्रस्वश्च वामन" इत्यमरः। उपहास्यतामुपहासविषयताम्। ऋहलोर्ण्यत् इति(३,१,१२४,पा०) * ण्यत्प्रत्ययः। गमिष्यामि प्राप्स्यामि। ३॥

---

* ईषदादिषूपपदेषु धातोः कृच्छ्राकृच्छ्रार्थे खल् स्यात् इति कर्मणि खल्। तयोरेव कृत्यक्तखलर्थाः (३,४,७०,पा०) इति सूत्रात् तच्च भावकर्मणोः।

अथ वा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥ ४॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥ ५॥

मन्दश्चेत्तर्हि त्यज्यतामयमुद्योग इत्यत आह

अथ वेति। अथ वा पश्चात्तरे पूर्व्वैः सूरिभिः कविभिर्वाल्मीकादिभिः कृतवाग्द्वारे कृतं रामायणादिप्रबन्धरूपा या वाक् सैव द्वारं प्रवेशो यस्य तस्मिन् अस्मिन् सूर्य्यप्रभवे वंशे कुले। जन्मनैकलक्षणः सन्तानो वंशः। वज्रेण मणिवेधकसूचीविशेषेण। "वज्रं त्वस्त्री कुलिशशस्त्रयोः मणिवेधे रत्नभेदे" इति केशवः। समुत्कीर्णे विद्धे मणौ रत्ने सूत्रस्येव मे मम गतिः सञ्चारोऽस्ति वर्णनीये रघुवंशे मम वाक्प्रसरोऽस्तीत्यर्थः॥ ४॥

एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनां प्रतिजानानः सोऽहमित्यादिभिः पञ्चभिः श्लोकैः कुलकेनाह

सोऽहमिति। सोऽहं रघूणामन्वयं वक्ष्ये इत्युत्तरेण सम्बन्धः। किंविधानां रघूणामित्यत उत्तराणि विशेषणानि योज्यानि। आजन्मनः जन्म आरभ्येत्यर्थः। आङ् मर्य्यादाभिविध्योः* (२,१,१३पा०) इत्यव्ययीभावः। शुद्धानाम्। सुप्सुपेति समासः†। एवमुत्तरत्रापि द्रष्टव्यम्।

*सीमाभिविध्यर्थयोर्वर्त्तमानआङ् समर्थेन सह समस्यते सोऽव्ययीभावः।
† सह सुपा (२,१,४ पा०) इति सुबन्तेन सह समर्थं सुबन्तं समस्यते इत्यर्थकेन सूत्रेण समासः।

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।

आजन्मशुद्धानां निषेकादिसर्व्वसंस्कारसम्पन्नानामित्यर्थः आफलोदयम् आ फलसिद्धेः कर्म्म येषां ते तथोक्तास्तेषां प्रारब्धान्तगामिनामित्यर्थः । आसमुद्रं क्षितेरीशानां सार्व्वभौमानामित्यर्थः। आनाकं रथवर्त्म येषां ते तेषामिन्द्रसहचारिणामित्यर्थः । अत्र सर्व्वत्र आङोऽभिविध्यर्थत्वं द्रष्टव्यम् अन्यथा मर्य्यादार्थत्वे जन्मादिषु शुद्ध्यभावप्रसङ्गात् ॥ ५ ॥

यथाविधीति। विधिमनतिक्रम्य यथाविधि यथाऽसादृश्ये(२,१,७पा०) इत्यव्ययीभावः । तथा हुतशब्देन सुप्सुपेति समासः । एवं यथाकामार्चितेत्यादीनामपि द्रष्टव्यम् । यथाविधिहुताः अग्नयो यैस्तेषां यथा काममभिलाषमनतिक्रम्य अर्चितार्थिनां, यथापराधमपराधमनतिक्रम्य दण्डो येषां ते तेषां, यथाकालं कालमनतिक्रम्य प्रबोधिनां प्रबोधनशीलानाम् । चतुर्भिर्विशेषणैर्देवतायजनार्थिसत्कारदण्डधरत्वप्रजापालनसमयजागरूकत्वादीनि विवक्षितानि ॥ ६ ॥

त्यागायेति । त्यागाय सत्पात्रे विनियोगस्त्यागस्तस्मै । "त्यागो विहापितं दानम्"इत्यमरः । सम्भृतार्थानां सञ्चितधनानां न तु दुर्व्यापाराय, सत्याय मितभाषिणां मितभाषणशीलानां न तु पराभवाय । यशसे कीर्त्तये । "यशः कीर्त्तिः समज्ञा च"इत्यमरः । विजिगीषूणां विजेतुमिच्छूनां न त्वर्थसंग्रहाय, प्रजायै सन्तानाय गृहमेधिनां न तु

---

*निषेको गर्भाधानं तदादिभिः पुंसवनसीमन्तोन्नयनादिभिः संस्कृतानाम् ।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥७॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥८॥

कामोपभोगाय। अत्र त्यागायेत्यादिषु चतुर्थी तदर्थेत्यादिना * (२,१, पा०) तादर्थ्ये चतुर्थीसमासविधानज्ञापकाच्चतुर्थी। गृहैर्दारैर्मेधन्ते सङ्गच्छन्ते इति गृहमेधिनः। "दारेष्वपि गृहा" इत्यमरः, "जाया च गृहिणी" गृहमिति हलायुधः। मेध सङ्गमेइति धातोर्णिनिः। एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशःपरत्वं पितृणामृणशुद्धत्वञ्च विवक्षितम् ॥ ७ ॥

शैशवइति। शिशोर्भावः शैशवं बाल्यम्। प्राणभृज्जातिवयोवचनोद्गात्रेत्यदिना†(५,१,१२९पा०)अञ्प्रत्ययः।शिशुत्वं शैशवं बाल्य"मित्यमरः।तस्मिन् वयसि अभ्यस्तविद्यानाम् एतेन ब्रह्मचर्य्याश्रमोविवक्षितः। यूनोभावोयौवनं तारुण्यम्। (५,१,१३०पा०) युवादित्वादण्प्रत्ययः। "तारुण्यं यौवनं समं"मित्यमरः। तस्मिन् वयसि विषयैषिणां भोगाभिलाषिणाम् एतेन गृहस्थाश्रमो विवक्षितः। वृद्धस्य भावो "वार्द्धकं वृद्धत्वम्। द्वन्द्वमनोज्ञादिभ्यश्च(५,१,१३३पा०) इति वुञ्। "वार्द्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्म्मणी"ति विश्वः। तस्मिन् वार्द्धके वयसि मुनीनां वृत्तिरिव वृत्तिर्येषां तेषाम् एतेन वानप्रस्थाश्रमो विवक्षितः। अन्ते शरीरत्यागकाले योगेन परमात्मध्यानेन।"योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः। तनुं देहं त्यजन्तीति तनुत्यजाम् देहत्यागि-

---

* चतुर्थ्यन्तार्थायेदं यत् तत् तदर्थं तेन अर्थादिशब्देश्च चतुर्थ्यन्तं पदं समस्यते स तत्पुरुषः ः

† प्राणभृतां जातिवाचिनोवयोवाचिन उद्गपगात्रादिभ्यश्च अञ् स्याद्भावे।

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रणोदितः ॥ ९ ॥
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥

नाम्। "कायो देहः क्लीवपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनुः" इत्यमरः। अन्येभ्योऽपि दृश्यते इति (३,२,१७८ पा०) क्विप्। एतेन भिक्षाश्रमो विवक्षितः ॥ ८ ॥

रघूणामिति। सोऽहं लब्धप्रवेशः तनुवाग्विभवोऽपि स्वल्पवाणीप्रसारोऽपि सन् तेषां गुणैस्तद्गुणैः आजन्मशुद्धादिभिः कर्त्तृभिः कर्णं मम श्रोत्रमागत्य चापलाय चापलं चपलकर्म्म अविमृश्यकरणरूपं कर्त्तुम्। युवादित्वात् (५,१,१३० पा०) कर्म्मण्यण्। क्रियार्थोपपदस्येत्या (२,३,१४ पा०) *दिना चतुर्थी। प्रणोदितः प्रेरितः सन् रघूणामन्वयं तद्विषयप्रबन्धं वक्ष्ये ॥ कुलकम् ॥ ९ ॥

सम्प्रति स्वप्रबन्धपरीक्षार्थं सतः प्रार्थयते

तमिति। तं रघुवंशाख्यं प्रबन्धं सदसतोर्गुणदोषयोः व्यक्तेर्हेतवः कर्त्तारः सन्तः श्रोतुमर्हन्ति तथाहि हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिकापि लोहान्तरसंसर्गात्मको दोषोऽपि वा अग्नौ संलक्ष्यते नान्यत्र तद्वदत्रापि सन्त एव गुणदोषविवेकाधिकारिणो नान्ये इति भावः ॥ १० ॥

---

* क्रियार्थोपपदं यस्य तस्य तुमुन्नन्तस्य स्थानिनोऽप्रयुज्यमानस्यापि कर्म्मणि चतुर्थी स्यात्।

वैवस्वतोमनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥११॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव॥१२॥

वर्ण्यं वस्तूपक्षिपति वैवस्वतइति। मनस ईषिणो मनीषिणः धीराः विद्वांस इतियावत्। (६,३,१०९पा०)पृषोदरादित्वात् साधुः। तेषां माननीयः पूज्यः, छन्दसां वेदानाम्। "छन्दः पद्ये च वेदे" चेति विश्वः। प्रणव ओंकारइव, महीं क्षियन्ति ईशते इति महीक्षितः क्षितीश्वराः। क्षिधातोरैश्वर्यार्थात् क्विप् * तुगागमश्च। तेषामाद्यः आदिभूतः विवस्वतः सूर्यस्यापत्यं पुमान् वैवस्वतोनाम वैवस्वतइति प्रसिद्धो मनुरासीत्॥११॥

तदन्वयइति। शुद्धिरस्यास्तीति शुद्धिमान् तस्मिन् शुद्धिमति तदन्वये तस्य मनोरन्वये वंशे, "अन्ववायोऽन्वयोवंशोगोत्रञ्चाभिजनः कुल"-मिति हलायुधः। अतिशयेन शुद्धिमान् शुद्धिमत्तरः। द्विवचनविभज्योपेत्यादिना (५,३,५७, पा०) तरप्। दिलीपइति प्रसिद्धो राजा-इन्दुरिव राजेन्दुः राजश्रेष्ठः। उपमितं व्याघ्रादिभिः † (२,१,५६पा०) इत्यादिना ‡ समासः। क्षीरनिधाविन्दुरिव प्रसूतः जातः॥१२॥

---

* ह्रस्वस्य पिति कृति तुक्(६,१,७१,पा०)सूत्रेणेति शेषः।

† द्विवचने विभज्ये(भिन्नात्मके निर्धार्ये) उपपदे च स्वार्थे तर-बीयसुनौ स्तः।

‡ व्याघ्रादिभिः सह उपमितं वा समस्यते स तत्पुरुषः तयोश्चेदुप-मानोपमेययोः साधारणधर्मो न प्रयुज्यते।

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्म्मक्षमं देहं क्षात्त्रो धर्म्म इवाश्रितः॥ १३॥
सर्वातिरिक्तसारेण सर्व्वतेजोऽभिभाविना ।
स्थितः सर्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना॥ १४

व्यूढेति । व्यूढेत्यादिभिस्त्रिभिः श्लोकैर्दिलीपं विशिनष्टि । व्यूढं विपुलम् उरो यस्य सः व्यूढोरस्कः । उरःप्रभृतिभ्यः (५,४,१५१ पा०) कप् । "व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठ" इति यादवः । वृषस्य स्कन्ध इव स्कन्धो यस्य स तथा । सप्तम्युपमानेत्यादिना (२,२,२४,पा० वा०)*उत्तरपदलोपी बहुव्रीहिः।शालो वृक्षइव प्रांशुरुन्नतः शालप्रांशुः। "प्राकारवृक्षयोः शालः शालः सर्ज्जतरुः स्मृत" इति यादवः। "उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे" इत्यमरः । महाभुजो महाबाहुः आत्मकर्म्मक्षमं स्वव्यापारानुरूपं देहम् श्रितः प्राप्तः क्षात्त्रः क्षत्त्रसम्बन्धी धर्म्म इव स्थितः मूर्त्तिमान् पराक्रम इव स्थित इत्युत्प्रेक्षा ॥ १३ ॥

सर्वातिरिक्तेति । सर्वातिरिक्तसारेण सर्वेभ्योभूतेभ्योऽधिकबलेन । "सारो बले स्थिरांशे च" इत्यमरः। सर्वाणि भूतानि तेजसा अभिभवतीति सर्व्वतेजोऽभिभावी तेन सर्व्वेभ्य उन्नतेनात्मना शरीरेण । "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनी"ति विश्वः । मेरुरिव उर्व्वीं क्रान्त्वा आक्रम्य स्थितः । मेरावपि विशेषणानि तुल्यानि । अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्म्मितो नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसेति मनुवचनाद्राज्ञः सर्व्वतेजोऽभिभावित्वं ज्ञेयम् ॥ १४ ॥

---

* सप्तम्यन्तपूर्वपदः उपमानपूर्वपदकश्च समर्थेन सह समस्यते स बहुव्रीहिः उत्तरपदलोपश्च ।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ १५॥
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥
रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥१७॥

आकारेति । आकारेण मूर्त्त्या सदृशी प्रज्ञा यस्य सः, प्रज्ञया सदृशागमः प्रज्ञानुरूपशास्त्रपरिश्रमः, आगमैः सदृशः आरम्भः कर्म्म यस्य स तथोक्तः, आरभ्यत इत्यारम्भः कर्म्म तत्सदृश उदयः फलसिद्धिर्यस्य स तथोक्तः ॥ १५ ॥

भीमेति । भीमैः कान्तैश्च नृपगुणैः राजगुणैस्तेजःप्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च स दिलीपः उपजीविनामाश्रितानां यादोभिः जलजीवैः । "यादांसि जलजन्तव" इत्यमरः । रत्नैश्च अर्णव इवाधृष्यः अनभिभवनीयश्च अभिगम्य आश्रयणीयश्च बभूव ॥ १६ ॥

रेखामात्रमिति । नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य सम्बन्धिन्यः नेमीनां चक्रधाराणां वृत्तिरिव वृत्तिर्व्यापारो यासां ताः । "चक्रधारा प्रधिर्नेमि"रिति यादवः। "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानि"त्यमरः। प्रजाः आ मनोः मनुमारभ्येत्यभिविधिः । पदद्वयञ्चैतत् समासस्य * विभाषितत्वात् । क्षुण्णादभ्यस्तात् प्रहताच्च वर्त्मनः आचारपद्धतेरध्वनश्च परमधिकमित्यर्थः । रेखा प्रमाणमस्येति रेखामात्रं रेखाप्रमाणमीषदपीत्यर्थः । प्रमाणे द्वयसजित्यादिना

---

* आङ् मर्यादाभिविध्योः (२,१,१३ पा०) इति सूत्रस्य विभाषाधिकारीयत्वात् विकल्पेन समासः ।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥१८॥
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता॥१९॥

(५,२,३७,पा०) मात्रच्प्रत्ययः। पदशब्दविशेषणञ्चैतत्। न व्यतीयुः नातिक्रान्तवन्तः। कुशलसारथिप्रेरिता रथनेमयइव तस्य प्रजाः पूर्वं चुस्मार्गं न जहुरिति भावः॥ १७॥

प्रजानामिति। स राजा प्रजानां भूत्यै अर्थाय भूत्यर्थं इदमर्थमेव। अर्थेन सह नित्यसमासःसर्वलिङ्गता च वक्तव्या(२,१,३६पा०वा०)इत्यण क्रियाविशेषणञ्चैतत्। ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत्। "राजदेयः करोबलि"रित्यमरः। तथाहि रविः, सहस्रं गुणा यस्मिन् कर्म्मणि तद्यथा तथा सहस्रधा उत्स्रष्टुं दातुम्। उत्सर्ज्जनक्रियाविशेषणञ्चैतत्। रसमम्बु आदत्ते गृह्णाति। "रसोगन्धे रसे स्वादे तिक्तादौ विषरोगयोः। शृङ्गारादौ द्रवे वीर्य्ये देहधात्वम्बुपारदे" इति विश्व॥ १८॥

सम्प्रति बुद्धिशौर्य्यसम्पन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह।

सेनेति। तस्य राज्ञः सेना चतुरङ्गबलं परिच्छाद्यतेऽनेनेति परिच्छदः उपकरणं अभूव छत्रचामरादितुल्यमभूदित्यर्थः। पुंसि संज्ञायां घः प्रायेणेति (३,३,११८पा०) घप्रत्ययः। छादेर्घे ऽद्व्युपसर्गस्य * (६,४,९६, पा०) इत्युपधाह्रस्वः। अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव शास्त्रेष्वकुण्ठिता अव्याहता बुद्धिः व्याहतेत्यपि पाठः। धनुषि आतता आरोपिता मौर्वी च। "मौर्वी ज्या शिञ्जिनी गुण"इत्यमरः। नीतिपुरःसरमेव तस्य शौर्य्यमभूदित्यर्थः॥ १९॥

---

* उपसर्गद्वयरहितस्य छादे र्ह्रस्वः स्यात् घप्रत्यये परे।

तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ २० ॥
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१ ॥

राज्यमूलं मन्त्रसंवरणं तस्यासीदित्याह

तस्येति । संवृतमन्त्रस्य गुप्तविचारस्य । "वेदभेदे गुप्तवादे मन्त्र"-इत्यमरः । शोकहर्षादिसूचको भ्रुकुटीमुखरागादिराकारः इङ्गितं चेष्टितं हृदयगतविकारो वा । "इङ्गितं हृद्गतो भावो वहिराकार आकृति"रिति सज्जनः । गूढे आकारेङ्गिते यस्य स्वभावचापलात् आप्तपरम्परया मुखरागादिलिङ्गैर्वा अप्रतीयमानमन्त्रस्य तस्य प्रारभ्यन्ते इति प्रारम्भाः सामाद्युपायप्रयोगाः । प्रागित्यव्ययेन पूर्वजन्मोच्यते । तत्र भवाः प्राक्तनाः । सायञ्चिरेत्यादिना (४,३,२३ पा०) ट्युल् प्रत्ययः । संस्काराः पूर्वकर्मवासना इव फलेन कार्येणानुमेया अनुमातुं योग्या आसन् । अत्र याज्ञवल्क्यः । "मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् । कुर्याद्यथा तन्न विदुः कर्मणामाफलोदया"दिति ॥ २० ॥

सम्प्रति सामाद्युपायान् विनैवात्मरक्षादिकं कृतवानित्याह

जुगोपेति । अत्रस्तः अभीतः सन् । "त्रस्तो भीरुर्भीरुकभीलुका" इत्यमरः । त्रासोपाधिमन्तरेणैव त्रिवर्गसिद्धेः प्रथमसाधनत्वादेवात्मानं शरीरं जुगोप रक्षितवान् । अनातुरः अरुग्ण एव धर्मं सुकृतं भेजे अर्जितवानित्यर्थः । अगृध्नुरगर्द्धनशील एव अर्थमाददे स्वीकृतवान् । "गृध्नुस्तु गर्धनः । लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभा"वित्यमरः । त्रसिगृधिधृषिक्षिपेः क्नुरिति (३,२,१४० पा०) क्नुप्रत्ययः । असक्तः आसक्तिरहित एव सुखमन्वभूत् ॥ २१ ॥

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२ ॥
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्म्मरतेरासीद्‌वृद्धत्वं जरसा विना॥ २३॥

परस्परविरुद्धानामपि गुणानां तत्र साहचर्य्यमासीदित्याह

ज्ञान इति। ज्ञाने परवृत्तान्तज्ञाने सत्यपि मौनं वाङ्‌नियमनं यथाह कामन्दकः "नान्योपतापि वचनं मौनं व्रतचरिष्णुतेति"। शक्तौ प्रतीकारसामर्थ्येऽपि क्षमा अपकारसहनम्। अत्र चाणक्यः "शक्तानां भूषणं क्षमे"ति। त्यागे वितरणे सत्यपि श्लाघाया विकत्थनस्य विपर्य्ययोऽभावः। अत्राह मनुः। "न दत्त्वा परिकीर्त्तयेदि"ति। इत्थं तस्य गुणाः ज्ञानादयः गुणैर्विरुद्धैर्मौनादिभिरनुबन्धित्वात् सहचारित्वात् सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव अभूवन् विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैव स्थिता इत्यर्थः॥ २२॥

द्विविधं वृद्धत्वं ज्ञानेन वयसा च तत्र तस्य ज्ञानेन वृद्धत्वमाह

अनाकृष्टस्येति। विषयैः शब्दादिभिः। "रूपं शब्दोगन्धरसस्पर्शाश्च विषया अमी" इत्यमरः। अनाकृष्टस्यावशीकृतस्य विद्यानां वेदवेदाङ्गादीनां पारदृश्वनः पारमन्तं दृष्टवतः। दृशेः क्वनिप्। धर्म्मे रतिर्यस्य तस्य राज्ञः जरसा जरया विना। "विस्रसा जरे"त्यमरः। षिद्भिदादिभ्योऽङ् (३,३,१०४पा०)* इति अङ् प्रत्ययः। जराया जरसन्यतरस्याम् (७,२,१०१पा०)† इति जरसादेशः। वृद्धत्वं वार्द्धकमासीत्। तस्य यूनोऽपि विषयवैराग्यादिगुणसम्पत्त्या ज्ञानतो वृद्धत्वमासीदित्यर्थः। नाथस्तु चतुर्विधं वृद्धत्वमिति ज्ञात्वा अनाकृष्टस्येत्यादिना विशेषणत्रयेण वैराग्य ज्ञानशीलवृद्धत्वान्युक्तानीत्यवोचत् ॥२३॥

---

*षितो भिदादिभ्यश्च भावेऽङ् स्यात् तदन्तञ्च स्त्रियाम्। जीर्य्यतेश्च षित्त्वादङ्
† जराशब्दस्थाने जरसादेशो वा स्यादजादौ परे।

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥
स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः ॥ २५ ॥

प्रजानामिति । प्रजायन्ते इति प्रजाः जनाः । उपसर्गे च संज्ञायाम् *(३,२,९९ पा०) इत्यड्प्रत्ययः । "प्रजा स्यात् सन्ततौ जने" इत्यमरः । तासां विनयस्य शिक्षायाः आधानात् करणात् सन्मार्गप्रवर्त्तनादिति यावत् रक्षणाद्भयहेतुभ्यस्त्राणात् आपन्निवारणादिति यावत् भरणादन्नपानादिभिः पोषणादपि । अपिः समुच्चये । स राजा पिता अभूत् तासां पितरस्तु जन्महेतवो जन्ममात्रकर्त्तारः केवलमुत्पादकाएवाभूवन् । जननमात्रएव पितॄणां व्यापारः सदा शिक्षारक्षणादिकन्तु स एव करोति स्मेति तस्मिन् पितृत्वव्यपदेशः । आहुश्च "स पिता यस्तु पोषक" इति ॥ २४ ॥

स्थित्याइति । दण्डमर्हन्तीति दण्ड्याः । दण्डादिभ्योयदिति (५,१,६६ पा०) यत् प्रत्ययः । "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकञ्चैव गच्छतीति" शास्त्रवचनात् तान् दण्ड्यानेव स्थित्यै लोकप्रतिष्ठायै दण्डयतः शिक्षयतः प्रसूतये सन्तानाय एव परिणेतुः दारान् परिगृह्णतःमनीषिणो विदुषो दोषज्ञस्येति यावत् । "विद्वान्विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः । धीरोमनीषी" इत्यमरः । तस्य अर्थकामावपि धर्म्मएवास्तां जातौ । अस्तेर्लङ् । अर्थकामसाधनयोर्दण्डविवाहयोर्लोकस्थापनप्रजोत्पादनरूपधर्म्मार्थत्वेन अनुष्ठानादर्थकामावपि धर्मशेषतामापादयन् स राजा धर्म्मोत्तरोऽभूदित्यर्थः । आह हि गौतमः "न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्यात् यथाशक्ति धर्म्मार्थकामेभ्यः तेषु धर्म्मोत्तरः स्यात्" इति ॥ २५ ॥

* उपसर्गे उपपदे जनेरड् स्यात् संज्ञायाम् ।

दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतु र्भुवनद्वयम् ॥ २६ ॥
न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ २७ ॥
द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८ ॥

दुदोहेति । स राजा यज्ञाय यज्ञं कर्त्तुं गां भुवं दुदोह करग्रहणेन रिक्तां चकारेत्यर्थः । मघवा देवेन्द्रः शस्याय शस्यं वर्द्धयितुं दिवं स्वर्गं दुदोह द्युलोकान्महीलोके वृष्टिमुत्पादयामास इत्यर्थः । क्रियार्थोपपदस्येत्यादिना (२,३,१४ पा॰) * यज्ञशस्याभ्यां चतुर्थी । एवमुभौ सम्पदोर्विनिमयेन परस्परदानप्रतिदानाभ्यां भुवनद्वयं दधतुः पुपुषतुः । राजा शक्रं यज्ञैरिन्द्रश्च उदकेन भूलोकं पुपोषेत्यर्थः । उक्तञ्च दण्डनीतौ "राजा त्वर्थान् समाहृत्य कुर्यादिन्द्रमहोत्सवम् । प्रीणितो मेघवाहस्तु महती वृष्टिमावहे"दिति ॥ २६ ॥

न किलेति । राजानोऽन्ये नृपाः रक्षितुर्भयेभ्यस्त्रातुस्तस्य राज्ञो यशो नानुययुः किल नानुचक्रुः खलु कुतः यत् यस्मात् कारणात् तस्करता चौर्यं परस्वेभ्यः परधनेभ्यः स्वविषयभूतेभ्यो व्यावृत्ता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता अपहार्याभावात्तस्करशब्द एव व्याहृत इत्यर्थः । अथ वा "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हो"ति न्यायेन शब्दस्थिता स्फुरिता न स्वरूपतोऽस्तीत्यर्थः ॥ २७ ॥

द्वेष्यइति । शिष्टो जनो द्वेष्यः शत्रुरप्यार्त्तस्य रोगिण औषधं यथा औषधमिव तस्य सम्मतोऽनुमतः आसीत् दुष्टो जन प्रियोऽपि मेला

* क्रियार्थोपपदस्य (तुमुन्नन्तस्य) अप्रयुज्यमानस्य कर्म्मणि चतुर्थी स्यात् ।

तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः ॥२९

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥३०॥

स्पष्टीभूतोऽपि उरगक्षता सर्पदष्टा अङ्गुलीव "छिन्द्यादाङ्गमपि दुष्टात्मन"इति न्यायात् त्याज्य आसीत् । तस्य शिष्टएव बन्धुर्दुष्टएव शत्रुरित्यर्थः ॥ २८ ॥

तस्य परोपकारित्वमाह

तमिति । वेधाः स्रष्टा । "स्रष्टा प्रजापतिर्वेधा"इत्यमरः । तं दिलीपं समाधीयतेऽनेनेति समाधिः कारणसामग्री महाभूतानां यः समाधिस्तेन विदधे ससर्ज्ज नूनं ध्रुवमित्युत्प्रेक्षा । तथाहि तस्य राज्ञः सर्वे गुणाः रूपरसादिमहाभूतगुणवदेव परार्थः परप्रयोजनमेवैकं मुख्यं फलं येषां ते तथोक्ता आसन् । महाभूतगुणोपमानेन "कारणगुणाः कार्य्ये संक्रामन्ती"ति न्यायः सूचितः ॥ २९ ॥

स इति । स दिलीपः वेलाः समुद्रकूलानि । "वेला कूलेऽपि वारिधे"रिति विश्वः । ताएव वप्रवलयाः प्राकारवेष्टनानि यस्याः ताम् । "स्याच्चयोवप्रमस्त्रियाम् प्राकारोवरणः शालः प्राचीरं प्रान्ततो वृतिः"-रित्यमरः । परितः खातं परिखा दुर्गवेष्टनं खातम् । "खेयन्तु परिखे"त्यमरः । अन्येष्वपि दृश्यते(३,१०१,६, पा०) * इत्यत्र अपिशब्दात् खनेर्डप्रत्ययः । अपरिखाः परिखाः सम्पद्यमानाः कृताः परिखीकृताः सागरा यस्याः ताम् । (५,४,५०पा०वा०) अभूततद्भावे च्विः अविद्यमानमन्यस्य राज्ञः शासनं यस्यास्ताम् अनन्यशासनामुर्वीम्-एकपुरीमिव शशास अनायासेन पालितवानित्यर्थः ॥ ३० ॥

---

* अन्येष्वपि उपपदेषु धातोर्डः स्यात् ।

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥३१॥
कलत्रवन्तमात्मानमवरोधे महत्यपि।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः॥३२
तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः॥३३॥

तस्येति। तस्य राज्ञः मगधवंशे जाता मगधवंशजा। सप्तम्यां जनेर्ड इति * (३,२,९७पा०) एतेनाभिजात्यमुक्तम्। दाक्षिण्यं परच्छन्दानुवर्त्तनम्। "दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिषु" इति शाश्वतः। तेन रूढं प्रसिद्धं तेन नाम्ना अध्वरस्य यज्ञस्य दक्षिणाख्या पत्नीव सुदक्षिणा आसीत्। दक्षिणाया दाक्षिण्यं नाम ऋत्विजोदक्षिणात्वप्रापकत्वम् "ते दक्षन्ते दक्षिणां प्रतिग्टह्येति" श्रुतेः ॥३१॥

कलत्रवन्तमिति। वसुधाधिपः अवरोधे अन्तःपुरवर्गे महति सत्यपि मनस्विन्या दृढ़चित्तया पतिचित्तानुवृत्त्यादिनिर्बन्धक्षमयेत्यर्थः तया सुदक्षिणया लक्ष्म्या च आत्मानं कलत्रवन्तं भार्य्यावन्तं मेने। "कलत्रं श्रोणिभार्य्ययो"रित्यमरः। वसुधाधिपइत्यनेन वसुधया नेति गम्यते ॥३२॥

तस्यामिति। स राजा आत्मानुरूपायां तस्याम् आत्मनोजन्म यस्यासौ आत्मजन्मा पुत्रस्तस्मिन् समुत्सुकः यद्वा आत्मनोजन्मनि पुत्ररूपेणोत्पत्तौ समुत्सुकः सन्। "आत्मा वै पुत्रनामासीति" श्रुतेः। विलम्बितं फलं पुत्रप्राप्तिरूपं येषां तैर्मनोरथैः कदा मे पुत्रोभवेदित्याशाभिः कालं निनाय यापयामास ॥३३॥

* सप्तम्यन्ते उपपदे जनेर्डः स्यात्।

सन्तानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥३४॥
अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥३५॥
स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।

सन्तानेति। तेन दिलीपेन सन्तानः अर्थः प्रयोजनं यस्य तस्मै सन्तानार्थाय विधये अनुष्ठानाय स्वभुजात् अवतारिता अवरोपिता जगतो लोकस्य गुर्वी धूर्भारः सचिवेषु निचिक्षिपे निहिता ॥ ३४ ॥

अथेति। अथ धुरोऽवतारणानन्तरं पुत्रकाम्यया आत्मनः पुत्रेच्छया। * काम्यच्चेति (३,१,९पा०) पुत्रशब्दात् काम्यच्प्रत्ययः। † अ प्रत्ययादिति (३,३,१२,पा०) पुत्रकाम्यधातोरकारप्रत्ययः ततष्टाप्। तथा तौ दम्पती जायापती। राजदन्तादिषु२,२,३१,जायाशब्दस्य दमिति निपातनात् साधुः। प्रयतौ यत्तौ विधातारं ब्रह्माणमभ्यर्च्य। स खलु पुत्रार्थिभिरुपास्यत इति तान्त्रिकाः। गुरोः कुलगुरोर्वशिष्ठस्याश्रमं जग्मतुः पुत्रप्राप्त्युपायापेक्षयेति शेषः ॥ ३५ ॥

स्निग्धेति। स्निग्धो मधुरो गम्भीरो निर्घोषो यस्य तम् एकं स्यन्दनं रथं प्रावृषि भवः प्रावृषेण्यः। प्रावृष एण्य इति (४,३,१७पा०) एण्यप्रत्ययः। तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ जग्म-

---

* आत्मनः कर्मत्वेनेच्छायां सुबन्तात् काम्यच् स्यात् चात् क्यच्।

† प्रत्ययान्तधातोर्भावे अः स्यात् तदन्तस्य स्त्रियाम्।

प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६ ॥
मा भूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७ ॥
सेव्यमानौ सुखस्पर्शैः शालनिर्य्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८ ॥

तदिति पूर्वेण सम्बन्धः। इरा आपः।"इरा भूवाक्सुरापसु स्यादि"त्यमरः। इरावान् समुद्रस्तत्र भव ऐरावतोऽभ्रमातङ्गः। "ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा"इत्यमरः।"अभ्रमातङ्गत्वाच्चाभ्रस्थत्वादभ्रत्व त्वा"दिति चीरस्वामी। अतएव मेघारोहणं विद्युत्साहचर्य्यञ्च घटते। किञ्च विद्युतऐरावतसाहचर्य्यादेव ऐरावती संज्ञा "ऐरावतस्य स्त्री ऐरावती"ति चीरस्वामी। तस्मात्सुष्ठूक्तं विद्युदैरावताविवेति। एकरथारोहणोक्त्या कार्य्यसिद्धिबीजं दम्पत्योरत्यन्तसौमनस्यं सूचयति ॥ ३६॥

'मा भूदिति। पुनः कथम्भूतौ दम्पती आश्रमपीड़ा मा भूत् मास्त्विति हेतोः। माङि लुङ् (३,३,१७५ पा०) इत्याशीरर्थे लुङ् न माङ्योग (६,४,७४,) इत्यड़ागमनिषेधः। परिमेयपुरःसरौ परिमितपरिचरौ अनुभावविशेषात्तु तेजोविशेषात् सेनापरिवृताविव स्थितौ ॥ ३७ ॥

सेव्यमानाविति। पुनः कथम्भूतौ सुखः शीतलत्वात् प्रियः स्पर्शो-येषां तैः शालनिर्य्यासगन्धिभिः सर्जतरुनिष्यन्दगन्धवद्भिः। "शालः सर्जतरुः स्मृत"इति शाश्वतः। उत्किरन्ति विक्षिपन्तीति उत्किराः। इगुपधेत्यादिना (३,१,१३५पा०) किरतेः कप्रत्ययः।' पुष्परेणूनामुत्किरास्तैः आधूताः मान्द्यादीषत्कम्पिताः वनराजयोयैस्तैर्व्वातैः सेव्यमानौ ॥ ३८ ॥

मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।[३९
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४० ॥

मनइति । रथनेमिस्वनोन्मुखैर्मेघध्वनिशङ्कया उन्नमितमुखैरित्यर्थः । शिखण्डिभिर्मयूरैर्द्विधा भिन्नाः शुद्धविकृतभेदेन आविष्कृतावस्थायां च्युताच्युतभेदेन वा षड्जोद्विविधः तत्सादृश्यात् केका अपि द्विधा भिन्ना इत्युच्यते अतएवाह षड्जसंवादिनीरिति षड्भ्यः स्थानेभ्योजातः षड्जः । तदुक्तं "नासां कण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् । षड्भ्यः सञ्जायते यस्मात्तस्मात् षड्जइति स्मृतः" । स च तन्त्रीकण्ठजन्मा स्वरविशेषः । "निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" इत्यमरः । षड्जेन संवादिनीः सदृशीः । तदुक्तं "मातङ्गो निषादेन षड्जेन मयूरोवदतीति" । मनोऽभिरामाः मनसः प्रियाः के मूर्ध्नि कायन्ति ध्वनन्तीति केकाः मयूरवाण्यः । "केका वाणी मयूरस्ये"त्यमरः । ताः केकाः शृण्वन्ताविति श्लोकार्थः ॥ ३९ ॥

परस्परेति । विश्वासाददूरं समीपं यथा भवति तथा उज्झितं वर्त्म यैस्तेषु स्यन्दनाबद्धदृष्टिषु स्यन्दने रथे आबद्धा आसञ्जिता दृष्टि र्नेत्रं यैस्तेषु । "दृग्दृष्टिलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणीति" हलायुधः । कौतुकवशादृयासक्तदृष्टिष्वित्यर्थः । मृगा मृग्यश्च । पुमान् स्त्रिया*(१,२,६७पा०) इत्येकशेषः । तेषां द्वन्द्वेषु मिथुनेषु । "स्त्रीपुंसौ मिथुनं द्वन्द्वमित्यमरः । परस्परस्य अक्षिसादृश्यं पश्यन्तौ । द्वन्द्वशब्दसामर्थ्यात् मृगीषु मृगाक्षिणाक्षिसादृश्यं दिलीपाक्षिसादृश्यं च मृगेष्वित्येवं विवेक्तव्यम् ॥ ४० ॥

---

* स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षणश्चेदेव विशेषः ।

श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४१॥
पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२॥
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणम्॥ ४३

श्रेणीति । श्रेणीबन्धात् पङ्क्तिबन्धनाद्धेतोः अस्तम्भाम् आधारस्तम्भरहितां तोरणं वहिर्द्वारम् । "तोरणोऽस्त्री वहिर्द्वार"मित्यमरः । तत्र या स्रग्विरच्यते तां तोरणस्रजं वितन्वद्भिः कुर्वद्भिरिवेत्यर्थः । उत्प्रेक्षाव्यञ्जकेवशब्दप्रयोगाभावेऽपि गम्योत्प्रेक्षेयम् । कलनिर्ह्रादैः अव्यक्तमधुरध्वनिभिः सारसैः पक्षिविशेषैः करणैः क्वचिदुन्नमिताननौ । "सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय" इति यादवः ॥ ४१ ॥

पवनस्येति । प्रार्थनासिद्धिशंसिनः अनुकूलत्वादेव, मनोरथसिद्धिसूचकस्य पवनस्य अनुकूलत्वादन्यदिगभिमुखत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टा अलका देव्याः, वेष्टनमुष्णीषञ्च राज्ञो, ययो स्तौ तथोक्तौ ॥ ४२ ॥

सरसीष्विति । सरसीषु वीचिविक्षोभशीतलम् ऊर्मिसङ्घट्टनेन शीतलं स्वनिःश्वासमनुकर्तुं शीलमस्येति स्वनिःश्वासानुकारिणम् एतेन तयोरुत्कटस्त्रीपुंसजातीयत्वमुक्तम् । अरविन्दानामामोदमुपजिघ्रन्तौ घ्राणेन गृह्णन्तौ ॥ ४३ ॥

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४ ॥
हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ॥ [४५ ॥
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥
काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेषयोः ।

ग्रामेष्विति । आत्मविसृष्टेषु स्वदत्तेषु यूपो नाम संस्कृतपशुबन्धाय दारुविशेषः यूपाएव चिह्नानि येषां तेषु ग्रामेषु अमोघाः सफलाः यज्वनां विधिनेष्टवताम् । "यज्वा तु विधिनेष्टवानित्य"मरः । सुयजोर्ङ्वनिप्(३,२,१०३पा०)इति ङ्वनिप्प्रत्ययः।आशिषः आशीर्वादान् अर्घं पूजाविधिस्तदर्थं द्रव्यमर्घ्यम् । पादार्घाभ्यां च (५,४,२५ पा०) इति यत्प्रत्ययः।"षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणी"त्यमरः। अर्घ्यस्यानुपदमन्वक् अर्घ्यस्वीकारानन्तरमित्यर्थः प्रतिगृह्णन्तौ स्वीकुर्वन्तौ । पदस्य पश्चादनुपदं (२,१,६, पा०) पश्चादर्थेऽव्ययीभावः । "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्यय"मित्यमरः ॥ ४४ ॥

हैयङ्गवीनमिति । ह्यस्तनगोदोहोद्भवं घृतं हैयङ्गवीनं स्यात् पूर्वेद्युर्भवम् । "तत्तु हैयङ्गवीनं यत् ह्योगोदोहोद्भवं घृतमि"त्यमरः । हैयङ्गवीनं संज्ञायामिति (५,२,२३पा०) निपातः । सद्योघृतमादाय उपस्थितान् घोषवृद्धान् । "घोषआभीरपल्ली स्यादि"त्यमरः । वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ । दुह्याचीत्यादिना(१,४,५१,पा० आ० वा०) पृच्छतेर्द्विकर्मकत्वम् ॥ युग्मकम् ॥ ४५ ॥

कापीति । व्रजतोर्गच्छतोः शुद्धवेषयोरुज्ज्वलनेपथ्ययोस्तयोः सुदक्षिणादिलीपयोः हिमनिर्मुक्तयोश्चित्राचन्द्रमसोरिव योगे सति अपि

हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥४६॥
तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥४७॥
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४८॥
वनान्तरादुपावृत्तैः समित्कुशफलाहरैः।

अनिर्वाच्या अभिख्या शोभा आसीत्। "अभिख्या नामशोभयोरित्य"-मरः। आतश्चोपसर्गे (३,३,१०६पा०) इत्यङ्प्रत्ययः। चित्रा नक्षत्र-विशेषः शिशिरापगमे चैत्र्यां चित्रापूर्णचन्द्रमसोरिवेत्यर्थः ॥ ४६ ॥

तत्तदिति। प्रियं दर्शनं स्वकर्मकं यस्यासौ प्रियदर्शनः योग्य, दर्शनीयइत्यर्थः भूमिपतिः पत्न्यै तत्तदद्भुतं वस्तु दर्शयन् लङ्घितमति वाहितमप्यध्वानं न बुबुधे न ज्ञातवान्। बुधः सौम्य उपमा उपमानं यस्येति विग्रहः। इदं विशेषणं तत्तद्दर्शयन्नित्युपयोगितयैवास्य ज्ञातृत्वसूचनार्थम् ॥ ४७ ॥

सइति। दुष्प्रापयशाः दुष्प्रापमन्यदुर्लभं यशोयस्य स तथोक्तः श्रान्तवाहनः दूरोपगमनात् क्लान्तयुग्यः महिष्याः सखा महिषीसखः। राजाहःसखिभ्यष्टच् (५,४,९१ पा०) इति टच्प्रत्ययः। सहायान्तरनिरपेक्ष इति भावः। स राजा सायं सायंकाले संयमिनो-नियमवतस्तस्य महर्षेर्वशिष्ठस्याश्रमं प्रापत् प्राप (३,१,५५पा०) पुषा-दित्वादङ् ॥ ४८ ॥

तमाश्रमं विशिनष्टि

वनान्तरादिति। वनान्तरादन्यस्माद्वनादुपावृत्तैः प्रत्यागतैः स-मिधश्च कुशाश्च फलानि च आहर्तुं शीलं येषामिति समित्कुशफलाह-

पूर्य्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥४९॥
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५०॥
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ॥
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥५१॥

हारैः। आङि ताच्छील्ये* (३,२,११पा०) इति हरतेराङ्पूर्वादच्प्रत्ययः। अदृश्यैर्दर्शनायोग्यैरग्निभिर्वैतानिकैः प्रत्युद्याताः प्रत्युद्गतास्तैस्तपस्विभिः पूर्य्यमाणम्। "प्रोष्यागच्छतामाहिताग्नीनामग्नयः प्रत्युद्यान्तीति" श्रूयते यथा ह वा इदं† पितरं प्रोषितं बालपुत्राः प्रत्याधावन्ति एवमेतमग्नयः प्रत्याधावन्ति सशकलान् दारूनिवाहरन्निति" ॥ ४९ ॥

आकीर्णमिति। नीवाराणां भाग एव भागधेयः अंशः। रूपनामभागेभ्यो धेयः (५,४,२५पा०वा०) इति वक्तव्यत्वात् स्वाभिधेये धेयप्रत्ययः तस्योचितैः अत एव उटजानां पर्णशालानां द्वाररोधिभिः द्वाररोधकैः मृगैः ऋषिपत्नीनाम् अपत्यैरिवाकीर्णं व्याप्तम् ॥ ५० ॥

सेकान्त इति। सेकान्ते वृक्षमूलसेचनावसाने मुनिकन्याभिः चेतोभिः आलवालेषु जलाधारप्रदेशेषु यदम्बु तत्पायिनाम्। "स्यादालवालमावालमावापः" इत्यमरः। विहङ्गानां पक्षिणां विश्वासाय विस्रम्भाय। "समौ विस्रम्भविश्वासौ" इत्यमरः। तत् क्षणे सेकक्षणे उज्झिताः वृक्षकाः ह्रस्वा वृक्षा यस्मिन् तत्। (५,३,८६पा०) ह्रस्वार्थे कप्रत्ययः ॥ ५१ ॥

---

* आङि उपपदे हरतेस्ताच्छील्ये अच् स्यात्।

† बालं प्रोषितं बालपुत्रा आगमवनसुपुत्राः।

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु ॥ ५२ ॥
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ ५३ ॥
कुलकम् ।
अथ यन्तारमादिश्य धुर्य्यान्विश्रामयेति सः ।

आतपेति । आतपस्यात्यये अपगमे सति संक्षिप्ता राशीकृताः नीवारास्तृणधान्यानि यासु तासु । "नीवारास्तृणधान्यानी"त्यमरः । उटजानां पर्णशालानाम् अङ्गनभूमिषु चत्वरभागेषु । "पर्णशालोटजोऽस्त्रियामि"ति "अङ्गनं चत्वराजिरे "इति चामरः । निषादिभिरुपविष्टैर्मृगैर्वर्त्तितो निष्पादितो रोमन्थश्चर्वितचर्वणं यस्मिन् आश्रमे तम् ॥ ५१ ॥

अभ्युत्थितेति । अभ्युत्थिताः प्रज्वलिताः होमयोग्या इत्यर्थः "समिद्धेऽग्नावाहुतीर्जुहोतीति" वचनात् । तेषामग्नीनां पिशुनैः सूचकैः पवनोद्धूतैः आहुतिगन्धोयेषामस्तीत्याहुतिगन्धिनः तैर्धूमैराश्रमोन्मुखान् अतिथीन् पुनानं पवित्रीकुर्व्वाणम् ॥ ५३ ॥

अथेति । अथाश्रमप्राप्त्यनन्तरं स राजा यन्तारं सारथिं धुरं वहन्ति धुर्य्याः युग्याः । धुरोयड्ढकौ(४,४,७७पा०)*इति यत्प्रत्ययः । "धूर्वहे धुर्य्यधौरेयधुरीणाः सधुरन्धराः"इत्यमरः । धुर्य्यान् रथाश्वान् विश्रामय विनीतश्रमान् कुर्वित्यादिश्याज्ञाप्य तां पत्नीं रथादवारोहयत् अवतारितवान् स्वयञ्चावततार । विश्रमयेति ह्रस्वपाठे जनीजॄष्

* तद्वहतीत्यर्थे धुर्शब्दात् यत् ढक् च स्यात् ।

तामवारोहयत् पत्नीं रथादवततार च ॥५४॥
तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५५॥
विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥५६॥

*इति (पा० भा० घटादिगणसूत्रेण) मित्त्वे मितां (६,४,९२ पा०) ह्रस्वइति ह्रस्व.। दीर्घपाठे मितां ह्रस्व इतिसूत्रे वा चित्तविरागे (६,४,९१ पा०) इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणात् ह्रस्वाभावइति वृत्तिकारः ॥५४॥

तस्मैइति। सभायां साधवः सभ्याः। सभाया यः (४,४,१०५ पा०) इति यप्रत्ययः। गुप्ततमेन्द्रियाः अत्यन्तनियमितेन्द्रियाः मुनयः सभार्य्याय गोप्त्रे रक्षकाय नयः शास्त्रमेव चक्षुस्तत्त्वावेदकं प्रमाणं यस्य तस्मै नयचक्षुषे अतएवार्हते प्रशस्ताय पूज्यायेत्यर्थः। अर्हः प्रशंसायाम् † (३,२,१३३ पा०) इति शतृप्रत्ययः। तस्मै राज्ञे अर्हणां पूजां चक्रुः। "पूजा नमस्यापचितिः सपर्य्यार्चार्हणाः समाः" इत्यमरः ॥ ५५ ॥

विधेरिति। स राजा सायन्तनस्य सायम्भवस्य। सायञ्चिरमित्यादिना (३,३,२३ पा०) ट्युल् प्रत्ययः ‡। विधेर्जपहोमाद्यनुष्ठानस्यान्तेऽवसाने अरुन्धत्या अन्वासितं पश्चादुपवेशनेनोपसेवितम्। कर्मणि क्तः उपसर्गवशात् सकर्मकत्वम् अन्वास्यैनामित्यादिवदुपपद्यते। तपोनिधिं वशिष्ठं स्वाहया स्वाहादेव्या। "अथाग्नायी स्वाहा च हुतभुक्प्रिये" त्यमरः। अन्वासितं हविर्भुजमिव ददर्श। "समित्पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिकः। जपहोमश्च कुर्व्वाणो नाभिवाद्यो द्विजो भवे"-

* घटादयोमितइत्यविशत्य जनीजॄष्क्नसुरञ्जोऽमन्ताश्चेति तत्रत्य गणसूत्रात् जनीजॄषादयोमितः स्युरित्यर्थः।

† अर्हतेः प्रशंसायांक र्मणि वाच्येशतृ स्यात्।

‡ सायमादिभ्यो भवार्थे ट्युट्युलौ तुट् च।

तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः॥५७॥

तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः॥५८॥

टिति" अनुष्ठानस्य मध्ये अभिवादननिषेधाद्विधेरन्ते दर्शयत्युक्तम्। अन्वासनञ्चात्र पतिव्रताधर्मत्वेनोक्तं न तु कर्म्माङ्गत्वेन विधेरन्तइति कर्मणः समाप्त्यभिधानात् ॥ ५६ ॥

तयोरिति। मागधी मगधराजपुत्री राज्ञी सुदक्षिणा राजा च तयोररुन्धतीवशिष्ठयोः पादान् जगृहतुः। "पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्" इत्यमरः। पादग्रहणमभिवादनम्। गुरुपत्नी गुरुश्च कर्त्तारौ स च सा च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिननन्दतुः आशीर्वादादिभिः सम्भावयाञ्चक्रतुरित्यर्थः ॥ ५७ ॥

तमिति। मुनिः अतिथ्यर्थमातिथ्यम्। अतिथेर्ञ्य इति(५,४,२६पा०) ञ्यप्रत्ययः। आतिथ्यस्य क्रिया तया शान्तो रथक्षोभेण यः परिश्रमः स यस्य स तं तथोक्तं राज्यमेवाश्रमस्तत्र मुनिं मुनितुल्यमित्यर्थः तं दिलीपं राज्ये कुशलं पप्रच्छ। पृच्छतेस्तु(१,४,५१पा०भा०का०)*द्विकर्म्मकत्वमित्युक्तम्। यद्यपि राज्यशब्दः पुरोहितादिष्वन्तर्गतत्वाद्राजकर्म्मवचनः तथाप्यत्र सप्ताङ्गवचनः "उपपन्नं ननु शिवं सप्तस्वङ्गेषु" इति उत्तरविरोधात्। तथाह मनुः। "स्वाम्यमात्यपुरं राष्ट्रं कोशदण्डौ तथा सुहृत्। सप्त तानि समस्तानि लोकेऽस्मिन् राज्यमुच्यते" इति। तत्र "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" इति मनुवचने सत्यपि तस्य राज्ञोऽनङ्गत्वाद्भावत्वात् ब्राह्मणोचितः कुशलप्रश्नएव कृत इत्यनुसन्धेयम् अतएवोक्तं राज्याश्रममुनिमिति ॥५८॥

* दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तितमाचरितं कविनेति। भा०कारिका।
† राजशब्दात् पुरोहितादित्वेन (५,१,१२८पा०) भावे कर्मणि च यकि राज्यशब्दसिद्धिः।

अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्घ्यामर्घ्यपतिर्वाचमाददे वदतां वरः ॥५९॥
उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥६०

अथेति । अथ प्रश्नानन्तरं विजितारिपुरः विजितशत्रुनगरः वदतां वक्तृणा वरःश्रेष्ठः।यतश्च निर्द्धारणम्(२,३,४१पा०)*इति षष्ठी।अर्घ्यपतिः राजा अथर्वणोऽथर्ववेदस्य निधेस्तस्य मुनेः पुरोऽग्रे अर्घ्यामर्घादनपेताम् । धर्मपथ्यर्थन्यायादनपेते (४,४,९२पा०) इति यत्प्रत्ययः । वाचमाददे वक्तुमुपक्रान्तवानित्यर्थः । अथर्वनिधेरित्यनेन पुरोहितकृत्याभिज्ञत्वात्तत्कर्मनिर्वाहकत्वं मुनेरस्तीति सूच्यते । यथाह कामन्दकः । "त्रय्याञ्च दण्डनीत्याञ्च कुशलः स्यात् पुरोहितः । अथर्वविहितं कर्म्मं जानन् शान्तिकपौष्टिकमि"ति ॥ ५९ ॥

उपपन्नमिति । हे गुरो ! सप्तस्वङ्गेषु स्वाम्यमात्यादिषु । "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । सप्ताङ्गानी"त्यमरः । शिवं कुशलम् उपपन्नं ननु युक्तमेव नन्ववधारणे । "प्रश्नावधारणानुज्ञानुनयामन्त्रणे नन्वि"त्यमरः । कथमित्यत्राह यस्य मे दैवीनां देवेभ्य आगतानां दुर्भिक्षादीनां मानुषीणां मनुष्येभ्य आगताना चौरभयादीनाञ्च । उभयत्रापि तत आगतः (४,३,७४पा०) इत्यण् । टिड्ढाणञित्यादिना (४,१,१५पा०)ङीप् । आपदां व्यसनानां त्वं प्रतिहर्त्ता वारयितासि । यदाह कामन्दकः । "हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा । इति पञ्चविधं दैवं मानुषं व्यसनन्ततः । आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च लौकिकं पञ्चधा मतम्" ॥६०॥

---

*यतः समुदायात् निर्द्धारणम्(जातिगुणादिभिरेकदेशस्य पृथक् करणम्) तद्वाचकात् षष्ठीसप्तम्यौ स्तः ।

तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥६१॥
हविरावर्जितं होतस्त्वया विधिवदग्निषु।
वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम् ॥६२॥

तत्र मानुषापत्प्रतीकारमाह

तवेति। दूरात् परोक्षएव प्रशमितारिभिः मन्त्रान् कृतवान् मन्त्रकृत्। सुकर्मपापमन्त्रपुण्येषु कृञः*(३,२,८९पा०) इति क्विप्। तस्य मन्त्रकृतो मन्त्राणां स्रष्टुः प्रयोक्तुर्वा तव मन्त्रैः कर्तृभिः दृष्टं प्रत्यक्षं तन्मात्रं लक्ष्यं भिन्दन्तीति दृष्टलक्ष्यभिदो मे शराः प्रत्यादिश्यन्त इव, वयमेव समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियन्त इवेत्युत्प्रेक्षा। "प्रत्यादेशो-निराकृतिरि"त्यमरः। त्वन्मन्त्रसामर्थ्यादेव नः पौरुषं फलतीति भावः ॥ ६१ ॥

सम्प्रति दैविकापत्प्रतीकारमाह

हविरिति। हे होतः! त्वया विधिवदग्निषु आवर्ज्जितं प्रक्षिप्तं हविराज्यादिकं कर्तृ अवग्राहो वर्षप्रतिबन्धः अवे ग्रहो वर्षप्रतिबन्धे †(३,३,५१पा०) इति वा घञ् प्रत्ययः। "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समावि"त्यमरः। तेन विशोषिणां विशुष्यतां शस्यानां वृष्टिर्भवति वृष्टिरूपेण शस्यान्युपजीवयतीति भावः। अत्र मनुः। "अग्नौ दत्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति ॥ ६२ ॥

---

* एषूपपदेषु कृञः क्विप् स्यात् भूते काले।

† अवे उपपदे वर्षप्रतिबन्धेऽर्थे ग्रहेः घञ् वा स्यात् इति घञ् पक्षे (३,३,५८पा०) ग्रहवृदृनिश्चिगमश्च इत्यादिना अप्।

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम्॥६३॥
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।
सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः॥६४
किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम्।

पुरुषेति। आयुर्जीवितकालः पुरुषस्यायुः पुरुषायुषं वर्षशत-मित्यर्थः। "शतायुर्वै पुरुष" इति श्रुतेः। अचतु(५,४,७७पा०)रेत्यादि-सूत्रेण अच्प्रत्ययान्तो निपातः। मदीयाः प्रजाः पुरुषायुषं जीव-न्तीति पुरुषायुषजीविन्यः निरातङ्का निर्भयाः।"आतङ्को भयमाशङ्के"ति हलायुधः। निरीतयः अतिवृष्ट्यादिरहिताः इति यत् तस्य सर्वस्य त्वद्ब्रह्मवर्चसं तव व्रताध्ययनसम्पत्तिरेव हेतुः। "व्रताध्ययनसम्पत्ति-रित्येतत् ब्रह्मवर्चसमि"ति हलायुधः। ब्रह्मणो वर्चो ब्रह्मवर्चसम् ब्रह्म-हस्तिभ्यां वर्चसः (५,४,७८पा०)इत्यच्प्रत्ययः। "अतिवृष्टिरनावृष्टिर्मू-षिकाः शलभाः शुकाः। अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" इति कामन्दकः॥६३॥

त्वयेति। ब्रह्मा योनिः कारणं यस्य तेन ब्रह्मपुत्रेण गुरुणा त्वया एवम् उक्तप्रकारेण चिन्त्यमानस्य अनुध्यायमानस्य अतएव नि-रापदो व्यसनहीनस्य मे सम्पदः सानुबन्धाः अनुस्यूताः अविच्छिन्ना इति यावत् कथं न स्युः स्युरेवेत्यर्थः॥६४॥

सम्प्रति आगमनप्रयोजनमाह

किन्त्विति। किन्तु तव एतस्यां वध्वां स्नुषायाम्। "वधूर्जाया

न मामवति सद्वीपा रत्नसूरपि मेदिनी॥६५॥
नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥६६॥
मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते॥६७॥

स्नुषा स्त्री चे"त्यमरः । अदृष्टा सदृशी अनुरूपा प्रजा येन तं मां सद्वीपापि रत्नानि सूयतइति रत्नसूरपि । सत्सूद्विषेत्यादिना (३,२,६१ पा०)क्किप् । मेदिनी नावति न प्रीणाति । अवधातुः रच्चणगतिप्रतीत्याद्यर्थेषु उपचारादत्र प्रीणने । रत्नसूरपीत्यनेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति सूचितम् ॥ ६५ ॥

तदेव प्रतिपादयति

नूनमिति । मत्तः परं मदनन्तरम् । (५,३,७पा०) पञ्चम्यास्तसिल् । पिण्डविच्छेददर्शिनः पिण्डदानविच्छेदमुत्प्रेच्चमाणाः वंशोद्भवाः वंश्याः पितरः स्वधेत्यव्ययं पितृभोज्ये वर्त्तते तस्य संग्रहे तत्पराः आसक्ताः सन्तः श्राद्धे पितृकर्म्मणि । "पितृदानं निवापः स्यात् श्राद्धं तत्कर्म शास्त्रत" इत्यमरः । प्रकामभुजः पर्य्याप्तभोजिनोन भवन्ति नूनं सत्यम् । "कामं प्रकामं पर्य्याप्त"मित्यमरः । "निर्द्धना च्चापद्धनं कियदपि संग्टह्णन्ती"ति भावः ॥ ६६ ॥

मत्परमिति । मत्परं मदनन्तरम् । * अन्यारादित्यादिना (२,३. २९पा०) पञ्चमी । दुर्लभं मत्वा मया आवर्ज्जितं दत्तं पयः पूर्वैः पितृभिःस्वनिश्वासैःदुःखजैःकवोष्णं यथा तथा उपभुज्यते नूनमिति वितर्के । कवञ्चोष्णे (६,३,१०७पा०) इति कुशब्दस्य कवादेशः । "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वती"त्यमरः ॥ ६७ ॥

---

* पर शब्दस्य दिक्शब्दत्वेन तद्योगेऽत्र पञ्चमी ।

† कुशब्दस्य स्थाने कवं स्यादुष्णशब्दे परे चात् काकदौ ।

सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोकइवाचलः॥ ६८॥
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे॥ ६९॥
तया हीनं विधातर्मां कथं पश्यन्न दूयसे।

सोऽहमिति। इज्या यागः। व्रजयजोर्भावे क्यप्(३,३,९८पा०)इति क्यप् प्रत्ययः। तया विशुद्धात्मा विशुद्धचेतनः प्रजालोपेन सन्तत्यभावेन निमीलितःकृतनिमीलनः सोऽहं लोक्यतइति लोकः न लोक्यतइत्यलोकः लोकश्चालोकश्चात्म स इति लोकश्चासावलोकश्चेति वा लोकालोकश्चक्रवालोऽचलइव। "लोकालोकश्चक्रवाल"इत्यमरः। प्रकाशतेइति प्रकाशश्च देवऋणविमोचनात् न प्रकाशतइत्यप्रकाशश्च पितृऋणाविमोचनात्। * (३,१,१३४पा०) "पचाद्यच् अस्तीति शेषः। लोकालोकोऽप्यन्तःसूर्यसम्पर्काद्बहिस्तमोव्याप्त्या च प्रकाशश्चाप्रकाशश्चेति मन्तव्यम्॥ ६८॥

ननु तपोदानादिसम्पन्नस्य किमपत्यैरित्यत्राह

लोकान्तरेति। समुद्भवत्यस्मादिति समुद्भवः कारणं तपोदाने समुद्भवो यस्य तत् तपोदानसमुद्भवं यत् पुण्यं तत् लोकान्तरे परलोके सुखं सुखकरं शुद्धवंशे भवा शुद्धवंश्या सन्ततिर्हि परत्र परलोके इह च लोके शर्मणे सुखाय। "शर्मशातसुखानि चेत्य"मरः। भवतीति शेषः॥ ६९॥

तयेति। हे विधातः! स्रष्टः! तया सन्तत्या हीनम् अनपत्यं मां स्नेहात् प्रेम्णा स्वयमेव सिक्तं जलसेकेन वर्द्धितं वन्ध्यमफलम्।"वन्ध्यो-

* (३.१.१३४पा०) नन्दिग्रहपचादिभ्यइत्यादिसूत्रे पचादेराकृतिगणत्वेन काशधातोरच्।

सिक्तं स्वयमिव स्नेहाद् वन्ध्यमाश्रमवृक्षकम् ॥७०॥
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः ॥७१॥
तस्मान्मुच्ये यथा तात ! संविधातुं तथार्हसि ।

टफलोटवकेशी" चेत्यमरः । आश्रमस्य वृक्षकं हस्वोन्नममिव पश्यन् कथं न दूयसे न परितप्यसे । विधातुरित्यनेन समर्थोऽप्युपेक्षसे इति गम्यते ॥ ७० ॥

असह्येति । हे भगवन् ! मे मम अन्त्यम् ऋणं पैतृकऋणम् अनिर्वाणस्य मज्जनरहितस्य । "निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने" इति यादवः । दन्तिनो गजस्य अरुः मर्म तुदतीत्यरुन्तुदं मर्मस्पृक् । "व्रणोऽस्त्रियामीर्ममरुः" "अरुन्तुदस्तु मर्मस्पृगि"ति चामरः । विध्वरुषोस्तुदः*(३,२ ३५पा०)इति खश्प्रत्ययः । अरुर्द्विषदित्यादिना (६,३,६७पा०) मुमागमः । आलानं बन्धनस्तम्भमिव । "आलानं बन्धनस्तम्भे" इत्यमरः । असह्या सोढुमशक्या पीडा दुःखं यस्मिन् तत् अवेहि दुःसहदुःखजनकं विद्धीत्यर्थः । निर्वाणोत्थानशयनानि त्रीणि गजकर्म्माणीति पालकाव्ये । "ऋणं देवस्य यागेन ऋषीणां दानकर्मणा । सन्तत्या पितृलोकानां शोधयित्वा परिव्रजेत्" ॥ ७१ ॥

तस्मादिति । हे तात ! तस्मात् पैतृकादृणात् यथा मुच्ये मुक्तो भवामि । कर्मकर्त्तरि लट् । तथा संविधातुं कर्त्तुमर्हसि हि यस्मात् कारणात् इक्ष्वाकुवंश्यानाम् । तद्रा(३,२,५पा०)जत्वादृक्प्रत्ययो † लुक् ।

* एतयोरुपपदयोस्तुदःखश् स्यात् ।

† ते तद्राजाः (४,१,१७४पा०सूत्रेण) अञादीनां तद्राजसंज्ञत्वात् तद्राजस्य बहुषु तेनैवास्त्रियाम् (२,४,६२पा०) तत्कृतबहुत्वे अञादेर्विधानात् अतोऽणो बहुत्वे लुक् ।

इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥७२॥

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३ ॥

सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्त्तुरथैनं प्रत्यबोधयत् ॥७४॥

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः [७५॥
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि।

[illegible] दुरापेऽर्थे सिद्धयस्त्वदधीनास्त्वदायत्ताः । इक्ष्वाकूणामिति शेषे षष्ठी "न लोके"त्यादिना (२,३,६९पा०) कृद्योगे षष्ठीनिषेधात् ॥७२॥

इतीति । इति राज्ञा विज्ञापितः ऋषिः ध्यानेन स्तिमिते लोचने यस्य ध्यानस्तिमितलोचनो निश्चलाक्षः सन् क्षणमात्रं सुप्तमीनो ह्रद इव तस्थौ ॥ ७३ ॥

सोऽपश्यदिति । स मुनिः प्रणिधानेन चित्तैकाग्र्येण भावितात्मा शुद्धान्तःकरणः सन् भुवो भर्त्तुर्नृपस्य सन्ततेः स्तम्भकारणं सन्तानप्रतिबन्धकारणम् अपश्यत् अथानन्तरमेनं नृपं प्रत्यबोधयत् स्तम्भं ख्यापितवानित्यर्थः । बुधेति गतिबुद्धीत्यादिना (१,४,५२पा०) अणिकर्तुः कर्मत्वम् ॥ ७३ ।

पुरेति । पुरा पूर्वं शक्रमिन्द्रमुपस्थाय संसेव्य उर्वीं प्रति भुवमुद्दिश्य यास्यतो गमिष्यतस्तव पथि कल्पतरुच्छायामाश्रिता सुरभिः कामधेनुरासीत् तत्र स्थितेत्यर्थः ॥ ७५ ॥

धर्म्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः॥७६
अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा॥७७॥
स शापो न त्वया राजन्। न च सारथिना श्रुतः।

ततः किमित्याह

धर्मलोपेति। ऋतुः पुष्पं रजइति यावत्।"ऋतुः स्त्रीकुसुमे ऽपि चे"त्यमरः। ऋतुना निमित्तेन स्नाताम् इमां राज्ञीं सुदक्षिणां धर्मस्य ऋत्वभिगमनलक्षणस्य लोपात् भ्रंशात् यद् भयं तस्मात् स्मरन् ध्यायन् "प्रदक्षं दैवतं विप्रं घृतं मधु चतुष्पथम्।प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीनिति शास्त्रात् प्रदक्षिणक्रियार्हायां प्रदक्षिणकरणयोग्यायां तस्यां धेन्वा त्वं साधु प्रदक्षिणादिसत्कारं नाचरः नाचरितवानसि"व्यासक्ता हि विस्मरन्ती"ति भावः। ऋतुकालाभिगमने मनुः"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदे"ति। अकरणे दोषमाह पराशरः "ऋतुस्नातान्तु यो भार्य्यां स्वस्थः सन्नोपगच्छति। वालगोघ्नापराधेन विध्यते नात्र संशयः"इति॥७६॥

अवजानासीति। यस्मात् कारणात् मामवजानासि तिरस्करोषि अतः कारणात् मत्प्रसूतिं मम सन्ततिमनाराध्य असेवित्वा ते तव प्रजा न भविष्यतीति सा सुरभिस्त्वां शशाप। शप आक्रोशे॥७७॥

कथं तदस्माभिर्न श्रुतमित्याह

न शापइति। हे राजन्! सः शापः त्वया न श्रुतः सारथिना च

नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८ ॥

ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः॥ ७९ ॥

हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥

न श्रुतः। श्रु श्रवणे। हेतुमाह क्रीडार्थमागता उद्दामानः दाम्नउद्याता दिग्गजा यस्मिन् तथोक्ते आकाशगङ्गायाः मन्दाकिन्याः स्रोतसि प्रवाहे नदति सति ॥ ७८ ॥

अस्तु प्रस्तुते किमायातमित्यत्राह।

ईप्सितमिति। तदवज्ञानात् तस्याः धेनोः अवज्ञानादपमानात् आत्मनः स्वस्य आप्तुमिष्टम् ईप्सितं मनोरथम्। आप्नोतेः सन्नन्तात् क्तः (७,४,५५ पा०) ईकारश्च। सार्गलं सप्रतिबन्धं विद्धि जानीहि। तथाहि पूज्यपूजाया व्यतिक्रमोऽतिक्रमणं श्रेयः प्रतिबध्नाति ॥ ७९ ॥

तर्हि गत्वा तामाराधयामि सा वा कथञ्चिदागमिष्यतीत्याशा न कर्त्तव्येत्याह।

हविषइति। सा च सुरभिरिदानीं दीर्घं सत्रं चिरकालसाध्योयागविशेषोयस्य तस्य प्रचेतसोहविषे दध्याज्यादिहविरर्थं भुजङ्गपिहितद्वारं भुजङ्गावरुद्धद्वारं ततो दुष्प्रवेशं पातालमधितिष्ठति पाताले तिष्ठतीत्यर्थः। अधिशीङ्स्थासां कर्म (१,४,४६ पा०) इत्याधारस्य कर्मत्वम् ॥ ८० ॥

सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।
आराधय सपत्नीकः प्रीता कामदुघा हि सा॥८१

इति वादिनएवास्य होतुराहुतिसाधनम्।
अनिन्द्या नन्दिनी नाम धेनुरावटृते वनात्॥८२

ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्॥८३

तर्हि का गतिरित्यतआह

सुतामिति। तस्याः सुरभेरियं तदीया तां सुतां सुरभेः प्रतिनिधिं कृत्वा शुचिः शुद्धः, सह पत्न्या वर्त्ततइति सपत्नीकः सन्। नद्यृतश्च (५,४,१५३पा०)इति कप्प्रत्ययः। आराधय, हि यस्मात् कारणात् सा प्रीता तुष्टा सती कामान् दोग्धीति कामदुघा भवति। दुहः कप् घश्च (३,२,७०पा०) इति कप्प्रत्ययः घादेशश्च॥ ८१॥

इतीति। इति वादिनो वदतएव होतुर्हवनशीलस्य। तृन्निति (३,२,१३५पा०)तृन्प्रत्ययः।अस्य मुनेराहुतीनां साधनं कारणं, नन्दयतीति व्युत्पत्त्या नन्दिनी नाम अनिन्द्या अगर्ह्या प्रशस्ता धेनुः वनादावटृते प्रत्यागता। अव्याक्षेपोभविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणमिति भावः॥ ८२॥

सम्प्रति धेनुं विशिनष्टि·

ललाटोदयेति। पल्लवस्निग्धा चासौ पाटला च। सन्ध्यायामप्येतद्विशेषणं योज्यम्। ललाटे उदयोयस्य स ललाटोदयस्तम् आभुग्नम् ईष-

भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि।
प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्त्तिना ॥८४॥
रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात्।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः॥८५॥

द्वक्रम्। "आविद्धं कुटिलं भुग्नं वेल्लितं वक्र"मित्यमरः। ओदितश्च (८,२,४५पा०) इति निष्ठातस्य नत्वम्। श्वेतरोमाङ्केव अङ्कं बिभ्रती नवं शशिनं बिभ्रती सन्ध्येव स्थिता ॥ ८३ ॥

भुवमिति।कोष्णेन किञ्चिदुष्णेन कवञ्चोष्णे(६,३ १०७पा०)इति चका राद् कादेशः। अवभृथादपि अवभृथस्नानादपि मेध्येन पवित्रेण। "पूतं पवित्रं मेध्यं चे"त्यमरः। वत्सस्यालोकेन प्रदर्शनेन प्रवर्त्तिना प्रवहता प्रस्रवेन क्षीराभिष्यन्दनेन भुवमभिवर्षन्ती सिञ्चन्ती कुण्डमिव ऊधः आपीनं यस्याः सा कुण्डोध्नी। "ऊधस्तु क्लीवमापीनमि"त्यमरः। ऊधसोऽनङ् (५,४,१३१पा०) इत्यनङादेशः। बहुव्रीहेरूधसोङीष् (४,१,२५पा०) इति ङीष् ॥ ८४ ॥

रजइति। खुरोद्धूतैरन्तिकात्समीपे गात्रं स्पृशद्भिः। दूरान्तिकार्थेभ्योद्वितीया चेति (२,३,३५पा०) चकारात् पञ्चमी। रजसां कणैः, महीं क्षियति ईष्टे इति महीक्षित् तस्य तीर्थाभिषेकेण जातां तीर्थाभिषेकजां शुद्धिमादधाना कुर्वाणा। एतेन वायव्यं स्नानमुक्तम् उक्तञ्च मनुना "आग्नेयम् भस्मना स्नानमवगाह्यन्तु वारुणम्। आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजःस्मृत"मिति ॥ ८५ ॥

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ॥
अदूरवर्त्तिनीं सिद्धिं राजन् ! विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ॥ ८७ ॥
वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८ ॥
प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।

तामिति । निमित्तज्ञः शकुनज्ञः तपोनिधिर्वशिष्ठः पुण्यं दर्शनं यस्यास्तां तां धेनुं दृष्ट्वा आशंसितं मनोरथः । नपुंसके भावे क्तः । (३'३ ११४पा०) तत्रावन्ध्यं सफलं प्रार्थनं यस्य तम् अवन्ध्यमनोरथमित्यर्थः याजयितुं योग्यं याज्यं पार्थिवं पुनरब्रवीत् ॥ ८६ ॥

अदूरेति हे राजन् ! आत्मनः कार्य्यस्य सिद्धिम् अदूरवर्त्तिनीं शीघ्रभाविनीं विगणय विद्धि यद्यस्मात् कारणात् कल्याणी मङ्गलमूर्त्तिः । बह्वादिभ्यश्च (४,१,४५पा०) इति ङीप् । इयं धेनुः नाम्नि कीर्त्तिते कथिते सत्येव उपस्थिता ॥ ८७ ॥

वन्येति । वने भवं वन्यं कन्दमूलफलादिकं वृत्तिराहारो यस्य तथाभूतः सन् इमां गां शश्वत् सदा आ प्रसादादविच्छेदेनेत्यर्थः । आत्मनस्तव कर्त्तुरनुगमनेनानुसरणेन अभ्यसनेन अनुष्ठातुरभ्यासेन विद्यामिव प्रसादयितुं प्रसन्नां कर्त्तुमर्हसि ॥ ८८ ॥

सेवानुसरणप्रकारमाह

प्रस्थितायामिति । अस्यां नन्दिन्यां प्रस्थितायां प्रतिष्ठेथाः प्रयाहि । समवप्रविभ्यः स्थः (१,३,२२पा०) इत्यात्मनेपदम् । स्थितायां निवृत्तगतिकायां

निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥८९

वधूर्भक्तिमती चैनामर्चितामा तपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९०॥

इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥९१

स्थितिमाचरेः स्थितिं कुरु तिष्ठेरित्यर्थः। निषण्णायाम् उपविष्टायां निषीद उपविश । विध्यर्थे(३,३,१६१पा०)लोट् ।पीतम् अम्भो यया तस्यां पीताम्भसि सत्यामपः पिब पिबतेः (७,३,७८पा०) पिबादेशः ॥ ८९ ॥

वधूरिति । वधूर्जाया च भक्तिमती प्रयता सती गन्धादिभिरर्चितामेनां गां प्रातः आ तपोवनात् आङ् मर्यादायां पदद्वयञ्चैतत् । अन्वेतु अनुगच्छतु सायमपि प्रत्युद्व्रजेत् प्रत्युद्गच्छेत् ।विध्यर्थे लिङ्॥९०॥

इतीति । इत्यनेन प्रकारेण त्वम् आ प्रसादात् प्रसादपर्यन्तम् । आङ् मर्यादाभिविध्योः(२,१,१३पा०)इत्यस्य वैकल्पिकत्वादसमासत्वम्। अस्या धेनोः परिचर्यापरः शुश्रूषापरो भव ते तव अविघ्नं विघ्नस्याभावोऽस्तु । अव्ययं विभक्तीत्यादिना(२,१,६पा०)अर्थाभावेऽव्ययीभावः । पितेव पुत्रिणां सत्पुत्रवताम्।*प्रशंसायामिनिप्रत्ययः। धुरि अग्रे स्थेयास्तिष्ठेः। आशीरर्थे लिङ्(४.३,१७३पा०)एर्लिङि † (६,४.६७पा०)इत्याकारस्यैकारादेशः । त्वत्सदृशएव भवत्पुत्रोऽस्त्विति भावः ॥९१॥

---

* भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादय. इति(५,२,९४पा०का०का०)

† घुमास्थागापाजहातिसां हलि, इत्येतेषामेत्त्वमादेशः स्यात् किङति लिङि परे।

तथेति प्रतिजग्राह प्रीतिमान् सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ॥ ९३ ॥
सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः ।
कल्पवित् कल्पयामास वन्यामेवास्य संविधाम् ॥ ९४

तथेति । देशकालज्ञः देशोऽग्निसन्निधिः कालोऽग्निहोत्रावसानसमयः विशिष्टदेशकालोत्पन्नमार्षं ज्ञानमव्याहतमिति जानन् अतएव प्रीतिमान् शिष्योऽन्तेवासी राजा सपरिग्रहः सपत्नीकः । "पत्नीपरिजनादानमूलशापाः परिग्रहा" इत्यमरः । आनतोविनम्रः सन् शासितुर्गुरोरादेशम् आज्ञां तथेति प्रतिजग्राह स्वीचकार ॥ ९२ ॥

अथेति । अथ प्रदोषे रात्रौ दोषज्ञोविद्वान् । "विद्वान् विपश्चिद्दोषज्ञ"इत्यमरः । सूनृतवाक् सत्यप्रियवाक् । प्रियं सत्यञ्च सूनृतमिति हलायुधः । स्रष्टुः सूनुः ब्रह्मपुत्रोमुनिः । अनेन प्रकृतकार्य्यनिर्व्वाहकत्वं सूचयति । ऊर्जितश्रियं विशाम्पतिं मनुजेश्वरम् । "द्वौ विशौ वैश्यमनुजा"वित्यमरः । संवेशाय निद्रायै । "स्यान्निद्रा शयनं स्वापः स्वप्नः संवेशइत्यपी"त्यमरः । विससर्ज आज्ञापयामास ॥ ९३ ॥

सत्यामपीति । कल्पवित् व्रतप्रयोगाभिज्ञोमुनिः तपःसिद्धौ सत्यामपि तपसैव राजयोग्याहारसम्पादनसामर्थ्ये सत्यपीत्यर्थः नियमापेक्षया तदाप्रभृत्येव व्रतचर्य्यापेक्षया अस्य राज्ञो वन्यामेव संविधीयते ऽनयेति संविधां कुशादिशयनसामग्रीम् । आतश्चोपसर्गे(३,३,१०६ पा०) इति अङ्प्रत्ययः । अकर्त्तरि च कारके संज्ञायाम् (३,३,१९ पा०) इति कर्म्मार्थत्वम् । कल्पयामास सम्पादयामास ॥ ९४ ॥

निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥९५॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
वशिष्ठाश्रमगमनोनाम प्रथमः सर्गः ।

निर्दिष्टामिति । स राजा कुलपतिना मुनिकुलेश्वरेण वशिष्ठेन निर्दिष्टां पर्णशालामध्यास्याधिष्ठानं कृत्वेत्यर्थः।अधिशीङ्(१,४,४६पा०)इत्यादिना आधारस्य कर्मत्वम्।(२,३,२पा०)कर्मणि द्वितीया। प्रयतोनियतः परिग्रहः पत्नी द्वितीयोयस्येति स तथोक्तः कुशानां शयने संविष्टः सुप्तः सन् तस्य वशिष्ठस्य शिष्याणामध्ययनेन अपररात्रे वेदपाठेन निवेदितमवसानं यस्यास्तां निशां निनाय गमयामास। अपररात्रे अध्ययने मनुः "निशान्ते न परिश्रान्तोब्रह्माधीत्य पुनः स्वपेत्"। "न चापररात्रमधीत्य पुनः स्वपेदि"ति गौतमश्च ।प्रहर्षिणीवृत्तमेतत् तदुक्तं "म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" ॥ ९५ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशटीकायां सञ्जीवनीसमाख्यायां प्रथमः सर्गः ।

द्वितीयः सर्गः ।



अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥

आशासु राशीभवदङ्गवल्लीभासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि ! त्वाम् ॥

अथेति । अथ निशानयनानन्तरं यशोधनः प्रजानामधिपः प्रजेश्वरः प्रभाते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहिते स्वीकारिते गन्धमाल्ये यया सा जायाप्रतिग्राहितगन्धमाल्या तयोक्तां पीतं पानमस्यास्तीति पीतः पीतवानित्यर्थः । अर्शआदिभ्योऽच् (५,२,१२७पा०) इत्यच्प्रत्ययः । पीता गावो भुक्ता ब्राह्मणा इति महाभाष्ये दर्शनात् । पीतः प्रतिबद्धो वत्सो यस्यास्ताम् ऋषेर्धेनुं वनाय वनं गन्तुम् । क्रियार्थोपपदस्येत्यादिना (२,३,१४पा०) चतुर्थी । मुमोच मुक्तवान् । जायापदसामर्थ्यात् सुदक्षिणायाः पुत्रजननयोग्यत्वमनुसन्धेयम् । तथाहि श्रुतिः "पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया जाया भवति यदस्यां जायते पुन" रिति । यशोधन इत्यनेन पुत्रवतां कीर्त्तिलोभात् राजा नन्दिनीगोरक्षणे प्रवृत्त इति गम्यते । अस्मिन् सर्गे वृत्तमुपजातिः अनन्तरोदीरितलक्ष्म-
* भाजौ पादौ यदीयावुपजातयस्ता इति ॥ १ ॥

* अनन्तरमव्यवहितमुदीरितयोः इन्द्रवज्रोपेन्द्रवज्रयोः ।

तस्याः खुरन्यासपवित्रपांशु-
मपांशुलानां धुरि कीर्त्तनीया।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥ २॥
निवर्त्त्य राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः।

तस्या इति। पांशवो दोषा आसां सन्तीति पांशुलाः स्वैरिण्यः। "स्वैरिणी पांशुले"त्यमरः। सिध्मादिभ्यश्च (५,२,९७पा०) इति लच्प्रत्ययः। अपांशुलानां पतिव्रतानां धुरि अग्रे कीर्त्तनीया परिगणनीया मनुष्येश्वरधर्म्मपत्नी खुरन्यासैः पवित्राः पांशवो यस्य तम्। "रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रज" इत्यमरः। तस्या धेनोः मार्गं स्मृतिर्मन्वादिवाक्यं श्रुतेर्वेदवाक्यस्यार्थमभिधेयमिवान्वगच्छदनुसृतवती। यथा स्मृतिः श्रुतिक्षुण्णमेवार्थमनुसरति तथा सापि गोखुरक्षुण्णमेव मार्गमनुससारेत्यर्थः। धर्मपत्नीत्यत्र * अश्वघासादिवत्तादर्थ्ये षष्ठीसमासः प्रकृतिविकाराभावात्। पांशुलपदप्रवृत्तावप्यपांशुलानामिति विरोधालङ्कारो ध्वन्यते॥ २॥

निवर्त्त्येति। दयालुः कारुणिकः। "स्याद्दयालुः कारुणिक" इत्यमरः। स्पृहिगृहीत्यादिना (३,२,१५८पा०) आलुच्प्रत्ययः। यशोभिः सुरभिर्मनोज्ञः। "सुरभिः स्यान्मनोज्ञेऽपी"ति विश्वः। राजा तां दयितां निवर्त्त्य सौरभेयीं कामधेनुसुतां नन्दिनीं धरन्तीति धराः (३,१,१३४पा०) पचाद्यच्। पयसां धराः पयोधराः स्तनाः। "स्त्रीस्तनौ

---

* चतुर्थी तदर्थेत्यादिना (२,१,३६पा०) चतुर्थीसमासस्य बलिरक्षितयोः पृथग्ग्रहणज्ञापकात् प्रकृतिविकृतिभावस्थल एव नियमनात् अत्र च तदभावात् तादर्थ्ये षष्ठीसमासः।

मुत्थुणं०" कहे। बाद कम से कम पांच गाथा
वन पढ़े। बाद "वरकनक शंख०" कहकर इच्छा-
क 'भगवानहं' आदि चार खमासमण देवे। फिर
ने हाथ को चरवले या आसन पर थापन करके सिर
ा कर "अड्ढाईजेसु०" पढ़े। फिर खड़ा होकर "इ-
छा० देवसिअपायच्छित्तविसोहणत्थं काउस्सग्ग करूं?
च्छं" अन्नत्थ० कहकर चार लोगस्स का काउसग्ग।
ारके प्रगट लोगस्स पढ़कर 'इच्छामि० इच्छा० सज्झाय
सन्दि साहुं? इच्छं। इच्छामि० इच्छा० सज्झाय करुं?
इच्छं" कहे बाद एक नवकार पूर्वक सज्झाय कहे।
अन्त में एक नवकार पढ़कर पीछे 'इच्छामि० इच्छा०
दुक्खक्खओ कम्मक्खओ निमित्तं काउस्सग्ग करुं? इच्छं
अन्नत्थ०" पढ़कर सम्पूर्ण लोगस्स का कायोत्सर्ग करे
पारकर "नमोऽर्हत्०" कहकर शान्ति पढ़े। पीछे प्रगट
लोगस्स कहे बाद सामायिक पारना हो तो "इरियावही०
तस्स उत्तरी० अन्नत्थ०" पढ़ कर एक लोगस्सका
कायोत्सर्ग। पारके प्रगट लोगस्स। पीछे बैठकर "चउ
क्कसाय० नमुत्थुणं० जावंतिचेइ याइं इच्छामि० जावंत
केविसाहु० नमोऽर्हन्० उवसग्गहरं० जय वीयराय०"
कहकर "इच्छामि० इच्छा० मुहपत्ति पडिलेहुं? इच्छं"
कहके पूर्वोक्त सामायिक पारने के विधि से सामायिक पारे।

साथ शिर लगा कर पढ़े। बाद द्वादशावर्त्त व
खड़े २ "आयरियउवझाय॰" "करेमिभंते॰
मिठामि॰" "तस्सउत्तरी॰" "अन्नत्थ॰" कह
गस्स का कायोत्सर्ग करके प्रगट लोगस्स प
'सव्वलोए अरिहन्त चेइयाण॰' "अन्नत्थ॰"
एक लोगस्स का कायोत्सर्ग करे। बाद "पुक
वढ्ढे॰" "सुअस्स भगवओ करेमि काउस्सग्गं
अन्नत्थ॰" कहकर एक लोगस्स का कायोत्स
बाद "सिद्धाणं बुद्धाणं॰" कहकर "सुअदेवयाए
काउस्सग्गँ अन्नत्थ॰" पढ़कर एक नवकार का कायो
पारके 'नमोऽर्हत्॰" कहकर "सुअदेवया॰" की थुइ क
पीछे "खित्तदेवयाए करेमि काउस्सग्गं अन्नत्थ॰" पढ़कर
एक नवकार का कायोत्सर्ग। पारके "नमोऽर्हत्॰" कह
कर "खित्तदेवया" की थुइ कहे। बाद एक नवकार पढ़
के बैठकर मुहपत्ति पडिलेहकर द्वादशावर्त्त वन्दना किए
बाद 'सामयिक, चउव्वीसत्थो, वन्दना, पडिकमण, का
उस्सग्ग, पच्चक्खाण-किया है जी" ऐसे कहे। पीछे बैठ
कर "इच्छामो अणुसिट्ठिं नमो खमासमणाणँ नमोऽर्हत्॰"
कहकर 'नमोस्तु वर्द्धमानाय॰" पढ़े। [स्त्रीवर्ग नमोस्तु
'वर्द्धमानाय॰ के स्थान में संसारदावा की तीन थुइ पढ़ें।]

॥ अथ सुगुरु को सुखसाता पृच्छना ॥

इच्छाकारि सुहराइ सुहदेवसी,-इच्छापूर्वक हे गु
आप सुख से रात्रि में, सुख से दिन में।

सुख तप, शरीर निराबाध,-सुख से तपश्चर्य्या मे,
संबंधी निरोगता में।

सुख संयम यात्रा निर्वहते हो जी,-सुख से
यात्रा धारण करते हो जी।

स्वामी साता है जी॥ आहार पानी का लाभ देन

॥ अथ इरिया वहियं ॥

इच्छाकारेण संदिसह भगवन्!-हे भगवन्! [अ
इच्छापूर्वक आदेश दो [तो]

इरियावहियं पडिक्कामि?-रास्ते चलते जो पाप
होवे उससे मैं निवर्तूं [हटूं]? (तब गुरु
पडिक्कमेह--(निवर्तो) फिर आगे पढ़ना।

इच्छं, इच्छामि पडिक्कामिउं॥ १ ॥-आप की
प्रमाण है मैं मेरे मन की इच्छापूर्वक पाप से नि
की इच्छा करता हूं।

इरियावहियाए विराहणाए ॥ २॥ मार्ग में
जिन जीवों की विराधना हुइ होवे।

गमणागमणे ॥ ३ ॥-पाणक्कमणे,-जाने आने

तप और वीर्य इन पांच प्रकार के आचार पालने में समर्थ होवें ये पांच गुण।

। समिओ तिगुत्तो,–चलने में, बोलने में, खाने पीने में, चीज उठाने रखने में, और मल मूत्र परठने में विवेक से कार्य करना जिस में किसी जीव का नाश न हो, ये पांच समिति और मन, वचन, काया को वश में रखना ये तीन गुप्ति इन आठों को बराबर पालें ये आठ गुण।

स गुणो गुरु मज्झ ॥ २ ॥–(इन) छत्तीस गुणों सहित मेरे गुरु हैं।

॥ अथ खमासमण ॥

इच्छामि खमासमणो–हे क्षमाश्रमण ! मैं इच्छता हूं वंदन (आपके चरण कमलों में)।

वंदिउं जावणिज्जाए निसीहिआए–पाप व्यापार का निषेध करके शरीर की शक्ति से नमस्कार करूं।

मत्थएण वंदामि ॥–मस्तक से वंदना करता हूं।

विधि–यह पाठ वीतरागदेव और गुरु महाराज के सन्मुख खड़े हो, दोनों हाथ जोड़ पंचांग (दो हाथ, दो घुटने एवं मस्तक) ज़मीन से लगा कर वंदना करे।

पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्वीम् ॥ ३ ॥
व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा
स्ववीर्य्यगुप्ता हि मनोः प्रसूतिः ॥ ४ ॥

द्वौ पयोधरौ" इत्यमरः अपयोधराः सम्पद्यमानाः पयोधरीभूताः । अभूततद्भावे (५,४,५०पा०) च्विप्रत्ययः । कुगतिप्रादयः (२,२,१८पा०) इति प्रादिसमासः । पयोधरीभूताश्चत्वारः समुद्राः यस्याः ताम् । अनेकमन्यपदार्थे (२,२,२४पा०) इत्यनेकपदग्रहणसामर्थ्यात्त्रिपदो बहुव्रीहिः । गोरूपधरामुर्वीमिव जुगोप ररक्ष भूरक्षणप्रयत्नेनैव ररक्षेति भावः । धेनुपक्षे पयसा दुग्धेन अधरीभूताश्चत्वारः समुद्रा यस्याः सा तयोक्ताम् दुग्धतिरस्कृतसागरामित्यर्थः ॥ ३ ॥

व्रतायेति । व्रताय धेनोरनुचरेण न तु जीवनायेति भावः । तेन दिलीपेन शेषोऽवशिष्टोऽप्यनुयायिवर्गः अनुचरवर्गो न्यषेधि निवर्त्तितः । शेषत्वं सुदक्षिणापेक्षया । कथं तर्हि आत्मरक्षणमत आह न चेति तस्य दिलीपस्य शरीररक्षा च अन्यतः पुरुषान्तरान्न, कुतः, हि यस्मात् कारणात् मनोः प्रसूयतइति प्रसूतिः सन्ततिः स्ववीर्य्यगुप्ता स्ववीर्य्येणैव रक्षिता न हि समरनिर्व्वाहकस्य पराप्रेक्षेति भावः ॥ ४ ॥

आस्वादवद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः
सम्राट् समाराधनतत्परोऽभूत् ॥ ५ ॥

स्थितः स्थितामुच्चलितः प्रयातां
निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत् ॥ ६ ॥

आस्वादवद्भिरिति । सम्राट् मण्डलेश्वरः । "येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडि"त्यमरः । स राजा आस्वादवद्भिः रसवद्भिः स्वादयुक्तैरित्यर्थः तृणानां कवलैः ग्रासैः । "ग्रासस्तु कवलार्थक" इत्यमरः । कण्डूयनैः खर्जनैः दंशानां वनमक्षिकाणां निवारणैः । "दंशस्तु वनमक्षिके"त्यमरः । अव्याहतैरप्रतिहतैः स्वैरगतैः स्वच्छन्दगमनैश्च तस्या धेन्वाः समाराधनतत्परः शुश्रूषासक्तोऽभूत् । तदेव परं प्रधानं यस्येति तत्परः । "तत्परे प्रसितासक्तावि"त्यमरः ॥ ५ ॥

स्थित इति । भूपतिस्तां स्थितां सतीं गां स्थितः सन् । स्थितिरूर्ध्वावस्थानम् । प्रयातां प्रस्थिताम् उच्चलितः प्रस्थितः, निषेदुषीं निषण्णाम् उपविष्टामित्यर्थः । भाषायां सदवसश्रुवः (३,२,१०८ पा०) इति क्वसुप्रत्ययः उगितश्च (४,१,६ पा०) इति ङीप् । आसनबन्धे उपवेशने धीरः स्थिरः उपविष्टः सन्नित्यर्थः, जलमाददानां पिबन्तीं जलाभिलाषी पिबन्नित्यर्थः इत्थं छायेव तामन्वगच्छत् अनुसृतवान् ॥ ६ ॥

स न्यस्तचिह्नामपि राजलक्ष्मीं
तेजोविशेषानुमितां दधानः।
आसीदनाविष्कृतदानराजि-
रन्तर्मदावस्थ इव द्विपेन्द्रः॥ ७॥

लताप्रतानोद्ग्रथितैः स केशै-
रधिज्यधन्वा विचचार दावम्।
रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्वान्॥ ८॥

स इति। न्यस्तानि परिहृतानि चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतामपि तेजोविशेषेण प्रभावातिशयेनानुमितां सर्वथा राजा एव अयं भवेदित्यूहितां राजलक्ष्मीं दधानः स राजा अनाविष्कृतदानराजिः बहिरप्रकटितमदरेखः अन्तर्गता मदावस्था यस्य सोऽन्तर्मदावस्थः तथाभूतो द्विपेन्द्र इव आसीत्॥ ७॥

लतेति। लतानां वल्लीनां प्रतानैः कुटिलतन्तुभिरुद्ग्रथिताः उन्नस्य ग्रथिताः ये केशास्तैरुपलक्षितः। इत्थम्भूतलक्षणे (१,३,२१पा०) तृतीया। स राजा अधिज्यमारोपितमौर्वीकं धनुर्यस्य सोऽधिज्यधन्वा सन् धनुषश्च (५.४.१३२पा०) इत्यनङादेशः। मुनिहोमधेनोः रक्षापदेशात् रक्षणव्याजात् वन्यान् वनेभवान् दुष्टसत्वान् दुष्टजन्तून्। "द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु" इत्यमरः। विनेष्यन् शिक्षयिष्यन्निव दावं वनम्। "वने च वनवह्नौ च दवो दाव इहेष्यते" इति यादवः। विचचार वने चचारेत्यर्थः। देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति (१.४.५१सू० भा०का०) दावस्य कर्मत्वम्॥८॥

विसृष्टपार्श्वानुचरस्य तस्य
पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदाना
मालोकशब्दं वयसां विरावैः ॥ ९ ॥

मरुत्प्रयुक्ताश्च मरुत्सखाभं
तमर्च्यमारादभिवर्त्तमानम् ।
अवाकिरन् बाललताः प्रसूनै
राचारलाजैरिव पौरकन्याः ॥ १० ॥

विसृष्टेत्यादिभिः षड्भिः श्लोकैस्तस्य महामहिमतया द्रुमादयोऽपि राजोपचारं चक्रुरित्याह

विसृष्टेति । विसृष्टाः पार्श्वानुचराः पार्श्ववर्त्तिनो जनाः येन तस्य पाशभृता वरुणेन समस्य तुल्यस्य । "प्रचेता वरुणः पाशी" त्यमरः । अनुभावोऽनेन सूचितः । तस्य राज्ञः पार्श्वयोः द्रुमाः उन्मदाना-मुत्कटमदानां वयसां खगानाम् । "खगबाल्यादिनोर्वय इत्यमरः । वि-रावैः शब्दैः आलोकस्य शब्दं वाचकम् आलोकयेति शब्दं जयशब्द-मित्यर्थः । "आलोको जयशब्दः स्या"दिति विश्वः । उदीरयामासु-रित्युत्प्रेक्षा ॥ ९ ॥

मरुदिति । मरुत्प्रयुक्ताः वायुना प्रेरिताः बाललता आरात् समीपेऽभि-वर्त्तमानम् । "आरात् दूरसमीपयो" रित्यमरः । मरुतो वायोः सखा मरुत्सखोऽग्निः सद्वाभातीति मरुत्सखाभम् । आतश्चोपसर्गे (३,१,१३६ पा०) इति कप्रत्ययः । अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः पौर-

धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकामविस्तारफलं हरिण्यः ॥ ११ ॥

स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चै-
रुद्गीयमानं वनदेवताभिः ॥ १२ ॥

कन्याः पौराश्च ताः कन्याः आचारार्थैर्लाजैराचारलाजैरिव अवाकिरन् तस्योपरि विचिक्षिपुरित्यर्थः । सखा हि सखायमागतमुपचरतीति भावः ॥ १० ॥

धनुर्भृत इति । धनुर्भृतोऽप्यस्य राज्ञः एतेन भयसम्भावना दर्शिता तथापि विशङ्कैर्निर्भीकैरन्तःकरणैः कर्तृभिः दयया कृपारसेनार्द्रो भावोऽभिप्रायो यस्य तद्दयार्द्रभावं तदाख्यातं दयार्द्रभावमेतदित्याख्यातमित्यर्थः । "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु" इत्यमरः । तथाविधं वपुर्विलोकयन्त्यो हरिण्यः अक्ष्णां प्रकामविस्तारस्यात्यन्तविशालतायाः फलमापुः । "विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं च" इति न्यायेन स्वान्तःकरणवृत्तिप्रमाणादेव विश्रब्धं ददृशुरित्यर्थः ॥ ११ ॥

स इति । स दिलीपः मारुतपूर्णरन्ध्रैः अतएव कूजद्भिः स्वनद्भिः कीचकैर्वेणुविशेषैः । "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः । वंशः शुषिरवाद्यविशेषः । "वंशादिकन्तु शुषिर"मित्यमरः ।

पृक्तस्तुषारैर्गिरिनिर्झराणा
मनोकहाकम्पितपुष्पगन्धी।
तमातपक्लान्तमनातपत्र
माचारपूतं पवनः सिषेवे॥ १३॥

शशाम वृष्ट्यापि विना दवाग्नि
रासीद्विशेषा फलपुष्पवृद्धिः।

आपादितं सम्पादितं वंशस्य कृत्यं कार्य्यं यस्मिन् कर्मणि तत्तथा कुञ्जेषु लतागृहेषु। "निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे" इत्यमरः। वनदेवताभिरुद्गीयमानमुच्चैर्गीयमानं स्वं यशः शुश्राव श्रुतवान्॥ १२॥

पृक्तइति। गिरिषु निर्झराणां वारिप्रवाहाणाम्। "वारिप्रवाहो निर्झरोझर" इत्यमरः। तुषारैः सीकरैः। "तुषारौ हिमसीकरौ" विति शाश्वतः। पृक्तः संपृक्तः अनोकहानां वृक्षाणामाकम्पितानि पुष्पाणि तेषां योगन्धः सोऽस्यास्तीति आकम्पितपुष्पगन्धी ईषत्कम्पितपुष्पगन्धवान् एवं शीतोमन्दः सुरभिः पवनोवायुः अनातपत्रं व्रतार्थं परिहृतच्छत्रम् अतएवातपक्लान्तम् आचारेण पूतं शुद्धं तं नृपं सिषेवे। आचारपूतत्वात् स राजा जगत्पावनस्यापि सेव्यआसीदिति भावः॥ १३॥

शशामेति। गोप्तरि तस्मिन् राज्ञि वनं गाहमाने प्रविशति सति वृष्ट्या विनापि दवाग्निर्वनाग्निः। "दवदावौ वनानले" इति हैमः। शशाम, फलानां पुष्पाणाञ्च वृद्धिः विशेष्यते इति विशेषा अतिशयिता

ऊनं न सत्त्वेष्वधिको बबाधे
तस्मिन् वनं गोप्तरि गाहमाने॥ १४ ॥
सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा
प्रभा पतङ्गस्य मुनेश्च धेनुः॥ १५ ॥
तां देवतापित्रतिथिक्रियार्थां
मन्वग् ययौ मध्यमलोकपालः।

कर्मार्थे घञ्प्रत्ययः। आसीत्। सत्त्वेषु जन्तुषु मध्ये। यतश्च निर्द्धारणम् (२,३,४१पा०) * इति सप्तमी। अधिकः प्रबलो व्याघ्रादिः ऊनं दुर्बलं हरिणादिकं न बबाधे॥ १४॥

सञ्चारपूतानीति। पल्लवस्य रागो वर्णः पल्लवरागः। "रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु"ति शाश्वतः। सइव ताम्रा पल्लवरागताम्रा पतङ्गस्य सूर्यस्य प्रभा कान्तिः। "पतङ्गः पक्षिसूर्ययो"रिति शाश्वतः। मुनेर्धेनुश्च दिगन्तराणि दिशामवकाशान्। "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये" इत्यमरः। सञ्चारेण पूतानि शुद्धानि कृत्वा दिनान्ते सायंकाले निलयायालयाय धेनुपक्षे आलयाय गन्तुं प्रचक्रमे॥ १५॥

तामिति। मध्यमलोकपालो भूपालः देवतापित्रतिथीनां क्रियाः यागश्राद्धदानानि ता एवार्थः प्रयोजनं यस्यास्तां तां धेनुमन्वक् अनुपदं ययौ। "अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्यय"मित्यमरः। सतां मतेन

* यतः समुदायात् जातिगुणक्रियासंज्ञाभिरेकदेशस्य पृथक्करणं तद्वाचकात् षष्ठीसप्तम्यौ स्तः।

बभौ च सा तेन सतां मतेन
श्रद्धेव साक्षाद्विधिनोपपन्ना ॥ १६ ॥
स पल्वलोत्तीर्णवराहयूथा-
न्यावासवृक्षोन्मुखबर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि
श्यामायमानानि वनानि पश्यन् ॥ १७ ॥

सद्भिर्मान्येन । मतिबुद्धीत्यादिना (३,२,१८८ पा०*) वर्त्तमाने क्तः । क्तस्य च वर्त्तमाने †(२,३,६७पा०)इति षष्ठी । तेन राज्ञा उपपन्ना युक्ता सा धेनुः सतां मतेन विधिना अनुष्ठानेनोपपन्ना युक्ता साक्षात् प्रत्यक्षा श्रद्धा आस्तिक्यबुद्धिरिव बभौ च ॥ १६ ॥

सइति । स राजा पल्वलेभ्योऽल्पजलाशयेभ्यः उत्तीर्णानि निर्गतानि वराहाणां यूथानि कुलानि येषु तानि बर्हाख्येषां सन्तीति बर्हिणामयूराः । "मयूरोबर्हिणोबर्ही"त्यमरः । फलबर्हाभ्यामिनच्प्रत्ययोवक्तव्यः (५,२,१२१,वा०) । आवासवृक्षाणामुन्मुखाः बर्हिणा येषु तानि श्यामायमानानि वराहबर्हिणादिमलिनिम्ना अश्यामानि श्यामानि भवन्तीति श्यामायमानानि । लोहितादिडाज्भ्यः क्यष् (३,१,१३ पा०) इति क्यष्प्रत्ययः । वा क्यषः (१,३,९०पा०)इत्यात्मनेपदे शानच् । मृगैरध्यासिता अधिष्ठिताः शाद्वला येषु तानि । शादाः शष्पाण्येषु देशेषु सन्तीति शाद्वलाः शष्पश्यामदेशाः । "शाद्वलः शादहरिते"इत्यमरः । "शादः कर्दमशष्पयो"रिति विश्वः । नडशादाड्ड्वलच् (४,४,५पा०) इति ड्वलच्प्रत्ययः । वनानि पश्यन् ययौ ॥ १७ ॥

* बुद्ध्यर्थस्योपादानात् मतिरिहेच्छा ।

† वर्त्तमानार्थक्तस्य योगे षष्ठी स्यात् ।

आपीनभारोद्वहनप्रयत्नात्
गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः।
उभावलञ्चक्रतुरञ्चिताभ्यां
तपोवनावृत्तिपथं गताभ्याम्॥ १८॥

वशिष्ठधेनोरनुयायिनन्त-
मावर्त्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्॥ १९॥

पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या।

आपीनेति। गृष्टिः सकृत्प्रसूता गौः। "गृष्टिः सकृत्प्रसूता गौरि"ति हलायुधः। नरेन्द्रश्च उभौ यथाक्रमम् आपीनमूधः। "ऊधस्तु क्लीवमापीन"मित्यमरः। आपीनस्य भारोद्वहने प्रयत्नात् प्रयासात् वपुषो गुरुत्वादाधिक्याच्च अञ्चिताभ्यां चारुभ्यां गताभ्यां गमनाभ्यां तपोवनादावृत्तेः पन्थाः तं तपोवनावृत्तिपथम्। ऋक्पूरित्यादिना (५,४,७४पा०) समासान्तः अप्रत्ययः। अलञ्चक्रतुर्भूषितवन्तौ॥१८॥

वशिष्ठेति। वशिष्ठधेनोरनुयायिनमनुचरं वनान्तादावर्त्तमानं प्रत्यागतं तं दिलीपं वनिता सुदक्षिणा निमेषेष्वलसा मन्दा पक्ष्मणां पङ्क्तिर्यस्याः सा निर्निमेषा सतीत्यर्थः लोचनाभ्यां करणाभ्यामुपोषिताभ्यामिव उपवासोभोजननिवृत्तिः तद्वद्भ्यामिव। वसतेः कर्त्तरि क्तः। पपौ। यथोपोषितः अतितृष्णया जलमधिकं पिपासति तद्वदतितृष्णया अधिकं व्यलोकयदित्यर्थः॥ १९॥

पुरस्कृतेति। वर्त्मनि पार्थिवेन पृथिव्याः ईश्वरेण। तस्येदम्

तदन्तरे सा विरराज धेनु
र्दिनक्षपामध्यगतेव सन्ध्या ॥ २० ॥
प्रदक्षिणीकृत्य पयस्विनीं तां
सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च्च विशालमस्याः
शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥ २१ ॥
वत्सोत्सुकापि स्तिमिता सपर्य्यां
प्रत्यग्रहीत् सेति ननन्दतुस्तौ ।

(५,१,४२पा०)* इत्यञ्प्रत्ययः । पुरस्कृता अग्रतःकृता धर्म्मस्य पत्नी धर्म्मार्थपत्नीत्यर्थः । अश्वघासादिवत्तादर्थ्ये † षष्ठीसमासः । पार्थिवस्य धर्म्मपत्न्या प्रत्युद्गता सा धेनुस्तदन्तरे तयोर्दम्पत्योर्मध्ये दिनक्षपयोर्दिनरात्र्योर्मध्यगता सन्ध्येव रराज ॥ २० ॥

प्रदक्षिणीकृत्येति । अक्षतानां पात्रेण सह वर्त्तेते इति साक्षतपात्रौ हस्तौ यस्याः सा सुदक्षिणा पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य च अस्याः धेन्वाः विशालं शृङ्गान्तरं शृङ्गमध्यम् अर्थसिद्धेः कार्य्यसिद्धेर्द्वारं प्रवेशमार्गमिव आनर्च्च अर्च्चयामास । अर्च्चते र्भौवादिकाल्लिट् ॥ २१ ॥

वत्सोत्सुकेति । सा धेनुः वत्सोत्सुकापि वत्से उत्कण्ठितापि

---

* तस्येश्वर इत्यर्थे सर्व्वभूमिपृथिवीभ्यां क्रमेणाणञौ स्तः ।

† चतुर्थी तदर्थार्थेत्यादि(२,१,३६पा०)सूत्रे बलिरक्षितयोः ग्रहणं प्रकृतिविकृतिभावएव,तादर्थ्ये चतुर्थ्या समासोनान्यत्रेति सिद्धान्तात् तादर्थ्यषष्ठ्येवात्र समासः ।

भक्त्योपपन्नेषु हि तद्विधानां
प्रसादचिह्नानि पुरःफलानि ॥ २२ ॥
गुरोः सदारस्य निपीड्य पादौ
समाप्य सान्ध्यञ्च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥ २३ ॥
तामन्तिकन्यस्तबलिप्रदीपा-
मन्वास्य गोप्ता गृहिणीसहायः ।

स्तिमिता निश्चला सती सपर्य्यां पूजां प्रत्यपद्यतेति हेतोस्तौ दम्पती ननन्दतुः । पूजास्वीकारस्य आनन्दहेतुत्वमाह भक्त्येति । पूज्येष्वनुरागो भक्तिस्तयोपपन्नेषु युक्तेषु विषये तद्विधानां तस्याः धेन्वाः विधेव विधा प्रकारो यासां तासां महतीनामित्यर्थः प्रसादस्य चिह्नानि लिङ्गानि पूजास्वीकारादीनि पुरःफलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि हि । अविलम्बितफलसूचकलिङ्गदर्शनादानन्दो युज्यत इत्यर्थः ॥ २२ ॥

गुरोरिति । भुजोच्छिन्नरिपुर्दिलीपः सदारस्य दारैरन्वत्यासह वर्त्तमानस्य गुरोस्तयोरपीत्यर्थः । “भार्य्या जायाथ पुंभूम्नि दाराः” इत्यमरः । पादौ निपीड्याभिवन्द्य सान्ध्यं सन्ध्यायां विहितं विधिमनुष्ठानञ्च समाप्य दोहावसाने निषण्णामासीनां दोग्ध्रीं दोहनशीलाम् । तृन् (३.१,१३५ पा०) इति तृन्प्रत्ययः । धेनुमेव पुनर्भेजे सेवितवान् । दोग्ध्रीमिति निरुपपदप्रयोगात् कामधेनुत्वं गम्यते ॥ २३ ॥

तामिति । गोप्ता रक्षकोऽर्थाद्दिलीपो गृहिणीसहायः पत्नीद्वितीयः सन्

क्रमेण सुप्तामनु संविवेश
सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥

इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥ २५ ॥

अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः ।

उभावपीत्यर्थः अन्तिके न्यस्ता बलयः प्रदीपाश्च यस्यास्तां तथोक्तां तां निषण्णां धेनुमन्वास्यानूपविश्य क्रमेण सुप्तामनु अनन्तरं संविवेश सुष्वाप प्रातः सुप्तोत्थितामनूदतिष्ठत् उत्थितवान् । अत्रानुशब्देन धेनुराज-व्यापारयोः पौर्वापर्यमुच्यते क्रमशब्देन धेनुव्यापाराणामित्यपौनरुक्त्यम् । कर्म्मप्रवचनीययुक्ते (२,३,८पा०) इति द्वितीया ॥ २४ ॥

इत्थमिति । इत्थमनेन प्रकारेण प्रजार्थं सन्तानाय महिष्या समम् अभिषिक्तपत्न्या सह । "कृताभिषेका महिषी"त्यमरः । व्रतं धारयतः महनीया पूज्या कीर्त्तिर्यस्य तस्य दीनानामुद्धरणं दैन्यविमोचनं तत्र उचितस्य परिचितस्य तस्य नृपस्य त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्त दिनानि एकविंशतिदिनानि व्यतीयुः ॥ २५ ॥

अन्येद्युरिति । अन्येद्युरन्यस्मिन् दिने द्वाविंशे दिने । सद्यः परुत्परारीत्या (५.३.२२पा०) दिना निपातनात् सिद्धम् । "अद्यात्राह्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् । तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः"

गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥

सा दुष्प्रधर्षा मनसापि हिंस्रै-
रित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण
प्रसह्य सिंहः किल तां चकर्ष ॥ २७ ॥

तदीयमाक्रन्दितमार्त्तसाधो-
र्गुहानिबद्धप्रतिशब्ददीर्घम् ।

इत्यमरः । मुनिहोमधेनुः आत्मानुचरस्य भावमभिप्रायं दृढभक्तित्वम् । "भावोऽभिप्राय आशय" इति यादवः । जिज्ञासमाना ज्ञातुमिच्छन्ती । ज्ञाश्रुस्मृदृशां सन (१,३,५७ पा०) इत्यात्मनेपदे शानच् । प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिन् तत् । "शष्पं बालतृणं घास" इत्यमरः । गौरीगुरोः पार्वतीपितुर्गह्वरं गुहामाविवेश ॥ २६ ॥

सेति । सा धेनुर्हिंस्रैः व्याघ्रादिभिर्मनसापि दुष्प्रधर्षा दुर्धर्षेति हेतोरद्रिशोभायां प्रहितेक्षणेन दत्तदृष्टिना नृपेण अलक्षितमभ्युत्पतनमाभिमुख्येनोत्पतनं यस्य सः सिंहस्तां धेनुं प्रसह्य हठात् । "प्रसह्य तु हठार्थक"मित्यमरः । चकर्ष किलेत्यलीके ॥ २७ ॥

तदीयमिति । गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्या इदं तदीयमाक्रन्दितमार्त्तघोषणम् । आर्त्तेष्वापन्नेषु साधोर्हितकारि-

रश्मिष्विवादाय नगेन्द्रसक्तां
निवर्त्तयामास नृपस्य दृष्टिम् ॥ २८ ॥
स पाटलायां गवि तस्थिवांसं
धनुर्धरः केशरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥
ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।

नृपस्य नगेन्द्रसक्तां दृष्टिं रश्मिषु। "किरणप्रग्रहौ रश्मी" इत्यमरः। आदायेव गृहीत्वेव निवर्त्तयामास ॥ २८ ॥

स इति। धनुर्धरः सः नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं स्थितम्। क्वसुश्च (३,२,१०२ पा०) इति क्वसुप्रत्ययः। केशरिणं सिंहं सानुमतोऽद्रेः धातोर्गैरिकस्य विकारो धातुमयी तस्यामधित्यकायामूर्द्ध्वभूमौ। "उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका" इत्यमरः। उपाधिभ्यां त्यकन्नासन्नारूढयोः (५,२,३४ पा०) इति त्यकन्प्रत्ययः। प्रफुल्लं विकसितम्। फुल्ल विकसने इति धातोः पचाद्यच्। लोध्राख्यं द्रुममिव ददर्श। प्रफुल्तमिति तकारयुक्तपाठे ञि फला विशरणे इति धातोः कर्त्तरि क्तः उत्परस्यातः इति च, (७,४,८८।८९ पा०) इत्युकारादेशः ॥ २९ ॥

तत इति। ततः सिंहदर्शनानन्तरं मृगेन्द्रगामी सिंहगामी शरणं रक्षणम्। शरणं रक्षणे गृहे" इति यादवः। शरणे साधुः शरण्यः। तत्र साधुः (३.४,५ पा०) इति यत्प्रत्ययः। प्रसभेन बला-

---

* चरफलयोश्च धात्वोरकारस्य उत्स्यात् तादौ प्रत्यये क्ते परे।

जाताभिषङ्गो नृपतिर्निषङ्गा
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः॥ ३०॥
वामेतरस्तस्य करः प्रहर्त्तु
र्नखप्रभाभूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥ ३१॥
बाहुप्रतिष्टम्भविवृद्धमन्यु
रभ्यर्णमागस्कृतमस्पृशद्भिः।

क्षरेणोद्धृताः अरयो येन स नृपतिः राजा जाताभिषङ्गो जातपराभवः सन्। "अभिषङ्गः पराभवः" इत्यमरः। वध्यस्य वधार्हस्य दण्डादिभ्यो यः (५,१,६६ पा०) इति प्रत्ययः। मृगेन्द्रस्य वधाय निषङ्गात् तूणीरात्। "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयो" रित्यमरः। शरमुद्धर्त्तुमैच्छत्॥ ३०॥

वामेतर इति। प्रहर्त्तुमस्य वामेतरो दक्षिणः करो नखप्रभाभिः भूषितानि विच्छुरितानि कङ्कस्य पक्षिविशेषस्य पत्राणि यस्य तस्मिन्। "कङ्कः पक्षिविशेषे स्याद्गुप्ताकारे युधिष्ठिरे" इति विश्वः। सायकस्य पुङ्खे एव कर्त्तर्याख्ये मूलप्रदेशे। "कर्त्तरी पुङ्ख" इति यादवः। सक्ताङ्गुलिः सन् चित्रार्पितारम्भः चित्रलिखितशरोद्धरणोद्योग इवावतस्थे॥ ३१॥

बाह्विति। बाह्वोः प्रतिष्टम्भेन प्रतिबन्धेन। "प्रतिबन्धः प्रतिष्टम्भ" इत्यमरः। विवृद्धमन्युः प्रवृद्धरोषो राजा मन्त्रौषधिभ्यां रुद्धवीर्य्यः प्रतिबद्धशक्तिर्भोगी सर्प इव। "भोगी राजभुजङ्गयो" रिति यादवः। अभ्यर्णमन्तिकम्। "उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्य-

राजा स्वतेजोभिरदह्यतान्त-
र्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥ ३२ ॥

तमार्य्यगृह्यं निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम्।
विस्माययन् विस्मितमात्मवृत्तौ
सिंहोरुसत्त्वं निजगाद सिंहः ॥ ३३ ॥

मितोऽस्य" निरुत्तरः। आत्मसदृशस्य... स्वतेजोभि-रन्तरदह्यत। "अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपी"ति यादवः ॥ ३२ ॥

तमिति। निगृहीता पीडिता धेनुर्येन स सिंहः आर्याणां सतां गृह्यं पक्ष्यम्। पदास्वैरिबाह्यापक्ष्येषु चेति(३.१.११९ पा०)* क्यप्। मनुवंशस्य केतुं चिह्नं केतुभूतमित्यर्थः। सिंहस्य उरुसत्त्वो महाबलस्तम् आत्मवृत्तौ बाहुस्तम्भरूपे व्यापारे ... विस्मितम्। ... तं दिलीपं मनुष्यवाचा करणेन पुनर्विस्माययन् विस्मयमाविशं प्रापयन् निजगाद। स्मिङीषद्धसन इति धातोर्णिचि ... स्वार्थे च इति विस्माययन्निति रूपं सिद्धम्। विस्मापयन्निति पाठे पुगागमस्तु ... नित्यं स्मयतेरि ति (६.१.५७ पा०) हेतुभयविवक्षायामेव †। भीस्म्योर्हेतुभये (१.३.६८ पा०) ... विस्मापयतीति स्यात् यस्मात् मनुष्यवाचा. विस्मापयतीति ... प्रयोक्तव्यं न ... ॥ ३३ ॥

* पदे. अस्वैरिणि. (परतन्त्रे) बाह्यायां..(बहिर्भूतायाम्) पक्ष्ये- ऽर्थे च गृहेः क्यप् स्यात्।

† हेतोः प्रयोजककर्तृतो भये स्मये च गम्ये स्मयतेर्नित्यं ... त्विषौ ... रूपं स्यात्। ...

अलं महीपाल ! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥ ३४ ॥

कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥ ३५ ॥

अलमिति । हे महीपाल ! तव श्रमेणालं साध्याभावात् श्रमेण कर्त्तव्यमित्यर्थः । अत्र गम्यमानसाधनक्रियापेक्षया श्रमस्य करणत्वात् तृतीया उक्तञ्च न्यासोद्द्योते "न केवलं श्रूयमाणैव क्रिया निमित्तं करणभावस्य अपि तर्हि गम्यमानापीति" । "अलं भूषणपर्य्याप्तिशक्ति वारणवाचकमित्यमरः" । इतोऽस्मिन् मयि । (५,३,१४पा०) सार्व्वविभक्तिकस्तसिः । प्रयुक्तमप्यस्त्रं वृथा स्यात् तथाहि पादपोन्मूलने शक्तिर्यस्य तत्तथोक्तं मारुतस्य रंहो वेगः शिलोच्चये पर्व्वते न मूर्च्छति न प्रसरति ॥ ३४ ॥

कैलासेति । कैलासइव गौरः शुभ्रस्तम् । "चामीकरञ्च शुभ्रञ्च गौरमाहुर्मनीषिण" इति शाश्वतः । वृषं वृषभमारुरुक्षोः आरोढुमिच्छोः । तस्योपरि पदं निक्षिप्य वृषमारोहतीत्यर्थः । अष्टौ मूर्त्तयो यस्य तस्मादष्टमूर्त्तेः शिवस्य पादार्पणं पादन्यासस्तदेवानुग्रहः प्रसादस्तेन पूतं पृष्ठं यस्य तं तथोक्तं निकुम्भमित्रं कुम्भोदरं नाम किङ्करं मामवेहि विद्धि । "पृथिवी सलिलं तेजोवायुराकाशमेव च । सूर्य्याचन्द्रमसौ सोमयाजी चेत्यष्ट मूर्त्तय" इति यादवः ॥ ३५ ॥

अमुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥ ३६॥

कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः॥ ३७॥

अमुमिति। पुरोऽग्रतोऽमुं देवदारुं पश्यसीति काकुः। असौ देवदारुः वृषभोध्वजो यस्य तेन शिवेन पुत्रीकृतः पुत्रत्वेन स्वीकृतः (५, ४, ५० वा०) अभूततद्भावे च्विः। यो देवदारुः स्कन्दस्य मातुः गौर्याः हेम्नः कुम्भएव स्तनस्तस्मान्निःसृतानां पयसामम्बूनां रसज्ञः स्वादज्ञः। स्कन्दपक्षे हेमकुम्भइव स्तनइति विग्रहः पयसां क्षीराणाम्। "पयः क्षीरं पयोऽम्बु च"इत्यमरः। स्कन्दसमानप्रेमास्पदमिति भावः॥ ३६॥

कण्डूयमानेनेति। कदाचित् कटं कपोलं कण्डूयमानेन घर्षता। कण्ड्वादिभ्योयगिति (३,१,२७ पा०) यक् ततः शानच्। वन्यद्विपेनास्य देवदारोस्त्वगुन्मथिता अथाद्रेस्तनया गौरी असुरास्त्रैरालीढं क्षतं सेनां नयतीति सेनानीः स्कन्दः। "पार्वतीनन्दनः स्कन्दः सेनानीरि"त्यमरः। सत्सूद्विषेत्यादिना (३,२,६१ पा०) क्विप्। तमिवैनं देवदारुं शुशोच॥ ३७॥

तदाप्रभृत्येव वनद्विपानां
त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय
सिंहत्वमङ्कागतसत्त्ववृत्ति ॥ ३८ ॥
तस्यालमेषा क्षुधितस्य तृप्त्यै
प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे
सुरद्विषश्चान्द्रमसी सुधेव ॥ ३९ ॥
स त्वं निवर्त्तस्व विहाय लज्जां
गुरोर्भवान् दर्शितशिष्यभक्तिः ।

तदेति । तदा तत्कालः प्रभृतिरादिर्यस्मिन् कर्म्मणि तत्तथा तदाप्रभृत्येव वनद्विपानां त्रासार्थं भयार्थं शूलभृता शिवेन अङ्कं समीपम् आगताः प्राप्ताः सत्त्वाः प्राणिनो वृत्तिर्यस्मिन् तत् । "अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयो"रिति केशवः । सिंहत्वं विधाय अस्मिन्नद्रिकुक्षौ गुहायामहं व्यापारितो नियुक्तः ॥ ३८ ॥

तस्येति । परमेश्वरेण प्रदिष्टो निर्दिष्टः कालो भोजनवेला यस्याः सा उपस्थिता प्राप्ता एषा गोरूपा शोणितपारणा रुधिरस्य व्रतान्तभोजनं सुरद्विषो राहोः चन्द्रमस इयं चान्द्रमसी सुधेव क्षुधितस्य बुभुक्षितस्य तस्य अङ्कागतसत्त्ववृत्तेः मे मम सिंहस्य तृप्त्यै अलं पर्याप्ता । नमःस्वस्तीत्यादिना (२,३.१६ पा०) चतुर्थी ॥ ३९ ।

स इति । स त्वमुपायशून्यत्वात् लज्जां विहाय निवर्त्तस्व । भवान्

शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥ ४० ॥

इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावा
दात्मन्यवज्ञां शिथिलीचकार ॥ ४१ ॥

प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्वभङ्गे वितथप्रयत्नः ।

हं गुरोर्दर्शिता प्रकाशिता शिष्यस्य कर्तव्या भक्तिर्येन स तथोक्तोऽसि । ननु गुरुधनं विनाश्य कथं तत्समीपं गच्छेयमत आह शस्त्रेणेति यद् रक्ष्यं धनं शस्त्रेणायुधेन । "शस्त्रमायुधलोहयोरि"त्यमरः । अशक्या रक्षा यस्य तदशक्यरक्षं रक्षितुमशक्यमित्यर्थः तद् रक्ष्यं नष्टमपि शस्त्रभृतां यशो न क्षिणोति न हिनस्ति । अशक्यार्थेष्वप्रतिविधानं न दोषायेति भावः ॥ ४० ॥

इतीति । पुरुषाणामधिराजोऽन्यः इति प्रगल्भं मृगाधिराजस्य वचो निशम्य श्रुत्वा गिरिशस्येश्वरस्य प्रभावात् प्रत्याहतास्त्रः कुण्ठितास्त्रः सन् आत्मनि विषये अवज्ञामपमानं शिथिलीचकार तत्याजेत्यर्थः अवज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः । समानेषु हि क्षत्रियाणामभिमानो न सर्वेश्वरं प्रतीति भावः ॥ ४१ ॥

प्रतीति । स एव पूर्वः प्रथमः भङ्गः प्रतिबन्धो यस्य तस्मिन् तत्पूर्वभङ्गे इषुप्रयोगे वितथप्रयत्नो विफलप्रयासोऽत एव वज्रं कुलिशं मुमुक्षन्

जडीकृतस्त्र्यम्बकवीक्षणेन
वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥
संरुद्धचेष्टस्य मृगेन्द्र ! कामं
हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद
सर्वं भवान् भावमतोऽभिधास्ये ॥ ४३ ॥

लोकनिच्छन् अम्बकं लोचनम् । "दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणी"ति हलायुधः । त्रीण्यम्बकानि यस्य स त्र्यम्बको हरस्तस्य वीक्षणेन जडीकृतो निष्पन्दीकृतः वज्रं पाणौ यस्य स वज्रपाणिरिन्द्रः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यमिति (२, २, ७ वा०) पाणेः सप्तम्यन्तस्योत्तरनिपातः । अत एव स्थितोऽन्वयः एनं सिंहं प्रत्यब्रवीत् । "बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तम्भयत् प्रभुरिति महाभारते" ॥४२॥

संरुद्धेति । हे मृगेन्द्र ! संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तत् वचो वाक्यं कामं हास्यं परिहसनीयं यत् वचः "स त्वं मदीयेनेत्यादिकम्" अहं विवक्षुर्वक्तुमिच्छुरस्मि । तर्हि तूष्णीं स्थीयतामित्याशङ्क्य ईश्वर निष्ठुरत्वात्सर्वज्ञं त्वां प्रति न हास्यमित्याह अन्तरिति । हि यतः भवान् प्राणभृतामन्तर्गतं हृद्गतं वागुक्त्या बहिरप्रकाशितमेव सर्वं भावं वेद वेत्ति । विदो लटो वेति (३, ४, ८३ पा०) णलादेशः । अतोऽहमभिधास्ये वक्ष्यामि वच इति प्रकृतं कर्म संबध्यते । अन्ये त्वीदृग्वचनमन्यथार्थमेतदित्युपहसन्ति अतस्तु मौनमेव भूषणं तन्न

मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहिताग्ने-
र्नश्यत् पुरस्तादनुपेक्षणीयम्॥ ४४॥

स त्वं मदीयेन शरीरवृत्तिं
देहेन निर्वर्त्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा
विसृज्यतां धेनुरियं महर्षेः॥ ४५॥

वाङ्मनसयोरेकविषयएवायमिति जानासि अतोऽभिधास्ये यद्वचोऽहं विवक्षुरित्यर्थः॥ ४३॥

मान्यइति। प्रत्यवहारः प्रलयः। स्थावराणां तरुशैलादीनां जङ्गमानां मनुष्यादीनां सर्गस्थितिप्रत्यवहारेषु हेतुः स ईश्वरोमे मम मान्यः पूज्योऽलङ्घ्यशासनइत्यर्थः। शासनञ्च सिंहत्वमङ्गागतसत्त्ववृत्तीत्युक्तरूपम्। तर्हि विसृज्य गम्यतां नेत्याह गुरोरपीति पुरस्तादग्रे नश्यदिदमाहिताग्नेर्गुरोर्धनमपि गोरूपमनुपेक्षणीयम्। आहिताग्नेरिति विशेषणेनानुपेक्षाकारणं हविःसाधनत्वं सूचयति॥ ४४॥

सइति। सोऽङ्गागतसत्त्ववृत्तिस्त्वं मदीयेन देहेन शरीरस्य वृत्तिं जीवनं निर्वर्त्तयितुं सम्पादयितुं प्रसीद दिनावसाने उत्सुको "माता समागमिष्यती"त्युत्कण्ठितो बालवत्सो यस्याः सा महर्षेरियं धेनुर्विसृज्यताम्॥ ४५॥

अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन् ।
भूयः स भूतेश्वरपार्श्ववर्त्ती
किञ्चिद्विहस्यार्थपतिं बभाषे ॥ ४६ ॥

एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम् ॥ ४७ ॥

अथेति । अथ भूतेश्वरस्य पार्श्ववर्त्ती अनुचरः स सिंहो गिरेर्गह्वराणां गुहानाम् । "देवखातबिले गुहा गह्वर"मित्यमरः । अन्धकारं ध्वान्तं दंष्ट्रामयूखैः शकलानि खण्डानि कुर्व्वन् निरस्यन्नित्यर्थः । किञ्चिद्विहस्यार्थपतिं नृपं भूयो बभाषे । हासकारणम् अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं द्रष्टव्यम् ॥ ४६ ॥

एकेति । एकातपत्रमेकच्छत्रं जगतः प्रभुत्वं स्वामित्वं नवं वयो यौवनम् इदं कान्तं रम्यं वपुश्च इत्येवं बहु, अल्पस्य हेतोरल्पेन कारणेनाल्पफलादेत्यर्थः । षष्ठी हेतुप्रयोगे* (२.३, २६ पा०) इति षष्ठी । हातुं त्यक्तुमिच्छन् त्वं विचारे कार्य्याकार्य्यविमर्शे मूढो मूर्खः मे मम प्रतिभासि ॥ ४७ ॥

* हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ।

भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाःप्रजानाथ ! पितेव पासि ॥ ४८ ॥
अथैकधेनोरपराधचण्डात्
गुरोः कृशानुप्रतिमाद् विभेषि ।

भूतेति । तव भूतेष्वनुकम्पा कृपा चेत् । "कृपा दयानुकम्पा स्या"दित्यमरः । कृपैव वर्त्तते चेदित्यर्थः तर्हि त्वदन्ते तव नाशे सति इयमेका गौः स्वस्ति क्षेममस्या अस्तीति स्वस्तिमती भवेज्जीवेदित्यर्थः । "स्वस्त्याशीःक्षेमपुण्यादौ"इत्यमरः । हे प्रजानाथ ! जीवन् पुनः पितेव प्रजाः उपप्लवेभ्योविघ्नेभ्यः शश्वत् सदा । "पुनःसदार्थयोः शश्वदि"त्यमरः । पासि रक्षसि । स्वप्राणव्ययेनैकधेनुरक्षणादरं जीवितेनैव जगदखिलजगत्त्राणमित्यर्थः ॥ ४८ ॥

न धर्म्मलोपादियं प्रवृत्तिः किन्तु गुरुभयादित्यत आह

अथेति । अथेति पक्षान्तरे अथ वा एकैव धेनुर्यस्य तस्मात् । अयं कोपकारणोपन्यास इति ज्ञेयम् । अतएवापराधे गवोपेक्षालक्षणे सति चण्डादतिकोपनात् । "चण्डस्त्वत्यन्तकोपन"इत्यमरः । अतएव कृशानुः प्रतिमा उपमा यस्य तस्मादग्निकल्पाद्गुरोर्विभेषीति काकुः । भीत्रार्थानां भयहेतुः (१,४,२५ पा०) इत्यपादानात् पञ्चमी । अल्पवित्तस्य धनहानिरतिदुःसहेति भावः । अस्य गुरोर्मन्युः क्रोधः । "मन्युर्दैन्ये क्रतौ" क्रुधीत्यमरः । घटाइव ऊधांसि यासां ता घटोध्नीः । *ऊधसोऽनङ् (५,४,१३१ पा०)इत्यनङादेशः बहुव्रीहेरूधसो-

---

*ऊधसोऽनाद्बहुव्रीहेरनङ् स्यात् इत्यनङि ङीपि अनोऽल्लोपे रूपं सिद्धम् ।

शक्योऽस्य मन्युर्भवता विनेतुं

गाः कोटिशः स्पर्शयता घटोध्नीः ॥ ४९ ॥

तद्रक्ष कल्याणपरम्पराणां

भोक्तारमूर्जस्वलमात्मदेहम् ।

महीतलस्पर्शनमात्रभिन्न

मृद्धं हि राज्यं पदमैन्द्रमाहुः ॥ ५० ॥

एतावदुक्त्वा विरते मृगेन्द्रे

प्रतिस्वनेनास्य गुहागतेन ।

ङीष् (४.१.२५ पा०) इति ङीष् । कोटिशः गाः स्पर्शयता प्रतिपादयता । "विश्राणनं वितरणं स्पर्शनं प्रतिपादन"मित्यमरः । भवता विनेतुमपनेतुं शक्यः ॥ ४९ ॥

तदिति । तत्तस्मात्कारणात् कल्याणपरम्पराणां भोक्तारम् । कर्म्मणि * षष्ठी । ऊर्ज्जो बलमस्यास्तीति ऊर्ज्जस्वलम् । ज्योत्स्नातमिस्रेत्यादिना (५, २. ११४ पा०) वलच्प्रत्ययान्तो निपातः । आत्मदेहं रक्ष । ननु गामुपेक्ष्य आत्मदेहरक्षणे स्वर्गहानिः स्यादित्याह महीतलेति ऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसम्बन्धमात्रेण भिन्नम् ऐन्द्रमिन्द्रसम्बन्धि पदं स्थानमाहुः स्वर्गान्न भिद्यत इत्यर्थः ॥ ५० ॥

एतावदिति । मृगेन्द्रे एतावदुक्त्वा विरते सति गुहागतेनास्य सिंहस्य प्रतिस्वनेन गिरिर्भूयः शैलोऽपि प्रीत्या तमेवार्थं क्षितिपाल-

* कर्तृकर्मणोः कृति (२.३.६५ पा०) इति सूत्रेण ।

शिलोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव ॥५१॥
निशम्य देवानुचरस्य वाचं
मनुष्यदेवः पुनरप्युवाच।
धेन्वा तदध्यासितकातराक्ष्या
निरीक्ष्यमाणः सुतरां दयालुः ॥ ५२ ॥

उच्चैरभाषतेवेत्युत्प्रेक्षा। भाषिरयं ब्रुविना समानार्थत्वात् द्विकर्म्मकः ब्रुविस्तु द्विकर्म्मकेषु पठितः तदुक्तं "दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते* तदकीर्त्तितमाचरितं कविने"ति ॥ ५१ ॥

निशम्येति। देवानुचरस्येश्वरकिङ्करस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरप्युवाच किम्भूतः सन् तेन सिंहेन यदध्यासितम् आक्रमणम्। नपुंसके भावे क्तः (३,३,११४पा०) इति क्तः। तेन कातरे अक्षिणी यस्यास्तया। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् (५,४.११३पा०) इति षच् षिद्गौरादिभ्यश्चेति (४, १, ४१ पा०) ङीष्। किं वा वक्ष्यतीति भीत्यैवं स्थितयेत्यर्थः धेन्वा निरीक्ष्यमाणोऽतएव सुतरां दयालुः सन्। सुतरामित्यत्र द्विवचनविभज्येत्यादिना † (५,३,५७पा०)

---

* उपयोगनिमित्तं प्रधानकर्म्मोपकारितानिमित्तमपूर्वविधौ सूत्रान्तरेण कारकान्तरसंज्ञाऽप्राप्तौ ब्रुवेः शासेश्च गुणेन गुणीभूतव्यापारेण यत् सचते सम्बध्नाति तन्मुनिना अकीर्त्तितमकथितं कर्मकथितं पारिभाषिकं कृतम्।

† द्वयोरर्थे एकस्यातिशये द्योत्ये विभज्ये विभजनीये च उपपदे बहूनामेकस्यातिशये द्योत्ये च तरबीयसुनौ स्त इति तरपि।

क्षतात् किल त्रायत इत्युदग्रः
क्षत्त्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ ५३ ॥

एकशब्दात्तरप् किमेत्तिङव्ययेत्यादिना * (५,४,११पा०) आमुप्रत्ययः (१, १, ३८ पा०) तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा ॥ ५२ ॥

किमुवाचेत्याह

क्षतादिति । क्षणु हिंसायामिति धातोः सम्पदादित्वात् (३,३,९४ वा०) क्विप् गमादीनामिति (६,४,४० वा०) वक्तव्यादनुनासिकलोपे (६,१,७१ पा०) तुगागमे च क्षदिति रूपं सिद्धं क्षतो नाशात् त्रायत इति क्षत्त्रः । सुपीति (३, २, ४ पा०) योगविभागात् कः । ताम्रितां व्युत्पत्तिं कविरर्थतोऽनुक्रामति क्षतादित्यादिना । उदग्रः उन्नतः क्षत्त्रस्य क्षत्त्रवर्णस्य शब्दो वाचकः क्षत्त्रशब्द इत्यर्थः क्षतात् त्रायते इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाश्वकर्णादिवत् केवल-रूढः किन्तु पङ्कजादिवद्योगरूढ इत्यर्थः । ततः किमित्यत आह तस्य क्षत्त्रशब्दस्य विपरीतवृत्तेर्विरुद्धव्यापारस्य क्षतस्त्राणमकुर्वतः पुंसो राज्येन किम् उपक्रोशमलीमसैर्निन्दामलिनैः । "उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणा" इत्यमरः । ज्योत्स्नातमिस्रेत्यादिना (५,२,११४ पा०) मलीमसशब्दो निपातितः । "मलीमसन्तु मलिनं कच्चरं मलदूषितम्" इत्यमरः । प्राणैर्वा किं निन्दितस्य सर्वं व्यर्थमित्यर्थः । एतेन त्यागमर्हसीत्यादिना श्लोकद्वयेनोक्तं प्रत्युक्तमिति वेदितव्यम् ॥ ५३ ॥

* किम् एदन्त तिङन्तात् अव्ययाच्च परस्मात् घात् "तरतमप्प्रत्ययात्" आमु॰ स्यात् द्रव्यप्रकर्षे न ।

कथं नु शक्योऽनुनयो महर्षे-
र्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि
रुद्रौजसा तु प्रहृतं त्वयास्याम् ॥ ५४ ॥
सेयं स्वदेहार्पणनिष्क्रयेण
न्याय्या मया मोचयितुं भवत्तः ।

अथैकधेनोरित्युक्तोत्तरमाह

कथमिति । अनुनयः क्रोधापनयः चकारो वाकारार्थः । महर्षेरनुनयो वा अन्यासां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनात् दानात् । "त्यागो वितरणं दानमुत्सर्ज्जनविसर्ज्जने । विश्राणनं वितरणमित्य"मरः । कथं नु शक्यो न शक्य इत्यर्थः । अत्र हेतुमाह इमां गां सुरभेः कामधेनोः । पञ्चमी विभक्ते इति (२,३,४२पा०) पञ्चमी । अनूनामन्यूनामवेहि जानीहि । तर्हि कथमस्याः परिभवोऽभूदित्याह रुद्रौजसेति अस्यां गवि त्वया कर्त्रा प्रहृतन्तु प्रहारस्तु । नपुंसके भावे क्तः (३,३,११४पा०) इति क्तः । रुद्रौजसा ईश्वरसामर्थ्येन न तु स्वसामर्थ्येनेत्यर्थः । सप्तम्यधिकरणे चेति (२,३,३६पा०) सप्तमी ॥ ५४ ॥

तर्हि किं चिकीर्षितमित्यत्राह

सेयमिति सेयं गौर्मया निष्क्रीयते प्रत्याह्रियते परगृहीतम् अनेनेति निष्क्रयः प्रतिशोधनम् । एरजिति (३, ३, ५६ पा०) अच्प्रत्ययः । स्वदेहार्पणमेव निष्क्रयस्तेन भवत्तः त्वत्तः । (५,३,७पा०) पञ्चम्यास्तसिल् इति तसिल् । मोचयितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः । धर्म्मपथ्यर्थन्यायादिना (४, ४, ९२ पा०) यत्प्रत्ययः । एवं

न पारणा स्याद्विहता तवैवं
भवेदलुप्तश्च मुनेः क्रियार्थः ॥ ५५ ॥

भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे
विनाश्य रक्ष्यं स्वयमक्षतेन ॥ ५६ ॥

किमप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः ।

इति तव पारणा भोजनं विहता न स्यात् मुनेः क्रिया होमादिः सएवार्थः प्रयोजनं स चालुप्तः भवेत् । स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः ॥ ५५ ॥

अत्र भवानेव प्रमाणमित्याह

भवानिति । "परवान् स्वामिपरतन्त्रो भवानपि । परतन्त्रः पराधीनः परवान्नाथवानपी"त्यमरः । इदं वक्ष्यमाणमवैति भवता अनुभूयत एवेत्यर्थः । शेषे प्रथम इति (१,४,१०८पा०) प्रथमपुरुषः । किमित्यत आह हि यस्माद्धेतोः । "हि हेताववधारणे" इत्यमरः । देवदारौ विषये महान् यत्नः महता यत्नेन रक्ष्यत इत्यर्थः । इदंतदोरुभयं दर्शयति स्थातुमिति रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः नियोक्तुः स्वामिनोऽग्रे स्थातुं शक्यं न हि ॥ ५६ ॥

सर्वथा [illegible]मित्याह

किमिति । किमपि किं वा अहं तवाहिंस्योऽवध्यो[illegible]

* शेषे युष्मदस्मद्भिन्ने समानाधिकरणे शेषे प्रथमपुरुषः स्यात् ।

एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ॥ ५७ ॥
सम्बन्धमाभाषणपूर्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्वनान्ते ।
तद्भूतनाथानुग ! नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥ ५८ ॥
तथेति गामुक्तवते दिलीपः
सद्यः प्रतिष्टम्भविमुक्तबाहुः ।

मे यशएव शरीरं रक्षितुं दयालुः कारुणिकोभव। "स्याद्दयालुः कारुणिकः" इत्यमरः। ननु मुख्यमुपेक्ष्यामुख्यशरीरे कोऽभिनिवेश इत्यतआह एकान्तेति। मद्विधानां मादृशानां विवेकिनामेकान्तविध्वंसिष्ववश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु पिण्डेषु शरीरेष्वनास्था खलु अनपेक्षैव। "आस्था त्वालम्बनास्थानयत्नापेक्षासु कथ्यते" इति विश्वः ॥ ५७ ॥

सौहार्दादहमनुरक्षणीयोऽस्मीत्याह

सम्बन्धमिति। सम्बन्धं सख्यम् आभाषणमालापः पूर्वं कारणं यस्य तमाहुः। "स्यादाभाषणमालापः" इत्यमरः। स तादृक् सम्बन्धो वनान्ते सङ्गतयोर्नौ आवयोर्वृत्तो जातः ततोर्हेतोः हे भूतनाथानुग! शिवानुचर! एतेन तस्य महत्त्वं सूचयति अतएव सम्बन्धिनो मित्रस्य मे प्रणयं याच्ञाम्। "प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाणः" इत्यमरः। विहन्तुं नार्हसि ॥ ५८ ॥

तथेति। तथेति गामुक्तवते हरये सिंहाय। "हरिः सिंहे सुपर्णे च

स न्यस्तशस्त्रो हरये स्वदेह-
मुपानयत् पिण्डमिवामिषस्य ॥ ५९ ॥
तस्मिन् क्षणे पालयितुः प्रजाना-
मुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥ ६० ॥
उत्तिष्ठ वत्सेत्यमृतायमानं
वचो निशम्योत्थितमुत्थितः सन् ।

[illegible]लौ हरिं विदु"रिति शाश्वतः । सद्यस्तत्क्षणे प्रतिष्टम्भा-त्प्रतिबन्धाद्विमुक्तो बाहुर्यस्य स दिलीपो न्यस्तशस्त्रस्त्यक्तायुधः सन् स्वदे-हम् आमिषस्य मांसस्य । "पललं क्रव्यमामिष" मित्यमरः । पिण्ड-मन्नपिण्डमिव उपानयत् समर्पितवान् । एतेन निर्ममत्वमुक्तम् ॥ ५९ ॥

तस्मिन्निति । तस्मिन् क्षणे उग्रं सिंहनिपातमुत्पश्यतः उत्प्रेक्ष-माणस्य तर्कयतोऽवाङ्मुखस्य अधोमुखस्य । "स्यादवाङप्यधोमुखः" इत्यमरः । प्रजानां पालयितुः राज्ञः उपरि उपरिष्टात् । उपर्युपरि-ष्टादिति (५.३.३१पा०) निपातः । विद्याधराणां देवयोनिविशे-षाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ॥ ६० ॥

उत्तिष्ठेति । राजा अमृतमिवाचरतीति अमृतायमानं तत् । उपमानादाचारे (३.१.१०पा०) इति क्यङ् ततः शानच् । उत्थि-तमुत्पन्नं हे वत्स ! उत्तिष्ठ इति वचो निशम्य श्रुत्वा उत्थितः सन् । [illegible] । अग्रतोऽग्रे प्रस्नवः क्षीरस्रावोऽस्ति यस्याः ता

ददर्श राजा जननीमिव स्वां
गामग्रतः प्रस्रविणीं न सिंहम्॥ ६१॥
तं विस्मितं धेनुरुवाच साधो!
मायां मयोद्भाव्य परीक्षितोऽसि।
ऋषिप्रभावान्मयि नान्तकोऽपि
प्रभुः प्रहर्तुं किमुतान्यहिंस्राः॥ ६२॥
भक्त्या गुरौ मय्यनुकम्पया च
प्रीतास्मि ते पुत्र! वरं वृणीष्व।

तां प्रस्रविणीं गां स्वां जननीमिव ददर्श सिंहं न ददर्श॥ ६१॥

तमिति। विस्मितमाश्चर्यं गतं कर्त्तरि क्तः। तं दिलीपं धेनुरुवाच। किमित्यत्राह हे साधो! मया मायामुद्भाव्य कल्पयित्वा परीक्षितोऽसि ऋषिप्रभावात् मयि अन्तको यमोऽपि प्रहर्त्तुं न प्रभुर्न समर्थः अन्ये हिंस्रा घातुकाः। "शरारुर्घातुकोहिंस्र" इत्यमरः। नमिकम्पीत्यादिना (३,२,१६७पा०) रप्रत्ययः। किमुत सुष्टु न प्रभव इति योज्यम्। "बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरः" इत्यमरः॥ ६२॥

भक्त्येति। हे पुत्र! गुरौ भक्त्या, मयि अनुकम्पया च तुभ्य प्रीतास्मि। * क्रियाग्रहणमपि कर्त्तव्यमिति चतुर्थी। वरं देवेभ्योवरणीयम् अर्थम्। "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे

* कर्मणा यमभिप्रैतीति १,४,३२पा० सूत्रे वार्त्तिकमता क्रियाग्रहणं कर्त्तव्यमित्युक्तेः प्रीतिरूपक्रियायत्त्वेनात्र सम्प्रदानता।

न केवलानां पयसां प्रसूति
मवेहि मां कामदुघां प्रसन्नाम् ॥ ६३ ॥

ततः समानीय स मानितार्थी
हस्तौ स्वहस्तार्ज्जितवीरशब्दः ।
वंशस्य कर्त्तारमनन्तकीर्त्तिं
सुदक्षिणायां तनयं ययाचे ॥ ६४ ॥

सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥ ६५ ॥

[illegible] इत्यर्थः। वृणीष्व स्वीकुरु। तथाहि मां केवलानां पयसां प्रसूतिं कारणं न अवेहि न विद्धि किन्तु प्रसन्नां मां कामान् दोग्धीति कामदुघां तामवेहि। दुहः कप् घश्चेति (३,२,७० पा०) कप्प्रत्ययः। ६३।

तत इति। ततो मानितार्थी स्वहस्तार्जितो वीर इति शब्दो येन स ए- तेनास्य दातृत्वं दैन्यराहित्यं चोक्तम्। स राजा हस्तौ समानीय सन्धाय [illegible]। वंशस्य कर्तारं प्रवर्तयितारम् एतच्च रघुर्जनित [illegible]। अनन्तकीर्तिं स्थिरयशसं तनयं सुदक्षिणायां ययाचे। ६४।

सन्तानेति। सा पयस्विनी गौः सन्तानं कामयत इति सन्तानकामः [illegible] (३,२,१ पा०) तस्मै राज्ञे तथेति कामम् इति [illegible]। [illegible]। [illegible] हे पुत्र! मदीयं पयः पत्र-

वत्सस्य होमार्थविधेश्च शेषम्
ऋषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं
षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ ॥

इत्थं क्षितीशेन वशिष्ठधेनु
र्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः
प्रत्याययावाश्रममश्रमेण ॥ ६७ ॥

पुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुङ्क्ष्व पिबेति उपयुङ्क्ष्वेति वा पाठः तमादिदेश आज्ञापितवती ॥ ६५॥

वत्सस्येति। हे मातः! वत्सस्य वत्सपीतस्य शेषं वत्सपीतावशिष्टमित्यर्थः होम एव अर्थस्तस्य विधिरनुष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः तव ऊधसि भवम् औधस्यं क्षीरम्। शरीरावयवाच्चेति (४,३,५५ पा०) यत् प्रत्ययः। रक्षितायाउर्व्याः षष्ठांशं षष्ठभागमिव ऋषेरनुज्ञामधिगम्य उपभोक्तुमिच्छामि ॥ ६६ ॥

इत्थमिति। इत्थं क्षितीशेन विज्ञापिता वशिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता सम्प्रत्येतया विज्ञापनया प्रीततरा अति सन्तुष्टा बभूव तदन्विता तेन दिलीपेनान्विता हैमवतात् हिमवत्सम्बन्धिनः कुक्षेः गुहायाः सकाशादश्रमेणानायासेनाश्रमं प्रत्याययौ आगता च ॥ ६७ ॥

तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥ ६८ ॥

स नन्दिनीस्तन्यमनिन्दितात्मा
सद्वत्सलो वत्सहुतावशेषम्।
पपौ वशिष्ठेन कृताभ्यनुज्ञः
शुभ्रं यशो मूर्त्तमिवातितृष्णः ॥ ६९ ॥

प्रातर्यथोक्तव्रतपारणान्ते
प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।

तस्या इति। प्रसन्नेन्दुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिह्नैर्मुखरागादिभिरनुमितमूहितं तस्या धेनोः प्रसादमनुग्रहं प्रहर्षचिह्नैरेव ज्ञातत्वात् पुनरुक्तयेव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै शशंस। कथितस्यैव कथनं पुनरुक्तिः न चेह तदस्ति किन्तु चिह्नैः कथितप्रायत्वात् पुनरुक्तयेव स्थितेत्युत्प्रेक्षा ॥ ६८ ॥

स इति। अनिन्दितात्मा अगर्हितस्वभावः सत्सु वत्सलः प्रेमवान् सद्वत्सलः। वत्सांसाभ्यां कामबले इति (५,२,९८ पा०) लच् प्रत्ययः। वशिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः स राजा वत्सस्य हुतस्य चावशेषं पीतहुतावशिष्टं नन्दिन्याः स्तन्यं क्षीरं शुभ्रं मूर्त्तं परिच्छिन्नं यश इवातितृष्णः सन् पपौ ॥ ६९ ॥

प्रातरिति। असौ दिलीपः प्रातः यथोक्तस्य पूर्वोक्तस्य व्रतस्य गो-

तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः ॥ ७० ॥

प्रदक्षिणीकृत्य हुतं हुताशम्
अनन्तरं भर्त्तुररुन्धतीञ्च ।
धेनुं सवत्साञ्च नृपः प्रतस्थे
सन्मङ्गलोदग्रतरप्रभावः ॥ ७१ ॥

श्रोत्राभिरामध्वनिना रथेन
स धर्म्मपत्नीसहितः सहिष्णुः ।

सेवारूपस्याङ्गभूता या पारणा तस्याः अन्ते प्रास्थानिकं प्रस्थानकाले भवं तत्कालोचितमित्यर्थः। कालाट्ठञिति (४,३,११पा०) ठञ् प्रत्ययः। यथा कथञ्चित् गुणवृत्त्यापि काले वर्त्तमानात्तत्प्रत्यय इष्यतइति वृत्तिकारः। ईयते प्राप्यते अनेनेत्ययनं स्वस्त्ययनं शुभावहमाशीर्वादं प्रयुज्य तौ दम्पती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास ॥ ७० ॥

प्रदक्षिणीकृत्येति। नृपः हुतं तर्पितं हुतमश्नातीति हुताशोऽग्निः कर्म्मण्यण् (३, २, १ पा०)। तं भर्त्तुर्मुनेरनन्तरं प्रदक्षिणानन्तरमित्यर्थः अरुन्धतीञ्च सवत्सां धेनुञ्च प्रदक्षिणीकृत्य। प्रगतो दक्षिणं प्रदक्षिणं तिष्ठद्गुप्रभृतीनि च (२, १, १७ पा०) इत्यव्ययीभावः ततः च्विः। अप्रदक्षिणं प्रदक्षिणं सम्पद्यमानं कृत्वा प्रदक्षिणीकृत्य सद्भिर्मङ्गलैः प्रदक्षिणादिभिर्मङ्गलाचारैरुदग्रतरप्रभावः सन् प्रतस्थे ॥ ७१ ॥

श्रोत्रेति। धर्म्मपत्नीसहितः सहिष्णुर्व्रतादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना कर्णाह्लादकरस्वनेन अनुद्घातः पाषाणादिप्रतिघातरहितोऽतएव सुखयतीति सुखस्तेन रथेन स्वेन पूर्णेन सफलेन

ययावनुद्घातसुखेन मार्गं
स्वेनेव पूर्णेन मनोरथेन ॥ ७२ ॥

तमाहितौत्सुक्यमदर्शनेन
प्रजाः प्रजार्थव्रतकर्शिताङ्गम्।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भि-
र्नवोदयं नाथमिवौषधीनाम् ॥ ७३ ॥

पुरन्दरश्रीः पुरमुत्पताकं
प्रविश्य पौरैरभिनन्द्यमानः।

मनोरथेनेव मार्गमध्वानं ययौ। मनोरथपक्षे अनुद्घातः प्रतिबन्धनिवृत्तिः ॥ ७२ ॥

तमिति। अदर्शनेन प्रवासनिमित्तेनाहितौत्सुक्यं जनितदर्शनोत्कण्ठं प्रजार्थेन सन्तानार्थेन व्रतेन नियमेन कर्शितं कृशीकृतमङ्गं यस्य तं नवोदयं नवाभ्युदयम् ओषधीनां नाथं सोममिव तं राजानं प्रजाः तृप्तिमनाप्नुवद्भिरतिस्पृहैर्नेत्रैः पपुः अत्यास्थया ददृशुरित्यर्थः। चन्द्रपक्षे अदर्शनं कलाक्षयनिमित्तं प्रजार्थे लोकहितार्थं व्रतं देवताभ्यः कलादाननियमः। "तत्र सोमं पिबन्ति देवाः पर्यायेणानुपूर्वशः" इति व्यासः। [illegible] ॥ ७२ ॥

पुरन्दरेति। पुरः शत्रुनगराणि दारयतीति पुरन्दरः शक्रः। "पूःसर्वयोर्दारिसहोः" इति खच् (३.२.४१ पा०) प्रत्ययः। "वाचंयमपुरन्दरौ च" इति (६.३.६९ पा०) मुमागमो निपातितः। तस्य श्रीरिव श्रीर्यस्य सः। स नृपः पौरैरभिनन्द्यमानः उत्पताकमुच्छ्रितध्वजम्। "पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्" इत्यमरः। पुरं प्रविश्य भुजङ्गेन्द्र-

* [illegible] स्यात्।

भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥ ७४ ॥
अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।

समानसारे तुल्यबले । "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरः । भुजे भुवो भूमेर्धुरमासज्य स्थापितवान् ॥ ७४ ॥

अथेति । अथ द्यौः सुरवर्त्म । "द्यौः स्वर्गसुरवर्त्मनोरिति" विश्वः । अत्रेर्महर्षेः नयनयोः समुत्थमुत्पन्नं नयनसमुत्थम् । आतश्चोपसर्गे कः इति (३. १, १३६ पा०) कप्रत्ययः । ज्योतिरिव चन्द्रमिवेत्यर्थः । "अत्रेः स्यादत्रिनेत्रप्रसूत" इति हलायुधः । चन्द्रस्यात्रिनेत्रोद्भूतत्वमुक्तं हरिवंशे । "नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः । तद्गर्भं विधिना हृष्टा दिशो देव्यो दधुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् । स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयन् लोकान् शीतांशुः सर्वभावनः" इति । सुरसरिद्गङ्गा वह्निना निष्ठ्यूतं निरस्तम् । च्छ्वोः शूडनुनासिके च*(६, ४, १९ पा०) इत्यनेन निष्ठीवतेः ष्ठिवेर्वकारस्य ऊठ् । "शुक्रपातान्निष्ठ्यूताग्निहविर्भिरिताः समाः" इत्यमरः । ऐशं तेजः स्कान्दमिव । अत्र रामायणम् ।" ते गत्वा पर्वतं राम ! कैलासं धातुमण्डितम् । अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः । देवकार्यमिदं देव ! समाधत्स्व हुताशन ! । शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज । देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः । गर्भं धारय वै देवि ! देवतानामिदं प्रियम् । इत्येतद्वचनं

* छकारस्थाने शकारः, वकारस्थानेन ऊठ् स्यात् क्वौ अनुनासि-कादौ झलादौ क्ङिति च परे ।

नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥७५॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः।

स्तुत्वा दिव्यं रूपमधारयत्। स तस्याः प्रतिमां दृष्ट्वा समन्तादवकीर्य्य च। समन्ततस्तु तां देवीमभ्यषिञ्चत पावकः। सर्वस्रोतांसि पूर्णानि गङ्गायाः रघुनन्दन!" इति। राज्ञी सुदक्षिणा नरपतेर्दिलीपस्य कुलभूत्यै सन्ततिलक्षणायै गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिरभिनिविष्टमनुप्रविष्टं गर्भमाधत्त दधावित्यर्थः। अत्र मनुः। "अष्टानां लोकपालानां वपुर्धारयते नृप" इति। अत्राधत्तेत्यनेन स्त्रीकर्तृकधारणमात्रमुच्यते तथा च मन्त्रे दृश्यते। यथेयं पृथिवी मह्युत्तानगर्भमादधे एवं त्वं गर्भमाधेहि दशमे मासि सूतये" इत्याश्वलायनानां सीमन्तमन्त्रे स्त्रीव्यापारधारणे आधानशब्दप्रयोगदर्शनादिति। मालिनीवृत्तमेतत् तदुक्तं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ७५।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशटीकायां सञ्जीविनीसमाख्यायां द्वितीयः सर्गः।

तृतीयः सर्गः ।



अथेप्सितं भर्तुरुपस्थितोदयं
सखीजनोद्वीक्षणकौमुदीमुखम् ।
निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौहृदलक्षणं दधौ ॥ १ ॥

उपाधिगम्योऽप्यनुपाधिगम्यः समानलोक्योऽप्यसमानलोक्यः ।
भवोऽपि योऽभूदभवः शिवोऽयं जगत्त्रयापायादपि नः स पायात् ।

राज्ञी गर्भवत्त्वमुक्तं सम्प्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति ।

अथेति । अथ गर्भधारणानन्तरं सुदक्षिणा उपस्थितोदयं प्राप्तकालं भर्तुर्दिलीपस्य ईप्सितं मनोरथम् । भावे क्तः । सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदीमुखं चन्द्रिकाप्रादुर्भावम् । यद्वा कौमुदी नाम दीपोत्सवतिथिः यदुक्तं भविष्योत्तरे "कौ मोदन्ते जना यस्यां तेनासौ कौमुदी मते"ति । तस्या मुखं प्रारम्भम् अतएव केचित् कौमुदीमहमिति पाठं पठन्ति" । इक्ष्वाकुकुलस्य सन्ततेरविच्छेदस्य निदानं मूलकारणम् । "निदानन्त्वादिकारणम्" इत्यमरः । एवंविधं दौहृदलक्षणं गर्भचिह्नं वक्ष्यमाणं दधौ । स्वहृदयेन गर्भहृदयेन च द्विहृदया गर्भिणी यथाह वाग्भटः "मातृजन्यस्य हृदयं मातुश्च हृदयञ्च तत् । सम्बद्धं तेन गर्भिण्याः श्रेष्ठं श्रद्धाविमाननमिति । तत्सम्बन्धित्वाद्गर्भो दौहृदमित्युच्यते सा च तद्योगात् दौहृदिनीति

शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना ।
तनुप्रकाशेन विचेयतारका
प्रभातकल्पा शशिनेव शर्वरी ॥ २ ॥

तदाननं मृत्सुरभि क्षितीश्वरो
रहस्युपाघ्राय न तृप्तिमाययौ ।

तदुक्तं संग्रहे "द्विहृदयां नारीं दौहृदिनीमाचक्षत" इति । अत्र दौहृदलक्षणस्येप्सितत्वेन कौमुदीमुखत्वेन च रूपणात् रूपकालङ्कारः । अस्मिन् सर्गे वंशस्थं वृत्तं "जतौ तु वंशस्थमुदीरितं जरावि"ति लक्षणात् ॥ १ ॥

सम्प्रति क्षामताद्यं गर्भलक्षणं वर्णयति

शरीरेति । शरीरस्य सादात् कार्श्यादसमग्रभूषणा परिमित-भूषणा लोध्रपुष्पेणेव पाण्डुना मुखेनोपलक्षिता सा सुदक्षिणा विचेया मृग्यास्तारका यस्यां सा तथोक्ता विरलनक्षत्रेत्यर्थः तनुप्रकाशेनाल्पकान्तिना शशिनोपलक्षिता ईषदसमाप्ता प्रभाता प्रभातकल्पा प्रभातादीषदूनेत्यर्थः । तसिलादिष्वाकृत्वसुचः (६.३.३५ पा०) इति प्रभातशब्दस्य पुंवद्भावः । शर्वरी रात्रिरिवालक्ष्यत । शरीरसादादि गर्भलक्षणमाह वाग्भटः "क्षामता गरिमा कुक्षेर्मूर्च्छा छर्दिररोचकम् । जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनमि"ति ॥ २ ॥

तदिति । क्षितीश्वरो [illegible] मृत्सुरभि मृदा सुगन्धि तस्या आननं तदाननं [illegible] आघ्राय तृप्तिं न जगाम(?) । कः कामिव [illegible]

* अन्येषु पुस्तकेषु [illegible] पुस्तकेषु [illegible] पाठः ।

करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥ ३ ॥
दिवं मरुत्वानिव भोच्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः ।
अतोऽभिलाषे प्रथमं तथाविधे
मनो बबन्धान्यरसान् विलङ्घ्य सा ॥ ४ ॥

शुचिव्यपाये ग्रीष्मावसाने । "शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि स्यादुपधाशुद्धमन्त्रिणी"ति विश्वः । पयोमुचां मेघानां पृषतैर्बिन्दुभिः । "पृषन्ति बिन्दुपृषताः" इत्यमरः । सिक्तमुक्षितं वनराज्याः पल्वलमुपाघ्राय करी गजइव । अत्र करिवनराजिपल्वलानां कान्तकामिनीवदनसमाधिरनुसन्धेयः । गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेव । एतेन दौहृदाख्यं गर्भलक्षणमुच्यते ॥ ३ ॥

दोहदलक्षणे मृद्भक्षणे हेत्वन्तरमुत्प्रेक्ष्यते

दिवमिति । हि यस्मात् दिगन्तविश्रान्तरथश्चक्रवर्त्ती तस्याः सुतस्तत्सुतो मरुत्वानिन्द्रः । "इन्द्रो मरुत्वान् मघवे"त्यमरः । दिवं स्वर्गमिव भुवं भोच्यते । भुजोऽनवने * (१,३,६६,पा०)इत्यात्मनेपदम् । अतः प्रथमं सा सुदक्षिणा तथाविधे भूविकारे मृद्रूपे अभिलष्यतइत्यभिलाषो भोग्यं वस्तु तस्मिन् । कर्मणि घञ् प्रत्ययः । रस्यन्ते स्वाद्यन्ते इति रसाः भोग्यार्थाः अन्ये च ते रसाश्च तान् विलङ्घ्य विहाय मनो बबन्ध निदधावित्यर्थः । दोहदहेतुकस्य मृद्भक्षणस्य पुत्रभूभोगसूचनार्थत्वमुत्प्रेक्ष्यते ॥ ४ ॥

* अनवने "पालनभिन्ने"ऽर्थे वर्त्तमानाद्भुजेरात्मनेपदं स्यात् ।

न मे ह्रिया शंसति किञ्चिदीप्सितं
स्पृहावती वस्तुषु केषु मागधी ।
इति स्म पृच्छत्यनुवेलमादृतः
प्रियासखीरुत्तरकोशलेश्वरः ॥ ५ ॥

उपेत्य सा दोहददुःखशीलतां
यदेव वव्रे तदपश्यदाहृतम् ।

नेति । मगधस्य राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा । द्व्यञ्मगधकलिङ्गसूरमसादण् * (४,१,१७०पा०) इत्यण्प्रत्ययः । ह्रिया किञ्चित् किमपि ईप्सितमिष्टं मे मह्यं न शंसति नाचष्टे केषु वस्तुषु स्पृहावतीत्यनुवेलमनुक्षणमादृतः आदृतवान् । कर्त्तरि क्तः । "आदृतौ सादरार्च्चिता" वित्यमरः । प्रियायाः सखीः सहचरीः उत्तरकोशलेश्वरो दिलीपः पृच्छति स्म पप्रच्छ । लट् स्मे (३,२,११८पा०) इत्यनेन भूतार्थे लट् । सखीनां विस्रम्भभूमित्वादिति भावः ॥ ५ ॥

उपेत्येति । दोहदं गर्भिणीमनोरथः । "दोहदं दौहृदं श्रद्धा लालसञ्च समं स्मृत"मिति हलायुधः । सा सुदक्षिणा दोहदेन गर्भिणीमनोरथेन दुःखशीलतां दुःखस्वभावतामुपेत्य प्राप्य यद्वस्तु वव्रे आचकाङ्क्ष तदाहृतमानीतं भर्त्रेति शेषः अपश्यदेव अलभतेत्यर्थः । कुतः हि यस्मादस्य भूपतेः त्रिदिवेऽपि स्वर्गेऽपि इष्टं वस्तु अनासाद्यम् अनवाप्यं नाभूत् । किं याच्ञया नेत्याह अधिज्यधन्वन इति । न हि वीरपत्नीनामलभ्यं नाम किञ्चिदस्तीति भावः । अत्र वाग्भटः । "यादृशी भाविदाहान्ते श्रद्धां च विविधात्मिके"ति । एतच्च पत्नीमनोरथपूरणाकरणे दृष्टदोषसम्भवात् न तु राज्ञः प्रीतिलौल्यात् तदुक्तं "देयो-

* द्वौ अचौ यत्र स द्व्यच् द्व्यचकात् मगधादिभ्यश्चाण् स्यादपत्याद्यर्थेषु

न हीष्टमस्य त्रिदिवेऽपि भूपते
रभूदनासाद्यमधिज्यधन्वनः ॥ ६ ॥
क्रमेण निस्तीर्य्य च दोहदव्यथां
प्रचीयमानावयवा रराज सा ।
पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥ ७ ॥
दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम् ।
तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम् ॥ ८ ॥

मप्यहितं तस्यै हिताय हितमल्पकम् । श्रद्धाविघाते गर्भस्य विकृतिश्च्युतिरेव वा" । अन्यत्र "दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयादि"ति ॥ ६ ॥

क्रमेणेति । सा सुदक्षिणा क्रमेण दोहदव्यथाञ्च निस्तीर्य्य प्रचीयमानावयवा पुष्यमाणावयवा सती पुराणपत्राणामपगमान्नाशादनन्तरं सन्नद्धाः सञ्जाताः प्रत्यग्रत्वात् मनोज्ञाः पल्लवा यस्याः सा लतेव रराज ॥ ७ ॥

लक्षणान्तरं वर्णयति

दिनेष्विति । दिनेषु दोहददिवसेषु गच्छत्सु नितान्तपीवरमतिस्थूलम् आ समन्तान्नीले मुखे चूचुके यस्य तत् तदीयं स्तनद्वयं भ्रमरैरभिलीनयोरभिव्याप्तयोः सुजातयोः सुन्दरयोः पङ्कजकोशयोः पद्म-

निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम्।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्वां महिषीममन्यत॥ ९॥
प्रियानुरागस्य मनःसमुन्नते
र्भुजार्जितानाञ्च दिगन्तसम्पदाम्।

मुकुलयोः श्रियं तिरश्चकार। अत्र वाग्भटः "अश्लेष्टता स्तनौ पीनौ श्वेतान्तौ कृष्णचूचुका"विति॥ ८॥

निधानेति। नृपः ससत्वाम् आपन्नसत्वां गर्भिणीमित्यर्थः "आपन्नसत्वा स्याद्गुर्व्विण्यन्तर्वत्नी च गर्भिणी"त्यमरः। महिषी निधानं निधिर्गर्भे यस्यास्तां सागराम्बरां समुद्रवसनां भूमिमिवेत्यर्थः। "भूतधात्री रत्नगर्भा विपुला सागराम्बरेति कोषः। अभ्यन्तरे लीनः पावको यस्यास्तां शमीमिव। शमीतरौ वह्निरस्तीत्यत्र लिङ्ग "शमीगर्भादग्निं जनयती"ति। अन्तःसलिलामन्तर्गतजलां सरस्वती नदीमिव अमन्यत। एतेन गर्भस्य भाग्यवत्त्वतेजस्वित्वपावनत्वानि विवक्षितानि॥ ९॥

प्रियेति। धीरः स राजा प्रियायामनुरागस्य स्नेहस्य, मनसः समुन्नतेरौदार्य्यस्य,भुजेन भुजबलेन करेण वार्ज्जितानां न तु वाणिज्यादिना दिगन्तेषु सम्पदां, धृतेः पुत्रो मे भविष्यतीति सन्तोषस्य च। "धृतिर्योगान्तरे धैर्य्ये धारणाध्वरतुष्टिषि"ति विश्वः। सदृशीरनुरूपाः पुमान् सूयतेऽनेनेति पुंसवनं तदादिर्यासां ताः क्रिया. यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान्। आदिशब्देन अनवलोभनसीमन्तोन्नयने गृह्येते। "तत्र मासि द्वितीये तृतीये वा पुंसवनं यदा पुंसा

यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥ १० ॥

सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नमुक्तासनया गृहागतः।
तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः ॥ ११ ॥

कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भभर्मणि।

नक्षत्रेण चन्द्रमा युक्तः स्या"दिति पारस्करः। "चतुर्थेऽष्टमे वा लोभन" मित्याश्वलायनः। "षष्ठेऽष्टमे वा सीमन्त"इति याज्ञवल्क्यः ॥ १० ॥

सुरेन्द्रमात्रेति। गृहागतो नृपः सुरेन्द्राणां लोकपालानां मात्राभिरंशैराश्रितस्यानुप्रविष्टस्य गर्भस्य गौरवात् प्रयत्नेन मुक्तासनया आसनादुत्थितयेत्यर्थः। उपचारस्याञ्जलावञ्जलिकरणे खिन्नहस्तया पारिप्लवनेत्रया तरलाक्ष्या। "चञ्चलं तरलञ्चैव पारिप्लवपरिप्लवे" इत्यमरः। तया सुदक्षिणया ननन्द। सुरेन्द्रमात्राश्रितयेत्यत्र मनुः "अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप"इति ॥ ११ ॥

कुमारेति। अथ कुमारभृत्या बालचिकित्सा। संज्ञायां समजनिषदेत्यादिना (३,३,९९पा०) क्यप्। तस्यां कुशलैः ज्ञातिभिः। "ज्ञाते कुशलद"त्यमरः। आप्तैर्हितैर्भिषग्भिर्वैद्यैः। "भिषग्वैद्यौ चिकित्सके" इत्यमरः। गर्भस्य भर्मणि भरणे। "भरणे पोषणे भर्म इति हैमः। "भृतिर्भर्म"इति शाश्वतः।(३,२,७५पा०)मनिन् प्रत्ययः। अनुष्ठिते कृते सति काले दशमे मासि अन्यत्र मीमांसाने प्रसवस्य गर्भमोचन-

पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥ १२ ॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयै
रसूर्य्यगैः सूचितभाग्यसम्पदम् ।

स्योन्मुखीमासन्नप्रसवामित्यर्थः । "स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः । प्रियां भार्य्याम् अभ्राण्यस्याः सञ्जातान्यभ्रिताम्। तदस्य सञ्जातं तारकादिभ्य इतच् (५,२,३६ पा०) इतीतच्प्रत्ययः। दिवमिव पतिर्भर्त्ता प्रतीतः हृष्टः सन्। "ख्याते हृष्टे प्रतीत" इत्यमरः ददर्श दृष्टवान्। गर्भकर्मणीति पाठे गर्भाधानप्रतीतावौचित्यभङ्गः ॥ १२ ॥

ग्रहैरिति। ततः शच्या इन्द्राण्या समा। "पुलोमजा शचीन्द्राणी"त्यमरः। सा सुदक्षिणा समये प्रसूतिकाले सति दशमे मासी त्यर्थः। "दशमे मासि जायते" इति श्रुतेः। उच्चसंश्रयैरुच्चसंस्थैस्तुङ्ग * स्थानगैरसूर्य्यगैरनस्तमितैः † कैश्चिद्यथासम्भवं पञ्चभिर्ग्रहैः सूचिता भाग्यसम्पद् यस्य तं पुत्रं त्रीणि प्रभावमन्त्रोत्साहात्मकानि साधनान्युत्पादकानि यस्याः सा त्रिसाधना शक्तिः। "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजा"इत्यमरः। अक्षयमर्थमिव असूत। षूङ् प्राणि-

---

* सूर्यादीनां मेषादिरूपस्थानान्युच्चानि तेषु तेषां बलाधिक्यात्। यथा रवेः मेषः, विधोर्वृषः, कुजस्य मकरः,बुधस्य कन्या, गुरोः कर्कटः, शुक्रस्य मीनः, शनेस्तुला।

† सूर्य्ययुक्तत्वे ग्रहाणां प्रायेणास्तत्वसम्भावनेत्याशयेन अनस्तमितैरित्युक्तम्।

असूत पुत्रं समये शचीसमा
त्रिसाधना शक्तिरिवार्थमक्षयम् ॥ १३ ॥

गर्भं बिभ्रती वन इत्यात्मनेपदिषु पठ्यते तस्माद्धातोः कर्त्तरि लङ्। अत्रेदमनुसन्धेयम्। अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। * दशशिखिमनुयुक् तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः" इति। सूर्य्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रम विशिष्टाः उच्चस्थानानि स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशाः यथाक्रमम् परमोच्चा नीचेषु परमनीचा इति जातकश्लोकार्थः। अत्रांशस्त्रिंशोभागः यथाह नारदः "त्रिंशद्भागात्मकं लग्नमि"ति। सूर्य्यप्रत्यासत्तिर्ग्रहाणामस्तमयो नाम तदुक्तं "लघुजातके रविणास्तमयोयोगोवियोगस्तूदयोभवे"दिति। ते च स्वोच्चस्थाः फलन्ति नास्तगा नापि नीचगाः तदुक्तं "राजमृगाङ्के स्वोच्चे पूर्णं स्वर्चंकेऽर्द्धं सुहृद्भे पादं द्विड्भेऽल्पं शुभं खेचरेन्द्रः। नीचस्थायी नास्तगो वा न किञ्चित् पादं न्यूनं स्वत्रिकोणे ददाती"ति तदिदमाह कविः उच्चसंस्थैरसूर्य्यगैरिति च। एवं सति यस्य जन्मकाले पञ्चप्रभृतयो ग्रहाः स्वोच्चस्थाः सएवातितुङ्गो भवति तदुक्तं कूटस्थीये "उत्कृष्टाः स्त्रीसुखिनः प्रकृष्टकार्य्या राजप्रतिरूपकाश्च। राजान एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्या"इति तदिदमाह पञ्चभिरिति ॥ १३ ॥

---

* रवेः १० दशमांशः, विधोः ३ तृतीयांशः, कुजस्य २८ अंशः, बुधस्य १५ अंशः, गुरोः ५ पञ्चांशः, शुक्रस्य २७ अंशः, शनेः २० अंशः, एतेषु अंशेषु ते परमोच्चाः तदपेक्षया षड्राश्यन्तरिते सप्तमराशौ तेष्वंशेषु रव्यादयः सुनीचाः।

दिशः प्रसेदुर्म्मरुतोववुः सुखाः
प्रदक्षिणार्च्चिर् हविरग्निराददे।
बभूव सर्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय तादृशाम्॥१४॥
अरिष्टशय्यां परितो विसारिणा
सुजन्मनस्तस्य निजेन तेजसा।
निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिताइव॥१५॥

दिशइति। तत्क्षणं तस्मिन् क्षणे। कालाध्वनोरत्यन्तसंयोगे (२, ३, ५ पा०) द्वितीया। दिशः प्रसेदुः प्रसन्ना बभूवुः मरुतोवाताः सुखा मनोहरा ववुः अग्निः प्रदक्षिणार्च्चिः सन् हविराददे स्वीचकार इत्थं सर्वं शुभशंसि शुभसूचकं बभूव। तथाहि तादृशां रघुप्रकाराणां भवो जन्म लोकाभ्युदयाय भवतीति शेषः ततोदेवा अपि सन्तुष्टा इत्यर्थः॥१४॥

अरिष्टेति। "अरिष्टं सूतिकागृह"मित्यमरः। अरिष्टे सूतिकागृहे शय्यां तल्पं परितोऽभितः। अभितःपरितःसमयानिकषाहाप्रतियोगेषु दृश्यते (१,४,४८ वा०) इति द्वितीया। विसारिणा सुजन्मनः शोभनोत्पत्तेः। "जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव"इत्यमरः। तस्य शिशोर्निजेन नैसर्गिकेण तेजसा सहसा हतत्विषः क्षीणकान्तयो- निशीथदीपाः अर्द्धरात्रप्रदीपाः। रात्राह्नाहाः पुंसि (२,४, २९पा०)। "अर्द्धरात्रनिशीथौ द्वा"वित्यमरः। आलेख्यसमर्पिताः चित्रार्पिताइव बभूवुः। निशीथशब्दोदीपानां प्रभाधिक्यसम्भावनार्थः॥१५॥

जनाय शुद्धान्तचराय शंसते
कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीत्त्रयमेव भूपतेः
शशिप्रभं छत्रमुभे च चामरे ॥ १६ ॥

निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ १७ ॥

जनायेति । भूपतेर्दिलीपस्य अमृतसम्मिताक्षरममृतसमानाक्षरम् । "सरूपसमसंमिता" इत्याह दण्डी । कुमारजन्म पुत्रोत्पत्तिं शंसते कथयते शुद्धान्तचराय अन्तःपुरचारिणे जनाय त्रयमेवादेयमासीत् किन्तु शशिप्रभमुज्ज्वलं छत्रम् उभे चामरे च छत्रादीनां राज्ञः प्रधानाङ्गत्वादिति भावः ॥ १६ ॥

निवातेति । निवातोनिर्वातप्रदेशः । "निवातावाश्रयावातौ" इत्यमरः । तत्र यत् पद्मं तद्वत् स्तिमितेन निष्पन्देन चक्षुषा नेत्रेण कान्तं सुन्दरं सुताननं पुत्रमुखं पिबतस्तृष्णया पश्यतो नृपस्य गुरुरुत्कटः प्रहर्षः कर्त्ता इन्दुदर्शनाद्गुरुर्महोदधेः पूरो जलौघइव आत्मनि शरीरे न प्रबभूव स्थातुं न शशाक अन्तर्न माति स्मेति यावत् न ह्यल्पाधारे अधिकं मीयतइति भावः । यद्वा हर्षं आत्मनि स्वस्मिन् विषये न प्रबभूव आत्मानं नियन्तुं न शशाक किन्तु बहिर्निर्जगामेत्यर्थः ॥ १७ ॥

स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्म्मणिराकरोद्भवः
प्रयुक्तसंस्कारइवाधिकं बभौ॥ १८॥
सुखश्रवा मङ्गलतूर्य्यनिस्वनाः
प्रमोदनृत्यैः सह वारयोषिताम्।
न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि॥ १९॥

स इति। स दिलीपसूनुः तपस्विना पुरोधसा पुरोहितेन। "पुरोधास्तु पुरोहित"इत्यमरः। वशिष्ठेन। तपस्वित्वात्तदनुष्ठितं कर्म सवीर्यं स्यादिति भावः। तपोवनादेत्य आगत्य अखिले समग्रे जातकर्म्मणि जातस्य कर्त्तव्यसंस्कारविशेषे कृते सति प्रयुक्तः संस्कारः शाणोल्लेखनादिर्यस्य स तथोक्तः आकरोद्भवः खनिप्रभवः। "खनिः स्त्रियामाकरः स्या"दित्यमरः। मणिरिवाधिकं बभौ वशिष्ठमन्त्रप्रभावात्तेजिष्ठोऽभूदित्यर्थः। अत्र मनुः "प्राङ्नाभिवर्द्धनात् (छेदनात्) पुंसो जातकर्म्म विधीयत"इति॥ १८॥

सुखश्रवाइति। सुखः सुखकरः श्रवः श्रवणं येषां ते सुखश्रवाः श्रुतिसुखाइत्यर्थः मङ्गलतूर्य्यनिस्वना मङ्गलवाद्यध्वनयो वारयोषितां वेश्यानाम्। "वारस्त्री गणिका वेश्या रूपाजीवेति" अमरः। प्रमोदनृत्यैः हर्षनर्त्तनैः सह मागधीपतेर्दिलीपस्य सद्मनि केवलं गृहएव न व्यजृम्भन्त किन्तु द्यौरोको येषां ते दिवौकसो देवाः। पृषोदरादित्वात्साधुः। तेषां पथि आकाशेऽपि व्यजृम्भन्त। तस्य देवांशत्वात् देवोपकारित्वाच्च देवदुन्दुभयोऽपि नेदुरिति भावः॥ १९॥

न संयतस्तस्य बभूव रक्षितु
र्विसर्ज्जयेद्यं सुतजन्महर्षितः।
ऋणाभिधानात् स्वयमेव केवलं
तदा पितॄणां मुमुचे स बन्धनात् ॥२०॥

श्रुतस्य यायादयमन्तमर्भक
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थवित्
चकार नाम्ना रघुमात्मसम्भवम् ॥२१॥

नेति। रक्षितुः सम्यक्पालनशीलस्य तस्य दिलीपस्य अतएव चौराद्यभावात् संयतो बद्धो न बभूव नाभूत्। किं तेनेत्याह विसर्ज्जयेदिति। सुतजन्मना हर्षितस्तोषितः सन् सः यं बद्धं विसर्ज्जयेद्विमोचयेत्। किन्तु स राजा तदा पितॄणाम् ऋणाभिधानाद्बन्धनात् केवलमेकं यथा तथा स्वयमेव एकएवेत्यर्थः। "केवलः कृत्स्न एकश्च केवलश्चावधारितइति शाश्वतः। मुमुचे। कर्मकर्त्तरि लिट्। स्वयमेव मुक्त इत्यर्थः। अस्मिन्नर्थे "एष वा अनृणो यः पुत्री"ति श्रुतिः प्रमाणम् ॥ २० ॥

श्रुतस्येति। अर्थवित् शब्दार्थज्ञः पार्थिवः पृथिवीश्वरोदिलीपः अयमर्भकोबालकः श्रुतस्य शास्त्रस्यान्तं पारं यायात् तथा युधि परेषां शत्रूणाम् अन्तं पारञ्च यायात् यातुं शक्नुयादित्यर्थः। शकि लिङ् च (३.३,१७२पा०) इति शक्त्यर्थे लिङ्। इति हेतोर्धातोः रघिवघिलघिगत्यर्थाइति लघिधातोर्गमनाख्यमर्थमर्थवित्त्वादवेक्ष्यालोच्य आत्मसम्भवं पुत्रं नाम्ना रघुं चकार। लङ्घिवंह्योर्नलोपश्चेति(उ०१पादे२०सू०) उप्रत्यये

पितुः प्रयत्नात् स समग्रसम्पदः
शुभैः शरीरावयवैर्दिनेदिने ।
पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥ २२ ॥

उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥ २३ ॥

बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते” इति । (८,२,१८वा०) वैकल्पिके रेफादेशे रघुरिति रूपं सिद्धम् । अत्र शङ्खः “अशौचे तु व्यतिक्रान्ते नामकर्म विधीयते” इति ॥ २१ ॥

पितुरिति । स रघुः समग्रसम्पदः पूर्णलक्ष्मीकस्य पितुर्दिलीपस्य प्रयत्नात् शुभैर्मनोहरैः शरीरावयवैः हरिदश्वदीधितेः सूर्यरश्मेः । भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय” इत्यमरः । अनुप्रवेशाद्बाल चन्द्रमाइव दिनेदिने प्रतिदिनम् । नित्यवीप्सयोरिति (८,१,४पा०) द्विर्वचनम् । वृद्धिं पुपोष । अत्र वराहसंहितावचनम् “सलिलमये शशिनि रवेर्दीधितयोमूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिताइव मन्दिरस्यान्तरि”ति ॥ २२ ॥

उमेति । उमावृषाङ्कौ पार्वतीवृषभध्वजौ शरजन्मना कार्त्तिकेयेन । “कार्त्तिकेयोमहासेनः शरजन्मा षडानन”इत्यमरः । यथा ननन्दतुः शचीपुरन्दरौ जयन्तेन पाकशासनिना । जयन्तः पाकशासनि”रित्यमरः । यथा च ननन्दतुः तथा तत्समौ ताभ्याम् उमावृषा-

रथाङ्गनाम्नोरिव भावबन्धनं
बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः
परस्परस्योपरि पर्य्यचीयत ॥ २४ ॥

उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥ २५ ॥

द्वाभ्यां कुमारजयन्ताभ्यां सदृशेन सुतेन ननन्दतुः । मागधी (२९ पृ० ५८ श्लो०) प्राक् व्याख्याता ॥ २३ ॥

रथाङ्गेति । रथाङ्गनाम्नी च रथाङ्गनामा च रथाङ्गनामानौ चक्रवाकौ । पुमान् स्त्रिया *(१,२,६७पा०)इत्येकशेषः। तयोरिव तयोर्दम्पत्योर्भावबन्धनं हृदयाकर्षकं परस्पराश्रयम् अन्योन्यविषयं यत् प्रेम बभूव तत् एकेन केवलेन ताभ्यामन्येन वा ।"एके मुख्यान्यकेवलाः" इत्यमरः । सुतेन विभक्तमपि कृतविभागमपि परस्परस्योपरि पर्य्यचीयत वृद्धे । कर्मकर्त्तरि लिट् । अकृत्रिमत्वात् स्वयमेव उपचितमित्यर्थः । यदेकाधारं वस्तु तदाधारद्वये विभज्यमानं हीयते अत्र तु तयोः प्रागेकैककर्तृकमेकैकविषयं प्रेम सम्प्रति द्वितीयविषयलाभेऽपि नाहीयत प्रत्युतोपचितमेवाभूदिति भावः ॥ २४ ॥

उवाचेति । सोऽर्भकः शिशुः । "पोतः पाकोऽर्भकोडिम्भः पृथुकः शावकः शिशु"रित्यमरः । धात्र्या उपमात्रा । "धात्री जनन्यामलकी

---

* स्त्रिया सहोक्तौ पुमान् शिष्यते स्त्रीपुंसयोरेकरूपशब्दार्थवाच्यत्वे ।

तमङ्कमारोप्य शरीरयोगजैः
सुखैर्निषिञ्चन्तमिवामृतं त्वचि।
उपान्तसम्मीलितलोचनो नृप
श्चिरात् सुतस्पर्शरसज्ञतां ययौ॥ २६॥
अमंस्त चानेन परार्द्ध्यजन्मना
स्थितेरभेत्ता स्थितिमन्तमन्वयम्।
स्वमूर्त्तिभेदेन गुणाग्र्यवर्त्तिना
पतिः प्रजानामिव सर्गमात्मनः॥ २७॥

वह्नुमत्युपमाद” इति विश्वः। प्रथमम् उदितम् उपदिष्टं उवाच तदीयाम् अङ्गुलिम् अवलम्ब्य ययौ च प्रणिपातस्य शिक्षया उपदेशेन नम्रोऽभूत् इति यत् तेन पितुः मुदं ततान॥ २५॥

तमिति। शरीरयोगजैः सुखैः त्वचि त्वगिन्द्रिये अमृतं निषिञ्चन्तं वर्षन्तमिव तं पुत्रम् अङ्कम् आरोप्य मुदाविर्भावात् उपान्तयोः प्रान्तयोः सम्मीलितलोचनः सन् नृपः चिरात् सुतस्पर्शरसज्ञतां ययौ। रसः स्वादः॥ २६॥

अमंस्तेति। स्थितेरभेत्ता मर्य्यादापालकः स नृपः परार्द्ध्यजन्मना उत्कृष्टजन्मना अनेन रघुणा अन्वयं वंशं प्रजानां पतिः ब्रह्मा गुणाः सत्त्वादयः तेषु अग्र्येण मुख्येन सत्त्वेन वर्त्तते व्याप्रियते इति गुणाग्र्यवर्त्ती तेन स्वस्य मूर्त्तिभेदेन अवतारविशेषेण विष्णुना आत्मनः सर्गं सृष्टिमिव स्थितिमन्तं प्रतिष्ठावन्तम् अमंस्त मन्यते स्म। अनुदात्तत्वादिट् (७,२,१०पा०) प्रतिषेधः। अत्रोपमानोपमेययोरितरेतरविशेषणानीतरेतरत्र योज्यानि तत्र रघुपक्षे गुणा विद्याविनयादयः।

स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥ २८ ॥

अथोपनीतं विधिवद्विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम्।
अवन्ध्ययत्नाश्च बभूवुरत्र ते
क्रिया हि वस्तूपहिता प्रसीदति ॥ २९ ॥

"गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे। लम्बे सत्त्वादिसन्ध्यादि-विद्यादिहरितादिषु" इति विश्वः। शेषं सुगमम् ॥ २७ ॥

स इति। "चूडा कार्य्या द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्त्तव्या श्रुतिचोदनात्" इति मनुस्मरणात् तृतीये वर्षे वृत्तचूलो निष्पन्नचूडाकर्म्मा सन्। डलयोरभेदः। स रघुः। "प्राप्ते तु पञ्चमे वर्षे विद्यारम्भञ्च कारयेत्" इति वचनात् पञ्चमे वर्षे चलकाकपक्षकैः चञ्चलशिखण्डकैः। "बालानान्तु शिखा प्रोक्ता काकपक्षः शिखण्डकः" इति हलायुधः। सवयोभिः स्निग्धैः। "स्निग्धो वयस्यः सवयाः" इत्यमरः। अमात्यपुत्रैरन्वितः सन् लिपेः पञ्चाशद्वर्णात्मिकाया मातृकाया यथावद् ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्मयं शब्दजातं नद्या मुखं द्वारम्। "मुखन्तु वदने मुख्यारम्भे द्वाराभ्युपाययोः" इति यादवः। तेन कश्चित् मकरादिः समुद्रमिव अविशत् प्रविष्टः। ज्ञातवानित्यर्थः ॥ २८ ॥

अथेति। "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भादे-

धियः समग्रैः स गुणैरुदारधीः
क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभि
र्दिशो हरिद्भिर्हरितामिवेश्वरः ॥३०॥

कादशे राज्ञो गर्भात्तु द्वादशे विशः" इति मनुस्मरणात् अथ गर्भैकादशेऽब्दे विधिवदुपनीतं गुरुप्रियमेनं रघुं विपश्चितोविद्वांसोगुरवोविनिन्युः शिक्षितवन्तः । ते गुरवोऽत्र अस्मिन् रघौ अवन्ध्ययत्नाश्च बभूवुः तथाहि क्रिया शिक्षा । "क्रिया तु निष्कृतौ शिक्षाचिकित्सोपायकर्मस्वि"ति यादवः । वस्तुनि पात्रभूते उपहिता प्रयुक्ता प्रसीदति फलति । "क्रिया हि द्रव्यं विनयति नाद्रव्य"मिति कौटिल्यः ॥ १९ ॥

धियइति । अत्र कामन्दकः । "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा"इति । "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः" इति च । उदारधीरुत्कृष्टबुद्धिः स रघुः समग्रैः धियोगुणैः चत्वारोऽर्णवा उपमा यासां ताश्चतुरर्णवोपमाः । तद्धितार्थोत्तरपदसमाहारे चेति * (२,१,५१मा०) उत्तरपदद्विगुसमासः । चतस्रोविद्याः हरितां दिशाम् ईश्वरः सूर्य्यः पवनातिपातिभिः हरिद्भिर्निजाश्वैः । "हरित् ककुभि वर्णे च तृणवाजिविशेषयो"रिति विश्वः । चतस्रोदिशइव क्रमात् ततार । चतुरर्णवोपमत्वं दिशामपि द्रष्टव्यम् ॥ ३० ॥

---

* तद्धितार्थे उत्तरपदे परे समाहारे चार्थे संख्यापूर्व्वःसमानाधिकरण तत्पुरुषो द्विगुः स्यात् ।

त्वचं स मेध्यां परिधाय रौरवी
मशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्द्धरोऽपि सः ॥ ३१ ॥

महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद्यौवनभिन्नशैशवः
पुपोष गाम्भीर्य्यमनोहरं वपुः ॥ ३२ ॥

त्वचमिति । स रघुः ।"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः । वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि चे"ति मनुस्मरणात् मेध्यां शुद्धां रौरवीं रुरुसम्बन्धिनीम् । "रुरुर्महाकृष्णसार"इति यादवः । त्वचं चर्म्म परिधाय वसित्वा मन्त्रवत् समन्त्रकमस्त्रम् आग्नेयादिकं पितुरेवो-पाध्यायात् अशिक्षत अभ्यस्तवान् । आख्यातोपयोगे* (१,४,२९पा०) इत्यपादानसंज्ञा । पितुरेवेत्यवधारणमुपपादयति नेति तद्गुरुरेको-द्वितीयः पार्थिवः केवलं पृथिवीश्वरएव नाभूत् किन्तु क्षितौ स दिलीपः एकधनुर्धरोऽप्यभूत् ॥ ३१ ॥

महोक्षतामिति । रघुः क्रमात् यौवनेन भिन्नशैशवोनिरस्तशिशु-भावः सन् महान् उक्षा महोक्षोमहर्षभः । अचतुरादिसूत्रेण (५,४,७७पा०) निपातनात् अकारान्तत्वम् । तस्य भावः तत्ता तां स्पृशन् गच्छन् वत्सतरो दम्यइव । "दम्यवत्सतरौ समा" वित्यमरः ।

---

* उपयोगे (नियमपूर्व्वकविद्यास्वीकारे,) गम्ये आख्याता (कथ-यिता) अपादानसंज्ञः स्यात् ।

अथास्य गोदानविधेरनन्तरं
विवाहदीक्षां निरवर्त्तयद्गुरुः।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं
तमोनुदं दक्षसुता इवाबभुः॥ ३३॥
युवा युगव्यायतबाहुरंसलः
कपाटवक्षाः परिणद्धकन्धरः।

द्विपेन्द्रभावं महागजत्वं अयन् व्रजन् कलभः करिपोतइव गाम्भीर्य्यणा-चापलेन मनोहरं वपुः पुपोष॥ ३२॥

अथेति। "गौर्नादित्ये वलीवर्द्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्या-द्दिशि भारत्यां भूमौ च सुरभावपि। पुंस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्वाणलोमसु"इति केशवः। गावोलोमानि केशाः दीयन्ते खण्ड्यन्तेऽस्मिन् इति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोड़शादिषु वर्षेषु कर्त्तव्यं केशान्ताख्यं कर्म्मोच्यते तदुक्तं मनुना "केशान्तः षोड़शे वर्षे ब्राह्मणस्य विधीयते। राजन्यवन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः" इति। अथ गुरुः पिता। "गुरुर्गीष्पतिपित्रादावि"त्यमरः। अस्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयत् कृतवानित्यर्थः। अथ नरेन्द्रकन्यास्तं रघुं दक्षस्य सुता रोहिण्यादयः तमोनुदं चन्द्रमिव। "तमोनुदोऽग्निचन्द्रार्का" इति विश्वः। "सत्पतिम् अवाप्य आबभुः। रघुरपि तमोनुत्। अत्र मनुः "वेदानधीत्य वेदौ वा वेदं वापि यथा-क्रमम्। अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाविशे"दिति॥ ३३॥

सम्प्रति यौवराज्ययोग्यतामाह

युवेति। युवा युगोनाम धुर्य्यस्कन्धगः सच्छिद्रप्रान्तो यानाङ्गभूतो-

वपुःप्रकर्षादजयद्गुरुं रघु
स्तथापि नीचैर्विनयाददृश्यत ॥ ३४ ॥
ततः प्रजानां चिरमात्मना धृतां
नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीतइत्यसौ
नृपेण चक्रे युवराजशब्दभाक् ॥ ३५ ॥

टादिविशेषः । "यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु" इत्यमरः । युगवत् व्यायतौ दीर्घौ बाहू यस्य सः अंसावस्य स्त इत्यंसलो बलवान् । "बलवान्मांसलोऽंसल" इत्यमरः । वत्सांसाभ्यां कामबले* इति (५,२, ९८पा०) लच्प्रत्ययः । कपाटवक्षाः परिणद्धकन्धरः विशालग्रीवः । "परिणाहो विशालते"त्यमरः । रघुःवपुषः प्रकर्षात् आधिक्यात् यौवनकृतात् गुरुं पितरम् अजयत् तथापि विनयात् नम्रत्वेन नीचैः अल्पकोऽदृश्यत । अनौद्धत्यञ्च विवक्षितम् ॥ ३४ ॥

सम्प्रति तस्य यौवराज्यमाह

ततइति । तत आत्मना चिरं धृतां नितान्तगुर्वीम् । वोतोगुणवचनात् † (४,१,४४पा०)इतिङीष् । प्रजानां धुरं पालनप्रयासं लघयिष्यता लघुं करिष्यता । तत्करोति तदाचष्टे(‡ (३,१,२६वा०)इति लघु-

---

* कामे गम्ये वत्सशब्दात्, बले गम्ये च अंसशब्दात्, अस्त्यर्थे वलच् प्रत्ययः स्यात् ।

† गुणवाचकादुदन्तात् स्त्रियां ङीष् स्यात् ।

‡ द्वितीयान्तात् करणे, आख्याने चार्थे णिच् स्यात् । इति णिचि डिद्वद्भावे टिलोपः ।

नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम्।
अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम् ॥ ३६ ॥

शब्दात् णिच् ततो लृटः सद्वेति * (३,३,१४पा०) शतृप्रत्ययः। नृपेण दिलीपेन असौ रघुः निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतोनम्रइति हेतोः युवराजइतिशब्दं भजतीति तथोक्तम्। भजोण्विः (३,२,६२पा०) ण्विप्रत्ययः। चक्रे कृतः। "द्विविधोविनयः स्वाभाविकः कृत्रिमश्च"ेति कौटिल्यः। तदुभयसम्पन्नत्वात् पुत्रं युवराजं चकारेत्यर्थः। अत्र कामन्दकः "विनयोपग्रहान् भूत्यैः कुर्व्वीत नृपतिः सुतान्। अविनीतकुमारं हि कुलमाशु विशीर्य्यते। विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेे"दिति ॥ ३५ ॥

नरेन्द्रेति। गुणान् विनयादीन् शौर्य्यादींश्चाभिलष्यतीति गुणाभिलाषिणी श्रीः राज्यलक्ष्मीः पद्माश्रया च नरेन्द्रोदिलीपएव मूलायतनं प्रधानस्थानं तस्मादुपादानादनन्तरं सन्निहितं युवराजइति संज्ञा अस्य सञ्जाता युवराजसंज्ञितम्। (५,२,३६पा०) तारकादित्वादितच् प्रत्ययः। आत्मनः पदं स्थानम् आस्पदम्। आस्पदं प्रतिष्ठायाम् (६,१, १४६पा०) इति निपातः। † रघुरित्यास्पदं तदास्पदं कमलाच्चिरोत्पन्नात् नवावतारम् अचिरोत्पन्नम् उत्पलमिव अंशेन अगच्छत्। स्त्रियो हि यूनि रज्यन्तेइति भावः ॥ ३६ ॥

---

* लृटः स्थाने शतृशानचौ स्तः लृडादेशत्वात् स्यागमः।

† प्रतिष्ठायां गम्यायाम् आङः परस्य पदशब्दस्य सुडागमो निपातितः।

विभावसुः सारथिनेव वायुना
घनव्यापायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥ ३७ ॥

नियुज्य तं होमतुरङ्गरक्षणे
धनुर्द्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः
शतं क्रतूनामपविघ्नमाप सः ॥ ३८ ॥

ततः परं तेन मखाय यज्वना
तुरङ्गमुत्सृष्टमनर्गलं पुनः ।

विभावसुरिति । सारथिना सहायभूतेन । एतद्विशेषणमुत्तरवाक्येष्वप्यनुषञ्जनीयम् । वायुना विभावसुर्वह्निरिव । "सूर्य्यवह्नी विभावसू" इत्यमरः । घनव्यपायेन सारथिना गभस्तिमान् सूर्य्यइव कटो गण्डः । "गण्डः कटोमदोदान" मित्यमरः । तस्य प्रभेदः स्फुटनं मदोदय इत्यर्थः तेन करीव पार्थिवोदिलीपस्तेन रघुणा अतितरामत्यन्त सुदुःसहः सुष्ठु असह्यो बभूव ॥ २७ ॥

नियुज्येति । शतक्रतुः इन्द्रः उपमा यस्य सः शतक्रतूपमः सः दिलीप "शतं वै तुल्या राजपुत्रा देवा आशापालाइत्यादि" श्रुत्या राजसुतैरनुद्रुतम् अनुगतं धनुर्धरं तं रघुं होमतुरङ्गरक्षणे नियुज्य एकेन क्रतुना अपूर्णम् एकोनं क्रतूनाम् अश्वमेधानां शतम् अपविघ्नम् अपगतविघ्नं यथा तथा आप ॥ ३८ ॥

ततइति । ततः परमेकोनशतक्रतुप्राप्त्यनन्तरं यज्वना विधिनेष्ट-

धनुर्भृतामग्रतएव रक्षिणां
जहार शक्रः किल गूढ़विग्रहः ॥ ३९ ॥
विषादलुप्तप्रतिपत्ति विस्मितं
कुमारसैन्यं सपदि स्थितञ्च तत्।
वशिष्ठधेनुश्च यदृच्छयागता
श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥ ४० ॥

वता तेन दिलीपेन पुनः पुनरपि मखाय मखं कर्त्तुम् क्रियार्थोपपदस्य-(२,३,१४पा०) * त्यादिना चतुर्थी। उत्सृष्टं मुक्तम् अनर्गलम् अप्रतिबन्धम् अव्याहतस्वैरगतिमित्यर्थः। "अपर्य्यावर्त्तयन्तोऽश्वमनुचरन्ती" त्यापस्तम्बस्मरणात्। तुरङ्गं धनुर्भृतां रक्षिणां रक्षकाणाम् अग्रतएव शक्रो गूढविग्रहः सन् जहार किलेत्यैतिह्ये ॥ ३९ ॥

विषादेति। तत् कुमारसैन्यं सेना सपदि विषाद इष्टनाशकृतो मनोभङ्गः तदुक्तं "विषादश्चेतसोभङ्ग उपायाभावनाशयोरि"ति। तेन लुप्ता प्रतिपत्तिः कर्त्तव्यज्ञानं यस्य तत् तथोक्तं विस्मितम् अश्वनाशस्याकस्मिकत्वादाश्चर्य्याविष्ट सत् स्थितं तस्थौ। अथ श्रुतप्रभावा यदृच्छया स्वेच्छया आगता। रघोः स्वप्रसादलब्धत्वादनुजिघृक्षयेति भावः। नन्दिनी नाम वशिष्ठधेनुश्च ददृशे। द्वौ चकारावविलम्बसूचकौ ॥ ४० ॥

---

* क्रियार्थोपपदस्य (तुमुन्नन्तस्य) स्थानिनः (लुप्तस्य अप्रयुज्यमानस्य) कर्म्मणि चतुर्थी स्यात्।

तदङ्गनिष्यन्दजलेन लोचने
प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥ ४१ ॥

स पूर्वतः पर्वतपक्षशातनं
ददर्श देवं नरदेवसम्भवः ।
पुनःपुनः सूतनिषिद्धचापलं
हरन्तमश्वं रथरश्मिसंयतम् ॥४२ ॥

तदिति । सतां पुरस्कृतः पूजितः दिलीपनन्दनोरघुः पुण्येन तस्याः नन्दिन्याः यदङ्गं तस्य निष्यन्दोद्रवएव जलं मूत्रमित्यर्थः तेन लोचने प्रमृज्य शोधयित्वा अतीन्द्रियेषु इन्द्रियाण्यतिक्रान्तेषु । अत्यादयः* क्रान्ताद्यर्थे द्वितीयया (२,२,१८वा०) इति समासः । द्विगुप्राप्तापन्नालंपूर्व्वगतिसमासेषु † (२,४,२६वा०) परवल्लिङ्गताप्रतिषेधात् विशेष्यनिघ्नत्वम् । भावेषु अपि वस्तुषूपपन्नदर्शनः सम्पन्नसाक्षात्कारशक्तिर्बभूव ॥ ४१ ॥

सइति । नरदेवः सम्भवो यस्य स रघुः पुनः पुनः सूतेन निषिद्धचापलं निवारितौद्धत्यं रथस्य रश्मिभिः प्रग्रहैः । “किरणप्रग्रहौ रश्मी”

* क्रान्ताद्यर्थे वर्त्तमानाअत्यादयः द्वितीयान्तेन सुबन्तेन सह नित्यं समस्यन्ते ।

† परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति २, ४, २६ पा० सूत्रेण तत्पुरुषे परवल्लिङ्गतोक्ता इन्द्रियशब्दस्य क्लीवतया क्लीवताप्राप्तौ वार्त्तिकक्तता गति-समासे परवल्लिङ्गतायाः प्रतिषेधात् वाच्यलिङ्गता ।

शतैस्तमक्ष्णामनिमेषवृत्तिभि
र्हरिं विदित्वा हरिभिश्च वाजिभिः।
अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव॥ ४३॥

मखांशभाजां प्रथमो मनीषिभि
स्त्वमेव देवेन्द्र! यदा निगद्यसे।
अजस्रदीक्षाप्रयतस्य मद्गुरोः
क्रियाविघाताय कथं प्रवर्त्तसे॥ ४४॥

इत्यमरः। संयतं बद्धम् अश्वं हरन्तं पर्व्वतपक्षाणां शातनं छेदकं देवमिन्द्रं पूर्व्वतः पूर्व्वस्यां दिशि ददर्श॥ ४२॥

शतैरिति। रघुस्तमश्वहर्त्तारम् अनिमेषवृत्तिभिः निमेषव्यापारशून्यैरक्ष्णां शतैः हरिभिः हरिद्वर्णैः। "हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोरि"ति विश्वः। वाजिभिः अश्वैश्च हरिमिन्द्रं विदित्वा। "हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषि" ति विश्वः। एनमिन्द्रं गगनस्पृशा व्योमव्यापिना धीरेण गभीरेण स्वरेण ध्वनिनैव निवर्त्तयन्निव अवोचत्॥ ४३॥

मखेति। हे देवेन्द्र! मनीषिभिः त्वमेव मखांशभाजां यज्ञभागभुजां प्रथमः यदा निगद्यसे कथ्यसे तथापि अजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य मद्गुरोः क्रियाविघाताय क्रतुविघाताय क्रियां विहन्तुमित्यर्थः। तुमर्थाच्च भाववचनात्* (२,३,१५ पा०) इति चतुर्थी। कथं प्रवर्त्तसे॥ ४४॥

---

* भावार्थे विहितात् तुमर्थकात् घञाद्यन्ताच्चतुर्थी स्यात्।

त्रिलोकनाथेन सदा मखद्विष
स्त्वया नियम्या ननु दिव्यचक्षुषा।
स चेत् स्वयं कर्म्मसु धर्म्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः॥ ४५॥

तदङ्गमग्र्यं मघवन्। महाक्रतो
रमुं तुरङ्गं प्रतिमोक्तुमर्हसि।
पथः शुचेर्दर्शयितार ईश्वराः
मलीमसामाददते न पद्धतिम्॥ ४६॥

त्रिलोकेति। त्रयाणां लोकानां नाथस्त्रिलोकनाथः। तद्धितार्थेत्या (२,१,५१पा०) दिना उत्तरपदद्विगुसमासः। तेन त्रैलोक्यनियामकेन दिव्यचक्षुषा अतीन्द्रियार्थदर्शिना त्वया मखस्य द्विषः घातकाः सदा नियम्याः ननु अनुशिष्याः खलु स त्वं धर्म्मचारिणां कर्मसु क्रतुषु स्वयम् अन्तरायोविघ्नो भवसि चेत् विधिः अनुष्ठानं च्युतः चेतः लोके सत्कर्म्मकथैवास्तमियादित्यर्थः॥ ४५॥

तदिति। हे मघवन्! तत् तस्मात्कारणात् महाक्रतोः अश्वमेधस्य अग्र्यं श्रेष्ठम् अङ्गं साधनम् अमुं तुरङ्गं प्रतिमोक्तुं प्रतिदातुम् अर्हसि तथाहि शुचेः पथोदर्शयितारः सन्मार्गस्य प्रदर्शकाईश्वरा महान्तः मलीमसां मलिनां पद्धतिं मार्गं नाददते न स्वीकुर्वते असन्मार्गं नावलम्बन्तइत्यर्थः "मलीमसन्तु मलिनं कच्चरं मलदूषित" मित्यमरः॥ ४६॥

इति प्रगल्भं रघुणा समीरितं
वचो निशम्याधिपतिर्दिवौकसाम्।
निवर्त्तयामास रथं सविस्मयः
प्रचक्रमे च प्रतिवक्तुमुत्तरम्॥ ४७॥

यदात्थ राजन्यकुमार! तत्तथा
यशस्तु रक्ष्यं परतो यशोधनैः।
जगत्प्रकाशं तदशेषमिज्यया
भवद्गुरुर्लङ्घयितुं ममोद्यतः॥ ४८॥

इतीति इति रघुणा समीरितं प्रगल्भं वचोनिशम्य आकर्ण्य दिवौकसः स्वर्गौकसः। "दिवं स्वर्गेऽन्तरिक्षे चेति विश्वः। तेषाम् अधिपतिर्देवेन्द्रः रघुप्रभावात् सविस्मयः सन् रथं निवर्त्तयामास उत्तरं प्रतिवक्तुं प्रचक्रमे च॥ ४७॥

यदिति। हे राजन्यकुमार! क्षत्रियकुमार!। "मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराड्" त्यमरः। यद्वाक्यमात्थ ब्रवीषि। ब्रुवः पञ्चानामित्यादिना * (३,४,८४ पा०) आहादेशः। तत्तथा सत्यं किन्तु यशोधनैरस्मादृशैः परतः शत्रुतो यशो रक्ष्यम्। ततः किमतआह भवद्गुरुस्त्वत्पिता जगत्प्रकाशं लोकप्रसिद्धम् अशेषं सर्वं मम तद्यशः इज्यया यागेन लङ्घयितुं तिरस्कर्त्तुम् उद्यतः उद्युक्तः॥ ४८॥

---

* ब्रुवः परेषां तिबादीनां पञ्चानां स्थाने णलादयः पञ्च वा स्युः ब्रुवश्चाहादेशः।

हरिर्यथैकः पुरुषोत्तमः स्मृतो
महेश्वरस्त्र्यम्बकएव नापरः।
तथा विदुर्मां मुनयः शतक्रतुं
द्वितीयगामी न हि शब्दएष नः॥ ४९॥
अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः।
अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः॥ ५०॥

हरिरिति। पुरुषेषूत्तमइति सप्तमीसमासः। न निर्द्धारणे(२,२,१०पा०) * इति षष्ठीसमासनिषेधात्। कर्मधारये तु सन्महत्परमोत्कृष्टाः पूज्यमानैः (२, १, ६१ पा०) इत्युत्तमपुरुषइति स्यात्। यथा हरिर्विष्णुरेकएव पुरुषोत्तमः स्मृतः यथा च त्र्यम्बकः शिवएव महेश्वरः स्मृतः नापरः अपरः पुमान्, न तथा मां मुनयः शतक्रतुं विदुः विदन्ति। विदो लटोवा (३,४,८३पा०) इति झेर्जुसादेशः। नोऽस्माकं हरिहरयोर्मम चेत्यर्थः एष त्रितयोऽपि शब्दोद्वितीयगामी न हि। द्वितीयाप्रकरणे गमिगाम्यादीनामुपसंख्यानात् † समासः॥ ४९॥

अतइति। यतः अहमेव शतक्रतुरतः त्वदीयस्य पितुः अयं शततमोऽश्वः कपिलानुकारिणा कपिलमुनितुल्येन मया अपहारितोऽपहृतः। अपहारितइति स्वार्थे णिच्। तवात्र अश्वे प्रयत्नेन अलं प्रयत्नो

---

* निर्द्धारणेऽर्थे या षष्ठी सा न समस्यते।

† द्वितीयान्तस्य श्रितादिप्रकृतिकैः सुबन्तैःसह समासप्रकरणे गमिगम्यादिभिरपि द्वितीयान्तपदस्य समासस्योपसंग्रहात् समासः।

ततः प्रहस्यापभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता।
गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्ज्जित्य रघुं कृती भवान्॥५१॥
स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम्।

माकारीत्यर्थः। "निषेध्यस्य निषेधं प्रति करणत्वात्* तृतीया। सगरस्य राज्ञः सन्ततेः सन्तानस्य पद्व्यां पदं मा निधाः न निधेहि निपूर्वात् धाञ्धातोर्लुङ् न माङ्योगे (६,४,७४पा०) इत्यडागमप्रतिषेधः। महदास्कन्दनं विनाशमूलं भवेदिति भावः॥५०॥

तत इति। ततः तुरगस्य रक्षिता रघुः प्रहस्य प्रहासं कृत्वा अपभयः निर्भीकः सन् पुनः पुरन्दरं बभाषे किमिति, हे देवेन्द्र! यदि एषः अश्वामोचनरूपस्ते तव सर्गोनिश्चयः "सर्गः स्वभावनिर्मोक्षनिश्चया ध्यायसृष्टिषु"इत्यमरः। तर्हि शस्त्रं गृहाण भवान् रघुं माम् अनिर्जित्य कृतमनेनेति कृती कृतकृत्योन खलु। इष्टादिभ्यश्च (५,२,८८पा०) इति इनिप्रत्ययः†। रघुमित्यनेनात्मनोदुर्जयत्वं सूचितम्॥५१॥

स इति। स रघुः उन्मुखः सन् मघवन्तम् इन्द्रम् एवम् उक्त्वा

---

* गम्यमानाऽपि क्रिया विभक्तिप्रयोजिकेत्युक्तेः निषेधक्रियासाधनत्वान्निषिध्यमानप्रयत्नवाचिशब्दात्तृतीया।

† तत्कृतमनेनेत्यधिकारे, इष्टादिशब्दात् तत्कृतमनेनेत्यर्थे इनिः स्यात्।

अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विडम्बितेश्वरः ॥ ५२ ॥
रघोरवष्टम्भमयेन पत्त्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्त्तलाञ्छने
धनुष्यमोघं समधत्त सायकम् ॥ ५३ ॥
दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।

शरासनं चापं सशरं करिष्यमाणः आलीढेनालीढाख्येन स्थानभेदेन विशेषशोभिना अतिशयशोभिना वपुःप्रकर्षेण देहौन्नत्येन विडम्बितेश्वरः अनुकृतपिनाकी सन् अतिष्ठत् । आलीढलक्षणमाह यादवः । "स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् । त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति । अन्वर्थं स्यात्समपदमालीढन्तु ततोऽग्रतः । दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्यय" इति ॥ ५२ ॥

रघोरिति । रघोः अवष्टम्भमयेन सम्भरूपेण । "अवष्टम्भः सुवर्णे च सम्भप्रारम्भयोरपी"ति विश्वः । पत्त्रिणा बाणेन हृदि हृदये क्षतो विद्धः अतएव अमर्षणः असहनः क्रुद्ध इत्यर्थः पर्व्वतभेत्ता गोत्रभित् इन्द्रोऽपि । "सम्भावनीये चौरेऽपि गोत्रः क्षौणीधरे मत" इति विश्वः । नवाम्बुदानाम् अनीकस्य वृन्दस्य मुहूर्त्तं क्षणमात्रं लाञ्छने चिह्नभूते धनुषि, दिव्ये धनुषीत्यर्थः अमोघम् अवन्ध्यं सायकं बाणं समधत्त संहितवान् ॥ ५३ ॥

दिलीपेति । भीमानां भयङ्कराणाम् असुराणां शोणिते रुधिरे

पपावनास्वादितपूर्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥५४॥
हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुलौ।
भुजे शचीपत्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ॥ ५५ ॥

उचितः परिचितः स इन्द्रमुक्तः आशुगः सायकः दिलीपसूनोः रघोः वृहत् विशालं भुजान्तरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वमनास्वादितम्। सुप् सुपा * (२,१,४भा०) इति समासः। मनुष्यशोणितं कुतूहलेनेव पपौ ॥ ५४ ॥

हरेरिति। कुमारस्य स्कन्दस्य विक्रमइव विक्रमोयस्य स तथोक्तः। सप्तम्युपमानपूर्वस्य (२,२,२४वा०) इत्यादिना समासः। कुमारोरघुरपि सुरद्विपस्यैरावतस्यास्फालनेन कर्कशाः अङ्गुलयोयस्य सः तस्मिन् शच्या पत्रविशेषकैः अङ्किते शचीपत्रविशेषकाङ्किते हरेरिन्द्रस्य भुजे स्वनामचिह्नं स्वनामाङ्कितं सायकं निचखान निखातवान्। निष्कण्टकराज्ये तस्यायं महानभिभवइति भावः ॥ ५५ ॥

---

* समर्थेन सुबन्तेन सुबन्तं समस्यते इति समासे, भूतपूर्वे चरट् (४, ३, ५३, सूत्रे) भूतपूर्वेतिनिर्देशात् ज्ञापकात् पूर्वशब्दस्य परनिपातः।

† सप्तम्यन्तपूर्वपदस्य उपमानपूर्वपदस्य च समर्थेन सुबन्तेन सह समासो बहुव्रीहिर्गुत्र सप्तम्या उपमानपदस्यचोत्तरपदलोपः स्यात्।

जहार चान्येन मयूरपत्रिणा
शरेण शक्रस्य महाशनिध्वजम्।
चुकोप तस्मै स भृशं सुरश्रियः
प्रसह्य केशव्यपरोपणादिव ॥ ५६ ॥

तयोरुपान्तस्थितसिद्धसैनिकं
गरुत्मदाशीविषभीमदर्शनैः।
बभूव युद्धं तुमुलं जयैषिणो
रधोमुखैरूर्द्ध्वमुखैश्च पत्रिभिः ॥ ५७ ॥

जहारेति। अन्येन मयूरपत्रिणा मयूरपत्रवता शरेण शक्रस्य इन्द्रस्य महाशनिध्वजं महान्तमशनिरूपं ध्वजं जहार चिच्छेद च सः शक्रः सुरश्रियः प्रसह्य बलात्कृत्य केशानां व्यपरोपणात् अवतारणात् छेदनादिव तस्मै रघवे भृशम् अत्यर्थं चुकोप तं हन्तुमियेषेत्यर्थः। क्रुध-द्रुहेत्या * (१,४,३७पा०) दिना सम्प्रदानत्वात् चतुर्थी ॥ ५६ ॥

तयोरिति। जयैषिणोरन्योन्यजयाकाङ्क्षिणोस्तयोरिन्द्ररघ्वोः गरुत्मन्तः पक्षवन्तः। "गरुत्पक्षच्छदाः पत्र"मित्यमरः। आशीविषा आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः सर्पाः। पृषोदरादि (६, ३, १०९ पा०) त्वात्साधुः। "स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोरि" त्यमरः। तद्वत् भीमदर्शनाः सपक्षाः सर्पाइव भयावहाइत्यर्थः तैः अधोमुखैरूर्द्ध्वमुखैश्च भन्विनोरुपर्य्यधोदेशावस्थितत्वादिति भावः। पत्रिभिर्बाणैः उपान्तस्थितास्तटस्थाः सिद्धादेवा इन्द्रस्य" सैनिकाश्च रघोः, यस्मिंस्तत्तथोक्तं तुमुलं सङ्कुलं युद्धं बभूव ॥ ५७ ॥

---

* क्रुधद्रुहेर्ष्यासूयार्थानां धातुप्रयोगे यंप्रति कोपः स सम्प्रदानसंज्ञः स्यात्।

अतिप्रबन्धप्रहितास्त्रवृष्टिभि
स्तमाश्रयं दुष्प्रसहस्य तेजसः।
शशाक निर्वापयितुं न वासवः
स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः॥ ५८॥

ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम्।
रघुः शशाङ्कार्द्धमुखेन पत्रिणा
शरासनज्यामलुनाद्विडौजसः॥५९॥

स चापमुत्सृज्य विवृद्धमत्सरः
प्रणाशनाय प्रबलस्य विद्विषः।

अतीति। वासवः अतिप्रबन्धेन अतिसातत्येन प्रहिताभिः प्रयुक्ताभिः अस्त्रवृष्टिभिः दुष्प्रसहस्य दुःखेन प्रसह्यतइति दुष्प्रसहन्तस्य दुःखेनाप्यसह्यस्येत्यर्थः तेजसः प्रतापस्य आश्रयं तं रघुम् अम्बुदोऽद्भिः स्वतश्च्युतं निर्गतं वह्निमिव निर्वापयितुं न शशाक। रघोरपि लोकपालात्मकत्वेन्द्रांशसम्भवत्वादिति भावः॥ ५८॥

ततइति। ततोरघुः हरिचन्दनाङ्किते प्रकोष्ठे मणिबन्धे प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवइव धीरं गम्भीरं नदतीति तां तथोक्तां वेवेष्टि व्याप्नोतीति विट् व्यापकम् ओजोयस्य स तस्य विडौजसः इन्द्रस्य। पृषोदरादि (६,३,१०९पा०) त्वात्साधुः। शरासनज्यां धनुर्मौर्वीं शशाङ्कस्य अर्द्धः खण्डइव मुखं फलं यस्य तेन पत्रिणा अलुनात् अच्छिनत्॥ ५९॥

सइति। विवृद्धमत्सरः प्रवृद्धवैरः सइन्द्रः चापम् उत्सृज्य

महीध्रपक्षव्यपरोपणोचितं
स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ६० ॥
रघुर्भृशं वक्षसि तेन ताड़ितः
पपात भूमौ सह सैनिकाश्रुभिः।
निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः॥ ६१ ॥
तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः।

प्रबलस्य विद्विषः शत्रोः प्रणाशनाय वधाय महीं धारयन्तीति महीध्राः पर्वताः। मूलविभुजादित्वात् (३, २, ५ वा०) कप्रत्ययः। तेषां पक्षव्यपरोपणे पक्षच्छेदे उचितं स्फुरत्प्रभामण्डलमस्त्रं वज्रायुधम् आददे जग्राह ॥ ६० ॥

रघुरिति। रघुस्तेन वज्रेण भृशमत्यर्थं वक्षसि ताड़ितः सन् सैनिकानाम् अश्रुभिः सह भूमौ पपात तस्मिन् पतिते ते रुरुदुरित्यर्थः। निमेषमात्रात्तद्व्यथां दुःखम् अवधूय तिरस्कृत्य सैनिकानां ये हर्षेण निस्वनाः क्ष्वेड़ाः तैः सह उत्थितश्च तस्मिन्नुत्थिते हर्षात् सिंहनादांश्चक्रुरित्यर्थः ॥ ६१ ॥

तथापीति। तथापि वज्रपातेऽपि शस्त्राणाम् आयुधानां व्यवहारेण व्यापारेण निष्ठुरे क्रूरे विपक्षभावे शात्रवे चिरं तस्थुषः स्थितवतोऽस्य रघोः वीर्य्यातिशयेन वृत्रं हतवान् इति वृत्रहा। ब्रह्मभ्रूणवृत्रेषु * (३, २, ८७ पा०) क्विप्। ततोष। स्वयं वीरएव वीरं जानातीति

* ब्रह्मादिषूपपदेषु हन्तेर्भूतार्थे क्विप् स्यात्।

तुतोष वीर्य्यातिशयेन वृत्रहा
पदं हि सर्वत्र गुणैर्निधीयते ॥६२॥

असङ्गमद्रिष्वपि सारवत्तया
न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥६३॥

ततोनिषङ्गादसमग्रमुद्धृतं
सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं
प्रियंवदः प्रत्यवदत् सुरेश्वरम् ॥६४॥

भावः । कथं गत्वोः सन्तोषोऽत आह गुणैः सर्वत्र शत्रुमित्रोदासीनेषु पदम् अङ्घ्रिर्निधीयते गुणैः सर्वत्र संक्रम्यत इत्यर्थः । गुणाः शत्रूनप्यावर्जयन्तीति भावः ॥ ६२ ॥

असङ्गमिति । सारवत्तया अद्रिष्वप्यसङ्गम् अप्रतिबन्धं मे आयुधं वज्रं त्वदन्येन न विसोढम् अतो मां प्रीतं सन्तुष्टम् अवेहि तुरङ्गमाद् ऋते तुरङ्गं वर्जयित्वा । अन्यारादितरर्त्ते (२, ३.२९पा०) इति पञ्चमी । किमिच्छसीति स्फुटं वासवः आह । तुरङ्गादन्यददेयं नास्तीति भावः ।

ततइति । ततः निषङ्गात् तूणीरात् असमग्रं यथा तथोद्धृतं सुवर्णपुङ्खद्युतिभिः रञ्जिताङ्गुलयो येन तम् इषुं प्रतिसंहरन्निवर्त्तयन् "नामहरन्न प्रहरेदि"ति निषेधादिति भावः । प्रियं वदतीति प्रियंवदः "प्रियवशे वदः खच्" इति (३,२,३८पा०) खच्प्रत्ययः अरुर्द्विषदा-

असोच्यमश्वं यदि मन्यसे प्रभो !
ततः समाप्ते विधिनैव कर्म्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः
क्रतोरशेषेण फलेन युज्यताम् ॥६५॥

यथा च वृत्तान्तमिमं सदोगत-
स्त्रिलोचनैकांशतया दुरासदः ।
तवैव सन्देशहराद्विशाम्पतिः
शृणोति लोकेश ! तथा विधीयताम् ॥६६॥

तथेति कामं प्रतिशुश्रुवान् रघो-
र्यथागतं मातलिसारथिर्ययौ ।

दिना (६,३,६७पा०) मुमागमः । नरेन्द्रसूनुः रघुः सुरेश्वरं प्रत्यवदत् न तु प्राहरदिति भावः ॥६४॥

असोच्यमिति । हे प्रभो ! इन्द्र ! अश्वम् असोच्यं मन्यसे यदि ततस्तर्हि अजस्रदीक्षायां प्रयतः स मद्गुरुर्मम पिता विधिनैव कर्म्मणि समाप्ते सति क्रतोर्यत् फलं तेन फलेन अशेषेण कृत्स्नेन युज्यतां युक्तोऽस्तु । अश्वमेधफललाभे किमश्वेनेति भावः ॥ ६५ ॥

यथेति । सदोगतः सदोऽगृहं गतः त्रिलोचनस्येश्वरस्य एकांशतया अष्टानाम् अतनमूर्त्तित्वात् दुरासदोऽन्यादृशे दुष्प्राप्यो विशाम्पतिः यथा इमं वृत्तान्तं तव सन्देशहरात् वार्त्ताहरादेव शृणोति च हे लोकेश ! इन्द्र ! तथा विधीयताम् ॥ ६६ ॥

तथेति । मातलिसारथिरिन्द्रः रघोः सम्बन्धिनं कामं मनोरथं तथेति तथास्त्विति प्रतिशुश्रुवान् प्रतिश्रुतवान् । भाषाया सद्वस

नृपस्य नातिप्रमनाः सदोगृहं
सुदक्षिणासूनुरपि न्यवर्त्तत ॥ ६७ ॥
तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः ।
परामृशन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ ६८ ॥
इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥ ६९ ॥

सुव' (३,२,१०४पा०) इति क्वसुप्रत्ययः । यथागतं ययौ सुदक्षिणासूनुः रघुरपि नातिप्रमनाः विजयलाभेऽप्यश्वनाशान्नातीव तुष्टः सन् । नञर्थस्य नशब्दस्य सुप् सुपा (२,१,४वा०) * इति समासः । नृपस्य सदोगृहं प्रति न्यवर्त्तत ॥ ६७ ॥

तमिति । हरेरिन्द्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबोधितो-ज्ञापितो वृत्तान्तमिति शेषः प्रजेश्वरो दिलीपः हर्षजडेन हर्षशिशिरेण पाणिना कुलिशव्रणाङ्कितं तस्य रघोरिदं तदीयम् अङ्गं शरीरम् परामृशन् सन् तं रघुम् अभ्यनन्दत् ॥ ६८ ॥

इतीति । महनीयशासनः पूजनीयाज्ञः क्षितीशः इति अनेन प्रकारेण । "इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" इत्यमरः । महाक्रतूनाम् अश्वमेधानां नवभिः अधिकां नवतिम् एकोनशतम् आयुषः

---

* अत्र नञ्शब्देन समासे (६,३,७३पा०) तस्मान्नुडचीत्यनेन नुटि अनतिप्रमनाः स्यादित्यतो नशब्देन समासः ।

पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः॥३॥
सममेव समाक्रान्तं द्वयं द्विरदगामिना।
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम्॥४॥

पुरुहूतेति। पुरुहूतध्वज इन्द्रध्वजः। स किल राजभिर्वृष्ट्यर्थं पूज्यत इत्युक्तं भविष्योत्तरे "एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर!। पर्ज्जन्यः कामवर्षी स्यात्तस्य राज्ये न संशयः" इति। "चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम्। आहुः शक्रध्वजं नाम पौरलोकसुखावहम्"। पुरुहूतध्वजस्येव तस्य रघोर्नवमभ्युत्थानम् अभ्युन्नतिमभ्युदयञ्च पश्यन्तीति नवाभ्युत्थानदर्शिन्यः ऊर्द्धं प्रस्थिता उल्लसिताश्च नयनपङ्क्तयो यासां ताः सप्रजाः ससन्तानाः प्रजाः जनाः। "प्रजा स्यात् सन्ततौ जने" इत्युभयत्राप्यमरः। ननन्दुः॥३॥

सममिति। द्विरद इव द्विरदैर्वा गच्छतीति द्विरदगामिना। कर्त्तर्य्युपमाने *(३,२,७९ पा०) इति सुप्य जातौ †(३,२,७८पा०) इति वा णिनिः। तेन रघुणा समं युगपदेव द्वयं समाक्रान्तम् अधिष्ठितं किं तत् द्वयं, पितुरागतं पित्र्यम्। पितुर्यच्च ‡ ४,३,७९पा० यत्प्रत्ययः। सिंहासनम् अखिलमरेर्मण्डलं राष्ट्रञ्च॥४॥

---

* उपमाने कर्त्तरि उपपदे धातोर्णिनिः स्यात्।

† सुबन्ते करणे उपपदे धातोर्णिनिः स्यात् न तु समुदायेन जातौ वाच्यायाम्।

‡ आगतसिद्धर्थे पञ्चम्यन्तात् पितृशब्दात् यत् स्यात्।

छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥५॥
परिकल्पितसान्निध्या कालेकाले च वन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥६॥

सिंहासनारोहणानन्तरं तस्य लक्ष्मीसन्निधानमाह

छायेति । अत्र रघोस्तेजोविशेषेण स्वयं सन्निहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्ष्यते । पद्मा लक्ष्मीः "लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिये" त्यमरः । स्वयमदृश्या किल । किलेति सम्भावनायाम् । सती छायामण्डललक्ष्येण कान्तिपुञ्जानुमेयेन स्वरूपतो ऽदृश्येन । छायामण्डललिखनेनानातपज्ञानं लक्ष्यते । "छाया सूर्य्यप्रिया कान्तिप्रतिविम्बमनातप" इत्युभयत्राप्यमरः । पद्मातपत्रेण पद्ममेवातपत्रं तेन करणभूतेन साम्राज्ये साम्राज्यकर्म्मणि मण्डलाधिपत्ये दीक्षितम् अभिषिक्तं तं भेजे । अन्यथा कथमेतादृशी कान्तिसम्पत्तिरिति भावः ॥ ५ ॥

नत्यति सरस्वतीसान्निध्यमाह

परिकल्पितेति । सरस्वती च कालेकाले सर्वेष्वपि योग्यकालेषु । नित्यवीप्सयोरिति (८,१,४पा०) वीप्सायां द्विर्वचनम् । वन्दिषु परिकल्पितसान्निध्या कृतसन्निधाना सती स्तुत्यं स्तोत्रार्हं तं रघुम् अर्थ्याभिरर्थादनपेताभिः । धर्म्मपथ्यर्थन्यायादनपेते (४,४,९२पा०) इति यत्प्रत्ययः । स्तुतिभिः स्तोत्रैः उपतस्थे देवताबुद्ध्या पूजितवतीत्यर्थः । देवतात्वञ्च विष्णुः पृथिवीपतिरिति वा लोकपालात्मकत्वाद्वेत्यनुसन्धेयम् । एवञ्च सति उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिषु * (१,३,२५पा०) इति वक्तव्यादात्मनेपदं सिध्यति ॥६॥

* उपपूर्वात् तिष्ठतेः देवपूजाद्यर्थेषु आत्मनेपदं स्यात् ।

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा ॥७॥
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥८॥

मन्विति । वसुन्धरा मनुप्रभृतिभिः मन्वादिभिर्मान्यैः पूज्यैः राजभिः भुक्ता यद्यपि भुक्तैवेत्यर्थः । यद्यपीत्यवधारणे । "अप्यर्थे यदि, वार्थे (एवार्थे) स्यादि" ति केशवः । तथापि तस्मिन् राज्ञि अन्यः पूर्वो यस्याः सा अन्यपूर्वा सा न भवतीत्यनन्यपूर्वा अनन्योपभुक्तेवासीत् तत् प्रथमपतिकेवानुरक्तवतीत्यर्थः ॥ ७ ॥

अत्र कारणमाह

स हीति । हि यस्मात् कारणात् स रघुः युक्तदण्डतया यथापराधदण्डतया सर्वस्य लोकस्य मन आददे जहार क इव अतिशीतोऽत्युष्णो वा न भवतीति नातिशीतोष्णः । * नञर्थस्य नशब्दस्य सुप् सुपेति समासः । दक्षिणो दक्षिणदिग्भवो नभस्वान् वायुरिव मलयानिलइवेत्यर्थः । युक्तदण्डतयेत्यत्र कामन्दकः "उद्वेजयति तीक्ष्णेन मृदुना परिभूयते । दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते" इति ॥ ८ ॥

---

*नञा समासे अनतिशीतोष्णः स्यादित्याशयेन न शब्द समासमाह ।

मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ।
फलेन सहकारस्य पुष्पोद्गमइव प्रजाः॥ ९॥
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम्।
पूर्व एवाभवत् पक्षस्तस्मिन्नाभवदुत्तरः॥ १०॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत्॥ ११॥

मन्दादिति। तेन रघुणा प्रजाः गुरौ दिलीपविषये सहकारोऽतिसौरभचूतः। "आम्रश्चूतोरसालोऽसौ सहकारोऽतिसौरभ" इत्यमरः। तस्य फलेन पुष्पोद्गमे पुष्पोदये इव ततोऽपि गुणाधिकतया हेतुना मन्दोत्कण्ठाः अल्पोत्सुकाः कृताः। "गुणोत्तरोविषयः पूर्वं विस्मारयती"ति भावः॥ ९॥

नयेति। नयविद्भिर्नीतिशास्त्रज्ञैः नवे तस्मिन् राज्ञि विषये तदधिकृत्येत्यर्थः सत्, धर्मयुद्धादिकम्, असत् कूटयुद्धादिकञ्च उपदर्शितं तस्मिन् राज्ञि पूर्व्वः पक्षएवाभवत् संक्रान्तइत्यर्थः उत्तरः पक्षोनाभवत् न संक्रान्तइत्यर्थः। तत्र सदसतोर्मध्ये सदेवाभिमतं नासत् तदुद्भावनन्तु ज्ञानार्थमेवेत्यर्थः। पक्षः साधनयोग्यार्थः। "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु इति केशवः॥ १०॥

पञ्चानामिति। पृथिव्यादीनां पञ्चानां भूतानामपि गुणा' गन्धरसादयः उत्कर्षमतिशयं पुपुषुः। अतोऽभ्युचते तस्मिन् रघौ नाम नवे महीपाले सति सर्व्वं वस्तुजातं नवमिवाभवत्। तदेव भूतजातमिदानीमपूर्व्वगुणयोगादपूर्व्वमिवाभवदिति भावः॥ ११॥

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्य्यार्थदर्शिना ॥ १३ ॥
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत् पङ्कजलक्षणा ॥ १४ ॥

यथेति । यथा चन्दयत्याह्लादयतीति चन्द्रः । चदिधातोरौणादिको रक्प्रत्ययः (२,१३उ०) प्रह्लादनादाह्लादकरणादन्वर्थोऽनुगतार्थनामकोऽभूत् यथा च तपतीति तपनः सूर्य्यः। (३,१,१३४पा०)नन्द्यादित्वाल्लुप्रत्ययः । प्रतापात्सन्तापजननादित्यर्थः तथैव स राजा प्रकृतिरञ्जनात् अन्वर्थः सार्थकराजशब्दोऽभूत् । यद्यपि राजशब्दो राजतेर्दीप्त्यर्थाद् (१,१५६उ०) कनिन्प्रत्ययान्तो न तु रञ्जेः तथापि धातूनामनेकार्थत्वाद्रञ्जनाद्राजेत्युक्तं कविना ॥ १२ ॥

काममिति । विशाले तस्य रघोर्लोचने कामं कर्णान्तयोर्विश्रान्ते कर्णप्रान्तगते चक्षुष्मत्ता तु चक्षुःफलन्त्वित्यर्थः सूक्ष्मान् कार्य्यार्थान् कर्त्तव्यार्थान् दर्शयति प्रकाशयतीति सूक्ष्मकार्य्यार्थदर्शिना शास्त्रेणैव । "शास्त्रं दृष्टिर्विवेकिना"मिति भावः ॥ १३ ॥

लब्धेति । अथ लब्धस्य राज्यस्य प्रशमनेन परिपन्थिनाम् अनुरञ्जनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तमेनं रघुं पङ्कजलक्षणा पद्मचिह्ना । श्रियोऽपि विशेषणमेतत् । शरद् द्वितीया पार्थिवश्रीः राजलक्ष्मीरिव समुपस्थिता प्राप्ता । "रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तथा, योधानामपि संग्रहोऽपि तुलया मानव्यव-

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः।
प्रतापस्तस्य भानोश्च युगपद् व्यानशे दिशः १५॥
वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥१६॥
पुण्डरीकातपत्रस्तं विकसत्काशचामरः।
ऋतुर्विडम्बयामास न पुनःप्राप तच्छ्रियम्॥१७॥

स्थापनम्। नाव्यं लिङ्गिषु दानच्छत्रिकरणं त्यागः समानेष्वग्रं मान्योऽग्रेऽथ महीभुजां प्रशमनान्येतानि राज्ये नवे" ॥ १४ ॥

निर्वृष्टेति। निःशेषेण वृष्टा निर्वृष्टाः। कर्त्तरि क्तः। अतएव लघवः तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः अतएव सुदुःसहः तस्य रघोर्भानोश्च प्रतापः पौरुषमातपश्च। "प्रतापौ पौरुषातपावि"ति यादवः। युगपत् दिशो व्यानशे व्याप॥ १५ ॥

वार्षिकमिति। इन्द्रो वर्षासु भवं वार्षिकं वर्षानिमित्तमित्यर्थः। "वर्षाभ्यष्ठक्" (४, ३, १८पा०) इति ठक्प्रत्ययः। धनुः संजहार रघुर्जैत्रं जयशीलम्। जेतृशब्दात् तृन्नन्तात् प्रज्ञादित्वा (५,४,३८पा०)दिति स्वार्थे अण्प्रत्ययः। धनुर्दधौ। हि यस्मात् ताविन्द्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणस्य साधनविषये पर्यायेणोद्यतं कार्मुकं याभ्यां तौ पर्यायोद्यतकार्मुकौ। पाठान्तरे पर्यायेणोद्यतो विक्रमस्य यत्नौ पर्यायोद्यतविक्रमौ। द्वयोः पर्यायेण करणादक्लेश इति भावः ॥ १६ ॥

पुण्डरीकेति। पुण्डरीकं सिताम्भोजमेवातपत्रं यस्य स तथोक्तः। विकसन्ति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य स तथोक्तः ऋतुः शरदृतुः पुण्डरीकसितातपत्रं काशनिभचामरं तं रघुं विड-

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः ॥१८॥
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥१९॥
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम्।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥२०॥

नवानाम् अभ्युत्थानम् तस्य रघोः [illegible] ननन्दुः [illegible]। "इन्द्रध्वजोत्थाने [illegible]" इति [illegible]॥१७॥

प्रसादेति। प्रसादेन सुमुखे तस्मिन् रघौ विशदप्रभे निर्मल-कान्तौ चन्द्रे च द्वयोर्विषये तदा चक्षुष्मतां प्रीतिः समरसा सम-स्वादा तुल्यैवासीदिति भावः। "शृङ्गारादौ रसः स्वादे" इति विश्वः। [illegible]॥१८॥

हंसेति। हंसानां श्रेणीषु पङ्क्तिषु तारासु नक्षत्रेषु कुमुदानि सन्ति येषु कुमुद्वन्ति। "कुमुदनडवेतसेभ्यो ड्मतुप्" (४.२.८७) इति ड्मतुप्। तेषु कुमुद्वत्सु वारिषु च तदीयानां रघुसम्बन्धिनां यशसां विभूतयः सम्पदः पर्यस्ता इव प्रसारिताः निक्षिप्ता इव। [illegible]॥१९॥

इक्ष्विति। इक्षूणां छाया इक्षुच्छायम्। "छाया बाहुल्ये" (२.४.२२) इति नपुंसकत्वम्। तत्र निषण्णाः इक्षुच्छायनिषादिन्यः। [illegible] इति [illegible] शालीन् गोपायन्तीति शालिगोप्यः [illegible] (३.२.१) [illegible] (४.१.१५) इति ङीप्

* इक्षुच्छायनिषादिन्यः [illegible]

प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥२१॥
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥२२॥

गोप्तुः रक्षकस्य तस्य रघोः गुणेभ्यः उदयो यस्य तद्गुणोदयं गुणोत्पन्नम् आकुमारं कुमारादारभ्य कथोद्घातः कथारम्भो यस्य तत् कुमारेऽपि स्तूयमानमित्यर्थः यशो जगुर्गायन्ति स्म । अथ वा कुमारस्य सतो रघोर्या कथा इन्द्रविजयादय तत आरभ्य आकुमारकथम् । तत्राभिविधौ (१.२,३ पा०) अव्ययीभावः । * आकुमारकथमुद्घातो यस्मिन् कर्म्मणि यथा तथेति क्रियाविशेषणमेतत् । "स्यादभ्यादानमुद्घात आरम्भः" इत्यमरः । आकुमारकथोद्भूतमिति पाठे कुमारस्य सतस्तस्य कथाभिः स्तुतिभिः उद्भूतं यश्च तत्प्रभृत्यारभ्य यशो जगुरिति व्याख्येयम् ॥ २० ॥

प्रससादेति । महौजसः कुम्भयोनेरगस्त्यस्य । "अगस्त्यः कुम्भसम्भव" इत्यमरः । उदयात् अम्भः प्रससाद प्रसन्नं बभूव महौजसो रघोरुदयात् अभिभवाशङ्कि द्विषतां मनश्चुक्षुभे कालुष्यं प्राप । "अगस्त्योदये जलानि प्रसीदन्तीत्यागमः" ॥ २१ ॥

मदेति । मदोदग्राः मदोद्धताः ककुदेषामस्तीति ककुद्मन्तः ककुद्मन्त इत्यर्थः । (८.२,९ पा०) यवादित्वान्मकारस्य वत्वाभावः † । सरितां कूलानि उद्रुजन्तीति कूलमुद्रुजाः । "उदि कूले रुजिवहोः (३.२,३१ पा०)" इति खश्प्रत्ययः । अरुर्द्विषदजन्तस्य मुम् (६,३,६७ पा०)

---

* आङ्मर्यादाभिविध्योः (२, १, १३ पा०) मर्य्यादायामभिविधौ च वर्तमान आङ् [illegible] सुबन्तेन सह समस्यते सोऽव्ययीभावः ।

† ८,२,१० पा० । झयः झयन्तात् परस्य मतुपो मस्य वत्वप्रसक्तौ ८,२,९ [illegible] यवादिप्रतिषेधान्न वत्वम् ।

प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥२३॥
सरितः कुर्वती गाधाः पथश्चाश्यानकर्द्दमान्।
यात्रायै नोदयामास तं शक्तेः प्रथमं शरत् २४॥

मुडागमः। महान्ति उक्षाणः महोक्षाः। अचतुरेत्यादिना निपातनात् (५,४,७७पा०) अकारान्तः। लीलाखेलं विलासस्तुभगं तस्य रघोरुक्षाह्वतोवपुष्मत· परभङ्गकस्य विक्रमं शौर्य्यमनुप्रापुरनुचक्रुः ॥ २२ ॥

प्रसवैरिति। मदस्येव गन्धोयेषां तैर्मदगन्धिभि·। उपमानाच्च * (३,४,१३७पा०)इतीकारः समासान्तः। सप्तपर्णानां वृक्षविशेषाणाम्। "सप्तपर्णो विशालत्वक् शारदोविषमच्छद" इत्यमरः। प्रसवै· पुष्पैः आहतास्तस्य रघोर्नागा गजाः। "गजेऽपि नागमातङ्गावि" त्यमरः। असूययेव आहतिनिमित्तया स्पर्द्धयेव सप्तधैव प्रसुस्रुवुः मदं ववृषुः प्रतिगजगन्धाभिमानादिति भावः। "करात् कटाभ्यां" मेढ्राच्च नेत्राभ्याञ्च मदस्रुति" रिति पालकाव्ये। करान्नासारन्ध्राभ्यामित्यर्थः ॥ २३ ॥

सरितइति। सरितोगाधाः सुप्रतरा· कुर्वती पथोमार्गांश्च आश्यानकर्द्दमान् शुष्कपङ्कान् कुर्वती। "संयोगादेरातोधातोर्यण्वतः इति † (५,४,११७पा०) श्यतेर्निष्ठातस्य नत्वम्। शरत् शरदृतुः तं रघुं शक्तेः उत्साहशक्तेः· प्रथमं प्राक् यात्रायै दण्डयात्रायै नोदयामास प्रेरयामास। प्रभावमन्त्रशक्तिसम्पन्नस्य यात्रा शरत् स्वयमुत्पादयामासेत्यर्थ· ॥ २४ ॥

---

* उपमानपूर्वकस्य गन्धशब्दस्य बहुव्रीहौ इत् समासान्त· स्यात्।

† संयोगविशिष्टस्य यण्प्रत्याहारवर्णवतः आदन्तधातोः परस्य निष्ठातस्य नत्वं स्यात्।

तस्मै सम्यक् हुतोवह्निर्वाजिनीराजनाविधौ।
प्रदक्षिणार्च्चिर्व्याजेन हस्तेनेव जयं ददौ ॥२५॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥२६
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः।
पृषतैर्मन्दरोद्भूतैः क्षीरोर्मय इवाच्युतम् ॥२७॥

तस्मा इति। वाजिनामश्वानां नीराजनाविधौ नीराजनाख्ये शान्तिकर्म्मणि सम्यग्विधिवत् हुतोहोमसमिद्धोवह्निः प्रगता दक्षिणां प्रदक्षिणम्। तिष्ठद्गुप्रभृतित्वा (२,१,१७पा०) दव्ययीभावः। प्रदक्षिणं यार्च्चिर्ज्वाला तस्याः व्याजेन हस्तेनेव तस्मै जयं ददौ। उक्तमाहवयात्रायाम् "इद्ध. प्रदक्षिणगतोहुतभुक् नृपस्य धात्रीं समुद्ररशनां वशगां करोती"ति। वाजिग्रहणं गजादीनामप्युपलक्षणं तेषामपि नीराजनाविधानात ॥ २५ ॥

स इति। गुप्तौ मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गञ्च येन स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिः उद्धृतपृष्ठशत्रुः सेनया रक्षितपृष्ठदेशोवा अयान्वितः शुभदैवान्वितः। "अयः शुभावहोविधिरि" त्यमरः। स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यम्। "मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलमि" ति कोषः। आदाय दिशां जिगीषया जेतुमिच्छया प्रतस्थे चचाल ॥ २६ ॥

अवाकिरन्निति। वयोवृद्धाः पौरयोषितः तं रघुं प्रयान्तं लाजैराचारलाजैः मन्दरोद्भूतैः पृषतैर्विन्दुभिः क्षीरोर्म्मयः क्षीरसमुद्रोर्मयः अच्युतं विष्णुमिव अवाकिरन् पर्य्यक्षिपन् ॥ २७ ॥

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥२८॥

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ॥२९॥

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥३०॥

स इति । प्राचीनबर्हिर्नाम कश्चिन्महाराजः इति केचित् । प्राचीनबर्हिरिन्द्रः "पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिस्तथा" इतीन्द्रपर्यायेषु हलायुधाभिधानात् । तेन तुल्यः स रघुः अनिलेनानुकूलपवनेनोद्धूतैः केतुभिर्ध्वजैः अहितान् रिपून् तर्जयन्निव भर्त्सयन्निव । तर्जिभर्त्स्योरनुदात्तत्त्वेऽपि "चक्षिङो ङित्करणेनानुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वज्ञापनात् * परस्मैपदमिति वामनः । प्रथमं प्राचीं दिशं ययौ ॥ २८ ॥

रजोभिरिति । किं कुर्वन् स्यन्दनोद्धूतैः रजोभिः घनसन्निभैर्मेघैः, वर्णतः परिमाणतश्च मेघतुल्यैः गजैश्च व्योमाकाशं भुवस्तलमिव भूतलञ्च व्योमेव कुर्वन् ययाविति पूर्वेण सम्बन्धः ॥ २९ ॥

प्रताप इति । अग्रे प्रतापस्तेजोविशेषः । "स प्रभावः, प्रतापश्च यत्तेजः कोषदण्डजमित्यमरः । ततः शब्दः सेनाकलकलः, तदनन्तरं परागो धूलिः । "परागः पुष्परजसि धूलिस्नानीययोरपी"ति विश्वः । पश्चाद्रथादि, चतुरङ्गबलम् इतीत्थं चतुःस्कन्धेव चतुर्व्यूहेव, "स्कन्धः

---

* तर्जेरनुदात्तेत्त्वेन आत्मनेपदप्रसङ्गे परस्मैपदं चिन्त्यं तन्निरासार्थम् । चक्षिङोऽनुदात्तेत्त्वेनैव आत्मनेपदसिद्धावपि पुनरस्य ङित्करणमेवोक्तार्थे ज्ञापकम् ।

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥३१॥
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥३२॥
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥३३॥

प्रकाण्डे कायांशे विज्ञानादिषु पञ्चसु । रूपे सदृक्षे चे"ति हैमः । सा चमूर्बभौ । रथानीकमिति पाठे इति शब्दाध्याहारेण योज्यम् ॥ ३० ॥

मर्विति । स रघुः शक्तिमत्त्वात्सामर्थ्यात् मरुपृष्ठानि निर्जलस्थानानि । "समानौ मरुधन्वानावि"त्यमरः । उदम्भांस्युद्भूतजलानि "चकार नाव्या" नौभिस्तार्याः नदीः । "नाव्यं त्रिलिङ्गं नौतार्ये" इत्यमरः । नौवयोधर्मविषमूलेत्यादिना (४,४.९१ पा०) यत्प्रत्ययः । सुप्रतराः सुखेन तार्याश्चकार विपिनान्यरण्यानि । "अटव्यरण्यं विपिनमि"त्यमरः । प्रकाशानि निर्वृक्षाणि चकार । शक्त्युत्कर्षात् तस्य गम्यं किमपि नासीदिति भावः ॥ ३१ ॥

स इति । महतीं सेनां पूर्वसागरगामिनीं कर्षन् स रघुः हरस्य जटाभ्यो भ्रष्टां गङ्गां कर्षन् । सापि पूर्वसागरगामिनी । भगीरथ इव बभौ । भगीरथो नाम कश्चित् कपिलदग्धानां सागराणां नप्ता तत्तारणाय स्वर्लोकात् गङ्गामवतारितवान् राजा यत्सम्बन्धाद्गङ्गा भागीरथीति कीर्त्यते ॥ ३२ ॥

त्याजितैरिति । "फलं फले धने बीजे निष्पत्तौ भोगलाभयोरि"

पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी।
प्राप तालीवनश्याममुपकण्ठं महोदधेः॥ ३४॥
अनम्राणां समुद्धर्तुस्तस्मात् सिन्धुरयादिव।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम्॥३५॥

ति केशवः। फलं लाभं हृत्यपक्षे प्रसवञ्च त्याजितैः। त्यजेर्ण्यन्तात् द्विकर्मकात् प्रधाने * कर्मणि क्तः। उत्खातैः स्वपदात् त्याजितैः अन्यत्रोत्पाटितैः बहुधा भग्नैः रणे जितैः, अन्यत्र छिन्नैः, नृपैः पादपैः दन्तिनो गजस्येव तस्य रघोः मार्गरूपत्वात् प्रकाश आसीत्। "प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुट" मिति यादवः॥ ३३॥

पौरस्त्यानिति। जयी जयशीलः। जिदृक्षिविश्रीत्यादिना (३,२,१५७पा०)इनिप्रत्ययः। स रघुरेवं पुरोभवान् पौरस्त्यान् प्राच्यान्। दक्षिणापश्चात्पुरसस्त्यक् (४,२,९८पा०) इति त्यक्प्रत्ययः। तांस्तान् सर्वानित्यर्थः। (८,१,४पा०) वीप्सायां द्विरुक्तिः। जनपदान् देशान् आक्रामन् तालीवनैः श्यामं महोदधेः उपकण्ठमन्तिकं प्राप॥ ३४॥

अनम्राणामिति। अनम्राणाम्। कर्मणि षष्ठी। समुद्धर्तुः उन्मूलयितुः तस्मात् रघोः सकाशात्। भीत्रार्थानां भयहेतुः।(१,४,२५पा०) इत्यपादानत्वात् पञ्चमी। सिन्धुरयान्नदीवेगादिव सुह्मैः सुह्मदेशीयैः। सुह्मादयः शब्दाः जनपदवचना॰ क्षत्रियमाचक्षते। वैतसीं वेतसः सम्बन्धिनीं वृत्तिं प्रणतिमित्यर्थः आश्रित्य आत्मा संरक्षितः। अत्र कौटिल्यः "बलीयसाभियुक्तोदुर्बलः सर्वत्रानुप्रणतो वेतसधर्म्ममातिष्ठेत्" इति॥ ३५॥

---

* प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामित्युक्तेरिति शेषः. दुहादिषु त्याजेः पाठाभावेऽपि द्वियामार्थकत्वेनैव द्विकर्मकत्वम्।

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥३६

आपादपद्मप्रणताः कलमाइव ते रघुम् ।
फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ॥३७॥

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥३८॥

वङ्गानिति । नेता नायकः स रघुः नौभिः साधनैरुद्यतान् सन्नद्धान् वङ्गान् तरसा बलेन । "तरसी बलरंहसी" इति यादवः । उत्खायोन्मूल्य गङ्गायाः स्रोतसां प्रवाहाणामन्तरेषु द्वीपेषु जयस्तम्भान्निचखान स्थापितवानित्यर्थः ॥ ३६ ॥

आपादेति । आपादपद्मम् अङ्घ्रिपद्मपर्य्यन्तं प्रणताः अतएवोत्खाताः पूर्वमुद्धृता अपि प्रतिरोपिताः पश्चात् स्थापिताः ते वङ्गाः कलमाइव शालिविशेषाइव । "शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी" इत्यमरः । तेऽप्यापादपद्मं पद्ममूलपर्यन्तं प्रणताः । "पादो बुध्नतुरीयांशशैलप्रत्यन्तपर्वताः" इति विश्वः । उत्खातप्रतिरोपिताश्च । रघुं फलैर्धनैः अन्यत्र सस्यैः संवर्द्धयामासुः । "फलं फले धने बीजे निष्पत्तौ भोगलाभयोः । सस्ये" इति केशवः ॥ ३७ ॥

स इति । स रघुः बद्धा द्विरदा इव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीम् । करभामिति केचित् पठन्ति । तीर्त्वा उत्कलैः राजभिरादर्शितपथः प्रदर्शितमार्गः सन् कलिङ्गाभिमुखो ययौ ॥ ३८ ॥

स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥३९॥
प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥४०॥
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥४१॥

स इति। स रघुर्महेन्द्रस्य कुलपर्वतविशेषस्य "महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः। विन्ध्यश्च परियात्रश्च सप्तैते कुलपर्वताः" इति विष्णुपुराणात्। मूर्ध्नि तीक्ष्णं दुःसहं प्रतापं यन्ता सारथिः गम्भीरवेदिनो द्विरदस्य गजविशेषस्य मूर्ध्नि तीक्ष्णं निशितमङ्कुशमिव न्यवेशयत् निक्षिप्तवान्। "त्वग्भेदाच्छोणितस्रावात् मांसस्य क्रथनादपि। आत्मानं यो न जानाति स स्याद्गम्भीरवेदिता" इति राजपुत्रीये। "चिरकालेन यो वेत्ति शिक्षां परिचितामपि। गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः" इति मृगचर्मीये ॥ ३९ ॥

प्रतीति। गजसाधनः सन् कालिङ्गः कलिङ्गानां राजा द्व्यञ्मगधकलिङ्गेत्या (४,१,१७०पा०) दिना अण्प्रत्ययः। अस्त्रैरायुधैस्तं रघुं पक्षाणां छेदे उद्यतम् उद्युक्तं शक्रं शिलावर्षी पर्वत इव प्रतिजग्राह प्रत्यभियुक्तवान् ॥ ४० ॥

द्विषामिति। काकुत्स्थो रघुः तत्र महेन्द्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनं लक्षणया वर्षमुच्यते विषह्य सहित्वा स्व् यथाशास्त्रं मङ्गलस्नात इव विजयमङ्गलार्थमभिषिक्त इव

ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नारिकेलासवं योधाः शात्रवञ्च पपुर्यशः॥४२

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥४३

ततोवेलातटेनैव फलवत्पूगमालिना।
अगस्त्याचरितामाशामनाशास्यजयोययौ॥४४॥

जयश्रियं प्रतिपेदे प्राप। "यत्तु सर्वोपधिस्थानं तत्साङ्कल्यमुदाहृतमि" ति यादवः॥४१॥

ताम्बूलीनामिति। तत्र महेन्द्राद्रौ युध्यन्त इति योधाः।(३,१,१३४ पा०) पचाद्यच्। रचिताः कल्पिताः आपानभूमयः पानयोग्यप्रदेशाः यैस्ते तथोक्ताः सन्तः नारिकेलासवं नारिकेलमद्यं ताम्बूलीनां नागवल्लीनां दलैः पपुः तत्र विजह्रुरित्यर्थः। शात्रवं यशश्च पपु जह्रुरित्यर्थः॥४२॥

गृहीतेति। धर्मविजयी धर्मार्थं विजयशीलः स नृपो रघुः गृहीतश्चासौ प्रतिमुक्तश्च तस्य महेन्द्रनाथस्य कालिङ्गस्य श्रियं जहार धर्मार्थमिति भावः। मेदिनीन्तु न जहार शरणागतवात्सल्यादिति भावः॥४३॥

तत इति। ततः प्राचीविजयानन्तरं फलवत्पूगमालिना फलित क्रमुकश्रेणीमता। व्रीह्या(५.२.११६ पा०)दित्वादिनिप्रत्ययः। वेलायाः समुद्रकूलस्य तटेनोपान्तेनैव अगस्त्येनाचरितामाशां दक्षिणां दिशम् अनाशास्यजयः स्वबलसिद्धत्वात् अप्रार्थनीयजयः सन् ययौ। "अंग-

स सैन्यपरिभोगेण गजदानसुगन्धिना।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्॥४५॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ४६

स्योदक्षिणामाशामाश्रित्य नभसि स्थितः। वरुणस्यात्मजोयोगो विन्ध्यवातापिमर्दनः" इति ब्रह्मपुराणे॥ ४४॥

सइति। स रघुः गजानां दानेन मदेन सुगन्धिना सुरभिगन्धिना। गन्धस्येत् (५,४,१३५ पा०) इत्यादिनाइकारादेशः समासान्तः। यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्त्तव्यमिति नैसर्गिकगन्धविवक्षायामेवेकारादेशस्तथापि निरङ्कुशाः कवयः। तथा च माघकाव्ये वतुरयुक्छदगुच्छसुगन्धयः सततगास्ततगानगिरोऽलिभिः। नैषधे च अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा इति। न कर्म्मधारयान्मत्वर्थीयइति* निषेधादिनिप्रत्ययपक्षोऽपि जघन्यएव। सेनायां समवेताः सैन्याः। "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः। सेनायावा (४,४,४५पा०) इति "ण्यप्रत्ययः। तेषां परिभोगेण कावेरी नाम सरितं सरितां पत्युः समुद्रस्य शङ्कनीयां न विश्वसनीयामिवाकरोत्। सम्भोगलिङ्गदर्शनाद्भर्तुरविश्वासोभवतीति भावः॥ ४५॥

बलैरिति। विजिगीषोर्विजेतुमिच्छोः गताध्वनस्तस्य रघोः बलैः सैन्यैः। "बलं शक्तिर्बलं सैन्य"मिति यादवः। मारीचेषु मरीचवनेषु उद्भ्रान्ताः परिभ्रान्ताः हारीताः पक्षिविशेषाः यासु ताः। "तेषां

---

* न कर्म्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरस्तुतो बहुव्रीहिसमासेन मत्वर्थलाभे कर्मधारयसमासात् मत्वर्थीय प्रत्ययो नस्यादिति निषेधः।

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥४७॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि॥४८

विशेषा हारीतो मद्गुः कारण्डवः प्लवः" इत्यमरः। मलयाद्रेरुपत्यकाः आसन्नभूमयः। "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यके" त्यमरः। उपाधिभ्यां त्यकन्नित्यादिना (५,२,३४पा०) त्यकन्प्रत्ययः। अध्युषिताः उपत्यकास्तूषितमित्यर्थः। उपान्वध्याङ्वसः * (१,४,४८पा०) इति कर्मत्वम् ॥ ४६ ॥

ससञ्जुरिति। अश्वैः क्षुण्णानामेलानामुत्पतिष्णवः उत्पतनशीलाः। अलंकृञित्या (३,२,१३६पा०)दिना इष्णुच्प्रत्ययः। फलरेणवः फलरजांसि तुल्यगन्धिषु समानगन्धिषु†। सर्वधनीतिवदिन्यन्तो बहुव्रीहिः। मत्तेभानां कटेषु ससञ्जुः सक्ताः। "गजगण्डे कटौ कटावि"ति कोषः ॥ ४७ ॥

भोगीति। चन्दनानां चन्दनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनात् निम्नेषु समर्पितं सञ्जितं त्रिपदीच्छेदिनां पादशृङ्खलच्छेदकानामपि। "त्रिपदी पादबन्धन"मिति यादवः। करिणां ग्रीवासु भवं ग्रैवं कण्ठबन्धनम्। ग्रीवाभ्योऽण् च(४,३,५७पा०)इत्यण्प्रत्ययः। नास्रसत् न स्रस्तमभूत्। द्युद्भ्यो लुङि (१,३,९१पा०) इति परस्मैपदे‡ पुषादित्वादङ्, अनिदिताम् (६,४,२४पा०) इति नकारलोपः ॥४८॥

---

* उपादिपूर्वकस्य वसतेराधारः कर्मसंज्ञः स्यात्।

† उदरादिपूर्वकत्वाभावात् इत्वासम्भवेन बहुव्रीह्यर्थे एवात इनिप्रत्ययेन "न कर्मधारयादित्यादिनिषेधो"न।

‡ द्युतादेरात्मनेपदित्वेऽपि लुङि परस्मैपदविषये अङ्विधानात् परस्मैपदम्।

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥४९॥

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥५०॥

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥५१॥

दिशीति । दक्षिणस्यां दिशि रवेरपि तेजो मन्दायते मन्दं भवति । लोहितादित्वात्(३.१.१३ पा०)क्यष्प्रत्ययः वा क्यषः* (१.३.९० पा०) इत्यात्मनेपदम् । दक्षिणायने तेजोमान्द्यादिति भावः । तस्यामेव दिशि पाण्ड्याः पाण्डूनां जनपदानां राजानः पाण्ड्याः । पाण्डोर्ड्यण् वक्तव्यः (४.१.१६८वा०) इति ड्यण् । रघोः प्रतापं न विषेहिरे न सोढवन्तः । सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते ॥ ४९ ॥

ताम्रपर्णीति । ते पाण्ड्याः ताम्रपर्ण्या नद्याः समेतस्य सङ्गतस्य महोदधेः सम्बन्धि सञ्चितं मुक्तासारं मौक्तिकबलम् । "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरः । स्वं स्वकीयं सञ्चितं यश इव तस्मै रघवे निपत्य प्रणिपत्य ददुः । यशसः शुक्लत्वादौपम्यम् । ताम्रपर्णीसङ्गमे मौक्तिकोत्पत्तिरिति प्रसिद्धम् ॥ ५० ॥

स इति । ऊनषष्ठीति च दुष्टमेतत् । अच्युतविक्रमः स रघुः तटेषु सानुष्वालीनचन्दनौ व्याप्तचन्दनद्रुमौ । "गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः । स्तनपक्षे गात्रेषु व्याप्तचन्दनानुलेपौ तस्याः दक्षिणस्याः दिशः स्तनाविव स्थितौ मलयदर्दुरौ

---

* क्यषन्ताद्धातोरात्मनेपदं वा स्यात् ।

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत्॥५२
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः॥५३
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम्।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः॥ ५४ ॥

नाम शैलौ यथाकामं यथेच्छं निर्विश्योपभुज्य। "निर्वेशो भृतिभोगयो"रित्यमरः। उदकान्यस्य सन्तीत्युदन्वानुदधिः। "उदन्वानुदधौ चेति (८.२.१३ पा०) निपातः। उदन्वता दूरान्मुक्तं दूरतस्त्यक्तम्। स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन (२.१.३९ पा०) इति समासः। पञ्चम्याः स्तोकादिभ्य (६.३.२ पा०) इत्यलुक्। स्रस्तांशुकं मेदिन्या नितम्बमिव स्थितं सह्यं सह्याद्रिम् अलङ्घयत् प्राप्तः अतिक्रान्तो वा॥ ५२॥

सम्प्रति प्रतीचीं दिगमभिययावित्याह

तस्येति। अपरान्तानां पाश्चात्यानां जये उद्यतैरुद्युक्तैः। "अपरान्तास्तु पाश्चात्यास्ते च शूर्पारकादयः" इति यादवः। विसर्पद्भिर्गच्छद्भिः तस्य रघोरनीकैः सैन्यैः। "अनीकस्तु रणे सैन्ये" इति विश्वः। अर्णवो रामस्य जामदग्न्यस्यास्त्रैरुत्सारितः परिसारितोऽपि सह्यलग्न इवासीत्। सैन्यं द्वितीयोऽर्णव इव दृश्यत इति भावः॥ ५३॥

भयेति। तेन रघुणा भयेन उत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषितां केरलाङ्गनानामलकेषु चमूरेणुः सेनारजः चूर्णस्य कुङ्कुमादिरजसः प्रतिनिधीकृतः। एतेन योषितां पलायनं चमूनाञ्च अनुधावनं व्यज्यते॥ ५४॥

मुरलामारुतोद्भूतमगमत् कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्म्मभिः पवनोद्भूतराजतालीवनध्वनिः ॥ ५६ ॥
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥ ५७ ॥

मुरलेति । मुरला नाम केरलदेशेषु काचिन्नदी मुरवीति केचित् पठन्ति । तस्या मारुतेनोद्भूतमुत्थापितं कैतकं केतकीसम्बन्धि रजः तद्योधवारबाणानां रघुभटकञ्चुकानाम् । "कञ्चुको वारबाणोऽस्त्री"त्यमरः । अयत्नपटवासताम् अयत्नसिद्धवस्त्रवासनाद्रव्यत्वमगमत् । "पिष्टातः पटवासकः" इत्यमरः ॥ ५५ ॥

अभ्यभूयतेति । चरतां गच्छतां वाहानां वाजिनाम् । "वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः" इत्यमरः । गात्रशिञ्जितैः गात्रेषु शब्दायमानैः । कर्त्तरि क्तः । सञ्जितैरिति वा पाठः सञ्जतेर्ण्यन्तात्कर्म्मणि क्तः । वर्म्मभिः कवचैः पवनेनोद्धूतानां कम्पितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः । मर्म्मरइति पाठे वाहानां गात्रशिञ्जितैः गात्रध्वनिभिरित्यर्थः । मर्म्मरः मरमरायमाणइति ध्वनेर्विशेषणम् ॥ ५६ ॥

खर्ज्जूरीति । खर्ज्जूरीणां तृणद्रुमविशेषाणाम् । "खर्ज्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः" इत्यमरः । स्कन्धेषु प्रकाण्डेषु । "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरो"रित्यमरः । नद्धानां करिणां मदोद्गारेण मदस्रावेण सुगन्धिषु । गन्धस्येदित्या(५.४.१३५ पा०) दिना इकारः । कटेषु गण्डेषु पुन्नागेभ्यः नागकेशरेभ्यः पुन्नागपुष्पाणि विहाय । ल्यब्लोपे (१.४.३१ वा०) पञ्चमी । शिलीमुखाः अलयः

अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ।
अपरान्तमहीपालव्याजेन रघवे करम्॥५८॥

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम्।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः॥ ५९ ॥

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी॥६०॥

"अलिबाणौ शिलीमुखौ" इत्यमरः। पेतुः। ततोऽपि सौगन्ध्यातिशयादिति भावः॥५७॥

अवकाशमिति। उदन्वानुदधिः रामाय जामदग्न्याय अभ्यर्थितो याचितः सन् अवकाशं स्थानं ददौ किलेति प्रसिद्धौ। रघवे तु अपरान्तमहीपालव्याजेन करं बलिं ददौ। "बलिहस्तांशवः कराः" इत्यमरः। अपरान्तानां समुद्रमध्यदेशवर्त्तित्वात् तैर्दत्ते करे समुद्रदत्तत्वोपचारः। करदानञ्च भीत्या न तु याच्ञयेति रामाद्रघोरुत्कर्षः॥५८॥

मत्तेभेति। तत्र स रघुः मत्तानामिभानां रदनोत्कीर्णानि दन्तचिह्नानि विजयवर्णावलिस्थानानि यस्मिन् तं तथोक्तं त्रिकूटमेव उच्चैर्जयस्तम्भं चकार। गाढप्रकाशस्त्रिकूटोऽद्रिरेवोत्कीर्णवर्णस्तम्भ इव रघोर्जयस्तम्भोऽभूदित्यर्थः॥५९॥

पारसीकानिति। ततः स रघुः संयमी योगी तत्त्वज्ञानेनेन्द्रियाख्यानिन्द्रियनामकान् रिपूनिव पारसीकान् राज्ञो जेतुं स्थलवर्त्मना प्रतस्थे न तु निर्दिष्टेनापि जलपथेन समुद्रयानस्य निषिद्धत्वादिति भावः॥६०॥

यवनीमुखपद्मानां सेहे मधुमदं न सः।
बालातपमिवाब्जानामकालजलदोदयः ॥६१॥
संग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥६२॥
भल्लापवर्ज्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥६३॥

यवनीति। स रघुः यवनीनां यवनस्त्रीणाम्। जातेरस्त्रीविषया टयोपधात् (४, १, ६३ पा०)* इति ङीष्। मुखानि पद्मानीव मुखपद्मानि। (२,१,५६ पा०) उपमितसमासः। तेषां मधुना मद्येन यो मदो मदरागः। कार्य्यकारणभावयोरभेदेन निर्द्देशः। तं न सेहे कमिव अकाले प्रावृड्व्यतिरिक्ते काले जलदोदयः प्रायेण प्रावृषि पद्मविकाशस्यासत्त्वात्। अब्जानां सम्बन्धिनं बालातपमिव अब्जहितत्वादब्जसम्बन्धित्वं सौरातपस्य ॥ ६१ ॥

संग्रामइति। तस्य रघोरश्वसाधनैः वाजिसैन्यैः। "साधनं सिद्धिसैन्ययो"रिति हैमः। पाश्चात्त्यैर्यवनैः सह। दक्षिणापश्चात्पुरसस्त्यक् (४,२,९८ पा०) इति त्यक्। सहार्थे तृतीया। शृङ्गाणां विकाराः शार्ङ्गाणि धनूंषि तेषां कूजितैः शब्दैः। "शार्ङ्गं पुनर्धनुषि शार्ङ्गिणः। जये च शृङ्गरचिते चापेऽप्याह विशेषत"इति केशवः। अथ वा शार्ङ्गैः शृङ्गसम्बन्धिभिः कूजितैः विज्ञेया अनुमेयाः प्रतियोधाः प्रतिभटा यस्मिन् तस्मिन् रजसि तुमुलः संग्रामः सङ्कुलं युद्धमभूत्। "तुमुलं रणसङ्कुल" इत्यमरः ॥ ६२ ॥

भल्लेति। स रघुः भल्लापवर्जितैः बाणविशेषकृत्तैः। "स्नुहीदलफलो भल्ल" इति यादवः। श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः। सिध्मादि-

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम्॥६४
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम्।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ६५॥

भ्यश्च (५, २, ९७ पा०) इति लच्प्रत्ययः। तेषां पाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः "सरघा मधुमक्षिके"त्यमरः। क्षुद्राः सरघाः "क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिके"त्यमरः। क्षुद्राभिः कृतानि क्षौद्राणि मधूनि। "मधु क्षौद्रं माक्षिकादी"त्यमरः। क्षुद्राभ्रमरवटरपादपादञ् (४, ३, ११९पा०) इति संज्ञायामञ्प्रत्ययः। तेषां पटलैः सङ्घैरिव। "पटलं तिलके नेत्ररोगे छदिषि सञ्चये। पिटके परिवारे चे"ति हैमः। महीं तस्तार आच्छादयामास॥ ६३ ॥

अपनीतेति। शेषाः हतावशिष्टाः अपनीतशिरस्त्राणा अपनारितशीर्षण्याः सन्तः। "शीर्षण्यं शीर्षकञ्च शिरस्त्रे" इत्यमरः। शरणागतलक्षणमेतत्। तं रघुं शरणं ययुः. तथाहि महात्मनां संरम्भः कोपः। "संरम्भः सम्भ्रमे कोपे" इति विश्वः। प्रणिपातः प्रणतिरेव प्रतीकारो यस्य सः। महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः॥ ६४ ॥

विनयन्त इति। तस्य रघोर्योधाः भटाः आस्तीर्णान्यजिनरत्नानि चर्मश्रेष्ठानि यासु तासु द्राक्षावलयानां भूमिषु। "मृद्वीका गोस्तनी

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥६६॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कुमकेसरान् ॥६७॥

द्राक्षा स्वाद्वी मधुरसेति च" इत्यमरः । मधुभिर्द्राक्षाप्रभवैर्मद्यैः विजयश्रमं युद्धखेदं विनयन्ते स्म अपनीतवन्तः । "कर्तृस्थे चाशरीरे कर्मणि" (१।३।३७ पा०) इत्यात्मनेपदम् "लट् स्मे" (३।२।११८ पा०) इति भूतार्थे लट् ॥६५॥

तत इति । ततो रघुः भास्वान् सूर्य इव शरैर्बाणैः उस्रैः किरणैरिव । "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः" इत्यमरः । उदीच्यानुदग्भवान् नृपान् रसान् जलानीव उद्धरिष्यन् कौबेरीं कुबेरस्येमां दिशमुदीचीं प्रतस्थे । अत्रैतेनोपमेयेनोपमा तथाह दण्डी "एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधे"ति ॥६६॥

विनीतेति । सिन्धुनाम काश्मीरदेशेषु कश्चिन्नदविशेषः । "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः । सिन्धोस्तीरे विचेष्टनैर्विलुण्ठनैर्विनीतो ध्वश्रमो येषां ते तथोक्ताः तस्य रघोर्वाजिनोऽश्वाः लग्नाः कुङ्कुमकेसराः येषां तान् यद्वा लग्नकुङ्कुमाः केसराः येषां तान् । "अथ कुङ्कुमं काश्मीरजन्म" इत्यमरः । "केसरो नागकेसरे तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे । पुंनागवृक्षे किञ्जल्के च" इति विश्वः । स्कन्धान् भागान् । "स्कन्धः प्रकाण्डे कायांशे विभागेषु समूहे च नृपे व्यूहे च" इति विश्वः । दुधुवुः कम्पयामासुः ॥६७॥

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥६८॥

काम्बोजाः समरे सोढुं तस्य वीर्य्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः ॥६९॥

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोशलेश्वरम् ॥७०॥

तत्रेति । तत्रोदीच्यां दिशि भर्तृषु व्यक्तविक्रमं भर्तृवधेन स्फुटपराक्रममित्यर्थः रघुचेष्टितं रघुव्यापारः हूणाजनपदाख्याः क्षत्रियाः तेषामवरोधा अन्तःपुरस्त्रियः तासां कपोलेषु पाटलस्य पाटलिम्नः ताडनादिजनितारुण्यस्य आदेशि उपदेशकं बभूव । अथवा पाटल आदेशी आदेष्टा यस्य तद्बभूव स्वयं लेख्यायितइत्यर्थः ॥ ६८ ॥

काम्बोजाइति । काम्बोजा राजानः समरे तस्य रघोर्वीर्य्यं प्रभावम् "वीर्य्यं तेजःप्रभावयो"रिति हैमः । सोढुमनीश्वराः अशक्ताः सन्तः गजानामालानं बन्धनम् । भावे ल्युटि विभाषा लीयतेः (६,१,५१ पा०) इत्यात्वम् । तेन परिक्लिष्टैः परिक्षतैरक्षोटैर्वृक्षविशेषैः * सार्द्धमानताः ॥ ६९ ॥

तेषामिति । तेषां काम्बोजानां सदश्वैः भूयिष्ठा बहुलास्तुङ्गा द्रविणानां हिरण्यानाम् । "हिरण्यं द्रविणं द्युम्न"मित्यमरः । राशय उपदा उपायनानि । "उपायनमुपग्राह्यमुपहारस्तथोपदे"त्यमरः । कोशलेश्वरं कोशलदेशाधिपतिं तं रघुं शश्वदसकृत् । "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समा" इत्यमरः । विविशुः तथापि उत्सेका गर्वास्तु न विविशुः सम्पदि गम्भीरत्वात् न गर्वोऽभूदित्यर्थः ॥ ७० ॥

---

* आक्षोटइति लिङ्गे पर्वतीयपीलुवृक्षैः

ततोगौरीगुरुं शैलमारुरोहाश्वसाधनः।
वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥७१॥
शशंस तुल्यसत्वानां सैन्यघोषेऽप्यसम्भ्रमम्।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥७२॥
भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥७३॥

तत इति। ततोऽनन्तरम् अश्वसाधनः सन् गौर्य्यागुरुं पितरं शैलं हिमवन्तम् उद्धूतैरश्वखुरोद्धूतैः धातूनां गैरिकादीनां रेणुभिस्तत्कूटांस्तस्य शृङ्गाणि। "कूटोऽस्त्री शिखरं शृङ्ग" मित्यमरः। वर्द्धयन्निव आरुरोह। उत्पतद्धूलिदर्शनाद्गिरिशिखरवृद्धिभ्रमोऽजायतेति भावः ॥ ७१ ॥

शशंसेति। तुल्यसत्वानां सैन्यैः समानबलानां गुहासु शेरतइति गुहाशयास्तेषाम्। अधिकरणे शेतेः (३,२,१५,पा०) इत्यच्प्रत्ययः। "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इत्यमरः। सिंहानां हरीणाम्। "सिंहो मृगेन्द्रः पञ्चास्यो हर्य्यक्षः केसरी हरि" रित्यमरः। सम्बन्धि परिवृत्य परावृत्यावलोकितं शयित्वैव ग्रीवाभङ्गेणावलोकनं कर्त्तृ सैन्यघोषे सेनाकलकले सम्भ्रमकारणे सत्यपि असम्भ्रमम् अन्तःक्षोभविरहितम् नञः * प्रसज्यप्रतिषेधेऽपि समासइष्यते। शशंस कथयामास। सैन्येभ्य इत्यर्थोलभ्यते। वाङ्मचेष्टितमेव मनोवृत्तेरनुमापकमिति भावः। असम्भ्रमत्वे हेतुः तुल्यसत्वानामिति। न हि समबलः समबलाद्बिभेतीति भावः ॥ ७२ ॥

भूर्जेष्विति। भूर्जेषु भूर्जपत्रेषुः भूर्जपत्रोभुजोभूर्जोमृदुत्वक्

* नञोऽत्यन्ताभावार्थत्वेऽव्ययीभावः, भेदार्थत्वे च तत्पुरुष इति नियमस्य असन्देह इति वृत्तिकारप्रयोगेण व्यभिचारात् भावप्रदर्शनसप्तमीव्याहारेऽत्यन्ताभावपरत्वेऽपि नञ्तत्पुरुषः समासइति।

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः॥७४॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥७५॥

चर्मिका नर्ते"ति यादवः। मर्मरः शुष्कपर्णध्वनिः। "मर्मरः शुष्कपर्णानां" मिति यादवः। अयन्तु गुणादिशब्दवद् गुणिनि वर्त्तते प्रयुज्यते च "मर्मरैरगुरुधूपगन्धिभि" रिति। अतो मर्मरीभूताः मर्मरशब्दवन्तो भूता इत्यर्थः। कीचकानां वेणुविशेषाणां ध्वनिहेतवः श्रोत्रसुखावहा इति भावः। गङ्गाशीकरिणः शीतला इत्यर्थः। मरुतो वाताः मार्गे तं सिषेविरे॥ ७३॥

विशश्रमुरिति। सैनिकाः। सेनायां समवेताः। प्राग्वहतीयः * (४.४,१ पा०) ठक्प्रत्ययः। नमेरूणां सुरपुन्नागानां छायासु निषण्णानां उपविष्टानां मृगाणां कस्तूरीमृगाणां नाभिभिर्वासितोत्सङ्गाः सुरभिततलाः दृषदः शिला अध्यास्याधिष्ठाय। अधिशीङ्स्थासां कर्म (१.४.४६ पा०) इति कर्म। दृषत्सु अधिरुह्येत्यर्थः विशश्रमुर्विश्रान्ताः॥ ७४॥

सरलेति। सरलेषु देवदारुविशेषेषु आसक्तानि यानि मातङ्गानां गजानां ग्रीवासु भवानि ग्रैवेयाणि कण्ठशृङ्खलानि। ग्रीवाभ्योऽण् च (४.३,५७ पा०) इति चकाराड्ढञ्प्रत्ययः। तेषु स्फुरितत्विषः प्रतिफलितभासः ओषधयः ज्वलन्त्यो ज्योतिर्लताविशेषाः नक्तं रात्रौ नेतुर्नायकस्य रघोः अस्नेहदीपिकाः तैलनिरपेक्षाः प्रदीपाः आसन्॥ ७५॥

---

* तद्वहतीत्यतः प्राक् ठगधिक्रियते इत्यर्थकेन प्राग्वहतेष्ठक् इति सूत्रेण सेनाया वा (४.४.४५ पा० समवेतीत्यर्थे सेनाशब्दाट्ठ ण्यः स्यात् पक्षे प्राग्वहतीयात् ठक्।

तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७
शरैरुत्सवसङ्केतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ७८

तस्योत्सृष्टेति । तस्य रघोरुत्सृष्टेषु उज्झितेषु निवासेषु सेनानिवेशेषु कण्ठरज्जुभिः गजग्रैवैः क्षताः निष्पिष्टाः त्वचो येषां ते देवदारवः किरातेभ्यो वनचरेभ्यो गजानां वर्ष्म प्रमाणम् । "वर्ष्म देहप्रमाणयो" रित्यमरः । शशंसुः कथितवन्तः । देवदारुस्कन्धत्वक्क्षतैर्गजानामौन्नत्यमनुमीयत इत्यर्थः ॥ ७६ ॥

तत्रेति । तत्र हिमाद्रौ रघोः पर्व्वते भवैः पर्वतीयैः । पर्वताच्च (४,२,१४३ पा०) इतिछप्रत्ययः । गणैरुत्सवसङ्केताख्यैः सप्तभिः । "गणानुत्सवसङ्केतान्*जयत्सप्त पाण्डवः" इति महाभारते (सभा० २६ अ०)। नाराचानां बाणविशेषाणां क्षेपणीयानां भिन्दिपालानाम् अश्मनाञ्च निष्पेषेण सङ्घर्षेण उत्पतिता अनला यस्मिंस्त‌‍त् तथोक्तम् । "क्षेपणीयोभिन्दिपालः खड्गो दीर्घो महाफल" इति यादवः । घोरं भीमं जन्य युद्धमभूत् । "युद्धमायोधनं जन्य" मित्यमरः ॥ ७७ ॥

शरैरिति । स रघुः शरैर्बाणैरुत्सवसङ्केतान्नाम गणान् विरतोत्सवान् कृत्वा जित्वेत्यर्थः किन्नरान् बाह्वोः स्वभुजयो र्जयोदाहरणं जयख्यापकं प्रबन्धविशेषं गापयामास । गतिबुद्धीत्यादिना (१, ४, ५२ पा०) †किन्नराणां कर्मत्वम् ॥ ७८ ॥

---

*उत्सवः स्त्रीपुंसयोरन्योन्यं प्रीतिरेव सङ्केतो रतार्थं संज्ञाकरणं येषां तान् पशूनिव दाम्पत्यव्यवस्थाशून्यान् दस्युगणानित्यर्थः । तेषाञ्च दस्युत्वं महाभारते तत्रैवोक्तम् । पौरवं तत्र निर्जित्य दस्यून् पर्वतवासिन इति ।

† गायतेः शब्दकर्मकत्वात् अणिकर्तृकिन्नराणां णिचि कर्मत्वम् ।

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ७९
तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥८०॥
चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥८१॥
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथोवर्त्मरजोऽप्यस्य कुतएव पताकिनीम् ॥८२॥

परस्परेणेति । तेषु गणेषु उपायनयुक्ताः पाणयो येषां तेषु सत्सु परस्परेणान्योन्येन राज्ञा हिमवतः सारो धनरूपो विज्ञातः हिमाद्रिणापि राज्ञः सारो बलरूपो विज्ञातः । एतेन तत्रत्यवस्तूनामनर्घत्वं गणानामभूतपूर्वश्च पराजय इति ध्वन्यते ॥ ७९ ॥

तत्रेति । स रघुस्तत्र हिमाद्रौ अक्षोभ्यमधृष्यं यशोराशिं निवेश्य निधाय पौलस्त्येन रावणेन तुलितस्य * चालितस्याद्रेः कैलासस्य ह्रियमादधानो जनयन्निवावरुरोह अवततार कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः । न हि शूराः परेण पराजितमभियुञ्जन्तीति भावः ॥ ८० ॥

चकम्पे इति । तस्मिन् रघौ तीर्णा लौहित्या नाम नदी येन तस्मिंस्तीर्णलौहित्ये सति प्राग्ज्योतिषाणाम् जनपदानामीश्वरः तस्य रघोः गजानामालानतां प्राप्तैः कालागुरुद्रुमैः कृष्णागुरुवृक्षैः सह चकम्पे कम्पितवान् ॥ ८१ ॥

नेति । स प्राग्ज्योतिषेश्वरः रुद्धार्कमावृतसूर्यम् । अधार

*पुरा किल मदर्थं शिवदर्शनार्थं कैलासगमने [illegible] कैलासस्कन्धे [illegible] दशाननेन कैलासाद्रिरुत्तोलित इति पौराणिकी कथानुसन्धेया ।

तमीशः कामरूपाणामत्याखण्डलविक्रमम्।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥८३॥
कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम्।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥८४॥
इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम्।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ॥८५॥

वर्षस्य तद्दुर्द्दिनस्य धारावृष्टिं विना दुर्द्दिनभूतम् अस्य रघोः रथवर्त्म-रजोऽपि न प्रसेहे 'पताकिनी सेनां कुतएव प्रसेहे न कुतोऽपीत्यर्थः ॥ ८२ ॥

तमिति। कामरूपाणां नाम देशानामीशः अत्याखण्डलविक्रमम् अतीन्द्रपराक्रमं तं रघुं भिन्नाः स्रवन्मदाः कटा गण्डाः येषां तैः नागैः गजैः साधनैः भेजे नागान् दत्त्वा शरणं गतइत्यर्थः। कीदृशैर्नागैः यैर-न्यान् रघुव्यतिरिक्तान् नृपानुपरुरोध। शूराणामपि शूरो रघुरिति भावः ॥ ८३ ॥

कामरूपेश्वरइति। कामरूपेश्वरो हेमपीठस्याधिदेवतां तस्य रघोः पादयोश्छायां कनकमयपादपीठव्यापिनीं कान्तिं रत्नान्येव पुष्पाणि तेषामुपहारेण समर्पणेन आनर्च अर्च्चयामास ॥ ८४ ॥

इतीति। जिष्णुर्जयशीलः। ग्लाजिस्थश्च ग्स्नुः (३,२,१३९ पा॰) इति। ग्स्नुप्रत्ययः। स रघुः इति इत्थं दिशोजित्वा रथैरुद्धतं रजः छत्रशून्येषु रघोरेकच्छत्रत्वादिति भावः। राज्ञां मौलिषु किरीटेषु। "मौलिः किरीटे धम्मिल्ले चूड़ाकङ्केलिमूर्धसु" इति हैमः। विश्रामयन् संक्रामयन्नित्यर्थः न्यवर्त्तत निवृत्तः ॥ ८५ ॥

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥८६॥

सत्रान्ते सचिवसखः पुरस्क्रियाभि
र्गुर्वीभिः शमितपराजयव्यलीकान्।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने॥८७॥

स इति। स रघुः सर्वस्वं दक्षिणा यस्य तं सर्वस्वदक्षिणम्। "विश्वजित्सर्वस्वदक्षिण" इति श्रुतेः। विश्वजितं नाम यज्ञम् आजह्रे कृतवानित्यर्थः। युक्तञ्चैतदित्याह सतां साधूनां वारिमुचां मेघानामिव आदानमर्जनं विसर्गाय त्यागाय हि पात्रे विनियोगायेत्यर्थः॥ ८६॥

सत्रान्त इति। काकुत्स्थो रघुः सत्रान्ते यज्ञान्ते। "सत्रमाच्छादने यज्ञे सदादाने वनेऽपि चे"त्यमरः। सचिवानाम् अमात्यानां सखा इति सचिवसखः सन्। "सचिवोऽन्तिकेऽमात्य" इति हैमः। तेषामत्यन्तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः। राजाहःसखिभ्यष्टच् (५. ४, ८४ पा०) इति टच्। गुर्वीभिर्महतीभिः। "गुरुर्महत्याङ्गिरसे पित्रादौ धर्म्मदेशके" इति हैमः। पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा येषां तान्। "दुःखे वैलक्ष्ये व्यलीक"मिति यादवः। चिरविरहेणोत्सुका उत्कण्ठिता अवरोधा अन्तःपुराङ्गना येषां तान् राज्ञोऽपत्यानि राजन्याः क्षत्रियास्तान्। "राजश्वशुराद्यत्" (४, १, १३७ पा०) इत्यपत्ये यत्प्रत्ययः। "मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराड्" इत्यमरः। स्वपुरं प्रति निवृत्तये प्रतिगमनायानुमेने अनुज्ञातवान्॥ ८७॥

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम्।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥८८॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रघुदिग्विजयो नाम चतुर्थः सर्गः।

ते इति। ते राजानो रेखा एव ध्वजाश्च कुलिशानि चातपत्राणि च ध्वजाद्याकाररेखा इत्यर्थः. तानि चिह्नानि यस्य तत्तथोक्तं प्रसादेनैव लभ्यं प्रसादलभ्यं सम्राजः सार्वभौमस्य रघोश्चरणयुगं प्रस्थाने प्रयाणसमये याः प्रणतयो नमस्काराः ताभिः करणैः अङ्गुलीषु, मौलिषु केशबन्धनेषु याः स्रजो माल्यानि ताभ्यः च्युतैर्मकरन्दैः पुष्परसैः "मकरन्दः पुष्परस इत्य"मरः। रेणुभिः परागैश्च। "परागः सुमनोरजः" इत्यमरः। गौरं गौरवर्णं चक्रुः ॥ ८८ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्याया सञ्जीवनीसमाख्यायां चतुर्थः सर्गः।



पञ्चमः सर्गः ।

तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥

तमिति । विश्वजिति विश्वजिन्नाम्नि अध्वरे यज्ञे । "यज्ञः सवोऽध्वरो याग" इत्यमरः । निःशेषं विश्राणितं दत्तम् । श्रण दाने चुरादिः । कोषाणामर्थराशीनां जातं समूहो येन तं तथोक्तम् । "कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययो"रित्यमरः । "जातं जनिसमूहयोरिति" शाश्वतः । एतेन कौत्सस्यानवसरप्राप्तिं सूचयति । तं क्षितीशं रघुम् उपात्तविद्यो लब्धविद्यो वरतन्तोः शिष्यः कौत्सः । ऋष्यन्धकेत्यण् (४, १, ११४ पा०) इञोऽपवादः * । गुरुदक्षिणार्थी पुष्करादिभ्यो देशे (५, २, १३५ पा०) इत्यत्र अर्थाच्चासन्निहिते, तदन्ताच्च । (५, २, १३५ १, २ वा०) इतीनिः । अप्रत्याख्येय इति भावः । प्रपेदे प्राप । अस्मिन् सर्गे वृत्तमुपजातिः । तल्लक्षणन्तु स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इति ॥ १ ॥

* कुत्सशब्दस्याकारान्ततया अत इञ् (४, १, ९५ पा०) इतीञि प्राप्ते ऋष्यन्धकेत्यण्विधानात् अण् ।

स मृण्मये वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥
तमर्चयित्वा विधिवद्विधिज्ञ-
स्तपोधनं मानधनाग्रयायी ।

स इति । अनर्घशीलोऽमूल्यस्वभावः असाधारणस्वभाव इत्यर्थः । "मूल्ये पूजाविधावर्घ" इति "शीलं स्वभावे सद्वृत्ते" इति चामरशाश्वतौ । यशसा कीर्त्या प्रकाशत इति प्रकाशः । पचाद्यच् । अतिथिषु साधुरातिथेयः । पथ्यतिथिवसतिस्वपतेर्ढञ् (४,४,१०४ पा०) इति ढञ् । स रघुः हिरण्यस्य विकारो हिरण्मयम् । दाण्डिनायनादि (६,४,१७४ पा०) सूत्रेण निपातः । वीतहिरण्मयत्वादपगतसुवर्णपात्रत्वात् यज्ञस्य सर्वस्वदक्षिणाकत्वादिति भावः । मृण्मये मृद्विकारे पात्रे अर्घार्थमिदं अर्घ्यम् । पादार्घाभ्यां च (५,४,२५ पा०) इति यत् । पूजार्थं द्रव्यं निधाय श्रूयत इति श्रुतं वेदशास्त्रम् श्रुतेन शास्त्रेण प्रकाशं प्रसिद्धम् । "श्रुतं शास्त्रावधृतयो"रित्यमरः । अतिथिमभ्यागतं कौत्सम् । "अतिथिर्ना गृहागते" इत्यमरः । प्रत्युज्जगाम ॥ २ ॥

तमिति । विधिज्ञः शास्त्रज्ञोऽतएव प्रत्यवायभीरुरित्यर्थः । मानधनानाम् अग्रयायी अग्रेसरः अपयशोभीरुरित्यर्थः । कृत्यवित् कार्य्यज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशाम्पतिर्मनुजेश्वरः । "द्वौ विशौ वैश्यमनुजावि"त्यमरः । विष्टरभाजम् आसनगतम्

विशाम्पतिर्विष्टरभाजमारात्
कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥

अप्यग्रणीर्मन्त्रकृतामृषीणां
कुशाग्रबुद्धे! कुशली गुरुस्ते।
यतस्त्वया ज्ञानमशेषमाप्तं
लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४ ॥

कायेन वाचा मनसापि शश्वत्
यत् सम्भृतं वासवधैर्य्यलोपि।

उपविष्टमित्यर्थः। "विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासन" मित्यमरः। वृक्षासनयोर्विष्टरः (८, ३, ९३ पा०) इति निपातः। तं तपोधनं विधिवच्छास्त्रं यथाशास्त्रमित्यर्थः। तदर्हम् (५,१,११७ पा०) इति वतिप्रत्ययः। अर्चयित्वा आरात् समीपे। "आराद्दूरसमीपयो" रित्यमरः। कृताञ्जलिः सन् इति वक्ष्यमाणप्रकारेणोवाच ॥ ३ ॥

अप्यग्रणीरिति। हे कुशाग्रबुद्धे! सूक्ष्मबुद्धे! "कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमानि" ति हलायुधः। मन्त्रकृतां मन्त्रद्रष्टॄणाम्। सुकर्मपापमन्त्रेति (३, २, ८९ पा०) क्विप्। ऋषीणामग्रणीः श्रेष्ठः ते तव गुरुः कुशली अपि क्षेमवान् किम्। अपि प्रश्ने। "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपी" त्यमरः। यतो यस्माद्गुरोः सकाशात् त्वया अशेषं ज्ञानं लोकेनोष्णरश्मेः सूर्य्यात् चैतन्यं प्रबोध इव आप्तं प्राप्तम् ॥ ४ ॥

कायेनेति। कायेनोपवासादिना कृच्छ्रचान्द्रायणादिना, वाचा वेदपाठेन, मनसा गायत्रीजपादिना, कायेन, वाचा, मनसापि, [illegible]

आपाद्यते न व्ययमन्तरायैः
कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥ ५ ॥

आधारबन्धप्रमुखैः प्रयत्नैः
संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम् ॥ ६ ॥

क्रियानिमित्तेष्वपि वत्सलत्वा-
दभग्नकामा मुनिभिः कुशेषु ।

वासवस्येन्द्रस्य धैर्यं लुम्पतीति वासवधैर्यलोपि स्वपदापहारशङ्काजनकमित्यर्थः । यत्तपः शश्वदसकृत् । "मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः" इत्यमरः । सम्भृतं सञ्चितं महर्षेर्वरतन्तोः त्रिविधं वाङ्मनःकायजं तत्तपः अन्तरायैः विघ्नैरिन्द्रप्रेरिताप्सरोभिः व्ययं नाशं न आपाद्यते कच्चित् नीयते किम् । "कच्चित् कामप्रवेदने" इत्यमरः ॥ ५ ॥

आधारेति । आधारबन्धप्रमुखैरालवालनिर्माणादिभिः प्रयत्नैरुपायैः । "आधारस्त्वालवालेऽम्बुबन्धेऽधिकरणेऽपि च" इति विश्वः । सुतेभ्यो निर्गतो विशेषोऽतिशयो यस्मिन् कर्मणि तत्तथा संवर्धितानां श्रमच्छिदां वः आश्रमपादपानां वाय्वादिः आदिशब्दाद्दावानलादिरुपप्लवो बाधकः न कच्चिन्नास्ति किम् ॥ ६ ॥

क्रियेति । क्रियानिमित्तेष्वपि अनुष्ठानसाधनेष्वपि कुशेषु मुनिभिः वत्सलत्वान्मृगस्नेहाद् अभग्नकामा अप्रतिहतेच्छा तेषां मुनीनाम् अङ्कएव

तदङ्कशय्याच्युतनाभिनाला

कच्चिन्मृगीणामनघा प्रसूतिः ॥ ७ ॥

निर्वर्त्यते यैर्नियमाभिषेको

येभ्यो निवापाञ्जलयः पितॄणाम् ।

तान्युञ्छषष्ठाङ्कितसैकतानि

शिवानि वस्तीर्थजलानि कच्चित् ॥ ८ ॥

शय्यायाम् च्युतानि नाभिनालानि यस्याः सा तथोक्ता मृगीणां प्रसूतिः सन्ततिरनघा अव्यसना कच्चित् अनपायिनी किमित्यर्थः । "दुःखैनोव्यसनेष्वघ"मिति यादवः । ते हि व्यालभयादृषीणामङ्क एव धारयन्ति ॥ ७ ॥

निर्वर्त्यत इति । यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादिः निर्वर्त्यते निष्पाद्यते येभ्यो जलेभ्यः उद्धृत्येति शेषः । पितॄणामग्निष्वात्तादीनां निवापाञ्जलयस्तर्पणाञ्जलयः । "पितृदानं निवापः स्या"दित्यमरः । निर्गलितैरुञ्छानां प्रकीर्णोद्धृतधान्यानां षष्ठैः षष्ठभागैः पालकत्वाद्राजग्राह्यैरङ्कितानि सैकतानि पुलिनानि येषां तानि तथोक्तानि वस्तानि तीर्थजलानि शिवानि भद्राणि कच्चिदनुपप्लवानि किमित्यर्थः । "उञ्छो धान्यांशकादानं कणिशाद्यर्जनं शिल"मिति यादवः । षष्ठाष्टमाभ्यां ञ च (५, ३, ५० पा०) इति षष्ठशब्दाद्भागार्थेऽन्प्रत्ययः । न तस्य पूरणार्थत्वात् पूरणगुणेत्यादिना न षष्ठीसमासप्रतिषेधः । सिकताः सन्त्येषु सन्तीति सैकतानि । सिकताशर्कराभ्यां च (५, २, १०४ पा०) इत्यण्प्रत्ययः ॥ ८ ॥

नीवारपाकादि कडङ्गरीयै
रामृश्यते जानपदैर्न कच्चित्।
कालोपपन्नातिथिकल्प्यभागं
वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥
अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय।

नीवारेति। कालेषु योग्यकालेषु उपपन्नानामागतानामतिथीनां कल्प्या भागा यस्य तत्तथोक्तं वने भवं वन्यं शरीरस्थितेर्जीवितस्य साधनं वो युष्माकम्। पच्यत इति पाकः फलं धान्यमिति यावत् नीवारपाकादि। आदिशब्दाच्छ्यामाकादिधान्यसंग्रहः। जनपदेभ्य आगतैर्जानपदैः। तत आगतः (४, ३, ७४ पा०) इत्यण्। कडङ्गरीयैः कडङ्गरं बुषमर्हन्तीति कडङ्गरीयाः। कडङ्गरो बुषं क्लीवे धान्यत्वचि बुषः पुमानि"त्यमरः। कडङ्गरदक्षिणाच्छ च (५, १, ६९ पा०) इति छप्रत्ययः। तैर्गोमहिषादिभिः नामृश्यते कच्चित् न भक्ष्यते किमित्यर्थः ॥ ९ ॥

अपीति। किञ्च त्वं प्रसन्नेन सता महर्षिणा सम्यग्विनीय शिक्षयित्वा विद्यामुपदिश्येत्यर्थः। गृहाय गृहस्थाश्रमं प्रवेष्टुम्। क्रियार्थोपपदेत्यादिना (२, ३, १४ पा०) चतुर्थी। अनुमतोऽपि अनुज्ञातः किं हि यस्मात् ते तव सर्वेषाम् आश्रमाणां ब्रह्मचर्य्यवानप्रस्थयतीनामुपकारे क्षमं शक्तम्। "क्षमं शक्ते हिते त्रि"ष्वित्यमरः। द्वितीयमाश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुम् अयं कालः। विद्याग्रहणानन्तर्य्यात्तस्येति भावः। कालसमयवेलासु तुमुन् (३, ३, १६७ पा०) इति तुमुन्। सर्व्वोप-

कालो ह्ययं संक्रमितुं द्वितीयं
सर्वोपकारक्षममाश्रमं ते ॥१०॥
तवार्हतो नाभिगमेन तृप्तं
मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा
प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥११॥
इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य ।

कारणमित्यत्र मनुः। "यथा मातरमाश्रित्य सर्वे जीवन्ति जन्त वर्तन्ते गृहिणस्तद्वदाश्रित्येतर आश्रमा" इति ॥ १० ॥

कुशलप्रश्नं विधायागमनप्रयोजनप्रश्नं चिकीर्षुराह तवेति। अर्हतः पूज्यस्य प्रशस्तस्य। "अर्हः प्रशंसायाम्"* (३,२.१३३ पा०) इति शतृप्रत्ययः। तवाभिगमेनागमनमात्रेण मे मनो न तृप्तं न तुष्टं किन्तु नियोगक्रियया आज्ञाकरणेनोत्सुकं सोत्कण्ठम्। "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः। "प्रसितोत्सुकाभ्यां तृतीया च" (२,३.४४ पा०) इति सप्तम्यर्थे तृतीया। शासितुर्गुरोराज्ञया, अपि आत्मना स्वतो वा। "प्रकृत्यादिभ्य उपसंख्यानम्"† (२,३.१८ वा०) इति तृतीया। मां सम्भावयितुं वनात् प्राप्तोऽसि गुर्वर्थं स्वार्थं वागतमित्यर्थः ॥ ११ ॥

इतीति। अर्घ्यपात्रेण मृन्मयेनानुमितो व्ययः सर्वस्वत्यागो यस्य तस्य रघोः इति उत्कृष्टारामुदाराम् औदार्ययुक्तामपि गां वाचं मनोनियोगक्रिययोत्सुकं मे इत्येवंरूपाम्। "गोर्नु पशुवाग्वज्रदिङ्नेत्र

* प्रशंसायां वर्तमानात् अर्हतेः धातोः शतृप्रत्ययः स्यात्।
† प्रकृतिप्रभृतिभ्योऽपि तृतीयानुशासनं कर्तव्यम्।

स्वार्थोपपत्तिं प्रति दुर्ब्बलाश-
स्तमित्यवोचद्वरतन्तुशिष्यः ॥ १२ ॥
सर्व्वत्र नो वार्त्तमवेहि राजन्
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥ १३ ॥

तृणिभूजले। तद्वस्तृष्णा स्त्रियां पुंसि गौ"रित्यमरः। निशम्य श्रुत्वा वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः स्वल्पव्ययपात्रदर्शनाच्छिथिलमनोरथः सन् तं रघुम् इति वक्ष्यमाणप्रकारेणावोचत् ॥ १२ ॥

सर्वत्रेति। हे राजन्! त्वं सर्वत्र नोऽस्माकं वार्त्तं स्वास्थ्यमवेहि जानीहि। "वार्त्तं फल्गुन्यरोगे" चेत्यमरः। "वार्त्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामय"मिति यादवः। न चैतदाश्चर्यमित्याह नाथे इति। त्वयि नाथे ईश्वरे सति प्रजानामशुभं दुःखं कुतः। तथाहि अर्थान्तरं न्यस्यति सूर्य्ये इत्यादिना। सूर्य्ये तपति प्रकाशमाने सति तमिस्रा तमस्ततिः। "तमिस्रं तिमिरे रोगे तमिस्रा तु तमस्ततौ। कृष्णपक्षनिशायां चे"ति विश्वः। तमिस्रमिति पाठे तमिस्रं तिमिरम्। "तमिस्रं तिमिरं तम" इत्यमरः। लोकस्य जनस्य। "लोकस्तु भुवने जने" इत्यमरः। दृष्टेरावरणाय कथं कल्पेत दृष्टिमावरितुं नालमित्यर्थः। कृपेरलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना (२, ३, १६ पा०) चतुर्थी। अलमिति पर्याप्त्यर्थग्रहणमिति भगवान् भाष्यकारः। कल्पेत सम्पद्येतेत्यर्थः क्लृपि * सम्पद्यमाने च (१,४,४४ वा०) चतुर्थीति वक्तव्यात् ॥ १३ ॥

* कृपधातुप्रयोगे सम्पद्यमाने कर्त्तरि चतुर्थी स्यात्।

भक्तिः प्रतीच्येषु कुलोचिता ते
पूर्वान् महाभाग! तयातिशेषे।
व्यतीतकालस्त्वहमभ्युपेत
स्त्वामर्थिभावादिति मे विषादः॥१४॥

शरीरमात्रेण नरेन्द्र! तिष्ठन्
आभासि तीर्थप्रतिपादितर्द्धिः।
आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवारइवावशिष्टः॥१५॥

तथाऽपि तदन्यादिभ्यो दत्तं चिन्तमित्याह [illegible]

भक्तिरिति। प्रतीच्येषु पूज्येषु। "पूज्यः प्रतीच्य" इत्यमरः। भक्तिरनुरागविशेषः ते तव कुलोचिता कुलाभ्यस्ता। "अभ्यस्तेऽप्युचितं न्याय्य"मिति यादवः। हे महाभाग! सार्वभौम! तया भक्त्या पूर्वान् अतिशेषे अतिवर्तसे। किन्तु सर्वस्व [illegible] चेतसि [illegible] [illegible] अस्मिन् [illegible] वर्ततेति। अहं व्यतीतकालोऽतिक्रान्तकालः सन् अर्थिभावात् त्वाम् अभ्युपेत इति मे विषादः॥१४॥

शरीरेति। हे नरेन्द्र! तीर्थे सत्पात्रे प्रतिपादिता सम्यग्दत्ता ऋद्धिर्येन स तथोक्तः। "योनौ जलावतारे च मन्त्र्याद्युपाध्याययोरपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि" इति हलायुधः। शरीरमात्रेण तिष्ठन् आरण्यका अरण्ये भवा मनुष्याः मुनिप्रभृतयः। "अरण्यान्मनुष्ये" (४, २, १२९ वा०) इति वुञ्प्रत्ययः। तैरुपात्ता [illegible] प्रसूतिर्यस्य

स्थाने भवानेकनराधिपः सन्
अकिञ्चनत्वं मखजं व्यनक्ति।
पर्य्यायपीतस्य सुरैर्हिमांशोः
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥१६॥
तदन्यतस्तावदनन्यकार्य्यो
गुर्व्वर्थमाहर्त्तुमहं यतिष्ये।

स' स्तम्बेन काण्डेनावशिष्टः। प्रकृत्यादित्वा (१, ३, १८ वा०) तृतीया। नीवारइवाभासि शोभसे ॥ १५ ॥

स्थाने इति। भवानेकनराधिपः सार्व्वभौमः सन् मखजं मखजन्यं न विद्यते किञ्चन यस्य सोऽकिञ्चनः। मयूरव्यंसकादित्वात् (२, १, ७२ पा०) तत्पुरुषः। तस्य भावः तत्त्वं निर्द्धनत्वं व्यनक्ति प्रकटयति स्थाने युक्तम्। "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। तथाहि सुरैर्देवैः पर्य्यायेण क्रमेण पीतस्य हिमांशोः कलाक्षयो वृद्धेरुपचयात् श्लाघ्यतरो हि वरः खलु। "मणिः शाणालीढ़ः समरविजयी हेतिनिहतो मदक्षीणोनागः शरदि सरितः श्यानपुलिनाः। कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपा इति भावः। अत्र कामन्दकः। "धर्मार्थे क्षीणकोषस्य क्षीणत्वमपि शो"भते। "सुरैः पीतावशेषस्य कृष्णपक्षे विधो"रिवे"ति ॥ १६ ॥

तदिति। ततस्मात्तावत्। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इति विश्वः। अनन्यकार्य्यः प्रयोजनान्तररहितोऽहम् अन्यतोवदान्यान्तरात् गुर्व्वर्थं गुरुधनमाहर्त्तुम् अर्जयितुं यतिष्ये उद्योक्ष्ये ते तुभ्यं स्वस्ति शुभमस्तु। नमःस्वस्तीत्यादिना (२, ३, १६ पा०) चतुर्थी। तथाहि चातकोऽपि "धरणीपतितं तोयं चातकानां रुजाकर"मिति

स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं
शरद्घनं नार्दति चातकोऽपि ॥१७॥

एतावदुक्त्वा प्रतियातुकामं
शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन्! गुरवे प्रदेयं
त्वया कियद्वेति तमन्वयुङ्क्त ॥१८॥

ततो यथावद्विहिताध्वराय
तस्मै स्मयावेशविवर्जिताय ।

[illegible] । निर्गलितम् अम्बु एव गर्भो यस्य तं शरद्घनं नार्दति न याचते । अर्द गतौ याचने चेति धातुः । "याचनार्थे [illegible]" इति [illegible] । १७ ॥

एतावदिति । एतावद्वाक्यमुक्त्वा प्रतियातुं कामो यस्य तं प्रतियातुकामम् । "तुं काममनसोरपि" *(६.३.१०९ भा० का०) मकारलोपः । महर्षेर्वरतन्तोः शिष्यं कौत्सं नृपतिः रघुः निषिध्य निवार्य हे विद्वन्! त्वया गुरवे प्रदेयं वस्तु किं किमात्मकं कियत् किंपरिमाणं वा इति तं कौत्सम् अन्वयुङ्क्त अपृच्छत् । "प्रश्नोऽनुयोगः पृच्छा च" इत्यमरः । १८ ।

तत इति । ततो यथावद्यथार्हम् । "अर्हे वतिः" (५.१.११७ पा०) [illegible] । [illegible]-

* लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि [illegible] । [illegible]

* [illegible] स्यात् ।

११

वर्णाश्रमाणां गुरवे स वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥
समाप्तविद्येन मया महर्षि-
र्विज्ञापितोऽभूद्गुरुदक्षिणायै।
स मे चिरायाऽस्खलितोपचारां
तां भक्तिमेवागणयत् पुरस्तात् ॥२०॥
निर्बन्धसञ्जातरुषार्थकार्श्य-
मचिन्तयित्वा गुरुणाहमुक्तः।

र्जिताय गर्वाभिनिवेशशून्याय अनुद्धतायेत्यर्थः। वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्यादीनाञ्च गुरवे नियामकाय। "वर्णाः स्युर्ब्राह्मणादय" इति। "ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये। आश्रमोऽस्त्री" इति चाऽमरः। सर्वकार्यनिर्वाहकायेत्यर्थः। तस्मै रघवे विचक्षणो विद्वान् वर्णी ब्रह्मचारी। "वर्णिनो ब्रह्मचारिणः" इत्यमरः। वर्णाद् ब्रह्मचारिणि* (५,२,१३४ पा०) इति इनिप्रत्ययः। स कौत्सः प्रस्तुतं प्रकृतम् आचचक्षे ॥ १९ ॥

समाप्तेति। समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै गुरुदक्षिणास्वीकारार्थं विज्ञापितोऽभूत्। स च गुरुश्चिरायाऽस्खलितोपचारां तां दुष्करां मे भक्तिमेव पुरस्तात् प्रथमम् अगणयत् संख्यातवान् भक्त्यैव सन्तुष्टः किं दक्षिणयेत्युक्तवानित्यर्थः। अथवा भक्तिमेव तां दक्षिणाम् अगणयदिति बोध्यम् ॥ २० ॥

निर्बन्धेति। निर्बन्धेन प्रार्थनातिशयेन सञ्जातरुषा सञ्जातक्रोधेन

---

* वर्णशब्दादस्त्यर्थे इनिः स्यात् तदन्तेन ब्रह्मचारिणि वाच्ये।

वित्तस्य विद्यापरिसंख्यया मे
कोटीश्चतस्रो दश चाहरेति ॥२१॥

सोऽहं सपर्याविधिभाजनेन
मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे सम्प्रति नोपरोद्धु
मल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥२२॥

इत्थं द्विजेन द्विजराजकान्ति
रावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं
जगाद भूयो जगदेकनाथः ॥२३॥

गुरुणा मदीयमिदं दारिद्र्यम् अचिन्तयित्वा अविचार्य्य अहं वित्तस्य धनस्य चतस्रो दश च कोटीः चतुर्दशकोटीर्निष्क्रयम् आहर आनयेति विद्यापरिसंख्यया विद्यापरिसंख्यानुसारेणैवोक्तः । अत्र मनुः "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश" इति ॥ २१ ॥

सोऽहमिति । सोऽहं सपर्याविधिभाजनेनार्घ्यपात्रेण भवन्तं प्रभुशब्दः शेषो यस्य तं मत्वा निःस्वं निश्चित्येत्यर्थः श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वादतिमहत्त्वात् संप्रत्युपरोद्धुं निर्बन्धुं नाभ्युत्सहे ॥ २२ ॥

इत्थमिति । द्विजराजकान्तिश्चन्द्रकान्तिः । "द्विजराजः शशाधरो नक्षत्रेशः क्षपाकरः" इत्यमरः । "तस्मात् सोमो राजा नो ब्राह्मणानाम्" इति श्रुतेः । द्विजराजकान्तित्वेनादातृत्वं [illegible]-

गुर्वर्थमर्थी श्रुतपारदृश्वा
रघोः सकाशादनवाप्य कामम्।
गतो वदान्यान्तरमित्ययं मे
मा भूत् परीवादनवावतारः॥२४॥
स त्वं प्रशस्ते महिते मदीये
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे॥

यति। एनसः पापात् निवृत्ता इन्द्रियवृत्तिर्यस्य सः जगदेकनाथो रघुः वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्यम् आवेदितो निवेदितः सन् एनं कौत्सं भूयः पुनर्जगाद॥२३॥

गुर्वर्थमिति। श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा। दृशेः क्वनिप् (३,२,९४, पा०) इति क्वनिप्। गुर्वर्थं गुरुदक्षिणार्थं यथा* तथा अर्थी याचकः। विशेषणद्वयेनापि अस्याऽप्रत्याख्येयत्वमाह। रघोः सकाशात् कामं मनोरथम् अनवाप्याऽप्राप्य वदान्यान्तरं गतः। "स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे" इत्यमरः। इत्येवंरूपः अयं परीवादस्यापवादस्य नवो नूतनः प्रथमोऽवतार आविर्भावो मे मा भूत् माऽस्तु। रघोरिति स्वनामग्रहणं सम्भावितत्वद्योतनार्थम्। तथा च "सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते" इति भावः॥२४॥

स इति। स त्वं महिते पूजिते प्रशस्ते प्रसिद्धे मदीयेऽग्न्यगारे त्रेताग्निशालायां चतुर्थोऽग्निरिव वसन् द्वित्राणि द्वे त्रीणि वा अहानि दिनानि। संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये (२,२,

---

* गुरुदक्षिणार्थस्य कर्मत्वे तद्योगे षष्ठी स्यादित्याशयेन क्रियाविशेषणपरतया व्याख्यायते यथेति

द्वित्राण्यहान्यर्हसि सोढुमर्हन् ।
यावद्यते साधयितुं त्वदर्थम् ॥२५॥

तथेति तस्यावितथं प्रतीतः
प्रत्यग्रहीत् सङ्गरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य
निष्क्रष्टुमर्थं चकमे कुबेरात् ॥२६॥

वसिष्ठमन्त्रोक्षणजात् प्रभावा-
दुदन्वदाकाशमहीधरेषु ।

२४, पा०) इति बहुव्रीहिः । बहुव्रीहौ संख्येये डजबहुगणात् (५.४.७३, पा०) इति डच् । सोढुमर्हसि हे अर्हन्! पूज्य! त्वदर्थं तव प्रयोजनं साधयितुं यावत् यते यतिष्ये । यावत्पुरानिपातयोर्लट् (३.३.४ पा०) इति भविष्यदर्थे लट् ॥ २५ ॥

तथेति । अग्रजन्मा ब्राह्मणः प्रतीतः प्रीतः सन् तस्य रघोः अवितथं सङ्गरं प्रतिज्ञाम् । "अथ प्रतिज्ञाजिसंविदापत्सु सङ्गरः" इत्यमरः । ता [illegible] केचित् पठन्ति । तथेति प्रत्यग्रहीत् । रघुरपि गां भूमिमात्तसारामाहृतधनाम् अवेक्ष्य कुबेरात् [illegible] चकमे इयेष ॥ २६ ॥

वसिष्ठेति । वसिष्ठस्य मन्त्रैः [illegible] अभिमन्त्र्य [illegible] [illegible] उदन्वदाकाशमहीधरेषु उदन्वति [illegible] [illegible] वा [illegible] । [illegible] इति

* [illegible]

मरुत्सखस्येव वलाहकस्य
गतिर्विजघ्ने न हि तद्रथस्य ॥२७॥
अथाधिशिश्ये प्रयतः प्रदोषे
रथं रघुः कल्पितशस्त्रगर्भम्।
सामन्तसम्भावनयैव धीरः
कैलासनाथं तरसा जिगीषुः ॥२८॥
प्रातः प्रयाणाभिमुखाय तस्मै
सविस्मयाः कोषगृहे नियुक्ताः।

बहुव्रीहौ समासान्ताभावात्। ततो वायुसहायस्येति लभ्यते। वारीणां वाहको वलाहकः। (६,३,१०९, पा०) पृषोदरादित्वात्साधुः। तस्येव मेघस्येव तद्रथस्य गतिः सञ्चारो न विजघ्ने न विहता हि यतः ॥ २७ ॥

अथेति। अथ प्रदोषे रजनीमुखे तत्काले यानाधिरोहणविधानात् प्रयतो धीरो रघुः समन्ताद्भवः सामन्तो राजमात्रमिति सम्भावनयैव कैलासनाथं कुबेरं तरसा बलेन जिगीषुः जेतुमिच्छुः सन् कल्पितं सज्जितं शस्त्रं गर्भे यस्य तं रथम् अधिशिश्ये रथे शयितवानित्यर्थः। अधिशीङ्स्थासां कर्म* (१,४,४६, पा०) इति कर्मत्वम् ॥ २८ ॥

प्रातरिति। प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोषगृहे नियुक्ता अधिकृता भाण्डारिकाः सविस्मयाः सन्तः कोषगृहस्य मध्ये नभस्तोनभसः। (४,३,१४ पा०) पञ्चम्यास्तसिल्प्रत्ययः। पतितां हिरण्मयीं सुवर्ण

* अधिपूर्वाणां शीङ्स्थासामाधारः कर्म संज्ञः स्यात्।

हिरण्मयीं कोषगृहस्य मध्ये
वृष्टिं शशंसुः पतितां नभस्तः ॥२९॥

तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम् ॥३०॥

जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्त्वौ ।

मयीम् । "दाण्डिनायन" (६.४.११७ पा०) इत्यादिना निपातनात्साधु. । वृष्टिं शशंसुः कथयामासुः ॥ २९ ॥

तमिति । भूपतिः रघुः अभियास्यमानादभियास्यमानात् कुबेराल्लब्धं वज्रेण कुलिशेन भिन्नं सुमेरोः पादं प्रत्यन्तपर्वतमिव स्थितम् । "पादाः प्रत्यन्तपर्वताः" इत्यमरः । पादं सुमेरोरिवेति क्वचित्पाठः । भासुरं भास्वरम् । "भञ्जभासमिदो घुरच्" (३,२.१६१ पा०) इति घुरच् । हेमराशिं समस्तं कृत्स्नमेव कौत्साय दिदेश ददौ न तु चतुर्दशकोटिमात्रमित्यर्थः ॥ ३० ॥

जनस्येति । साकेतनिवासिनः अयोध्यावासिनः "साकेतः स्यादयोध्यायां कोशला नन्दिनी च सा" इति यादवः । जनस्य अभिनन्द्यसत्त्वौ श्लाघ्यव्यवसायौ अभूताम् । "द्रव्यासु व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । कौ तौ गुरुप्रदेय-

* अत्र हिरण्यशब्दस्य यकारलोपो निपातितः ।

गुरुप्रदेयाधिकनिस्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ॥ २१ ॥
अथोष्ट्रवामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्व्वकायं
सम्प्रस्थितो वाचमुवाच कौत्सः ॥ २२ ॥
किमत्र चित्रं यदि कामसूर्भू
र्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।

दधिकेऽतिरिक्तद्रव्ये निःस्पृहोऽर्थी, अर्थिकामात् अर्थिमनोरथादधिकं प्रददानीति तथोक्तः । प्रे दाज्ञः* (३,२,६, पा०) इति कप्रत्ययः । नृपश्च ॥ २१ ॥

अथेति । अथ प्रीतमना महर्षिः कौत्सः संप्रस्थितः प्रस्थास्यमानः सन् । आशंसायां भूतवच्च (३,३,१३२ पा०) इति भविष्यदर्थे क्तः । उष्ट्राणां क्रमेलकाणां वामीनां वड़वानाञ्च शतैः वाहितार्थं प्रापितधनम् आनतपूर्वकायं विनयनम्रमित्यर्थः प्रजेश्वरं रघुं करेण स्पृशन् वाचमुवाच ॥ २२ ॥

किमिति । वृत्ते स्थितस्य । "न्यायेनार्ज्जनमर्थस्य वर्द्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्" इति कामन्दकः । तस्मिन् वृत्ते स्थितस्य प्रजानामधिपतेर्नृपस्य भूः कामान् सूत इति कामसूर्यदि । सत्सूद्विषद्रुह-(३,२,६१ पा०) इत्यादिना क्विप् । अत्र कामप्रसवने किं चित्रं न चित्रमित्यर्थः । किन्तु तव प्रभावो-

* प्रशब्दे उपपदे दाज्ञाभ्यां कः स्यात् कर्त्तरि वाच्ये ।

अचिन्तनीयस्तु तव प्रभावो
मनीषितं द्यौरपि येन दुग्धा ॥३३॥
आशास्यमन्यत् पुनरुक्तभूतं
श्रेयांसि सर्व्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं
भवन्तमीड्यं भवतः पितेव ॥३४॥
इत्थं प्रयुज्याशिषमग्रजन्मा
राज्ञे प्रतीयाय गुरोः सकाशम् ।

[illegible] अचिन्तनीयः येन प्रभावेन त्वया द्यौरपि मनीषितमभिल-
षितं दुग्धा। दुहेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः। "प्रधानकर्मण्या-
ख्येये लादीनाहुर्द्विकर्मणाम् अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः"
इति वचनात् ॥३३॥

आशास्यमिति। सर्वाणि श्रेयांसि शुभानि अधिजग्मुषः प्राप्त-
वतः ते तव अन्यत् [illegible] आशास्यम् आशीः साध्यम् आशं-
सनीयं वा पुनरुक्तभूतं [illegible] निष्प्रयोजनमित्यर्थः। किन्तु [illegible]
[illegible] पितेव आत्मगुणानुरूपं [illegible] पुत्रं लभस्व
[illegible] ॥३४॥

इत्थमिति। अग्रजन्मा ब्राह्मणः। "अग्रजन्मा द्विजे ज्येष्ठभ्रा-
तरि [illegible]" इति विश्वः। इत्थं राज्ञे आशिषं प्रयुज्य [illegible]
[illegible]
[illegible] इति विश्वः। [illegible]

राजापि लेभे सुतमाशु तस्मा-
दालोकमर्कादिव जीवलोकः ॥३५॥
ब्राह्मे मुहूर्त्ते किल तस्य देवी
कुमारकल्पं सुषुवे कुमारम् ।
अतः पिता ब्रह्मण एव नाम्ना
तमात्मजन्मानमजं चकार ॥३६॥
रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ।

मनिवः चैतन्यमिति पाठे ज्ञानमिव तस्मादवेरतिथेराशु सुतं देवं प्राप ॥ ३५ ॥

ब्राह्म इति । तस्य रघोर्देवी महिषी ब्राह्मे । तस्येदम् (४,३,१२०, पा०) इत्यण् । ब्रह्मदेवताके अभिजिन्नामके मुहूर्त्ते किल ईषदसमाप्तं कुमारं कुमारकल्पं स्कन्दसदृशम् । ईषदसमाप्तौ (५.३.६७. पा०) इत्यादिना कल्पप्प्रत्ययः । कुमारं पुत्रं सुषुवे । "कुमारो बालके स्कन्दे" इति विश्वः । अतो ब्राह्ममुहूर्त्तोत्पन्नत्वात् पिता रघुः ब्रह्मणो विधेरेव नाम्ना तमात्मजन्मानं पुत्रम् अजम् अजनामकं चकार । "अजो हरौ हरे कामे विधौ छागे रघोः सुते" इति विश्वः ॥ ३६ ॥

रूपमिति । ओजस्वि तेजस्वि बलिष्ठं वा । "ओजस्तेजसि धातूनामवष्टम्भप्रकाशयोः" । ओजो बले च दीप्तौ चेति च विश्वः । रूपं वपुः । "अथ रूपं नपुंसकम् । स्वभावाकृतिसौन्दर्य्यवपुषि श्लोक-

न कारणात् स्वाद्बिभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥३७॥
उपात्तविद्यं विधिवद्गुरुभ्य
स्तं यौवनोद्भेदविशेषकान्तम् ।
श्रीः साभिलाषापि गुरोरनुज्ञां
धीरेव कन्या पितुराचकाङ्क्ष ॥३८॥
अथेश्वरेण क्रथकैशिकानां
स्वयंवरार्थं स्वसुरिन्दुमत्याः ।

[illegible]" इति [illegible] । तदेव पैतृकमेव । वीर्यं तदेव नैसर्गिकं स्वाभाविकमुन्नतत्वं तदेव तातसंबन्धि । कुमारो बालकः प्रवर्तित उत्पादितो दीपः प्रदीपात् [illegible] । [illegible] (७.१,१८, ना०) [illegible] । कारणात् [illegible] न बिभिदे भिन्नो नाभूत् सर्वात्मना तातसदृशोऽभूदित्यर्थः ॥३७॥

उपात्तेति । गुरुभ्यो विधिवद्यथाशास्त्रम् उपात्तविद्यं लब्धविद्यम् । [illegible] तं कुमारं [illegible] श्रीः [illegible] । "[illegible]" इति स्मरणात् । [illegible] [illegible] । [illegible] ॥३८॥

अथेति । [illegible]

आप्तः कुमारानयनोत्सुकेन
भोजेन दूतो रघवे विसृष्टः ॥३९॥
तं श्लाघ्यसम्बन्धमसौ विचिन्त्य
दारक्रियायोग्यदशञ्च पुत्रम्।
प्रस्थापयामास ससैन्यमेनं
ऋद्धां विदर्भाधिपराजधानीम् ॥४०॥
तस्योपकार्य्यारचितोपचारा
वन्येतरा जानपदोपदाभिः।

तस्य आनयने उत्सुकेन क्रथकैशिकानां विदर्भदेशानामीश्वरेण स्वामिना भोजेन राज्ञा आप्तो हितो दूतो रघवे विसृष्टः प्रेषितः। क्रियामात्रयोगेऽपि (१,४,३२, वा०) चतुर्थी* ॥ ३९ ॥

तमिति। असौ रघुः भोजं श्लाघ्यसम्बन्धम् अनूचानत्वादिगुणयोगात् स्पृहणीयसम्बन्धं विचिन्त्य विचार्य्य पुत्रञ्च दारक्रियायोग्यदशं विवाहयोग्यवयसं विचिन्त्य ससैन्यमेनं पुत्रम् ऋद्धां समृद्धां विदर्भाधिपस्य भोजस्य राजधानी पुरीं प्रस्थापयामास। धीयतेऽस्यामिति धानी। करणाधिकरणयोश्च (३,३,११७, पा०) इति अधिकरणे ल्युट् प्रत्ययः। राज्ञां धानीति विग्रहः ॥ ४० ॥

तस्येति। उपकार्य्यासु राजयोग्येषु पटभवनादिषु। "सौधोऽस्त्री राजसदनमुपकार्य्योपकारिका" इत्यमरवचनव्याख्याने चीरस्वामी "उपक्रियते उपकरोति वा पटमण्डपादि राजसदनम्" इति। रचिता उपचाराः शयनादयो येषु ते तथोक्ताः जानपदानां जनपदेभ्य

---

* क्रियया यमभिप्रैति सोऽपि सम्प्रदानमिति वार्त्तिक सूत्रेण।

मार्गे निवासा मनुजेन्द्रसूनो-
र्बभूवुरुद्यानविहारकल्पाः ॥ ४१ ॥

स नर्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥ ४२ ॥

[illegible] जानपदानाम् उपदाभिः उपायनैः वन्या वने भवा इतरे येषां ते वन्ये-तराः [illegible] इत्यर्थः । न बहुव्रीहौ (१.१.२९ सा०) इति सर्व-नामसंज्ञानिषेधः । तद्गुणसंविज्ञानबहुव्रीहिः । तस्य मनु-जेन्द्रसूनोः अजस्य मार्गे निवासाः [illegible] [illegible] । "पुमानाक्रीड उद्यानम्" इत्यमरः । [illegible] विहाराः विहारस्थानानि [illegible] इत्यर्थः । ईषदसमाप्तौ (५.३.६७ सा०) इति कल्पप् प्रत्ययः [illegible] ॥ ४१ ॥

स इति । विलङ्घिताध्वा [illegible] सीकरार्द्रैः [illegible] मरुद्भिः [illegible] आनर्तिताः [illegible] नक्तमालाः चिर-बिल्वाः [illegible] । "चिरबिल्वो नक्तमालः करजश्च करञ्जके" इत्यम-रः । [illegible] । नर्मदायाः रोधसि [illegible] रजोभिः धूसराः केतवो [illegible] सैन्यं निवेशयामास ॥ ४२ ॥

* [illegible]

अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः
प्राक्सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्ति
र्वन्यः सरित्तो गज उन्ममज्ज ॥४३॥
निःशेषविक्षालितधातुनापि
वप्रक्रियामृक्षवतस्तटेषु ।

अथेति । अथ उपरिष्टादूर्द्धम् । उपर्य्युपरिष्टाद् (५,३,३१ पा०) इति निपातः । भ्रमद्भिर्मदलोभादिति भावः । भ्रमरैः प्राक् उन्मज्जनात् पूर्वं सूचितो ज्ञापितोऽन्तःसलिले प्रवेशो यस्य स तथोक्तः निर्द्धौतदाने क्षालितमदे अतएवामले गण्डभित्ती यस्य स तथोक्तः । "दानं गजमदे त्यागे" इति शाश्वतः । प्रशस्तौ गण्डौ गण्डभित्ती । प्रशंसावचनैश्च*(२,१,६६,पा०)इति समासः। भित्तिशब्दः प्रशस्तार्थः । तथा च गणरत्नमहोदधौ । "मतल्लिकोद्घमित्राः स्युः प्रकाण्डस्थल-भित्तय" इति । भित्तिः प्रदेशो वा । "भित्तिः प्रदेशे कुड्येऽपि" इति विश्वः । निर्द्धौतदानेन अमला गण्डभित्तिर्यस्येति वा । वन्यो गजः सरित्तोनर्मदाया सकाशात् । पञ्चम्यास्तसिल् (४,३,१४ पा०) प्रत्ययः । उन्ममज्ज उत्थित ॥ ४३ ॥

निःशेषेति । कथम्भूतो गजः । निःशेषविक्षालितधातुनापि धौत गैरिकादिनापि नीलाभिः ऊर्द्ध्वाभिः रेखाभिः तटाभिघातजनिताभिः शबलेन कर्वुरेण । "चित्रं किर्मीरकल्माषशबलैताश्च कर्वुरे" इत्यमरः । अश्मभिः पाषाणैः विकुण्ठितेन कुण्ठीकृतेन दन्तद्वयेन ऋक्ष-

* समानाधिकरणैः प्रशंसावाचकैः सह सुबन्तः समस्यते स कर्मधारयः ।

नीलोर्ध्वरेखाशबलेन शंसन्
दन्तद्वयेनाश्मविकुण्ठितेन ॥४४॥ युग्मम् ॥

संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम् ।
बभौ स भिन्दन् बृहतस्तरङ्गान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः ॥४५॥

शैलोपमः शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात् ।
पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प ॥४६॥

[illegible] तस्य तटेषु वप्रक्रियां वप्रक्रीडाम् उत्खातकेलिभिरित्यर्थः । "उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा निगद्यते" इति शब्दार्णवः । शंसन् कथयन् [illegible] । युग्मम् ॥ ४४ ॥

संहारेति । संहारविक्षेपयोः सङ्कोचप्रसारणयोः लघुक्रियेण क्षिप्रकारिणा । "लघु क्षिप्रम्" इत्यमरः । हस्तेन शुण्डादण्डेन । "हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि" इति विश्वः । [illegible] बृहतस्तरङ्गान् भिन्दन् विदारयन् तीराभिमुखः स गजः [illegible] । "वारी तु गजबन्धनी" इति यादवः । [illegible] प्रवृत्त इव बभौ ॥ ४५ ॥

शैलोपम इति । शैलोपमः स गजः शैवलमञ्जरीणां जालानि [illegible]

तस्यैकनागस्य कपोलभित्त्योर्
जलावगाहक्षणमात्रशान्ता।
वन्येतरानेकपदर्शनेन
पुनर्दिदीपे मददुर्दिनश्रीः ॥४७॥

सप्तच्छदक्षीरकटुप्रवाह
मसह्यमाघ्राय मदं तदीयम्।
विलङ्घिताधोरणतीव्रयत्नाः
सेनागजेन्द्रा विमुखा बभूवुः ॥४८॥

छन्दांसि भरता कर्षन् पश्चात् तटमुत्सर्पन् पूर्वं तेन गजेनोत्पीडितो नुन्नो वारिराशिर्यस्य सः सरित्प्रवाहस्तटमुत्सर्पन् ॥ ४६ ॥

तस्येति। तस्यैकनागस्यैकाकिनो गजस्य कपोलभित्त्योः जलावगाहेन क्षणमात्रं शान्ता निवृत्ता मददुर्दिनश्रीर्मदवर्षलक्ष्मीः वन्येतरेषां ग्राम्याणाम् अनेकपानां द्विपानां दर्शनेन पुनर्दिदीपे ववृधे ॥ ४७ ॥

सप्तच्छदेति। सप्तच्छदस्य वृक्षविशेषस्य क्षीरवत् कटुः सुरभिः प्रवाहः प्रसारो यस्य तम्। "कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्त्तिताः" इति यादवः। असह्यं तदीयं मदमाघ्राय सेनागजेन्द्राः विलङ्घितस्तिरस्कृतः आधोरणानां हस्तिपकानां तीव्रो महान् यत्नो यैस्ते तथोक्ताः। "आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः। विमुखाः पराङ्मुखाः बभूवुः ॥ ४८ ॥

स च्छिन्नबन्धद्रुतयुग्यशून्यं
भग्नाक्षपर्यस्तरथं क्षणेन ।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार ॥४९॥

तमापतन्तं नृपतेरवध्यो
वन्यः करीति श्रुतवान् कुमारः ।
निवर्त्तयिष्यन् विशिखेन कुम्भे
जघान नात्यायतकृष्टशार्ङ्गः ॥५०॥

स इति । स गजः छिन्ना बन्धा येषां ते छिन्नबन्धाः द्रुता [illegible] [illegible] शून्यमिति [illegible] [illegible] यस्मिन् [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । “अक्षो रथस्यावयवे [illegible] [illegible]” इति यादवः । तेषां ते भग्नाक्षाः [illegible] पर्यस्ता [illegible] [illegible] यस्मिन् तं रामाणां स्त्रीणां परित्राणे संरक्षणे विहस्ता [illegible] । “विहस्तव्याकुलौ समौ” इत्यमरः । योधा यस्मिन् तं सेनानिवेशं [illegible] तुमुलं [illegible] चकार ॥ ४९ ॥

तमिति । [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तं गजं निवर्त्तयिष्यन् [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]

* [illegible] ६, ३, ६२, ६३, [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible]

स विद्धमात्रः किल नागरूप
मुत्सृज्य तद्विस्मितसैन्यदृष्टः।
स्फुरत्प्रभामण्डलमध्यवर्त्ति
कान्तं वपुर्व्योमचरं प्रपेदे ॥५१॥

अथ प्रभावोपनतैः कुमारं
कल्पद्रुमोत्थैरवकीर्य्य पुष्पैः।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥५२॥

स्य* सुप्सुपेति (२,१,४,पा०) समासः। कृष्टशार्ङ्गः ईषदाकृष्टचापः सन् विशिखेन बाणेन कुम्भे जघान। अत्र चाहुः "नृपतीकामोयुद्धा-दन्यत्र करिवधं न कुर्यात् इयं हि वीर्यं करिणः" इति। अतएव युद्धादन्यत्रेति द्योतनार्थमेव वन्यग्रहणं कृतम् ॥ ५० ॥

स इति। स गजो विद्धमात्रः ताडितमात्रः किल न तु प्रहृतः तथापि नागरूपं गजशरीरमुत्सृज्य तेन वृत्तान्तेन विस्मितैः तद्विस्मितैः सैन्यैर्दृष्टः सन् स्फुरतः प्रभामण्डलस्य मध्यवर्त्ति कान्तं मनोहरं व्योमचरं वपुः प्रपेदे प्राप ॥ ५१ ॥

अथेति। अथ प्रभावेनोपनतैः प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः कुमारमजमवकीर्य्य अभिवृष्य दशनप्रभाभिः दन्तकान्तिभिः संवर्द्धिताः उरःस्थले ये तारहाराः स्थूलमुक्ताहारास्ते येन स तथोक्तः वाचोऽस्य सन्तीति वाग्मी वक्ता। वाचो ग्मिनिः (५,२,१२४ पा०) इति ग्मिनि। स पुरुषः उवाच ॥ ५२ ॥

मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ।
अवेहि गन्धर्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥५३॥

स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत् ।
उष्णत्वमग्न्यातपसम्प्रयोगात्
शैत्यं हि यत् सा प्रकृतिर्जलस्य ॥५४॥

मतङ्गेति । अवलेपमूलाद्गर्वहेतुकात् । "अवलेपस्तु गर्वे स्या-ल्लेपने दूषणेऽपि च" इति विश्वः । मतङ्गस्य मुनेः शापात् मतङ्गज-त्वमवाप्तवानस्मि मां प्रियदर्शनस्य प्रियदर्शनाख्यस्य गन्धर्वपतेः तनूजं [illegible] । "[illegible]" इत्यमरः । तन्वादेर्वा (४.१.८० वा०) इत्यूङिति केचित् । प्रियंवदं प्रियंवदाख्यम् अवे-हि जानीहि । प्रियं वदतीति प्रियंवदः । [illegible] (३.२.३८ पा०) इति खच् प्रत्ययः ॥५३॥

स इति । स महर्षिश्च प्रणतेन मया पश्चादनुनीतः सन् मृदुता-[illegible] । तथा हि जलस्य उष्णत्वमग्न्यातपसम्प्रयोगात् [illegible] । [illegible] ॥५४॥

[illegible]

[illegible]

इक्ष्वाकुवंशप्रभवो यदा ते
भेत्स्यत्यजः कुम्भमयोमुखेन।
संयोक्ष्यसे स्वेन वपुर्महिम्ना
तदेत्यवोचत् स तपोनिधिर्माम् ॥५५॥

संमोचितः सत्ववता त्वयाहं
शापाच्चिरप्रार्थितदर्शनेन।
प्रतिप्रियं चेद्भवतो न कुर्य्यां
वृथा हि मे स्यात्स्वपदोपलब्धिः ॥५६॥

संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्।

इक्ष्वाक्विति। इक्ष्वाकुवंशः प्रभवो यस्य सः अजो यदा ते कुम्भ-मयोमुखेन लौहाग्रेण शरेण भेत्स्यति विदारयिष्यति तदा स्वेन वपुषो महिम्ना पुनः संयोक्ष्यसे सङ्गंस्यसे इति स तपोनिधिर्माम् अवोचत् ॥ ५५ ॥

संमोचित इति। चिरं प्रार्थितं दर्शनं यस्य तेन सत्ववता बल-वता त्वया अहं शापात् संमोचितः मोक्षं प्रापितः भवत। प्रतिप्रियं प्रत्युपकारं न कुर्य्यां चेत् सेयं स्वपदोपलब्धिः स्वस्थानप्राप्तिः। "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। वृथा स्याद्धि। तदुक्तं "प्रतिकर्त्तुमशक्तस्य जीवितान्मरणं वरम्" इति ॥ ५६ ॥

संमोहनमिति। हे सखे! सखिशब्देन समप्राणतोक्ता। ययो-

गान्धर्वमादत्स्व यतः प्रयोक्तु
र्न चारिहिंसा विजयश्च हस्ते ॥५७॥

अलं ह्रिया मां प्रति यन्मुहूर्तं
दयापरोऽभूः प्रहरन्नपि त्वम् ।
तस्मादुपच्छन्दयति प्रयोज्य
मयि त्वया न प्रतिषेधरौक्ष्यम् ॥५८॥

तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः ।

[illegible] इति । प्रयोगसंहारयोर्विभक्तमन्त्रं गान्धर्वं [illegible] संमोहनं नाम [illegible] ॥ ५७ ॥

[illegible]

[illegible] ॥ ५८ ॥

[illegible]

उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात् ॥ ५९ ॥

एवं तयोरध्वनि दैवयोगा
दासेदुषोः सख्यमचिन्त्यहेतु।
एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्॥ ६० ॥

तं तस्थिवांसं नगरोपकण्ठे
तदागमारूढगुरुप्रहर्षः।

इत्यर्थः। अस्त्रविदस्त्रज्ञः सोऽजस्तस्येति, सोम उद्भवो यस्याः सा तस्याः सोमोद्भवायाः सरितो नर्मदायाः। "रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका" इत्यमरः। पवित्रं पयः उपस्पृश्य पीत्वा आचम्येत्यर्थः। उदङ्मुखः सन् निगृहीतशापात् निवर्त्तितशापात् उपकृतादित्यर्थः। तस्मात् प्रियंवदादस्त्रमन्त्रं जग्राह॥ ५९ ॥

एवमिति। एवमध्वनि मार्गे दैवयोगाद्दैववशात् अचिन्त्यहेतु अनिर्द्धार्य्यहेतुकं सख्यं सखित्वम्। सख्युर्यः (५,१,१२६ पा०) इति यप्रत्ययः। आसेदुषोः प्राप्तवतोस्तयोर्मध्ये एको गन्धर्व्वः चैत्ररथस्य कुवेरोद्यानस्य। "अस्योद्यानं चैत्ररथम्" इत्यमरः। प्रदेशान्, अपरोऽजः सौराज्येन राजन्वत्तया रम्यान् विदर्भान् विदर्भदेशान्, ययौ ॥ ६० ॥

तमिति। नगरस्योपकण्ठे समीपे तस्थिवांसं स्थितं तमजं तस्मा-

प्रत्युज्जगाम क्रथकैशिकेन्द्र-
श्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥ ६१ ॥

प्रवेश्य चैनं पुरमग्रयायी
नीचैस्तथोपाचरदर्पितश्रीः ।
मेने यथा तत्र जनः समेतो
वैदर्भमागन्तुकमजं गृहेशम् ॥ ६२ ॥

तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टां
प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम् ।

[illegible] क्रथकैशि- [illegible] प्रत्युज्जगाम ॥ ६१ ॥

प्रवेश्येति । [illegible] ॥ ६२ ॥

[illegible] ॥ (३,४,७३, [illegible]

रम्यां रघुप्रतिनिधिः स नवोपकार्य्यां
बाल्यात्परामिव दशां मदनोऽध्युवास॥६३॥
तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव॥६४॥

रित्यर्थः । प्रदिष्टां निर्दिष्टां प्राग्द्वारस्य वेद्यां विनिवेशितः प्रतिष्ठापितः पूर्णकुम्भो यस्यास्तां स्थापितमङ्गलकलशामित्यर्थः । रम्यां रमणीयां नवोपकार्य्यां नूतनं राजभवनम् । "उपकार्य्या राजसद्मन्युपचारक्षतेऽन्यवत्" इति विश्वः । मदनो बाल्यात् परां, शैशवादनन्तरां दशामिव यौवनमिवेत्यर्थः अध्युवास अधिष्ठितवान् तत्रोषितवानित्यर्थः । "उपान्वध्याङ्वसः" (१,४,४८ पा०) * इति कर्मत्वम् ॥ ६३ ॥

तत्रेति । तत्रोपकार्य्यायां स्वयम्बरनिमित्तं समाहृतः समानीतो राजलोको येन तत् कमनीयं स्पृहणीयं कन्याललाम कन्यासु श्रेष्ठम् । "ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे । श्रेष्ठभूषासुपुण्ड्रेषु पुच्छचिह्नाश्वलिङ्गेषु" इति यादवः । लिप्सोर्लब्धुमिच्छोः । लभेः सनन्तादुप्रत्ययः । अजस्य भावावबोधे पुरुषस्याभिप्रायपरिज्ञाने कलुषा असमर्था दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव । "राजानं कामिनं चौरं प्रविशन्ति प्रजागराः" इति भावः । अभिमुखीशब्दो ङीषन्तः ङ्यन्तो वा ॥ ६४ ॥

---

* उपादिपूर्व्वस्य वसतेराधारः कर्म्म संज्ञः स्यात् ।

तं कर्णभूषणनिपीडितपीवरांसं
शय्योत्तरच्छदविमर्दकृशाङ्गरागम्।
सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥६५॥

रात्रिर्गता मतिमतां वर ! मुञ्च शय्यां
धात्रा द्विधैव ननु धूर्जगतो विभक्ता।

[illegible] निपीडितौ पीवरौ पीनावंसौ यस्य [illegible] विमर्देन घर्षेण कृशो [illegible] भावः। प्रथितप्रबोधं [illegible] उदारवाचः [illegible] इति वा पाठः। "वैतालिका [illegible]" [illegible]। वाग्भिः [illegible] उषसि प्राबोधयन् प्रबोध- [illegible] ॥ ६५ ॥

[illegible] हे मतिमतां वर ! [illegible] षष्ठी। रात्रिर्गता [illegible] इति। [illegible] इति यादवः। [illegible] विभक्ता ननु [illegible] धुरं [illegible]

यामेकतस्तव बिभर्त्ति गुरुर्विनिद्र

स्तस्या भवानपरधुर्य्यपदावलम्बी॥६६॥

निद्रावशेन भवताप्यनपेक्षमाणा

पर्य्युत्सुकत्वमबला निशि खण्डितेव।

तदवलम्बी सतो विनिद्रो भवेत्यर्थः। धुर्यमवाक्षम् एकोवहतीति भावः॥ ६६॥

निद्रेति। चन्द्रारविन्दराजवदनादयो लक्ष्मीनिवासस्थानानीति प्रसिद्धिमाश्रित्योच्यते। निद्रावशेन निद्राधीनेन त्वयन्तरासक्तोति ध्वन्यते। भवता पर्य्युत्सुकत्वमपि त्वय्यनुरक्तत्वमपीत्यर्थः। प्रसितोत्सुकाभ्यां तृतीया च (२,३,४४, पा०) इति सप्तम्यर्थे तृतीया। अपिशब्दस्तद्विषयानुरागस्यानुपेक्ष्यत्वद्योतनार्थः। निशि खण्डिता भर्त्तुरन्यासङ्गज्ञानकलुषिता अबला नायिकेव। “ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता” इति दशरूपके। अनपेक्षमाणा अविचारयन्ती सती उपेक्षमाणेत्यर्थः लक्ष्मीः येन चन्द्रेण सह त्वदाननसदृशत्वादिति भावः। विनोदयति विनोदं करोति। विनोदशब्दात् तत् करोति तदाचष्टे (३,१,२६, वा०) इति णिच्। सादृश्यदर्शनादयो हि विरहिणां विनोदस्थानानीति भावः। स चन्द्रोऽपि दिगन्तलम्बी पश्चिमाशां गतः सन् अस्तं गच्छन्नित्यर्थः अतएव त्वदाननरुचिं विजहाति तन्मुखसादृश्यं त्यजतीत्यर्थः अतो निद्रां विहाय तां लक्ष्मीमनन्यशरणां परिरक्षाणेति भावः। अथ वा निद्रावशेन भवतानपेक्ष्यमाणा अनिरीक्ष्यमाणा कर्म्मणि शानच्। लक्ष्मीः प्रयोजककर्त्री येन चन्द्रेण प्रयो...ज्येन पर्य्युत्सुकत्वं त्वद्विरहवेदनाम्। “कालाक्षमत्व-

लक्ष्मीं विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥ ६७ ॥

तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ॥ ६८ ॥

वृन्तात् श्लथं हरति पुष्पमनोकहानां
संसृज्यते सरसिजैररुणांशुभिन्नैः ।

[illegible] । विनोदयति [illegible] ॥ ६७ ॥

तद्वल्गुनेति । [illegible] वल्गुना मनोज्ञेन [illegible] ॥ ६८ ॥

वृन्तादिति । [illegible]

स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥६९॥

ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥७०॥

मारुतस्य निश्वासपवनस्य सौरभ्यं तादृक् सौगन्ध्यमित्यर्थः परगुणेनान्यदीयगुणेन साङ्क्रामिकगन्धेनेत्यर्थः ईप्सुराप्तुमिच्छुरिव । आपज्ञप्यृधामीत्* (७,४,५५, पा०) इति ईकारादेशः । अनोकहानां वृक्षाणां श्लथं शिथिलं पुष्पं वृन्तात् पुष्पबन्धनात् । "वृन्तं प्रसवबन्धनम्" इत्यमरः । हरति आदत्ते अरुणांशुभिस्तरणिकिरणोद्बोधितैः सरसि जातैः सरसिजैः कमलैः सह । †तत्पुरुषे कृति बहुलम् (६,२,११, पा०) इति सप्तम्या अलुक् । संसृज्यते सङ्गच्छते । सृजेर्दैवादिकात् कर्त्तरि लट् ॥ ६९ ॥

ताम्रोदरेष्विति । ताम्रोदरेष्वरुणाभ्यन्तरेषु तरुपल्लवेषु पतितं निर्धौत या हारगुलिका मुक्तामणयः तद्वद्विशदं हिमाम्भः लब्धपरभागतया लब्धोत्कर्षतया । "परभागो गुणोत्कर्षे" इति यादवः । अधरोष्ठे

---

* झलादौ सनि परे एषामच ईत् स्यात् अभ्यासलोपश्च ।

† कृदन्ते शब्दे परे सप्तम्या बहुलमलुक् स्यात् तत्पुरुषे समासे ।

यावत् प्रतापनिधिराक्रमते न भानु-
रह्नाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर ! याते
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥७१॥
शय्यां जहत्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।

[illegible]

[illegible] (१.७.४०, [illegible]) [illegible] । [illegible] "[illegible]" [illegible] । [illegible] वीर ! त्वयि [illegible] युद्धेषु । "[illegible]" [illegible] । [illegible]

[illegible]

* [illegible]

येषां विभान्ति तरुणारुणरागयोगात्
भिन्नाद्रिगैरिकतटाइव दन्तकोशाः ॥७२॥
दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष। वनायुदेश्याः।

न्तो नित्यम् (५,२,४४, पा०) इति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत् उभयशब्दस्यैव यथा स्यात् उभयपुत्र इत्यादि भवतीति। मुखरा उत्थानचलनाच्छब्दायमानानि शृङ्खलानि निगड़ानि कर्षन्तीति तथोक्ताः ते तत्र लम्बे रमन्तीति लम्बेरमाः हस्तिनः। *लम्बकर्णयोरमिजपोः (३,२,१३, पा०) इत्यच् प्रत्ययः। हस्तिसूचकयोः ३,२,१३ वा०) इति वक्तव्यात्। तत्पुरुषे कृति बहुलम् ६,३,१४, पा०) सप्तम्या अलुक्। इति "इभः लम्बेरमः पद्मी" इत्यमरः। शय्यां जहति त्यजन्ति। येषां लम्बेरमाणां दन्ताः कोशा इव दन्तकोशाः दन्तकुड्मलाः तरुणारुणरागयोगात् बालार्करुणसम्पर्कोद्धेतो भिन्नाद्रिगैरिकतटा इव विभान्ति धातुरक्ता इव भान्तीत्यर्थः॥ ७२॥

दीर्घेष्विति। हे वनजाक्ष! नीरजाक्ष! "वनं नीरं वनं सलम्" इति शाश्वतः। दीर्घेषु पटमण्डपेषु नियमिताः बद्धाः वनायुदेश्याः वनायुदेशे भवाः। "पारसीका वनायुजाः" इति हलायुधः। अमी वाहाः अश्वा निद्रां विहाय पुरोगतानि लेह्यानि आस्वाद्यानि सैन्धव-

---

* लम्बे उपपदे रमतेः, हस्तिनि अर्थे, कर्णे चोपपदे जपतेः सूचकेऽर्थे अच् स्यात्।

वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥७३॥

भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता
मनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ॥७४॥

इति विरचितवाग्भिर्बन्दिपुत्त्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।

[illegible]

[illegible]

[illegible]

मदपटु निनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥७५॥

अथ विधिमवसाय्य शास्त्रदृष्टं
दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशलविरचितानुकूलवेशः
क्षितिपसमाजमगात् स्वयंवरस्थम् ॥७६॥

शय्याम् । "तल्पं शय्याट्टदारेषु" इत्यमरः । उच्छ्राञ्चकार विससर्ज इजादेश्च गुरुमतोऽनृच्छः* (३,१,३६ पा०) इत्यामुप्रत्ययः । कथमिव, मदेन पटु मधुरं निनदद्भिः राजहंसैः बोधितः सुप्रतीकाख्यः सुरगजः ईशानदिग्गजः गङ्गाया इदं गाङ्गं सैकतं पुलिनमिव। "तोयोत्थितं तत् पुलिनं सैकतं सिकतामयम्" इत्यमरः। सिकताशर्कराभ्या च (५,२,१०४ पा०) इत्यण् प्रत्ययः। सुप्रतीकग्रहणं प्रायशः कैलासवासिनस्तस्य नित्यं गङ्गातटविहारसम्भवादित्यनुसन्धेयम् ॥ ७५ ॥

अथेति। अथोत्थानानन्तरम् अञ्चितानि चारूण्यक्षिपक्ष्माणि यस्य सोऽजः शास्त्रे दृष्टमवगतं दिवसमुखोचितं प्रातःकालोचितं विधिमनुष्ठानम् अवसाय्य समाप्य। स्यतेर्ण्यन्तात् ल्यप्। कुशलैः प्रसाधनदक्षैर्विरचितोऽनुकूलः स्वयंवरोचितो वेशो नेपथ्यं यस्य स तथोक्तः सन् स्वयंवरस्थं क्षितिपसमाजं राजसमूहम् अगात् अगमत्। इणोगा लुङि (२,४,४५, पा०) इति गादेशः। पुष्पिताग्रावृत्तमेतत् तल्लक्षणम् अयुजि न युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा इति ॥ ७६ ॥

---

* ऋच्छभिन्नादिच् पूर्वावयवमाद् गुरुवर्णयुक्ताद् धातोराम्नः स्यात् लिटि परे।

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अजस्वयंवराभिगमनो नाम पञ्चमः सर्गः ॥५॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया रघुवंशव्याख्यया सञ्जीविनीसमाख्यया पञ्चमः सर्गः ॥५॥



षष्ठः सर्गः ।



स तत्र मञ्चेषु मनोज्ञवेषान्
सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्य-
दाकृष्टलीलान्नरलोकपालान् ॥१॥

जाह्नवी मूर्ध्नि पादे वा कालः कण्ठे वपुष्यथ ।
कामारिं कामतातं वा कञ्चिद्देवं भजामहे ॥

स इति । सोऽजः तत्र स्थाने उपचारवत्सु राजोपचारवत्सु मञ्चेषु पर्यङ्केषु सिंहासनस्थान् मनोज्ञवेषान् मनोहरनेपथ्यान् वैमानिकानां विमानैश्चरताम् । *चरति (४,४,८ पा०) इति ठक् प्रत्ययः । मरुताममराणाम् । "मरुतौ पवनामरौ" इत्यमरः । आकृष्टलीलान् गृहीतसौभाग्यान् आकृष्टमरुल्लीलानित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्† (२,१,१ भा०) समासः । नरलोकं पालयन्तीति नरलोकपालाः । कर्मण्यण् (३,२,१ पा०) इत्यण् प्रत्ययः । तान् भूपालान् अपश्यत् । सर्गेऽस्मिन्नुपजातिः छन्दः‡ ॥ १ ॥

---

* तेन चरतीत्यर्थे तृतीयान्तात् ठक् स्यात् ।

† लीलाशब्देन समस्तेन मरुच्छब्दस्यासमस्तस्यान्वयापेक्षणेन सापेक्षत्वं यद्यपि तथापि गमकत्वात् तस्य सम्बन्धिबोधकपरतया व्यासस्येन तुल्यार्थबोधकत्वात् समासः ।

‡ अनन्तरोदितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इत्युक्तलक्षणा इन्द्रवज्रोपेन्द्रवज्रयोः पादद्वययुक्तेहोपजातिः ।

रतेर्गृहीतानुनयेन कामं
प्रत्यर्पितस्वाङ्गमिवेश्वरेण।
काकुत्स्थमालोकयतां नृपाणां
मनो बभूवेन्दुमतीनिराशम्॥२॥

वैदर्भनिर्दिष्टमसौ कुमारः
क्लृप्तेन सोपानपथेन मञ्चम्।
शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥३॥

[illegible]

[illegible]

परार्ध्यवर्णास्तरणोपपन्न-
मासेदिवान् रत्नवदासनं सः ।
भूयिष्ठमासीदुपमेयकान्ति-
र्मयूरपृष्ठाश्रयिणा गुहेन ॥ ४ ॥

तासु श्रिया राजपरम्परासु
प्रभाविशेषोदयदुर्निरीक्ष्यः ।
सहस्रधात्मा व्यरुचद्विभक्तः
पयोमुचां पङ्क्तिषु विद्युतेव ॥ ५ ॥

परार्ध्येति । परार्ध्याः श्रेष्ठाः वर्णाः नीलपीतादयो यस्य तेनास्तरणेन कम्बलादिना उपपन्नं सङ्गतं रत्नवत् रत्नखचितमासनं सिंहासनम् आसेदिवान् अधिष्ठितवान् सोऽजः मयूरपृष्ठाश्रयिणा गुहेन सेनान्या सह । "सेनानीरग्निभूर्गुहः" इत्यमरः । भूयिष्ठमत्यर्थम् उपमेयकान्तिरासीत् । मयूरस्य विचित्ररूपत्वात् तत्साम्यं रत्नासनस्य, तद्द्वारा च तदारूढयोरपीति भावः ॥ ४ ॥

तास्विति । तासु राजपरम्परासु श्रिया लक्ष्म्या कर्त्र्या पयोमुचां मेघानां पङ्क्तिषु विद्युतेव सहस्रधा विभक्तः तरङ्गेषु तरणिरिव स्वयमेक एव प्रत्येकं सङ्क्रामित इत्यर्थः प्रभाविशेषस्योदयेनाविर्भावेन दुर्निरीक्ष्यो दुर्दर्शनः आत्मा श्रियः स्वरूपं व्यरुचत् व्यद्योतिष्ट । द्युद्भ्यो लुङि (१,३,९१, पा०) इति परस्मैपदं द्युतादित्वात् च्लेरङादेशः तस्मिन् समये प्रत्येकं संक्रान्तलक्ष्मीकतया तेषां किल दुरासदं तेजः प्रादुरासीदित्यर्थः ॥ ५ ॥

Printed by Bhuban mohan Bysack and
Harimohan Mookerjea.

पाणिनीयगणपाठे सीकादिभिन्नानां दन्त्यवर्णान्तसादीनामज्वर्णान्तसादीनाञ्च धातूनां षादित्वेन पाठस्ततः प्रयोगकाले तेषां सादित्वं सूत्रानुसारेण भवति इह तु प्रयोगानुसारेण सादितयैव तेषां निर्द्देशः एवं न्रनटादिभिन्नानां नादीनां गणपाठे णादितया पाठः प्रयोगे पुनर्नादिता, तदनुसारेण नादितयैवेह सर्व्वेषां निर्द्देशः कृतः। पाणिन्यागमानुसारेण लड्लिड़ादयोऽन्यक्रमेण तिङः पठिताः आशुबोधे तु सुगमरीत्यवलम्बनेन लड्विधिलिङादयः क्रमेण पठितास्तदनुसारेणैवात्र लट्विधिलिङादिषु रूपं प्रदर्शितम्। गणपाठे भ्वाद्यदादिगणीयानां क्रमशः पाठः इह तु इष्टिसौकर्य्यार्थमभिधानरीत्यनुसारक्रमेण अकारादिहकारान्तवर्णादिकानां यथोत्तरं तत्क्रमेणैव तदुत्तरादिवर्णसन्निवेशवतामेव धातूनां निर्द्देशः। तेषाञ्च अर्थविशेषाः, अर्थभेदे सकर्म्मकत्वाकर्म्मकत्वकथनम्, शप्श्यनादिविकरणसूचकं भ्वाद्यदादिगणीयताकथनं, परस्मैपदादियुक्ततासेट्कत्वानिट्कत्वादिधातुधर्म्मकथनञ्च। कृतान्तु प्रसिद्धानामेव रूपं प्रदर्शितम्। दर्शिता चात्रार्थभेदेनोपसर्गविशेषयोगेन च दिङ्मात्रा पदव्यवस्था। आकारादयो धातूनामनुबन्धा अत्र न दर्शिता कृदभिधाने ते चास्माभिः सप्रयोजनं दर्शयिष्यन्ते इह तु उदाहरणानुसारेण अनुबन्धकार्य्यमात्रं प्रदर्शितम्।

यद्यपि धातुरूपप्रदर्शनं दिङ्मात्रम् अन्यस्मिन् ग्रन्थेऽपि विद्यते तथापि तत्र तत्र ग्रन्थे न सर्व्वधातुरूपज्ञानं सुकरमित्यतः प्रसिद्धधातूनां प्रायशः सर्व्वेषां रूपाणां ज्ञानस्यार्थं च महोपयोगाय भविष्यति। आशास्महे धातुभेदानां प्रत्ययभेदे रूपभेदप्रौव्यनिश्चयाय व्युत्पित्सूनां सर्व्वेषामत्र प्रवृत्तिः साधीयसी स्यादिति।

महता यत्नेनेदं परिशोधितं तथापि यद्यत्र मम किञ्चित् स्खलितं कोऽपि लक्ष्येत तत् प्रशोधनीयम्। एतद्दर्शने च सुधियः सुकुमारमतयश्च तं प्रवर्त्तन्तां सत्येव मम विनयतः प्रार्थना। तेनैव मम श्रमसाफल्यं वेदितव्यं पल्लवितेन शिवमस्तु ओँ तत्सत्।

शुद्धिपत्रम् ।

शुद्धिपत्रं विलोक्येदं शोधयित्वा यथायथम् । द्रष्टव्यमेतद्विद्वद्भिरित्येषा प्रार्थना मम ॥

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
अभूवः	अभूः	२	११
अभूवतम्	अभूतम्	२	१२
अभूवत	अभूत	२	१२
भविषीयस्ताम्	भविषीयास्ताम्	४	१२
भविषीयस्याम्	भविषीयास्याम्	४	१२
भाविताम्हे	भविताम्हे	८	९
माविषीरन्	भाविषीरन्	८	१२
अक्ष्णोति	अक्ष्णोत्	१५	२
आचिता	अचिता	१६	८
आङ्क्थ	आनङ्क्थ	२१	११
अचिंचत्	आचिंचत्	२४	८
वेट्	वेट्	२९	८
कापयुः	आपयुः	३२	९
अजिगयिषीत्	अजिगमिषीत्	३५	१४
जिमिष्यते	जिगमिष्यते	३५	१४
गममिष्यन्	गमयिष्यन्	३६	४
प्रत्यायिता	प्रत्याययिता	३६	५
प्रत्यायितुम्	प्रत्याययितुम्	३६	५
उपेति	उपैति	३६	९
अध्यायायि	अध्यायि	३७	४
अध्यैपाताम्	अध्यैषाताम्	३७	५
चध्येतः	अध्येता	३७	१२
अध्येष्यमानः	अध्येष्यमाणः	३८	१
अध्यापिष्यमपि	अध्यापिष्यमाणोऽपि	३८	२

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
एष्टा	द्रष्टा	२९	२
अध्येगाम्	अध्येषगाम्	२९	५
करवाहै	करवावहै	५३	७
करामहै	करवामहै	५३	७
स्रमाणः	स्रमानः	५५	१२
अकल्पिष्यत्	अकल्पिष्यत	५६	३
क्रष्टा	क्रष्टा-कर्ष्टा	५६	१४
क्रच्यति	क्रच्यति-कर्च्यति	५६	१४
चक्रष्ठ	चक्रष्ठ-चकर्ष्ठ	५६	१४
अक्रच्यत्	अक्रच्यत्-अकर्च्यत्	५६	१४
क्रष्टुम्	क्रष्टुम्-कर्ष्टुम्	५७	२
क्रच्यन्	क्रच्यन् कर्च्यन्	५७	२
क्रच्यमाणः	क्रच्यमाणः-कर्च्यमाणः	५७	३
विकरति	विकिरति	५८	३
क्रामकः	क्रामकः-क्रमकः	५९	५
क्रामी	क्रामी-क्रमी	५९	५

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
क्रामितुम्	क्रमितुम्	५९	६
आत्मने	उत्साहे आत्मने	५९	११
अक्रोधितासे	क्रोधितासे	६२	२।३
क्रुध्वा	क्रुद्ध्वा	६२	५
दिवा०	वा दिवा० पक्षे श्या०	६३	१
क्लाम्यति	क्लाम्यति-क्लामति	६३	२
क्लाम्येत्	क्लाम्येत्-क्लामेत्	६३	२
क्लाम्यतु	क्लाम्यतु-क्लामतु	६३	२
अक्लाम्यत्	अक्लाम्यत्-अक्लामत्	६३	२
अक्लमि	अक्लमि	६३	२
चिक्लेद	चिक्लेद	६३	७
चिक्लेशे	चिक्लिशे	६४	५
प्रकाशय	प्रकाशय	६५	२
चेष्वीष्ट	क्षिप्सीष्ट	६६	५
चिक्षति	चेक्ष्यति	-६६	५
चोभिसीष्ट	चोभिषीष्ट	६७	५।६

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
संचोभ्य	संक्षुभ्य	६७	८
क्षुब्ध्वा	क्षुधित्वा	६७	३
आख्यापि	अख्यापि	६८	७
आख्यस्यमानः	आख्यास्यमानः	६८	१०
धातुर्निर्देशे	धातुनिर्देशे	६८	१३
अगमि	अगमि-अगामि	७१	११
माने	भावे	७२	६
अजिगर्हत्	अजगर्हत्	७२	१०
गाह्निष्यमाण्य	गाहिष्यमाणः	७३	११
गुर्यते	गूर्यते	७५	१२
अगुरि	अगोरि	७५	१२
गुरयति	गोरयति	७५	१२
अघुच्चम	अघुचन्त	७६	३
अगूह्निष्वहि अगूह्वहि	अघुचावहि-अघुह्वहि	७६	३
अघुच्महि	अघुचामहि	७६	३
गुहित्वा	गहित्वा	७६	६

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
अगारीत्	अगार्यीत्	७६	११
ग्रस्तः	ग्रास्तः	७८	१३
घटः	घाटः । णिचः घटः	८०	५
घाटकः घटकः	घाटकः णिचः घटकः	८०	५
चामकः	चमकः आचामकः	८४	४
चामी	चमी आचामी	८४	५
चरिष्णुः	चरिष्णुः	८४	११
चूर्णिः	चूर्त्तिः	८८	५
च्युतन्	च्योतन्	९०	२
चिच्छेदे	चिच्छिदे	९१	५
क्लेशीष्ट	क्लिशीष्ट	९१	५
आजापयिषाताम्	अजापयिषाताम्	९२	११
जृम्भकः	जृम्भकः	९५	१३
जृम्भिता	जृम्भिता	९५	१३
जीर्त्वा	जरित्वा	९६	७
सजित्य	संज्याय	९८	५

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
तंस	तस इदित्	१००	१
अतितंसत्	अततंसत्	१००	२
अतामि	अतमि	१०२	९
कंत	तर्क	१०३	१
तोत्सीष्ट	तत्सीष्ट	१०५	२
तर्च्यन्	तर्च्यन्-तच्च्यन्	१०७	८
तर्च्यमाणः	तर्च्यमाणः तच्च्यमाणः	१०७	८
दभ्नन्	दभ्नुन्	१११	५
संदिव्य	संदीव्य	११४	५
दद्रप्थ	दद्रप्थ-दर्दप्थ	११९	६
द्रप्ता	द्रप्ता-दर्प्ता	११९	६
द्रप्स्यति	द्रप्स्यति-दर्प्स्यति	११९	६
द्रप्ता	द्रप्ता-दर्प्ता	११९	८
द्रप्तुम्	द्रप्तुम्-दर्प्तुम्	११९	९
द्रप्तव्यम्	द्रप्तव्यम्-दर्प्तव्यम्	११९	९
द्रप्स्यन्	द्रप्स्यन्-दर्प्स्यन्	११९	९

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
ददस्वान्	दद्स्वान्	१२०	४
अद्विष्ट	अद्विषत	१२४	२
ख्वादि०	स्वादि०	१२५	८
धुन्वीते	धुनीते	१२६	११
अदुधूनत्	अदूधुनत्	१२७	२
अदुधूपत्	अदूधुपत्	१२७	१०
धरते ति	धरति ते	१२८	७
अनिट्	सेट्	१३०	१
नमः	नामः	१३४	१
प्रार्थने	प्रार्थने पर०	१३५	११
क्षिपति वा	क्षिपत्यर्थे आत्म०	१३८	१
मणोति	मणौति	१३८	१२
अपाठीत्	अपाठीत्-अपठीत्	१४२	६
पलायमानः	पलायमानः पलायन्	१४३	७
कीतत्सु	कृतत्सु	१४४	१
पतनयम्	पतनीयम्	१४४	१

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
प्रणि प्रणिपद्यते	प्र-नि प्रणिपद्यते	१४४	७	तदादि	तनादि	१७६	९
पीडिष्यमाणाय कर्माणि	कर्मणि पीड़िष्यमाणाय	१४८	५	भष्टिः	भंष्टिः	१७८	८
उमयपदी	उभयपदी	१५०	६	आमोदिष्ट	अमोदिष्ट	१८५	१०
अपुपूजत्	अपूपुजत्	१५१	२	मार्य्यम्	मार्य्यम्	१८७	१२
पृन्थः	पुङ्क्थः	१५२	१२	मार्ष्टी	मार्ष्टा-म्रष्टा	१८८	१०
मतम्	प्रोतम्	१५७	४	ममन्थिव	मन्थिव	१८९	१०
उभययोः	उभयोः	१५८	१२	मोचिष्यमाणस्य	मोचिष्यमाणस्य	१९१	१२
दिवादि	अदादि	१६२	८	प्रया॰त्त	प्रयत्तः	१९४	१
अभाजि	अभाजि-अभञ्जि	१६५	२	द्विकर्म्मकः	द्विकर्म्मकः	१९६	७
प्राभञ्जि	प्राभञ्जि-प्राभाजि	१६५	२	यातासि	यवितासि	१९७	२
उपसर्गात्तु	उपसर्गादपि	१६५	२	यियषति	यियविषति	१९७	२।४
हेत्वतुभावान्न	हेत्वभावान्न	१६५	५	युज्यते	युज्यते	१९७	८
सेट्	अनिट्	१७१	२	अयुक्त	अयुक्त	१९७	८
अचभ्रमत्	अविभ्रमत्	१७२	२	अयूयूजत	अयूयुजत्	१९७	९
अर्द्धधातुके	आर्द्धधातुके	१७२	७	युञ्जत	युञ्जीत	१९८	२
भ्रज्यम्	भ्रज्ज्याम्	१७२	६	ध्यमानः	युध्यमानः	१९९	१२

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
अरभत	अरभत	२०१	४
रन्त्वा	रत्वा	२०१	१२
उपरम्य	उपरम्य-उपरत्य	२०१	१२
कर्म्मणि	कर्म्मणि	२०२	५
सक०	द्विक०	२०७	४
अललन्भत्	अललम्भत्	२१०	१२
स्वादि	वादि	२१५	११
वञ्चे	वञ्चे	२२२	५
विदिता	वेदिता	२२६	१
वित्ता	वेत्ता	२२६	१०
वरिष्वन्	वरिष्यन्	२२८	४
वर्त्स्यति	वर्त्स्यति	२२८	९
वृतः वृतिः	वृर्णः वृर्त्तिः	२३०	५
वृत्वा	वृर्त्वा	२३०	६
वृणान् वृणानः	वृणान् वृणानः	२३०	७
स्वा०	स्वा०	२३०	८
जवतुः	जवतुः-जयतुः	२३०	९
जवे	जवे-जये	२३०	१०
समूय	संवाय	२३०	१२
स्वा०	स्वा०	२३२	८
संवीय	संवीय संव्याय एवंपरे:	२३२	१२
इश्विता इष्वा	श्विता	२३३	१२
अशिश्रंसत्	अशश्रंसत्	२३५	६
शान्तिः	शान्तः	२३६	७
अक०	सक०	२३९	३
भावे	कर्मणि	२३९	४
श्चौतयति	श्चोतयति	२४०	७
शुश्रावयिषति	शु(शि)श्रावयिषति	२४२	१४
सिद्धा	सिद्धा	२४८	८
सुषुव	सुषुवे	२४९	१२
स्वादि	अटादि	२५०	१२
सस्विव	सस्वव	२५१	१२

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
स्निधात्	स्नियात्	२५१	१२	स्नेढव्यम्	स्नेढव्यं-स्नेग्धव्यम्	२५८	९
नस्यते	स्नस्यति	२५३	५	स्नीढ्वा	स्नीढ्वा-स्निग्ध्वा	२५८	१०
स्नृन्याणः	स्नुखानः	२५६	१२	सुष्णविव	सुष्णुविव	२५८	१२
व्यमाणः	व्यमाणः	२५६	१२	सर्व्वमानु णः	सर्व्वन्-माणः	२६०	७
जानाति	जानीते	२५७	७	विसुष्वाप	सुष्वाप	२६२	१०
स्नेढा	स्नेढा-स्नेग्धा	२५८	७।९	निह्लवः	निह्नुवः	२६९	१२
स्नीढः	स्नीढः स्निग्धः	२५८	९				

साङ्केतिकशब्दज्ञापनम् ।

भ्वा०	भ्वादिगणीयः	स्वा०	स्वादिगणीयः	क्र्या०	क्र्यादिगणीयः	द्विक०	द्विकर्मकः
अदा०	अदादिगणीयः	तुदा०	तुदादिगणीयः	चु०	चुरादिगणीयः	प०	परस्मैपदी
जुहो०	जुहोत्यादिगणीयः	रुधा०	रुधादिगणीयः	अक०	अकर्मक	आ०	आत्मनेपदी
दिवा०	दिवादिगणीयः	तना०	तनादिगणीयः	सक०	सकर्मकः	उभ०	उभयपदी

त्यक्तव्यानि ।

अभावयि	११	२	आपयि	२२	१२	अच्चामि	६५	४
आङ्कयि	१७	५	आसयि	२५	१	तूर्णिः	१०९	११
आदयि	१९	५	अध्यापयि	२७	८	वा दिवादि० पक्षे	२११	१२
आञ्जयि	२२	८	ऐषयि	२८	११	लस्यति	२११	१२
आर्च्चयि	२४	२	ऐच्चयि	४०	७	लसन्	२१२	१
आर्जयि	२५	७	अकमि	४७	१	विलस्यति	२१२	१
आर्थयि	२६	४	अकमि	४७	२	उल्लस्यति	२१२	२
आर्दयि	२७	२	कल्प्स्यते	५६	२	उविथ उवाथ	२३०	१०
आर्हयि	२८	१	अकल्प्स्यत	५६	२	प्रवेपणीयम्	२३१	४
आवयि	२९	४	कल्प्स्यमानः	५६	६	प्रवप्रणाम्	२३१	४
आशयि	३०	४	उत्साहे	५९	१२	जघ्वादि	२६३	७

धातुरूपादर्शः ।



प्रणम्य परमात्मानं श्रीताराणाथशर्म्मणा ।
वितन्यते धातुरूपादर्श एष प्रयत्नतः ॥
प्रसिद्धधातुरूपाणि दर्श्यन्ते प्रायशो मया ।
ककाराद्युत्तराकारपूर्व्वादिक्रमयोगतः ॥
सकर्म्मकाकर्म्मकत्वे वच्म्योऽहमर्थभेदतः ।
उपसर्गविशेषेण धातोरर्थान्यतां तथा ।
पाणिनीयमतेनैव तिङ्कृत्संज्ञा समाहृता ॥
आशुबोधे तु तत्सूत्राण्युद्धृतानि समासतः ।
सिद्धान्तकौमुदीग्रन्थे तेषां विस्तर ईक्ष्यताम् ॥
तत्र रूपाणि सिद्धानि कथ्यन्तेऽत्राऽल्पमानतः ।

तत्रादौ क्रमलङ्घनात्तस्य प्रसिद्धत्वात् भूधातोरूपं प्रदर्श्यते ।
भूधातुर्विद्यमानतार्थे ऽकर्म्मकः परस्मैपदी प्राप्त्यर्थे सकर्म्मक उभयपदी भ्वादिगणीयः सेट् ।

कर्त्तरि वाच्ये ।

लटि

	परस्मैपदे प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	आत्मनेपदे प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ वचने	भवति	भवसि	भवामि	भवते	भवसे	भवे
२ व०	भवतः	भवथः	भवावः	भवेते	भवेथे	भवावहे
३ व०	भवन्ति	भवथ	भवामः	भवन्ते	भवध्वे	भवामहे

विधिलिङि ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ व०	भवेत्	भवेः	भवेयम्	भवेत	भवेथाः	भवेय
२ व०	भवेताम्	भवेतम्	भवेव	भवेयाताम्	भवेयाथाम्	भवेवहि
३ व०	भवेयुः	भवेत	भवेम	भवेरन्	भवेध्वम्	भवेमहि

परस्मैपदे । लोटि । आत्मनेपदे ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ वचने	भवतु	भव	भवानि	भवताम्	भवस्व	भवै
२ व०	भवताम्	भवतम्	भवाव	भवेताम्	भवेथाम्	भवावहै
३ व०	भवन्तु	भवत	भवाम	भवन्ताम्	भवध्वम्	भवामहै

लङि ।

१ व०	अभवत्	अभवः	अभवम्	अभवत	अभवथाः	अभवे
२ व०	अभवताम्	अभवतम्	अभवाव	अभवेताम्	अभवेथाम्	अभवावहि
३ व०	अभवन्	अभवत	अभवाम	अभवन्त	अभवध्वम्	अभवामहि

लुङि ।

१ व०	अभूत्	अभूः	अभूवम्	अभविष्ट	अभविष्ठाः	अभविषि
२ व०	अभूताम्	अभूतम्	अभूव	अभविषाताम्	अभविषाथाम्	अभविष्वहि
३ व०	अभूवन्	अभूत	अभूम	अभविषत	अभविढ्वम्, अभविध्वम्	अभविष्महि

परस्मैपदे । लिटि । आत्मनेपदे ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ वचने	बभूव	बभूविथ	बभूव	बभूवे	बभूविषे	बभूवे
२ व०	बभूवतुः	बभूवथुः	बभूविव	बभूवाते	बभूवाथे	बभूविवहे
३ व०	बभूवुः	बभूव	बभूविम	बभूविरे	बभूविढ्वे, बभूविध्वे	बभूविमहे

लुटि ।

१ व०	भविता	भवितासि	भवितास्मि	भविता	भवितासे	भविताहे
२ व०	भवितारौ	भवितास्थः	भवितास्वः	भवितारौ	भवितासाथे	भवितास्वहे
३ व०	भवितारः	भवितास्थ	भवितास्मः	भवितारः	भविताध्वे	भवितास्महे

आशीर्लिङि ।

१ व०	भूयात्	भूयाः	भूयासम्	भविषीष्ट	भविषीष्ठाः	भविषीय
२ व०	भूयास्ताम्	भूयास्तम्	भूयास्व	भविषीयास्ताम्	भविषीयास्थाम्	भविषीवहि
३ व०	भूयासुः	भूयास्त	भूयास्म	भविषीरन्	भविषीढ्वम्, भविषीध्वम्	भविषीमहि

परस्मैपदे ।　　　　　लृटि ।　　　　　आत्मनेपदे ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ वचने	भविष्यति	भविष्यसि	भविष्यामि	भविष्यते	भविष्यसे	भविष्ये
२ व०	भविष्यतः	भविष्यथः	भविष्यावः	भविष्येते	भविष्येथे	भविष्यावहे
३ व०	भविष्यन्ति	भविष्यथ	भविष्यामः	भविष्यन्ते	भविष्यध्वे	भविष्यामहे

लृङि ।

१ व०	अभविष्यत्	अभविष्यः	अभविष्यम्	अभविष्यत	अभविष्यथाः	अभविष्ये
२ व०	अभविष्यताम्	अभविष्यतम्	अभविष्याव	अभविष्येताम्	अभविष्येथाम्	अभविष्यावहि
३ व०	अभविष्यन्	अभविष्यत	अभविष्याम	अभविष्यन्ताम्	अभविष्यध्वम्	अभविष्यामहि

प्र-भू ऐश्वर्य्ये अकर्म्मकः । धने प्रभवति धनमीष्टे इत्यर्थः । सम्-भू सम्भवे (निश्चयप्रायविषये अकर्म्मकः । यत्ने विद्या सम्भवति यत्ने सति विद्या प्रायेण निश्चितेत्यर्थः । उत्-भू उत्पत्तौ अक० क्षेत्रात् धान्यमुद्भवति उत्पद्यते इत्यर्थः । प्रति-भू प्रतिरूपभवने अक० । प्रतिभवति प्रतिभूर्भवतीत्यर्थः ।

परा-भू पराभवे (अशक्यतानिश्चयेन निवृत्तौ) अक० । द्दद्मात् पराभवति अशक्यताध्यवसायेन निवर्त्तते इत्यर्थः । पराभवकरणेऽपि तथात्वे तु सकर्म्मकः । रिपून् पराभवति अशक्यताध्यवसायसम्पादनेन निवर्त्तयतीत्यर्थः । अभि-भू अभिभवे (कर्म्माक्षमत्वसम्पादने) सक० । बुद्धिमभिभवति जाड्यम् कर्म्माक्षमां करोतीत्यर्थः । परि-भू तिरस्कारे सक० । खलः परिभवति साधुम् तिरस्करोतीत्यर्थः । अनु-भू अनुभवे (ज्ञानविशेषे) सक० । सुखमनुभवति जानातीत्यर्थः । एष्वर्थेषु परस्मैपदी । रूपाणि प्राग्वत्तानि । किन्तु प्र-परा-परि-अन्तर्-निर्-भू लोटि आनिपि वा णत्वम् प्रभवाणि पराभवाणि परिभवाणि अन्तर्भवाणि निर्भवाणि । पक्षेऽणत्वम् ।

तत्र अकर्म्मकेभ्यो भावे आत्मनेपदस्य एकवचनस्य लडादयः ।

लटि भूयते	विधिलिङि भूयेत	लोटि भूयताम्	लङि अभूयत	लुङि अभावि
लिटि बभूवे	लुटि भाविता, भविता	आशीर्लिङि भाविषीष्ट, भविषीष्ट	लृटि भाविष्यते, भविष्यते	लृङि अभाविष्यत, अभविष्यत

सकर्म्मकेभ्यः कर्म्मणिवाच्ये आत्मनेपदस्थसर्व्ववचनलडादयः स्युः ।

	लटि ।			विधिलिङि ।		
	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ व०	अनुभूयते	अनुभूयसे	अनुभूये	अनुभूयेत	अनुभूयेथाः	अनुभूयेय
२ व०	अनुभूयेते	अनुभूयेथे	अनुभूयावहे	अनुभूयेयाताम्	अनुभूयेयाथाम्	अनुभूयावहि
३ व०	अनुभूयन्ते	अनुभूयध्वे	अनुभूयामहे	अनुभूयेरन्	अनुभूयेध्वम्	अनुभूयामहि

	लोटि ।			लङि ।		
१ व०	अनुभूयताम्	अनुभूयस्व	अनुभूयै	अन्वभूयत	अन्वभूयथाः	अन्वभूये
२ व०	अनुभूयेताम्	अनुभूयेथाम्	अनुभूयावहै	अन्वभूयेताम्	अन्वभूयेथाम्	अन्वभूयावहि
३ व०	अनुभूयन्ताम्	अनुभूयध्वम्	अनुभूयामहै	अन्वभूयन्त	अन्वभूयध्वम्	अन्वभूयामहि

लुङि ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१ व०	अन्वभावि	अन्वभाविष्ठाः, अन्वभविष्ठाः	अन्वभाविषि, अन्वभविषि
२ व०	अन्वभाविषाताम्, अन्वभविषाताम्	अन्वभाविषाथाम्, अन्वभविषाथाम्	अन्वभाविष्वहि, अन्वभविष्वहि
३ व०	अन्वभाविषत, अन्वभविषत	अन्वभाविढ्वम्, अन्वभविढ्वम्, -ध्वम्	अन्वभाविष्महि, अन्वभविष्महि

लिटि ।

प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१व० अनुबभूवे	अनुबभूविषे	अनुबभूवे
२व० अनुबभूवाते	अनुबभूवाथे	अनुबभूविवहे
३व० अनुबभूविरे	अनुबभूविढ्वे, अनुबभूविध्वे	अनुबभूविमहे

लुटि ।

१व० अनु-भाविता, भविता	अनु-भावितासे, भवितासे	अनु-भाविताहे, भविताहे
२व० अनु-भावितारौ, भवितारौ	अनु-भावितासाथे, भवितासाथे	अनु-भावितास्वहे, भवितास्वहे
३व० अनु-भावितारः, भवितारः	अनु-भाविताध्वे, भविताध्वे	अनु-भावितास्महे, भावितास्महे

आशीर्लिङि ।

१व० अनु-भाविषीष्ट, भविषीष्ट	अनु-भाविषीष्ठाः, भविषीष्ठाः	अनु-भाविषीय, भविषीय
२व० अनु-भविषीयास्ताम्, भविषीयास्ताम्	अनु-भाविषीयास्थाम्, भविषीयास्थाम् ।	अनु-भाविषीवहि; भविषीवहि
३व० अनु-भाविषीरन्, भविषीरन्	अनु-भाविषीढ्वम्, भविषीढ्वम्, षीध्वम्	अनु-भाविषीमहि भविषीमहि

लृटि ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१व०	अनु-भाविष्यते, भविष्यते	अनु-भाविष्यसे, भविष्यसे	अनु-भाविष्ये, भविष्ये
२व०	अनु-भाविष्येते, भविष्येते	अनु-भाविष्येथे, भविष्येथे	अनु-भाविष्यावहे, भविष्या ।हे
३व०	अनु-भाविष्यन्ते, भविष्यन्ते	अनु-भाविष्यध्वे, भविष्यध्वे	अनु-भाविष्यामहे, भविष्यामहे

लृङि ।

१व०	अन्व-भाविष्यत, भविष्यत	अन्व-भाविष्यथाः भविष्यथाः	अन्व-भाविष्यम्, भविष्यम्
२व०	अन्व-भाविष्येताम्, भविष्येताम्	अन्व-भाविष्येथाम्, भविष्येथाम्	अन्व-भाविष्यावहि, भविष्यावहि
३व०	अन्व-भाविष्यन्त, भविष्यन्त	अन्व-भाविष्यध्वम् भविष्यध्वम्	अन्व-भाविष्यामहि, भविष्यामहि

णिचि कर्त्तरि उभयपदी ।

	लटि	विधिलिङि	लोटि	लङि
प०	भावयति	भावयेत्	भावयतु	अभावयत्
आ०	भावयते	भावयेत	भावयताम्	अभावयत

लुङि

प्रथमपुरुषे मध्यमपुरुषे उत्तमपुरुषे

प० अबीभवत् अबीभवताम् अबीभवन् । अबीभवः अबीभवतम् अबीभवत । अबीभवम् अबीभवाव अबीभवाम

आ० अबीभवत अबीभवेताम् अबीभवन्त । अबीभवथाः अबीभवेथाम् अबीभवध्वम् । अबीभवे अबीभवावहि अबीभवामहि

लिटि लुटि आशीर्लिङि लृटि लृङि

प० भावयाञ्चकार भावयामास, भावयाम्बभूव । भावयिता । भाव्यात् । भावयिष्यति । अभावयिष्यत्

आ० भावयाञ्चक्रे भावयामास भावयाम्बभूव । भावयिता । भावयिषीष्ट । भावयिष्यते । अभावयिष्यत

कर्मणि वाच्ये

लटि विधौ लोटि लङि लिटि

भाव्यते भाव्येत भाव्यताम् अभाव्यत । भावयाम्बभूवे भावयामासे भावयाञ्चक्रे

लुङि

प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
१व० अभाविं	अभावयि	अभाविष्ठाः	अभावयिष्ठाः।	अभाविषि	अभावयिषि
२व० अभाविषाताम्,	अभावयिषाताम्।	अभाविषाथाम्	अभावयिषाथाम्।	अभाविष्वहि,	अभावयिष्वहि
३व० अभाविषत	अभावयिषत।	अभावि-षिढ्वम्,	अभावयि-षिढ्वम्-षिध्वम्।	अभाविष्महि,	अभावयिष्महि

लुटि	आशीर्लिङि	लृटि	लृङि
भाविता भावयिता।	भाविषीष्ट, भावयिषीष्ट।	भाविष्यते भावयिष्यते।	अभाविष्यत अभावयिष्यत

सनि कर्त्तरि परस्मैपदी।

लटि	विधौ	लोटि	लङि	लुङि
बुभूषति	बुभूषेत्	बुभूषतु	अबुभूषत्	अबुभूषीत्

लिटि	लुटि	आशीर्लिङि	लृटि	लृङि
बुभूषाम्बभूव बुभूषामास बुभूषाञ्चकार	बुभूषिता	बुभूष्यात्	बुभूषिष्यति	अबुभूषिष्यत्

यङि आत्मनेपदी ।

लटि	विधौ	लोटि	लङि	लुङि
बोभूयते	बोभूयेत	बोभूयताम्	अबोभूयत	अबोभूयिष्ट
लिटि	लुटि	आशीर्लिङि	लृटि	लृङि
बोभूयाम्बभूव बोभूयामास बोभूयाञ्चक्रे	बोभूयिता	बोभूयिषीष्ट	बोभूयिष्यते	अबोभूयिष्यत

भूधातुश्चुरादिगणीयः शोधने चिन्तायाञ्च उभयपदी ण्यन्तभूधातुवद्रूपाणि लभते। औषधं भावयति शोधयतीत्यर्थः। देवं भावयति चिन्तयतीत्यर्थः।

कृत्सु।

कर्त्तरि अच् भवः संसारः। अनीयर् भावे भवनीयम्। प्र-भिन्नोपसर्गात् अच् पराभवः विभवः अभिभवः परिभवः सम्भवः उद्भवः। प्र—घञ् प्रभावः अपादाने तु भवः महादेवः। प्रभवः कारणम्। इन् प्रभवी। इष्णुच् प्रभविष्णुः—प्रभावयुक्तः। क्त—भूतः प्रभूतः अभिभूतः। क्तवतु भूतवान्। क्तिन् भूतिः अनुभूतिः संभूतिः। क्त्वा—भूत्वा। क्यप् ब्रह्मभूयम् देवभूयम्। क्विप् भूः

आत्मभूः स्वयम्भूः । खल् दुर्भवं सुभवम् । खिष्णु प्रियम्भविष्णुः, आढ्यम्भविष्णुः । खुकञ्—प्रियम्भावुकः । डु— विभुः प्रभुः शम्भुः । णिन् भावी । ण भावः पदार्थः अन्यत्र अच्-भवः । णमुल् भावंभावम् । ण्वुल् भावकः परिभावकः । तव्य—भवितव्यः । तृच् भविता ॥ कर्त्तरि य—भव्यः । ल्यप् परिभूय अभिभूय । ल्युट् भवनम् । शतृ—भवन् ॥ शान—अनुभूयमानः । स्यतृ भविष्यन् । स्यमान—भविष्यमाणः कर्म्मणि अनु-भाविष्यमाणः अनुभविष्यमाणः ।

णिजन्तस्य ।

अनीयर्—भावनीयम् विभावनीयम् । क्त भावितः क्तवतु भावितवान् । क्तिन्नान्ति तत्र युच् भावना । क्त्वा भावयित्वा । तव्य भावयितव्यः । तृच् भावयिता । य भाव्यम् विभाव्यम् । ल्यप् विभाव्य अभिभाव्य । ल्युट् भावनम् । शतृ भावयन् शान भाव्यमानः । स्यतृ भावयिष्यन् । स्यमान—भावयिष्यमाणः कर्म्मणि भाविष्यमाणः भावयिष्यमाणः ।

सनन्तस्य ।

अनीयर् बुभूषणीयम् । उ—बुभूषुः । क्त बुभूषितः । क्तवतु बुभूषितवान् । क्तिन्नास्ति अ-बुभूषा । क्त्वा बुभूषित्वा । तव्य बुभूषितव्यम् । तृच् बुभूषिता । य बुभूष्यम् । ल्यप् परिबुभूष्य । ल्युट् बुभूषणम् । शतृ बुभूषन् । स्यतृ बुभूषिष्यन् । स्यमान बुभूषिष्यमाणः ।

अथाकारादिपूर्व्वक्रमेण धातुरूपाणि प्रदर्श्यन्ते।

अच व्याप्तौ भ्वादिगणीयः परस्मैपदी वेट्कः सकर्म्मकः।

कर्त्तरि वाच्ये।

लटि

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१व०	अच्णोति-अचति	अच्णोषि-अचसि	अच्णोमि-अचामि
२व०	अच्णुतः-अचतः	अच्णुथः-अचथः	अच्णुवः-अचावः
३व०	अच्णुवन्ति,-अचन्ति	अच्णुथ-अचथ	अच्णुमः-अचामः

विधिलिङि।

१व०	अच्णुयात्-अचेत	अच्णुयाः-अचेः	अच्णुयाम्-अचेयम्
२व०	अच्णुयाताम्-अचेताम्	अच्णुयातम्-अचेतम्,	अच्णुयाव-अचेव
३व०	अच्णुयुः-अचेयुः	अच्णुयात-अचेत	अच्णुयाम-अचेम

लोटि ।

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
१य०	अक्ष्णोति-अक्षतु	अक्ष्णुहि-अक्ष	अक्ष्णवानि-अक्षाणि
२व०	अक्ष्णुताम्-अक्षताम्	अक्ष्णुतम्-अक्षतम्	अक्ष्णवाव-अक्षाव
३न०	अक्ष्णुवन्ति-अक्षन्ति	अक्ष्णुत-अक्षत	अक्ष्णवाम-अक्षाम

लङि

१व०	आक्ष्णोत्-आक्षत्	आक्ष्णोः-आक्षः	आक्ष्णवम्-आक्षम्
२व०	आक्ष्णुताम्-आक्षताम्	आक्ष्णुतम्-आक्षतम्	आक्ष्णुव-आक्षाव
२व०	आक्ष्णुवन्-आक्षन्	आक्ष्णुत-आक्षत	आक्ष्णुम-आक्षाम

लुङि

१व०	आक्षीत्-आक्षीत्	आक्षीः-आक्षीः	आक्षिषम्-आक्षम्
२व०	आक्षिष्टाम्-आष्टाम्	आक्षिष्टम्-आष्टम्	आक्षिष्व-आक्ष्व
३व०	आक्षिषुः-आक्षुः	आक्षिष्ट-आष्ट	आक्षिष्म-आक्ष्म

	लिटि प्रथमपुरुषे	लिटि मध्यमपुरुषे	लिटि उत्तमपुरुषे	लुटि प्रथमपुरुषे	आशीर्लिङि । प्रथमपुरुषे
१व०	आनच्च	आनच्चिथ-आनष्ठ	आनच्च	अच्चिता-अष्टा	अच्च्यात्
२व०	आनच्चतुः	आनच्चथुः	आनच्चिव-आनच्च्व	अच्चितारौ-अष्टारौ	अच्च्यास्ताम्
३व०	आनच्चुः	आनच्च	आनच्चिम-आनच्म	अच्चितारः-अष्टारः	अच्च्यासुः

लृटि लृङि कर्म्मणि वाच्ये लड़ादिषु

अच्चिष्यति अच्च्यति । आच्चिष्यत् आच्च्यत् । अच्च्यते । अच्च्येत । अच्च्यताम् । आच्च्यत ।
लुङि आच्चि आच्चिषातामाच्चातान् आच्चिषत आच्चत । लिड़ादौ आनच्चे । आच्चिता । अष्टा ।
अच्चिषीष्ट अच्चीष्ट । अच्चिष्यते अच्च्यते । आच्चिष्यत आच्च्यत ।

कृत्सु

तृच् अच्चिता अष्टा । क्त अष्टः । क्तिन् अष्टिः व्यष्टिः समष्टिः । घञ् अच्चः । क्त्वा अच्चित्वा अष्ट्वा । शतृ अच्णुवन् अच्चन् । शान अच्च्यमाणः । स्यतृ अच्चिष्यन् अच्च्यन् । स्यमान अच्चिष्यमाणः अच्च्यमाणः ।

अङ्कधातुः लक्षणे (चिह्नीकरणे) सक० अदन्तचुरादिः उभयपदी सेट् ।

कर्त्तरि अङ्कयति अङ्कयते। अङ्कयेत् अङ्कयेत। अङ्कयतु अङ्कयताम्। आङ्कयत् आङ्कयत। आञ्चिकत् आञ्चिकत। अङ्कयाम्-बभूव-आस-चकार-चक्रे। अङ्कयिता २। अङ्क्यात् अङ्कयिषीष्ट। अङ्कयिष्यति अङ्कयिष्यते। आङ्कयिष्यत् आङ्कयिष्यत। मतान्तरे अङ्कापयति। आञ्चिकपत्।

३ कर्म्मणि वाच्ये। अङ्क्यते। अङ्क्येत। अङ्क्यताम्। आङ्क्यत। आङ्कि आङ्कयि, आङ्किषाताम् आङ्कयिषाताम्, आङ्किषत आङ्कयिषत। अङ्कयाम्-बभूवे-आसे-चक्रे। अङ्किता अङ्कयिता। अङ्किषीष्ट अङ्कयिषीष्ट। अङ्किष्यते अङ्कयिष्यते। आङ्किष्यत आङ्कयिष्यत।

कृत्सु। अङ्कनीयः। अङ्कयिता अङ्कितः क्तिन् नास्ति युच् अङ्कना। अङ्कः। अङ्कयितव्यः। अङ्क्यः। अङ्कयितुम्। अङ्कयित्वा। समङ्क्य। अङ्कनम्। अङ्कयन् अङ्कयमानः कर्म्मणि अङ्क्यमानः। अङ्कयिष्यन् अङ्कयिष्यमाणः कर्म्मणि अङ्किष्यमाणः अङ्कयिष्यमाणः।

अद भक्षणे अदादि अनिट् सकर्म्मकः परस्मैपदी ।

	लटि			विधौ	लोटि	लङि			लुङि
१व०	अत्ति	अत्सि	अद्मि ।	अद्यात् ।	अत्तु ।	आदत्	आदः	आदम् ।	अघसत्
२व०	अत्तः	अत्थः	अद्वः ।	अद्याताम् ।	अत्ताम् ।	आत्ताम्	आत्तम्	आद्व ।	अघसताम्
३व०	अदन्ति	अत्थ	अद्मः ।	अद्युः ।	अदन्तु ।	आदन्	आत्त	आद्म ।	अघसन्

लिटि

जघास आद, जघसिथ आदिथ, जघास आद
जक्षतुः आदतुः, जक्षथुः आदथुः, जक्षिव आदिव
जक्षुः आदुः, जक्ष आद, जक्षिम आदिम

लुटि	आशिषि	लृटि	लृङि
अत्ता ।	अद्यात् ।	अत्स्यति ।	आत्स्यत् ।

कर्म्मणि । अद्यते । अद्येत । अद्यताम् । आद्यत । अघासि अघत्साताम् अघत्सत । जक्षे आदे ।
अत्ता । अत्सीष्ट । अत्स्यते । आत्स्यत ।

क्त्वा । अदनीयम् । आदी । आदकः अन्नादः । अत्ता । जग्धम् ओदने अन्नम् । जग्धिः ।

जग्ध्वा । अदनम् । घञ् घासः । अदन् अद्यमानः । क्वसु जक्षिवान् आदिवान् । कान जक्षाणः आदानः । अत्स्यन् अत्स्यमानः । क्विप् क्रव्यात् ।

णिच् कर्त्तरि आत्मनेपदं नास्ति । आदयति । आदिदत् । आदयाम्-बभूव आस-चकार । आदयिता । आद्यात् । आदयिष्यति । आदयिष्यत् ।

कर्म्मणि । आद्यते । आदि-आदयि आदिषाताम् आदयिषाताम् । आदयाम् बभूवे-आसे-चक्रे । आदिता आदयिता । आदिषीष्ट आदयिषीष्ट । आदिष्यते आदयिष्यते । इत्यादि ।

कृत् । आदनीयम् । आदयिता । आदकः । आदना । आदितः आदयितुम् । आदयितव्यम् । आदयित्वा । समाद्य । आदयन् आद्यमानः । आदयिष्यन् कर्म्मणि आदिष्यमाणः आदयिष्यमाणः ।

सनि कर्त्तरि । जिघत्सति । अजिघत्सीत् । जिघत्साम्-बभूव-आस-चकार ।

कर्म्मणि । जिघत्स्यते । अजिघत्सीत् । कृत् जिघत्सनीयम् । जिघत्सिता । जिघत्सा जिघत्सुः ।

अन जीवने अदादिः परस्मैपदी अकर्म्मकः सेट् ।

१७० अनिति अनिषि अनिमि । अन्यात् । अनितु । अनिहि अनानि । आनीत् आनीः ।

२व० अनितः अनिथः अनिवः । अन्यातास् । अनितास् अनितम् अनाव । आनितास् आनितम् ।
३व० अनन्ति अनिथ अनिमः । अन्युः । अनन्तु अनित अनाम । आनन् आनित ।
आनीत् आनिष्टाम् आनिषुः । आन आनतुः आनुः । अनिता । अन्यात् । अनिष्यति आनिष्यत् ।
भावे अन्यते । आनि । णिचि आनयति । आनिनत् । सनि अनिनिषति ।
क्तत्सु । अननीयम् । अनिता अननम् । अनितः । अनन् अनिष्यन् ।

अन्च पूजने गतौ च भ्वादिगणीयः परस्मैपदी सक० सेट् ।

अञ्चति । अञ्चेत् । अञ्चतु । आञ्चत् । आञ्चीत् आञ्चिष्टाम् आञ्चिषुः । आनञ्च आनञ्चतुः आनञ्चुः ।
अञ्चिता । अञ्च्यात् । अञ्चिष्यति । आञ्चिष्यत् । गत्यर्थस्य तु । आनचतुः । अच्यात् इत्यादि
किति भेदः ।

कर्म्मणि वाच्ये । अञ्च्यते । अञ्च्येत । अञ्च्यताम् । आञ्च्यत । आञ्चि आञ्चिषातास् आञ्चिषत । आनञ्चे ।
अञ्चिता । अञ्चिषीष्ट । अञ्चिष्यते । आञ्चिष्यत । गत्यर्थस्य तु नलोपे अच्यते अच्येत इत्यादि ।
क्तत्सु । अञ्चनीयम् । अञ्चितः अञ्चितवान् । अञ्चनम् । अञ्चिता । अञ्चितुम् । अञ्चित्वा अङ्क्त्वा ।
अञ्चन् । कर्म्मणि अञ्च्यमानः । अञ्चिष्यन् अञ्चिष्यमाणः । गत्यर्थस्य तु अक्तः । अक्तिः । अक्त्वा ।
अच्यमान इत्यादि ।

अन्ज म्रक्षणे रुधादिगणीयः सकर्म्म० वेट्कः पर० ।

	लटि			विधिलिङि ।		
१ व०	अनक्ति	अनक्षि	अनज्मि ।	अञ्ज्यात्	अञ्ज्याः	अञ्ज्याम्
२ व०	अङ्क्तः	अङ्क्थः	अञ्ज्वः ।	अञ्ज्याताम्	अञ्ज्यातम्	अञ्ज्याव
३ व०	अञ्जन्ति	अङ्क्थ	अञ्ज्मः ।	अञ्ज्युः	अञ्ज्यात	अञ्ज्याम

	लोटि			लङि		
१ व०	अनक्तु	अङ्ग्धि	अनजानि ।	आनक्	आनक्	आनजम्
२ व०	अङ्क्ताम्	अङ्क्तम्	अनजाव ।	आङ्क्ताम्	आङ्क्तम्	आञ्ज्व
३ व०	अञ्जन्तु	अङ्क्त	अनजाम ।	आञ्जन्	आङ्क्त	आञ्ज्म

लुङि आञ्जीत् आञ्जिष्टाम् आञ्जिषुः आञ्जीः आञ्जिष्टम् आञ्जिष्ट आञ्जिषम् आञ्जिष्व आञ्जिष्म ।
लिटि आनञ्ज, आनञ्जतुः आजतुः, आनञ्जुः आजुः, आनञ्जिथ आङ्क्थ, आनञ्जथुः आजथुः,
आनञ्ज आज, आनञ्ज आनञ्जिव आजिव आनञ्ज्व आज्व, आनञ्जिम आजिम आनञ्ज्म आज्म ।
लुडादौ अञ्जिता अङ्क्ता । अज्यात् । अञ्जिष्यति अङ्क्ष्यति । आञ्जिष्यत् आङ्क्ष्यत् ।
कर्म्मणि अज्यते । अज्येत । अज्यताम् । आज्यत । आञ्जि आञ्जिषाताम् आङ्क्षाताम् । आनञ्जे

आजे। अञ्जिता अङ्क्ता। अञ्जिषीष्ट अङ्क्षीष्ट। अञ्जिष्यते अङ्क्ष्यते। आञ्जिष्यत आङ्क्ष्यत।
वि—पूर्व्वस्तु प्रकाशने कर्त्तरि व्यनक्ति। कर्म्मणि व्यज्यते।
क्तत्सु। अञ्जनीयम् व्यङ्ग्यः। व्यञ्जकः। व्यञ्जिता व्यङ्क्ता। व्यक्तः। अञ्जितुम् अङ्क्तुम्।
अञ्जितव्यः अङ्क्तव्यः। अञ्जित्वा अङ्क्त्वा। व्यक्तिः। अञ्जनम् व्यञ्जनम्। अञ्जन् व्यज्यमानः।
अञ्जिष्यन् अङ्क्ष्यन्। अञ्जिष्यमाणः अङ्क्ष्यमाणः।
णिचि कर्त्तरि। व्यञ्जयति-ते। आञ्जिजत्-त। व्यञ्जयाम्-बभूव-आस-चकार-चक्रे। अञ्जयिता।
अञ्ज्यात् अञ्जयिषीष्ट। अञ्जयिष्यति-ते। आञ्जयिष्यत्-त।
कर्म्मणि। व्यञ्ज्यते। आञ्जि आञ्जयि। अञ्जयाम् बभूवे-आसे-चक्रे। अञ्जिषीष्ट अञ्जयिषीष्ट।
अञ्जिष्यते अञ्जयिष्यते। आञ्जिष्यत आञ्जयिष्यत।
क्तत्सु। व्यञ्जयितव्यः। व्यञ्जयिता। व्यञ्जितः। व्यञ्जना। व्यञ्जयन् व्यञ्जयमानः। कर्म्मणि व्यञ्ज्यमानः।
व्यञ्जयिष्यन्। व्यञ्जयिष्यमाणः। कर्म्मणि व्यञ्जिष्यमाणः व्यञ्जयिष्यमाणः।
सनि। अञ्जिजिषति। आञ्जिजिषीत्। अञ्जिजिषाम् बभूव-आस-चकार। अञ्जिजिषिता। अञ्जिजिष्यात्
अञ्जिजिषिष्यति। आञ्जिजिषिष्यत्।
कर्म्मणि व्यञ्जिजिष्यते। आञ्जिजिषि। क्तत्सु। अञ्जिजिषा अञ्जिजिषुः।

अय गतौ भ्वा॰ सकर्म्म॰ आत्मनेपदी सेट् ।

कर्त्तरि—अयते । अयेत । अयताम् । आयत । आयिष्ट आयिढ्वम् आयिध्वम् । अयाम् बभूव-आस-चक्रे । अयिता । अयिषीष्ट अयिषीढ्वम् अयिषीध्वम् । अयिष्यते । आयिष्यत ।

कर्म्मणि—अय्यते । आयि । अयाम् बभूवे-आसे-चक्रे । लुङादौ कर्त्तरीव रूपाणि ।

परा—अपसरणे अक॰ पलायते । पलायिष्ट । णिचि । आययति-ते । आयियत्-त । आययाम् बभूव-आस-चकार-चक्रे । आययिता । आय्यात् आययिषीष्ट । आययिष्यति-ते । इत्यादि ।

कृत्सु—अयनीयम् । अयिता । अयितः पलायितः । पलायितुम् । पलायनम् । अयित्वा पलाय्य । पलायमानः । पलायिष्यमाणः ।

अर्च्च पूजने भ्वा॰ सकर्म्म॰ परस्मैपदी सेट् ।

कर्त्तरि—अर्चति । अर्चेत् । अर्चतु । आर्चत् । आर्चीत् । आनर्च । अर्चिता । अर्च्यात् । अर्चिष्यति आर्चिष्यत् ।

कर्म्मणि—अर्च्यते । अर्च्येत । अर्च्यताम् । आर्च्यत । आर्चि आर्चिषाताम् । आनर्चे । अर्चिता । अर्चिषीष्ट । अर्चिष्यते । आर्चिष्यत ।

णिचि। अर्च्चयति-ते। आर्च्चिचत्-त। अर्च्चयाम् बभूव-आस-चकार-चक्रे। अर्च्चयिता। अर्च्यात्
अर्च्चयिषीष्ट। अर्च्चयिष्यति-ते। आर्च्चयिष्यत्-त।
कर्म्मणि। अर्च्यते। आर्च्चि आर्च्चयि। अर्च्चयाम् बभूवे-आसे-चक्रे। अर्च्चिता अर्च्चयिता। अर्च्चिषीष्ट
अर्च्चयिषीष्ट। सनि। अर्च्चिचिषति। आर्च्चिचिषीत्।
क्तस्तु। अर्च्चकः अर्च्ची। अर्च्चितः। क्तिन् नास्ति अर्च्चा। अर्च्चनम् अर्च्चितुम्। अर्च्चित्वा।
अर्च्चितव्यः। अर्च्यः। समर्च्य। अर्च्चन् अर्च्यमानः। अर्च्चिष्यन् अर्च्चिष्यमाणः।

अर्च्च पूजने चुरा० उभ० सक० सेट्॥

कर्त्तरि। अर्च्चयति-ते। अर्च्चयेत्-त। अर्च्चयतु-ताम्। आर्च्चयत्-त। आर्च्चिचत्-त। अर्च्चयां-बभूव-आस-चकार-चक्रे। अर्च्चयिता। अर्च्यात् अर्च्चयिषीष्ट। अर्च्चयिष्यति-ते। आर्च्चयिष्यत्-त॥
कर्म्मणि ण्यन्तभ्वादिगणीयार्च्चवत्।
सनि अर्च्चिचयिषति-ते। आर्च्चिचयिषीत्-षिष्ट। क्तस्तु अर्च्चिचयिषा अर्च्चिचयिषुः।

यदन्तस्यास्य चुरादिगणीयस्य च कृत्सु। अर्च्चनीयम्। अर्च्चकः अर्च्ची। अर्च्चयिता। अर्च्चितः। क्तिन्नास्ति अर्च्चना। अर्च्चनम्। अर्च्चयितुम् अर्च्चयितव्यम्। अर्च्यः। अर्च्चयित्वा। समर्च्य। अर्च्चयन् अर्च्चयमानः। अर्च्यमानः। अर्च्चयिष्यन् अर्च्चयिष्यमाणः कर्म्मणि अर्च्चिष्यमाणोऽपि।

अर्ज्ज उपार्ज्जने अदन्तचुरादि उभय० सक० सेट्।

कर्त्तरि। अर्ज्जयति-ते। अर्ज्जयेत्-त। अर्ज्जयतु-ताम्। आर्ज्जयत्-त। आर्ज्जिजत्-त। अर्ज्जयाम्-बभूव-आस-चकार-चक्रे। अर्ज्जयिता। अर्ज्ज्यात् अर्ज्जयिषीष्ट। अर्ज्जयिष्यति-ते। आर्ज्जयिष्यत्-त।

कर्म्मणि। अर्ज्यते। आर्ज्जि आर्ज्जयि। अर्ज्जयाम्-बभूवे आसे-चक्रे। अर्ज्जिता अर्ज्जयिता। अर्ज्जिषीष्ट अर्ज्जयिषीष्ट। अर्ज्जिष्यते अर्ज्जयिष्यते। आर्ज्जिष्यत आर्ज्जयिष्यत।

सनि। अर्ज्जिजयिषति-ते। आर्ज्जिजयि-षीत्-षिष्ट।

कृत्सु। अर्ज्जनीयम्। अर्ज्जकः। अर्ज्जयिता। अर्ज्जितः। क्तिन्नास्ति युच् अर्ज्जना। अर्ज्जयितुम्। अर्ज्जयितव्यः। अर्ज्यः। अर्ज्जयित्वा उपार्ज्ज्य। अर्ज्जयन् अर्ज्जयमानः। अर्ज्यमानः। अर्ज्जयिष्यन् अर्ज्जयिष्यमाणः। कर्म्मणि अर्ज्जिष्यमाणोऽपि।

अधि इङ् अध्ययने द्वि० अदन्तापुनादि० आत्म० अनिट् ।

कर्तरि । अधीयते । अधीयेत । अधीयताम् । अध्यैयत । अध्यैगीत । अधीयाम्-चक्रे-आस-बभूव ।
अध्येता । अध्येषीष्ट । अध्येष्यते । अध्यैष्यत ।

कर्मणि । अधीयते । अध्यायि अध्यगायि । अधीयाम्-चक्रे-आसे-बभूवे । अध्येता अध्यायिता । अध्येषीष्ट
अध्यायिषीष्ट । अध्येष्यते अध्यायिष्यते । अध्यैष्यत अध्यायिष्यत । णिजन्तादौ अध्यापयते । कर्मणि ।
अध्याप्यते । अध्यापिपद्विषोधकः अध्यापिपत् अधीयाल्हात् णिजन्ताः । तेन तस्य स्वाश्रयपठिता ।
अधि-सम्मानने अभ्यर्थयते सम्मानयतीत्यर्थः ।

कृत्सु । अध्ययनीयम् । अध्येता अध्येयिता । अधीतः । जिगांसा सन् अधीना । अधीनम् । अधीषि-
तुम् । अध्येतव्यः अध्येयः । अधीयित्वा । प्राध्य । अधीयमानः । अध्येमानः । अध्येष्यमाणः
कर्मणि अधीयमानोऽपि ।

अर्द पीडायाम् भ्वा० पीडाजनने सक० याचने द्वि० भ्वादि० पर० सेट् ।

कर्तरि । अर्दति । अर्देत् । अर्दतु । आर्दत् । आर्दीत् । आनर्द । अर्दिता । अर्द्यात् । अर्दि-
ष्यति । आर्दिष्यत् ।

कर्म्मणि । अर्द्यते । आर्दि आर्दिषाताम् । आनर्द्दे । अर्दिता । अर्दिषीष्ट । अर्दिष्यते । आर्दिष्यत ।

णिचि । अर्दयति-ते । आर्दिदत्-त । अर्दयाम्-बभूव-आस-चकार-चक्रे । अर्दयिता । अर्द्यात् अर्दयिषीष्ट । अर्दयिष्यति-ते । आर्दयिष्यत्-त । कर्म्मणि । अर्द्यते । आर्दि आर्दयि । अर्दयाम्-बभूवे आसे-चक्रे । अर्दिता अर्दयिता । अर्दिषीष्ट अर्दयिषीष्ट । अर्दिष्यते अर्दयिष्यते । आर्दिष्यत आर्दयिष्यत ।

सनि । अर्दिदिषति । आर्दिदिषीत् । अभिपूर्व्वः सामीप्यप्राप्तौ अक० अभ्यर्दति समीपं यातीत्यर्थः । कृत्सु । अर्दनीयम् । अर्दनम् । अर्दकः । अर्दिता । अर्दितः । अभेस्तु अभ्यर्णः । क्तिन्नास्ति अ-यर्दा । अर्दितुम् । अर्दित्वा । अर्दः । समर्द्य । अर्दन् । अर्दमानः । अर्दिष्यन् अर्दिष्यमाणः । णिजन्तस्य तु अर्दयिता । अर्दना । अर्दयितुम् । अर्दयितव्यः अर्दयित्वा । अर्दयन् अर्दयमानः अर्दयिष्यन् अर्दयिष्यमाणः कर्म्मणि अर्दिष्यमाणोऽपि इति भेदः ।

अर्ह पूजायां सकर्म्मकः चुरा० उभय० सेट् ।

अर्हयति-ते । आर्जिहत्-त । अर्हयतु-ताम् । आर्हयत्-त । आर्जिहत्-त । अर्हयाम्-बभूव आस-चकार-चक्रे । अर्हयितार । अर्ह्यात् अर्हयिषीष्ट । अर्हयिष्यति-ते । आर्हयिष्यत्-त ।

कर्म्मणि । अर्ह्यते । अर्ह्येत । अर्ह्यताम् । आर्ह्यत । आर्हि आर्हयि । अर्हयाम्-बभूवे आसे--चक्रे । अर्हिता अर्हयिता । अर्हिषीष्ट अर्हयिषीष्ट । अर्हिष्यते अर्हयिष्यते । आर्हिष्यत आर्हयिष्यत ।

कृत्सु । अर्हणीयम् अर्हणम् । अर्हकः अर्हयिता । अर्हितः । क्तिन्नास्ति युच् अर्हणा । अर्हयितुम् । अर्हयित्वा अर्ह्यः । अर्हयन् अर्हयमाणः । अर्हयिष्यन् अर्हयिष्यमाणः । कर्म्मणि अर्हिष्यमाणश्च ।

अर्ह पूजायां भ्वादि० सकर्म्मकः योग्यतायामकर्म्मकः पर० सेट् ।

अर्हति । अर्हेत् । अर्हतु । आर्हत् । आर्हीत् । आनर्ह । अर्हिता । अर्ह्यात् । अर्हिष्यति । आर्हिष्यत् । कर्म्मणि । अर्ह्यते । अर्ह्येत । अर्ह्यताम् । आर्ह्यत । आर्हि । आनर्हे । अर्हिता । अर्हिषीष्ट । अर्हिष्यते । आर्हिष्यत ।

कृत्सु । अर्हणीयम् अर्हणम् । अर्हकः अर्हिता । अर्हितः क्तिन्नास्ति अ अर्हा । अर्हित्वा । अर्हितव्यम् । अर्ह्यः । अर्हन् कर्म्मण्यपि पूजार्थे अर्हन् । अर्ह्यमाणः अर्हिष्यन् अर्हिष्यमाणः ।

अव रक्षणे सक० प्रीतावकर्म्म० भ्वादि० पर० सेट् ।

कर्त्तरि । अवति । अवेत् । अवतु । आवत् । आवीत् । आव । अविता । अव्यात् । अविष्यति । आविष्यत्

कर्म्मणि । अव्यते । आवि । आवे । अविता । अविषीष्ट । अविष्यते । आविष्यत ।
णिचि कर्त्तरि आवयति-ते । आविवत्-त । आवयाम्-बभूव आस-चकार-चक्रे । आवयिता ।
आव्यात् आवयिषीष्ट । आवयिष्यति-ते । आवयिष्यत्-त ।
कर्म्मणि । आव्यते । आवि आवयि । आवयाम्-बभूवे आसे-चक्रे । आविता आवयिता । आविषीष्ट-
आवयिषीष्ट । आविष्यते आवयिष्यते । आविष्यत आवयिष्यत ।
क्तम् । अवनीयम् । अवनम् आवकः अविता । अवितः । अवितुम् । क्विप् ऊः । क्तिन् ऊतिः ।
अवित्वा अवन् । अव्यमानः । अविष्यन् अविष्यमाणः ।

अश व्याप्तौ सक० स्वादि० आत्मनेप० सेट् ।

कर्त्तरि । लटि अश्नुते अश्नुवाते अश्नुवते । विधौ अश्नुवीत अश्नुवीयाताम् अश्नुवीरन् । लोटि
अश्नुताम् अश्नुवाताम् अश्नुवताम् । लङि आश्नुत आश्नुवाताम् आश्नुवत । लुङि आशिष्ट
आक्षाताम् आशिषाताम् आक्षाताम् आशिषत आक्षत । लिटि आनशे आनशाते आनशिरे ।
लुङादौ अशिता अष्टा । अशिषीष्ट अक्षीष्ट । अशिष्यते अक्ष्यते । आशिष्यत आक्ष्यत ।

कर्म्मणि । अश्यते । अश्येत । अश्यताम् । आश्यत । आशि आशिषाताम् आशाताम् । लिङादौ २०
कर्त्तरीव रूपाणि ।

णिचि । आत्मनेपदं नास्ति आशयति । आशिशत् । आशयाम्-बभूव आस-चकार । आशयिता ।
आश्यात् । आशयिष्यति । आशयिष्यत् । कर्म्मणि । आश्यते । आशि आशयि । आशयाम्
बभूवे-आसे-चक्रे । आशिता आशयिता । आशिषीष्ट आशयिषीष्ट । आशिष्यते आशयिष्यते ।
कृत्सु । अशनीयम् अशनम् । आशकः । आशी अशिता अष्टा । अष्टः । अष्टिः । अशितुम् अष्टा ।
अशित्वा अष्ट्वा । अपाश्य । अश्नुवानः । अशिष्यमाणः अक्ष्यमाणः । ण्यन्तस्य आशयिता ।
आशयितव्यः । आशयितुम् आशना ।
सनि । अशिशिषते । अशिशिषिष्ट । कृत्सु अशिशिषा अशिशिषुः ।

अश भोजने क्र्यादि० पर० सेट् सक० ।

अश्नाति अश्नीत अश्नन्ति । अश्नीयात् । अश्नातु अश्नीताम् अश्नन्तु अशान अश्नीतम् अश्नीत ।
आश्नात् आश्नीताम् आश्नन् । आशीत् । आश । अशिता । अश्यात् । अशिष्यत् । आशिष्यत् ।
कर्म्मणि । अश्यते । अश्येत । अश्यताम् । आश्यत । आशि आशिषाताम् । आशे । अशिता ।
अशिषीष्ट । अशिष्यते । आशिष्यत ।

णिचि । परस्मैपदी । आशयति । आशिशत् । आशयाम्-बभूव-आस-चकार । आशयिता । आश्यात् । आशयिष्यति । आशयिष्यत् । कर्म्मणि । स्वादिगणीयाशवद्रूपाणि ।

सनि । अशिशिषति । आशिशिषीत् । कर्म्मणि अशिशिष्यते । आशिशिषि ।

कृत्सु । अशनीयम् । अशनम् । आशकः आशी । अशिता । अशितः । अष्टिः । अशितुम् । अशित्वा । अशितव्यम् । अश्नन् । अशिष्यन् अशिष्यमाणः । णयन्तस्य आशना आशयिता आशयित्वा । आशयितुम् । आशयन् । सनन्तस्य अशिशिषा अशिशिषु' ।

अस विद्यमानतायाम् अकर्म्मकः अदा० पर० सेट्।

अस्ति स्तः सन्ति । असि स्थः स्थ । अस्मि स्वः स्मः । स्यात् स्याताम् स्युः । स्याः स्यात् स्यात स्याम् स्याव स्याम । अस्तु स्ताम् एधि स्तम् स्त असानि असाव असाम । आसीत् आस्ताम् आसन् आसीः आस्तम् आस्त आसम् आस्व आस्म । लुङादौ आर्द्धधातुकमात्रेऽस्य प्रयोगो नास्ति भूधातुप्रयोगएव । तस्य च रूपाणि पूर्व्ववत् ।

कृत्सु । केवलम् शतरि सन् । अन्यत्र भूधातुवत् ।

अस क्षेपणे दिवादि० परस्मैपदी सक० सेट् ।

कर्त्तरि । अस्यति अस्यतः अस्यन्ति । अस्येत् अस्येताम् अस्येयुः । अस्यतु अस्यताम् अस्यन्तु । आस्यत् आस्यताम् आस्यन् । आस्थत् आस्थताम् आस्थन् । आस । असिता । अस्यात् । असिष्यति । आसिष्यत् ।

कर्म्मणि । अस्यते । आसि । आसे । असिता । असिषीष्ट । असिष्यते । आसिष्यत ।

सनि । असिसिषति । उपसर्ग पूर्व्व उभयपदी । तत्र निपूर्व्व—निरासे सक० निरस्यति निरस्यते । अपतद्वत् अपास्यति अपास्यते । विपूर्व्व—विस्तारे सक० व्यस्यति विस्तारयति । सम्-सङ्क्षेपकरणे सक० सङ्घाते तु अक० । समस्यति सङ्क्षिपति । अन्येन सहैकरूपो भूत्वा संहन्यते वा ।

कृत्सु । निरसनीयम् । निरसनम् । निरासकः निरासी । निरसिता । निरस्तः अपास्तः व्यस्तः समस्तः । निरसितुम् । निरासः व्यासः समासः । निरास्यः। असित्वा । निरस्य । अस्यन् निरस्यन् निरस्यमानः । असिष्यन् असिष्यमाणः ।

णिचि । आसयति-ते । आसिसत् आसिसत । आसयाम्-बभूव-आस-चकार-चक्रे ।

कृत्सु । निरसनीयम् । निरासकः निरासयिता । निरासी । निरासितः । निरासना । निरासयितव्यः । निरासयन् निरासयमानः निरास्यमानः । निरासयिष्यन् निरासयिष्यमाणः ।

असूञ् उपतापे कण्ड्वादि० उभयपदी० अक० सेट् ।

कर्त्तरि । असूयति-ते । असूयेत्-त । असूयतु-ताम् । आसूयत्-त । आसूयीत् आसूयिष्ट । असूयाम्-बभूव-आस-चकार-चक्रे । असूयिता । असूयात् असूयिषीष्ट । असूयिष्यति-ते । आसूयिष्यत्-त । भावे असूय्यते । आसूयि । असूयाञ्-बभूवे-आसे-चक्रे । असूयिता । असूयिषीष्ट । कृत्सु । असूयणीयम् । असूयकः । असूयी । असूयिता । असूयितः । क्तिन्नास्ति अ असूया । असूयितुम् । असूयितव्यम् । असूयित्वा । असूयन् असूयमानः । असूयिष्यन् असूयिष्यमाणः ।

आप्‌ प्राप्तौ स्वादिगणीयः सकर्म्मकः परस्मैपदी अनिट् ।

कर्त्तरि । आप्नोति आप्नुतः आप्नुवन्ति आप्नोषि आप्नुथः आप्नुथ आप्नोमि आप्नुवः आप्नुमः । आप्नुयात् । आप्नोतु । आप्नोत् । आपत् । आप आपतुः आपुः आपिथ आपथुः आप आप आपिव आपिम । आप्ता । आप्यात् । आप्स्यति । आप्स्यत् ।

कर्म्मणि आप्यते । आपि । आपे । आप्ता । आप्सीष्ट । आप्स्यते । आप्स्यत् । णिचि । आपयति-ते । आपिपत्-त । आपयाम्-बभूव-आस-चकार-चक्रे । आपयिता । आप्यात् आपयिषीष्ट । आपयिष्यति-ते । आपयिष्यत्-त । कर्म्मणि आप्यते । आपि आपयि । आपयाम्-बभूवे-आसे-चक्रे । आपिता आपयिता । आपिषीष्ट आपयिषीष्ट । आपिष्यते आपयिष्यते ।

ईप्सति । ऐप्सीत् । कर्म्मणि ईप्स्यते । ऐप्सि ।

क्तम् । आपनीयम् । आपकः आपी । आप्तः। आप्तुम् । आप्तिः । आप्तव्यः । आप्त्वा प्राप्य । आप्यम् ।
आप्नुवन् आप्यमानः । आप्स्यन् आप्स्यमानः । णयन्तस्य आपयिता आपयितुम् आपयितव्यः ।
आपयित्वा । स्त्रियां युच् आपना । आपयन् आपयमानः आप्यमानः । आपयिष्यन् आपयिष्यमाणः आपयिष्यमाणः । सनन्तस्य ईप्सनीयम् । ईप्सिता । ईप्सितः । ईप्सितुम् ।
स्त्रियाम् अ ईप्सा । ईप्सुः । ईप्सितव्यः । वि-व्याप्तौ व्याप्नोति । व्याप्तः व्यापकः । परि-पर्य्याप्तौ सम्पूर्णो च अक० पर्य्याप्नोति पर्य्याप्तः समर्थः सम्पूर्णो वा भवति । सम् समाप्तौ समाप्नोति अन्तं गच्छतीत्यर्थः समाप्तः शेषं गतः । समापयति शेषं गमयति ।

आस उपवेशने अदादि० आत्म० अकर्म्म० सेट् ।

कर्त्तरि । आस्ते । आसीत । आस्ताम् । आस्त । आसिष्ट । आसाम्-बभूव-आस-चक्रे । आसिता ।
आसिषीष्ट । आसिष्यते । आसिष्यत ।

भावे आस्यते । आसि । आसाम्-बभूवे-आसे-चक्रे । लुङादौ कर्त्तरीव ।

णिचि आसयति-ते । आसिसत्-त । आसयाम्-बभूव-आस-चकार-चक्रे । आसयिता । आस्यात्
आसयिषीष्ट । आसयिष्यति-ते । आसयिष्यत्-त ।

कर्म्मणि । आस्यते । आसि आसयि । आसयाम्-बभूवे-आसे-चक्रे । आसिता आसयिता । आसिषीष्ट
आसयिषीष्ट । आसिष्यते आसयिष्यते । आसिष्यत आसयिष्यत ।

सनि । आसिसिषति । आसिसिषीत् । भावे आसिसिष्यते । आसिसिषि ।

कृत्सु । आसनीयम् । आसनम् आसकः । आसितव्यम् । आसिता । आसितः आसितुम् ।
स्त्रियां भावे युच् आसना । आसित्वा । उपास्य । आस्यम् । आसीनः आसिष्यमाणः ।
उप-उपासने भ० उपास्ते सेवते । उत्-औदास्ये उदास्ते औदासीन्यमवलम्बते ।

इण् गतौ अदादि० सक० पर० अनिट् ।

कर्त्तरि । एति इतः यन्ति एषि इथः इथ एमि इवः इमः । इयात् । एतु । ऐत् । अगात् ।
इयाय ईयतुः ईयुः इययिथ इयेथ ईयथुः ईय इयाय ईयिव ईयिम । एता । ईयात्
उपसर्गात् अन्वियात् । एष्यति । ऐष्यत् । कर्म्मणि ईयते । अगायि । ईये । आयिता
एता । आयिषीष्ट एषीष्ट । आयिष्यते एष्यते । आयिष्यत ऐष्यत ।

णिचि । गमयति-ते । अजीगमत्-त । गमयाम्-बभूव-आस-चकार-चक्रे । प्रतिपूर्व्वः प्रतीतौ
प्रत्याययति कर्म्मणि । प्रत्याय्यते ।

सनि । जिगमिषति अजिगमिषीत् । कर्म्मणि जिगमिष्यते अजिगमिषि । प्रति-प्रतीषिषति कर्म्मणि प्रतीषिष्यते ।

ईयात् । अयनीयम् अयनम् । अयः अत्ययः प्रत्ययः आयः । पर्य्यायः । एतव्यः । एता । इतः । एतुम् । इतिः । इत्वा । इत्य उपेत्य । यन् ईयमानः ऐष्यन् एष्यमाणः । कर्म्मणि आयिष्यमाणोऽपि । णिजन्तात् गमनीयम् गमयम् । गमयिता गमयितुम् । गमना । गमयित्वा । गमयन् गमयमानः गम्यमानः गमयिष्यन् । गमयिष्यमाणः । प्रतिपूर्व्वस्य प्रत्यायनीयम् प्रत्यायकः प्रत्यायितः प्रत्यायिता । प्रत्यायितुम् । क्त्वास्थाने ल्यप् प्रत्याय्य । प्रत्यायनम् । प्रत्यायन् प्रत्याययमानः । कर्म्मणि प्रत्याय्यमानः । प्रत्यायिष्यन् प्रत्यायिष्यमाणः । प्र-परा-परलोकगमने प्रैति परैति परलोकं गच्छति । उत्-ऊर्द्ध्वगमने प्रकाशे वा यथा० उदेति ऊर्द्ध्वं गच्छति प्रकाशते वा । अनु-अनुगमने पश्चाद्गमने च यथा० अन्वेति पश्चात् गच्छति संबध्नाति वा । अभि-अभिमुखगमने यथा० अभ्येति अभिमुखं यातीत्यर्थः । उप-समीपगमने उपैति सामीप्यं गच्छति । अभि-उप-स्वीकारे यथा० अभ्युपैति स्वीकरोति । निर्-निर्गमने यथा० निर्गच्छति । अप-अपसरणे यथा० अपैति अपसरतीत्यर्थः । आङ् आगमने यथा० एति आगच्छति । अधि-स्मरणे अध्येति स्मरतीत्यर्थः । अतरि तु विशेषः अधीयन् । विपरि-विपर्य्यये यथा० विपर्य्येति विपर्य्ययं प्राप्नोतीत्यर्थः । अति-अतिक्रमे यथा० अत्येति अत्यागत्येति अतिक्रम्य गच्छतीत्यर्थः । अभिप्र-अभिप्राये यथा० अभिप्रैति अनुमानं करोतीत्यर्थः । परि-पर्य्याप्ते व्याप्तौ च पर्य्येति पर्य्याप्तं प्राप्नोति व्याप्नोति वा पर्य्येतः ।

इ स्मिरणार्थीनुर्लोकः अध्याने सत० अदादि० परस्मै० अनिट् ।

अध्यगीट-प्रध्यैट
[illegible] । अधीते अधीयाते अधीयते । अधीयीत । अधीताम् । अध्यैत । अध्यगीट-प्रध्यैट
अधिजगे । अध्येता अध्येषीट । अध्येष्यते । अध्यगीष्यत अध्येष्यत ।
[illegible] । अधीयते । अध्यगायि अध्यायायि । अध्यगायिषाताम् अध्यगीषाताम् । अध्यायिषाताम्
[illegible] । अधिजगे । अध्यायिता अध्येता । अध्येषीट अध्यायिषीट । अध्यायिष्यते
[illegible] । अध्यगायिष्यत अध्यगीष्यत अध्यायिष्यत अध्येष्यत । णिचि आत्मनेपदं नास्ति ।
[illegible] । अध्यापिपत् अधिजिगपत् । अध्यापयाम्-बभूव-आस-चकार । अध्यापयिता ।
[illegible] । अध्यापयिष्यति । अध्यापयिष्यत् । कर्म्मणि अध्याप्यते । अध्यापि अध्यापयि ।
अध्यापयाम्-बभूवे-आसे-चक्रे । अध्यापयिता अध्यापिता । इत्यादि ।
[illegible] अधिजिगांसते अध्यजिगांसिट । कर्म्मणि अधिजिगांस्यते अध्यजिगांसि । णिच् सनन्तस्य
अध्यापिपयिषति अधिजिगापयिषति ।
[illegible] । अध्ययनीयम् । अध्यायः । अध्ययनम् । अध्येतः । अधीतः । अधीतिः अध्येतुम् । अध्येतव्यम् अध्येयः

अधीत्य । अधीयमानः अध्येष्यमानः । ण्यन्तस्य अध्यापनीयम् । अध्यापकः । अध्यापयिता । अध्यापितः अध्यापयितुम् । अध्यापयितव्यः। क्तिन्नास्ति युच् अध्यापना । आध्याप्यम् अध्याप्य । अध्यापयन् अध्याप्यमानः । अध्यापयिष्यन् अध्यापयिष्यमाणः अध्यापिष्यमपि । सनन्तस्य अधिजिगांसनीयम् । अधिजिगांसिता । अधिजिगांसितः । अधिजिगांसितुम् । अधिजिगांसितव्यः । क्तिन्नास्ति अ अधिजिगांसा । अधिजिगांसुः । अधिजिगांस्यम् अधिजिगांस्यमानः अधिजिगांसिष्यमाणः ।

इष वाञ्छायाम् सक० तुदा० पर० सेट् ।

कर्त्तरि । इच्छति । इच्छेत् । इच्छतु । ऐच्छत् । ऐषीत् । इयेष ईषतुः ईषुः इयेषिथ । एषिता एष्टा । इष्यात् । एषिष्यति । ऐषिष्यत् । कर्म्मणि इष्यते । ऐषि । ईषे । एषिता एष्टा । एषिषीष्ट । एषिष्यते । ऐषिष्यत । णिचि एषयति-ते । ऐषिषत्-त । एषयाम् बभूव-आस-चकार-चक्रे । एषयिता । कर्म्मणि । एष्यते । ऐषि ऐषयि । एषयाम् बभूवे-आसे-चक्रे । एषिता एषयिता । सनि । इषिषिषति । ऐषिषिषीत् । कर्म्मणि इषिषिष्यते । ऐषिषिषि ।

क्तृम् । एषणीयम् । एषः । एषी । एष्टव्यः एषितव्यः । एषिता एष्टा । इष्टः । इष्टिः । इच्छुः ।
इच्छा । एषित्वा एष्ट्वा । एष्यम् । इच्छन् । इष्यमाणः एषिष्यन् । एषिष्यमाणः । णयन्तस्य एष
यितुम् । एषयितव्यः । एषितः क्तिन्नास्ति युच् एषणा । एषयित्वा । एषयन् एषयमाणः
एष्यमाणः । एषयिष्यन् एषयिष्यमाणः एषिष्यमाणः । अधि-सत्कारे अधीच्छति सत्करोति ।
अधीष्टः सत्कृतः । अधेषणम् सत्कारः । प्रति-ग्रहणे प्रतीच्छति गृह्णाति ।

इष गतौ दिवा॰ सक॰ पर॰ सेट् ।

कर्त्तरि । इष्यति । इष्येत् । इष्यतु । ऐष्यत् । ऐषीः । इयेष । एषिता एष्टा । इष्यात् ।
कर्म्मणि । इष्यते । इष्येत । इष्यताम् । ऐष्यत । ऐषि । ईषे । एषिता एष्टा । एषिषीष्ट ।
एषिष्यते । ऐषिष्यत ।
णिचि । तुदादिगणीयेषधातुवत् । एवं क्तृस् । प्र-प्रेरणे प्रेषयति प्रेरयति प्रेषणा प्रेरणा ।

ईक्ष दर्शने भ्वा० सक० आत्म० सेट् ।

कर्त्तरि । ईक्षते । ईक्षेत । ईक्षताम् । ऐक्षत । ऐक्षिष्ट । ईक्षाम्-बभूव-आस-चक्रे । ईक्षिता । ईक्षिषीष्ट । ईक्षिष्यते । ऐक्षिष्यत ।

कर्म्मणि ।- ईक्ष्यते । ईक्ष्येत । ईक्ष्यताम् । ऐक्ष्यत । ऐक्षि । ईक्षाम्-बभूवे-आसे-चक्रे । लुडादौ कर्त्तरीव रूपाणि ।

णिचि । ईक्षयति-ते । ऐचिक्ष त्-त । ईक्षयाम्-बभूव-आस-चकार-चक्रे । ईक्षयिता । ईक्ष्यात् ईक्षयिषीष्ट इत्यादि । कर्म्मणि । ईक्ष्यते । ऐक्षि ऐक्षयि । ईक्षयाम्-बभूवे-आसे-चक्रे । ईक्षिता ईक्षयिता । ईक्षिषीष्ट ईक्षयिषीष्ट इत्यादि ।

कृत्सु । ईक्षणीयः । ईक्षणम् । ईक्षकः । ईक्षिता । ईक्षितः । स्त्रियान्तु अ ईक्षा परीक्षा उपेक्षा । ईक्षितव्यम् । ईक्षितुम् । ईक्षित्वा । अपेक्ष्य । ईक्ष्यः । ईक्षमाणः ईक्ष्यमाणः । ईक्षिष्यमाणः । णयन्तस्य तु । ईक्षयिता । स्त्रियान्तु युच् ईक्षणा । ईक्षयितव्यः । ईक्षयितुम् । ईक्षयित्वा । ईक्षयन् ईक्षयमाणः । ईक्षयिष्यन् ईक्षयिष्यमाणः इति भेदः । प्र-बुद्धिपूर्व्वककरणे सक० प्रेक्षते बुद्धिपूर्व्वं करोति । प्रति-प्रतीक्षायाम् (आकाङ्क्षाविशेषे) सक० प्रतीक्षते औत्सुक्येन

काङ्क्षतीत्यर्थः । अप-आकाङ्क्षायाम् अवधीकरणे च अपेक्षते आकाङ्क्षति अवधिं करोति वा । परि-परीक्षायाम् सक० परीक्षा युक्तिसूचकव्यापारः तत्त्वनिर्णायकव्यवहारश्च । परीक्षते गुणादिं सूचयति तत्त्वेन निश्चिनोति वा । उत्प्र-उत्प्रेक्षायाम् सक० अन्यथा स्थितवस्तुनोऽन्यरूपेण सम्भावनमुत्प्रेक्षा । उत्प्रेक्षते अन्यथा स्थितमन्यरूपेणोद्भावयतीत्यर्थः । उप-उपेक्षायाम् (औदासीन्यावलम्बने) अक० उपेक्षते उदास्ते इत्यर्थः । औदासीन्यहेतुकत्यागेऽपि सक० उपेक्षते औदासीन्येन त्यजति । सम्-विवेचने सक० समीक्षते ।

ईड् स्तुतौ अदा० सक० आत्म० सेट् ।

कर्त्तरि । ईट्टे ईड़िषे ईड़्ढ्वे । ईड़ीत । ईट्टाम् ईड़िष्व ईड़िध्वम् । ऐट्ट । ऐडिष्ट । ईडाम्-बभूव-आस-चक्रे । ईडितासे । ईडिषीष्ट । ईड़िष्यते । ऐड़िष्यत । कर्म्मणि । ईड्यते । ऐडि । ईडाम्-बभूवे-आसे-चक्रे । लुङादौ कर्त्तरीव ।

णिचि । ईड़यति-ते । ऐडिड़त्-त । ईड़याम्-बभूव-आस-चकार-चक्रे । ईड़यितासि-से । ईड्यात्

ईड़यिषीष्ट । ईड़यिष्यति-ते इत्यादि । कर्म्मणि । ईड्यते । ऐड़ि । ईड़याम्-बभूवे-आसे-चक्रे । ईड़िता ईड़यिता । ईड़िषीष्ट ईड़यिषीष्ट इत्यादि ।

कृत्सु । ईड़नीयम् । ईड़नम् । ईड़कः । ईड़ी । ईड़िता । ईड़ितः । क्तिन्नास्ति अ ईड़ा । ईड़ितव्यः । ईड़ितुम् । ईड़ित्वा । समीड्य । ईड्यः । ईड़ानः ईड्यमानः । ईड़िष्यमाणः । णयन्तस्य तु ईड़यिता । क्तिन्नास्ति युच् ईड़ना । ईड़यितव्यः । ईड़यितुम् । ईड़यित्वा । ईड़यन् ईड़यमानः । ईड़यिष्यन् ईड़यिष्यमाणः इत्यादि भेदः ।

ईश ऐश्वर्य्ये अदा० सक० आत्म० सेट् ।

कर्त्तरि । ईष्टे ईशिषे ईशिध्वे । ईशीत । ईष्टाम् ईशिष्व ईशिध्वम् । ऐष्ट । ऐशिष्ट । लिड़ादौ ईड़इव रूपाणि डकारस्थाने शकारमात्रभेदः ।

ईह चेष्टायाम् भ्वा० अक० आत्म० सेट् ।

कर्त्तरि । ईहते । ईहेत । ईहताम् । ऐहत । ऐहिष्ट । लिड़ादौ सर्व्वत्र ईड़धातोरिव रूपाणि डकारस्थाने हकारमात्रभेदः ।

ऊह वितर्के० भ्वा० सक० आत्म० सेट्।

कर्त्तरि। ऊहते। ऊहेत। ऊहताम्। औहत। औहिष्ट। ऊहाम्-बभूव-आस-चक्रे।
ऊहितासे। ऊहिषीष्ट। ऊहिष्यते। औहिष्यत।

कर्मणि। ऊह्यते। औहि। ऊहाम्-बभूवे-आसे-चक्रे। लुडादौ कर्त्तरीव।

उपसर्गपूर्व्वकः उभयपदी समूहति समूहते। यादौ परे तु ह्रस्वः समुह्यात् समुह्य इत्यादि।

णिचि। ऊहयति-ते। औजिहत्-त। ऊहयाम्-बभूव-आस-चकार-चक्रे। ऊहयितासि-से।
ऊह्यात् ऊहयिषीष्ट। ऊहयिष्यति-ते। ऊहतुस्। ऊहनीयम्। ऊहनम्। ऊहः। ऊहकः
ऊही। ऊहिता। ऊहितः। क्विनाख्रि अ ऊहा। ऊहितुम्। ऊहितव्यः। ऊहित्वा। समुह्य।
ऊह्यः। ऊहमानः ऊह्यमानः। ऊहिष्यमाणः। णयन्तस्य तु ऊहयिता ऊहयितव्यः।
ऊहयितुम्। ऊहयित्वा। ऊहयन् ऊहयमानः। ऊहयिष्यन् ऊहयिष्यमाणः इत्यादि भेदः।

ऋ गतौ भ्वा० सक० पर० अनिट्।

कर्त्तरि। ऋच्छति। ऋच्छेत्। ऋच्छतु। आर्च्छत्। आरत् आर्षीत् आरताम् आर्ष्टाम्
आरन् आर्षुः। आर आरतुः आरुः आरिथ आरिव। अर्त्ता। अर्य्यात्। अरिष्यति।

आरिष्यत् । कर्म्मणि अर्य्यते । आरि आरिषाताम् आर्षाताम् । आरे । आरिता अर्त्ता । आरिषीष्ट ऋषीष्ट । आरिष्यते अरिष्यते । णिचि अर्पयति-ते । आर्पिपत्-त । अर्पयाम्-बभूव-आस-चकार-चक्रे । अर्पयिता । अर्प्यात् अर्पयिषीष्ट । अर्पयिष्यति-ते आर्पयिष्यत्-त । सनि । अरिरिषति । आरिरिषीत् अरिरिषाम्-बभूव-आस-चकार । यङि अरार्य्यते । क्तसु । अरणीयस् । अरणम् । आरः । अर्त्ता । ऋतः । ऋतिः । अर्त्तुम् । ऋत्वा । समृत्य । आर्य्यः । ऋच्छन् अर्य्यमाणः । अरिष्यन् । आरिष्यमाणः अरिष्यमाणः ।
सम्—सङ्गतौ अक० आत्मनेपदी । समृच्छते । समारत समार्त्त समारताम् समार्षाताम् । समारे । समर्त्तासे । समृषीष्ट ।

ऋ गतौ जुहोत्यादि सक० पर० अनिट् ।

कर्त्तरि । इयर्त्ति इयृतः इयृति । इयर्षि इयृथः इयृथ इयर्म्मि इयृवः इयृमः । इयृयात् । इयर्तु इयृताम् इयृतु इयृहि इयृतम् इयृत इयराणि इयराव इयराम । ऐयः ऐयृताम् ऐयरुः ऐयः ऐयृतम् ऐयृत ऐयरम् ऐयृव ऐयृम । लुङादौ सर्व्वत्र भ्वादिगणीयवत् ।

एध वृद्धौ भ्वा० आ० आत्म० सेट्।

कर्तरि। एधते। एधेत। एधताम्। ऐधत। ऐधिष्ट। एधाम्-बभूव-आस-चक्रे। एधिता एधिषीष्ट। एधिष्यते। ऐधिष्यत। भावे। एध्यते। ऐधि। एधाम्-बभूवे-आसे-चक्रे। गुणादौ एकवचने कर्तरीव।

णिचि। एधयति-ते। ऐदिधत्-त। एधयाम्-बभूव-आस-चकार-चक्रे। एधयिता। एध्यात्। एधयिषीष्ट। एधयिष्यति-ते। कर्मणि। एध्यते। ऐधि। एधयाम्-बभूवे-आसे-चक्रे। एधिता एधयिता। एधिषीष्ट एधयिषीष्ट इत्यादि।

कृत्सु। एधनीयम्। एधनम्। एधकः। एधः। एधः एधसी। एधी। एधिता। एधितः। क्विन्नास्ति स्त्र एधा। एधितुम् एधितव्यम्। एधित्वा। समेध्य। एध्यः। एधमानः एधिष्यमाणः। ण्यन्तस्य तु एधयिता। एधना। एधयितुम्। एधयितव्यः। एधयित्वा। एधयन् एधयमानः एधयिष्यन् एधयिष्यमाणः इत्यादि भेदः।

कथ कथने अदन्तचुरा० सक० उभ० सेट्।

कर्त्तरि। कथयति-ते। कथयेत्-त। कथयतु-ताम्। अकथयत्-त। अचीकथत्-त अचकथत्-त। कथयाम्-बभूव-आस-चकार-चक्रे। कथयिता-सि-से। कथ्यात् कथयिषीष्ट। कथयिष्यति-ते। कर्म्मणि। कथ्यते। अकथि। कथयाम्-बभूवे-आसे-चक्रे। कथिता कथयिता। कथिषीष्ट कथयिषीष्ट इत्यादि।

सनि। चिकथयिषति-ते। अचिकथयि-षीत् षिष्ट। चिकथयिषाम्-बभूव-आस-चकार चक्रे। क्वत्सु। कथनीयम्। कथनम्। कथकः। कथयिता। कथितः। क्तिन् युच् च नास्ति अ कथा। कथयितुम्। कथयितव्यः। कथयित्वा। संकथ्य। कथ्यः। कथय-न् मानः। कथ्यमानः कथयि-ष्यन् ष्यमाणः।

कम इच्छायाम् भ्वा० सक० आत्मने० सेट्।

कर्त्तरि। कामयते। कामयेत। कामयताम्। अकामयत। अचीकमत अचकमत। कामयाम्-बभूव-आस-चक्रे, चकमे। कामयिता कमिता। कामयिषीष्ट कमिषीष्ट। कामयि-

ष्यते कमिष्यते । अकामयिष्यत अकमिष्यत । कर्म्मणि काम्यते । काम्येत । काम्यताम् । अकाम्यत । अकामि अकमि । कामयाम्-बभूवे-आसे-चक्रे-चकमे । कामिता कामयिता कमिता । कामिषीट कामयिषीट कमिषीट । कामिष्यते कामयिष्यते कमिष्यते ।

णिचि । कामयति-ते । अचीकमत् अचकमत्-त । कर्म्मणि काम्यते । अकामि अकमि ।

सनि । चिकामयिषते चिकमिषते । अचिकामयिषिट अचिकमिषिट ।

कृदन्तम् । कमनीयः । कमनम् । कामः । कामकः । कामुकः । कामी । कामयिता कमिता । कामितः कान्तः । णिङ् पक्षे युच् पक्षे क्तिन् कामना कान्तिः । कामयितुम् कमितुम् । कामयितव्यः कमितव्यः । कामयित्वा कमित्वा कान्त्वा । संकाम्य । काम्यः । कम्रः । कामयमानः काम्यमानः । कामयिष्यमाणः कमिष्यमाणः । णिजन्तस्य कामयिता । कामितः । कामना । कामयितव्यः । कामयितुम् कामयित्वा । कामय-न् मानः कामयि-ष्यन् ष्यमाण इति भेदः ।

कपि चलने भ्वादि अक० आत्म० सेट् ।

कम्पते । कम्पेत । कम्पताम् । अकम्पत । अकम्पिट । चकम्पे । कम्पिताहे । कम्पिषीट । कम्पिष्यते । अकम्पिष्यत । भावे । कम्प्यते । अकम्पि ।

णिचि। आत्मनेपदं नास्ति कम्पयति। अचिकम्पत्। कम्पयाम् बभूव आस चकार। कर्म्मणि। कम्प्यते। अकम्पि। कम्पयाम् बभूवे आसे चक्रे। कम्पितासे कम्पयितासे। क्ततु। कम्पनीयम्। कम्पनः। कम्पकः। कम्पः। कम्पिता। कम्पितः। कम्पितुम्। कम्पित्वा। प्रकम्प्य। कम्प्रः। कम्पमानः कम्पिष्यमाणः। णयन्तस्य कम्पयिता। कम्पयितव्यः। कम्पयितुम्। कम्पयित्वा। कम्पयन् कम्प्यमानः। कम्पयिष्यन् कम्पयिष्यमाणः। अनु-अनुग्रहे सक० अनुकम्पते अनुगृह्णाति। अनुकम्पा।

कर्ण भेदने अदन्तचुरादि० सक० उभयपदी सेट्।

कर्णयति-ते। आङ्-श्रवणे आकर्णयति-ते। आकर्णनम्। आकर्णयन्। आकर्णितः।

कल गतौ संख्यायाञ्च अदन्तचुरा० सक० उभ० सेट्।

कर्त्तरि कलयति-ते। कलयेत्-त। कलयतु-ताम्। अकलयत्-त। अचीकलत्-त अचकलत्-त। सर्व्वं कथधातुवत् थकारस्थाने लकारमात्रभेदः। सम्-एकत्रस्थीकरणे संघातकरणे च संकलयति एकत्रस्थं करोति संहतं करोति वा। वि-योजने विकलयति वियोजयति।

काङ्क्ष काङ्क्षायां भ्वादि० पर० सक० सेट् । प्राग्वेगाद् पूर्ववतः

कर्त्तरि आ-काङ्क्षति । काङ्क्षेत् । काङ्क्षतु । अकाङ्क्षत् । अकाङ्क्षीत् । चकाङ्क्ष । काङ्क्षिता । काङ्क्ष्यात् ॥ काङ्क्षिष्यति । अकाङ्क्षिष्यत् । कर्मणि । काङ्क्ष्यते । अकाङ्क्षि । चकाङ्क्षे । णिचि काङ्क्षयति-ते । कतुंम् । काङ्क्षणीयः । काङ्क्षणम् । आकाङ्क्षी । आकाङ्क्षकः । आकाङ्क्षिता । आकाङ्क्षितः । क्तिन्नास्ति स्त्र आकाङ्क्षा । आकाङ्क्षितुम् । काङ्क्षित्वा । आकाङ्क्ष्य । काङ्क्ष्यम् । काङ्क्षन् काङ्क्षमाणः । काङ्क्षिष्यन् काङ्क्षिष्यमाणः ।

काल अवगमे चालने च अदन्तचुरा० सक० उभ० सेट् ।

कालयतिते चालयति अन्तयति वा । काल्यमानः चाल्यमानः ।

काश प्रकाशे अकर्मकः भ्वादि० आत्म० सेट् ।

काशते । काशेत । काशताम् । अकाशत । अकाशिष्ट । काशाम्-बभूव-आस-चक्रे चकाशे । काशिता । काशिष्यते । भावे काश्यते । अकाशि । काशाम् बभूवे आसे चक्रे चकाशे । णिजादौ कर्त्तरीव ।

णिचि काशयति-ते । अचकाशत्-त । काशयाम्-बभूव-आस-चकार-चक्रे । काशयितासि-से । काश्यात् काशयिषीष्ट । काशयिष्यति-ते । अकाशयिष्यत्-त । कर्म्मणि काश्यते । अकाशि । काशयाम्-बभूवे-आसे-चक्रे । काशिता काशयिता ।

क्तत्सु काशनीयम् । काशनम् । काशकः । प्रकाशः । काशी । काशिता । काशितः । काशितुम् । काशितव्यम् । काशित्वा । प्रकाश्य । प्रकाश्यः । प्रकाशमानः। काशिष्यमाणः । णयन्तस्य तु काशयिता । काशयितुम् । काशना । काशयितव्यः । काशयित्वा । काशय-न् मानः काशयि-ष्यन् ष्यमाणःइतिभेदः । निप्रतिभ्यामुपसर्गाभ्यां घञि निप्रत्योर्दीर्घः नीकाशः प्रतीकाशः ।

कित संशये रोगप्रतीकारे च स० भ्वादि पर० सेट् ।

चिकित्सति । चिकित्सेत् । चिकित्सतु । अचिकित्सत् । अचिकित्सीत् । चिकित्साम् बभूव आस चकार । कर्म्मणि चिकित्स्यते । अचिकित्सि । चिकित्साम् बभूवे आसे चक्रे । संशये तु विपूर्व्वक एव । णिचि चिकित्सयति । क्तत्सु । चिकित्सनीयम् । चिकित्सनम् । चिकित्सकः । चिकित्सी । चिकित्सिता । चिकित्सितः । किन्नास्ति स चिकित्सा । चिकित्सितुम् । चिकित्सित्वा विचिकित्स्य । चिकित्स्यम् । चिकित्सन् । चिकित्स्यमानः । चिकित्सिष्यन् । चिकित्सिष्यमाणः ।

कित निवासे अक० भ्वादि० पर० सेट्।

केतति। केतेत्। केततु। अकेतत्। अकेतीत्। चिकेत। केतिता। कित्यात्। केतिष्यति। भावे कित्यते। चकेति। चिकेते। सनि चिकेतिषति। णिचि केतयति ते। अचीकितत् त। केतितव्यम् केतनीयम् केतनम्। केतः। केती। केतितः। केतितुम्। केतन् केतिष्यन्।

सम्—संज्ञाकरणे सक० संकेतति मन्त्रितं करोति। संकेतः संज्ञा। संकेतितः।

कुप कोपे दिवा० अक० पर० सेट्।

कुप्यति। कुप्येत्। कुप्यतु। अकुप्यत्। अकुपत् अकोपीत्। चुकोप। कोपिता। कुप्यात्। कोपिष्यति। अकोपिष्यत्। भावे कुप्यते। अकोपि। णिचि कोपयति अचूकुपत्। सनि। चुकोपिषति। कृत्सु कोपनीयम्। कोपनम्। कोपनः। कोपः। कोपकः। कोपी। कोपिता। कुपितः। कोपितुम्। कुपित्वा। संकुप्य। कुप्यः। कुप्यन्। कोपिष्यन्।

कुप भेदने क्र्यादिगणीयः सक० पर० सेट्।

कुप्णाति। कुप्णीयात्। कुप्णातु। अकुप्णात्। अकोपीत्। निर् पूर्वकस्य निरकोपीत्

निरकुक्षत्। चुकोष। कोषिता। निष्कोषिता निष्कोष्टा। कोषिष्यति निष्कोषिष्यति निष्कोक्ष्यति। कर्म्मणि कुष्यते। अकोषि। निरकोषिषाताम् निरकुक्षाताम्। णिचि कोषयति-ते। अचूकुषत्-त। कोषयाम् बभूव आस चकार चक्रे। कर्म्मणि कोष्यते। अकोषि अकोषिषाताम् अकोषयिषाताम्।

कृत्सु कोषणीयम्। कोषणम्। कोषः। कोषकः। कोषी। कोषिता निष्कोषिता निष्कोष्टा। निष्कुषितः निष्कुष्टः। कोषितुम् निष्कोषितुम् निष्कोष्टुम्। कोषित्वा। निष्कुष्य। कुष्णन्। कोषिष्यन्। निष्कोषिष्यन् निष्कोक्ष्यन्। कोषिष्यमाणः निष्कोषिष्यमाणः निष्कोक्ष्यमाणः। णयन्तस्य तु कोषयिता कोषयितव्यः। कोषणा। कोषयितुम्। कोषयित्वा। कोषयन् कोषयमाणः। कोषयिष्यन् ष्यमाणः।

कूज अव्यक्तशब्दे भ्वा० अक० पर० सेट्।

कर्त्तरि कूजति। कूजेत्। कूजतु। अकूजत्। अकूजीत्। चुकूज। कूजिता। कूज्यात्। कूजिष्यति। अकूजिष्यत्। भावे कूज्यते। अकूजि। चुकूजे। णिचि कूजयति-ते। अचुकूजत्-त। कृत्सु। कूजनीयम्। कूजनम्। कूजकः॥ कूजी। कूजिता। कूजितः। कूजितुम् क्तिन्नास्ति अ कूजा।

कूजिता। कूजन्। कूजिष्यन्। ण्यन्तस्य तु कूजयिता। कूजयितुम्। कूजयितव्यम्।
कूजयिता। कूजयन् कूजयमानः। कूज्यमानः। कूजयि-ष्यन् ष्यमाण इत्यादिभेदः।

डुकृञ् करणे तना० सक० उभय० अनिट्॥

करोति करोति कुरुतः कुर्व्वन्ति करोषि कुरुथः कुरुथ करोमि कुर्व्वः कुर्म्मः। कुरुते कुर्व्वाते कुर्व्वते कुरुषे कुर्व्वाथे कुरुध्वे कुर्व्वे कुर्व्वहे कुर्म्महे। कुर्य्यात् कुर्व्वीत। करोतु कुरुताम् कुर्व्वन्तु कुरु कुरुतम् कुरुत करवाणि करवाव करवाम। कुरुताम् कुर्व्वाताम् कुर्व्वताम् कुरुष्व कुर्व्वाथाम् कुरुध्वम् करवै करवावहै करवामहै। अकरोत् अकुरुतम् अकुर्व्वन्। अकुरुत अकुर्व्वाताम् अकुर्व्वत। अकार्षीत् अकार्ष्टाम् अकार्षुः। अकृत अकृषाताम् अकृषत। चकार चक्रतुः चक्रुः चकर्थ चक्रव चक्रम। चक्रे चक्राते चक्रिरे चकृषे।
सम्पूर्व्वकस्य तु सञ्चस्कारतुः सञ्चस्कारुः सञ्चस्कारिथ सञ्चस्कारिव सञ्चस्कारिम। सञ्चस्कारे सञ्चस्काराते सञ्चस्कारिरे सञ्चस्कारिषे। कर्त्ता-सि से। क्रियात् कृषीष्ट संस्कृषीष्ट। करिष्यति-ते अकरिष्यत्-त।
कर्म्मणि क्रियते। अकारि अकारिषाताम् अकृषाताम्। चक्रे। कारितासे कर्त्तासे। कारिषीष्ट कृषीष्ट। कारिष्यते करिष्यते। अकारिष्यत अकरिष्यत। णिचि कारयति-ते अचीकरत्-त।

कारयाम्-बभूव-आस-चकार-चक्रे । कारयितासि-से । कार्य्यात् कारयिषीष्ट । कारयिष्यति-ते । अकारयिष्यत्-त । सनि चिकीर्षति यङि चेक्रीयते । कृतम् । करणीयम् । करणम् । कारः । अन्तकरः । कर्म्मकरः । भयङ्करः । प्रियङ्करः । क्षेमङ्करः । क्षेमकारः । कुम्भकारः । कारकः । कारी । कर्त्ता । कृतः । कृतिः । कर्त्तुम् । क्विपि पुण्यकृत् शुभकृत् सुकृत् दिनकृत् । क्वसु—चकृवान् । कर्त्तव्यम् । प्रक्रिया क्यप् कृत्या । कृत्वा प्रकृत्य । कृत्यम् । कार्य्यम् । कुर्व्वन् कुर्व्वाणः करिष्यन् ष्यमाणः । ण्यन्तस्य तु कारयिता । कारितः क्तिन्नास्ति युच् कारणा । कारयितव्यः । कारयितुम् । कारयित्वा । प्रकार्य्य । कारयन् माणः कारयि-ष्यन् ष्यमाणः । कर्म्मणि कारिष्यमाणोऽपि । सम्-संस्कारे(सतो गुणान्तरोद्गपादनायाम्) संस्करोति । वि—विकृतौ आत्म० विकुरुते । प्र-प्रस्तावे प्रकरोति प्रकृत्य प्रकरणम् । अधि-अधिकारे सक० अधिकरोति । अधिकारः । अनु-अनुकरणे अनुकरोति सदृशीकरोति । परा-निर्-आ-निराकरणे पराकरोति निराकरोति निवारयतीत्यर्थः । अप अपकारे आत्म० अपकुरुते अनिष्टं करोति । अपकारः । प्रति—प्रतीकारे प्रतिकरोति घञि तु प्रतीकारः । परि-परिष्कारे परिष्करोति शोधयतीत्यर्थः । आविस्-प्रादुस्-नमस्-साक्षात्-प्रभृतौ तत्तत्करणे । आविष्क-रोति । उरी-उररी-स्वीकारे उरीकरोति । तिरस्-पराभवे सक० तिरस्करोति ।

कृत कीर्त्तने चुरादि० उभ० सक० सेट्।

कर्त्तरि। कीर्त्तयति-ते। कीर्त्तयेत्-त। कीर्त्तयतु-ताम्। अकीर्त्तयत्-त। अचिकीर्त्तत्-त। कीर्त्तयाम्-बभूव-आस-चकार-चक्रे। कीर्त्तयिता-सि-से। कीर्त्त्यात् कीर्त्तयिषीष्ट। कीर्त्तयिष्यति-ते। कर्म्मणि कीर्त्त्यते। अकीर्त्ति।

कृत्प्र। कीर्त्तनीयम्। कीर्त्तनम्। कीर्त्तकः। कीर्त्ती। कीर्त्तयिता। कीर्त्तितः। कीर्त्तिः। कीर्त्तना। कीर्त्तयितुम्। कीर्त्तयितव्यः। कीर्त्तयित्वा संकीर्त्त्य। कीर्त्त्यः। कीर्त्तय-न् मानः। कीर्त्त्यमानः। कीर्त्तयि-ष्यन् ष्यमाणः। कर्म्मणि कीर्त्त्यमानोऽपि।

कृत च्छेदने तुदा० सक० पर० सेट्।

कर्त्तरि कृन्तति। कृन्तेत्। कृन्ततु। अकृन्तत्॥ अकर्त्तीत्। चकर्त्त। कर्त्तिता। कृत्यात्। कर्त्तिष्यति कर्त्स्यति।

कर्म्मणि कृत्यते। अकर्त्ति। णिचि कर्त्तयति। कृत्प्र। कर्त्तनीयम्। कर्त्तनम्। कर्त्तकः। कर्त्ती। कर्त्तिता। कृत्तः। कृत्तिः। कर्त्तितव्यम्। कर्त्तितुम्। कर्त्तित्वा। सङ्कृत्य। कृत्यः। कृन्तन् कृत्यमानः। कर्त्तिष्यन् ष्यमाणः कर्त्स्यन् स्यमाणः।

क्लृप कल्पने भ्वा० अक० आत्म० लुङि लुटि लृटि लृङि च उभय० वेट् ।

कर्त्तरि कल्पते। कल्पेत। कल्पताम्। अकल्पत। अक्लृपत् अकल्पिष्ट अक्लृप्त। चक्लृपे। कल्प्तासि कल्पितासे कल्प्तासे। कल्प्स्यति कल्पिष्यते कल्प्स्यते। अकल्प्स्यत् अकल्पिष्यत अकल्प्स्यत। भावे। कल्प्यते। अकल्पि। णिचि। कल्पयति। अचिकल्पत्। कृत्सु कल्पनीयम् कल्पनम्। कल्पकः। कल्पः। कल्पिता कल्प्ता। क्लृप्तः क्लृप्तिः। कल्पितुम् कल्प्तुम्। कल्पितव्यम् कल्प्तव्यम्। कल्पित्वा क्लृप्त्वा। प्रकल्प्य। कल्प्यः। कल्पमानः। कल्प्स्यन् कल्पिष्यमाणः कल्प्स्यमानः। क्लृपा। क्लृपणः। क्लृपाणः। ण्यन्तस्य तु कल्पयिता। कल्पयितव्यः। कल्पना। कल्पयितुम्। कल्पयित्वा। प्रकल्प्य। कल्पय-न् मानः कल्पयि-ष्यन् ष्यमाणः कर्म्मणि कल्प्यमानः कल्पिष्यमाणोऽपि।

सम्—सङ्कल्पे सङ्कल्पते मानसवृत्त्या विषयीकरोति वि-विकल्पे विकल्पः सन्देहः सक० विकल्पते अव-सामर्थ्ये पर्य्याप्तौ च अवकल्पते समर्थः पर्य्याप्तो वा भवतीत्यर्थः।

कृष कर्षणे भ्वा० सक० पर० अनिट्।

कर्त्तरि। कर्षति। कर्षेत्। कर्षतु। अकर्षत्। अक्राक्षीत् अकार्क्षीत् अकृक्षत् अक्राष्टाम् अकार्ष्टाम् अकृक्षताम्। चकर्ष चकर्षिथ चकर्ष्ठ। क्रष्टा। कृष्यात्। क्रक्ष्यति। अक्रक्ष्यत्।

कर्म्मणि कृष्यते । अकर्षि । णिचि कर्षयति-ते अचीकृषत्-त अचकर्षत्-त । कर्म्मणि कर्ष्यते अकर्षि ।
कृतृच् कर्षणीयम् । कर्षणम् । कर्षणः । कर्षकः । कर्षा । कर्षः । कृष्टः । कृष्टिः । कष्टुम् कृष्ट्वा
आकृष्य । कर्षम् कर्षम् । कर्षन् । कृष्यमाणः । कक्ष्यन् कक्ष्यमाणः ।

१० कॄ विक्षेपे तुदादि० सक० पर० सेट् ।

कर्त्तरि किरति । कीर्य्यात् । किरतु । अकिरत् । अकारीत् । अकारिष्टाम् । चकार चकरतुः चकरुः
चकरिथ । करीता करिता । कीर्य्यात् । करीष्यति करिष्यति । अकरीष्यत् अकरिष्यत् ।
कर्म्मणि कीर्य्यते । अकारि । अकारिषाताम् अकरीषाताम् अकरिषाताम् अकीर्षाताम् ।
आकरे अकरिरे । कारिताहे करीताहे करिताहे । कारिषीष्ट करिषीष्ट कीर्षीष्ट । कारिष्यते
करीष्यते करिष्यते ।
णिचि कारयति । सनि चिकरीषति चिकरिषति चिकीर्षति ।
कृतृच् । करणीयम् । करणम् । कारकः । करीता करिता । कीर्णः । कीर्णिः । करीतव्यः
करितव्यः । करीतुम् करितुम् । करीत्वा करित्वा । प्रकीर्य्य । कार्य्यः । किरन् कीर्य्यमाणः ।
करीष्यन् करिष्यन् । करीष्यमाणः करिष्यमाणः । कर्मणि कारिष्यमाणोऽपि ।

प्रति-उप-हिंसायां छेदने च संक० प्रतिस्किरति उपस्किरति छिनत्ति हिनस्तु वा । प्रत्य-स्किरत् प्रतिचस्करे । अव-व्रतलोपे अवकिरति अवकीर्णः क्षतव्रतः । सम् सङ्करे (मिश्रीकरणे) सङ्किरति सङ्कीर्णः । वि-दाने विकरति । प्र-नानाजातीयानामेकत्र समावेशने प्रतिकिरति प्रकीर्णङ्करोति प्रकीर्णः ।

क्रन्द क्रन्दने भ्वादिगणीयः अकर्म्मकः पर० सेट् ।

कर्त्तरि । क्रन्दति । क्रन्देत् । क्रन्दतु । अक्रन्दत् । अक्रन्दीत् । चक्रन्द । क्रन्दिता । क्रन्द्यात् । क्रन्दिष्यति । अक्रन्दिष्यत् । भावे क्रन्द्यते । अक्रन्दि । णिचि क्रन्दयति । अचिक्रन्दत् । कृत्सु । क्रन्दनीयम् । क्रन्दनम् । क्रन्दकः । क्रन्दी । क्रन्दिता । क्रन्दितुम् । क्रन्दितव्यम् । क्रन्दित्वा । संक्रन्द्य । क्रन्द्यम् । क्रन्दन् क्रन्दिष्यन् । ण्यन्तस्य तु क्रन्दयिता । क्रन्दयितुम् । क्रन्दयितव्यम् । क्रन्दयित्वा क्रन्दयन् मानः । क्रन्द्यमानः । क्रन्दयिष्यन् ष्यमाणः । कर्म्मणि क्रन्दिष्यमाणोऽपि ।

आङ्-चुरादि० स्पर्द्धापूर्व्वकः सततशब्दकरणे उभयपदी आक्रन्दयति-त । आक्रन्दयेत् । आचिक्रन्दत्-त ।

क्रम पादविक्षेपे भ्वा० पर० सक० सेट् ।

[illegible] । क्रामति । क्रमेत् क्रामेत् । क्रमतु क्रामतु । अक्रमत् अक्रामत् । अक्रमीत् ।
[illegible] । क्रमिता । क्रमिष्यति । अक्रमिष्यत् । कर्म्मणि । क्रम्यते । अक्रमि अक्रामि । णिचि
क्रामयति-ते । संक्रामयति-ते । अचिक्रमत्-त । कर्म्मणि क्राम्यते । अक्रामि । क्रामितासे
क्रमितासे । कृत्सु क्रमणीयम् । क्रमणम् । क्रामकः । क्रामी । क्रमिता । क्रान्तः । क्रान्तिः ।
क्रमितुम् क्रमितव्यम् । क्रमित्वा क्रान्त्वा । संक्रम्य । क्रमः । क्रमन् क्रामन् । क्रमिष्यन् क्रमिष्य-
माणः । क्रामकः क्रामयिता क्रामितः । क्रामयितुम् । क्रामयितव्यम् । क्रान्त्वाभि युच्
क्रामणा । क्रामयन् माणः क्राम्यमाणः । क्रामयिष्यन् ष्यमाणः । कर्म्मणि क्रामिष्यमाणोऽपि ।
[illegible] । परा-पराक्रमे अकर्म्मकः आत्मनेपदी पराक्रमते पराक्रम्यते । अनि पराक्रां-
[illegible] । प्र-उप-उद् क्रमे । (आरम्भे) । प्रक्रमते प्रक्रम्यते उपक्रमते उपक्रम्यते । अर्थविशेषेऽपि क्रमेः
आत्मनेपदम् [illegible] क्रमते बुद्धिः अप्रतिहता वर्त्तते इत्यर्थः । आत्मनेपदी पराक्रमते पराक्रम्यते ।
[illegible] कृत्सु अनिट् पराक्रान्ता उपक्रान्ता उपक्रान्तव्यम् । पराक्रान्तव्यम् उत्साहे । सम्—संक्रमे
[illegible] संक्रामति [illegible]—[illegible]क्रमे निक्रामति निक्रम्यति पादकरणकविक्रमे तु आत्म० विक्रमते

विक्रमते वाजी पद्भ्यां चलतीत्यर्थः । अति—अतिक्रमे अति-क्रामति अतिक्रमते वा । उत्—उत्क्रमणे । उत्-क्रामति—क्रम्यति वा आ—आक्रमणे आक्रामति आक्रम्यति वा । ज्योतिर्व्विशिष्टस्योदये तु आत्मनेपदी आक्रमते क्रम्यते वा सूर्य्यः ।

क्री क्रये क्र्यादि० उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि । क्रीणाति क्रीणीते । क्रीणीयात् क्रीणीयीत । क्रीणातु क्रीणीताम् । अक्रीणात् अक्रीणीत । अक्रैषीत् । अक्रेष्ट । चिक्राय चिक्रिये । क्रेता । क्रीयात् क्रेषीष्ट । क्रेष्यति-ते । अक्रेष्यत्-त । कर्म्मणि क्रीयते । अक्रायि अक्रायिषाताम्, अक्रेषाताम् । क्रायिताहे क्रेताहे । क्रायिष्यते क्रेष्यते । णिचि क्रापयति-ते । अचिक्रपत्-त । सनि चिक्रीषति ।

कृत्सु क्रयणीयम् । क्रयणम् । क्रयः । क्रायकः । क्रायी । क्रेता । क्रीतः । क्रीतिः । क्रेतुम् । क्रेतव्यम् । क्रीत्वा परिक्रीय । क्रेयम् । क्रीणन् क्रीणानः क्रीयमाणः । क्रेष्यन् क्रेष्यमाणः । कर्म्मणि क्रायिष्यमाणोऽपि । णयन्तस्य क्रापयिता क्रापयितव्यः क्रापयितुम् क्रापयन् माणः । क्रापयिष्यन् ष्यमाणः ।

वि—विक्रये विक्रीणाति विक्रीणीते । प्रति—प्रतिक्रये (विनिमये) । प्रति-क्री णाति णीते ।

परि—नियमेन भृत्यादिना स्वीकरणे परिक्रीणाति यौते भाटकादिना नियतकालं स्वीका-
रार्थः । निस्—निष्क्रये तुल्यमूल्यदाने निष्क्रीणाति तुल्यमूल्यं ददातीत्यर्थः ।

क्रीड़ क्रीडायां भ्वादिगणीय अक० पर० सेट् ।

कर्त्तरि क्रीडति । क्रीडेत् । क्रीडतु । अक्रीडत् । अक्रीडीत् । चिक्रीड । क्रीडिता । क्रीड्यात् । क्रीडि-
ष्यति । अक्रीडिष्यत् । भावे । क्रीड्यते । अक्रीडि । णिचि । क्रीडयति-ते । अचिक्रीडत्-त ।
कर्मणि क्रीड्यते अक्रीडि क्रीडयिताहे क्रीडिताहे । सनि चिक्रीडिषति ।
कृत्सु । क्रीडनीयम् क्रीडनम् । क्रीडकः । क्रीडः । क्रीडी क्रीडिता । क्रीडितः । स्त्रियाम् अ क्रीडा ।
क्रीडितुम् । क्रीडितव्यम् । क्रीडित्वा । संक्रीड्य । क्रीडम् । क्रीडन् क्रीडिष्यन् । णयन्तस्य
क्रीडयिता । क्रीडयितुम् । क्रीडयित्वा । क्रीडना । क्रीडयन् मानः क्रीड्यमानः । क्रीडयिष्यन्
ष्यमाणः कर्मणि क्रीडिष्यमाणः इत्यादि भेदः । समपूर्व० आत्मने० संक्रीडते अव्यक्तशब्दे
तु पर० संक्रीडति चक्रम् ।

क्रुध कोपे दिवा० अक० उपसर्गपूर्व्वकस्तु सक० पर० अनिट् ।

कर्त्तरि । क्रुध्यति । क्रुध्येत् । क्रुध्यतु । अक्रुध्यत् । अक्रुधत् । चुक्रोध । क्रोद्धा । क्रुध्यात् ।

क्रोत्स्यति । अक्रोत्स्यत् । भावे । क्रुध्यते । अक्रोधि । सोपसर्गस्य कर्त्यमभिक्रुध्यति कर्म्मणि कर्त्री अभिक्रुध्येते । णिचि क्रोधयति । अचुक्रुधत् । कर्म्मणि क्रोध्यते । अक्रोधि । अक्रोधिताखे क्रोधयिताखे ।

कृत्सु । क्रोधनीयम् । क्रोधनम् । क्रोधनः । क्रोधकः । क्रोधः । क्रोधी । क्रोद्धा । क्रुद्धः । क्रुद्धिः । क्रोद्धव्यम् । क्रोद्धुम् । क्रुद्धा । अभिक्रुध्य । क्रोध्यम् । क्रुध्यन्, अभिक्रुध्यमानः । क्रोत्स्यन्, अभिक्रोत्स्यमानः ।

क्रुश रोदने भ्वा॰ अक॰ पर॰ अनिट् ।

कर्त्तरि । क्रोशति । क्रोशेत् । क्रोशतु । अक्रोशत् । अक्रुशत् । चुक्रोश । क्रोष्टा । क्रुश्यात् । क्रोक्ष्यति । अक्रोक्ष्यत् । भावे क्रुश्यते । अक्रोशि । णिचि क्रोशयति-ते । अचुक्रुशत्-त । क्रोशयितासि-से । कर्म्मणि क्रोश्यते । अक्रोशि क्रोशितासे क्रोशयितासे । सनि चुक्रुक्षति ।

कृत्सु क्रोशनीयम् । क्रोशनम् । क्रोशनः । क्रोशकः । क्रोशः । क्रोशी । क्रोष्टा । क्रुष्टः । क्रुष्टिः । क्रोष्टव्यम् । क्रोष्टुम् । क्रुष्ट्वा । आक्रुश्य । क्रोश्यम् । क्रोशन् । क्रुश्यमानः । क्रोक्ष्यन् क्रोक्ष्यमाणः ।

क्लमु ग्लानौ दिवा० अक० पर० सेट्।

कर्त्तरि। क्लाम्यति। क्लाम्येत्। क्लाम्यतु। अक्लाम्यत्। अक्लमत् अक्लमीत्। चक्लाम। क्लमिता। क्लम्यात्। क्लमिष्यति। अक्लमिष्यत्। भावे क्लम्यते अक्लमि। सर्व्वं क्रमवत्। क्रकारस्थाने क्लकारमात्रभेदः।

क्लिश बाधने क्र्यादिगणीयः सक० पर० वेट्।

कर्त्तरि। क्लिश्नाति क्लिश्नीतः क्लिश्नन्ति। क्लिश्नीयात्। क्लिश्नातु क्लिशान। अक्लिश्नात्। अक्लेशीत् अक्लिक्षत्। चिक्लेश चिक्लेशिथ चिक्लेष्ठ। क्लेशिता क्लेष्टा। क्लेशिष्यति क्लेक्ष्यति। अक्लेशिष्यत् अक्लेक्ष्यत्।

कर्म्मणि क्लिश्यते। अक्लेशि। अक्लेशिषाताम् अक्लिक्षाताम्। चिक्लिशे। क्लेशितासे क्लेष्टासे। क्लेशिषीष्ट क्लिक्षीष्ट। णिचि क्लेशयति-ते। अचिक्लिशत्-त। कर्म्मणि क्लेश्यते। अक्लेशि। क्लेशितासे क्लेशयितासे।

कृत्सु। क्लेशनीयम्। क्लेशनम्। क्लेशनः। क्लेशः। क्लेशी। क्लेशिता। क्लेष्टा। क्लिष्टः।

क्लिद्दि: । क्लिन्दुम् क्लिन्नुम् । क्लिन्दितव्यम् क्लेदनम् । क्लिन्दिता क्लिन्नः । संक्लिन्न । क्लेदः । क्लिन्नम् — ३५४
क्लिन्नमानः । क्लिन्दन् क्लेदन् क्लिद्यमानः क्लेदमानः ।

क्लिश उपतापे दिवा० आत्म० अक० सेट् ।

क्लिश्यते । क्लिश्यन्ते । क्लिश्येते । क्लिश्यन्ताम् । अक्लिश्यत । अक्लेशिष्ट अक्लेशिषाताम् । चिक्लिशे । क्लेशिता । क्लेशिष्यते । क्लेशिषीष्ट । अक्लेशिष्यत । क्लिश्यते । क्लिश्यतां । क्लेशिता क्लेशितव्यं । क्लेशनीयम् ।

क्लिष्टम् । क्लेशनम् । क्लेशः । क्लिष्टः । क्लिश्नाति । क्लिश्नीतः । क्लिशित्वा । क्लिश्यमानः ।

क्लीबः अधार्ष्ट्ये भ्वा० आत्म० सेट् ।

क्लीबते क्लीबेते । क्लीबन्ते । अक्लीबत । अक्लीबिष्ट । चिक्लीबे । क्लीबिता । क्लीबिष्यते । क्लीबिषीष्ट । अक्लीबिष्यत । क्लीबितव्यम् ।

कणिता। कणितम्।
कतृष। कणनीयम्। कणनम्। कणः। काणः। काणकः। काणी।
कणितव्यम्। कणितुम्। कणित्वा। प्रकण्य। कणम्। कणन् कणिष्यन्।

चमु अदने भ्वादि० पर० सक० सेट्।

अचमत् अचमीत्। चचाम।
कर्तरि। चामति। चाम्येत्। चाम्यत्। अचाम्यत्। अचामि अचमि। भावे चम्यते।
चमिता। चम्यात्। चमिष्यति। अचमिष्यत्।
णिचि चामयति-ते। अचीचमत्-त।
कतृष। चमणीयम्। चमनम्। चमः। चामी। चमिता। चान्तः। चान्तिः। चमितव्यम्।
चमितुम्। चमित्वा चान्त्वा। संचम्य। चम्यम्। चाम्यन् चमिष्यन्।

चम गतौ भ्वादि० आत्म० सक० सेट्।

अचमिष्ट अचंस्त। चचमे। चमितासे
कर्तरि चमते। चमेत। चमताम्। अचमत।
चन्तासे। चमिषीष्ट चंसीष्ट। चमिष्यते चंस्यते। कर्मणि चम्यते। अचामि।
कतृषु चमणीयम्। चमनम्। चमः। चामकः। चामी। चमिता चन्ता। चान्तः। चान्तिः।

क्षमा। क्षमितव्यम् क्षन्तव्यम्। क्षमितुम् क्षन्तुम्। क्षमित्वा क्षान्त्वा। सङ्क्षम्य। क्षमः।
क्षममाणः क्षम्यमाणः। क्षमिष्यमाणः।

क्षिप प्रेरणे तुदा० उभयपदी सकर्म्मकः अनिट्

कर्त्तरि क्षिपति-ते। क्षिपेत्-त। क्षिपतु-ताम्। अक्षिपत्-त। अक्षैप्सीत् अक्षिप्त। चिक्षेप
चिक्षेपे। क्षेप्तासि-से। क्षिप्यात् क्षेप्सीष्ट। क्षेप्स्यति-ते। अक्षेप्स्यत्-त। कर्म्मणि क्षिप्यते। अक्षेपि।
णिचि क्षेपयति-ते। अचिक्षिपत्-त। कर्म्मणि क्षेप्यते अक्षेपि। क्षेपितासे क्षेपयितासे।
कृत्सु क्षेपणीयम्। क्षेपणम्। क्षेपकः। क्षेपः। क्षेपी। क्षेप्ता। क्षिप्तः। क्षिप्तिः। क्षेप्तुम्। क्षिप्त्वा।
संक्षिप्य। क्षेप्यम्। क्षिपन् क्षिप्यमाणः। क्षेप्स्यन् क्षेप्स्यमानः।
सम्—संक्षेपकरणे सक० संक्षिपति-ते। उत्-ऊर्द्ध्वक्षेपे उत्क्षिपति-ते। अव अधोविक्षेपे अवक्षि-
पति-ते। प्रति-प्रतिक्षेपे प्रतिक्षिपति-ते। आङ्—आक्षेपे आक्षिपति-ते प्र-प्रक्षेपे प्रक्षिपति-ते।

क्षुध क्षुधायाम् दिवा० अक० पर० अनिट्।

कर्त्तरि क्षुध्यति। क्षुध्येत्। क्षुध्यतु। अक्षुध्यत्। अक्षुधत्। चुक्षोध। क्षोद्धा। क्षुध्यात्। क्षोत्स्यति।
अक्षोत्स्यत्। भावे। क्षुध्यते। अक्षोधि। चुक्षुधे। क्षोद्धा। क्षुत्सीष्ट।

[illegible] क्षोभयति-ते । अचुक्षुभत्-त । कर्मणि क्षोभ्यते । अक्षोभि ।
[illegible] । क्षोभणीयम् । क्षोभकम् । क्षोभः । क्षोभकः । क्षोभी । क्षोद्धा । क्षुब्धः । क्षुब्धिः । क्षोद्धुम् ।
[illegible] । संक्षुभ्य । क्षोभम् । क्षुभ्यन् क्षोभमाण: ।

क्षुभ संचलने भ्वा० आ० अकर्मकः आत्मनेपदी सेट् ।

[illegible] । क्षोभते । क्षोभेत । क्षोभताम् । अक्षोभत । अक्षोभिष्ट । चुक्षुभे । क्षोभिताहे । क्षोभि-
[illegible] । क्षोभिष्यति । अक्षोभिष्यत । भावे क्षुभ्यते । अक्षोभि । णिचि क्षोभयति-ते । अचुक्षुभत्-त ।
कर्मणि क्षोभ्यते । अक्षोभि । क्षोभिताहे क्षोभयिताहे । सनि चुक्षुभिषते ।
[illegible] क्षोभणीयम् । क्षोभणम् । क्षोभणः । क्षोभः । क्षोभी । क्षोभिता । क्षुभितः निपातनात् क्षुब्धः ।
[illegible] । क्षोभितुम् । क्षोभितव्यम् । क्षुभित्वा । संक्षोभ्य । क्षोभ्यम् । क्षोभमाणः क्षोभिष्यमाणः ।

क्षुभ संचलने क्र्यादि० परस्मैपदी अकर्मकः सेट् ।

क्षुभ्नाति । क्षुभ्नीयात् । क्षुभ्नीताम् । अक्षुभ्नात् । अक्षोभीत् । चुक्षोभ । क्षोभितासि । क्षुभ्यात् ।
[illegible] क्षोभिष्यति । अक्षोभिष्यत् । अन्यत् भ्वादिगणीयात् शतरि विशेषः क्षुभ्नन् ।

क्षुभ सञ्चलने दिवा० सकर्म्मकः परस्मैपदी सेट् ।

णिचि क्षुभ्यते । क्षुभ्येत् । क्षुभ्यतु । अक्षुभ्यत् । लुङादौ सर्व्वत्र क्र्यादिगणीयवत् ।

खन विदारणे भ्वादिगणीय उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि खनति-ते । खनेत्-त । खनतु-ताम् । अखनत्-त । अखनीत् अखानीत् । चखान चख्ने । खनिता । खायात् खन्यात् खनिषीष्ट । खनिष्यति-ते । अखनिष्यत्-त । कर्म्मणि खन्यते खायते । अखानि । णिचि खानयति-ते । अचीखनत्-त । सनि चिखनिषति-ते । कृत्सु । खननीयम् । खननम् । खानकः । खनकः । खानः । खानी । खनिता । खातः । खातिः । खनितुम् । खात्वा । सङ्खाय संखन्य । खेयम् । खन-न् मानः । खनिष्यन् ष्यमाणः ।

खाद भक्षणे भ्वादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि । खादति । खादेत् । खादतु ॥ अखादत् । अखादीत् । चखाद । खादिता । खाद्यात् । खादिष्यति । अखादिष्यत् । कर्म्मणि । खाद्यते । अखादि । णिचि परस्मैपदी खादयति । अचखादत् । कर्म्मणि खाद्यते । अखादि । सनि चिखादिषति । कृत्सु । खादनीयम् ।

खादनम् । खादकः । खादः । खादी । खादिता । खादितः । खादित्वा । संखाद्य । खाद्यम् ।
खादन् । खाद्यमानः । खादिष्यन् । खादिष्यमाणः ।

ख्या कथने अदादि० उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि । आद्येषु चतुर्षु लकारेषु रूपं नास्ति । अख्यत् अख्यत । चख्यौ चख्ये । ख्यातासि-से । ख्येयात् ख्यायात् ख्यासीष्ट । ख्यास्यति-ते । अख्यास्यत्-त । कर्म्मणि । ख्यायते । ख्यायेत । ख्यायताम् । अख्यायत । अख्यायि अख्यायिषाताम् अख्यासाताम् । चख्ये । ख्यायितासे ख्यातासे । णिचि ख्यापयति-ते । अचिख्यपत्-त । ख्याप्यते । आख्यापि । ख्यापितासे ख्यापयितासे सनि चिख्यासति-ते । क्तत्सु । ख्यानीयम् ख्यानम् । ख्यायकः। ख्यायी । ख्याता । ख्यातः । ख्यातिः । ख्यातुम् । ख्यात्वा । संख्याय । संख्येयः । आख्यन् आख्यायमानः । आख्यास्यन् । आख्यस्यमानः । वि-आ-विवरणे शास्त्रं व्याचख्ये । सम् सङ्ख्याकरणे घटं सञ्चख्ये । संख्या । उप-आङ्-उपाख्याने उपचख्यौ उपाख्यानम् उपाख्या । आ-आख्यायाम् (संज्ञाकरणे कथाविशेषे च) आचख्यौ आख्यानम् आख्या । धातुर्निर्द्दिशे ण्वुलि आख्यायिका ।

गण संख्याने अदन्तचुरादि० उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि गणयति-ते । गणयेत्-त । गणयतु-ताम् । अगणयत्-त । अजीगणत्-त अजगणत्-त । गणयाम्-बभूव-आस-चकार-चक्रे । गणयितास्मि-से । गण्यात् गणयिषीष्ट । गणयिष्यति-ते । अगणयिष्यत्-त । कर्म्मणि गण्यते । अगणि । गणयितासे गणितासे । सनि जिगणयिषति-ते ।

कृत्सु गणनीयम् । गणनम् । गणकः । गणः । गणी । गणयिता । गणितः । गणना । गणयितुम् । गणयित्वा । विगणय्य विगण्य । गण्यः । गणय-न्-मानः गण्यमानः । गणयि-ष्यन्-ष्यमाणः । कर्म्मणि गणिष्यमाणोऽपि । अव-अवज्ञायाम् अवगणयति अवजानाति ।

गद भाषणे भ्वादिगणीयः सकर्म्मकः परस्मैपदी सेट् ।

कर्त्तरि गदति । गदेत् । गदतु । अगदत् । अगादीत् अगदीत् । जगाद । गदितास्मि । गद्यात् । गदिष्यति । अगदिष्यत् । कर्म्मणि । गद्यते । अगादि । जगदे । णिचि । गादयति-ते । अजीगदत्-त । कर्म्मणि गाद्यते । अगादि । सनि जिगदिषति । प्रणि-गदति । कृत्सु गदनीयम् ।

गद्नम् । गादकः । गादः । गादी । गदिता । गदितः । गदितुम् । गदित्वा । आगद्य ।
गद्यम् । गदन् गद्यमानः । गदिष्यन् गदिष्यमाणः ।

गवेष अन्वेषणे अदन्तचुरादि उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि । गवेषयति-ते । अजगवेषत्-त । कर्म्मणि । गवेष्यते । अगवेषि ।
क्तत्सु । गवेषणीयम् । गवेषणम् । गवेषी । गवेषकः । गवेषयिता । गवेषितः । गवेषणा । गवेष-
यितुम् । गवेषयित्वा । संगवेष्य । गवेष्यम् । गवेषयन् माणः । गवेष्यमाणः । गवेषयि-ष्यन् ष्यमाणः ।

गम गतौ भ्वादिगणीयः पर० सकर्म्मकः अनिट् ।

कर्त्तरि । गच्छति । गच्छेत् । गच्छतु । अगच्छत् । अगमत् । जगाम । गन्ता । गम्यात् ।
गमिष्यति । अगमिष्यत् ।
कर्म्मणि । गम्यते । अगमि अगंसाताम् । जग्मे । णिचि गमयति-ते । अजीगमत्-त । कर्म्मणि
गम्यते । अगमि । अगमिषाताम् अगमयिषाताम् । गमयितासे गमितासे । सनि जिगमिषति ।
क्तत्सु । गमनीयम् गमनम् । गमः । हृदङ्गमः विहङ्गमः । भुजङ्गमः । भुजगः विहगः

पुरोगः अन्तग इत्यादिः । गमी गामी । गन्ता । गतः । गतिः । गत्वा । गन्तव्यः । सङ्गत्य । संगम्य । गम्यम् । गच्छन् गम्यमानः । गमिष्यन् गमिष्यमाणः ।

सम्—सङ्गतौ अकर्मकः आत्मनेपदी संगच्छते । सनि संजिगांसते । अनु—अनुगमने सकर्मकः अनुगच्छति सदृशीकरोति । उत्—उदये उद्गच्छति ।

गर्ज्ज शब्दे भ्वादिगणीयः अकर्मकः परस्मैपदी सेट् ।

कर्त्तरि गर्ज्जति । अगर्ज्जीत् । जगर्ज्ज । गर्ज्जितासि । भावे गर्ज्यते अगर्ज्जि । णिचि गर्ज्जयति-ते । कृत्सु । गर्ज्जनीयम् । गर्ज्जनम् । गर्ज्जकः । गर्ज्जी । गर्ज्जिता । गर्ज्जितः । गर्ज्जना । गर्ज्जितुम् । गर्ज्जितव्यम् । गर्ज्जित्वा । संगर्ज्य । गर्ज्यम् । गर्ज्जन् गर्ज्जिष्यन् ।

गर्ह निन्दायाम् भ्वादिगणीयः आत्मनेपदी सकर्मकः सेट् ।

कर्त्तरि गर्हते । अगर्हिष्ट । कर्म्मणि गर्ह्यते । अगर्हि । णिचि गर्हयति-ते । अजिगर्हत्-त । कृत्सु गर्हणीयम् । गर्हणम् । गर्हकः । गर्ही । गर्हिता । गर्हितः । गर्हणा गर्हितुम् । गर्हित्वा । संगर्ह्य । गर्ह्यम् । गर्हमाणः गर्ह्यमाणः गर्हिष्यमाणः ।

गर्ह निन्दायां चुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

गर्हयति-ते । अजगर्हत्-त । कर्मणि गर्ह्यते अगर्हि । कृत्सु गर्हणीयम् । गर्ह्यम् । गर्हकः । गर्ही । गर्हयिता । गर्हितः । गर्हणा । गर्हयितुम् । गर्हयितव्यम् । गर्हयित्वा । गर्हयन् गर्हयमाणः । गर्ह्यमाणः । गर्हयिष्यन् ष्यमाणः ।

गाह विलोड़ने भ्वादिगणीयः सकर्म्मकः आत्मनेपदी वेट् ।

कर्त्तरि गाहते । गाहेत । अगाहिष्ट अगाढ़ । जगाहे । गाहिता गाढ़ा । गाहिषीष्ट घाक्षीष्ट । गाहिष्यते घाक्ष्यते । अगाहिष्यत् अघाक्ष्यत् । कर्म्मणि गाह्यते । अगाहि अगाहिषाताम् अघाक्षाताम् । णिचि । गाहयति-ते । अजीगहत्-त । कर्म्मणि गाह्यते अगाहि ।

कृत्सु । गाहनीयम् गाहनम् । गाहः । गाहकः । गाही । गाहिता गाढा । गाढ़ः । गाढ़िः । गाहितुम् गाढुम् । गाहित्वा गाढ्वा । अवगाह्य वगाह्य । गाह्यम् । गाहमानः गाह्यमानः । गाहिष्यमानः घाक्ष्यमाणः । अव-अवगाहे अवगाहते वगाहते ।

गुञ्ज कूजने भ्वादिगणीयः अकर्म्मकः परस्मैपदी सेट् ।

कर्त्तरि गुञ्जति । अगुञ्जीत् । जुगुञ्ज । भावे गुञ्ज्यते । अगुञ्जि । णिचि गुञ्जयति ।

क्तान्तेषु गुञ्जनीयम् गुञ्जनम् । गुञ्जकः । गुञ्जी । गुञ्जिता । गुञ्जितम् । गुञ्जा । गुञ्जितुम् । गुञ्जितव्यम् । गुञ्जित्वा । संगुञ्ज्य । गुञ्जम् । गुञ्जन् गुञ्जिष्यन् ।

गुप रक्षणे भ्वादिगणीयः परस्मैपदी सकर्म्मकः वेट् ।

कर्त्तरि गोपायति । गोपायेत् । गोपायतु । अगोपायत् । अगोपायीत् अगोपीत् अगौप्सीत् । गोपायाम्-बभूव-आस-चकार जुगोप । गोपायिता गोपिता गोप्ता । गोपाय्यात् गुप्यात् । गोपायिष्यति गोपिष्यति गोप्स्यति । कर्म्मणि गोपाय्यते गुप्यते । अगोपायि अगोपि ।

णिचि गोपाययति-ते गोपयति-ते । सनि जुगोपायिषति जुगोपिषति जुगुप्सति ।

कृत्सु गोपायनीयम् गोपनीयम् । गोपायनम् गोपनम् । गोपायकः गोपकः । गोपायी गोपी । गोपायिता गोपिता गोप्ता । गोपायितः गुप्तः । गोपाया गुप्तिः । गोपायितुम् गोपितुम् गोप्तुम् । गोपायितव्यम् गोपितव्यम् गोप्तव्यम् । गोपायित्वा गोपित्वा गुप्त्वा । संगोपाय्य संगुप्य । णिजन्तस्य संगोपाय्य संगोप्य । गोप्यम् । गोपायन् गोपाय्यमानः । गोपायिष्यन् गोपिष्यन् गोप्स्यन् । गोपायिष्यमाणः गोपिष्यमाणः गोप्स्यमानः ।

गुप निन्दायां भ्वादिगणीयः सकर्म्मकः आत्मनेपदी सेट् ।

कर्त्तरि । जुगुप्सते । जुगुप्सेत । अजुगुप्सिष्ट । जुगुप्साम्-बभूव-आस-चक्रे । कर्म्मणि जुगुप्स्यते । क्तत्सु । जुगुप्सनीयम् । जुगुप्सनम् । जुगुप्सकः । जुगुप्सी । जुगुप्सिता । जुगुप्सितम् । जुगुप्सा । जुगुप्सितुम् । जुगुप्सितव्यम् । जुगुप्सित्वा । संजुगुप्स्य । जुगुप्स्यम् । जुगुप्समानः जुगुप्स्यमानः । जुगुप्सिष्यमाणः ।

गुम्फ ग्रन्थने तुदादि० सक० पर० सेट् ।

कर्त्तरि गुम्फति । अगुम्फीत् । जुगुम्फ । गुम्फिता । कर्म्मणि गुम्फ्यते । अगुम्फि । णिचि गुम्फयति । क्तत्सु गुम्फनीयम् गुम्फनम् । गुम्फः । गुम्फकः । गुम्फी गुम्फिता । गुम्फितः । गुम्फा । गुम्फितुम् । गुम्फित्वा गुफित्वा । संगुम्फ्य । गुम्फ्यम् । गुम्फन् गुम्फ्यमानः गुम्फि-ष्यन् ष्यमाणः ।

गुर उद्यमे तुदादि० अक० आत्मने० सेट् ।

गुरते । गुरेत । अगुरिष्ट । गुरितासे । भावे । गुर्य्यते । अगुरि । णिचि गुरयति-ते । अजूगुरत्-त । क्तत्सु गुरणीयम् गुरणम् । गूर्णः । गुरित्वा । गुरमाणः गुरिष्यमाणः ।

गुह संवरणे भ्वादिगणीयः उभयपदी सक० वेट् ।

कर्त्तरि गूहति गूहते । अगूहीत् अघुक्षत् । अघुक्षत अगूढ़ । अगूहिषाताम् अघुक्षाताम् । अगूहिषत अघुक्षन्त । अगूहिषि अघुक्षि । अगूहिष्वहि अगूह्वहि । अगूहिष्महि अघुक्ष्महि ।

कर्म्मणि गुह्यते । अगूहि । णिचि गूहयति-ते । सनि जुघुक्षति-ते ।

कृत्सु गूहनीयम् । गूहनम् । गूहः । गूहकः । गूही । गूहिता गोढ़ा । गूढ़ः । गूढ़िः । गूहितुम् गोढुम् । गूहितव्यम् गोढ़व्यम् । गुहित्वा । गूढ्वा । संगुह्य । गोह्यः । गूहन् गूहमानः गूहिष्यन् ष्यमाणः घ्रक्ष्यन् क्ष्यमाणः ।

गूर वधे दिवादि० सक० आत्म० सेट् ।

गूर्य्यते । अगूरिष्ट । णिचि गूरयति । कृत्सु गूरणीयम् गूरणम् । गूरिता । गूर्णः । गूर्य्यमाणः ।

गॄ स्तुतौ क्र्यादिगणीयः सकर्म्मकः परस्मैपदी सेट् ।

कर्त्तरि गृणाति । अगारीत् । जगार जगरतुः । गर्त्ता । ग्रियात् । गरिष्यति ।

अनु-प्रति—प्रोत्साहने । अनुगृणाति प्रतिगृणाति प्रोत्साहयतीत्यर्थः ।

गृध लोभे दिवा० सक० पर० सेट्।

कर्त्तरि गृध्यति। अगृधत् अगर्द्धीत्। कर्म्मणि गृध्यते। अगर्द्धि। कृत्सु गर्द्धनीयम् गर्द्धनम्। गर्द्धनः। गर्द्धकः गर्द्धी। गर्द्धिता। गर्द्धितः। गर्द्धितुम्। गर्द्धितव्यम्। गर्द्धित्वा। गृध्नुः। गर्द्ध्यम्। गृध्यन्। गर्द्धिष्यन् ष्यमाणः।

गॄ गिलने तुदा० सक० पर० सेट्।

कर्त्तरि गिरति गिलति। गिरेत् गिलेत्। अगारीत् अगालीत्। जगार जगाल जगरतुः जगलतुः। गरीता गरिता गलीता गलिता। गीर्य्यात्। गरीष्यति गरिष्यति गलीष्यति गलिष्यति। कर्म्मणि गीर्य्यते। अगारि अगालि।

कृत्सु गरणीयम्। गलनीयम्। गिरणम् गिलनम् गरः गारकः। गारी। गरिता गरीता। गीर्णः। गीर्णिः। गरितुम् गरीतुम्। गरीत्वा गरित्वा। गिरन् गीर्य्यमाणः। गरीष्यन् गरिष्यन् ष्यमाणः। एवं लत्वपक्षे।

उत्—उद्गमने उद्गिरति उद्गारः सम् प्रतिज्ञायाम् आत्म० संगिरते संगिरमाणः। सङ्गरः।

गै गाने भ्वादि० सक० पर० अनिट्।

कर्त्तरि गायति। गायेत्। अगासीत्। जगौ। गाता। गेयात्। गास्यति। अगास्यत्।

कर्म्मणि गीयते अगायि । सनि जिगासति यङि जेगीयते ।
कृत्सु गानम् । गायनः। गायकः । गाता । गीतम् । गीतिः। गाथकः । संगीय । गेयम् कर्त्तरि गेयः।
गायन् । गीयमानः । गास्यन् गास्यमानः । वि—निन्दायाम् विगायति । कर्मणि विगीयते ।

ग्रन्थ ग्रन्थने क्रयादि० अक० पर० सेट् ।

कर्त्तरि ग्रथ्नाति । ग्रथ्नीयात् । अग्रन्थीत् । जग्रन्थ । जग्रथतुः जग्रन्थतुः जग्रन्थिथ
जग्रथिथ । ग्रथ्यात् ।
कर्म्मणि ग्रथ्यते । अग्रन्थि । णिचि ग्रन्थयति-ते । अजग्रन्थत्-त ।
कृत्सु ग्रन्थनीयम् ग्रन्थनम् । ग्रथनमपि । ग्रन्थः । ग्रन्थकः । ग्रन्थी । ग्रन्थिता । ग्रथितः ।
ग्रन्थितुम् । ग्रन्थित्वा ग्रथित्वा । संग्रथ्य । ग्रन्थनम् । ग्रथ्नन् ग्रथ्यमानः । ग्रन्थिष्यन् ष्यमाणः ।

ग्रस भक्षणे भ्वादि० पर० सक० सेट् ।

कर्त्तरि ग्रसति । अग्रासीत् अग्रसीत् । जग्रास । कर्म्मणि ग्रस्यते । अग्रासि । णिचि पर० ग्रासयति ।
कृत्सु ग्रसनीयम् । ग्रसनम् । ग्रासः । ग्रासकः । ग्रासी । ग्रसिता । ग्रस्तः । ग्रस्तिः । ग्रसितुम्
ग्रसितव्यम् । ग्रसित्वा ग्रस्त्वा । संग्रस्य । ग्रस्यः । ग्रसन् ग्रस्यमानः । ग्रसिष्यन् ष्यमाणः ।

ग्रह ग्रहणे क्र्यादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि गृह्णाति गृह्णीते । गृह्णीयात् गृह्णीत । गृह्णातु गृह्णीताम् । अगृह्णात् अगृह्णीत । अग्रहीत् । अग्रहीष्ट । जग्राह जगृहतुः जग्रहिथ जगृहे । ग्रहीतासि-से । गृह्यात् ग्रहीषीष्ट । ग्रहीष्यति-ते । अग्रहीष्यत्-त । कर्म्मणि गृह्यते । अग्राहि । णिचि । ग्राहयति ते । अजिग्रहत् त । कर्म्मणि ग्राह्यते । अग्राहि ।

कृत्सु ग्रहणीयम् ग्रहणम् । ग्रहः ग्राहः । ग्राहकः । ग्राही । ग्रहीता । गृहीतः । गृहीतिः । ग्रहीतुम् । ग्रहीतव्यम् । गृहीत्वा । संगृह्य । ग्राह्यः गृह्यः । गृह्णन् गृह्णानः । ग्रहीष्यन् ष्यमाणः ।

सम्-संग्रहे संगृह्णाति । अव-दृष्टिप्रतिबन्धे अवगृह्णाति । नि-निग्रहे (तिरस्कारे) निगृह्णाति । वि-विग्रहे युद्धकरणे समस्तस्य पृथक्करणे च विगृह्णाति युध्यते व्यस्तं करोति वा । आ-आग्रहे आगृह्णाति निर्बध्नाति । प्रति—प्रतिग्रहे स्वीकारे प्रतिगृह्णाति । अनु-अनुग्रहे अनुगृह्णाति ।

ग्लै विषादे भ्वादिगणीयः अकर्म्मकः परस्मैपदी अनिट् ।

कर्त्तरि ग्लायति । अग्लासीत् । जग्लौ । ग्लायात् ग्लेयात् । भावे ग्लायते । अग्लायि । णिचि । ग्लपयति ते । कृत्सु ग्लानीयम् ग्लानम् । ग्लायकः । ग्लायी । ग्लानः । ग्लानिः । ग्लातुम् । ग्लातव्यम् । ग्लात्वा । संग्लाय । ग्लेयम् । ग्लायन् । ग्लास्यन् ।

घट चेष्टायां भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट्।

कर्त्तरि घटते। घटेत। घटताम्। अघटत। अघटिष्ट। जघटे। घटितासे। घटिषीष्ट। घटिष्यते। अघटिष्यत। भावे। घट्यते। अघटि। णिचि घटयति-ते। अजीघटत्-त। सनि जिघटिषते। यङि जाघट्यते।

क्तत्सु। घटनीयम्। घटनम्। घटः। घटकः। घटिता। घटितः। क्तिन्नास्ति अङ् घटा। घटितुम्। घटितव्यम्। घटित्वा। सङ्घट्य। घट्यम्। घटमानः घटिष्यमाणः। सम्—घटि योजने। सङ्घटयति संयोजयति। वि—घटि वियोजने वि—घटयति वियोजयति।

घट्ट चालने चुरादि० उभयपदी सकर्म्मकः सेट्।

कर्त्तरि घट्टयति-ते। घट्टयेत्-त। घट्टयतु-ताम्। अघट्टयत्-त। अजघट्टत्-त। कर्म्मणि। घट्ट्यते। अघट्टि अघट्टयिषाताम् अघट्टिषाताम्।

क्तत्सु। घट्टनीयम्। घट्टनम्। घट्टः। घट्टकः। घट्टी। घट्टयिता। घट्टितः। घट्टना। घट्टयितुम्। घट्टयितव्यम्। घट्टयित्वा। सङ्घट्ट्य। घट्टयन् मानः घट्ट्यमानः। घट्टयिष्यन् ष्यमाणः कर्मणि घट्टिष्यमाणश्च।

घुष शब्दे चुरादि० उभय० सक० सेट्।

कर्त्तरि घोषयति-ते। घोषयेत्-त। घोषयतु-ताम्। अघोषयत्-त। अजूघुषत्-त। घोषयि-तासि-से। कर्म्मणि घोष्यते। अघोषि अघोषयिषाताम् अघोषिषाताम्।
कृत्सु घोषणीयम्। घोषणम्। घोषः। घोषकः। घोषी। घोषयिता। घोषितः। घोषणा। घोषयितुम्। घोषयितव्यम्। घोषयित्वा। सङ्घोष्य। घोष्यः। घोषयन्,माणः घोष्यमाणः। घोषयिष्यन्,ष्यमाणः।

घुष रवे भ्वादिगणीयः अकर्म्मकः परस्मैपदी सेट्।

कर्त्तरि घोषति। लुङि अघुषत्। णिचि घोषयति-ते। अजूघुषत्-त। कृत्सु घोषिता। घुषितः घुष्टः। घुष्टिः। घोषित्वा। संघुष्य। घोष्यः। घोषन्। घोषिष्यन्।

घूर्ण भ्रमणे तुदादि० उभयपदी अक०-सेट्।

कर्त्तरि घूर्णति-ते। घूर्णेत्-त। घूर्णतु-ताम्। अघूर्णत्-त। अघूर्णीत् अघूर्णिष्ट। जुघूर्ण जुघूर्णे। घूर्णितासि-से। घूर्ण्यात् घूर्णिषीष्ट। घूर्णिष्यति-ते। अघूर्णिष्यत्-त। भावे घूर्ण्यते। अघूर्णि। णिचि घूर्णयति-ते। अजुघूर्णत्-त। सनि जुघूर्णिषति-ते।

क्तांत्सु। घूर्णनीयम्। घूर्णनम्। घूर्णः। घूर्णकः। घूर्णी। घूर्णिता। घूर्णितः। घूर्णा। घूर्णितुम्।
घूर्णितव्यम्। घूर्णित्वा। संघूर्ण्य। घूर्णम्। घूर्णन्-मानः। घूर्णिष्यन्-ष्यमाणः।

घृष घर्षणे भ्वादिगणीयः पर० सक० सेट्।

कर्त्तरि घर्षति। घर्षेत्। अघर्षीत्। जघर्ष। घर्षिता। घृष्यात्। घर्षिष्यति। अघर्षिष्यत्। कर्म्मणि।
घृष्यते। अघर्षि। णिचि घर्षयति-ते। अजीघृषत्-त अजघर्षत्-त। सनि जिघर्षिषति।
क्तांत्सु घर्षणीयम्। घर्षणम्। घर्षः। घर्षकः। घर्षी। घर्षिता। घृष्टः। घृष्टिः। घर्षितुम्।
घर्षितव्यम्। घर्षित्वा घृष्ट्वा। संघृष्य। घर्षः। घर्षन्-घृष्यमाणः। घर्षिष्यन्-ष्यमाणः।

घ्रा गन्धोपादने भ्वादिगणीयः अक० ग्रहणमात्रे सक० पर० अनिट्।

कर्त्तरि जिघ्रति। जिघ्रेत्। जिघ्रतु। अजिघ्रत्। अघ्रात् अघ्रासीत्। जघ्रौ जघ्रिथ जघ्राथ।
जघ्रिव। घ्राता। घ्रायात् घ्रेयात्। घ्रास्यति। अघ्रास्यत्। भावे कर्म्मणि च घ्रायते। अघ्रायि।
णिचि घ्रापयति ते। अजिघ्रपत् त अजिघ्रिपत् त। सनि जिघ्रासति। यङि जेघ्रीयते।
क्तांत्सु घ्राणीयम्। घ्राणम्। जिघ्रः। व्याघ्रः। घ्रायकः। घ्रायी। घ्राता। घ्राणः घ्रातः।

घ्रातिः । घ्रातुम् । घ्रातव्यम् । घ्रात्वा । संघ्राय । घ्रेयः ॥ जिघ्रन् । घ्रास्यन् ।

चक्ष कथने अदादि० आत्म० सक० सेट् ।

कर्त्तरि चष्टे चक्षाते चक्षते चक्षे चक्षाथे चड्ढ्वे चक्षे चक्ष्वहे चक्ष्महे । चक्षीत । चष्टाम् । अचष्ट । अख्यत् अख्यत । चख्यौ चख्ये चचक्षे । ख्यातासि-से । ख्यायात् ख्येयात् । ख्यासीष्ट ख्यास्यति ते । सनि चिख्यासति ते । णिचि ख्यापयति ते । अचिख्यपत् त । कर्म्मणि ख्यायते । कृत्सु ख्यानीयम् । ख्यानम् । ख्यायकः । विचक्षणः । ख्यायी । चक्षुः । ख्याता । ख्यातः । ख्यातिः । ख्यातुम् । ख्यातव्यम् । ख्यात्वा । संख्याय । आख्येयम् । चक्षाणः ख्यास्यन् ख्यमानः । त्यागार्थे तु न ख्यादेशः समचक्षिष्ट । वि—आ विवरणे व्याचष्टे विवृणोति । व्याख्या ।

चकास दीप्तौ अदादि० अकर्म्मकः परस्मैपदी सेट् ।

कर्त्तरि चकास्ति चकास्तः चकासति । अचकासीत् । चकासाम्-बभूव-आस-चकार । भावे चकास्यते । णिचि चकासयति-ते । अचीचकासत्-त अचचकासत्-त । कृत्सु चकासनीयम् । चकासनम् । चकासः । चकासकः । चकासी चकासिता । चकासितः । चकासितुम् । चकासित्वा । सञ्चकास्य । चकास्यम् । चकासत् चकासिष्यन् ।

चम अदने भ्वादिगणीयः सकर्म्मकः परस्मैपदी सेट् ।

चमति विचमति । आचामति । अचमीत् । चचाम । चमिता । चम्यात् । चमिष्यति । कर्म्मणि चम्यते । अचमि । णिचि परस्मैपदं चमयति । अचीचमत् । सनि चिचमिषति । क्तत्सु । चमनीयम् । आचमनम् । आचमः । आचामः । चामकः । चामी । चमिता । चान्तः । चान्तिः । चमितुम् । चमित्वा चान्त्वा । आचम्य । चम्यम् । चमन् । आचामन् । आचम्यमानः । आचमिष्यन् ष्यमाणः ।

चर गमने भ्वादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

चरति । अचारीत् । चरिता । चरिष्यति । कर्म्मणि चर्य्यते । अचारि । णिचि चारयति-ते । अचीचरत्-त । कर्म्मणि चार्य्यते । अचारि अचारयिषाताम् अचारिषाताम् । यङि चं चूर्य्यते । क्तत्सु चरणीयम् । चरणम् । चरः । गोचरः खचरः जलचरः । सञ्चरः । चारः प्रचारः । चारकः । चारी चरिष्णुः चरित्रम् । चरिता । चरितः । चूर्णिः । चरितुम् । चरित्वा । सञ्चर्य्य । कर्मणि चर्य्यम् भावे चर्य्या । चरन् चर्य्यमाणः चरिष्यन् ष्यमाणः । सम्-संक्रमणे सञ्चरति । उत्-उदये आत्म० उच्चरते ।

चर्च अध्ययने चुरा० सक० उभयपदी सेट् ।

कर्त्तरि चर्चयति-ते । अचिचर्चत्-त । कर्म्मणि चर्च्यते अचर्चि ।
कृत्सु चर्चनीयम् । चर्चनम् । चर्चकः । चर्चयिता । चर्चिता । चर्चितः । चर्चना ।
चर्ची । चर्चयितुम् । चर्चयितव्यम् । चर्चयित्वा । सञ्चर्च्य । चर्च्यः । चर्चयन् मानः । चर्चयमानः
चर्चयिष्यन् ष्यमाणः । कर्म्मणि चर्चिष्यमाणोऽपि ।

चर्व्व भक्षणे विकल्पेन चुरादि० सक० उभयपदी पक्षे भ्वादिगणीयः पर० सेट् ।

कर्त्तरि चर्व्वयति-ते । चर्व्वति । अचिचर्व्वत्-त अचर्व्वीत् । कर्म्मणि चर्व्यते । अचर्व्वि ।
कृत्सु चर्व्वणीयम् । चर्व्वणम् । चर्वकः । चर्व्वी । चर्व्वयिता चर्व्विता । चर्व्वितः । चर्व्वणा चर्व्वा ।
चर्वयितुम् चर्व्वितुम् । चर्व्वयित्वा चर्व्वित्वा । सञ्चर्व्य । चर्व्यम् । चर्व्वयन् माणः चर्व्वन् ।
चर्व्यमाणः । चर्व्वयिष्यन् ष्यमाणः । चर्विष्यन् ष्यमाणः । कर्म्मणि चर्व्विष्यमाणोऽपि ।

चल चलने भ्वादिगणीयः अकर्म्मकः पर० सेट् ।

चलति । अचालीत् । चलिता । चल्यात् । भावे चल्यते । अचालि । णिचि पर० चलयति ।
अचीचलत् । कृत्सु चलनीयम् । चलनम् । चलः । चालः । चालकः । चाली । चलितः ।

चलितुम् । चलितव्यम् । चलित्वा । सञ्चल्य: । चाल्यम् । चलन् चलिष्यन् ।

चि चयने स्वादिगणीयः उभयपदी द्विकर्म्मकः अनिट् ।

कर्त्तरि चिनोति चिनुते । चिनुयात् चिन्वीत । चिनोतु चिनुताम् । अचिनोत् अचिनुत । अचैसीत् अचैष्टाम् अचेष्ट । चिकाय चिचाय । चिक्यतुः चिच्यतुः । चेतासि से । चीयात् चेषीष्ट । चेष्यति-ते । अचेष्यत्-त । कर्म्मणि चीयते । अचायि । णिचि चाययति ते । चपयतीत्येके । अचीचपत् । सनि चिकीषति-ते । चिचीषति-ते ।

कृत्सु चयनीयम् । चयनम् । चयः । चायः । चायकः । चायी । चेता । चितः । चितिः । चेतुम् । चेतव्यम् । अग्निचित् । चित्वा । सञ्चित्य । चेयम् । चिन्वन् चिन्वानः । चीयमानः । चेष्यन् ष्यमाणः । चायिष्यमाणः चेष्यमाणः । उप—उपचये बर्द्धने उपचिनोति अप—अपचये (हीनकरणे) अपचिनोति । कर्म्मकर्त्तरि उपचीयते अपचीयते । समुत् अभिउत् समुच्चये समुच्चिनोति अभ्युच्चिनोति ।

चित ज्ञाने भ्वादिगणीयः सकर्म्मकः प्र० सेट् ।

चेतति । अचेतीत् । चिचेत । कर्म्मणि चित्यते । अचेति । णिचि । चेतयति-ते । अची-चितत्-त । कृत्सु चेतनीयम् । चेतनम् । चेतः । चेतकः । असु चेतः । चेती । चेतिता ।

चित्तः । चित्तिः । णिजन्तस्य चेतना । चेतितुम् । चेतितव्यम् । चेतित्वा । सञ्चित्य । चित्यम् । चेतन् । चित्यमानः । चेतिष्यन् ष्यमाणः ।

चिन्त चिन्तने अदन्तचुरादि उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि चिन्तयति-ते । अचिचिन्तत्-त । चिन्त्यात् चिन्तयिषीष्ट । कर्म्मणि चिन्त्यते । अचिन्ति अचिन्तयिषातास् अचिन्तिषाताम् ।

क्तत्सु । चिन्तनीयम् । चिन्तनम् । चिन्तकः । चिन्ती । चिन्तयिता । चिन्तितः । चिन्तना चिन्ता । चिन्तयितुम् । चिन्तयितव्यम् । चिन्तयित्वा । सञ्चिन्त्य । चिन्त्यम् । चिन्तयन् मानः चिन्त्यमानः । चिन्तयिष्यन् ष्यमाणः । कर्म्मणि चिन्तिष्यमाणश्च ।

चुम्ब चुम्बने विकल्पचुरादि० उभयपदी सक० पक्षे भ्वादिगणीयः पर० सेट् ।

कर्त्तरि चुम्बयति-ते चुम्बति । चुम्बयेत् त चुम्बेत् । अचुचुम्बत् त अचुम्बीत् । चुम्बयाम्-बभूव-आस-चकार-चक्रे चुचुम्ब । चुम्बयिता चुम्बिता । चुम्ब्यात् चुम्बयिषीष्ट । कर्म्मणि चुम्ब्यते । अचुम्बि ।

क्तत्सु चुम्बनीयम् । चुम्बनम् । चुम्बकः । चुम्बी । चुम्बयिता चुम्बिता । चुम्बितः । चुम्बना चुम्बा । चुम्बयितुम् चुम्बितुम् । चुम्बयित्वा चुम्बित्वा । सञ्चुम्ब्य । चुम्ब्यम् । चुम्बयन् मानः चुम्ब्यमानः । चुम्बिष्यन् । चुम्बयिष्यन् ष्यमाणः । कर्म्मणि चुम्बिष्यमाणोऽपि ।

चुर स्तेये विकल्पचुरादि० उभयपदी पक्षे भ्वादिगणीयः पर० सक० सेट् ।
कर्त्तरि चोरयति ते चोरति । अचूचुरत् त अचोरीत् । कर्म्मणि चोर्य्यते चुर्य्यते ।
अचोरि । अचोरयिषाताम् अचोरिषाताम्, र ।
कृत्सु चोरणीयम् । चोरणम् । चोरः । चोरकः । चोरी । चोरयिता चोरिता । चोरितः ।
चोरणा । चूर्णिः । चोरयित्वा चोरित्वा । सञ्चोर्य्य सञ्चुर्य्य । चोर्य्यः । चोरयन् माणः चोर्य्यमाणः ।
चोरन् । चोरिष्यन् । चोरयिष्यन् ष्यमाणः । कर्म्मणि चोरिष्यमाणोऽपि ।

चूर्ण पेषणे चुरादि० सकर्म्मकः उभयपदी सेट् ।
चूर्णयति-ते । अचुचूर्णत्-त । कर्म्मणि चूर्ण्यते । अचूर्णि अचूर्णयिषाताम् अचूर्णिषाताम् ।
कृत्सु चूर्णनीयम् । चूर्णनम् । चूर्णकः । चूर्णी । चूर्णयिता । चूर्णितः । चूर्णना । चूर्णयितुम् ।
चूर्णयितव्यम् । चूर्णयित्वा । सञ्चूर्ण्य । चूर्ण्यः । चूर्णयन् मानः चूर्ण्यमानः । चूर्णयिष्यन्
ष्यमाणः । कर्म्मणि चूर्णिष्यमाणोऽपि ।

चेष्ट चेष्टने भ्वादि० आत्मनेपदी अकर्म्मकः सेट् ।
कर्त्तरि चेष्टते । अचेष्टिष्ट । चिचेष्टे । चेष्टितासे । चेष्टिषीष्ट । भावे चेष्ट्यते अचेष्टि ।

णिचि पर० चेष्टयति । अचिचेष्टत् अचचेष्टत् । कर्म्मणि चेष्ट्यते । अचेष्टि ।
कृत्सु चेष्टनीयम् चेष्टनम् । चेष्टकः । चेष्टी । चेष्टितः । चेष्टा । चेष्टितुम् । चेष्टितव्यम् । चेष्टित्वा ।
सञ्चेष्ट्य । चेष्ट्यम् । चेष्टमानः । चेष्टिष्यमाणः ।

च्यु गतौ भ्वादिगणीयः आत्मनेपदी सकर्म्मकः अनिट् ।

कर्त्तरि च्यवते । अच्यविष्ट । चुच्युवे । च्योतासे । च्योषीष्ट । च्योष्यते ।
कर्म्मणि च्यूयते । अच्यावि । णिचि च्यावयति-ते । अचुच्यवत्-त ।
कृत्सु च्यवनीयम् । च्यवनम् । च्यवनः । च्यवः । च्यावकः । च्यावी । च्योता । च्युतः । च्युतिः ।
च्योतुम् । च्योतव्यम् । च्युत्वा । संच्युत्य । च्यव्यम् आवश्यके तु च्याव्यम् । च्यवमानः च्यूय-
मानः । च्योष्यमाणः । कर्म्मणि च्याविष्यमाणोऽपि ।

च्युत क्षरणे भ्वादिगणीयः अकर्म्मकः परस्मैपदी सेट् ।

कर्त्तरि च्योतति । अच्युतत् अच्योतीत् । चुच्योत । च्योतिता । भावे च्युत्यते । अच्योति । णिचि
च्योतयति ते । अचुच्युतत् त ।

कृत्सु चोतनीयम् । चोतनम् । चोतः । चोतकः । चोती । चोतिता । चोतितम् चुतितम् । चोतितुम् । चोतितव्यम् । चोतित्वा । संचुत्य । चोत्यम् । चुतन् । चोतिष्यन् ।

छद संवरणे वि० चुरादिगणीयः उभयपदी पक्षे भ्वादिगणीयः उभयपदी सेट् ।

छादयति-ते । छदति-ते । अचिच्छदत्-त अच्छादीत् अच्छदीत् अच्छदिष्ट । कर्म्मणि छाद्यते छद्यते । अच्छादि ।

कृत्सु छादनीयम् छदनीयम् । छादनम् छदनम् । छादः छदः । उरश्छदः । छादकः । छादी । ह्रस् छदिः । छादयिता छदिता । छादितः छन्नः । छादना छत्तिः । छादयितुम् छदितुम् । छादयितव्यम् छदितव्यम् । छादयित्वा छदित्वा । संछाद्य संछद्य । छाद्यम् छद्यम् । छादयन् मानः छदन् छदमानः । छाद्यमानः छद्यमानः । छादयिष्यन् ष्यमाणः छदिष्यन् ष्यमाणः ।

छर्द वमने चुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि छर्दयति-ते । अचच्छर्दत्-त । कर्म्मणि छर्द्यते अच्छर्दि ।

कृत्सु छर्दनीयम् । छर्दनम् । छर्दः । छर्दकः । छर्दी । छर्दिता । छर्दितः । छर्दितुम् । छर्दितव्यम् ।

छर्द्दित्वा । संछर्द्य । छर्द्यः । छर्दयन् मानः । छर्द्यमानः । छर्दयिष्यन् ष्यमाणः ।
कर्म्मणि छर्दिष्यमाणश्च ।

छिद् छेदने रुधादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि छिनत्ति छिन्तः छिन्ते । छिन्द्यात् छिन्दीत । छिनत्तु छिन्ताम् । अच्छिनत् अच्छिन्त । अच्छिदत् अच्छेत्सीत् अच्छित्त । चिच्छेद चिच्छिदे । छेत्तासि-से । छिद्यात् छेत्सीष्ट । छेत्स्यति-ते । कर्म्मणि छिद्यते । अच्छेदि । णिचि च्छेदयति-ते । अचिच्छिदत्-त ।
कृत्सु छेदनीयम् । छेदनम् । छेदः। छेदकः। छेदी । छेत्ता । छिन्नः । छित्तिः । छेत्तुम् । छेतव्यम् । छित्त्वा । संछिद्य । छेद्यः । छिन्दन् छिन्दानः छिद्यमानः । छेत्स्यन् छेत्स्यमानः । वि—वियोगे विच्छिनत्ति वियुनक्ति विच्छेदः । विच्छित्तिः । उत्—नाशने उच्छिनत्ति नाशयति । उच्छेदः ।

जक्ष भक्षणे अदादिगणीयः पर० सक० सेट् ।

कर्त्तरि जक्षिति जक्षितः जक्षति जक्षिषि जक्षिथः जक्षिथ जक्षिमि जक्षिवः जक्षिमः । जक्ष्यात् । जक्षितु । अजक्षीत् अजक्षत् । अजक्षीत् । जजक्ष । कर्म्मणि । जक्ष्यते । अजक्षि । णिचि पर० जक्षयति । अजजक्षत् ।

कृत्सु जघ्वणीयम् जघ्वणम् । जघ्वः । जघ्वकः । जघ्वी । जघ्विता । जघ्वितः । जघ्वा । जघ्वितुम् । जघ्वितव्यम् । जघ्वित्वा । संजघ्व्य । जघ्व्यः । जघ्वत् । जघ्व्यमाणः । जघ्विष्यन् ष्यमाणः ।

जन जनने दिवा० अक० आत्म० सेट् ।

कर्त्तरि जायते । जायेत । अजनि अजनिष्ट अजनिषाताम् । जज्ञे । जनिताहे । जनिषीष्ट । भावे जायते जन्यते । अजनि । णिचि परस्मैपदी जनयति । अजीजनत् । कर्म्मणि जन्यते । अजनि अजानि अजनिषाताम् अजानिषाताम् अजनयिषाताम् । कृत्सु जननीयम् जननम् । जनः । अग्रजः । जनकः । इष्णु-प्रजनिष्णुः । जनिता । जातः । जातिः । जनितुम् । जनितव्यम् । जनित्वा । संजाय संजन्य । जन्यम् । जायमानः जन्यमानः । जनिष्यमाणः । कसौ जज्ञिवान् ।

जप जपने भ्वादिगणीयः पर० सक० सेट् ।

कर्त्तरि जपति । अजापीत् अजपीत् । जजाप । कर्म्मणि जप्यते । अजापि । णिचि जापयति-ते अजीजपत्-त । कर्म्मणि जाप्यते । अजापि । अजापिषाताम् आजापयिषाताम् । कृत्सु जपनीयम् जपनम् । जपः । जापः । जापकः । जापी । जपिता । जप्तः । जप्तिः । जपितुम् । जपितव्यम् । जपित्वा जप्त्वा । प्रजप्य । जप्यम् । जपन् । जप्यमानः । जपिष्यन् ष्यमाणः । उप-भेदने उपजपति भिनत्ति । उपजापः ।

जल्प कथायां (परमतनिराकरणपूर्व्वकस्वमतस्थापने) भ्वादिगणीयः सक० पर० सेट् ।

कर्त्तरि जल्पति । अजल्पीत् । जजल्प । जल्प्यात् । कर्म्मणि जल्प्यते । अजल्पि । णिचि जल्पयति-ते । अजजल्पत्-त । कर्म्मणि जल्प्यते अजल्पि । अजल्पिषाताम् अजल्पयिषाताम् ।

कृत्सु जल्पनीयम् । जल्पनम् । जल्पः। जल्पकः । जल्पी । जल्पिता । जल्पितः। जल्पा । जल्पितुम् । जल्पितव्यम् । जल्पित्वा । संजल्प्य । जल्प्यम् । जल्पन् । जल्प्यमानः । जल्पिष्यन् ष्यमाणः।

जस वधे चुरादिगणीयः सक० उभयपदी सेट् । प्रायेण उत्पूर्व्वः ।

कर्त्तरि उज्जासयति-ते । उदजीजसत्-त । कर्म्मणि उज्जास्यते । उदजासि ।

कृत्सु उज्-जासनीयम् । जासनम् । जासः । जासकः । जासी । जासयिता । जासितः । जासना । जासयितुम् । जासयितव्यम् । जासयित्वा । संजास्य । जास्यम् । जासयन् मानः । जास्यमानः । जासयिष्यन् ष्यमाणः। कर्म्मणि जासिष्यमाणश्च । सर्व्वत्र उत् पूर्व्वं देयम् ।

जागृ जागरणे अदादिगणीयः अक० पर० सेट् ।

कर्त्तरि जागर्त्ति जागृतः जाग्रति । जागृयात् । जागर्तु जागृहि । अजागः अजागरुः। अजागरीत् ।

जागराम् बभूव आस चकार जजागार। आमभावपक्षे जजागरतुः। जागरिता। भावे जागर्य्यते। अजागरि। णिचि जागरयति ते अजजागरत् त। कर्म्मणि जागर्य्यते अजागरि अजागारि। क्तत्सु जागरणीयम्। जागरणम्। जागरः। जागरकः। जागरी। जागरिता। जागरितः। जागर्य्या। जागरितुम्। जागरितव्यम्। जागरित्वा। प्रजागर्य्य। जागर्य्यम्। जाग्रत्। जागरिष्यन्।

जि जये भ्वादिगणीयः पर० द्विक० अनिट्।

कर्त्तरि जयति। जयेत्। अजैषीत्। जिगाय जिग्यतुः जिगयिथ जिगेथ जिग्यिव जिग्यिम। जेता। जीयात्। जेष्यति। कर्म्मणि जीयते। अजायि। अजायिषाताम् अजेषाताम्। जिग्ये। णिचि जापयति-ते। अजीजपत् त। सनि जिगीषति। वि-परा-आत्मने० विजयते। पराजयते। क्तत्सु जयनीयम्। जयनम्। जयः। जयी। जेता। जितः। जितिः। जेतुम्। जेतव्यम्। जित्वा। विजित्य। जेयः। जयन्। जीयमानः। जेष्यन् ष्यमाणः। क्विप्-सर्व्वजित्। ष्णुक् जिष्णुः।

जीव प्राणने भ्वादिगणीयः अक० पर० सेट्।

कर्त्तरि जीवति। अजीवीत्। भावे जीव्यते अजीवि। णिचि जीवयति ते। अजीजिवत् त अजिजीवत् त। क्तत्सु जीवनीयम्। जीवनम्। जीवः। जीवकः। जीवी। जीविता। जीवितः।

जीवितुम् । जीवितव्यम् । जीवित्वा । संजीव्य । जीव्यः । जीवन् । जीविष्यन् ।
उप-आश्रये उपजीवति आश्रयति उपजीवी । उपजीव्यः ।

जुष प्रीतिसेवनयोः तुदादिगणीयः आत्मनेपदी सक० सेट् ।

कर्त्तरि जुषते । अजोषिष्ट । भावे जुष्यते । अजोषि । णिचि जोषयति-ते । अजूजुषत्-त ।
कृत्सु जोषणीयम् जोषणम् । जोषः । जोषकः । जोषी । जोषिता । जुष्टः । जुष्टिः । जोषितुम् ।
जोषितव्यम् । जोषित्वा । संजुष्य । जुष्यम् । जुषमाणः जोषिष्यमाणः । क्विपि जुट् ।

जुष तर्कणे त्रि० चुरादिगणीयः उभयपदी पक्षे स्वादिगणीयः पर० सेट् ।

कर्त्तरि जोषयति-ते जोषति । अजूजुषत्-त अजोषीत् ।
कृत्सु जोषयिता । जोषितः । जोषणा । जोषयितुम् जोषयितव्यम् । जोषयित्वा । संजोष्य । जोष्यः ।
पक्षे जुष्यः जोषयन् माणः । जोषयिष्यन् ष्यमाणः । अन्यत् तुदादिगणीयवत् ।

जृम्भ जृम्भणे स्वादिगणीयः अकर्म्मकः आत्मनेपदी सेट् ।

कर्त्तरि जृम्भते । अजृम्भिष्ट । जजृम्भे । भावे जृम्भ्यते अजृम्भि । णिचि जृम्भयति-ते । यङि जरीजृम्भ्यते ।
कृत्सु जृम्भणीयम् जृम्भणम् । जृम्भकः । जृम्भी । जृम्भिता । जृम्भितः । जृम्भा । जृम्भितुम् ।

जृम्भितव्यम् । जृम्भित्वा । संजृम्भ्य । जृम्भणम् । जृम्भमाणः जृम्भिष्यमाणः ।

जॄ वयोहानौ वि० चुरादिगणीयः उभयपदी पक्षे क्र्यादि० पर० अक० सेट् ।

कर्त्तरि जारयति ते पक्षे जॄणाति । अजीजरत् त । अजारीत् । भ्वादि पक्षे जजार जजरतुः । जार्य्यात् जारयिषीष्ट । जीर्य्यात् । जारयिष्यति ते जरीष्यति जरिष्यति । क्तत्सु जरणीयम् जरणीयम् । जारः जरः । जारकः । जारी । जारयिता जरीता जरिता । जारितः जीर्णः । जारणा । जीर्णिः । जारयितुम् जरीतुम् जरितुम् । जारयितव्यम् जरीतव्यम् जरितव्यम् । जारयित्वा जीर्त्वा । संजार्य्य संजीर्य्य । जार्य्यम् । जारयन् माणः । जॄणन् । जारयिष्यन् जरीष्यन् जरिष्यन् । केचित्तु विकल्पेनेमं मितमाङ्क्षन्ते जरयतीत्यादिरपि ।

जॄ जरायां दिवा० पर० अकर्म्मकः सेट् ।

कर्त्तरि जीर्य्यति । अजरत् अजारीत् । जजार जजरतुः । जरीता जरिता । णिचि जरयति ते । क्तत्सु जरणीयम् । जरणम् । जरः । जारकः । जारी । जरीता जरिता । जीर्णः । जरा । जरीतुम् जरितुम् । जरीतव्यम् जरितव्यम् । जीर्त्वा । संजीर्य्य । जार्य्यम् । अजर्य्यम् सङ्गतम् । जीर्य्यन् । जरीष्यन् जरिष्यन् ।

ज्ञा बोधने क्र्यादिगणीयः सकर्म्मकः परस्मैपदी अनिट् ।

कर्त्तरि जानाति । अज्ञासीत् । जज्ञौ । ज्ञायात् ज्ञेयात् । ज्ञास्यति । कर्म्मणि ज्ञायते अज्ञायि । णिचि ज्ञापयति ते । अजिज्ञपत् त । सनि आत्मनेपदी जिज्ञासते । प्रतिज्ञाद्यर्थभेदे च आत्मनेपदी प्रति-प्रतिजानीते । अप-अपजानीते निह्नुते इत्यर्थः । संजानीते प्रवर्त्तते इत्यर्थः । कृत्सु ज्ञानीयम् । ज्ञानम् । ज्ञः विज्ञः प्रज्ञः अभिज्ञः । संज्ञा प्रज्ञा । ज्ञायकः । ज्ञायी । ज्ञाता । ज्ञातः । ज्ञातिः । णिजन्तस्य ज्ञापना । ज्ञातुम् ज्ञातव्यम् । ज्ञात्वा । संज्ञाय । ज्ञेयम् । जानन् । प्रतिजानानः । ज्ञायमानः । ज्ञास्यन् । ज्ञास्यमानः । क्वसौ जज्ञिवान् ।

ज्ञा मारणे तोषणे श्रावणे च चुरादि० उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि ज्ञपयति ते । अजिज्ञपत् त । व्यजिज्ञपत् त । कर्म्मणि ज्ञप्यते अज्ञपि अज्ञापि । सनि ज्ञीप्सति । कृत्सु ज्ञपनीयम् । ज्ञपनम् । ज्ञपकः । ज्ञपी । ज्ञपयिता । ज्ञप्तः । आज्ञप्तः । ज्ञप्तिः । विज्ञप्तिः (श्रावणा) ज्ञपयितुम् । ज्ञपयितव्यम् । ज्ञपयित्वा । संज्ञप्य । ज्ञप्यम् । ज्ञापयन् मानः । ज्ञप्यमानः । ज्ञपयिष्यन् ष्यमाणः । नियोगार्थे तु आज्ञापयतीत्यादौ न ह्रस्वः ।

ज्या जरायां क्र्यादिगणीयः अकर्म्मकः पर० सेट्।

कर्त्तरि जिनाति जिनीतः जिनन्ति। जिनीयात्। अज्यासीत्। जिज्यौ जिज्यतुः। जीयात्। ज्यास्यति। भावे जीयते। अज्यायि। णिचि। ज्यापयति ते। अजिज्यपत् त।

कृत्सु ज्यानीयम्। ज्यानम्। ज्यायकः। ज्यायी। ज्याता। जिनः। ज्यानिः। ज्यातुम्। ज्यातव्यम्। जित्वा। संजित्य। ज्येयम्। जिनन्। ज्यास्यन्।

ज्वर रोगे भ्वादिगणीयः पर० अकर्म्मकः सेट्।

कर्त्तरि ज्वरति। अज्वारीत्। णिचि ज्वरयति ते। अजिज्वरत् त।

कृत्सु ज्वरणीयम्। ज्वरणम्। ज्वारः। ज्वारकः। ज्वारी। ज्वरिता। ज्वरितः। ज्वरा। ज्वरितुम्। ज्वरितव्यम्। ज्वरित्वा। संज्वर्य्य। ज्वर्य्यम्। ज्वरन्। ज्वरिष्यन्। क्विपि जूः।

ज्वल दीप्तौ भ्वादिगणीयः अकर्म्मकः पर० सेट्।

कर्त्तरि ज्वलति। अज्वालीत्। भावे ज्वल्यते। अज्वालि। णिचि ज्वलयति ते ज्वालयति ते। अजिज्वलत् त। उपसर्गे तु प्रज्वलयति क्रियं हित्वा अन्यत्र ज्वरवत् रकारस्थाने लकारमात्रभेदः।

टङ्क विदारणे चुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि टङ्कयति ते । अटटङ्कत् त । कर्म्मणि टङ्कयते । अटङ्कि ।
क्तृस टङ्कनीयम् । टङ्कनम् । टङ्कः । टङ्ककः । टङ्की । टङ्किता । टङ्कितः । टङ्का टङ्कना ।
टङ्कयितुम् । टङ्कयितव्यम् । टङ्कयित्वा । उट्टङ्क्य । टङ्क्यम् । टङ्कयन् मानः। टङ्क्यमानः ।
टङ्कयिष्यन् ष्यमाणः । उत्—उल्लेखे उट्टङ्कयति उल्लिखति । उट्टङ्कितः ।

डी नभोगतौ भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट् ।

कर्त्तरि डयते । अडयिष्ट । क्तृस डयनीयम् डयनम् । डयः । डायकः। डायी । डयितः । डीनः ।
डयितुम् । डयितव्यम् । डयित्वा । संडीय । डेयम् । डयमानः । डयिष्यन् ।

ढौक गतौ भ्वादिगणीयः आत्मनेपदी सकर्म्मकः सेट् ।

कर्त्तरि ढौकते । अढौकीत् । डुढौके । कर्म्मणि ढौक्यते । अढौकि । णिचि ढौकयति ते ।
अडुढौकत् त ।
क्तृस ढौकनीयम् । ढौकनम् । ढौककः । ढौकी । ढौकिता । ढौकितः। ढौका । ढौकितुम् ।
ढौकितव्यम् । ढौकित्वा । संढौक्य । ढौक्यम् । ढौकमानः । ढौक्यमानः । ढौकिष्यमाणः ।

तंस भूषणे वि० चुरादिगणीयः उभयपदी पक्षे भ्वादिगणीयः सकर्म्मकः सेट्।

कर्त्तरि तंसयति ते तंसति। अतितंसत् त। अतंसीत्। कर्म्मणि तंस्यते। अतंसि।
क्षत्सु तंसनीयम्। तंसनम्। तंसः। तंसकः। तंसी। तंसयिता तंसिता। तंसितः। तंसा
तंसना। तंसयितुम् तंसितुम्। तंसयितव्यम् तंसितव्यम्। तंसयित्वा तंसित्वा। अवतंस्य।
तंसम्। तंसयन् मानः तंस्यमानः। तंसयिष्यन् ष्यमाणः तंसिष्यमाणः।

तक्ष तनूकरणे भ्वादिगणीयः स्वादिश्च अन्यत्रार्थे भ्वादि० पर० वेट्।

कर्त्तरि तक्षति तक्ष्णोति अक्षमार्थे तक्षति। तक्षतः तक्ष्णुतः। अतक्षीत् अतक्षिष्टाम् अतष्टाम्।
क्षत्सु तक्षणीयम्। तक्षणम्। तक्षः। तक्षकः। तक्षी। तक्षिता तष्टा। तष्टः। तष्टिः। तक्षितुम्
तष्टुम्। तक्षितव्यम् तष्टव्यम्। तक्षित्वा तष्ट्वा। संतक्ष्य। तक्ष्यम्। तक्षन् तक्ष्णुवन् तक्ष्य
माणः। तक्षिष्यन् तक्ष्यन्। तक्षिष्यमाणः तक्ष्यमाणः। क्विपि काष्ठतट्। प्रनितक्षति।

तड़ ताड़ने चुरादि० उभयपदी सकर्म्मकः सेट्।

कर्त्तरि ताड़यति ते। अतीतड़त् त। कर्म्मणि ताड्यते। अताड़ि।
क्षत्सु ताड़नीयम् ताड़नम्। ताड़ः। ताड़कः। ताड़ी। ताड़यिता। ताड़ितः। ताड़ना।

ताड़यितुम्। ताड़यितव्यम्। ताड़यित्वा। संताड्य। ताड्यम्। ताड़यन् मानः ताड्यमानः। ताडयिष्यन् ष्यमाणः। कर्म्मणि ताड़िष्यमाणश्च।

तन विस्तारे तनादि० उभयपदी सकर्म्मकः सेट्।

कर्त्तरि तनोति तनुतः तन्वन्ति। तनोषि तनुथः तनुथ। तनोमि तन्वः तनुवः तन्मः तनुमः। तनुते तन्वाते तन्वते। तन्यात् तन्वीत। तनोतु तनुताम्। अतनोत् अतनुत। अतानीत् अतनीत्। अतत अतनिष्ट अतनिषाताम् अतनिषत। अतथाः अतनिष्ठाः। ततान तेनतुः तेनुः तेनिथ। तेने। तनितासि से। तन्यात् तनिषीष्ट। तनिष्यति ते।

कर्म्मणि तन्यते। अतानि। णिचि तानयति। अतीतनत्। सनि तितनिषति ते तितांसति ते। कृत्सु तननीयम् तननम्। तानः। तानकः। तानी। तनिता। ततः। ततिः। तनितुम्। तनितव्यम्। तनित्वा तत्वा। अवतत्य। तान्यम्। तन्वन् तन्वानः। तन्यमानः। तनिष्यन् ष्यमाणः। क्विप् परीतत्। क्वसौ तेनिवान्।

तप तापे भ्वादिगणीयः परस्मैपदी अकर्म्मकः अनिट् ।

कर्त्तरि तपति । अताप्सीत् । तताप तेपतुः तेपिथ ततप्थ । तप्ता । भावे तप्यते । अतापि ।
णिचि तापयति ते । अतीतपत् त ।
कृत्सु तपनीयम् । तपनम् । ल्यु-तपनः । तपः । तापः । णिजन्तस्य परन्तपः द्विषन्तपः ।
तापकः । तापी । तप्ता । तप्तः । तप्तिः । तप्तुम् । तप्तव्यम् । तप्त्वा । संतप्य । तप्यम् । तपन् तप्स्यन् ।

तप तापे दिवादिगणीयः आत्मनेपदी अकर्म्मकः अनिट् ।

कर्त्तरि तप्यते । तप्येत । अन्यत् भ्वादिगणीयवत् । विशेषस्त्वेषः तप्यमानः । तप्स्यमानः ।

तम खेदे दिवादिगणीयः पर० अकर्म्मकः सेट् ।

कर्त्तरि ताम्यति । अतमत् अतमीत् । तताम तेमतुः । भावे तम्यते । अतामि । णिचि
तमयति ते । अतीतमत् त । कर्म्मणि तम्यते । अतामि अतमि ।
कृत्सु तमनीयम् तमनम् । तमः । तमकः । तमी । तमिता । तान्तः । तान्तिः । तमितुम् ।
तमितव्यम् । तमित्वा तान्त्वा । संतम्य । तम्यम् । ताम्यन् तमिष्यन् ।

तर्क भाषायां (?) चुरादिगणीयः उभयपदी सकर्म्मकः सेट्।

कर्त्तरि तर्कयति ते। अततर्कत्। कर्म्मणि तर्क्यते। अतर्कि। कृत्सु तर्कणीयम् तर्कणम्। तर्कः। तर्ककः तर्की। तर्कयिता। तर्कितः। तर्कणा। तर्कयितुम्। तर्कयितव्यम्। तर्कयित्वा। संतर्क्य। तर्क्यम्। तर्कयन् मानः तर्क्यमाणः। तर्कयिष्यन् ष्यमाणः कर्म्मणि तर्कयिष्यमाणश्च।

तर्ज्ज तिरस्कारे वि० चुरादि० उभयपदी पक्षे भ्वादिगणीयः आत्मने० सकर्म्मकः सेट्।

कर्त्तरि तर्ज्जयति ते तर्ज्जते। अततर्ज्जत् त अतर्ज्जिष्ट। कर्म्मणि तर्ज्यते अतर्ज्जि। कृत्सु तर्ज्जनीयम्। तर्ज्जनम्। तर्ज्जः। तर्ज्जकः। तर्ज्जी। तर्ज्जयिता तर्ज्जिता। तर्ज्जितः। तर्ज्जना तर्ज्जा। तर्ज्जयितुम् तर्ज्जितुम्। तर्ज्जयितव्यम् तर्ज्जितव्यम्। तर्ज्जयित्वा। तर्ज्जित्वा। संतर्ज्य। तर्ज्यम्। तर्ज्जयन् मानः तर्ज्जमानः तर्ज्यमानः। तर्ज्जयिष्यन् ष्यमाणः। कर्म्मणि तर्ज्जयिष्यमाणोऽपि। तर्ज्जिष्यमाणः।

तर्द्द हिंसायां भ्वादिगणीयः पर० सकर्म्मकः सेट्।

कर्त्तरि तर्द्दति। अतर्द्दीत्। ततर्द्द। कर्म्मणि तर्द्यते। अतर्द्दि। णिचि तर्द्दयतिते। अततर्द्दत् त। १०२

कृत्सु तर्दनीयम् । तर्दनम् । तर्दकः । तर्दः । तर्दी । तर्दिता । तर्दितः । तर्दी । तर्दितुम् ।
तर्दितव्यम् । तर्दित्वा । संतर्द्य । तर्द्यम् । तर्दन् । तर्द्यमानः । तर्दिष्यन् ष्यमाणः ।

तिज तेजने चुरादि० उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि तेजयति ते । अतितेजत् त । कर्म्मणि तेज्यते अतेजि । कृत्सु तेजनीयम् । तेजनम् ।
अपि तेजः । तेजकः । तेजी । तेजयिता । तेजितः । तेजना । तेजयितुम् । तेजयि-
तव्यम् । तेजयित्वा । संतेज्य । तेज्यम् । तेजयन् मानः । तेज्यमानः । तेजयिष्यन्
ष्यमाणः कर्म्मणि तेजिष्यमाणश्च । उत्-उद्दीपने उत्तेजयति उद्दीपयति । उत्तेजितः । उत्तेजना ।

तिज क्षमायां भ्वादिगणीयः आत्मनेपदी सक० सेट् ।

कर्त्तरि तितिक्षते । अतितिक्षिष्ट । कर्मणि तितिक्ष्यते अतितिक्षि । कृत्सु तितिक्षणीयम् । तितिक्षणम् ।
तितिक्षकः । तितिक्षी । उ-तितिक्षुः । तितिक्षिता । तितिक्षितः । तितिक्षा । तितिक्षितुम् ।
तितिक्षितव्यम् । तितिक्षित्वा । संतितिक्ष्य । तितिक्ष्यम् । तितिक्षमाणः । तितिक्ष्यमाणः ।
तितिक्षिष्यमाणः ।

तुद व्यथने तुदादिगणीयः उभयपदी सकर्म्मकः अनिट्।

कर्त्तरि तुदति ते। अतौत्सीत् अतुत्त। तुतोद तुतोदिथ तुतुदे। तोत्तासि से। तुद्यात् तोत्सीष्ट। तोत्स्यति ते। कर्म्मणि तुद्यते अतोदि। णिचि तोदयति ते। अतूतुदत् त। सनि तुतुत्सति ते। कृत्सु तोदनीयम्। तोदनम्। तोदः। तोदकः। तोदी। तोत्ता। तुन्नः। तुत्तिः। त-तोत्तम्। तोत्तुम्। तोत्तव्यम्। तुत्त्वा। संतुद्य। तोद्यम्। आतोद्यम्। तुदन्, मानः। तुद्यमानः। तोत्स्यन्, स्यमानः।

तुष तोषे दिवादिगणीयः परस्मैपदी अकर्म्मकः अनिट्।

कर्त्तरि तुष्यति। अतुषत्। तुतोष। तोष्टा। तुष्यात्। तोक्ष्यति। भावे तुष्यते। अतोषि।

णिचि तोषयति ते। अतूतुषत् त।

कृत्सु तोषणीयम्। तोषणम्। तोषः। तोषकः। तोषी। तोष्टा। तुष्टः। तुष्टिः। तोष्टुम्। तोष्टव्यम्। तुष्ट्वा। संतुष्य। तोष्यम्। तुष्यन्। तोक्ष्यन्।

तृप प्रीतौ दिवादिगणीयः परस्मैपदी अकर्म्मकः प्रीणने सकर्म्मकः वेट्।

कर्त्तरि तृप्यति। अतर्पीत् अताप्सीत् अत्राप्सीत् अतृपत्। ततर्प ततर्पिथ ततप्थ तत्रप्थ।

तर्पिता त्रप्ता तर्प्ता। तृप्यात्। तर्पिष्यति त्रप्स्यति तर्प्स्यति। भावे कर्म्मणि च तृप्यते। अतर्पि। णिचि तर्पयति ते। सन्‌सु तर्पणीयम्। तर्पणम्। तर्पणः। तर्पः। तर्पकः। तर्पी। तर्पिता त्रप्ता तर्प्ता। तृप्तः। तृप्तिः। तर्पितुम् त्रप्तुम् तर्प्तुम्। तर्पितव्यम् त्रप्तव्यम् तर्प्तव्यम्। तर्पित्वा तृप्त्वा। संतृप्य। तृप्यम्। तृप्यन् तृप्यमाणः। तर्पिष्यन् ष्यमाणः त्रप्-स्यन्-तर्प्-स्यन्-स्यमानः।

तृप प्रीतौ प्रीणने च स्वादिगणीयः पर० प्रीतौ अकर्म्मकः प्रीणने सक० सेट्।

कर्त्तरि तृप्नोति तृप्नुतः। अतर्पीत्। ततर्प ततर्पिथ। तर्पिता। तृप्यात्। तर्पिष्यति। सन्‌सु तर्पणीयमित्यादि दिवादिगणीयवत्। तर्पिता। तर्पितः। तर्पितुम्। तर्पितव्यम्। तर्पित्वा। तृप्नन् तृप्यमाणः। तर्पि-ष्यन् ष्यमाणः। इति भेदः।

तृष तृष्णायां दिवादिगणीयः पर० अकर्म्मकः सेट्।

कर्त्तरि तृष्यति। अतृषत्। ततर्ष। तर्षिता। तृष्यात्। तर्षिष्यति। भावे तृष्यते। अतर्षि। णिचि तर्षयति ते। अतीतृषत् त अततर्षत् त।

सन्‌सु तर्षणीयम् तर्षणम्। तर्षः। तर्षकः। तर्षी। तर्षिता। तर्षितः। तर्षी। तर्षितुम्। तर्षितव्यम्। तर्षित्वा। ङनज् तृष्णक्। नङ् तृष्णा। संतृष्य। तृष्यम्। तृष्यन्। तर्षिष्यन्।

तृह हिंसने रुधादि० पर० सकर्म्मकः सेट् तुदादिगणीयस्तु वेट्।

कर्त्तरि तृणेढि तृण्ढः तृंहन्ति तृणेक्षि तृण्ढः तृण्ढ तृणेह्मि तृंह्वः तृंह्मः। तृंह्यात्। तृणेढु।
अतृणेट्। अतर्हीत्। ततर्ह। ततृहतुः। तर्हिता। तृह्यात्। तर्हिष्यति। अतर्हिष्यत्।
कर्म्मणि तृह्यते। अतर्हि। णिचि तर्हयति ते। अतीतृहत् त। अततर्हत् त। तुदादेस्तु तृहति
अतर्क्षत् अतृक्षत्। तर्हिता त्राढा तर्ढा।
कृत्सु तर्हणीयम्, तर्हणम्। तर्हः। तर्हकः। तर्ही। तर्हिता। तर्हितः। तर्ढा। तर्हितुम्।
तर्हितव्यम्। तर्हित्वा। संतृह्य। तृह्यम्। तृंहन्, तृह्यमाणः। तर्हि-ष्यन्-ष्यमाणः। तुदादेस्तु
तृढः। तृढिः। तृहन्। तर्हि-ष्यन्-ष्यमाणः तर्क्ष्य-न्, तर्क्ष्य-माणः।

त्यज त्यागे भ्वादिगणीयः सकर्म्मकः पर० अनिट्।

कर्त्तरि त्यजति। अत्याक्षीत्। तत्याज। तत्यजिथ तत्यक्थ। तत्यजिव। त्यज्यात्। त्यक्ता। त्यक्ष्यति
कर्म्मणि त्यज्यते। अत्याजि। णिचि त्याजयति ते। अतित्यजत् त।
कृत्सु त्यजनीयम्। त्यजनम्। त्यागः। त्याजकः। घिनुण् त्यागी। त्यक्ता। त्यक्तः। त्यक्तिः।
त्यक्तुम्। त्यक्तव्यम्। त्यक्त्वा। सन्त्यज्य। त्याज्यम्। त्यजन् त्यज्यमानः। त्यक्ष्यन्, त्यक्ष्यमाणः।

त्रप लज्जायां भ्वादिगणीयः आत्मनेपदी अकर्म्मकः वेट्।

कर्त्तरि त्रपते। अत्रपिष्ट अत्रप्त। त्रेपे। त्रपिताहे त्रप्ताहे। त्रपिषीष्ट त्रप्सीष्ट। भावे त्रप्यते। अत्रापि। णिचि त्रपयति ते त्रापयति ते। अतित्रपत् त।

कृत्सु त्रपणीयम्। त्रपणम्। त्रापकः। इष्णुच् अपत्रपिष्णुः। त्रपिता त्रप्ता। त्रप्तः। त्रपा। त्रपितुम् त्रप्तुम्। त्रपितव्यम् त्रप्तव्यम्। त्रपित्वा त्रप्त्वा। सन्त्रप्य। त्रप्यम्। त्रपमाणः। त्रपिष्यमाणः त्रप्स्यमानः।

त्रस त्रासे वा दिवादि० पक्षे भ्वादिगणीयः पर० अकर्म्मकः सेट्।

कर्त्तरि त्रस्यति त्रसति। अत्रासीत् अत्रसीत्। तत्रास त्रेसतुः तत्रसतुः। त्रसिता। त्रसिष्यति। भावे त्रस्यते। अत्रासि। णिचि त्रासयति ते। अतित्रसत् त।

कृत्सु त्रसनीयम्। त्रसनम्। त्रासः। त्रासकः। त्रासी। त्रसिता। त्रस्तः। त्रस्तिः। त्रसितुम्। त्रसित्वा। क्नु-त्रस्नुः। सन्त्रस्य। त्रास्यम्। त्रस्यन् त्रसन्। त्रसिष्यन्।

त्रुट द्वैधीभावे अकर्म्मकः वा दिवा० पक्षे तुदादि० सेट् छेदनार्थे तु सक०।

कर्त्तरि त्रुट्यति त्रुटति। अत्रुटीत्। तुत्रोट। त्रुटिता। त्रुट्यात्। त्रुटिष्यति। भावे त्रुट्यते अत्रोटि। णिचि त्रोटयति ते। अतुत्रुटत् त।

कृत्सु लुटनीयम् । लुटनम् । लोटः । लोटकः । लोटी । लुटिता । लुटितः । लुटिः । लुटितुम् ।
लुटितव्यम् । लुटित्वा । संलुट्य । लोट्यम् । लुट्यन् लुटन् । लुटिष्यन् ।

लै पालने भ्वादिगणीयः आत्मनेपदी सकर्म्मकः अनिट् ।

कर्त्तरि लायते । अलास्त । लले । लाता । लासीष्ट । कर्म्मणि लायते । अलायि । णिचि लापयति ते । अलीलपत् त ।
कृत्सु लाणीयम् । लाणम् । लायः । लायकः । लायी । लाता । लाणः लातः । लातिः । लातुम् ।
लातव्यम् । लात्वा । सल्लाय । लेयम् । लायमाणः । लास्यमानः । कर्म्मणि लायिष्यमाणश्च ।

त्वर वेगे भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट् ।

कर्त्तरि त्वरते । अत्वरिष्ट । तत्वरे । त्वरितासे । भावे । त्वर्य्यते । अत्वारि । णिचि त्वरयति ते । अतत्वरत् त । कर्म्मणि अत्वरि अत्वारि ।
कृत्सु त्वरणीयम् । त्वरणम् । त्वारः । त्वारकः । त्वारी । त्वरिता । त्वरितः तूर्णः । तूर्णिः ।
त्वरा । त्वरितव्यम् । त्वरित्वा । सन्त्वर्य्य । त्वार्य्यम् । त्वरमाणः णिचः त्वर्य्यमाणः । त्वरिष्यमाणः ।

दण्ड दण्डने अदन्तचुरादि० उभयपदी द्विक० सेट्।

कर्त्तरि दण्डयति ते। अददण्डत् त। दण्डयितासि से। कर्म्मणि दण्ड्यते अदण्डि।

क्तत्स दण्डनीयम्। दण्डनम्। दण्डः। दण्डकः। दण्डी। दण्डयिता। दण्डितः। दण्डना। दण्डयितुम्। दण्डयितव्यम्। दण्डयित्वा। सन्दण्ड्य। दण्ड्यः। दण्डयन् मानः दण्ड्यमानः। दण्डयिष्यन् ष्यमाणः। कर्म्मणि दण्डिष्यमाणश्च।

दन्श दंशने भ्वादिगणीयः पर० सकर्म्मकः अनिट्।

कर्त्तरि दशति। दशेत्। दशतु। अदशत्। अदाङ्क्षीत् अदाङ्ष्टाम्। ददंश ददंशतुः ददशतुः। दश्यात्। दङ्क्ष्यति। कर्म्मणि दश्यते। अदंशि। णिचि दंशयति-ते। अददंशत्-त। सनि दिदङ्क्षति। यङि दंदश्यते।

क्तत्स दंशनीयम्। दंशनम्। दंशकः। दंशः। दंशी। दंष्टा। दष्टः। दष्टिः। श्वन्-दंष्ट्रा। दंष्टुम्। दंष्टव्यम्। दष्ट्वा। उपदश्य। दंश्यम्। दशन् दङ्क्ष्यन् दङ्क्ष्यमाणः। यङ उक दंदशूकः।

सम्—सन्दंशे (उभयपार्श्वतः कर्षणे) (सन्नहनने च) संदशति। संदंशः। संदंशितः। उप—उपदंशे (सत्वभोजने) मूलकेनोपदशति। णमुल् मूलकोपदंशम्।

दन्भ दम्भे स्वादिगणीयः परस्मैपदी अक० सेट् ।

कर्त्तरि दभ्नोति । दभ्नुतः । अदम्भीत् । ददम्भ देभतुः ददम्भतुः देभिथ ददम्भिथ । भावे दभ्यते ।
अदम्भि । णिचि दम्भयति-ते । अददम्भत् त । सनि दिदम्भिषति धीप्सति ।
कृत्सु दम्भनीयम् । दम्भनम् । दम्भः । दम्भकः । दम्भी । दम्भिता । दब्धः । दब्धिः । दम्भितुम् ।
दम्भितव्यम् । दम्भित्वा दब्ध्वा । संदभ्य । दम्भरः । दम्भन् । दम्भिष्यन् ।

दम दमने दिवादिगणीयः अकर्म्मकः पर० सेट् ।

कर्त्तरि दाम्यति । अदमत् अदमीत् । ददाम देमतुः । भावे दम्यते । अदमि । णिचि दमयति-ते ।
अदीदमत् त । कर्म्मणि अदमि अदामि ।
कृत्सु दमनीयम् । दमनम् । दमः । दमकः । दमी । दमिता । दान्तः । दान्तिः । दमितुम् ।
दमितव्यम् । दमित्वा दान्त्वा । संदम्य । दम्यः । दाम्यन् । दमिष्यन् ।

दय दयने गतौ च भ्वादिगणीयः आत्मनेपदी सकर्म्मकः सेट् ।

कर्त्तरि दयते । अदयिष्ट । देये । कर्म्मणि दय्यते । अदायि ।

कृत्सु दयनीयम् । दयनम् । दायः । दायी । दयिता । दयितः । दया । दयितुम् । दयितव्यम् ।
दयित्वा । संदय्य । दाय्यम् । दयमानः दयिष्यमाणः ।

दल भेदने भ्वादिगणीयः पर० सकर्म्मकः सेट् ।

कर्त्तरि दलति । अदालीत् । ददाल देलतुः । कर्म्मणि दल्यते । अदालि । णिचि दालयति ते
दलयति ते । अदीदलत् त । कर्म्मणि दाल्यते दल्यते अदालि अदलि ।
कृत्सु दलनीयम् । दलनम् । अप्-दलम् । दालकः उद्दालकः । दाली । दलिता । दलितः ।
दलितुम् । दलितव्यम् । दलित्वा । संदल्य । दाल्यः । दलन् । दलिष्यन् । दलिष्यमाणः ।

दह दाहे भ्वादिगणीयः पर० सकर्म्मकः अनिट् ।

कर्त्तरि दहति । अधाक्षीत् । ददाह देहतुः देहिथ ददग्ध । दग्धा । दह्यात् । धक्ष्यति । कर्म्मणि
दह्यते । अदाहि । णिचि दाहयति ते । अदीदहत् त । सनि दिधक्षति यङि दंदह्यते ।
कृत्सु दहनीयम् । दहनम् । दाहः । दाहकः । दाही । दग्धा । दग्धः । दग्धिः । दग्धुम् ।
दग्धव्यम् । 'दग्ध्वा । संदह्य । दाह्यः । दहन् दह्यमानः । धक्ष्यन् धक्ष्यमाणः । सनः दिधक्षा ।
दिधक्षुः । दिधक्षन् । यङः । दंदह्यमानः ।

दा दाने जुहोत्यादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

15 कर्त्तरि ददाति दत्तः ददति । ददासि दत्थः दत्थ ददामि दद्वः दद्मः । दत्ते ददाते ददते दत्से ददाथे दद्ध्वे ददे दद्वहे दद्महे । दद्यात् ददीत । ददातु दत्ताम् । अददात् अदत्त । अदात् अदित अदिषाताम् । ददौ ददतुः ददिथ ददाथ ददे ददिषे । दातासि-से । देयात् दासीष्ट । दास्यति-ते । कर्म्मणि दीयते । अदायि णिचि दापयति-ते । अदीदपत् । सनि दित्सति-ते । यङि देदीयते ।

कृत्सु दानीयम् । दानम् । दायः । दायकः । दायी । दाता । दत्तः । प्रदत्तः प्रत्तः । नीत्तः । दत्तिः प्रत्तिः प्रदत्तिः । दातुम् । दातव्यम् । दत्त्वा । सन्दाय । देयम् । ददत् ददानः । दास्यन्-स्यमानः । ददिवान् दामन् दत्त्रिमः । सनः दित्सा । दित्सुः । दित्सन् ।

दाण् दाने भ्वादिगणीयः परस्मैपदी सकर्म्मकः अनिट् । णित्

कर्त्तरि यच्छति । अदात् । ददौ । कर्म्मणि दीयते । अदायि ।

कृत्सु जुहोत्यादिगणीयवत् । अशिष्टव्यवहारे सन्-आत्मनेपदम् । संयच्छते वेश्यया तस्त्रम् ।

दिव क्रीड़ाजिगीषाव्यवहारादिषु दिवा०परस्मैपदी क्रीड़ादौ अक० व्यवहारादौ सक० सेट् ।

कर्त्तरि दीव्यति । अदेवीत् । दिदेव । देविता । दीव्यात् । देविष्यति । भावे कर्म्मणि च दीव्यते । अदेवि । णिचि देवयति-ते । अदीदिवत्-त । सनि दिदेविषति दुद्यूषति । यङि देदीव्यते । क्तृत्सु देवनीयम् । देवनम् । देवः । देवकः । देवी । देविता । द्यूतः । द्यूतिः । देवितुम् । देवितव्यम् । देवित्वा द्यूत्वा । सन्दिव्य । देव्यम् । दीव्यन् दीव्यमानः । देविष्यन्-ष्यमाणः । क्विप् अक्षद्यूः । सनः दुद्यूषा दिदेविषा । दुद्युषुः दिदेविषुः। दुद्यूषन् दिदेविषन् । परि-देवि-परिदेवने परिदेवयति-ते परिदेवना । आ-जिगीषायाम् आदीव्यति । आद्यूनः औदरिकः ।

दिश देशने तुदादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि दिशति-ते । अदिक्षत्-त । दिदेश दिदेशिथ दिदिशे । देष्टासि-से । देक्ष्यति-ते । कर्म्मणि दिश्यते । अदेशि । णिचि देशयति-ते । अदीदिशत्-त । सनि दिदिक्षति । यङि देदिश्यते । कृत्सु देशनीयम् । देशनम् । देशः । देशकः । देशी । देष्टा । दिष्टः । दिष्टिः । णयन्तस्य देशना । देष्टुम् । देष्टव्यम् । दिष्ट्वा । उपदिश्य । देश्यम् । दिशन् दिशमानः दिश्यमानः । देक्ष्यन् क्ष्यमाणः । उप—उपदेशे उपदिशति शिक्षयतीत्यर्थः। सम्—सन्देशे (वाचिकवार्त्ताकथने) सन्दि०

शति। आ—आज्ञायाम् आदिशति। उत्—उद्देशे उद्दिशति। अति—अतिदेशे (तुल्यतया कथने) अतिदिशति। अप—अपदेशे अपदिशति अपदेशश्च छलम्। व्यप—संज्ञाकरणे व्यपदिशति सङ्केतितं करोति। नि—नियोगे निदिशति नियुङ्क्ते। निर्—निर्देशे निर्दिशति कथयतीत्यर्थः।

दिह लेपने अदादिगणीयः उभयपदी सकर्म्मकः अनिट्।

कर्त्तरि देग्धि दिग्धः दिहन्ति धेक्षि दिग्धः दिग्ध देह्मि दिह्वः दिह्मः दिग्धे धिक्षे। दिह्यात् दिहीत। देग्धु दिग्धाम्। अधेक् अधेग् अदिग्ध। अधिक्षत्, अदिग्ध-अधिक्षत, अधिक्षाताम्, अधिक्षन्त, अधिक्षथाः-अदिग्धाः, अधिक्षि, अदिह्वहि-अधिक्षावहि, अधिक्षामहि। दिदेह दिदिहे। देग्धासि-से। दिह्यात् धिक्षीष्ट। धेक्ष्यति-ते। कर्म्मणि दिह्यते अदेहि। णिचि देहयति-ते। अदीदिहत्-त। सनि दिधिक्षति-ते। यङि देदिह्यते।

कृत्सु देहनीयम्। देहनम्। देहकः। देही। देग्धा। दिग्धः। दिग्धिः। देग्धुम्। देग्धव्यम्। दिग्ध्वा। उपदिह्य। देह्यम्। दिहन् दिहानः। धे-क्ष्यन् क्ष्यमाणः।

सम्—संशये सक० संदेग्धि। संदेहः। संदिग्धः। संदिहानः।

दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु आत्मनेपदी सेट् ।

कर्त्तरि दीक्षते । अदीक्षिष्ट । भावे कर्म्मणि दीक्ष्यते अदीक्षि । णिचि दीक्षयति-ते अदिदीक्षत्-त । कृत्सु दीक्षणीयम् । दीक्षणम् । दीक्षकः । दीक्षी । दीक्षिता । दीक्षितः । दीक्षा । दीक्षितुम् । दीक्षितव्यम् । दीक्षित्वा । सन्दीक्ष्य । दीक्षमाणः । दीक्षिष्यमाणः ।

दीप दीप्तौ दिवादिगणीयः अक० आत्मनेपदी सेट् ।

कर्त्तरि दीप्यते । अदीपि-अदीपिष्ट । दिदीपे । दीपितासे । भावे दीप्यते । अदीपि । णिचि दीपयति-ते । अदीदिपत्-त-अदिदीपत्-त । सनि दिदीपिषते । यङि देदीप्यते ।
कृत्सु दीपनीयम् । दीपनम् । दीपनः । दीपः । दीपकः । दीपी । दीपिता । दीप्तः । दीप्तिः । णयन्तस्य दीपना । दीपितुम् । दीपितव्यम् । दीपित्वा । सन्दीप्य । दीप्यम् । दीप्यमानः । दीपिष्यमाणः । यङः देदीप्यमानः । उत्—उद्दीपने उद्दीपयति उत्तेजयतीत्यर्थः । उद्दीपितः उद्दीपना ।

दु अनुतापे स्वादिगणीयः पर० अक० अनुतापने सक० वेट् ।

कर्त्तरि दुनोति दुनुतः दुन्वन्ति । दुनुयात् । दुनोतु । अदुनोत् । अदावीत् अदौषीत् । दुदाव दुदुविथ । दविता दोता । दूयात् । दविष्यति दोष्यति । भावे दूयते । अदावि । णिचि दावयति-ते । अदूदवत्-त । सनि दुदूषति । यङि दोदूयते ।

कृत्सु दवनीयम् । दवनम् । दवनः । दाः । दावः । दावकः । अदुन् दवयुः । दावी । दविता दोता । दूनः । दवितुम् दोतुम् । दवितव्यम् दोतव्यम् । दवित्वा दुत्वा । संदूय । दव्यम् आवश्यके तु दाव्यम् । दुन्वन् । दवि-ष्यन्-ष्यमाणः दो-ष्यन्-ष्यमाणः ।

दुःख दुःखितकरणे अदन्तचुरादि उभयपदी सक॰ सेट् ।

कर्त्तरि दुःखयति-ते । मतान्तरे दुःखापयति-ते । अदुदुःखत्-त । अदुदुःखपत्-त ।

दुष दोषे दिवादिगणीयः परस्मैपदी अकर्म्मकः अनिट् ।

कर्त्तरि दुष्यति । अदुषत् अदुक्षत् । दुदोष । दोष्टा । दोक्ष्यति । भावे दुष्यते । अदोषि । णिचि दूषयति-ते । चित्तविकारे तु दूषयति-ते दोषयति-ते चित्तम् । अदूदुषत्-त ।

कृत्सु दोषणीयम् । दोषणम् । दोषः । दोषकः । दोषी । ण्यन्तस्य दूषणीयम् । दूषणम् । दूषकः । दूष्यम् इत्यादि । दुष्टः । दुष्टिः । दोष्टुम् । दोष्टव्यम् । दुष्ट्वा । संदुष्य । दुष्यत् । दुष्यन् ।

दुह दोहने अदादिगणीयः उभयपदी द्विक॰ अनिट् ।

कर्त्तरि दोग्धि दुग्धः दुहन्ति धोक्षि दुग्धः दुग्ध दोह्मि दुह्वः दुह्मः । दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे । दुह्यात् दुहीत । दोग्धु दुग्धाम् । अधुक्-ग् अदुग्ध । अधुक्षत्, अधुक्षत-

अदुग्ध, अधुक्षाताम् अधुक्षन्त, अधुक्षथाः-अदुग्धाः, अधुक्षि, अधुक्षावहि-अदुह्वहि, अधुक्षामहि ।

दुदोह दुदोहिथ दुदुहिव दुदुहे । दोग्धासि-से । दुह्यात् धुक्षीष्ट । धोक्ष्यति-ते ।

कर्म्मणि दुह्यते । अदोहि । णिचि दोहयति-ते । अदूदुहत्-त । सनि दुधुक्षति । यङि दोदुह्यते ।

कृत्सु दोहनीयम् । दोहनम् । दोहः । दोहकः । दोही । दोग्धा । दुग्धम् । दुग्धिः ।

दोग्धुम् । दोग्धव्यम् । दुग्ध्वा । संदुह्य । दुह्यम् दोह्यम् । दुहन् दुहानः दुह्यमानः ।

धो-क्ष्यन् क्ष्यमाणः। कामधुक् । कामदुघा गौः। सनः दुधुक्षा दुधुक्षुः। दुधुक्षन् । यङः दोदुह्यमानः ।

दू खेदे दिवादिगणीयः आत्मनेपदी अकर्म्मकः सेट् ।

कर्त्तरि दूयते । अदविष्ट । दुदुवे । दवितासे । दविषीष्ट । दविष्यते । भावे दूयते । अदावि । णिचि

दावयति-ते । अदूदवत्-त । सनि दुदूषते ।

कृत्सु दवनीयम् दवनम् । दावः । दावकः । दावी । दविता । दूनः । दूतिः । दवितुम् । दवितव्यम् ।

दूत्वा । संदूय । दव्यम् आवश्यके तु दाव्यम् । दूयमानः दविष्यमाणः।

दृ आदरे तुदादिगणीयः आत्मनेपदी सकर्म्म० अनिट् प्रायेणाङ्पूर्व्वः ।

कर्त्तरि आद्रियते । आदृत । आदद्रे आदद्रिषे । आदर्त्तासे । आदृषीष्ट । आदरिष्यते ।

कर्म्मणि आद्रियते । आदारि । णिचि आदारयति-ते । आदीदरत्-त । सनि आदिदीर्षते । कृत्सु आदरणीयम् । आदरणम् । दरः आदरः । आदारकः । इनि-आदरी । आदर्त्ता । आदृतः । आदृतिः । आदर्तुम् । आदर्त्तव्यम् । आदृत्य । आदृत्यः । आद्रियमाणः । आदरिष्यमाणः ।

दृप हर्षे गर्व्वे च दिवादिगणीयः पर० अक० वेट् ।

कर्त्तरि दृप्यति । दृप्येत् । दृप्यतु । अदृप्यत् । अदर्पीत् अद्राप्सीत् अदार्प्सीत् अदृपत् । ददर्प, ददर्पिथ दद्रप्थ । दर्पिता द्रप्ता । दर्पिष्यति द्रप्स्यति । भावे दृप्यते । अदर्पि । णिचि दर्पयति-ते । अदीदृपत्-त अददर्पत्-त । सनि दिदर्पिषति दिदृप्सति । यङि दरीदृप्यते । कृत्सु दर्पणीयम् । दर्पणम् । दर्पणः । दर्पकः । दर्पी । दर्पिता द्रप्ता । दृप्तः । दृप्तिः । दर्पितुम् द्रप्तुम् । दर्पितव्यम् द्रप्तव्यम् । दर्पित्वा दृप्त्वा । संदृप्य । दृप्यः । दृप्यन् दर्पिष्यन् द्रप्स्यन् ।

दृश दर्शने भ्वादिगणीयः पर० सक० अनिट् ।

कर्त्तरि पश्यति । पश्येत् । पश्यतु । अपश्यत् । अदर्शत् अद्राक्षीत् । ददर्श, ददर्शिथ-दद्रष्ठ, ददृशिव । द्रष्टा । द्रक्ष्यति । कर्म्मणि दृश्यते । अदर्शि अदर्शिषाताम् अदृक्षाताम् । दर्शितासे द्रष्टासे । दर्शिषीष्ट दृक्षीष्ट । णिचि दर्शयति-ते । अदीदृशत्-त अददर्शत्-त । सनि आत्म० दिदृक्षते ।

क्तत्सु दर्शनीयम् दर्शनम् । दर्शः । सुदर्शनः सुदर्शः । दर्शकः । दर्शी । द्रष्टा । दृष्टः । दृष्टिः । ण्यन्तस्य दर्शितः । एवं दर्शना । द्रष्टुम् दर्शयितुम् । द्रष्टव्यम् दर्शयितव्यम् । दृष्ट्वा दर्शयित्वा । संदृश्य संदर्श्य । दृश्यम् दर्श्यम् । पश्यन् दर्शयन् मानः दृश्यमानः दर्श्यमानः । द्रक्ष्यन् द्रक्ष्यमाणः । क्वसु ददृशिवान् ददृश्वान् । कर्म्मणि दर्शिष्यमाणश्च । ण्यन्तस्य दर्शयिष्यन् ष्यमाणः । सनः दिदृक्षा । दिदृक्षुः । दिदृक्षमाणः । अण्यन्तस्य कर्म्मणः कर्तृत्वे आत्मनेपदं दर्शयते राजा भृत्यान् ।

दॄ विदारे क्र्यादिगणीयः पर० सक० सेट् ।

कर्त्तरि दृणाति । अदारीत् अदारिष्टाम् । ददार, दद्रतुः-ददरतुः, ददरिथ । दरीता दरिता । दीर्य्यात् । दरीष्यति दरिष्यति । कर्म्मणि दीर्य्यते । अदारि । दद्रे ददरे । णिचि दारयति-ते । अददरत्-त । दिदरीषति दिदरिषति दिदीर्षति ।

क्तत्सु दरणीयम् । दरणम् । दारः । दारकः । दारी । दरीता दरिता । दीर्णः । दीर्त्तिः । दरीतुम् दरितुम् । दरीतव्यम् दरितव्यम् । दीर्त्वा । संदीर्य्य । दार्य्यम् । दृणन् दीर्य्यमाणः । दरीष्यन् दरिष्यन् । दरिष्यमाणः दरीष्यमाणः कर्म्मणि दारिष्यमाणश्च । अस्य कर्म्मकर्त्तरि दीर्य्यते केचित्तु दिवादावेनं पठित्वा दीर्य्यतीत्यपि रूपमाहुः ।

देव देवने भ्वादिगणीयः आत्मनेपदी अक० सेट् ।

कर्त्तरि देवते । अदेविष्ट । दिदेवे । भावे देव्यते । अदेवि । णिचि देवयति-ते अदिदेवत्-त ।

कृत्सु देवनीयम् । देवनम् । देवः । देवकः । देवी । देवितुम् । देवितः । देवा । देवितम् । देवित्वा ।

संदेव्य । देवमानः । देविष्यमाणः । परि-विलापे परिदेवते । पर्य्यदेविष्ट सा पुर इति भट्टिः ।

देव परिदेवने चुरादिगणीयः आत्मनेपदी सक० सेट् । केचित्त्वेनं दिव इत्याहुः ।

कर्त्तरि देवयते । अदिदेवत । लुटि देवयिता । देवयितुम् । देवना । देवयितव्यम् । देवयित्वा ।

देवयमानः देवयिष्यमाणः इत्यादिर्भेदः । अन्यत् भ्वादिगणीयवत् ।

दो खण्डने दिवादिगणीयः परस्मैपदी सकर्म्मकः अनिट् ।

कर्त्तरि द्यति द्यतः द्यन्ति । द्येत् । द्यतु । अद्यत् । अदात् । ददौ । दाता । देयात् । कर्म्मणि दीयते ।

अदायि, अदायिषाताम् अदिषाताम् । ददे । णिचि दापय-ति-ते । अदीदप-त्-त ।

सनि दित्सति ।

कृत्सु दानीयम् । दानम् । दायः । दायकः । दायी । दाता । दितः । दितिः । दातुम् ।

दातव्यम् । दित्वा । संदाय । देयम् । द्यन् । दीयमानः । दा-स्यन्, स्यमानः ।

16

द्यु गतौ अदादिगणीयः पर० सकर्म्मकः अनिट्।

कर्त्तरि द्यौति द्युतः द्युवन्ति। द्युयात्। द्यौतु। अद्यौत्। अद्यौषीत्। दुद्याव दुद्यविथ-दुद्योथ दुद्युविव। द्योता। द्योष्यति। कर्म्मणि द्यूयते। अद्यावि। णिचि द्यावय-ति-ते। अदुद्यव-त्-त। सनि दुद्यूषति।

क्रत्सु द्यवनीयम्। द्यवनम्। द्यवः। द्यावकः। द्यावी। द्योता। द्युतः। द्युतिः। द्योतुम्। द्योतव्यम्। द्युत्वा। संद्युत्य। द्यव्यम् द्याव्यम्। द्युवन् द्यूयमानः। द्यो-ष्यन् ष्यमाणः।

द्युत विद्योते भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट्।

कर्त्तरि द्योतते। द्योतेत। द्योतताम्। अद्योतत। लुङि उभयपदी अद्युतत् अद्योतिष्ट। दिद्युते। द्योतितासे। द्योतिषीष्ट। भावे द्युत्यते। अद्योति। णिचि द्योतयति-ते अदु-द्युतत्। सनि दिद्योतिषते।

क्रत्सु द्योतनीयम्। द्योतनम्। द्योतः। द्योतकः। द्योती। द्योतिता। द्युतितम् द्योतितम्। द्युत्तिः विद्युत्। द्योतितुम्। द्योतितव्यम्। द्योतित्वा। संद्युत्य। द्योत्यम्। द्योतमानः द्योतिष्यमाणः।

द्रु द्रौ गतौ च भ्वादिगणीयः पर० द्रवे अक० गतौ सकर्म्मकः अनिट् ।

कर्त्तरि द्रवति । द्रवेत् । अदुद्रुवत् । दुद्राव दुद्रविथ-दुद्रोथ, दुद्रुव । द्रोता । द्रोष्यति । कर्म्मणि द्रूयते । अद्रावि । णिचि द्रावय-ति-ते । अदुद्रव-त्-त । सनि दुद्रूषति ।

कृत्सु द्रवणीयम् । द्रवणम् । द्रवः । द्रावः । द्रावकः । द्रावी । द्रोता । द्रुतः । द्रुतिः । द्रोतुम् । द्रोतव्यम् । द्रुत्वा । संद्रुत्य । द्रव्यम् द्राव्यम् । द्रवन् । द्रूयमाणः । द्रो-ष्यन् ष्यमाणः ।

वि—विद्रवे-पलायने च विद्रवति । उप—उपद्रवे (अनिष्टोत्पादने) उपद्रवति । उपद्रुतः ।

द्रुह द्रोहे दिवादिगणीयः पर० उपसर्गे सक० अन्यथा अक० वेट् ।

कर्त्तरि भ्रात्राय द्रुह्यति । अद्रोहीत् । अध्रुचत् । दुद्रोह दुद्रोहिथ-दुद्रोग्ध-दुद्रोढ । द्रोहिता द्रोग्धा द्रोढा । द्रोहिष्यति ध्रोक्ष्यति । कर्म्मणि भ्रात्रोऽभिद्रुह्यते । आद्रोहि आध्रुक्षाताम्-आद्रोहिषाताम्' आद्रोहिषत-आध्रुक्षन्त । आदुद्रुहे-आदुद्रुहिषे-आदुध्रुक्षे । णिचि द्रोहय-ति-ते । अदुद्रुह-त्-त ।

कृत्सु द्रोहणीयम् । द्रोहणम् । द्रोहः । द्रोहकः । द्रोही । द्रोहिता द्रोग्धा द्रोढा । द्रुग्धः द्रूढः । द्रुग्धिः द्रूढिः । द्रोहितुम् द्रोग्धुम् द्रोढुम् । द्रोहितव्यम् द्रोग्धव्यम् द्रोढव्यम् । द्रुग्ध्वा द्रूढ्वा । संद्रुह्य । द्रोह्यः । द्रुह्यन् अभिद्रुह्यमाणः । द्रोहि-ष्यन् ष्यमाणः । ध्रोक्ष्य-न् माणः । मित्रध्रुक्-ग् मित्रध्रुट्-ड् ।

द्विष द्वेषे अदादिगणीयः उभयपदी सक० अनिट्।

कर्तरि द्वेष्टि द्विष्टः द्विषन्ति द्वेक्षि द्विष्टे। द्विष्यात् द्विषीत। द्वेष्टु द्विड्ढि. द्वेषाणि द्विषाम्।
अद्वेट्-ड् अद्विष्ट। अद्विक्षत् अद्विक्ष। दिद्वेष दिद्विषे। द्वेष्टा-सि-से। द्वेक्ष्य-ति-ते। कर्मणि
द्विष्यते। अद्वेषि। णिचि द्वेषय-ति-ते। अदिद्विष-त्-त।

कृत्सु द्वेषणीयम्। द्वेषणम्। द्वेषः। द्वेषकः। द्वेषी। द्वेष्टा। द्विष्टः। द्विष्टिः। द्वेष्टुम्। द्वेष्टव्यम्।
द्विष्ट्वा। सन्द्विष्य। द्वेष्यः। द्विषन् द्विषाणः द्विष्यमाणः। द्वे-क्ष्यन् क्ष्यमाणः।

धा धारणे पोषणे च जुहोत्यादि० उभयपदी सक० अनिट्।

कर्तरि दधाति धत्तः दधति दधासि धत्थः धत्थ दधामि दध्वः दध्मः। धत्ते दधाते दधते धत्से दधाथे
धद्ध्वे दधे दध्वहे दध्महे। दध्यात् दधीत। दधातु धत्ताम्। अदधात् अधत्त। अधात्
अधित अधिषाताम्। दधौ दधे। धाता-सि-से। धेयात् धासीष्ट। धा-स्यति-ते। कर्मणि
धीयते। अधायि अधायिषाताम्-अधिषाताम्। णिचि धापयति-ते। सनि धित्स-ति-ते।

कृत्सु धानीयम्। धानम्। धानः। धायकः। कि अद्भिः दधिः। धायी। धाता। हितः। हितिः।
अन्तर्धी। श्रद्धा। धातुम्। धातव्यम्। हित्वा। सन्धाय। धेयम्। दधत् दधानः। धीयमानः।
धा-स्यन् स्यमानः। कर्मणि धायिष्यमाणः।

सम्—सन्धाने संदधाति । अनुसम्—अनुसन्धाने अनुसंदधाति । वि—विधाने विदधाति । अन्तर्—अन्तर्धाने अन्तर्दधाति । तिरस्—तिरोधाने तिरोदधाति । श्रद्—श्रद्धायाम् श्रद्दधाति । नि—निधाने निदधाति । अभि—अभिधाने अभिदधाति । परि—परिधाने परिदधाति । आ—आधाने आदधाति । प्रनि—प्रणिधाने प्रणिदधाति । सम्नि—सन्निधाने सन्निदधाति । उप-आ-उपाधौ उपादधाति । वि-आ-व्याधौ व्यादधाति । वि अव-व्यवधाने व्यवदधाति । अव-अवधाने अवदधाति । उप-उपधाने (शयनोपकरणभेदकरणे) उपदधाति । सम्-आ-समाधाने समादधाति ।

धिन्व प्रीतौ गतौ च स्वादिगणीयः प्रीतौ अक० प्रीणने गतौ च सक० सेट् ।

कर्त्तरि धिनोति धिनुतः धिन्वन्ति धिनोषि धिनुथः धिनुथ धिनोमि धिन्वः-धिनुवः,धिन्मः-धिनुमः । धिनुयात् । धिनोतु । अधिनोत् । अधिन्वीत् । दिधिन्व । धिन्विता । धिन्व्यात् । कर्म्मणि धिन्व्यते । अधिन्वि ।

कृत्सु धिन्वनीयम् । धिन्वितम् । धिन्वकः । धिन्वितः । धिन्वित्वा । धिन्वन् । धिन्व्यमानः । धिन्वि-ष्यन् ष्यमाणः ।

धु कम्पे स्वादिगणीयः उभयपदी अकर्म्मकः कम्पने सक० अनिट् ।

कर्त्तरि धुनोति धुनुतः धुन्वन्ति धुनोषि धुनोमि धुन्वः-धुनुवः, धुन्मः-धुनुमः । धुनुते धुन्वाते धुन्वते । धुनुयात् धुन्वीत । धुनोतु धुनुताम् । अधुनोत् अधुनुत । पाणिनीयमते अधौषीत मुग्धबोधमते-तु अधावीत् अधुत । दुधाव दुधुवे । धोता-सि-से । धूयात् धोषीष्ट । भावे धूयते । अधावि । णिचि पर० धावयति । अदूधवत् । सनि दुधूषति ते । यङि दोधूयते ।

क्तत्सु धवनीयम् । धवनम् । धवः । धावकः । धावी । द्रुत-धवित्रम् । धोता । धुतः । धुतिः । धोतुम् । धोतव्यम् । धुत्वा । सन्धुत्य । धव्यम् धाव्यम् । धुन्वन् धुन्वानः । यङः दोधूयमानः । धोष्यन् ।

धुर्व्व हिंसने स्वादिगणीयः सकर्म्मकः पर० सेट् ।

कर्त्तरि धूर्व्वति । अधूर्व्वीत् । दुधूर्व्व । क्तत्सु । धुर्व्वणम् । धूर्त्तः । धूर्त्तिः । धूर्त्वा । क्विप् धूः ।

धू कम्पे क्र्यादिगणीयः उभयपदी अकर्म्मकः कम्पने सकर्म्मकः वेट् ।

कर्त्तरि धुनाति धुनीतः धुनन्ति । धुन्वीते धुनाते धुनते । धुनीयात् धुनीत । धुनोतु धुनीताम् । अधुनात् अधुनीत । केचित्तु धूनातीत्याद्याहुः । धूनाति चम्पकवनानीति कविरहस्यम् । पाणिनीयमते अधावीत् मुग्धबोधमते अधावीत्-अधौषीत् । दुधाव ।

धविता-सि-से धोता-सि-से । धूयात् धविषीष्ट-धोषीष्ट । धविष्य-ति-ते-धोष्य-ति-ते । भावे कर्म्मणि च धूयते । अधावि । णिचि पर० धूनयति अदुधूनत् । सनि दुधूष-ति-ते ।

कृत्सु धवनीयम् । धवनम् । धविता । धोता । धूनः । धूनिः । धवितुम् धोतुम् । धवित्वा धूत्वा । संधूय । धुनन् धुनानः । मतान्तरे धूतः । धूतिः । धूनन् धूनानः । धूयमानः । धवि-ष्यन् ष्यमाणः । धो-ष्यन् ष्यमाणः ।

धूप सन्तापने भ्वादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि धूपायति । धूपायेत् । धूपायतु । अधूपायत् । अधूपायीत् अधूपीत् । धूपायाम्-बभूव-आस-चकार-दुधूप । धूपायिता धूपिता । धूपाय्यात् धूप्यात् । धूपायिष्यति धूपिष्यति । कर्म्मणि धूपाय्यते धूप्यते । अधूपायि अधूपि । णिचि धूपायय-ति-ते धूपय-ति-ते । अदुधूपाय-त्-त । अदुधूप-त्-त ।

कृत्सु धूपायनीयम् धूपनीयम् । धूपायनम् धूपनम् । धूपायकः धूपकः । धूपायिता धूपिता । धूपायितः धूपितः । धूपाया धूपा । धूपायितुम् धूपितुम् । धूपायन् धूपयन् । धूपायि-ष्यन् ष्यमाणः । धूपि-ष्यन् ष्यमाणः ।

धृ स्थितौ तुदादिगणीयः आत्मनेपदी अकर्म्मकः अनिट्।

कर्त्तरि ध्रियते। अधृत। दध्रे। धर्त्तासे। धृषीष्ट। धरिष्यते। कर्म्मणि ध्रियते। अधारि।
णिचि धारय-ति-ते। अदीधर-त्-त। कर्म्मणि धार्य्यते। अधारि। सनि दिधरिषते।
क्तत्स धरणीयम्। धरणम्। धरः। धारः। धारकः। धारी। धृतः। धृतिः। धर्त्तुम्। धर्त्तव्यम्। धृत्वा।
संधृत्य। धार्य्यम्। ध्रियमाणः धरि-ष्यन् ष्यमाणः। णिजन्तस्य धनुर्द्धरः वंशधरः। धारयिता
धारयित्वा धारितः धारणा। धारय-न् माणः धार्य्यमाणः।

सन्तोषार्थकस्तु उभयपदी स्वादिगणीयः धर-तेति इत्यादि।

धृष संहतौ हिंसायाञ्च स्वादिगणीयः परस्मैपदी सकर्म्मकः सेट्।

कर्त्तरि धर्षति। धर्षेत्। अधर्षीत्। दधर्ष दधृषतुः। धर्षिता। कर्म्मणि धृष्यते अधर्षि
णिचि धर्षय-ति-ते। अदीधृष-त्-त अदधर्ष-त्-त।
क्तत्स धर्षणीयम्। धर्षणम्। धर्षः। दुर्धर्षणः दुर्धर्षः। धर्षकः। धर्षी। धर्षिता। धर्षितः। धृष्टिः
णयन्तस्य धर्षणा। धर्षितुम्। धर्षितव्यम्। धर्षित्वा धृष्ट्वा। संधृष्य। धृष्यः। धर्षन् धृष्य-
माणः। धर्षि-ष्यन् ष्यमाणः। ऋज् धृषाक्—क्नु धृष्णुः।

धृष प्रागल्भ्ये स्वादिगणीयः परस्मैपदी अकर्म्मकः सेट्।

कर्त्तरि धृष्णोति धृष्णुतः। धृष्णुयात्। धृष्णोतु। अधृष्णोत्। अन्यत् सर्व्वं स्वादिगणीयवत्

निष्ठायां धृष्टस् धर्षितम् शतरि धृष्णन्, क्त्वा प्रत्यये धर्षित्वा इति भेदः।

धृष अमर्षे वा० चुरादिगणीयः उभयपदी पक्षे स्वादिगणीयः पर० सेट्।

कर्त्तरि धर्षयति-ते। धर्षति। अदीधृषत् अदधर्षत्। अधर्षीत्। धर्षयितासि-से धर्षितासि।

धर्षयिष्यति-ते धर्षिष्यति। कर्म्मणि धर्ष्यते धृष्यते। अधर्षि।

कृत्सु धर्षयिता। धर्षणा। धर्षयितुम् धर्षयितव्यम्। धर्षयित्वा। संधर्ष्य। धर्ष्यः। धर्ष-यन्

मानः धर्ष्यमाणः। धर्षयि-ष्यन् ष्यमाणः। अन्यत् स्वादिगणीयवत्।

धे पाने स्वादिगणीयः परस्मैपदी सकर्म्मकः अनिट्।

कर्त्तरि धयति। धयेत्। धयतु। अधयत्। अदधत् अधात् अधासीत्। दधौ। धाता। धेयात्।

कर्म्मणि धीयते। अधायि। णिचि धापयति-ते। अदीधपत्-त। सनि धित्सति। यङि देधीयते।

कृत्सु धानीयम्। धानम्। धायः। धायकः। स्तनन्धयः। स्तनन्धयी। पुष्पन्धयः। धायी। धाता।

धितः। धितिः। धातुम्। धातव्यम्। धित्वा। संधाय। धेयम्। धयन् धीयमानः। धा-स्यन् स्यमानः

17

ध्वन शब्दे भ्वादिगणीयः पर० अक० अनिट्।

कर्त्तरि ध्वनति। अध्वानीत् अध्वनीत्। दध्वान। भावे ध्वन्यते। अध्वानि। णिचि ध्वनयति-ते ध्वानयति-ते। अदिध्वनत्। कर्म्मणि ध्वन्यते। अध्वानि-अध्वनि।

कृत्सु ध्वननीयम्। ध्वननम्। ध्वानः। ध्वानकः। दून-ध्वनिः। ध्वनिता। ध्वनितः। ध्वनितुम्। ध्वनितव्यम् ध्वनित्वा। सन्ध्वन्य। ध्वन्यः। ध्वनन् ध्वन्यमानः। ध्वनि-ध्वन्, ध्वमाणः।

ध्वन शब्दे चुरादि उभयपदी० अकर्म्मकः सेट्।

कर्त्तरि ध्वनयति-ते। अदिध्वनत् अध्वनयीत्। ध्वनयिता। भावे ध्वन्यते। अध्वनि।

कृत्सु ध्वनयिता। ध्वनयितुम्। ध्वनयितव्यम्। ध्वनयन्, मानः ध्वनयि-ध्वन्, ध्वमाणाः। अन्यत् भ्वादिगणीयवत्।

ध्वंसु गतौ नाशे च भ्वादिगणीयः आत्मनेपदी गतौ सक० नाशे अक० सेट्।

कर्त्तरि ध्वंसते। अध्वंसिष्ट। दध्वंसे ध्वंसते। अध्वसत्। कर्म्मणि भावे च ध्वस्यते। अध्वंसि। णिचि ध्वंसयति-ते। अदध्वंसत्-त।

कृत्सु ध्वंसनीयम्। ध्वंसनम्। ध्वंसः। ध्वंसकः। ध्वंसी। ध्वंसिता। ध्वस्तः। ध्वंसितः। ध्वंसितुम्। ध्वंसितव्यम्। ध्वंसित्वा ध्वस्त्वा। अपध्वस्य। प्रध्वंसः। प्रध्वंसमानः। प्रध्वंसिषमाणः।

ध्मा मुखमारुतसंयोजने शब्दे च भ्वादिगणीयः पर० सक० शब्दे अक० सेट् ।

कर्त्तरि धमति । धमेत् । धमतु । अधमत् । अध्मासीत् । दध्मौ दध्मतुः दध्माथ-दध्मिथ । ध्मेयात् ध्मायात् । कर्म्मणि ध्मायते । अध्मायि । णिचि ध्मापयति-ते । अदिध्मपत्-त ।

कृत्सु ध्मानीयम् । ध्मानम् । ध्मायः । नाडीन्धमः । ध्मायकः । ध्मायी । ध्मातः । ध्मातिः । ध्मातुम् । ध्मातव्यम् । ध्मात्वा । संध्माय । ध्मेयम् । धमन् ध्मायमानः ध्मास्यन् ध्मास्यमानः । कर्म्मणि ध्मायिष्यमाणश्च । आ—स्फीततायाम् । आधमति उदरम् स्फायते । उरस्याध्मानम् ।

ध्यै चिन्तायां भ्वादिगणीयः पर० सक० अनिट् ।

कर्त्तरि ध्यायति । ध्यायेत् । ध्यायतु । अध्यायत् । अध्यासीत् । दध्यौ । ध्याता । ध्येयात् ध्यायात् । कर्म्मणि ध्यायते । अध्यायि । णिचि ध्यापयति-ते । अदिध्यपत्-त ।

कृत्सु ध्यानीयम् । ध्यानम् । ध्यायः । ध्यायकः । ध्यायी । ध्याता । ध्यातः । ध्यातिः । ध्यातुम् । ध्यातव्यम् । ध्यात्वा । संध्याय । ध्येयम् । ध्यायन् ध्यायमानः । ध्यास्यमानः ध्यायिष्यमाणश्च । क्विप् धीः ।

यद्यपि नृनृतनटनन्दनक्कनाधनाथभिन्नाः सर्व्वे नकारादयो धातवः गणपाठे णकारादिकतया पठितास्तथापि प्रयोगकाले ते नकारादेशेन नादयो भवन्ति पुनश्च त एव णादिपूर्व्वकाः णत्वादेशेन णादयो भवन्ति । अतोऽत्र प्रयोगानुसारेण नादय एव प्रदर्श्यन्ते ।

नट अवस्यन्दने (हिंसने) चुरादिगणीयः उभयपदी सकर्म्मकः सेट् । प्रायेणायमुत्पूर्व्वकः ।

कर्त्तरि उन्नाटयति-ते । उदनीनटत्-त । कर्म्मणि उन्नाट्यते । उदनाटि ।

कृत्सु उन्नाटनीयम् उन्नाटनम् । उन्नाटकः । उन्नाटयिता । उन्नाटितः । उन्नाटना । उन्नाटयितुम् ।

उन्नाटयितव्यम् । नाटयित्वा उन्नाट्य । उन्नाट्यम् । उन्नाटय-न् मानः उन्नाट्यमानः ।

उन्नाटयि-ष्यन् ष्यमाणः । उन्नाटिष्यमाणश्च । णोपदेशाभावेन नास्य णत्वम् प्रनटति ।

नट नृत्ये भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट् ।

कर्त्तरि नटति अनाटीत् अनटीत् । ननाट नेटतुः । भावे नट्यते । अनाटि । णिचि नाटयति ।

घटादिषु नटयति-ते । अनीनटत्-ते । कर्म्मणि अनाटि अनटि ।

कृत्सु नटनीयम् । नटनम् । नाटः । नाटकः । नाटी । नटिता । नटितः । नटितुम् ।

नटितव्यम् । नटित्वा । संनट्य । नाट्यम् । नटन् नटिष्यन् । अस्य णोपदेशतया णत्वम् प्रणटति ।

नद शब्दे भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट् ।

कर्त्तरि नदति । अनादीत् अनदीत् । ननाद नेदतुः । भावे नद्यते । अनादि ।

णिचि नादयति-ते । अनीनदत्-त ।

कृत्यु नदनीयम् । नदनम् । नादः । नादकः । नादी । नदिता । नदितः । नदितुम् ।
नदितव्यम् । नदित्वा । संनद्य । नाद्यम् । नदन् नदिष्यन् । प्रणिनदति ।
प्र-परि-परा-निर्-अन्तर्-पूर्व्वकस्य णत्वं प्रणदति परिणदति पराणदति । निर्णादः अन्तर्णादनम् ।

नन्द आनन्दे भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट् ।

कर्त्तरि नन्दति । अनन्दीत् । ननन्द ननन्दतुः । नन्द्यात् । भावे नन्द्यते । णिचि नन्दयति-ते ।
अननन्दत् ।
कृत्सु नन्दनीयम् । नन्दनम् । नन्दः । णयन्तस्य ल्यु-नन्दनः । अयुच्-नन्दयुः । नन्दकः । आनन्दी ।
नन्दिता । नन्दितः । नन्दा । नन्दितुम् । नन्दितव्यम् । नन्दित्वा । संनन्द्य । नन्द्यः । नन्दन्
नन्दिष्यन् । प्रादिपूर्व्वस्य न णत्वम् । प्रनन्दतीत्यादि । अभि-अभिनन्दने अभिनन्दति संवर्द्धयति ।

नम नमने भ्वादिगणीयः परस्मैपदी सकर्म्मकः अनिट् ।

कर्त्तरि नमति । अनंसीत् अनंसिष्टाम् । ननाम नेमतुः । नन्ता । नंस्यति । कर्म्मणि नम्यते ।
अनामि । णिचि नमयति-ते । अनीनमत्-त । कर्मणि अनामि अनमि । सनि निनंसति ।
यङि नंनम्यते ।

क्तत्सु नमनीयम् । नमनम् । नमः । नामकः । नामी । नन्ता । नतः । नतिः । नन्तुम् ।
नन्तव्यम् । नत्वा । सन्नम्य सन्नत्य । नम्यम् र-नम्रः नमन् नम्यमानः । यङः नंनम्यमानः । नं-स्यन् स्यमानः । प्रादिभ्यो णत्वम् । प्रणमति । प्रणामः । परि-परिणामे आत्म० परिणमते ।

नर्द शब्दे भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट् ।

कर्त्तरि नर्दति । अनर्दीत् । ननर्द ननर्दतुः । नर्दिता । भावे नर्द्यते । अनर्दि । णिचि नर्दयति-ते । अननर्दत्-त ।
क्तत्सु नर्दनीयम् । नर्दनम् । नर्दकः । नर्दी । नर्दिता । नर्दितः । नर्दः । नर्दितुम् । नर्दितव्यम् । नर्दित्वा । संनर्द्य । नर्द्यम् । नर्दन् नर्दिष्यन् । प्रणर्दति परिणर्दनम् ।

नश नाशे अदर्शने च दिवादिगणीयः परस्मैपदी अकर्म्मकः वेट् ।

कर्त्तरि नश्यति । अनेशत् अनशत् । ननाश नेशतुः । नशिता नंष्टा नङ्ग्धा । नश्यात् । नशिष्यति नङ्क्ष्यति । भावे नश्यते । अनाशि । णिचि परस्मैपदी नाशयति । अनीनशत् । सनि निनशिषति निनङ्क्षति ।

...नाशी । नशिता नंष्टा नङ्ग्धा । नष्टः नग्धः ।

कृत्म् नशनीयम् । नशनम् । नाशः । नाशकः । नाशी । नशितः नंष्ट्रम् नङ्ग्धुम् । नशितव्यम् नंष्टव्यम् नङ्ग्धव्यम् । नशित्वा नष्ट्वा नग्ध्वा ।

नष्टिः नशिः । नशितुम् नंष्टुम् नङ्ग्धुम् । नशितव्यम् नंष्टव्यम् नङ्ग्धव्यम् । नशित्वा नष्ट्वा नग्ध्वा ।

...नश्य । नाशम् । नशन् नशिस्यन् नङ्क्ष्यन् । प्रादिभ्यः प्रकारस्याविकृतिस्थले णत्वं प्रणश्यति

...न्यत्र ...कारे तु न, प्रनष्टः प्रनग्धः ।

नह बन्धने दिवादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि नह्यति-ते । अनात्सीत् अनद्ध । ननाह नेहतुः नेहे । नद्धा-सि से । कर्म्मणि नह्यते ।

अनाहि । णिचि नाहयति । अनीनहत् ।

कृत्म् नहनीयम् । नहनम् । नाहः । नाहकः । नद्धा । नद्धः । नद्धिः । नद्धुम् । नद्धव्यम् ।

नद्धा । संनह्य । नाहम् । नह्य-न् मानः । नत्-स्यन् स्यमानः । प्रादिभ्यो णत्वं प्रणह्यति । प्रणद्धः ।

सम्-सन्नधारणे अकर्म्मकः संनह्यति-ते । परि—परिणाहे (विशालतायाम्) अक० परिणह्यति

नाथ आशीर्व्वादे प्रार्थने च आत्मनेपदी प्रार्थने द्विक० आशीर्व्वादे सक० सेट् ।

कर्त्तरि नाथते । अनाथिष्ट । ननाथे । कर्म्मणि नाथ्यते अनाथि । णिचि नाथयति-ते अननाथत्-त ।

क्तत्सु नाथनीयम्। नाथनम्। नाथः। नाथकः। नाथी। नाथितः। नाथा। नाथितुम्। नाथितव्यम्
नाथित्वा। संनाथ्य। नाथ्यम्। नाथमानः नाथ्यमानः। नाथिष्यमाणः। अस्य न णत्वम् प्रनाथते।

निज शोधने जुहोत्यादि० उभयपदी सक० अनिट्।

कर्त्तरि नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनिक्थ नेनेज्मि नेनिज्वः नेनिज्मः।
नेनिक्ते नेनिजाते नेनिजते नेनिक्षे। नेनिज्यात् नेनिजीत। नेनेक्तु नेनिग्धि नेनिजानि।
अनेनेक्-ग् अनेनिक्त। अनिजत्-अनैक्षीत्, अनिक्त। निनेज निनिजे। नेक्ता-सि-से। निज्यात्
निक्षीष्ट। नेक्ष्य-ति-ते। कर्म्मणि निज्यते अनेजि। णिचि नेजयति-ते। अनीनिज-त्-त। सनि
निनिक्ष-ति-ते। यङि नेनिज्यते। प्रादिभ्यो णत्वम् प्रणेनिक्ति।
क्तत्सु नेजनीयम्। नेजनम्। नेजः। नेजकः। नेजी। नेक्ता। निक्तः। निक्तिः। नेक्तुम्।
नेक्तव्यम्। निक्त्वा। विनिज्य। नेज्यम्। नेनिजत् नेनिजानः। ने-क्ष्यन् क्ष्यमाणः।

निन्द निन्दायां भ्वादिगणीयः पर० सकर्म्मकः सेट्।

कर्त्तरि निन्दति। निन्देत्। निन्दतु। अनिन्दत्। अनिन्दीत्। निनिन्द निनिन्दतुः। निन्द्यात्।
निन्दिष्यति। कर्म्मणि निन्द्यते। अनिन्दि। णिचि निन्दय-ति-ते। अनिनिन्द-त्-त।

कृत्सु निन्दनीयम् । निन्दनम् । निन्दकः । निन्दी । निन्दिता । निन्दितः । निन्दा । निन्दितुम् । निन्दितव्यम् । निन्दित्वा । संनिन्द्य । निन्द्यम् । निन्दन् निन्द्यमानः । निन्दिष्यन् निन्दिष्यमाणः । प्रादिभ्यो णत्वम् प्रणिन्दति । क्रमु पाणिनीयमते वा णत्वं प्रणिन्दा प्रनिन्दा सुपद्मनाभमते तु सर्वत्र वा णत्वम् ।

नी प्रापणे भ्वादिगणीयः उभयपदी द्विकर्म्मकः अनिट् ।

कर्त्तरि नयति नयतः नयन्ति नयते । नयेत् नयेत । नयतु नयताम् । अनयत् अनयत । अनैषीत् अनेष्ट । निनाय निन्ये । नेता-सि-से । नीयात् नेषीष्ट । नेष्य-ति-ते । कर्म्मणि नीयते । अनायि । णिचि नाययति-ते । अनीनय-त्-त । सनि निनीषति-ते । यङि नेनीयते ।

कृत्सु नयनीयम् । नयनम् । नयः । उपनयः विनयः। उन्नायः सन्नायः आनायः। नायकः । नायी । नेता । नीतः । नीतिः । नेतव्यम् । नीत्वा । विनीय । नेयम् । नयन् नयमानः नीयमानः। नेष्यन् नेष्यमाणः। कर्म्मणि नायिष्यमाणश्च । प्रादिभ्यो णत्वम् प्रणयति । प्रणयः ।

प्र—करणे प्रणयति करोति । अप-दूरीकरणे अपनयति । उप-उपनयने आत्मनेपदम् उप-

भयते । उत्-उन्नयने (उत्प्रेक्षायाम् ऊर्ध्वक्षेपणे च) उन्नयति उत्प्रेक्षते ऊर्ध्वं क्षिपति वा अभि—अभिनये (आकारादिना तदनुरूपकरणे) अभिनयति । अनु-अनुनये (सन्तोषादिजनक व्यापारकरणे) अनुनयति । वि—विनये आत्मनेपदी विनयते । वि-विगणने च (ऋणशोधनार्थ गणनायाम्) आत्मनेपदी ऋणं विनयते शोधनार्थं गणयतीत्यर्थः ।

णु स्तुतौ अदादि० परस्मैपदी सक० वेट् ।

कर्त्तरि नौति नुतः नुवन्ति नौषि नुथः नुथ नौमि । नुयात् । नौतु नवानि नवाव नवाम । अनौत् । अनावीत्-अनौषीत् । नुनाव नुनुविथ नुनुविव । नविता-नोता । नविष्यति-नोष्यति । कर्म्मणि नूयते । अनावि । णिचि नावय-ति-ते । अनूनव-त्-त । सनि नुनूषति । यङि नोनूयते । कृत्सु नवनीयम् । नवनम् । नवः अभिनवः । नावकः । नावी । नविता-नोता । नुतः । नुतिः । नवितुम् नोतुम् । नवितव्यम्-नोतव्यम् । नवित्वा-नुत्वा । संनुत्य । नव्यम् नाव्यम् । नुवन्, नूयमानः । नविष्यन्-नोष्यन् । नविष्यमाणः, नोष्यमाणः कर्म्मणि नाविष्यमाणश्च । प्रादिभ्यो णत्वम् प्रणौति । प्रणवः ।

नुद प्रेरणे तुदादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि नुद-ति-ते । नुदे-त्-त । नुद-तु ताम् । अनुद-त्-त । अनौत्सीत् अनुत्त । नुनोद नुनोदिथ नुनुदिम नुनुदे । नोत्ता-सि-से । नुद्यात् नुत्सीष्ट । नोत्स्य-ति-ते । कर्म्मणि नुद्यते । अनोदि । णिचि नोदय-ति-ते । अनूनुद-त्-त । सनि नुनुत्स-ति-ते । यङि नोनुद्यते ।

कृत्सु नोदनीयम् । नोदनम् । नोदः विनोदः । नोदकः । नोदी विनोदी । नुत्तः नुन्नः । नुत्तिः । नोत्तुम् । नोत्तव्यम् । नुत्त्वा । संनुद्य । नोद्यम् । नुद-न् मान नुद्यमानः । नोत्-स्यन् स्यमानः । प्रादिभ्यो णत्वम् प्रणुदति । प्रणोदनम् । वि-विनोदे (हर्षहेतुकव्यापारे) सकर्म्मकः विनुदति । विनोदः । णिचि हर्षसम्पादने व्यापारे विनोदयति । अप-अपसारणे खण्डने च अपनुदति ।

नू स्तवने तुदादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि नुवति नुवतः नुवन्ति । नुवेत् । नुवतु । अनुवत् । अनुवीत् अनुविष्टाम् । नुनाव नुनुवतुः नुनविथ । नुविता । नुविष्यति । कर्म्मणि नूयते । अनावि । णिचि नावय-ति-ते । अनूनव-त्-त । सनि नुनूषति । यङि नोनूयते ।

कृत्सु नुवनीयम् नुवनम्। नुवः। नावकः। नुविता। नूतः। नूतिः। नुवितुम्। नुवितव्यम्। नुवित्वा। संनूय। नूयं नाव्यम्। नुवन् नुवमानः नूयमानः। नुवि-ष्यन् ष्यमाणः। कर्म्मणि नाविष्यमाणश्च। प्रादिभ्यो णत्वम् प्रणुवति। प्रणूतः।

नृत नर्त्तने दिवादिगणीयः परस्मैपदी अकर्म्मकः सेट्।

कर्त्तरि नृत्यति नृत्यतः नृत्यन्ति। अनर्त्तीत्। ननर्त्त। नर्त्तिता। नृत्यात्। नर्त्तिष्यति नर्त्स्यति। भावे नृत्यते। अनर्त्ति। णिचि नर्त्तय-ति-ते। अनीनृतत् अननर्त्तत्। सनि निनर्त्तिषति निनृत्सति।

कृत्सु नर्त्तनीयम्। नर्त्तनम्। नर्त्तः। नर्त्तकः नर्त्तकी। नर्त्ती। नर्त्तिता। नृत्तः। नृत्तिः। नर्त्तितुम्। नर्त्तितव्यम्। नर्त्तित्वा। संनृत्य। नृत्यं नर्त्यम्। नृत्यन्। नर्त्तिष्यन् नर्त्स्यन्। प्रादिभ्यो न णत्वम् प्रनृत्यति।

पच पाके भ्वादिगणीयः उभयपदी सकर्म्मकः अनिट्।

कर्त्तरि पचति-ते। पचेत्-त। पच-तु-ताम्। अपच-त्-त। अपाक्षीत् अपक्त। पपाच। पेचतुः। पेचिथ-पपक्थ पेचिव पेचे। पक्ता-सि-से। पच्यात् पक्षीष्ट। पक्ष्य-ति-ते। कर्म्मणि पच्यते।

अपाक्षि । णिचि पाचय-ति-ते । अपीपच-त्-त । सनि पिपक्ष-ति-ते । यङि पापच्यते ।
कृत्, पचनीयम् । पचनम् । पाकः । मितम्पचः द्रोणम्पचः । पचः । श्वपचः दुष्पचः। पाचकः ।
इष्णुच् कृताधिष्णुः । क्त्रिम पक्त्रिमम् । पक्ता । क्तिन्, अप् च, पक्तिमः । पक्षः । पक्तिः । पचा ।
पक्तुम् । पक्तव्यम् । पक्त्वा । संपच्य । पाच्यम् । पच-न्, मानः । पच्यमानः पक्ष्य-न्, माणः ।

पक्ष व्यक्तीकारे भ्वादिगणीयः आत्मनेपदी सकर्म्मकः सेट् ।

कर्त्तरि पक्षते । अपक्षिष्ट । कर्म्मणि पक्ष्यते । अपक्षि । णिचि पक्षय-ति-ते । अपपक्ष-त्-त ।
कृत्, पक्षनीयम् । प्रपक्षनम् । पक्षः । पक्षकः । पक्षितम् । पक्षितुम् । पक्षिः । पक्षितव्यम् ।
पक्षिता । पक्षमानः पक्षिष्यमाणः ।

पक्ष परिग्रहे चुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि पक्षय-ति-ते । अपपक्ष-त्-त । कर्म्मणि पक्ष्यते । अपक्षि ।
कृत्, पक्षयिता । पक्षना । पक्षयितुम् । पक्षयितव्यम् । पक्षयित्वा । पक्षय-न्, मानः ।
पक्षयमानः । पक्षयि-ष्य-न्, ष्यमाणः इत्यादि भेदः अन्यत् भ्वादिगणीयात् ।

पट भ्रंशने चुरादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि पाटय-ति-ते । अपीपट-त्-त । कर्म्मणि पाट्यते । अपाटि ।

कृत्सु पाटनीयम् पाटनम् । पाठकः । पाटी । पाटयिता । पाटितः । पाटना । पाटयितुम् । पाटयितव्यम् । पाटयित्वा । संपाट्य । पाट्यम् । पाटय-न्, मानः पाट्यमानः । पाटयि-ष्यन्, ष्यमाणः । कर्म्मणि पाटिष्यमाणस्य । उत्-उत्पाटने (उन्मूलने) उत्पाटयति मूलादुत्पापयति ।

पठ पठने भ्वादिगणीयः परस्मैपदी सक० सेट् ।

कर्त्तरि पठति । अपाठीत् । पपाठ पेठतुः । कर्म्मणि पठ्यते । अपाठि । णिचि पाठय-ति-ते । अपीपठ-त्-त । सनि पिपठिषति । यङि पापठ्यते ।

कृत्सु पठनीयम् । पठनम् । पाठः । पाठकः । पाठी । पठिता । पठितः । पठितिः । पठितुम् । पठित्वा । सम्पठ्य । पाठ्यम् । पठन् । पठ्यमानः । पठि-ष्यन्, ष्यमाणः । णअन्तस्य पाठनीयम् । पाठनम् । पाठयिता । पाठितः । पाठना । पाठयितुम् । पाठयितव्यम् । पाठयित्वा । पाठय-न्, मानः पाठ्यमानः। पाठयि-ष्यन्, ष्यमाणः । इति भेदः । सनः पिपठिषा पिपठिषुः । पिपठि-षन् । क्विपि पिपठीः ।

पण व्यवहारे स्तुतौ च भ्वादिगणीयः आत्मनेपदी सेट् ।

कर्त्तरि पणायते पणायति । अपणायिष्ट । अपणिष्ट । पणायाम्-बभूव-आस-चक्रे पेणे । पणायिताऽसे पणिताऽसे । स्तुतौ स्वार्थेऽपि वा आयः पणते इत्यादि । कर्म्मणि पणाय्यते पण्यते । अपणायि-अपाणि ।

भावादौ पणायनीयम्-पणनीयम् । पणायनम्-पणनम् । पणः । पणायकः-पाणकः । पणायिता-पणिता । पणायितः-पणितः । पणाय्या । पणायितुम् पणितुम् । पणायितव्यम्-पणितव्यम् । पणायित्वा-पणित्वा । सम्पणाय्य-सम्पणय । पणाय्यम् पाण्यम् । पणायमानः स्तुतौ पणमानोऽपि पणायि-ष्यन् ष्यमाणः-पणिष्यमाणः ।

पत पतने भ्वादिगणीयः पर० अक० सेट् ।

कर्त्तरि पतति । अपप्तत् । पपात पेततुः । पतिता । पत्यात् । पतिष्यति । भावे पत्यते । अपाति । णिचि पातय-ति-ते । अपीपत-त्-त । सनि पिपतिषति-पित्सति । यङि पनीपत्यते ।

क्तीत्सु पतनयम् । पतनम् । पातः । पातकः। पाती । इष्णुच् उत्पतिष्णुः । उकञ् पातुकः ।
पतितः । पत्तिः । पतितुम् । पतितव्यम् । पतित्वा । सम्पत्य । पात्यम् । पतन् पतिष्यन् । णयन्तस्य
पातनीयम् । पातनम् । पातयिता । पातितः । पातना । पातयितुम् । पातयितव्यम् ।
पातय-न् मानः पात्यमानः । पातयि-ष्यन् ष्यमाणः। कर्म्मणि पातिष्यमाणश्च । सनः पिपतिषा-
पित्सा । पिपतिषुः-पित्सुः । पिपतिषन् पित्सन् ।
उत्—ऊर्द्ध्वपतने उत्पतति । प्रनि नमस्कारे सक० प्रणिपतति । अनु—अनुगमने अनुपतति ।

पद् गतौ दिवादिगणीयः आत्मनेपदी सकर्म्मकः अनिट् ।

कर्त्तरि पद्यते । अपादि । पत्स्यते । कर्म्मणि पद्यते । अपादि । णिचि पादय-ति-ते अपीपद-त्-त ।
सनि पिपदिषते पित्सते । यङि पनीपद्यते । प्रणि-प्रणिपद्यते ।
क्तत्सु पदनीयम् । पदनम् । पादः । पादी । पादकः । पन्नः । पत्तिः । पत्तुम् ।
पत्तव्यम् । पत्त्वा । प्रपद्य । पाद्यम् । पद्यमानः । पत्स्यमानः । णयन्तस्य पादनीयम्
पादनम् । पादयिता । पादितः । पादना । पादयितुम् । पादयितव्यम् । पादयित्वा ।
पादय-न् मानः पाद्यमानः । पादयि-ष्यन् ष्यमाणः । कर्म्मणि पादिष्यमाणश्च । सनः

पिपदिषा पित्सा पिपदिषुः पित्सुः । पिपदिषमाणः-पित्समानः । यङि पनीपद्यमानः ।
उत्—उत्पत्तौ अक० उत्पद्यते । उदपादि । उत्पन्ना । उत्पत्तिः ।
सम्—सम्पत्तौ अक० सम्पद्यते । सम्पन्नः सम्पत्तिः-सम्पत् । नि—मरणे अक० निपद्यते । निपन्नः निपत्तिः निपत् । आ—आपत्तौ (आपत्प्राप्तौ, कष्टाद्यागमने, तर्कविशेषे च) आपद्यते आपदं प्राप्नोति कष्टाद्यागच्छति तर्कविषयीभवति । आपन्नः आपत्तिः-आपत् । प्रति-ज्ञाने, स्वीकारे, च प्रतिपद्यते जानाति स्वीकरोति वा । उप—उपपत्तौ (युक्तियुक्तभवने) । उपपद्यते । उपपन्नः उपपत्तिः । णिचः उपपादयति । उपपाद्यते । उपपादनीयम् । उपपाद्यम् ।
अभि—उप-स्वीकारे अभ्युपपद्यते स्वीकरोति । अभ्युपपन्नः अभ्युपपत्तिः ।

पा पाने भ्वादिगणीयः सक० अनिट् ।

कर्तरि पिबति । पिबेत् । पिबतु । अपिबत् । अपात् । पपौ पपिथ-पपाथ पपिम । पाता । पेयात् । कर्मणि पीयते । अपायि अपायिषाताम्-अपासाताम् । पपे । पायिताहे पाताहे । णिचि पाययति-ते । अपीप्यत्-त । पिपासति । यङि पेपीयते ।

कृत्सु पानीयम् । पानम् । पायः । पायकः । मधुपः द्विपः फेनपः । क्षीरपायी । पाता । पीतः । पीतिः । पातुम् । पातव्यम् । पीत्वा । आपाय । निपीयेति तु पीङोरूपम् । पेयम् । पिबन् । पीयमानः । पास्यन् पास्यमानः । सनः पिपासा । पिपासुः । पिपासन् ।

पा रक्षणे अदादिगणीयः परस्मैपदी सक० अनिट् ।

कर्त्तरि पाति । पायात् । पातु । अपात् अपान्-अपुः । अपासीत् । पपौ पपुः । कर्म्मणि पायते । अपायि । णिचि पालय-ति-ते । अपीपल-त्-त । कृत्सु पिबतेरिव रूपम् । पातः । पातिः । पात्वा । पान् इत्यादि भेदः ।

पार कर्म्मसमाप्तौ अदन्तचुरादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि पारयति-ते । अपपारत्-त । कर्म्मणि पार्य्यते । अपारि । कृत्सु पारणीयम् । पारणम् । पारः । पारकः । पारयिता । पारितः । पारणा । पारयितुम् । पारयितव्यः । पारयित्वा । सम्पार्य्य । पार्य्यम् । पारय-न्, माणः पार्य्यमाणः । पारयि-ष्यन् ष्यमाणः । कर्म्मणि पारिष्यमाणश्च ।

पाल रक्षणे चुरादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि पालय-ति-ते । अपीपल-त्-त । पालयिता-सि-से । कर्म्मणि पाल्यते । अपालि ।
कृत् पालनीयम् । पालनम् । पालः । घण् क्षेत्रपालः भूमिपालः भूपालः । पालकः । पालयिता ।
पालितः । पालना । पालयितुम् । पालयितव्यम् । पालयित्वा । सम्पाल्य । पाल्यः ।
पालय-न् मानः पाल्यमानः । पालयि-ष्यन् ष्यमाणः कर्म्मणि पालिष्यमाणः ।

पिष पेषणे रुधादिगणीयः परस्मैपदी सक० अनिट् ।

कर्त्तरि पिनष्टि पिंष्टः पिंषन्ति पिनक्षि पिंष्ठः पिंष्ठ पिनष्मि पिंष्व. पिंष्मः । पिंष्यात् । पिनष्टु ।
पिण्ड्ढि । अपिनट्-ड् अपिंष्टाम् । अपिषत् । पिपेष । पिपेषिथ पिपेषिम । पेष्टा ।
पिष्यात् । पेक्ष्यति । कर्म्मणि पिष्यते । अपेषि । णिचि पेषय-ति-ते । सनि पिपिक्षति ।
कृत् पेषणीयम् । पेषणम् । पेषः । पेषकः । पेषी । पेष्टा । पिष्टः । पिष्टिः । पेष्टुम् । पेष्टव्यम् । पिष्ट्वा ।
सम्पिष्य । णमुल् शुष्कपेषं पिनष्टि । पेष्यम् । पिंषन् । पिष्यमाणः । पे-क्ष्यन् क्ष्यमाणः ।

पीड़ पीड़ने चुरादिगणीयः उभयपदी सक० सेट्।

कर्त्तरि पीड़य-ति-ते। अपीपिड़-त्-त-अपिपीड़-त्-त। कर्म्मणि पीड्यते। क्तत्सु पीड़नीयम्। पीड़नम्। पीड़ः। पीड़कः। पीड़ी। पीड़यिता। पीड़ितः। पीड़ा। पीड़ना। पीड़यितुम्। पीड़यितव्यम्। पीड़यित्वा। संपीड्य। पीड्यः। णिजन्तस्य, पीडय-न्, मानः पीड्य-मानः। पीड़यि-ष्यन्, ष्यमाणः। पीड़िष्यमाणस्च। कर्म्मणि आ—भूषणे आपीड़यति। आपीड़ा।

पुष पोषणे दिवादिगणीयः परस्मैपदी सक० अनिट्।

कर्त्तरि पुष्यति। पुष्येत्। पुष्यतु। अपुष्यत्। अपुषत्। पुपोष। पुपोषिथ पुपुषिव। पोष्टा। पोच्यते। कर्म्मणि पुष्यते। अपोषि। णिचि पोषयति-ते। अपूपुषत्। सनि पुपुच्चति। क्तत्सु पोषणीयम्। पोषणम्। पोषः। पोषकः। पोषी। पोष्टा। पुष्टः। पुष्टिः। पोष्टुम्। पोष्टव्यम्। पुष्ट्वा। सम्पुष्य। पोष्यम्। पुष्यन्। पुष्यमाणः। पो-च्यन्, च्यमाणः।

पुष पोषणे क्र्यादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि पुष्णाति । पुष्णीतः । पुष्णन्ति । पुष्णीयात् । पुष्णातु । अपुष्णात् । अपोषीत् । पोषिता । पोषिष्यति । कर्म्मणि पुष्यते । अपोषि । णिचि पोषय-ति-ते । अपूपुष-त्-त ।

कृत्सु दिवादिगणीयवत् पोषिता । पोषितुम् । पोषितव्यम् । पोषित्वा । पुष्णन् । इत्यादि भेदः ।

पुष्प विकासे दिवादिगणीयः परस्मैपदी अक० सेट् ।

कर्त्तरि पुष्प्यति । अपुष्पीत् । भावे । पुष्प्यते । अपुष्पि । णिचि पुष्पय-ति-ते ।

कृत्सु पुष्पणीयम् । पुष्पणम् । घञ् पुष्पम् । पुष्पिता । पुष्पितः । पुष्पा । पुष्पितुम् । पुष्पितव्यम् । पुष्पित्वा । सम्पुष्प्य । पुष्प्यन् । पुष्पिष्यन् ।

पूङ् शोधने भ्वादिगणीयः आत्मनेपदी सक० सेट् ।

कर्त्तरि पवते । अपावीत् । कर्म्मणि पूयते । अपावि । णिचि पावय-ति-ते । अपीपव-त्-त । सनि पुपूषते । णिचः सनि पिपावयिषति ।

कृत्सु पवनीयम् । पवनम् । ल्यु पवनः । पावकः । पविता । पूतः-पवितः । पूतिः । पवि-

तुम्। पवितव्यम् । पवित्वा पूत्वा । सम्पूय। विपूय: पव्यम् पाव्यम्। पवमानः पूयमानः । १५०
पवि-ष्यन् ष्यमाणः । कर्म्मणि पाविष्यमाणश्च ।

पू शोधे दिवादिगणीयः आत्मनेपदी अक० सेट् ।

कर्त्तरि पूयते । अपविष्ट। पुपुवे । भावे पूयते । अपावि । क्तस्तु भ्वादिगणीयवत् । पूयमान इति भेदः ।

पू शोधने क्र्यादिगणीयः उभयपदी सक० सार्व्वधातुके ह्रस्वः सेट् ।

कर्त्तरि पुनाति पुनीतः पुनन्ति पुनीते। पुनीयात् पुनीत। पुनातु पुनीताम्। अपुनात् अपुनीत। अपावीत् अपविष्ट। पुपाव पुपुवे। पवितासि-से। पूयात् पविषीष्ट। पविष्य-ति-ते। अन्यत् भ्वादिगणीयवत्। निष्ठायां नाशेऽर्थे पूनः अन्यत्र पूतः। इत्र-पवित्रम्। शतरि पुनन् पुनानः इति भेदः ।

पूज पूजने चुरादिगणीयः उभयपदी सक० सेट्।

कर्त्तरि पूजयति-ते। अपूपुज-त्-त। कर्म्मणि पूज्यते। अपूजि अपूजयिषाताम्-अपूजिषाताम्।
सन्नन्ते पुपूजयिषति। पूजनम्। पूजकः। पूजी। पूजयिता। पूजितः। पूजा। णिजन्तात् पूजना।
पूजयितुम् पूजयितव्यम्। पूजयित्वा। सम्पूज्य। पूज्यः। पूजयन्-न् मानः पूजयमानः।
पूजयिष्यन् ष्यमाणः। कर्म्मणि पूजयिष्यमाणश्च।

पूर पूर्त्तौ दिवादिगणीयः आत्मनेपदी सक० सेट्।

कर्त्तरि पूर्य्यते। अपूरि-अपूरिष्ट। पुपूरे। पूरिता। कर्म्मणि पूर्य्यते। अपूरि। णिचि पूरय-ति-ते।
अपूपुर-त्-त।
सन्नन्ते पूरणीयम्। पूरणम्। पूरः। पूरकः। पूरी। पूरिता। पूर्णः पूर्त्तिः स्यातादि। पूर्त्तिः।
पूरितुम्। पूरितव्यम्। पूरित्वा। सम्पूर्य्य। पूर्य्यम्। पूर्य्यमाणः। पूरिष्यमाणः।

पूर पूर्त्तौ चुरादिगणीयः उभयपदी सक० सेट्।

कर्त्तरि पूरयति-ते। अपूपुरत्-त। पूरयिता। कर्म्मणि पूर्य्यते। अपूरि। अपूरिषाताम्
अपूरयिषाताम्।

क्तवतु पूरयिता । पूर्णः-पूरितः । पूरणा । पूरयितुम् । पूरयितव्यम् । पूरयित्वा । पूरय-न्, माणः । १५२
पूरयि-ष्यन्, ष्यमाणः इत्यादि भेदः । अन्यत् दिवादिगणीयवत् ।

पृ पूरणे जुहोत्यादि० सक० परस्मैपदी अनिट्, वा दीर्घः दीर्घपक्षे सेट् ।

कर्त्तरि पिपर्त्ति पिपृतः-पिपूर्त्तः पिप्रति-पिपुरति पिपर्षि पिपृथः-पिपूर्थः पिपर्मि पिपृवः-पिपूर्व्वः । पिपृयात् पिपूर्य्यात् । पिपर्त्तु पिपृताम्-पिपूर्त्ताम् । पिपृहि पिपूर्हि पिपराणि पिपराव । अपिपः अपिपृताम्-अपिपूर्त्ताम् अपिपरुः । अपारीत् अपार्षीत् । पपार पपरतुः-पप्रतुः । परीता परिता पर्त्ता । प्रियात् पूर्य्यात् । परिषीष्ट पृषीष्ट । परीष्यति परिष्यति । कर्म्मणि प्रियते पूर्य्यते । अपारि । पारिताहे परीताहे परिताहे पर्त्ताहे । णिचि पारयति-ते । सनि पिपरीषति पिपरिषति पुपूर्षति ।

क्तवतु परणीयम् परणम् । परः पारः । पारकः । पारी । परीता परिता पर्त्ता । पूर्त्तः पृतः । पूर्त्तिः पृतिः । परीतुम् परितुम् पर्त्तुम् । परीतव्यम् परितव्यम् पर्त्तव्यम् । पीर्त्वा पृत्वा । आपूर्य्य आपृत्य । पार्य्यम् पृत्यम् । पिपुरत् पिप्रत् । पूर्य्यमाणः प्रियमाणः । परीष्य-न्, परिष्यन्, परीष्यमाणः परिष्यमाणः । कर्म्मणि पारिष्यमाणश्च ।

पृङ् व्यापारे तुदादिगणीयः आत्मनेपदी सकर्म्मकः अनिट्। प्रायेण व्यापूर्व्वः।
कर्त्तरि व्याप्रियते। व्याप्रियेत। व्याप्रियताम्। व्याप्रियत। व्यापृत। व्यापप्रे। व्यापृषीष्ट।
व्यापरिष्यते। कर्म्मणि व्याप्रियते। व्यापारि। णिचि व्यापारय-ति-ते। व्यपीपर-त्-त।
अनीयर् व्यापरणीयम्। व्यापरणम्। व्यापारः। व्यापारकः। व्यापारी। व्यापर्त्ता।
व्यापृतः। व्यापृतिः। व्यापर्त्तुम्। व्यापर्त्तव्यम्। व्यापृत्य। व्यापार्य्यः। व्याप्रियमाणः।
व्यापरिष्यमाणः। कर्म्मणि व्यापारिष्यमाणश्च।

पृ प्रीतौ स्वादिगणीयः परस्मैपदी अक० प्रीणने सक० अनिट्।

कर्त्तरि पृणोति पृणुतः पृणन्ति। पृणुयात्। पृणोतु। अपृणोत्। अपार्षीत्। पपार पप्रतुः।
पर्त्ता। प्रियात्। परिष्यति। कर्म्मणि प्रियते। अपारि अपारिषाताम्-अपृषाताम्। णिचि
पारयति-ते अपीपरत्-त। सनि पुपूर्षति। क्तवतु पृतवान् इति भेदः अन्यत् तुदादिगणीयवत्।

पृच सम्पर्के रुधादिगणीयः पर० अक० सेट्।

कर्त्तरि पृणक्ति पृङ्क्तः पृञ्चन्ति पृणक्षि पृङ्क्थः पृङ्क्थ पृणच्मि पृञ्च्वः पृञ्च्मः। पृञ्च्यात्। पृणक्तु।
पृङ्ग्धि। अपृणक्-ग्। अपर्चीत्। पपर्च। पर्चिता। भावे पृच्यते। अपर्चि। १५२

क्तत्सु पर्चनीयम् । पर्चनम् । पर्कः । घिनुन् सम्पर्की । पर्चिता । पृक्तः । पृक्तिः । पर्चितुम् । पर्चितव्यम् ।
पर्चित्वा । संपृच्य । पर्च्यम् । पृञ्चन् । पर्चिष्यन् । क्विप् पृक् ।

पेस गतौ भ्वादिगणीयः परस्मैपदी सक० सेट् ।

कर्त्तरि पेसति । अपेसीत् । कर्म्मणि पेस्यते । अपेसि । णिचि पेसयति-ते । अपिपेसत्-त ।
क्तत्सु पेसनीयम् । पेसनम् । पेसः । पेसकः । पेसी । पेसिता । पेसितः । पेसा । पेसितुम् ।
पेसितव्यम् । पेसित्वा । सम्पेस्य । पेस्यम् । पेसन् पेस्यमानः । पेसि-ष्यन् ष्यमाणः ।

पेस अनादरे चुरादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि पेसयति-ते । अपीपिसत्-त । क्तत्सु पेसयिता । पेसयितुम् । पेसयितव्यम् । पेसयित्वा ।
पेसयन् मानः । पेसयिष्यन् ष्यमाणः इत्यादि भेदः अन्यत् भ्वादिगणीयवत् ।

प्याय वृद्धौ भ्वादिगणीयः आत्मनेपदी अक० सेट् ।

कर्त्तरि प्यायते । अप्यायि-अप्यायिष्ट । पिप्ये । भावे । प्याय्यते । अप्यायि । यङि पेपीयते ।

कृत्सु प्यायनीयम् प्यायनम् । प्यायः । प्यायकः । प्यायी । प्यायिता । प्यानः । प्यायीनम्यः ।
...ति । प्यायितुम् । प्यायितव्यम् । प्यायित्वा । संप्याय्य । प्याय्यम् । प्यायमानः । प्यायिष्यमाणः।
सनि पिप्यायिषमाणः । प्या-णिच् भीतने आप्याययति-ते । आप्यायितः । आप्यायय-न् मानः ।

प्रच्छ जिज्ञासायां तुदादिगणीयः द्विक० पर० अनिट् ।

कर्त्तरि पृच्छति । पृच्छेत् । पृच्छतु । अपृच्छत् । अप्राक्षीत् । पप्रच्छ पप्रच्छतुः । प्रष्टा । पृच्छ्यात् ।
प्रक्ष्यति । कर्म्मणि । पृच्छ्यते । अप्रच्छि । णिचि प्रच्छयति-ते । सनि पिपृच्छिषति ।
कृत्सु प्रच्छनीयम् । प्रच्छनम् । प्रच्छः । प्रच्छकः । प्रच्छी । प्रष्टा । पृष्टः । पृष्टिः । प्रष्टुम् ।
...तिन्, आट्, न प्रश्नः । प्रष्टव्यम् । पृष्ट्वा । आपृच्छ्य । प्रच्छ्यम् । पृच्छन् पृच्छ्यमानः। प्रच्छ-न्
प्रश्नः । आङ्—आत्मनेपदं आपृच्छते । आपृष्टः ।

अथ प्रथ प्रख्याने भ्वादिगणीयः आत्मनेपदी अकर्म्मकः ख्यापने सकर्म्मकः सेट् ।

कर्त्तरि प्रथते । अप्रथिष्ट । पप्रथे । भावे प्रथ्यते । अप्राथि । णिचि प्रथय-ति-ते । अपप्रथ-त्-त ।
कर्म्मणि प्रथ्यते-अप्रथि ।

क्रत्सु प्रथनीयम्। प्रथनम्। प्राथः। प्राथकः। प्राथी। प्रथिता। प्रथितः। प्रथा। प्रथितुम्। प्रथितव्यम्। प्रथित्वा। संप्रथ्य। प्राथ्यम्। प्रथमानः। प्रथ्यमानः। प्रथिष्यमाणः।

प्री प्रीतौ दिवादिगणीयः आत्मनेपदी अकर्म्मकः प्रीणने सक० अनिट्।

कर्त्तरि प्रीयते। प्रीयेत। प्रीयताम्। अप्रीयत। अप्रेष्ट। पिप्रिये। प्रेतासे। प्रेषीष्ट। प्रेष्यते। भावे प्रीयते। अप्रायि। णिचि प्रीणय-ति-ते। अपिप्रीण-त्-त।

क्रत्सु प्रयणीयम्। प्रयणम्। प्रायः। प्रायी। प्रेता। प्रीतः। प्रीतिः। प्रेतुम्। प्रेतव्यम्। प्रीत्वा। सम्प्रीय। प्रेयम्। प्रीयमाणः प्रेष्यमाणः।

प्री इच्छायां क्र्यादिगणीयः उभयपदी सकर्म्मकः अनिट्।

कर्त्तरि प्रीणाति प्रीणीतः प्रीणन्ति प्रीणीते प्रीणाते। प्रीणयात् प्रीणीत। प्रीणातु प्रीणीताम्। अप्रीणात् अप्रीणीत। अप्रैषीत् अप्रेष्ट। पिप्राय पिप्रियतुः पिप्रिये। प्रेता-सि-से। प्रीयात् प्रेषीष्ट। प्रेष्यति-ते। कर्म्मणि प्रीयते। अप्रायि। णिचि प्रायय-ति-ते। अपिप्रय-त्-त। क्रत्सु दिवादिगणीयवत्। प्रीणन्, प्रीणान इत्यादि भेदः।

प्रु गमने भ्वादिगणीयः आत्मनेपदी अकर्म्मकः अनिट् ।

कर्त्तरि प्रवते । अप्रोष्ट । पुप्रुवे । प्रोताहे प्रोष्यते । कर्म्मणि प्रूयते । अप्रावि । णिचि प्रावय-ति-ते । अपिप्रवत्-त-अपुप्रवत्-त ।

कृदन्ते प्रवणीयम् । प्रवणम् । प्रावः । प्रावकः । प्रावी । प्रोता । प्रुतः । प्रुतिः । प्रोतुम् । प्रुत्वा । प्रप्रुत्य । प्रवम् । प्रवमाणः प्रूयमाणः । प्रोष्यमाणः । कर्म्मणि प्राविष्यमाणः ।

प्रुष दाहे भ्वादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि प्रोषति । अप्रोषीत् । पुप्रोष । कर्म्मणि प्रुष्यते । अप्रोषि । णिचि प्रोषय-ति-ते । अपुप्रुष-त्-त ।

कृदन्ते प्रोषणीयम् प्रोषणम् । प्रोषः । प्रोषकः । प्रोषी । प्रोषिता । प्रुष्टः । प्रुष्टिः । प्रोषितुम् । प्रोषितव्यम् । प्रोषित्वा । प्रुष्ट्वा । संप्रुष्य । प्रोष्यः । प्रोषन् । प्रुष्यमाणः । प्रोषि-ष्यन् ष्यमाणः ।

ओप्यायी वृद्धौ भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट् ।

कर्त्तरि प्यायते । अप्यायिष्ट । भावे प्याय्यते । अप्यायि । णिचि प्यायय-ति-ते । अपिप्यय-त्-त ।

कृत्सु स्रवनीयम् । स्रवनम् । ण्यन्तस्य स्रावनम् । स्रवः। विस्रवः-विस्रावः । आस्रवः-आस्रावः । स्रावकः ।
स्रविता । स्रवितः । स्रवितुम् । स्रवितव्यम् । स्रवित्वा । संस्रव्य । स्राव्यम् । स्रवमानः
स्रविष्यमाणः ।

स्रुष-दाहे भ्वादिगणीयः आत्म० सक० सेट् । स्रुषद्रूपकार्य्यम् ।

प्सा भक्षणे अदादिगणीयः परस्मैपदी सक० अनिट् ।

कर्त्तरि प्साति । प्सातः । प्सायात् । प्सातु । अप्सात् अप्सुः-अप्सान् । अप्सासीत् अप्सासिष्टाम्
अप्सासिषुः । पप्सौ । प्सायात्-प्सेयात् । कर्म्मणि प्सायते । अप्सायि । णिचि प्सापयति अपिप्सपत् ।
कृत्सु प्सानीयम् । प्सानम् । प्सायः । प्सायकः । प्सायी । प्साता । प्सातः । प्सातिः । प्सातुम् ।
प्सातव्यम् । प्सात्वा । संप्साय । प्सेयम् । प्सान् प्सायमानः । प्सा-प्सन् प्समानः । कर्म्मणि
प्सायिष्यमाणश्च । प्रणिप्साति । प्रणिप्सा ।

फल गतौ निष्पत्तौ च भ्वादिगणीयः पर० सक० सेट् ।

कर्त्तरि फलति । अफालीत् । पफाल फेलतुः । कर्म्मणि फल्यते । अफालि । णिचि फालय-ति-ते ।
गत्यर्थस्य तु फलयति । उभययोः अपीफल-त्-त ।

अद्य फलनीयम्‌ फलनम्‌ । घञ्‌ फालम्‌ । फालः । फालकः । फलिता । फुल्लः फुल्लवान्‌ । प्रफुल्लः संफुल्लः । भावे फुल्लम्‌ । फलितवत्‌ । फल्लनः । प्रफुल्लितः । फलितुम्‌ । फलितव्यम्‌ । फलिता । संफल्य । फलन्‌ फलमानः । फलिष्यन्‌ फलमानः ।

फल्ल विकासे भ्वादिगणीयः पर० प्रक० सेट्‌ ।

कर्तरि फल्लति । अफल्लीत्‌ । पफल्ल । फल्लिता । भावे फल्यते । अफल्लि । फल्लयति-ते । अपफल्लत्‌ । अद्य फल्लनीयम्‌ । फल्लनम्‌ । फल्लः । उत्फल्लः संफल्लः प्रफल्लः । फल्लकः । फल्लितः । फल्लिः । फल्लितुम्‌ । फल्लितव्यम्‌ । संफल्ल्य । फल्लम्‌ । फल्लन्‌ फल्लिष्यन्‌ ।

अथ निन्दायां भ्वादिगणीयः आत्मनेपदी सक० सेट्‌ ।

कर्तरि बीभत्सते । बीभत्सेत । बीभत्सताम्‌ । अबीभत्सत । अबीभत्सिष्ट । बीभत्साम्‌-बभूव-आस-चक्रे । बीभत्सिताहे । बीभत्सिषीष्ट । बीभत्सिष्यते । अबीभत्सिष्यत । कर्मणि बीभत्स्यते । अबीभत्सि । णिचि बीभत्सयति-ते । अबीभत्सत्‌-त ।
अद्य बीभत्सनीयम्‌ । बीभत्सनम्‌ । बीभत्सकः । बीभत्सिता । बीभत्सितः । बीभत्सा ।

बीभत्सुः । बीभत्सितुम् । बीभत्सितव्यम् । बीभत्सित्वा । आबीभत्स्य । बीभत्स्यम् ।
बीभत्समानः बीभत्स्यमानः बीभत्सिष्यमाणः। निन्दाभिन्नार्थे तु बधते । अबधिष्ट । बबधे इत्यादि।

बन्ध बन्धने क्र्यादिगणीयः पर० सक० अनिट् ।

कर्त्तरि बध्नाति बध्नीत बध्नन्ति । बध्नीयात् । बध्नातु बधान । अबध्नात् । अबान्त्सीत् अबान्धाम् अबान्त्सुः । बबन्ध बबधतुः बबन्धतुः । कर्म्मणि बध्यते । अबन्धि । णिचि बन्धयति-ते । अबबन्धत्-त । सनि बिबन्त्सति ।

कृत्सु बन्धनीयम् । बन्धनम् । बन्धः प्रबन्धः । बन्धकः । बन्धी । बन्धा । बद्धः । बद्धिः । बन्धुम् । बन्धव्यम् । बद्धा । आबध्य । बन्धरः । बध्नन् बध्यमानः । बन्त्-स्यन् स्यमानः ।

अनु—अनुबन्धने अनुबध्नाति । सम्—संबन्धे संबध्नाति । उत्—उद्बन्धने उद्बध्नाति । प्रति—प्रतिबन्धे प्रतिबध्नाति । नि—निबन्धे निबध्नाति । निर्—निर्बन्धे निर्बध्नाति । प्रप्रबन्धे प्रबध्नाति ।

बाध विघाते भ्वादिगणीयः आत्मनेपदी सक० सेट् ।

कर्त्तरि बाधते । अबाधिष्ट । बबधे । कर्म्मणि बाध्यते । अबाधि । णिचि बाधयति-ते अबबाधत्-त । कृत्सु बाधनीयम् । बाधनम् । बाधः । बाधकः । बाधिता । बाधितः । बाधा । बाधितुम् ।

[illegible]तव्यम् । [illegible]ता । [illegible] । [illegible] । [illegible]मानः [illegible]मानः । [illegible]ष्यमाणः ।

सम्-[illegible] ([illegible]) संतापयते । संतापः ।

क्षुभ आते दिवादिगणीयः आत्मनेपदी सकर्मकः अनिट् ।

[illegible] क्षुभ्यते । [illegible] चक्षुभे । [illegible] । [illegible] । [illegible] । [illegible] । कर्मणि क्षुभ्यते ।

[illegible] । [illegible] । सनि चुक्षुभिषते । यङि चोक्षुभ्यते ।

[illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] । [illegible]मानः । [illegible]मानः । णिचः क्षोभयिता । क्षोभितः । क्षोभना ।

क्षोभयितुम् । क्षोभयितव्यः । क्षोभयित्वा । प्रक्षोभ्य । क्षोभय-न् मानः क्षोभ्यमानः क्षोभयिष्यन्

[illegible] । सनः [illegible] । [illegible] । [illegible] ।

उत्-[illegible] ([illegible]) [illegible]ते । उत्-क्षोभि उत्क्षोभने (उत्तेजने) उत्क्षोभयति उत्तेजयति ।

सम्-क्षोभि संक्षोभने (क्रियायाः निरोगार्थमाभिमुख्यसम्पादने) संक्षोभयति । संक्षोभितः ।

क्षुभ क्षोभणे भ्वादिगणीयः परस्मैपदी सकर्मकः अनिट् ।

[illegible] क्षोभति । अक्षोभीत् । [illegible] [illegible] [illegible] । अन्यत् दिवादिगणीयात् धातोः

क्षोभन् इति भेदः ।

वॄ वरणे (प्रार्थने) क्र्यादिगणीयः परस्मैपदी सक० सेट् ।

कर्त्तरि वृणाति-वृणाति वृणीतः-वृणीतः वृणन्ति-वृणन्ति । अवारीत् । ववार ववरतुः । वरीता-वरिता । वीर्य्यात् । वरीष्यति-वरिष्यति ।' कर्म्मणि वीर्य्यते । अवारि । णिचि वारय-ति-ते । अवीवर-त्-त । सनि विवरीषति विवरिषति वुवूर्षति ।

कृत्सु वरणीयम् । वरणम् । वरः । वारकः । वरीता वरिता । वीर्णः । वीर्णिः । वरीतुम् वरितुम् । वरितव्यः वरीतव्यः । वीर्त्वा । संवीर्य्य । वार्य्यः । वृणन् वृणन् । वीर्य्यमाणः । वरी-ष्यन् ष्यमाणः वरि-ष्यन् ष्यमाणः ।

ब्रू कथने दिवादिगणीयः उभयपदी द्विक० सेट् ।

कर्त्तरि ब्रवीति-आह ब्रूतः-आहतुः ब्रुवन्ति-आहुः ब्रवीषि-आत्थ ब्रूथः-आहथुः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः । ब्रूते ब्रुवाते ब्रुवते । ब्रूयात् ब्रुवीत । ब्रवीतु ब्रूताम् । अब्रवीत् अब्रूत । अवोचत् अवोचत । उवाच ऊचतुः उवचिथ उवक्थ ऊचिव । वक्तासि । उच्यात् वक्ष्यति । कर्म्मणि उच्यते । अवाचि । ऊचे ऊचिषे । वक्तासे । वक्षीष्ट । वक्ष्यते । णिचि वाचय-ति-ते । अवीवच-त्-त । सनि विवक्षति ।

भज्यात् भक्षीष्ट । कर्म्मणि भज्यते । अभाजि । णिचि भाजय-ति-ते । अबीभज-त्-त ।
सनि बिभक्ष-ति-ते ।

कृत्सु भजनीयम् । भजनम् । भागः । भाजकः । घिनुन् भागी । भक्ता । भक्तः । भक्तिः । भक्तुम् ।
भक्तव्यः। भक्त्वा । विभज्य । भाज्यम् । भाग्यम् । भजन् भजमानः भज्यमानः। भक्ष्यन् भक्ष्यमाणः ।

भण शब्दे भ्वादिगणीयः द्विक० सेट् ।

कर्त्तरि भणति । अभाणीत् अभणीत् । बभाण बभणतुः । कर्म्मणि भण्यते । अभाणि । णिचि
भाणयति-ते । अबभाण-त्-त अबीभण-त्-त ।

कृत्सु भणनीयम् । भणनम् । भाणः । भाणकः आभाणकः । भणिता । भणितः । भणितिः ।
भणितुम् । भणितव्यम् । भणित्वा । सम्भण्य । भाण्यम् । भणन् भण्यमानः । भणि-ष्यन् ष्यमाणः।

भन्ज भञ्जने रुधादिगणीयः पर० सक०, अनिट् ।

कर्त्तरि भनक्ति भङ्क्तः भञ्जन्ति भनक्षि भङ्क्थः भङ्क्थ भनज्मि भञ्ज्वः भञ्ज्मः । भज्यात् ।

भा दीप्तौ अदादिगणीयः पर० अक० अनिट्।

कर्त्तरि भाति भातः भान्ति। अभात् अभान् अभुः। अभासीत्। बभौ बभिथ बभाथ बभिव। भातासि। भावे। भायते। अभायि। णिचि भापयति-ते। अबीभपत्-त। सनि बिभासति। कृत्सु भानीयम्। भानम्। भायः। भायकः। भाता। भातः। भातिः। प्रभा आभा। भातुम्। भातव्यम्। भात्वा। विभाय। भेयम्। भान् भास्यन्। व्यति—परस्परभाने व्यतिभाते व्यतिभाते व्यतिभाते व्यतिभासे व्यतिहे। प्रति—प्रतिभायाम् प्रतिभाति।

भाष कथने भ्वादिगणीयः आत्मनेपदी द्विक० सेट्।

कर्त्तरि भाषते। अभाषिष्ट। बभाषे। भाषितासे। कर्म्मणि भाष्यते। अभाषि। णिचि भाषयति-ते। अबभाषत्-त अबीभषत्-त। कृत्सु भाषणीयम्। भाषणम्। भाषः। भाषकः। भाषी। भाषिता। भाषितः। भाषा। भाषि-

भी भये जुहोत्यादि० पर० अक० अनिट्।

कर्त्तरि बिभेति बिभीतः-बिभितः बिभ्यति बिभीथः-बिभिथः, बिभेमि बिभीवः-बिभिवः। बिभियात्-बिभीयात्। बिभेतु बिभिहि-बिभीहि बिभयानि। अबिभेत् अबिभीताम्-अबिभिताम् अबिभयुः। अभैषीत्। बिभयाम्-बभूव-आस-चकार बिभाय। आमभावपक्षे बिभ्यतुः बिभ्युः बिभयिथ-बिभेथ बिभ्यिव। भेता। भेष्यति। भावे भीयते। अभायि। णिचि प्रयोजकात् भये आत्मनेपदी भीषयते। अन्यत्र उभयपदी भापयति-ते। सनि बिभीषति। यङि बेभीयते। कृत्सु भयनीयम्। भयनम्। भयम्। भायकः। आनक-भयानकः। भेता। भीतः। भीतिः। भेतुम्। भेतव्यम्। सम्भीय। भेयम्। क्रु भीरुः। क्लुक भीलुकः। म भीमः। णिचः। भीष्मः। बिभ्यत्। भेष्यन्। णिचः भीषणीयम् भापनीयम्। भीषणम् भापनम्। भीषणः भापनः। भीषकः भापकः। भीषयिता भापयिता। भीषितः भापितः। भीषणा भापना। भीषयितुम् भापयितुम्। भीषयितव्यम् भापयितव्यम्। भीषयित्वा भापयित्वा। सम्भीष्य सम्भाप्य। भीष्यम् भाप्यम्। भीषयमाणः भीष्यमाणः। भापय-न् मानः भाप्यमानः। भीषयिष्यमाणः भापयि-ष्यन् ष्यमाणः। सन्नः बिभीषा बिभीषुः। बिभीषन्।

भूष भूषणे वा चुरादि० उभयपदी पक्षे भ्वादि० परस्मैपदी सक० सेट्।

कर्त्तरि भूषय-ति-ते भूषति। अबुभूषत्-त अभूषीत्। कर्म्मणि भूष्यते। अभूषि अभूषयिषाताम् अभूषिषाताम्। सनि बुभूषयिषति-ते बुभूषिषति।

कृत्सु भूषणीयम्। भूषणम्। भूषकः। भूषणः। भूषी। भूषयिता भूषिता। भूषितः। भूषणा भूषा। भूषयितुम् भूषितुम्। भूषयितव्यम् भूषितव्यम्। भूषयित्वा भूषित्वा। सम्भूष्य। भूष्यम्। भूषयन् माणः भूषन् भूष्यमाणः। भूषयिष्यन् ष्यमाणः कर्म्मणि भूषिष्यमाणश्च। भूषिष्यन् ष्यमाणः।

भृ भरणे पोषणे च जुहोत्यादि० परस्मैपदी सकर्म्मकः अनिट्।

कर्त्तरि बिभर्त्ति बिभृतः बिभ्रति बिभर्षि बिभृथः बिभृथ बिभर्म्मि बिभृवः बिभृमः। बिभृयात्। बिभर्त्तु बिभृताम् बिभ्रतु बिभृहि बिभराणि। अबिभः अबिभृताम् अबिभरुः। अभार्षीत्। बिभराम्-बभूव-आस-चकार बभार। आमभावपक्षे बभ्रतुः बभर्थ। भर्त्ता। भ्रियात्। भरिष्यति। कर्म्मणि भ्रियते। अभारि अभारिषाताम् अभृषाताम्। णिचि भारयति ते। अबीभरत् त। सनि बुभुर्षति।

कृत्सु भरणीयम्। भरणम्। भरः। भारः। भारकः। भारी। भर्त्ता। भृतः।

अथ भ्रमणे भ्वादिगणीयः पर० अक० सेट्।

कर्त्तरि भ्रमति। अभ्रमत्-अभ्रमीत्। बभ्राम बभ्रमतुः। भावे भ्रम्यते। णिचि भ्रमयति ते। अबिभ्रमत् त। सनि बिभ्रमिषति। यङि बम्भ्रम्यते।

कृत्सु भ्रमणीयम्। भ्रमणम्। भ्रमः। भ्रमकः। भ्रमी। भ्रमिता। भ्रान्तः। भ्रान्तिः। भ्रमितुम्। भ्रमितव्यम्। भ्रमित्वा भ्रान्त्वा। विभ्रम्य। भ्रम्यत्। भ्रमन्। यङः बम्भ्रम्यमाणः। भ्रमिष्यन्।

अथ भ्रमणे दिवादिगणीयः परस्मैपदी अकर्मकः सेट्।

कर्त्तरि भ्राम्यति। भ्राम्येत्। भ्राम्यतु। अभ्राम्यत्। आर्द्धधातुके कृत्सु च भ्वादिगणीयवत्। शतरि भ्राम्यन्, क्त्वा—भ्रमित्वा क्त भ्रमितः इत्यादि भेदः।

अथ भ्रमणे भ्वादिगणीयः उभयपदी अक० अनिट् फणादिः ज्वलादिश्च।

कर्त्तरि भ्रमति भ्रमते। अभ्रमत् अभ्रमीत्। भ्रेमतुः बभ्रमतुः। णिचि भ्रमयति भ्रामयति। अन्यत् भ्वादिगणीयवत् शतरि भ्रमन्, शानचि भ्रममाण इति भेदः।

भ्रस्ज पाके (भर्ज्जने) तुदा० उभयपदी सक० अनिट्।

कर्त्तरि भृज्जति ते। अभ्राक्षीत् अभ्रष्ट। बभर्ज्ज बभ्रज्ज बभर्ज्जतुः बभ्रज्जतुः बभर्ज्जिथ-बभ्रज्जिथ-

मण्ड भूषणे वा चुरादिगणीयः उभयपदी पक्षे भ्वादि० पर० सक० सेट्।

कर्त्तरि मण्डयति ते। मण्डति। अममण्डत् त। अमण्डीत्। कर्म्मणि मण्ड्यते। अमण्डि। कृत्सु मण्डनीयम्। मण्डनम्। मण्डः। मण्डनः। मण्डकः। मण्डी। मण्डयिता मण्डिता। मण्डितः। मण्डना मण्डा। मण्डयितुम् मण्डितुम्। मण्डयितव्यम् मण्डितव्यम्। मण्डयित्वा मण्डित्वा। संमण्ड्य। मण्ड्यम्। मण्डयन् मानः मण्डन् मण्ड्यमानः। मण्डयिष्यन् ष्यमाणः। मण्डिष्यन् ष्यमाणः।

श्रथ क्लेशे भ्वादि० परस्मैपदी क्लेशे अकर्म्मकः क्लेशने सकर्म्मकः अनिट्।

कर्त्तरि श्रथति। अश्रथीत्। शेथतुः। भावे कर्म्मणि च श्रथ्यते। अश्राथि। णिचि श्रथयति ते। अशीश्रथत्-त।

कृत्सु श्रथनीयम्। श्रथनम्। श्रथः। श्राथः। श्राथकः। प्रश्राथी। श्रथिता। श्रथितः। श्रन्तिः। श्रथितुम्। श्रथितव्यम्। श्रथित्वा। संश्रथ्य। श्राथ्यम्। श्रथन् श्रथ्यमानः। श्रथिष्यन् ष्यमाणः।

मन बोधे दिवादिगणीयः आत्मनेपदी सकर्म्मकः अनिट् ।

कर्त्तरि मन्यते । अमंस्त । मेने । मन्तासे । कर्म्मणि मन्यते अमानि । णिचि मानयति ते । अमीमनत् त ।

कृत्सु मननीयम् । मननम् । मानः अभिमानः । मानकः । मानी । मन्ता । मतः । मतिः । मन्तुम् । मन्तव्यम् । मत्वा । विमत्य विमन्य । मान्यम् । मन्यमानः मंस्यमानः ।

अभि—अभिमाने अभिमन्यते । अभिमानः । सम्—सम्मतौ सम्माने (गौरवान्वितक्रियायाम्) सम्मन्यते सम्मानः। अप—अव-अपमाने । अप—अव—मन्यते अपमानः अवमानः अनु—अनुमतौ अनुमन्यते अनुमतिः । वि—विमतौ विमन्यते विमतिः ।

मन बोधे तुदादिगणीयः आत्मनेपदी सक० सेट् ।

कर्त्तरि मनुते मन्वाते मन्वते । मन्वीत । मनुताम् । अमनुत । अमनिष्ट । मेने । मनिताचे । मनिष्यते । कर्म्मणि मन्यते । अमानि । णिचि मानयति ते अमीमनत्-त ।

कृत्सु मनिता । मनितुम् । मनितव्यम् । मनित्वा मत्वा । मन्वानः मनिष्यमाणः इति भेदः । अन्यत् दिवादिगणीयवत् ।

मन्थ क्लेशने क्रयादिगणीयः परस्मैपदी सकर्म्मकः सेट् ।

कर्त्तरि मथ्नाति मथ्नीतः मथ्नन्ति । मथ्नीयात् । मथ्नातु । अमथ्नात् । अन्यत् भ्वादिगणीयवत् शतरि मथ्नन् इति विशेषः ।

मस्ज मज्जने (शुद्धिरस्नाने) तुदादिगणीयः परस्मैपदी अकर्म्मकः अनिट् ।

कर्त्तरि मज्जति । अमाङ्क्षीत् अमांष्टाम् अमाङ्क्षुः अमाङ्क्षीः अमांष्टम् अमाङ्क्ष्म अमाङ्क्ष्व । ममज्ज । मंष्टासि । मज्ज्यात् । मङ्क्ष्यति । भावे मज्ज्यते । अमज्जि । णिचि मज्जय-ति-ते । अममज्जत्-त । सनि मिमङ्क्षति ।

कृत्सु मज्जनीयम् मज्जनम् । मज्जः । मज्जकः । मज्जी । मंष्टा । मग्नः । मंष्टिः । मंष्टुम् । मंष्टव्यम् । मंक्त्वा । संमज्ज्य । मज्जयम् । मज्जन् । मङ्क्ष्यन् । अथु मज्जथुः । सनः मिमङ्क्षा । मिमङ्क्षुः । मिमङ्क्षन् ।

नि—निमज्जने (अत्यन्तासक्तौ अत्यन्तसंश्लेषे च) निमज्जति । उत्—उन्मज्जने (उत्प्लवने) उन्मज्जति । उत्तिष्ठति ।

मान विचारणे भ्वादिगणीयः आत्मनेपदी सकर्म्मकः सेट् ।

कर्त्तरि मीमांसते । अमीमांसिष्ट । मीमांसाम्-बभूव-आस-चक्रे । कर्म्मणि मीमांस्यते । अमीमांसि । कृत्सु मीमांसनीयम् । मीमांसनम् । मीमांसः । मीमांसकः । मीमांसी । मीमांसिता । मीमांसितः । मीमांसा । मीमांसुः । मीमांसितुम् । मीमांसितव्यम् । मीमांसित्वा । संमीमांस्य । मीमांस्यम् । मीमांसमानः मीमांस्यमानः । मीमांसिष्यमाणः ।

मान पूजने वा चुरादिगणीयः उभयपदी पक्षे भ्वादिगणीयः पर० सक० सेट् ।

कर्त्तरि मानयति-ते मानति । अमीमनत्-त अमानीत् । कर्म्मणि मान्यते । अमानि । कृत्सु माननीयम् । माननम् । मानः । मानकः । मानी । मानयिता मानिता । मानितः । मानना माना । मानयितुम् मानितुम् । मानयितव्यम् मानितव्यम् । मानयित्वा मानित्वा । संमान्य । मान्यः । मानयन् मानः मानन् मान्यमानः । मानयिष्यन् ष्यमाणः । मानिष्यन् । कर्म्मणि मानिष्यमाणश्च ।

मि क्षेपणे स्वादिगणीयः उभयपदी सकर्म्मकः अनिट् ।

कर्त्तरि मिनोति मिनुतः मिन्वन्ति । मिनोमि मिन्वः मिनुवः मिन्मः मिनुमः मिनुते मिन्वाते मिन्वते । मिनुयात् मिन्वीत । मिनोतु मिनु मिनवानि । मिनुताम् मिनवै । अमिनोत् अमिनुताम् अमिन्वन् अमिनोः अमिनवम् अमिनुत । अमासीत् । मिमाय मिम्यतुः मिमिथ मिमाय मिम्यिव मिम्ये । माता । मीयात् । मासीष्ट । मास्यति-ते । कर्म्मणि मीयते । अमायि । अमायिषाताम् अमासाताम् । णिचि मापयति ते अमीमपत् त । सनि मित्स-ति-ते ।

कृतु मानीयम् । मानम् । मायः । मायकः मायी । माता । मितः । मितिः । मातुम् । मातव्यम् । मित्वा । संमाय । मेयम् । मिन्वन् मिन्वानः मास्यन् स्यमानः कर्म्मणि मायिष्यमाणश्च ।

अनु – अनुमितौ अनुमिनोति अनुमानम् । उप – उपमाने उपमिनोति उपमितिः उपमानम् । प्र – प्रमाणे प्रमिणोति प्रमितः । प्रमितिः । प्रमाणम् ।

मिद स्नेहे दिवादिगणीयः पर० अकर्म्मकः सेट् ।

कर्त्तरि मेद्यति । अमिदत् असेदीत् । मिमेद । मेदिता । भावे मिद्यते अमेदि । णिचि मेदयति ते । अमीमिदत् त ।

कृत्सु मेषणीयम् मेषणम् । मेषः । मेषकः मेषी । मेषिता । मिषितः । मिष्टिः । मेषितुम् । मेषि-तव्यम् । मेषित्वा । संमिष्य । मेष्यम् ॥ मिषन्, मेषिष्यन् । उत्-उन्मेषे (प्रकाशे) उन्मिषति । नि—निमेषे निमिषति ।

मिह सेचने भ्वादिगणीयः पर० सक० अनिट् ।

कर्त्तरि मेहति । अमिक्षत् । मेढ़ा । मेक्ष्यति । कर्म्मणि मिह्यते । अमेहि । णिचि मेहयति ते अमीमिहत् त । सनि मिमिक्षति ।

कृत्सु मेहनीयम् मेहनम् । मेहः । मेहकः मेही । मेढ़ा । मीढ़ः । मीढ़िः । मेढुम् । मेढव्यम् । मेहन्, मिह्यमानः मेक्ष्यन् ।

मील निमेषणे भ्वादिगणीयः पर० अक० सेट् ।

कर्त्तरि मीलति । अमीलीत् । णिचि मीलयति अमिमीलत् त अमीमिलत् त ।

कृत्सु मीलनीयम् । मीलनम् । मीलः । मीलकः । मीलिता । मीलितः । मीला प्रमीला । मीलयितुम् । मीलितव्यम् । मीलित्वा । संमील्य । मील्यम् । मीलन्, मीलिष्यन् । प्र-प्रमीलायाम् । प्रमीलति । नि-निमीलने निमीलति । उत्-उन्मीलने उन्मीलति ।

मुर्च्छ मोहे दृद्धौ च भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट् ।

कर्त्तरि मूर्च्छति । अमूर्च्छीत् । भावे मूर्च्छ्यते । णिचि मूर्च्छयति ते अमुमूर्च्छत् त ।

कृत्सु मूर्च्छनीयम् । मूर्च्छनम् । मूर्च्छकः । मूर्च्छिता । मूर्च्छितः । भावादिकर्म्मणोस्तु मूर्च्छितम् मूर्त्तम् ।

मूर्त्तिः । मूर्च्छा । मूर्च्छितुम् । मूर्च्छितव्यम् । मूर्च्छित्वा । संमूर्च्छ्य । मूर्च्छन् । मूर्च्छिष्यन् । क्विप् मूः ।

सम्—संमूर्च्छने (प्रतिबिम्बने) संमूर्च्छति दर्पणे प्रतिबिम्बति ।

मुष स्तेये क्र्यादिगणीयः परस्मैपदी द्विकर्म्मकः सेट् ।

कर्त्तरि मुष्णाति मुष्णीतः मुष्णन्ति । मुष्णीयात् । मुष्णातु मुषाण । अमुष्णात् । अमोषीत् ।

मुमोष । मोषिता । मुष्यात् । मोषिष्यति । कर्म्मणि मुष्यते । अमोषि । णिचि मोषयति ते ।

अमूमुषत् त ।

कृत्सु मोषणीयम् । मोषणम् । मोषः । मोषकः । मोषी । मोषिता । मुषितः । मुष्टिः । मुट्-ट्रड् ।

मोषितुम् । मोषितव्यम् । मुषित्वा । संमुष्य । मुष्णन् । मुष्यमाणः । मोषि-ष्यन् ष्यमाणः ।

मृग अन्वेषणे अदन्तचुरादिगणीयः आत्मनेपदी सकर्म्मकः सेट्।

कर्त्तरि मृगयते। अममृगत। कर्म्मणि मृग्यते। अमृगि अमृगयिषाताम् अमृगिषाताम्। कृत्सु मृगणीयम्। मृगयास्। मृगः। मृगकः। मृगयिता। मृगितः। मृगणा। मृगयितुम्। मृगयितव्यम्। मृगयित्वा। संमृग्य। मृग्यम्। मृगयमाणः मृग्यमाणः। मृगयिष्यमाणः कर्म्मणि मृगिष्यमाणश्च।

मृज शोधने अदादिगणीयः परस्मैपदी सकर्म्मकः वेट्।

कर्त्तरि मार्ष्टि मृष्टः मार्ज्जन्ति-मृजन्ति मार्क्षि मृष्ठः मृष्ठ मार्ज्मि मृज्वः मृज्मः। मृज्यात्। मार्ष्टु मृष्टाम् मृड्ढि मृष्टं मृष्ट मार्जानि मार्जाव मार्जाम। अमार्ट्-ड् अमृष्टाम् अमार्ज्जन्-अमृजन् अमार्ट्-ड् अमृष्टम् अमृष्ट अमार्ज्जम्। अमार्जीत् अमार्क्षीत् अमार्क्षीत्। ममार्ज्ज ममार्ज्जतुः ममृजतुः ममार्ज्जिथ ममार्ष्ठ ममार्ष्ठ। मार्ज्जिता मार्ष्टा। मृज्यात्। मार्ज्जिष्यति मार्क्ष्यति मार्क्ष्यति। पाणिनीयमते अस्य ऋदुपधत्वेन अङ् मुग्धबोधमते न इति भेदः। कर्म्मणि मृज्यते। अमार्ज्जि। णिचि मार्ज्जयति ते अमीमृजत् त अममार्जत् त। सनि मिमार्ज्जिषति मिमृक्षति। यङि मरी मृज्यते।

कृत्सु मर्शनीयम्। मर्शनम्। मर्शः। मर्शकः। मर्शी। म्रष्टा मर्ष्टा। मृष्टः। मृष्टिः। म्रष्टुम्
मर्ष्टुम्। म्रष्टव्यम् मर्ष्टव्यम्। मृष्ट्वा। संमृश्य। मृश्यम्। मृशन् मृश्यमानः। म्रच्य-न्
माणः। मर्च्य-न् माणः।

परा—परामर्शे (पूर्व्वोक्तस्य स्मरणे) (न्यायमते व्याप्तिविशिष्टपक्षधर्म्मताज्ञाने) परामृशति
वि—विमर्शे (चिन्तने) विमृशति। अभि—अभिमाने मर्द्दने पराभवने च अभिमृशति।

मृश मर्शने गतौ च भ्वादिगणीयः पर० सकर्म्मकः सेट्।

कर्त्तरि मर्शति। अमर्शीत्। इत्यादि। अन्यत्र तुदादिगणीयवत्। किन्तु वलादाविट् शतरि मर्शन्।

मृष सहने चुरादिगणीयः उभयपदी सकर्म्मकः सेट्।

कर्त्तरि मर्षयति ते। अमीमृषत् त अममर्षत् त। कर्म्मणि मर्ष्यते। अमर्षि।

मृष सहने भ्वादिगणीयः उभयपदी सकर्म्मकः सेट्।

कर्त्तरि मर्षति ते। अमर्षीत् अमर्षिष्ट। कर्म्मणि मृष्यते। अमर्षि। णिचि चुरादिगणीयवत्।

मृष सहने दिवादिगणीयः उभयपदी सक० सेट्।

कर्त्तरि मृष्यति ते। अमर्षीत् अमर्षिष्ट। अन्यत् भ्वादिगणीयवत्।

म्ना अभ्यासे भ्वादिगणीयः पर० सक० अनिट् ।

कर्त्तरि मनति मनतः मनन्ति । मनेत् । मनतु । अमनत् । अम्नासीत् अम्नासिष्टाम् अम्नासिषुः । मम्नौ मम्निथ मम्नाथ । म्नाता । म्नायात्-म्नेयात् । म्नास्यति ॥ कर्म्मणि म्नायते । अम्नायि । अम्नायिषाताम् अम्नासाताम् । णिचि म्नापयति ते अमिम्नपत् त । कृत्सु म्नानीयम् । म्नानम् । आम्नायः । म्नायी । म्नायकः । म्नाता । आम्नातः । म्नातिः । म्नातुम् म्नातव्यम् । म्नात्वा । संम्नाय । म्नेयम् । मनन् म्नायमानः । म्नास्यन् म्नायिष्यमाणः । कर्म्मणि म्नास्यमानश्च ।

म्लै हर्षक्षये भ्वादिगणीयः पर० अकर्म्मकः अनिट् ।

कर्त्तरि म्लायति । अम्लासीत् । म्लायात् म्लेयात् । म्लानमित्यादि भेदः । अन्यत् ग्लैवत् । यज दाने पूजने यागे (देवोद्देश्यकहविस्त्यागे) च भ्वादिगणीयः उभयपदी सकर्म्मकः अनिट् । कर्त्तरि यजति ते यजेत् त । यज तु ताम् । अयजत् त । अयाक्षीत् अयष्ट । इयाज ईजतुः इयजिथ इयष्ठ ईजिव ईजे । यष्टासि से । इज्यात् यक्षीष्ट । यक्ष्यति ते । कर्म्मणि इज्यते । अयाजि । णिचि याजयति ते अयीयजत् त । सनि यियक्षति ते ।

कृत्सु यतनीयम् । यतनम् । यतिता । यत्तः आयत्तः प्रयः त्तयन्तिः । यतितव्यम् । यतितुम् ।
यतित्वा । नङ् यतः । आयत्य । यात्यम् । यतमानः । यतिष्यमाणः ।
आ---वशीभवने आयतते आयत्तः आयत्तिः ।

यत संकोचने, इदित् चुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि यन्त्रयति-ते । अययन्त्रत्-त । कर्म्मणि यन्त्र्यते अयन्त्रि ।
कृत्सु यन्त्रणीयम् । यन्त्रणम् । यन्त्रः । यन्त्रकः । यन्त्रयिता । यन्त्रित । क्तिन् नास्ति युच्
यन्त्रणा । यन्त्रयितव्यम् । यन्त्रयितुम् । यन्त्रयित्वा । संयन्त्र्य । यन्त्र्यम् । यन्त्रयन् मानः
यन्त्र्यमाणः । यन्त्रयिष्यन् ष्यमाणः । कर्म्मणि यन्त्रिष्यमाणश्च ।

यम उपरमे भ्वादिगणीयः परस्मैपदी अकर्म्मकः अनिट् ।

कर्त्तरि यच्छति । यच्छेत् । यच्छतु । अयच्छत् । अयंसीत् अयंसिष्टाम् अयंसिषुः । ययाम येमतुः
येमिथ-ययन्थ येमिव । यन्तासि । यम्यात् । यंस्यति । भावे यम्यते । अयमि अयामि । णिचि
यमयति ते यामयति ते । सनि यियंसति । यङि यंयम्यते ।

या गतौ अदादिगणीयः परस्मैपदी सक० अनिट् ।

कर्त्तरि याति । यायात् । यातु । अयात् अयुः-अयान् । अयासीत् अयासिष्टाम् अयासिषुः ।

ययौ ययतुः ययिथ-ययाथ ययिव । यातासि । यायात् । यास्यति । कर्म्मणि यायते ।

अयायि । णिचि यापयति ते अयीयपत् त । सनि यियासति ।

कृत्सु यानीयम् । यानम् । यायी । याता । यातः । यातिः । यातव्यम् । यातुम् । यात्वा । प्रयाय ।

येयम् । यान् यायमानः । यास्यन् स्यमानः । सनः-यियासा । यियासुः । यङः वरच् यायावरः ।

याच प्रार्थने भ्वादिगणीयः उभयपदी द्विकर्म्मकः सेट् ।

कर्त्तरि याचति ते । याचे-त् त । याच-तु-ताम् । अयाच-त् त । अयाचीत् अयाचिष्ट । ययाच-चे ।

याचिता-सि से । याच्यात् याचिषीष्ट । याचिष्य-ति ते । कर्म्मणि याच्यते । अयाचि ।

णिचि याचयति ते । अययाचत् त ।

कृत्सु याचनीयम् । याचनम् । याचकः । याची । याचिता । याचितः । याचितव्यम् ।

याचितुम् । याचित्वा । नङ् याच्ञा । उपयाच्य । याच्यम् । याचन् मानः याच्यमानः ।

याचि-ष्यन् ष्यमाणः ।

यु मिश्रणे अमिश्रणे च अदा० परस्मैपदी सक० सेट्।

कर्त्तरि यौति युतः युवन्ति। युयात्। यौतु। अयौत्। अयावीत्। युयाव युयुवतुः युयविथ। यातासि। यायात्। यविष्यति। कर्म्मणि यूयते। अयावि। णिचि यावयति ते। सनि यियविषति युयूषति। णिचः सनि यियावयिषति ते।

कृत्सु यवनीयम्। यवनम्। यवः। यविता। युतः। युतिः। यवितव्यम्। यवितुम्। युत्वा। संयुत्य। यव्यम् याव्यम्। युवन्, यूयमानः। यविष्यन् ष्यमाणः। कर्म्मणि याविष्यमाणश्च।

युज समाधौ दिवादिगणीयः आत्मनेपदी अकर्म्मकः अनिट्।

कर्त्तरि युज्यते। युज्येत। युज्यताम्। अयुज्यत। अयुक्त। युयुजे। योक्तासे। युक्षीष्ट। योक्ष्यते। भावे युज्यते। अयोजि। णिचि योजयति ते। अयूयुजत् त।

कृत्सु योजनीयम्। योजनम्। योगः। योजकः। विणुन् योगी। योक्ता। युक्तः। युक्तिः। योक्तव्यम्। योक्तुम्। संयुज्य। योज्यम् योग्यः। युज्यमानः योक्ष्यमाणः।

युज युतौ रुधादिगणीयः उभयपदी सकर्म्मकः अनिट्।

कर्त्तरि युनक्ति युङ्क्तः युञ्जन्ति। युनक्षि युङ्क्थः युनज्मि युञ्ज्वः युङ्क्ते। युञ्ज्यात् युञ्जीत। युनक्तु। युञ्जान युङ्क्ताम्। अयुन-क्-ग् अयुङ्क्त। अयुजत् अयौक्षीत् अयुक्त। कर्म्मणि युज्यते। [अयोजि। क्तत्सु दैवादिकवत् शतरि युञ्जन्, युञ्जान इति भेदः। उद्-उद्योगे। उद्युङ्क्ते। उद्युक्तः उद्योगः। प्र-प्रयोगे प्रयुङ्क्ते प्रयुक्तः प्रयोगः। अनु—प्रश्ने अनुयुङ्क्ते। अनुयोगः। अनुयुक्तः। अभि—अभियोगे अभियुङ्क्ते अभियुक्तः अभियोगः। उप-भोजने उपकारार्थे उपयुङ्क्ते भुङ्क्ते उपकरोति वा उपयुक्तः उपयोगः। नि-नियोगे नियुङ्क्ते नियोगः। एषु आत्मनेपदम्।

युध योधने दिवादिगणीयः आत्मनेपदी सक० अनिट्।

कर्त्तरि युध्यते। युध्येत। युध्यताम्। अयुध्यत अयुद्ध। युयुधे। योद्धासे। युत्सीष्ट। योत्स्यते। कर्म्मणि युध्यते। अयोधि। णिचि योधयति ते। अयूयुधत् त। क्तत्सु योधनीयम्। योधनम्। योधी। योद्धा। युद्धः। युद्धिः। योद्धव्यम्। योद्धुम्। युद्धा। संयुध्य। योध्यः। ध्यमानः योत्स्यमानः।

रक्ष पालने भ्वादिगणीयः पर० सक० सेट् ।

कर्त्तरि रक्षति । रक्षेत् । रक्षतु । अरक्षत् । अरक्षीत् । ररक्ष । रक्षिता । रक्ष्यात् । रक्षिष्यति ।

कर्म्मणि रक्ष्यते । अरक्षि । णिचि रक्षयति ते । अररक्षत् त ।

कृत्सु रक्षणीयम् । रक्षणम् । रक्षः । रक्षकः । रक्षी । रक्षिता । रक्षितः । रक्षा । रक्षितव्यम् । रक्षितुम् । रक्षित्वा । संरक्ष्य । रक्ष्यम् । रक्षन् रक्ष्यमाणः । रक्षिष्यन् ष्यमाणः । प्रनिरक्षति ।

रच विधाने अदन्तचुरादिगणीयः उभयपदी सक० सेट् ।

कर्त्तरि रचयति ते । रचये-त् त । रचय-तु-ताम् । अरचय-त् त । अररचत् त । रचयि-तासि से । कर्म्मणि रच्यते । अरचि ।

कृत्सु रचनीयम् । रचनम् । रचकः । रचयिता । रचितः । रचना । रचयितुम् । रचयित्वा । विरचय्य विरच्य । रच्यम् । रचयन् मानः रच्यमानः । रचयि-ष्यन् ष्यमाणः ।

रन्ज रञ्जने (वर्णान्तरसम्पादाने सक० प्रीतौ अक०) दिवादिगणीयः उभयपदी अनिट् ।

कर्त्तरि रज्य-ति ते । रज्ये-त् त । रज्यतु-ताम् । अरज्यत् अरज्यत । अराङ्क्षीत् अरङ्क्त । ररञ्ज

ररञ्जिथ ररङ्क्थ ररञ्जिव ररञ्जिम ररञ्जे ररञ्जे। रङ्क्तासि से। रज्यात् रङ्क्षीष्ट। रङ्क्ष्यति ते। २०.०
भावे कर्म्मणि च रज्यते अरञ्जि। णिचि रञ्जयति ते। अररञ्जत् त। सनि रिरङ्क्षति ते।
क्तत्सु रञ्जनीयम्। रञ्जनम्। रङ्गः। रञ्जकः। रङ्क्ता। रक्तः। रक्तिः। रङ्क्तव्यम्।
रङ्क्तुम्। रक्त्वा। उपरज्य। रञ्जम्। रज्यन् रज्यमानः। रङ्क्ष्यन् रङ्क्ष्यमाणः। उप
(ग्रहणे ग्रासे च) उपरज्यति।
अनु – प्रीतौ अनुरज्यति प्रीणाति अनुरक्तः अनुरागः। वि – विरागे विरज्यति विरक्तः। विरागः।

रन्ज रागे भ्वादिगणीयः उभय० अकर्म्मकः अनिट्।

कर्त्तरि रजति रजते। रजेत् त। रज-तु-ताम्। अरज-त् अरजत। अराङ्क्षीत् अरङ्क्त। णिचि
रजयति ते मृगान् मारयतीत्यर्थः। अन्यत्र रञ्जयति।

रध हिंसायां दिवादिगणीयः सकर्म्मकः पर० वेट्।

कर्त्तरि रध्यति। रध्येत्। रध्यतु। अरध्यत्। अरधत्। ररन्ध रेधतुः ररन्धतुः।
ररन्धिथ ररद्ध ररन्धिव रेध्व। रधितासि। रत्स्यति। कर्म्मणि रध्यते अरन्धि। णिचि
रन्धयति ते अररन्धत् त।

26

कृत्सु रन्धनीयम्। रन्धनम्। रन्धः। रन्धकः। रधिता रद्धा। रद्धः। रधितव्यम् रद्धव्यम्।
रधितुम् रद्धुम्। रधित्वा रद्धा। संरध्य। रध्यन्। रधिष्यन्, ष्यमाणः रत्स्यन्, स्यमानः।

रभ आरम्भे भ्वादिगणीयः आत्मनेपदी सकर्मकः अनिट्।

कर्त्तरि रभते। रभेत। रभताम्। अरभत। अरब्ध। रेभे। रब्धासे। रप्सीष्ट। रप्स्यते।
णिचि रम्भयति ते। अररम्भत् त।

कृत्सु रम्भणीयम्। रम्भणम्। आरम्भः। रम्भी आरम्भी। रब्धा। रब्धः। रब्धिः। रब्धुम्।
रब्धव्यम्। रब्ध्वा। आरभ्य। आरम्भत्रः। रभमाणः रभ्यमाणः। रप्स्यमानः।

रम क्रीड़ने भ्वादिगणीयः आत्मनेपदी अकर्मकः अनिट्।

कर्त्तरि रमते। रमेत। रमताम्। अरमत। अरंस्त। रेमे। रन्तासे। रंसीष्ट। रंस्यते। भावे
रम्यते। अरामि। णिचि रमयति अरीरमत् त। सनि रिरंसते। यङि रंरम्यते।

कृत्सु रमणीयम्। रमणम्। रामः। रामकः। रामी। रन्ता। रतः। रतिः। रन्तव्यम्। रन्तुम्।
रमित्वा रन्त्वा। उपरम्य। रम्यः। रममाणः रंस्यमानः।

उप—निवृत्तौ [illegible] च। [illegible] उपयमति ते। उपयतः उपयतिः। नि—विश्रामे वा [illegible]

नियमति ते। नियामः नियतः। नियतिः। अप आ—निवृत्तौ प्रत्यागतौ च। [illegible]

[illegible] परस्मै० [illegible] अनिट्।

लटि [illegible]। [illegible]। [illegible]। अ[illegible]त्। [illegible]त् अ[illegible]त्। [illegible]। [illegible]।

[illegible]। [illegible]। [illegible]। [illegible]। [illegible] ते। [illegible] न।

[illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]।

[illegible]। [illegible]। [illegible]। [illegible]। [illegible]।

[illegible] अनिट्।

लटि [illegible] ते। [illegible] त। [illegible] ताम्। [illegible] त। [illegible] त। [illegible]

[illegible]। [illegible] से। [illegible] ते। [illegible]।

[illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]।

[illegible]। [illegible]। [illegible]। [illegible]। [illegible]। [illegible]।

रह त्यागे अदन्तचुरादिगणीयः उभयपदी सकर्म्मकः सेट् ।

कर्त्तरि रहयति ते । रहयेत् त । रहयतु ताम् । अरहयत् त । अररहत् त । कर्म्मणि रह्यते। अरहि

कृत्सु रहणीयम् । रहणम् । रहः । रहकः । असि-रहः । रहयिता । रहितः । रहणा ।

रहयितव्यम् । रहयितुम् । रहयित्वा । विरहय्य विरह्य । रह्यः । रहयन् माणः रह्यमाणः ।

रहयिष्यन् ष्यमाणः । कर्म्मणि रहिष्यमाणश्च ।

राज दीप्तौ भ्वादिगणीयः उभयपदी अकर्म्मकः सेट् फणादिः ।

कर्त्तरि राजति ते । राजेत् त । राजतु ताम् । अराजत् त । अराजीत् अराजिष्ट । रराज रेजतुः

रराजतुः रेजे रराजे । राजितास्मि से । राज्यात् राजिषीष्ट । राजिष्यति ते । भावे राज्यते ।

अराजि । णिचि राजयति ते अरराजत् त ।

कृत्सु राजनीयम् । राजनम् । राजः । राजकः । राजी । राजिता । राजितः । राजा । क्विप् राट्-ड् ।

राजितव्यम् । राजितुम् । राजित्वा । विराज्य । राज्यम् । राजन् मानः राजिष्यन् ष्यमाणः ।

निर्—राज—णिच् निर्म्मञ्छने (आरति) नीराजयति नीराजना ।

राध सिद्धौ शुभाशुभविषयप्रश्ने च दिवादिगणीयः पर० अनिट् फलादिः ।

कर्त्तरि राध्यति । राध्येत् । राध्यतु । अराध्यत् । अरात्सीत् । रराध रेधतुः रराधतुः । राद्धा । राध्यात् । रात्स्यति । भावे राध्यते । अराधि । णिचि राधयति ते । सनि आरिरात्सति ।

कृत्सु राधनीयम् । राधनम् । राधकः । राधी । राद्धा । राद्धः । राद्धिः । राद्धव्यम् । राद्धुम् । राद्धा । अपराध्य । राध्यम् । राध्यन् रात्स्यन् ।

आ—सेवने सकर्म्मकः आराध्यति आराधनीयम् । णिच् युच् आराधना । अप—अपराध अपराध्यति अपराधः ।

रिच विरेचने रुधादिगणीयः पर० अकर्म्मकः अनिट् ।

कर्त्तरि रिणक्ति रिङ्क्तः रिञ्चन्ति रिणक्षि रिङ्क्थः रिणच्मि रिञ्च्वः । रिच्यात् । रिणक्तु रिङ्क्ताम् रिञ्चन्तु रिङ्ग्धि रिणचानि । अरिणक् अरिङ्क्ताम् अरिञ्चन् । अरैक्षीत् अरिचत् । रिरेच । रेक्तासि । रिच्यात् । रेक्ष्यति । भावे रिच्यते अरेचि । णिचि रेचयति ते अरीरिचत् त ।

कृत्सु रेचनीयम् । रेचनम् । रेकः । रेचकः । रेची । रेक्ता । रिक्तः । रिक्तिः । रेक्तव्यम् । रेक्तुम् । रिक्त्वा । अतिरिच्य । रेक्यम् । रिञ्चन् रेक्ष्यन् ।

अति—अतिशये (अतिक्रमे) सकर्म्मकः अतिरिणक्ति, अतिरिच्यमानः अतिरिक्तः। अतिरेकः।
वि—अति व्यतिक्रमे (विपरीतकरणे) व्यतिरिणक्ति व्यतिरेकः व्यतिरिक्तः। व्यतिरिच्यमानः

रु ध्वनौ अदादिगणीयः परस्मैपदी अकर्म्मकः सेट्।

कर्त्तरि रवीति-रौति रुवीतः। (मुग्धबोधमते) रुतः रुवन्ति रौषि-रवीषि (रुथः) रुवीथः (रुथ) रुवीथ रौमि-रवीमि रुवीवः (रुवः)। रुवीयात् (रुयात्)। रौतु-रवीतु रुवीताम् (रुताम्) रुवन्तु। अरौत् अरवीत् अरुवीताम् (अरुताम्) अरुवन् अरौः अरवीः। अरावीत् अरौषीत्। रुराव रुरविथ रुरुविव। रविता रोता। रूयात्। रविष्यति रोष्यति। भावे रूयते अरावि। णिचि रावयति ते। अरीरवत् त। सनि रुरूषति। यङि रोरूयते। क्तत्सु रवणीयम्। रवणम्। रवः। आरावः विरावः संरावः। रावकः। रावी। रविता रोता। रुतः। रुतिः। रवितव्यम्। रोतव्यम्। रवितुम् रोतुम्। रुत्वा। आरुत्य। रव्यम् राव्यम्॥ क्विप् रुत्। रुवन्। रविष्यन् रोष्यन्। यङः रोरूयमाणः।

रुच प्रीतौ प्रकाशे च भ्वादिगणीयः आत्मनेपदी अकर्म्मकः सेट्।

कर्त्तरि रोचते। रोचेत। रोचताम्। अरोचत। अरुचत् अरोचिष्ट। रुरुचे। रोचिताहे भावे रुच्यते। अरोचि। णिचि रोचयति ते। अरूरुचत् त। सनि रुरुचिषते। रुरोचिषते।

कृत्सु रोचनीयम् । रोचनम् । रोचः । रोचकः । रोची । रोचिता । रुचितः । भावादि-
कर्म्मणोस्तु रुचितम् रोचितम् । रुक्तिः । रोचितव्यम् । रोचितुम् । रोचित्वा रुचित्वा ।
संरुच्य । रोच्यम् । रोचमानः । रोचिष्यमाणः ।

रुज भङ्गे रोगे, च तुदादिगणीयः पर० अकर्म्मकः अनिट् ।

कर्त्तरि रुजति । रुजेत् । रुजताम् । अरुजत् । अरौक्षीत् । रुरोज रुरोजिथ रुरुजिम । रोक्ता । रोक्ष्यति । भावे रुज्यते अरोजि । णिचि रोजयति ते । अरूरुजत् त ।
कृत्सु रोजनीयम् । रोजनम् । रोगः । घिणुन् रोगी । रोक्ता । रुग्नः । क्तिन् नास्ति अ रुजा । रोक्तव्यम् । रोक्तुम् । रुक्त्वा । रोग्यम् । रुजन् रोक्ष्यन् ।

रुद रोदने अदादिगणीयः पर० अकर्म्मकः सेट् ।

कर्त्तरि रोदिति रुदितः रुदन्ति रोदिषि रुदिथः रुदिथ रोदिमि रुदिमः । रुद्यात् । रोदितु रुदिताम् रुदन्तु रुदिहि रोदानि । अरोदीः अरोदः अरुदिताम् अरुदन् अरोदीः अरोदः । अरुदत् अरोदीत् । रुरोद रुरोदिथ रुरुदिम । रोदिता । रुद्यात् । भावे रुद्यते अरोदि । णिचि रोदयति ते । अरूरुदत् त । सनि रुरुदिषति । यङि रोरुद्यते ।

कृत्सु रोदनीयम्। रोदनम्। रोदः। रोदकः। रोदी। रोदिता। रुदितः। रुत्तिः। रोदितव्यम्। रोदितुम्। रुदित्वा। विरुद्य रोदम्। रुदन्। रोदिष्यन्। सनः रुरुदिषा। रुरुदिषन्। यङः रोरुद्यमानः।

रुध आवरणे रुधादिगणीयः उभ० सक० अनिट्।

कर्त्तरि रुणद्धि रुन्धः रुन्धन्ति रुणत्सि रुन्धः रुन्ध रुणध्मि रुन्धः रुन्धे। रुन्ध्यात् रुन्धीत। रुणद्धु रुन्धाम् रुन्धन्तु रुन्धि रुन्धाम्। अरुणत् अरुन्धाम् अरुन्धन् अरुणत् अरुणः अरुन्ध। अरुधत् अरौत्सीत् अरुद्ध। रुरोध रुरोधिथ रुरुधिव रुरुधे। रोद्धासि से। रुध्यात् रुत्सीष्ट। रोत्स्यति ते। कर्म्मणि रुध्यते। अरोधि। णिचि रोधयति ते। अरूरुधत् त।

कृत्सु रोधनीयम्। रोधनम्। रोधः। रोधकः। रोधी। रोद्धा। रुद्धः। रुद्धिः। रोद्धव्यम्। रोद्धुम्। रुद्ध्वा। संरुध्य। रोध्यम्। रुन्धन् रुन्धानः रुध्यमानः। रोत्स्यन् स्यमानः।

नि – निरोधे सक० प्रलये अकर्म्मकः निरुणद्धि, निरोधः। प्रति – प्रतिरोधे प्रतिरुणद्धि प्रतिरुद्धः

प्रतिरोधः । उप—उपरोधे उपरुणद्धि उपरोधः उपरुद्धः । अनु—अनुरोधे अनुरुणद्धि अनुरुद्धः अनुरोधः । वि—विरोधे विरुणद्धि विरुद्धः विरोधः।

रुह रोहणे भ्वादिगणीयः पर० सकर्म्मकः अनिट् ।

कर्त्तरि रोहति । रुहेत् । रोहतु । अरोहत् । अरुक्षत् । रुरोह रुरोहिथ रुरुहिव । रोढ़ा । रुह्यात् । रोक्ष्यति । कर्म्मणि रुह्यते अरोहि । णिचि रोपयति ते रोहयतिते अरूरुपत् त अरूरुहत् त ।

कृत्सु रोहणीयम् । रोहणम् । रोहः । रोही । रोढ़ा । रूढ़ः । रूढ़िः । रोढ़व्यम् । रोढुम् । रूढ्वा । आरुह्य । रोक्षाम् । रोहन् । रुह्यमाणः । रोक्ष्यन् माणः । आ—आरोहे आरोहति । आरोहः । आरोहणम् । आरूढः । अव—अवरोहे (ऊर्द्ध्वस्थानादधोगमने) अवरोहति अवरोहः । वि—उन्मूलीभवने विरोहति उच्छिद्यते ।

लक्ष दर्शने चुरादिगणीयः उभ० सकर्म्मकः लोचने आत्मनेपदी सेट् ।

कर्त्तरि लक्षयति ते । अललक्षत् त । लक्षयितासि से लक्षयिष्यति ते । कर्म्मणि लक्ष्यते अलक्षि

कृत्सु लक्षणीयम् । लक्षणम् । लक्षः । लक्षकः । लक्षी । लक्षयिता । लक्षितः । लक्षणा । लक्षयितव्यम् । लक्षयितुम् । लक्षयित्वा । संलक्ष्य । लक्ष्यम् । लक्षय न् माणः लक्ष्यमाणः । लक्षयिष्यन् ष्यमाणः कर्म्मणि लक्षिष्यमाणश्च । उप-उपलक्षणे (स्वस्य स्वान्यस्य च लक्षणया बोधने) उपलक्षयति । वि-विलक्षणे (विशेषधर्म्मेण ज्ञापने) । विलक्षयति विलक्षणम् ।

लघि अभोजने अक० अतिक्रमे सक० भ्वादि० आत्म० सेट् ।

कर्त्तरि लङ्घते । अलङ्घिष्ट । ललङ्घे । कर्म्मणि भावे च लङ्घ्यते अलङ्घि । णिचि लङ्घयति-ते । अललङ्घत्-त ।

कृत्सु लङ्घनीयम् । लङ्घनम् । लङ्घः । लङ्घकः । लङ्घी । लङ्घिता । लङ्घितः । लङ्घा । लङ्घितव्यम् । लङ्घितुम् । लङ्घित्वा । विलङ्घ्य । लङ्घ्यम् । लङ्घमानः लङ्घ्यमानः । लङ्घिष्यन् ष्यमाणः ।

लप भाषणे भ्वादि० पर० सक० सेट् ।

कर्त्तरि लपति । अलापीत् अलपीत् । ललाप लेपतुः ॥ कर्म्मणि । लप्यते । अलापि । णिचि लापयति ते अलीलपत्-त ।

कृत्सु । लपनीयम् । लपनम् । लापः । लापकः ॥ लापी । लपिता । लपितः । लप्तिः । लपितव्यम् । लपितुम् । लपित्वा । विलप्य । लाप्यम् । लपन् लप्यमानः । लपिष्यन् ष्यमाणः ।

वि-विलापे (परिदेवने) विलपति विलापः विलपितम्। प्र—प्रलापे (अनर्थकवाक्यप्रयोगे) प्रलपति प्रलापः प्रलपितम्। सम्—संलापे (मिथो भाषणे) संलपति संलापः। अनु—मुहुर्भाषणे। अनुलपति अनुलापः। अप—अपलापे (अन्यथास्थितस्य वस्तुनोऽन्यथात्वप्रतिपादने) अपलपति अपलापः।

लबि-अवस्रंसने भ्वा० आत्म० अक० सेट्।

कर्त्तरि लम्बते। अलम्बिष्ट। ललम्बे। कर्म्मणि। लम्ब्यते। अलम्बि। णिचि लम्बयति-ते। अललम्बत्-त।

कृत्सु लम्बनीयम्। लम्बनम्। लम्बः। लम्बकः। लम्बी। लम्बिता। लम्बितः। लम्बा। लम्बितव्यम्। लम्बितुम्। लम्बित्वा। अव-अधोगमने अक० अवलम्बने (आश्रयकरणे) च सक०। अवलम्बते अवलम्बः। वि-विलम्बकरणे। विलम्बते। विलम्बितम्। आ-आलम्बने आलम्बते। आलम्बनम्।

लभ प्राप्तौ भ्वादि० आत्म० सक० अनिट्।

कर्त्तरि लभते। अलब्ध। लेभे। लब्धासे। लप्स्यते। कर्म्मणि लभ्यते अलाभि अलम्भि प्रालम्भि। णिचि लम्भयति ते अललम्भत्-त सनि लिप्सते।

कृत्सु लभनीयम्। लभनम्। लाभः। आलम्भः। विप्रलम्भः। लाभी। लब्धा। लब्धम्। लब्धव्यम्

लब्धिः। क्त्रिम—लब्ध्रिमः। लब्ध्वा। आलभ्य। लभ्यम्। आलम्भनः। दुर्लभः। सुलभः। लभमानः लभ्यमानः। लप्स्यमानः। सन् लिप्सा लिप्सुः। आ—आलभने (स्पर्शने घातने च) आलभते आलब्धः आलम्भनः। वि-प्र—विप्रलम्भे। (विसंवादे) विप्रलभते विप्रलब्धः विप्रलम्भः। उप-आ—उपालम्भे (निन्दापूर्व्वकदुष्टवचने) उपालभते उपालम्भः। उपालब्धः।

लष इच्छायाम् वा दिवादि० पक्षे भ्वादि० उभ० सक० सेट्।

कर्त्तरि लष्यति-ते लषति-ते। अलाषीत् अलषीत् अलषिष्ट। ललाष लेषतुः लेषे। कर्म्मणि लष्यते अलाषि। णिचि लाषयति ते। अलीलषत् त।

कृत्सु। लषणीयम्। लषणम्। लाषः। लाषकः। लाषी। उक लाषुकः। लषिता। लषितः। लष्टिः। लषितव्यम्। लषितुम्। लषित्वा। अभिलष्य। लाष्यम्। लष्यन् लषन् लष्यमाणः लषमाणः। कर्म्मणि लष्यमाणः। लषिष्यन् ष्यमाणः।

लस संश्लेषे दीप्तौ च वा दिवा० पक्षे भ्वा० पर० अक० सेट्।

कर्त्तरि लस्यति लसति। अलासीत् अलसीत्। ललास लेसतुः। भावे लस्यते अलासि। णिचि लासयति-ते अलीलसत्-त।

कृत्सु। लसनीयम्। लसनम्। लासः। लासी। लसिता। लसितः। लसितव्यम्। लसितः।

लसितुम् । लसित्वा । विलस्य । लास्यम् । लस्यन् लसन् । लसिष्यन् । वि—विलासे विलस्यति विलसति । विलासः । उद्-उल्लासे (हर्ष करणे) उल्लस्यति उल्लसति । उल्लासः ।

लस्ज व्रीड़ायाम् भ्वादि० आत्म० अक० सेट् ।

कर्त्तरि लज्जते । अलज्जिष्ट । भावे लज्ज्यते । अलज्जि । णिचि लज्जयति-ते । अललज्जत्-त । क्रत्सु लज्जनीयम् । लज्जनम् । लज्जिता । लग्नः । लज्जा । लज्जितव्यम् । लज्जमानः लज्जिष्यमाणः।

लिख लेखने तुदा० पर० सक० सेट् ।

कर्त्तरि लिखति । अलेखीत् । लिलेख । कर्म्मणि लिख्यते । अलेखि । णिचि लेखयति-ते । अलीलिखत्-त । सनि, लिलेखिषति लिलिखिषति । क्रत्सु लेखनीयम् । लेखनम् । लेखः । लेखी । लेखिता । लिखितः । लिखितव्यम् । लिखित्वा लेखित्वा । विलिख्य । लेख्यम् । लिखन् लिख्यमानः । लिखिष्यन् ष्यमाणः । उद्-उल्लेखे (उच्चारणे विदारणे च । उल्लिखति ।

लिप लेपने तुदा० सक० उभ० अनिट् मुचादि ।

कर्त्तरि लिम्पति-ते । अलिपत् अलिपत अलिप्त । लिलेप लिलिपे । लेप्तासि-से । कर्म्मणि लिप्यते अलेपि । णिचि लेपयति-ते । अलीलिपत्-त ।

कृत्सु लेपनीयम् । लेपनम् । लेपः । लेपकः । लेपी । लेप्ता । लिप्तः । लिप्तिः । लेप्तव्यम् । लिप्त्वा । संलिप्य । लेप्यम् । लिम्पन् लिम्पमानः लिप्यमानः । लेप्स्यन् लेप्स्यमानः । अव-गर्वे अक० अवलिम्पति अवलिप्तः अवलेपः । अनु-चन्दनादिमर्द्दने । अनुलिम्पति अनुलेपनम् । अनुलिप्तः ।

लिह आस्वादे अदा० उभ० सक० अनिट् ।

कर्त्तरि लेढि लीढः लिहन्ति लेक्षि लीढः लीढ लेह्मि लीढे । लिह्यात् लिहीत । लेढु लीढाम् लिहन्तु लीढि लेहानि लीढाम् । अलेट्-ड् अलीढाम् अलिहन् अलीढ । अलिक्षत्-त । लिलेह लिलिहे । लेढासि-से । लिह्यात् लिक्षीष्ट । लेक्ष्यति । कर्म्मणि लिह्यते । अलेहि । णिचि लेहयति ते । अलीलिहत् । सनि लिलिक्षति-ते । यङि लेलिह्यते ।

कृत्सु लेहनीयम् । लेहनम् । लेहः । लेहकः । लेही । लेढा । लीढः । लेढव्यम् । लीढिः । लेढुम् । लीढ्वा । संलिह्य । लेह्यम् । लिहन् । लिहानः लिह्यमानः लेक्ष्यन् क्ष्यमाणः ।

ली श्लेषे दिवा० आत्म० अक० अनिट् ।

कर्त्तरि लीयते । लीयेत । लीयताम् । अलीयत । अलेष्ट अलास्त । लिल्ये । लेतासे लातासे । लेषीष्ट लासीष्ट । लास्यति लेष्यति । भावे लीयते । अलायि । णिचि विलीनयति-ते विलापयति ते घृतम् अन्यत्र विलाययतीत्येव । उद्-प्रतारणाभिभवपूजादौ आत्म० उल्लापयते ।

कृत्सु। लयनीयम् लानीयम्। लयनम् लानम्। लायः लयः। लेता लाता। लीनः। लातव्यम् लेतव्यम्। लीतिः। लातुम् लेतुम्। लीत्वा। संलाय संलीय। लेयम्। लीयमानः। लेष्यमाणः लास्यमानः।

लुठ लोठे तुदा० पर० अक० सेट् कुटादि।

कर्त्तरि लुठति। अलुठीत्। लुलोठ लुलुठिथ। लुठिता। लुठिष्यति। भावे लुठ्यते अलोठि। णिचि लोठयति-ते अलूलुठत्-त अलुलोठत्-त।

कृत्सु। लुठनीयम्। लुठनम्। लोठः। लोठकः। लोठी। लुठिता। लुठितः। लुठितव्यम्। लुठिः। लुठितुम्। लुठित्वा। संलुठ्य। लोठ्यम्। लुठन् लुठिष्यन्।

लुप छेदने तुदा० उभ० सक० अनिट् मुचादि।

कर्त्तरि लुम्पति-ते लुम्पेत्-त। अलुपत् अलुप्त। लुलोप लुलोपिथ लुलुपिव। लोप्तासि से। लुप्यात् लुप्सीष्ट। लोप्स्यति-ते। कर्म्मणि लुप्यते। अलोपि। णिचि लोपयति-ते अलू-लुपत्-त अलुलोपत् त।

कृत्सु लोपनीयम्। लोपनम्। लोपः। लोपकः। लोपी। लोप्ता। लुप्तः लोप्तव्यम्। लुप्तिः।

ष्टन् लोप्लस् । लुप्त्वा । संलुप्य । लोप्यम् । लुम्पन् लुम्पमानः लुप्यमानः । लोप्-स्यन् स्यमानः ।

लुप आप्तौ अदर्शने नाशे च अक० दिवा० पर० सक० सेट् ।

कर्त्तरि लुप्यति । अलोपीत् । लुलोप । लोपिता । भावे लुप्यते अलोपि । णिचि तौदादिकवत् । क्तस्तु लोपिता लोपितव्यम् लोपितुम् । लोपित्वा लुप्त्वा । लुप्यन् । लोपिष्यन् । इति भेदः । अन्यत् तौदादिकलुपवत् । क्विप् लुप् ।

लुभ सातिशयेच्छायां दिवा० पर० सक० सेट् ।

कर्त्तरि लुभ्यति । लुभ्येत । अलुभत् वोपदेवमते अलोभीदित्यपि । लुलोभ । लोभिता लोब्धा । क्तस्तु । लोभनीयम् । लोभनम् । लोभः । लोभी । लोभिता लोब्धा । लुब्धः । लोभितव्यम् लोब्धव्यम् । लुब्धिः । लोभितुम् लोब्धुम् । लुभित्वा लुब्ध्वा । लोभ्यम् । लुभ्यन् लुभ्यमानः ।

लू छेदने क्र्यादि० उभय० सक० सेट् स्वादि० ।

कर्त्तरि लुनाति लुनीतः लुनन्ति - लुनीते । लुनीयात् लुनीत । लुनातु लुनीताम् लुनन्तु लुनीहि लुनीताम् । अलुनात् अलुनीत । अलावीत् अलविष्ट । लुलाव लुलुवतुः लुलुवे । लविता लूयात् लविषीष्ट । लविष्यति-ते । कर्म्मणि लूयते अलावि । णिचि लावयति-ते अलीलवत्-त ।

कृत्सु । लवनीयम् । लवनम् । रसे लवणम् । लवः लावः । लावकः । लवी । लविता । लूनः । लूनिः । लवितव्यम् । लवितुम् । लवित्वा । संलूय । लव्यम् लाव्यम् । लुनन् लुनानः लूयमानः । लविष्यन् ष्यमाणः ।

लोक दर्शने भ्वा० आत्म० सक० सेट् ।

कर्त्तरि लोकते । अलोकिष्ट ॥ लुलोके । कर्म्मणि लोक्यते । अलोकि । णिचि लोकयति-ते अलुलोकत्-त ।

कृत्सु । लोकनीयम् लोकनम् । लोकः । लोककः । लोकी । लोकिता । लोकितः । लोका । लोकितव्यम् । लोकितुम् । लोकित्वा । संलोक्य । लोक्यम् । ।लोकमानः लोक्यमानः लोकिष्यन् ष्यमाणः ।

लोक दीपने चुरा० उभय० सक० सेट् ।

कर्त्तरि लोकयति-ते । अलुलुकत्-त । लोकयितासि-से । कर्म्मणि लोक्यते अलोकि ।

कृत्सु लोकयिता लोकयितव्यम् लोकयित्वा लोकयन् मानः लोकयिष्यन् ष्यमाणः इति भेदः अन्यत् भ्वादिगणीयलोकवत् ।

लोच दर्शने भ्वादि० आत्म० सक० सेट् ।

कर्त्तरि लोचते । सर्व्वं भ्वादिगणीयलोकवत् कस्थाने चकारमात्रभेदः ।

लोच आलोचने चुरा० उभ० सक० सेट् ।

कर्त्तरि लोचयति-ते । सर्व्वं चुरादिगणीय लोकवत् ककारस्थाने चकारमात्रभेदः ।

वच व्यक्तायां वाचि अदा० पर० ब्रुवादेशस्तु उभ० अनिट् ।

कर्त्तरि वक्ति वक्तः । अन्तिप्रयोगो नास्ति । वक्षि वक्थः वच्मि वच्वः वच्मः । वच्यात् । वक्तु । अवक् ग् । अवोचत् । ब्रुवादेशस्य अवोचत्-त । उवाच ऊचतुः उवचिथ उवक्थ ऊचिव ऊचे । वक्ता सि-से । उच्यात् वक्षीष्ट । वक्ष्यति ते । कर्म्मणि उच्यते । अवाचि । णिचि वाचयति ते अवीवचत् त । सनि विवक्षति ते । यङि वावच्यते ।

कृत्सु वचनीयम् । वचनम् । वाकः । वाचकः असि वचः । वाची । वक्ता । उक्तः । उक्तिः । वक्तुम् । वक्तव्यम् । उक्त्वा । निरुच्य । वाच्यम् पदसमुदाये वाक्यम् । वचन् उच्यमानः । वक्ष्यन् निरुक्तिः । वक्ष्यमाणः । क्विप् वाक् । सनः विवक्षा विवक्षुः विवक्षन् विवक्षितः । निर् निरुक्तौ निर्वक्ति निर्वचनम् । अनु-अनुवादे अनुवक्ति अनूक्तः अनुवाकः । कान अनूचानः । प्रति-प्रतिवाक्ये प्रतिवक्ति प्रत्युक्तः प्रत्युक्तिः प्रतिवाक्यम् ।

वच सन्देशे चुरा० उभ० सक० सेट्।

कर्त्तरि वाचयति ते। अवीवचत् त। कर्म्मणि वाच्यते। अवाचि अवाचयिषाताम् अवाचिषाताम्। कृत्सु वाचनीयम्। वाचनम्। वाचकः। वाची। वाचयिता। वाचितः। वाचना। वाचयितुम्। वाचयितव्यः। वाचयित्वा। प्रवाच्य। वाचयन् मानः। वाच्यमानः। वाचयिष्यन् ष्यमाणः कर्म्मणि वाचिष्यमाणश्च।

वद वाचि भ्वा० पर० सक० सेट् यजादि।

कर्त्तरि वदति वदतः वदन्ति। वदेत्। वदतु। अवदत्। अवादीत्। उवाद ऊदतुः। वदिता। उद्यात्। वदिष्यति। कर्मणि उद्यते। अवादि। णिचि वादयति ते अवीवदद् त। सनि विवदिषति यङि वावद्यते।

कृत्सु। वदनीयम्। वदनम्। वादः। प्रियंवदः वशंवदः कद्वदः। वादकः। वादी। वदिता। उदितः। उक्तिः। वदितुम्। वदितव्यम्। उदित्वा। अनूद्य। वाद्यम्। अवद्यम्। वदन् उद्यमानः। वदिष्यन् ष्यमाणः। यङः ऊक् वावदूकः। णिच-इत्न वादित्नम्।

वञ्च वञ्चने चुरा० आत्म० सक० सेट् इदित्।

कर्त्तरि वञ्चयते। अववञ्चत। कर्म्माणि वञ्च्यते अवञ्चि।

कृत्सु वञ्चनीयम् । वञ्चनम् । वञ्चकः । वञ्ची । वञ्चयिता । वञ्चितः । वञ्चना । वञ्चयितुम् । वञ्चयितव्यम् । वञ्चयित्वा । प्रवञ्च्य । वञ्च्यम् । वञ्चयमानः वञ्च्यमानः । वञ्चयिष्यमाणः । कर्म्मणि वञ्चिष्यमाणश्च ।

वद नमने स्तवने च भ्वा० आत्म० इदित् सक० सेट् ।

कर्त्तरि वन्दते । वन्देत । वन्दताम् । अवन्दत । अवन्दिष्ट । ववन्दे । वन्द्यात् । कर्म्मणि वन्द्यते । अवन्दि । णिचि वन्दयति ते अववन्दत् त ।

कृत्सु । वन्दनीयम् वन्दनम् । वन्दकः । वन्दः । वन्दी । वन्दिता । वन्दितः । क्तिन् नास्ति युच् वन्दना । वन्दितुम् । वन्दितव्यम् । वन्दित्वा । अभिवन्द्य । वन्द्यम् । वन्दमानः । वन्दिष्यमाणः । आरु वन्दारुः ।

वप मुण्डने तन्तुवीजयोः सन्ताने च भ्वा० उभ० सक० अनिट् यजादि ।

कर्त्तरि वपति ते । वपेत् त । वपतु ताम् । अवपत् त । अवापीत् अवप्त । उवाप ऊपतुः उवपिथ उवप्थ ऊपिव ऊपे । वप्ता-सि से । उप्यात् वप्सीष्ट । वप्स्यति ते । कर्म्मणि उप्यते । अवापि । णिचि वापयति ते अवीवपत् त । प्रणिवपति ।

कृत्सु । वपनीयम् । वपनम् । वापः । वापकः । वापी । वप्ता । उप्तः । उप्तिः । वप्तुम् । वप्तव्यम् ।

उप्त्वा । निरुप्य । वपन् मानः उप्यमानः । वप्स्यन् वप्स्यमानः । निर्-दाने निर्वपति निर्वापः ।

वम उद्गिरणे भ्वा० उभ० सक० सेट् फणादि ।

कर्त्तरि वमति ते । वमेत् त । वमतु ताम् । अवमत् त । अवमीत् अवमिष्ट । ववाम वेमतुः-ववमतुः वेमे ववमे । कर्मणि वम्यते । अवामि । णिचि वमयति-ते अवीवमत्-त । यङि वंवम्यते । कृत्सु वमनीयम् । वमनम् । वामः । वामकः । वामी । वमिता । वान्तः । वान्तिः । वमितव्यम् । वमितुम् । वमित्वा-वान्त्वा । अभिवम्य । वम्यम् । वमन् वममानः वम्यमानः । वमिष्यन् ष्यमाणः । अथु वमथुः ।

वर्ण स्तुतौ, विस्तारे, शुक्लतादिकरणे, उपयोगे, दीपने च अदन्त चुरा० उभ० सक० सेट् ।

कर्त्तरि वर्णयति ते । अववर्णत् त । कर्मणि । वर्ण्यते अवर्णि । अवर्णिषाताम् अवर्णयिषाताम् । कृत्सु । वर्णनीयम् । वर्णनम् । वर्णः । वर्णकः । वर्णी । वर्णयिता । वर्णितः । वर्णना । वर्णयितुम् । वर्णयितव्यम् । वर्णयित्वा संवर्ण्य । वर्ण्यम् । वर्णयन् मानः वर्ण्यमानः । वर्णयिष्यन् ष्यमाणः ।

वर्द्ध पूरणे, छेदने च चुरा० उभ० सक० सेट् ।

कर्त्तरि । वर्द्धयति-ते । अववर्द्धत्-त । कर्म्मणि वर्द्ध्यते अवर्द्धि । कृत्सु । वर्द्धनीयम् । वर्द्धनम् । वर्द्धः । वर्द्धकः । वर्द्धी । वर्द्धिता । वर्द्धितः । वर्द्धना । वर्द्धयितुम् ।

वर्द्धयितव्यम् । वर्द्धयित्वा । प्रवर्द्ध्य । वर्द्धम् । वर्द्धयन् मानः वर्द्धमानः । वर्द्धयिष्यन् ष्यमाणः कर्म्मणि वर्द्धिष्यमाणश्च ।

वश इच्छायाम् अदा० पर० सक० सेट् ।

कर्त्तरि वष्टि उष्टः उशन्ति वक्षि उष्ठः उष्ठ वश्मि उश्वः उश्मः । उश्यात् । वष्टु उष्टाम् उशन्तु उड्ढि । उष्टम् उष्ट वशानि । अवट् ड् । अवाशीत् अवशीत् । उवाश ऊशतुः । वशिता । उश्यात् । वशिष्यति । कर्म्मणि उश्यते । अवाशि । णिचि वाशयति-ते । अवीवशत्-त । कृत्सु वशनीयम् । वशनम् । वाशः । वाशकः । वाशी । वशिता । उशितः । उष्टिः । वशितुम् । वशितव्यम् । उशित्वा । निवश्य । वाश्यम् । उशन् उश्यमानः । वशिष्यन् ष्यमाणः ।

वस निवासे भ्वा० पर० अक० अनिट् यजादि ।

कर्त्तरि वसति । वसेत् । वसतु । अवसत् । अवात्सीत् अवात्ताम् अवात्सुः अवात्सीः अवात्तम् अवात्त अवात्सम् अवात्स्व । उवास ऊषतुः उवसिथ-उवस्थ ऊषिव । वसिता वस्ता । उष्यात् । वत्स्यति । भावे उष्यते अवासि । णिचि वासयति-ते अवीवसत्-त । कृत्सु वसनीयम् । वसनम् । वासः । वासकः । वासी । वसिता वस्ता । उषितः । उष्टिः । वसितुम् वस्तुम् । वसितव्यम् वस्तव्यम् । उषित्वा । उपोष्य । वास्यम् । क्वसु । ऊषिवान् ।

वसन् अनूष्यमाणः । वत्स्यन् अनुवत्स्यमानः । उप—भोजनाभावे उपवसति उपोषितः । ल्युटि उपोषणमित्येके । अनु-अधि-उप-आङ्-सक० अनुवसति अधिवसति उपवसति आवसति वा गृहम् । प्र-प्रवासे (विदेशगमने) प्रवसति प्रोषितः प्रोषिवान् ।

वस आच्छादने अदा० आत्म० सक० सेट् ।

कर्त्तरि वस्ते वसाते वसते वस्से वसाथे वद्ध्वे वसे वस्वहे । वसीत वसीयाताम् वसीरन् । वस्ताम् । अवस्त । अवसिष्ट । ववसे । वसितासे । वसिषीष्ट । वसिष्यते । कर्म्मणि वस्यते अवासि । णिचि वासयति-ते । अवीवसत्-त ।

कृत्सु । वसनीयम् । वसनम् । वासः । णिच्-असि वासः वाससी । वासकः । वासी । वसिता । वसितः । वस्तिः । वसितुम् । वसितव्यम् । वसित्वा । प्रवास्य । वास्यम् । वसानः वस्य-मानः । वसिष्यमाणः ।

वह प्रापणे भ्वा० उभ० द्विक० अनिट् यजादि ।

कर्त्तरि वहति-ते । वहेत्-त । वहतु ताम् । अवहत्-त । अवाक्षीत् अवोढाम् अवाक्षुः अवाक्षीः अवाढम् अवोढ अवाक्षम् अवाक्ष्व अवोढ अवक्षाताम् अवक्षत अवोढाः अवक्षाथाम् अवो-ढ्वम् अवक्षि अवक्ष्वहि । उवाह ऊहतुः उवहिथ उवोढ ऊहिव ऊहे ऊहिषे । वोढासि से

उह्यात् वक्षीष्ट। वक्ष्यति ते। कर्म्मणि उह्यते अवाहि णिचि वाहयति ते अवीवहत् त।

क्तवत्। वहनीयम्। वहनम्। वाहः। प्रवहः निवहः आवहः। वाहकः। वाही। इत वहितः।

वोढा। ऊढः। ऊढिः। वोढव्यम्। वोढुम्। ऊढ्वा। प्रोह्य। वह्यम् वाह्यम्। वहन्

वहमानः उह्यमानः। वक्ष्यन् क्ष्यमाणः। उद्वह विवाहे उद्वहति उदूढः।

वा गमने हिंसने च अदा० पर० सक० अनिट्।

कर्त्तरि वाति। वायात्। वातु। अवात् अवाताम् अवुः-अवान्। अवासीत् अवासिष्टाम् अवा-

सिषुः। ववौ ववतुः वविथ-ववाथ ववित। वातासि॥ वायात्। वास्यति। कर्म्मणि वायते।

अवायि। णिचि वापयति-ते अवीवपत्-त। सनि विवासति।

क्तवत्। वानीयम्। वानम्। वायः। वायकः। वायी। वाता। वातः। वातिः। वातुम्। वात-

व्यम्। वात्वा। प्रवाय। वेयम्। वान् वायमानः। वास्यन् स्यमानः।

वाञ्छ कामे भ्वा० पर० सक० सेट् इदित्।

कर्त्तरि वाञ्छति। अवाञ्छीत्। ववाञ्छ। कर्म्मणि वाञ्छ्यते। अवाञ्छि। णिचि वाञ्छयति-ते

अववाञ्छत्-त।

क्तवत्। वांञ्छनीयम्। वाञ्छनम्॥ वाञ्छकः। वाञ्छी। वाञ्छिता। वाञ्छितः। वाञ्छ्य। वाञ्छि-

तुम् । वाञ्छितव्यम् । वाञ्छित्वा । प्रवाञ्छ्य । वाञ्छन् वाञ्छ्यमानः । वाञ्छिष्यन् ष्यमाणः ।

विच पृथक्करणे रुधा० सक० उभय० अनिट् ।

कर्त्तरि विनक्ति विङ्क्तः विञ्चन्ति विनक्षि विङ्क्थ विनच्मि विञ्च्वः विङ्क्ते विञ्चाते विञ्चते विङ्क्षे विङ्ग्ध्वे विञ्चे । विञ्च्यात् विञ्चीत । विनक्तु विङ्ग्धि विनचानि विङ्क्ताम् । अविनक् ग् अविङ्क्त । अविचत् अवैक्षीत् अविक्त । विवेच विवेचिथ विविचिव विविचे । वेक्तासि-से । विच्यात् विक्षीष्ट । वेक्ष्यति । कर्म्मणि विच्यते । अवेचि । णिचि वेचयति-ते अवीविचत्-त । सनि विविक्षति ।

कृत्सु वेचनीयम् । वेचनम् । वेकः । वेचकः । घिणुन् विवेकी । विक्ता । विक्तः । विक्तिः । वेक्तव्यम् । वेक्तुम् । विक्त्वा । विविच्य । वेच्यम् । विञ्चन् विञ्चानः विच्यमानः । वेक्ष्यन् क्ष्यमाणः ।

वि-विवेके विविनक्ति विवेकः विवेचनम् विविक्तः ।

विज भये कम्पे च तु० आत्म० अक० सेट् ।

कर्त्तरि विजते । विजेत । विजताम् । अविजत । अविजिष्ट । विविजे । भावे विज्यते । अवेजि । णिचि वेजयति-ते अवीविजत्-त ।

क्तवतु । वेजनीयम् । वेजनम् । वेगः उद्वेगः । वेजकः । वेजी । विजिता । विग्नः । विक्तिः ।
विजितुम् । विजितव्यम् । विजित्वा । उद्विज्य । वेग्यम् । विजमानः । विजिष्यमाणः ।

विद् भावे दिवा० आत्म० अक० अनिट् ।

कर्त्तरि विद्यते । विद्येत । विद्यताम् । अविद्यत । अवित्त । विविदे । वेत्तासे । वित्सीष्ट ।
वेत्स्यते । भावे विद्यते । अवेदि । णिचि वेदयति-ते । अवीविदत्-त । सनि विवित्सते ।
क्तवतु वेदनीयम् । वेदनम् । वेदः । वेदकः । वेदी । वेत्ता । वित्तः । वित्तिः । वेत्तव्यम् ।
वेत्तुम् । वित्त्वा । संविद्य । वेद्यम् । विद्यमानः । वेत्स्यमानः ।

विद ज्ञाने अदा० पर० सक० सेट् ।

कर्त्तरि वेद-वेत्ति विदतुः-वित्तः विदुः-विदन्ति वेत्थ-वेत्सि विदथुः-वित्थः विद वित्थ वेद वेद्मि
विद्व विद्वः विद्म विद्मः । विद्यात् । वेत्तु-विदाङ्करोतु वित्ताम् विदाङ्कुरुताम् विदन्तु
विदाङ्कुर्वन्तु विद्धि विदाङ्कुरु वित्तम् विदाङ्कुरुतम् वित्त विदाङ्कुरुत वेदानि विदाङ्करवाणि
विदाव विदाङ्करवाव । ङाम्पक्षे आत्मनेपदञ्च । विदाङ्कुरुताम् विदाङ्कुर्वाताम् विदाङ्कुर्वताम् विदाङ्कुरुष्व वेदाङ्कुर्वाथाम् विदाङ्कुरुध्वम् विदाङ्करवै विदाङ्करवावहै । अवेत्-द्
अवेः अवित्ताम् अविदुः-अविदन् अवेत् । अवेदीत् अवेदिष्टाम् अवेदिषुः । विवेद विदा-

बभूव विदामास विदाञ्चकार विवेद । विदिता । विद्यात् । वेदिष्यति । कर्म्मणि । विद्यते अवेदि णिचि वेदयति-ते अवीविदत्-त । सनि विविदिषति ।

कृत्सु वेदनीयम् । वेदनम् । वेदः । असि वेदाः जातवेदाः । वेदकः । वेदी । वेदिता औणादिके तृचि तु वेत्ता । विदितः । वित्तिः । वेदितव्यम् । वेदितुम् । विदित्वा । संविद्य । वेद्यम् । विदन् विद्यमानः । वेदिष्यन् ष्यमाणः । सम्-आत्म० अक० संवित्ते संविदाते संविदते संविद्रते ।

विद लाभे तुदा० उभ० सक० अनिट् मुचादि० ।

कर्त्तरि विन्दति-ते । विन्देत्-त । विन्दतु-ताम् । अविन्दत्-त । अविदत् अवित्त । विवेद विवेदिथ विविदिव विविदे । वेत्ता सि-से । विद्यात् वित्सीष्ट । वेत्स्यति । कर्म्मणि विद्यते अवेदि । णिचि वेदयति-ते । अवीविदत्-त । सनि विवित्सति-ते ।

कृत्सु दैवादिकवत् । वित्ता विन्नः वेत्तुम् । वेत्तव्यम् वित्त्वा विन्दन् विन्दमान वेत्स्यन् ष्यमाण इति भेदः । परि परिवेदने परिविन्दति परिवेत्ता परिवित्तः ।

विश उपवेशने तु० पर० अक० अनिट् ।

कर्त्तरि विशति । विशेत् । विशताम् । अविशत् । अविक्षत् । विवेश । वेष्टा । विश्यात् । वेक्ष्यति । भावे विश्यते । अवेशि । णिचि वेशयति ते अवीविशत् त । सनि विविक्षति ।

कृत्सु वेशनीयम्। वेशनम्। वेशः। वेशकः। वेशी। वेष्टा। विट्‌ः। विष्टिः। वेष्टव्यम्। वेष्टुम्। विष्ट्वा। उपविश्य। वेश्यम्। विशन्। वेक्ष्यन्। नि-आत्म० निविशते। अभिनि-बुद्धिप्रवेशने सक०, धर्ममभिनिविशते। अन्यतार्थे अक०। सम् शयने संविशति। निर् भृतौ भोगे च निर्विशति। उप-स्थितौ अक० उपविशति। परि-परिवेशने। परिविशति।

वृ भजने क्र्या० आत्म० सक० सेट्।

कर्त्तरि वृणीते-वृणाते वृणते। वृणीत। वृणीताम्। अवृणीत। अवरिष्ट अवरीष्ट अवृत। वव्रे वव्रिषे। वरीतासे वरितासे। वरिषीष्ट वृषीष्ट। वरीष्यते वरिष्यते। कर्मणि व्रियते। अवारि अवारिषाताम् अवरीषाताम् अवरिषाताम् अवृषाताम्। णिचि वारयति ते अवीवरत् त। सनि विवरिषते विवरीषते वुवूर्षते।

कृत्सु वरणीयम्। वरणम्। वारः संवारः विवारः नीवारः। वरः। वारकः। वारी। वरीता-वरिता। वृतः। वृतिः। वरीतव्यम् वरितव्यम्। वरीतुम् वरितुम्। वृत्वा। प्रवृत्य। वार्य्यम्। वृणानः व्रियमाणः। वरीष्यमाणः वरिष्यमाणः कर्मणि वारिष्यमाणश्च। एण्य वरेण्यः।

वृ वरणे स्वा० उभ० सक० सेट्।

कर्त्तरि वृणोति वृणुतः वृण्वन्ति वृणोषि वृणोमि वृण्वः वृणुवः वृणुते वृण्वाते वृण्वते। वृणुयात्

वृणीत। वृणोतु वृणुताम्। अवृणोत् अवृणुत। अवारीत् अवारिष्टाम् अवारिषुः अवरीष्ट अवरिष्ट अवृत। ववार ववरिथ वव्रे ववृषे। वरीतासि-से वरितासि-से। व्रियात् वरिषीष्ट वृषीष्ट। वरिष्यति-ते वरीष्यति-ते। कर्म्मणि व्रियते। अवारि।

कृत्सु शतरि वृण्वन् वृण्वानः। स्यट वरीष्यन् वरिष्यन् एवं स्यमाने इतिभेदः अन्यत् क्र्यादि-गणीयवत्। सम् सङ्कोचने। संवृणुते। वि-विस्तारकरणे विवृणोति विवृण्वती शैलसुतापि भावमिति कुमारः।

वृत वर्त्तने भ्वा० आत्म० अक० सेट् वृतादि।

कर्त्तरि वर्त्तते। वर्त्तेत। वर्त्तताम्। अवर्त्तत। लुङि लृटि लृङि च उभ०। अवृतत् अवर्त्तिष्ट। ववृते ववृतिषे। वर्त्तितासे। वर्त्स्यति वर्त्तिष्यते। अवर्त्स्यत् अवर्त्तिष्यत। भावे वृत्यते अवर्त्ति। णिचि। वर्त्तयति-ते अवीवृतत्-त अववर्त्तत्-त। सनि विवर्त्तिषते।

कृत्सु वर्त्तनीयम्। वर्त्तनम्। वर्त्तः। वर्त्तकः। वर्त्ती। वर्त्तिता। वृत्तः। वृत्तिः। वर्त्तितव्यम्। वर्त्तितुम्। वृत्त्वा। प्रवृत्य। वृत्यम्। वर्त्तमानः। वर्त्स्यन् वर्त्तिष्यमाणः। इष्णु वर्त्तिष्णुः सनः विवृत्सा विवर्त्तिषा। विवृत्सुः विवर्त्तिषुः। विवर्त्तिषमाणः।

वृध वर्द्धने भ्वा० आत्म० अक० सेट् ऋतादि।

कर्त्तरि वर्द्धते। लुङि लृटि लृङि च उभ०। अवृधत् अवर्द्धिष्ट। ववृधे। वर्द्धितासे। वर्द्धिषीष्ट। वर्त्स्यति वर्द्धिष्यते। अवर्त्स्यत् अवर्द्धिष्यत। भावे वृध्यते अवर्द्धि। णिचि वर्द्धयति-ते अवीवृधत्-त अववर्द्धत्-त। सनि विवर्द्धिषते।

कृत्सु वर्द्धनीयम्। वर्द्धनम्। वर्द्धः। वर्द्धकः। वर्द्धी। इष्णु वर्द्धिष्णुः। वर्द्धिता। वृद्धः। वृद्धिः। वर्द्धितुम् वर्द्धितव्यम्। वृद्ध्वा। संवृध्य॥ वृध्यम्। वर्द्धमानः। वर्त्स्यन् वर्द्धिष्यमाणः। सनि विवृत्सा विवर्द्धिषा। विवृत्सुः विवर्द्धिषुः। विवर्द्धिषमाणः।

वृह करिगर्ज्जने वृंहौ च भ्वा० पर० अक० सेट् इदित्।

कर्त्तरि वृंहति। वृंहेत्। अवृंहीत्। भावे वृंह्यते। अवृंहि। णिचि वृंहयति ते। अववृंहत्-त

कृत्सु। वृंहणीयम्। वृंहणम्। वृंहः। वृंहकः। वृंही। वृंहिता। वृंहितम्। वृंहा। वृंहितव्यम्। वृंहितुम्। वृंहित्वा। संवृंह्य। वृंह्यम्। वृंहन्। वृंहिष्यन्। मनि नि० ब्रह्मन्। पवर्गीयादिवदुक्तिस्तु प्रामादिकी।

वृ वृतौ क्र्या० उभ० सक० सेट् ल्वादि।

कर्त्तरि वृणाति वृणीतः वृणीते। वृणीयात् वृणीत। वृणातु वृणीताम्। अवृणात् अवृणीत।

अवारीत् अवरिष्ट अवरीष्ट अवृष्ट। ववार ववरिथ ववरे ववरिषे। वरीतासि-से वरिता सि-से। वरिषीष्ट वृषीष्ट। वरीष्यति-ते वरिष्यति ते। कर्म्मणि वूर्य्यते अवारि अवारिषाताम् अवरीषाताम् अवरिषाताम् अवृषाताम्। णिचि वारयति-ते अवीवरत्-त। सनि विवरीषति ते विवरिषति-ते वुवूर्षति ते।

कृतस्तु वरणीयम्। वरणम्। वरः। वारकः। वारी। वरीता वरिता। वृतः। वृतिः। वरीतुम् वरितुम्। वरीतव्यम् वरितव्यम्। वृत्वा। संवूर्य्य। वार्य्यम्। वृणन् वृणानः वूर्य्यमाणः। वरीष्यन् ष्यमाणः वरिष्यन् ष्यमाणः कर्म्मणि वारिष्यमाणश्च।

वे तन्तुसन्ताने भ्वा० उभ० अनिट् यजादि।

कर्त्तरि वयति ते। वयेत्-त। वयतु ताम्। अवयत्-त। अवासीत् अवास्त। उवाय ऊवतुः उवयिथ उविथ उवाय ऊवे। वा-सि से। ऊयात् वासीष्ट। वास्यति-ते। कर्म्मणि ऊयते औयत। अवायि॥ अवायिषाताम् अवासाताम्। णिचि वापयति ते अवीवपत्-त।

कृतस्तु वानीयम्। वानम्। वायः। तन्तुवायः। वायकः। वायी। वाता। ऊतः। ऊतिः। वातव्यम्। वातुम्। ऊत्वा। ममूय। वेयम्। वय-न् मानः ऊयमानः। वास्य-न् स्यमानः। कर्म्मणि वायिष्यमाणश्च।

वेप चलने भ्वा० आत्म० अक० सेट् ।

कर्त्तरि वेपते । वेपेत । वेपताम् । अवेपत । अवेपिष्ट । भावे वेप्यते । अवेपि । णिचि पर० वेपयति अववेपत् ।

कृत्सु वेपनीयम् प्रवेपनीयम् प्रवेपणीयम् । प्रवपनं प्रवपणम् । वेपः । वेपकः । वेपी । वेपिता । वेपितः । वेपा । वेपितव्यम् । वेपितुम् । वेपित्वा । संवेप्य । वेप्यम् । वेपमानः । वेपिष्यमाणः । अथु वेपथुः ।

वेष्ट वेष्टने भ्वा० आत्म० सक० सेट् ।

कर्त्तरि वेष्टते । चेष्टवत् सर्वं चकारस्थाने वकारमात्रभेदः । णिचि उभ० वेष्टयति ते । अववेष्टत् त अविवेष्टत्-त ।

व्यथ व्यथने दुःखे भ्वा०-अक०-आत्म० सेट् घटादि ।

कर्त्तरि व्यथते । व्यथेत । व्यथताम् । अव्यथत । अव्यथिष्ट । विव्यथे । भावे । व्यथ्यते । अव्यथि णिचि व्यथयति-ते अविव्यथत्-त ।

कृत्सु व्यथनीयम् । व्यथनम् । व्याथः । व्याथकः । व्याथी । व्यथिता । व्यथितः । व्यथा । व्यथितुम् । व्यथितव्यम् । व्यथित्वा । संव्यथ्य । व्याथ्यम् । व्यथमानः । व्यथिष्यमाणः ।

व्यध ताड़ने दिवा० पर० सक० अनिट् ।

कर्त्तरि विध्यति । विध्येत । विध्यतु । अविध्यत् । अव्यात्सीत् । विव्याध विविधतुः विव्यधिथ-विव्यद्ध । व्यद्धा । विध्यात् । व्यत्स्यति । कर्म्मणि विध्यते । अव्याधि । णिचि व्याधयति ते अविव्यधत्-त ।

कृत्सु व्यधनीयम् । व्यधनम् । व्याधः । णा व्याधः । वेधस्तु तौदिकविधतेरूपम् । व्याधकः । व्याधी । व्यद्धा । विद्धः । विद्धिः । व्यद्धुम् । व्यद्धव्यम् । विद्ध्वा । आविध्य । व्याध्यम् । विध्यन् विध्यमानः । व्यत्स्यन् स्यमानः । क्विप् आवित्-द् मर्म्माविन्-द् मर्म्माविधम् ।

व्ये वरणे भ्वा० उभ० सक० अनिट् ।

कर्त्तरि व्ययति-ते । व्ययेत्-त । व्ययतु-ताम् । अव्ययत्-त । अव्यासीत् अव्यास्त । विव्यौ विव्यतुः विव्यिथ विव्यिव विव्ये । व्यातासि-से । वीयात् व्यासीष्ट । व्यास्यति-ते । कर्मणि वीयते । अव्यायि । णिचि व्याययति-ते अविव्ययत् त ।

कृत्सु व्यानीयम् । व्यानम् । व्यायः । व्यायकः । व्यायी । व्याता । वीतः । वीतिः । व्यातव्यम् । व्यातुम् । वीत्वा । संवीय । व्येयम् । व्ययन् मानः वीयमानः । व्यास्यन् स्यमानः कर्मणि व्यायिष्यमाणस्य ।

व्रज गतौ भ्वादि० सक० पर० सेट्।

कर्त्तरि व्रजति। व्रजेत्। व्रजतु। अव्रजत्। अव्राजीत्। वव्राज। कर्म्मणि व्रज्यते अव्राजि।

णिचि व्राजयति-ते अविव्रजत्-त।

कृत्सु। व्रजनीयम्। व्रजनम्। व्रजः। व्राजः। परिव्राजकः। व्राजी। व्रजिता। व्रजितः। क्यप् व्रज्या। व्रजितव्यम्। व्रजितुम्। व्रजित्वा। प्रव्रज्य। व्राज्यम्। व्रजन् व्रज्यमानः। व्रजिष्यन् ष्यमाणः। परि—सन्न्यासने परिव्रजति। क्विप् परिव्राट्। अनु—अनुगमने अनुव्रजति। अप—अपगमने अपव्रजति।

व्रश्च छेदने तुदा० पर० सक० वेट्।

कर्त्तरि वृश्चति। वृश्चेत्। वृश्चतु। अवृश्चत्। अव्रश्चीत् अव्राक्षीत्। वव्रश्च वव्रश्चतुः वव्रश्चिथ वव्रष्ठ वव्रश्चिव वव्रश्च्व। व्रश्चिता व्रष्टा। वृश्च्यात्। व्रश्चिष्यति व्रक्ष्यति। कर्म्मणि वृश्च्यते अव्रश्चि। णिचि व्रश्चयति-ते अववृश्चत्-त।

कृत्सु व्रश्चनीयम्। व्रश्चनम्। ल्यु व्रश्चनः। वृश्चः। वृश्चकः। व्रश्ची। व्रश्चिता व्रष्टा। वृक्णः। वृष्टिः। व्रश्चितव्यं व्रष्टव्यम्। व्रश्चितुम् व्रष्टुम्। वृश्चित्वा वृष्ट्वा। संवृश्च्य। व्रश्च्यम्। वृश्चन् वृश्च्यमानः। व्रश्चिष्यन् ष्यमाणः व्र-क्ष्यन् क्ष्यमाणः।

शक शक्तौ स्वा० पर० अक० अनिट्।

कर्त्तरि शक्नोति शक्नुतः शक्नुवन्ति। शक्नुव। शक्नुयात्। शक्नोतु। अशक्नोत्। अशकत्। शशाक शेकतुः। शक्ता। शक्यात्। शक्ष्यति। भावे शक्यते अशाकि। णिचि शाकयति-ते अशीशकत्-त।

कृत्सु शकनीयम्। शकनम्। शाकः। शक्ता। शक्तः। शक्तिः। शक्तुम्। शक्तव्यम्। शक्त्वा। प्रशक्य। शाक्यम्। शक्नुवन्। शक्ष्यन्।

शक शक्तौ दिवादि० उभ० अक० सेट्।।

कर्त्तरि शक्यति-ते। अशाकीत् अशकीत् अशकिष्ट। शशाक शेके। शकितासि-से। शक्यात् शकिषीष्ट। शकिष्यति-ते। भावे शक्यते। अशाकि। णिचि शाकयति ते अशीशकत् त।

कृत्सु शकितः। शकिता। शकितव्यम्। शकितुम्। शकित्वा। शक्यन् शक्यमानः शकिष्यन् ष्यमाणः इति भेदः। अन्यत् स्वादिगणीयवत्।

शक तासे संन्देहे च भ्वा० आत्म० तासे अक० संन्देहे सक० सेट् इदित्।

कर्त्तरि शङ्कते। शङ्केत। शङ्कताम्। अशङ्कत अशङ्किष्ट। शशङ्के। कर्म्मणि भावे च। शङ्क्यते। अशङ्कि। णिचि शङ्कयति-ते। अशशङ्कत्-त।

कृत्सु शङ्कनीयम् । शङ्कनम् । शङ्कः । शङ्ककः । आशङ्की । शङ्किता । शङ्कितः । शङ्का । लङ्का

पि शङ्काकुलेति नाटकम् । अशक्यशङ्काव्यभिचारहेतुरिति नैषधम् । शङ्कितुम् । शङ्कितव्यम् ।

शङ्कित्वा । आशङ्क्य । शङ्क्यम् । शङ्कमानः, शङ्क्यमानः । शङ्किष्यमाणः ।

शंस् कथने स्तुतौ च भ्वा० पर० सक० सेट् ।

कर्त्तरि शंसति । शंसेत् । शंसतु । अशंसत् । अशंसीत् । शशंस । शंसिता । शस्यात् । कर्म्मणि

शस्यते । अशंसि । णिचि शंसयति ते अशशंसत् त ।

कृत्सु शंसनीयम् । शंसनम् । शंसः । शंसकः । शंसी । शंसिता । शस्तः । शस्तिः । शंसा ।

शंसितुम् । शंसितव्यम् । शंसित्वा शस्त्वा । प्रशस्य । शंस्यम् । शंसन् । शंस्यमानः । शंसि-ष्यन्

ष्यमाणः । आ—आशंसने इष्टार्थप्रार्थने आत्म० आशंसते आशंसुः । प्र—प्रशंसायाम् ।

प्रशंसति प्रशस्तिः प्रशंसा । अभि—अभिशापे अपवादे च अभिशंसति अभिशस्तः ।

इदिदयं तेन न नलोपः आशंस्यते ।

शप आक्रोशे भ्वा० उभ० सक० अनिट् ।

कर्त्तरि शपति ते । शपेत्-त । अशाप्सीत् अशप्त । शशाप शेपे । शप्ता-सि-से । शप्यात् शप्सीष्ट ।

कर्म्मणि शप्यते अशापि । णिचि शापयति ते अशीशपत्-त ।

कृत्सु शपनीयम् । शपनम् । शापः । शापकः । शापी । शप्ता । शपः । शप्तिः । शप्तव्यम् । शप्तुम् । शप्त्वा । अभिशप्य । शप्यम् । शप-न् मानः शपमानः । शप्स्य-न् मानः । शपथे आत्म० शपते ।

शम शान्तौ दिवा० पर० अक० सेट् शमादि ।

कर्त्तरि शाम्यति । शाम्येत् । अशमत् अशमीत् । शशाम शेमिथ । शमिता । शम्यात् । भावे शम्यते । अशमि । णिचि शमयति शामयति । अशीशमत् त अशशामत्-त । कर्म्मणि अशामि अशमि । अशामयिषाताम् अशमयिषाताम् अशामिषाताम् अशमिषाताम् । कृत्सु । शमनीयम् । शमनम् । णिचः ल्यु शमनः । शमः । शमकः । शमी । शमिता । शान्तिः । णिचस्तु शान्तः शमितः । शान्तिः । शमितव्यम् । शमितुम् । शमित्वा शान्त्वा । प्रशम्य । शम्यम् । शाम्यन् । शमिष्यन् । उप-निवृत्तौ उपशाम्यति उपशमः ।

शास शासने अदा० पर० द्विक० सेट् जक्षादि ।

कर्त्तरि । शास्ति शिष्टः शासति शास्सि शिष्ठः शिष्ठ शास्मि शिष्वः । शिष्यात् । शास्तु शिष्टाम् शासतु शाधि । अशात् अशिष्टाम् अशासुः अशाः । अशासत् । शशास । शासिता । कर्म्मणि शिष्यते । अशासि । णिचि शासयति-ते अशशासत्-त ।

कृत्सु। शासनीयम्। शासनम्। शासः। शासकः। शासी। शासिता। शास्ता तु औणादिके तृचि नेट्। शिष्टः। शिष्टिः। शासितव्यम्। शासितुम्। शिष्ट्वा। संशिष्य। शिष्यः शास्यः। शासत् शिष्यमाणः। शासि-ष्यन् ष्यमाणः। आ—आशंसने आशीर्वादप्रार्थने आशास्ते आशासाते आशासते क्विप् आशीः।

शिक्ष शिक्षणे भ्वा० आत्म० सक० सेट्।

कर्त्तरि शिक्षते। अशिक्षिष्ट। कर्म्मणि शिक्ष्यते। अशिक्षि। णिचि शिक्षयति-ते अशिशिक्षत्-त। कृत्सु शिक्षणीयम्। शिक्षणम्। शिक्षः। शिक्षकः णिचोऽपि शिक्षकः। शिक्षी। शिक्षिता। शिक्षितः। शिक्षा। शिक्षितव्यम्। शिक्षितुम्। शिक्षित्वा। संशिक्ष्य। शिक्ष्यम्। शिक्षमाणः शिक्ष्यमाणः। शिक्षिष्यमाणः।

शिष विशेषे रुधा० पर० सक० अनिट्।

कर्त्तरि शिनष्टि शिंष्टः शिंषति शिनक्षि शिंष्ठः शिंष्ठ शिनष्मि शिंष्वः। शिंष्यात्। शिनष्टु शिंष्टाम् शिंषन्तु शिण्ढि। अशिनट्-ड्। अशिषत्। शिशेष। शेष्टा। शिष्यात्। शेक्ष्यति। कर्म्मणि शिष्यते। अशेषि। णिचि शेषयति-ते अशीशिषत्-त।

कृत्सु शेषणीयम् । शेषणम् । शेषः । शेषकः । शेषी । शेष्टा । शिष्टः । शिष्टिः । शेष्टव्यम् । शेष्टुम् । शिष्ट्वा । विशिष्य । शेष्यम् । शिंषन् शिष्यमाणः । शेक्ष्यन् शेक्ष्यमाणः । वि—विशेषकरणे विशिनष्टि विशिष्टः विशेष्यम् विशेषणम् ।

शिष अवशेषे वा चुरा० उभय० पक्षे भ्वा० पर० अक० सेट् ।

कर्त्तरि शेषयति-ते शेषति । अशीशिषत्-त अशेषीत् । भावे शिष्यते अशेषि ।

कृत्सु शेषयिता शेषिता । शेषितः शिष्टः । शेषयितव्यम् शेषितव्यम् । शेषयितुम् शेषितुम् । शेषयित्वा शेषित्वा शिषित्वा शिष्ट्वा । शेषय-न् माणः शेषन् शिष्यमाणः । शेषयिष्य-न् माणः शेषि-ष्यन् ष्यमाणः । वि—अतिशायने विशेषयति अव—अवशेषे अवशेषयति अवशेषितः अवशिष्टः । अन्यत् रौधादिकवत् ।

शी शयने अदा० आत्म० अक० सेट् ।

कर्त्तरि शेते शयाते शेरते शेषे । शयीत । शेताम् शयाताम् शेरताम् । अशेत अशेरत । अशयिष्ट । शिश्ये । शयितासे । शयिषीष्ट । भावे शय्यते । अशायि अशायिषाताम् अशयिषाताम् ।

कृत्सु शयनीयम् । शयनम् । शयः उत्तानशयः । शायकः ॥ शायी । शयिता । शयितः । शय्या ।

शयितव्यम् । शयितुम् । शयित्वा । उपशय्य । शेयम् । शयानः । शयिष्यमाणः । अति—अतिक्रमे अतिशेते अतिशयितः । अधिपूर्व्वकः सक० शय्यामधिशेते ।

शुच शोके भ्वा० पर० अक० सेट् । तादावार्द्धधातुके वेडित्यन्ये ।

कर्त्तरि शोचति । शोचेत् । शोचतु । अशोचत् । अशोचीत् । शुशोच । शोचिता शोक्ता । भावे शुच्यते अशोचि णिचि शोचयति-ते अशूशुचत्-त । सनि शुशोचिषति शुशुचिषति ।

कृत्सु शोचनीयम् । शोचनम् । शोकः । शोचकः । शोकी । शोचिता शोक्ता । शोचितः । मतान्तरे शुक्तः । शुक्तिः । शोचितव्यम् शोक्तव्यम् । शोचितुम् शोक्तुम् । शोचित्वा शुचित्वा शुक्त्वा । विशुच्य । शोच्यम् । शोचन् । शोचिष्यन् । अनु—अनुशोके सक० अनुशोचति अनुशोचनम् ।

शुध शौचे शोधने च दिवा० पर० अक० अनिट् ।

कर्त्तरि शुध्यति । शुध्येत । अशुधत् । शुशोध । शोद्धा । भावे शुध्यते अशोधि । णिचि शोधयति-ते अशूशुधत्-त ।

कृत्सु शोधनीयम् । शोधनम् । शोधः । शोधकः । शोधी । शोद्धा । शुद्धः । शुद्धिः । शोद्धव्यम् । शोद्धुम् । शुद्ध्वा । विशुध्य । शोध्यम् । शुध्यन् शोत्स्यन् ।

शुभ दीप्तौ भ्वा० आत्म० अकं० सेट् ।

कर्त्तरि शोभते। अशुभत् अशोभिष्ट। शुशुभे। भावे शुभ्यते अशोभि। णिचि शोभयति-ते। अशूशुभत्-त। सनि सुशोभिषते शुशुभिषते।

कृत्सु शोभनीयम्। शोभनम्। शोभः। शोभकः। शोभी। शोभिता। शोभितः। शोभा। शोभितव्यम्। शोभितुम्। शोभित्वा शुभित्वा। उपशुभ्य। शोभ्यम्। शोभमानः। शोभिष्यमाणः।

श्चुत क्षरणे भ्वा० पर० अक० सेट् ।

कर्त्तरि श्चोतति। अश्चुतत् अश्चोतीत्। चुश्चोत। भावे श्चुत्यते। अश्चोति। णिचि श्चोतयति-ते

कृत्सु श्चोतनीयम्। श्चोतनम्। श्चोतः। श्चोतिता। श्चुतितः। श्चुत्तिः। श्चोतितव्यम्। श्चोतितुम्। श्चुतित्वा श्चोतित्वा। श्चोत्यम्। श्चोतन्। श्चोतिष्यन्।

श्वस प्राणने अदा० पर० अक० सेट् रुदादि ।

कर्त्तरि श्वसिति श्वसितः श्वसन्ति श्वसिषि श्वसिथः श्वसिमि श्वसिवः। श्वस्यात्। श्वसितु श्वसिताम् श्वसन्तु श्वसिहि। अश्वसीत् अश्वसिताम् अश्वसन्। अश्वसीत्। शश्वास। भावे श्वस्यते। अश्वासि। णिचि श्वासयति-ते अशिश्वसत्-त।

कृत्सु श्वसनीयम्। श्वसनम्। श्वसनः। श्वासः। श्वासकः। श्वासी। श्वसिता। श्वसितः। श्वस्तिः। श्वसितव्यम्। श्वसितुम्। श्वसित्वा। विश्वस्य। श्वास्यम्। श्वसन् श्वसिष्यन्। वि—विश्वासे विश्वसिति विश्वसितः-विश्वस्तः। आ—आश्वासे आश्वसिति आश्वसितः—आश्वस्तः। प्रादिपूर्व्वकाः प्रश्वासनिश्वासाद्यर्थे।

श्रन्थ मोचने क्र्या० पर० सक० सेट्।

कर्त्तरि श्रथ्नाति श्रथ्नीतः श्रथ्नन्ति श्रथ्नासि सर्व्वं ग्रन्थवत् ग्रस्थाने श्रमात्रभेदः।

श्रम तपसि खेदे च दिवा० पर० अक० सेट् शमादि।

कर्त्तरि श्राम्यति। अश्राम्यत्। अश्रमत्—अश्रमीत्। भावे श्रम्यते। अश्रमि वेत्तु व्यश्रमि—व्यश्रामि। णिचि श्रमयति-ते अशिश्रमत्-त। वि—विश्रामे विश्राम्यति विश्रमः—विश्रामः। आ—आश्रयकरणे आश्राम्यति आश्रमः।

श्रा विक्लित्तिरूपे पाके अदा० पर० अक० अनिट्।

कर्त्तरि श्राति। अश्रासीत्। शश्रौ। श्राता। भावे श्रायते। अश्रायि। णिचि श्रपयति-ते अशिश्रपत्।

कृत्सु श्राणम्। णिचस्तु श्रपणीयम् श्रपणम्। श्रपयिता। श्रपितः। श्रपणा। श्रपयितव्यम्।

श्रपयितुम्। श्रपयित्वा। श्रप्यम्। श्रपय-न् माणः श्रप्यमाणः। श्रपयि-ष्यन् ष्यमाणः।
कर्म्मणि श्रपिष्यमाणम्।

श्रि सेवने भ्वा० उभ० सक० सेट्।

कर्त्तरि श्रयति-ते। श्रयेत्-त। अशिश्रियत्-त। शिश्राय शिश्रियतुः शिश्रिये। श्रयिता-सि-से। श्रीयात् श्रयिषीष्ट। कर्म्मणि श्रीयते अश्रायि। णिचि श्राययति-ते अशिश्रयत्-त।
कृत्सु श्रयणीयम्। श्रयणम्। श्रयः। श्रायकः। श्रायी। इनि संश्रयी। श्रयिता। श्रितः। श्रितिः। श्रयितव्यम्। श्रयितुम्। श्रयित्वा। आश्रित्य। आश्रेयम्। श्रय-न् माणः श्रीयमाणः। श्रयि-ष्यन् ष्यमाणः। कर्म्मणि श्रायिष्यमाणम्। आ—अवलम्बने आश्रयति-ते आश्रयः आश्रितः। प्र-प्रागल्भ्ये अक० प्रश्रयति-प्रश्रयः। उद्-उच्चभवने अक० उच्छ्रयति उच्छ्रितः। उच्छ्रयः उच्छ्रायः

श्रु श्रवणे भ्वा० पर० सक० अनिट्।

वर्त्तरि शृणोति शृणुतः शृण्वन्ति शृणोषि शृणोमि शृणुवः—शृण्वः शृणुमः—शृण्मः। शृणुयात्। शृणोतु। अशृणोत्। अश्रौषीत्। शुश्राव शुश्रुवतुः शुश्रविथ—शुश्रोथ शुश्रुव। श्रोता। श्रूयात्। श्रोष्यति। कर्म्मणि श्रूयते अश्रावि। अश्राविषाताम्—अश्रोषाताम्। णिचि श्रावयति ते अशिश्रवत्-त—अशुश्रवत् त। सनि शुश्रूषते। णिचः सनि शुश्रावयिषति-ते।

कृत्सु श्रवणीयम् । श्रवणम् । श्रवः—आश्राव: । श्रावक: । अपि श्रवः । श्रावी । श्रोता । श्नन् श्रोतम् । श्रुतः । श्रुतिः । श्रोतव्यम् । श्रोतुम् । श्रुत्वा । उपश्रुत्य । श्रव्यम् श्राव्यम् । शृण्वन् । श्रूयमाणः । श्रो-ष्यन् ष्यमाणः कर्म्मणि श्राविष्यमाणश्च । प्रति-आ-अङ्गीकारे प्रतिशृणोति आशृणोति । सम् संश्रवे आत्म०, अक० । संशृणुते संशृण्वाते संशृण्वते ।

श्लाघ विकत्थने (आत्मगुणाविष्करणे) अक० प्रशंसने सक० भा० आत्म० सेट् ।

कर्त्तरि श्लाघते । अश्लाघिष्ट । भावे श्लाघ्यते । अश्लाघि । णिचि श्लाघयति-ते । अशश्लाघत्-त ।

कृत्सु श्लाघनीयम् । श्लाघनम् । श्लाघकः । श्लाघी । श्लाघिता । श्लाघितः । श्लाघा । श्लाघितव्यम् । श्लाघितुम् । श्लाघित्वा । श्लाघ्यम् । श्लाघमान: श्लाघ्यमान: । श्लाघिष्यमाण: ।

श्लिष आलिङ्गने सम्बन्धमात्रे एकशब्देनोभयार्थबोधने च दिवा०पर०सक०अनिट् ।

कर्त्तरि श्लिष्यति । श्लिष्येत् । श्लिष्यतु । अश्लिष्यत् । अश्लिषत् । आलिङ्गनभिन्नार्थे अश्लैक्षीत् । श्लेष्टा श्लेक्ष्यति । कर्मणि श्लिष्यते अश्लेषि अश्लिक्षाताम् । णिचि श्लेषयति-ते । अशिश्लिषत् त ।

कृत्सु श्लेषणीयम् श्लेषणम् । श्लेषः । श्लेषकः । श्लेषी । श्लेष्टा । श्लिष्टः । श्लिष्टिः । श्लेष्टव्यम् । श्लेष्टुम् । श्लिष्ट्वा । प्रश्लिष्य । श्लेष्यम् । श्लिष्यन् श्लिष्यमाणः । श्लेक्ष्य-न् माणः । प्र-प्रश्लेषे प्रश्लिष्यति प्रश्लेषः ।

श्वि गतौ सक० वृद्धौ अक० भ्वा० पर० सेट् ।

कर्त्तरि श्वयति । श्वयेत् । श्वयतु । अश्वयत् । अशिश्वियत्—अश्वत्—अश्वयीत् अशिश्वियताम्
—अश्वताम् अश्वयिष्टाम् । शुशाव—शिश्वाय शुशुवतुः—शिश्वियतुः शुशविथ—शिश्वयिथ ।
श्वयिता । शूयात् । श्वयिष्यति । कर्म्मणि भावे च शूयते । अश्वायि अश्वायिषाताम्—अश्व-
यिषाताम् । णिचि श्वाययति अशूशवत् त—अशिश्वयत्-त । यङि शोशूयते शेश्वीयते ।
कृत्सु श्वयनीयम् । श्वयनम् । श्वयः । श्वायकः । अथु श्वयथुः । श्वयिता । शूनः । शूतिः ।
श्वयितव्यम् । श्वयितुम् । श्वयित्वा । उच्छूय । श्वेयम् । श्वयन् शूयमानः । श्वयि-ष्यन्
ष्यमाणः कर्म्मणि श्वायिष्य-माणश्च । उद् स्फीतताभवने अक० । उच्छूयति उच्छूनः ।

ष्ठिव निरसने दि० पर० सक० सेट् ।

कर्त्तरि ष्ठीव्यति । ष्ठीव्येत् । अष्ठेवीत् । टिष्ठेव तिष्ठेव । कर्म्मणि ष्ठीव्यते । अष्ठेवि । णिचि
ष्ठेवयति-ते अटिष्ठिवत्-त अतिष्ठिवत्-त ।
कृत्सु ष्ठेवनीयम् । ष्ठेवनम् । ष्ठेवः । ष्ठेवकः । ष्ठेवी । ष्ठेविता । ष्ठ्यूतः । ष्ठ्यूतिः । ष्ठेवितुम्
ष्ठेवितव्यम् । ष्ठेवित्वा ष्ठ्यूत्वा । ष्ठेव्यम् । ष्ठीव्यन् ष्ठीव्यमानः । ष्ठेवि-ष्यन् ष्यमाणः ।

षन्ज सङ्गे भ्वा० पर० अक० अनिट् ।

कर्त्तरि सजति । सजेत् । सजतु । असजत् । असाङ्क्षीत् । ससञ्ज ससजतुः ससञ्जतुः । सङ्क्ता । सज्यात् । सङ्क्ष्यति । भावे सज्यते । असञ्जि । णिचि सञ्जयति-ते अससञ्जत् त् । सनि सिसङ्क्षति । यङि सासज्यते ।

कृत्सु सञ्जनीयम् । सञ्जनम् । सङ्गः । सञ्जकः । घिणुन् सङ्गी । सङ्क्ता । सक्तः । सक्तिः । सङ्क्तव्यम् । सङ्क्तुम् । सक्त्वा । प्रसज्य । सञ्जम् । सजन् । सङ्क्ष्यन् । प्र—प्रसङ्गे प्रसजति प्रसङ्गः । अनु—अनुषङ्गे अनुषजति अनुषङ्गः । अभि—अभिषङ्गे (पराभवे) अभिषजति

षद विषादे अक० आश्रयकरणे गतौ च सक० तुदा० पर० अनिट् ।

कर्त्तरि सीदति । सीदेत् । सीदतु । असीदत् । असदत् । ससाद सेदतुः सेदिथ—ससत्थ सेदिव । सत्ता । सद्यात् । सत्स्यति कर्म्मणि भावे च सद्यते । असादि । णिचि सादयति-ते असीसदत्-त ।

कृत्सु । सदनीयम् । सदनम् । सादः । सादकः । सादी । सत्ता । सन्नः । सत्तिः । सत्तव्यम् । सत्तुम् । सत्त्वा । प्रसद्य । साद्यम् । सीदन् । सद्यमानः । सत्स्यन् स्यमानः । असि सदः । मनि सद्म । प्र—प्रसादे प्रसीदति प्रसन्नः प्रसादः । वि—विषादे विषीदति विषण्णः विषादः ।

अव—अवसादे अवसीदति अवसन्नः अवसादः । उद्—उन्मूलने । उत्सीदति उत्सन्नः उत्सादः । आ—नैकट्ये आसीदति आसन्नः आसत्तिः ।

सह शक्तौ भ्वा० आत्म० सक० सेट् ।

कर्त्तरि सहते । सहेत । सहताम् । असहत । असहिष्ट । सेहे । सहितासे सोढासे । सहिषीष्ट । कर्म्मणि सह्यते । असाहि । णिचि साहयति-ते असीषहत्-त । पर्य्यसीषहत् त । कृत्सु सहनीयम् । सहनम् । साहः । दुःखसहः भारसहः । दुःषहः । साहकः । साही । इष्णु, सहिष्णुः । सहिता सोढा । सोढः । सोढिः । सहितव्यं सोढव्यम् । सहितुं । सोढुम् । सोढ्वा । प्रसह्य । साह्यम् । सहमानः सह्यमानः । सहिष्यमाणः । उद्—उत्साहे उत्सहते उत्साहः ।

सान्त्व सान्त्वने अद० चुरा० उभय० सक० सेट् ।

कर्त्तरि सान्त्वयति-ते । अससान्त्वत्-त । कर्म्मणि सान्त्व्यते । असान्त्वि । कृत्सु । सान्त्वनीयम् । सान्त्वनम् । सान्त्वयिता । सान्त्वितः । सान्त्वना । सान्त्वयितव्यम् । सान्त्वयितुम् । सान्त्वयित्वा । प्रसान्त्व्य । सान्त्व्यम् । सान्त्वय-न् मानः सान्त्व्यमानः । सान्त्वयि-ष्यन् ष्यमाणः । कर्म्मणि सान्त्विष्यमाणश्च ।

सि बन्धने स्वादि० क्र्यादि० च उभ० सक० अनिट् ।

कर्त्तरि सिनोति–सिनाति सिनुतः—सिनीतः सिन्वन्ति–सिनन्ति सिनुते—सिनीते । सिनुयात्—सिनीयात् सिन्वीत–सिनीत । सिनोतु–सिनाति सिनुताम्–सिनीताम् । असिनोत्–असिनात् । असिनुत—असिनीत । असैषीत् असेष्ट । सिषाय सिष्ये । सेता-सि से । सीयात् सेषीष्ट । से ष्य ति-ते । कर्मणि सीयते । असायि । णिचि साययति ते असीषयत् त ।

कृत्सु सयनीयम् । सयनम् । सायः । सायकः । सायी । सेता । सितः । ग्रासे सिनः । सितिः । सेतव्यम् । सेतुम् । सित्वा । प्रसित्य । सेयम् । सिन्वन्-सिन्वानः सिनन्-सिनानः सीयमानः । से-ष्यन् ष्यमाणः । कर्मणि सायिष्यमाणस्य । वि-विषये विषिणोति–विषिणाति विषयः ।

सिच सेचने तु० उभ० सक० अनिट् मुचादि ।

कर्त्तरि सिञ्चति सिञ्चतः सिञ्चन्ति सिञ्चते । सिञ्चेत् त । सिञ्चतु ताम् । असिञ्चत् त न्यषिञ्चत् । असिचत् असिचत—असिक्त । सिषेच चे निषिषेच चे । सक्ता-सि से । सिच्यात् सिक्षीष्ट सेक्ष्य ति-ते । कर्मणि सिच्यते । असेचि । णिचि सेचयति ते असीषिचत् त । सनि सिसिक्षति यङि सेसिच्यते ।

कृत्सु सेचनीयम् । सेचनम् । सेकः । सेचकः । सेची । सेक्ता । सिक्तः । सिक्तिः । सेक्तव्यम् ।

सेक्तुम् । सिक्त्वा । निषिच्य । सेच्यम् । सिञ्च-न् मानः सिच्यमानः । से-क्ष्यन् क्ष्यमाणः । नि—निषेके (गर्भाधाने) निषिञ्चति निषिक्तः निषेकः । अभि-अभिषेके (मन्त्रपूर्व्वकस्नपनभेदे) अभिषिञ्चति अभिषिक्तः अभिषेकः । उद् गर्व्वे अक० उत्सिञ्चति उत्सिक्तः उत्सेकः ।

सिध सिद्धौ दिवा० पर० अक० अनिट् ।

कर्त्तरि सिध्यति । सिध्येत् । सिध्यतु । असिध्यत् । असैत्सीत् । सिषेध । सेद्धा । सिध्यात् । सेत्स्यति । भावे सिध्यते । असेधि । णिचि साधयति ते असीषधत् त । सनि सिषाधयिषति । क्तत्सु । सेधनीयम् । सेधनम् । सेधः । सेधकः । सेधी । सेद्धा । सिद्धः । सिद्धिः । सेद्धव्यम् । सेद्धुम् । सिद्ध्वा । संसिध्य । सेध्यम् । सिध्यन् । सेत्स्यन् । णिचस्तु साधनीयम् साधनम् । साधकः । साधयिता । साधितः । साधना । साधयितव्यम् । साधयितुम् । साधयित्वा । प्रसाध्य । साध्यम् । साधय-न् मानः साध्यमानः साधयि-ष्यन् ष्यमाणः कर्म्मणि साधिष्यमाणश्च ।

सिध गतौ भ्वादि० पर० सक० सेट् ।

कर्त्तरि सेधति । असेधीत् । कर्म्मणि सिध्यते । असेधि । णिचि सेधयतिते असीषिधत् त । क्तत्सु सेधनीयम् । सेधनम् । सेधकः । सेधी । सेधिता । सिद्धः । सिद्धिः । सेधितव्यम् सेधितुम् । सेधित्वा—सिद्ध्वा । निषिध्य । सेध्यम् । सेधन् सिध्यमानः । सेधि-ष्यन् ष्यमाणः । नि-निषेधे

निषेधति निषिद्धः निषेधकः निषेधः । प्रति—निषेधे प्रतिषेधति प्रतिषिद्धः प्रतिषेधः । आ—आसेधे (राजाज्ञयावरोधे) आसेधति आसेधः आसिद्धः । उद् उच्चतायाम् उत्सेधति उत्सिद्धः उत्सेधः ।

सिव तन्तुसन्ताने दिवा० पर० सक० सेट् ।

कर्त्तरि सीव्यति परिषीव्यति । सीव्येत् । सीव्यतु । असीव्यत् । असेवीत् । सिषेव । परिषिषेव । सेवितासि । सीव्यात् । कर्म्मणि सीव्यते । असेवि । णिचि सेवयति ते असीषिवत् त । सनि सिसेविषति सिस्यूषति । यङि सेषीव्यते ।

कृत्सु सेवनीयम् सेवनम् । सेवकः । सेवी । सेविता । स्यूतः । स्यूतिः । सेवितव्यम् । सेवितुम् । सेवित्वा स्यूत्वा । आसीव्य । सेव्यम् । सीव्यन् सीव्यमानः । सेवि-ष्यन् ष्यमाणः ।

सु मर्दने,स्नपने,मद्योत्पादने स्वा० उभ० सक० सेट् ।

कर्त्तरि सुनोति सुनुतः सुन्वन्ति सुन्वः—सुनुवः सुनुते सुन्वे । सुनुयात् सुन्वीत । सुनोतु सुनुताम् । असुनोत् असुनुत । असावीत् असविष्ट-असोष्ट । सुषाव सुषुवतुः सुषविथ सुषुव । सवितासि-से-सोतासि-से । सूयात् सविषीष्ट-सोषीष्ट । सविष्यति ते-सोष्यति ते । कर्म्मणि सूयते । असावि । णिचि सावयति ते असीषवत् त ।

32

कृत्सु । सवनीयम् । सवनम् । सवः । सावः । सावकः । सावी । सविता-सोता । सुतः । सुतिः । सवितुम्-सोतुम् । सवितव्यम्-सोतव्यम् । सुत्वा । वनिप् सुत्वा सुत्वानौ । अभिषुत्य । सव्यं साव्यम् । सुन्वन् सुन्वानः सूयमानः । सविष्यन् ष्यमाणः-सोष्यन् माणः कर्मणि साविष्यमाणश्च । अभि अभिषवे अभिषुणोति सोमं निष्पीडयति स्नाति वेत्यर्थः अभिषुतः ।

सू प्रसवे अदा० आत्म० सक० वेट् ।

कर्त्तरि सूते । सुवीत । सूताम् सुवै सुवावहै सुवामहै । असूत । असविष्ट-असोष्ट । सुषुवे सुषुविषे-सुषूषे । सोता-सविता । सविषीष्ट-सोषीष्ट । कर्मणि । सूयते । असावि । णिचि सावयवि ते असीषवत् त ।

कृत्सु । सवनीयम् । सवनम् । सवः । सावकः । सावी । सविता-सोता । सूनः । सूतिः । सवितव्यम्-सोतव्यम् । सवितुम्-सोतुम् । सूत्वा । प्रसूय । सव्यम् साव्यम् । सुवानः सूयमानः । सविष्यमाणः सोष्यमाणः कर्मणि साविष्यमाणश्च ।

सू प्रसवे दिवा० आत्म० सक० वेट् ।

कर्त्तरि सूयते । असविष्ट-असोष्ट । सुषुवे सुषुविषे-सुषूषे । सोता-सविता । अन्यत् सर्व्वं स्वादिगणीयवत् । निष्ठायां सूनः । सूनवान् । शानचि । सूयमानः इति भेदः ।

सूच सूचने अद०चुरा० उभ० सक० सेट् ।

कर्त्तरि सूचयति ते । असुसूचत् त । कर्मणि सूच्यते असूचि असूचिषाताम् असूचयिषाताम् ञतम् । सूचनीयम् । सूचनम् । सूचकः । सूची । सूचयिता । सूचितः । सूचना । सूचयितव्यम् । सूचयितुम् । सूचयित्वा । संसूच्य । सूच्यम् । सूचयन् मानः सूच्यमानः । सूचयिष्यन् ष्यमाणः कर्मणि सूचिष्यमाणश्च ।

सूद आश्रये हनने च चुरा० उभ० अक० सेट् ।

कर्त्तरि सूदयति ते । असूषुदत् त । कर्मणि सूद्यते । असूदि असूदिषाताम् असूदयिषाताम् । ञतम् । सूदनीयम् । सूदनम् । मधुसूदनः । बलसूदनः । सूदकः । सूदी । सूदयिता । सूदितः । सूदना । सूदयितव्यम् । सूदयितुम् । सूदयित्वा । संसूद्य । सूद्यम् । सूदयन् मानः सूद्यमानः । सूदयिष्यन् ष्यमाणः कर्मणि सूदिष्यमाणश्च ।

सृ गतौ भ्वा० पर० सक० अनिट् ।

कर्त्तरि सरति । सरेत् । सरतु । असरत् । असरत् असार्षीत् । ससार ससर्थ सस्रिव । सर्त्तासि । स्रियात् । सरिष्यति । कर्मणि स्रियते । असारि । णिचि सारयति ते असीसरत् त । सनि सुसूर्षति ।

कृत्सु सरणीयम् । सरणम् । सरः । अभिसारः । सारकः । सारी । सर्त्ता । सृतः । सृतिः । सर्त्तव्यम् । सर्त्तुम् । सृत्वा । उपसृत्य । सार्य्यम् । सरन् स्रियमाणः । सरि-ष्यन् ष्यमाणः कर्म्मणि सारिष्यमाणस्च । प्र—प्रसारे प्रसरति प्रसृतः प्रसारः । अप—अपसरणे अपसरति अपसृतः अपसरणम् अपसारः । सम्-संसरणे (स्वादृष्टजन्यदेहधारणे) संसरति संसृतिः संसारः । अनु—अनुसरणे । अनुसरति अनुसृतः अनुसरणम् अनुसारः । वि—विस्तारे विसरति विसृतः विसरणम् विसारः । अभि अभिसारे (कान्तार्थितया संकेतस्थान-गमने । अभिसरति अभिसारिका अभिसारः । उद्—उत्सरणे (दूरीभवने) अक० उत्-सरति उत्सृतः उत्सरणम् । णिचः उत्सारयति ते उत्सारितः उत्सारणा ।

सृज विसर्गे तुदा० पर० सक० अनिट् ।

कर्त्तरि सृजति । परिसृजति । सृजेत् । सृजतु । असृजत् । अस्राक्षीत् । ससर्ज ससर्जिथ-सस्रष्ठ ससृजिव । स्रष्टा । सृज्यात् । स्रक्ष्यति । कर्म्मणि सृज्यते असर्जि असृक्षाताम् । णिचि सर्जयति असीसृजत्-त अससर्ज्जत्-त । सनि सिसृक्षति । श्रद्धान्विते कर्त्तरि आत्मनेपदी दैवादिकसृजवत् सृज्यते इत्यादि तनि चिण् च असर्जि ।

कृत्सु सर्जनीयम् । सर्जनम् । सर्गः । घिणुन् संसर्गी । स्रष्टा । सृष्टः । सृष्टिः । स्रष्टव्यम् ।

स्रष्टुम् । सृष्ट्वा । विसृज्य । सर्ग्यम् सृज्यम् । सृजन् सृज्यमानः । स्रक्ष्यन् क्ष्यमाणः । सम्
संसर्गे दिवादि० अक० संसृज्यते । उद्-दाने सक० उत्सृजति उत्सर्गः उत्सृष्टः ।

सृप गतौ भ्वा० पर० सक० अनिट् ।

कर्त्तरि सर्पति अभिसर्पति । सर्पेत् । सर्पतु । असर्पत् । अस्राप्सीत्-असार्प्सीत्-असृपत् । ससर्प ससर्पिथ ससृपिव । स्रप्ता-सर्प्ता । सृप्यात् । सर्प्स्यति स्रप्स्यते । कर्मणि सृप्यते । असर्पि असर्पिषाताम्-असृप्साताम् । णिचि सर्पयति-ते असीसृपत्-त-अससर्पत्-त ।

कृत्सु सर्पणीयम् । सर्पणम् । सर्पः । सर्पी । स्रप्ता-सर्प्ता । सृप्तः । सृप्तिः । सर्प्तव्यम्-स्रप्तव्यम् । सर्प्तुम्-स्रप्तुम् । सृप्त्वा । संसृप्य । सृप्यम् । सर्पन् सृप्यमाणः । स्रप्स्यन् मानः-सर्प्स्यन्-मानः । उद्-उल्लङ्घने उत्सर्पति । अप-अपयाने अपसर्पति । सम्-समन्तात् गतौ व्याप्तौ च संसर्पति ।

सो नाशे दिवा० पर० अक० अनिट् ।

कर्त्तरि स्यति परिष्यति । स्येत् । स्यतु । अस्यत् । असात् असासीत् । ससौ ससिथ—ससाथ ससिव । साता । सेयात् । सास्यति । भावे सीयते । असायि असायिषाताम्-असासाताम् । णिचि सापयति-ते असीषपत्-त ।

कृत्सु । सानीयम् । सानम् । सायः । सायकः । सायी । साता । सितः । सितिः । सातव्यम् ।

सातुम् । सित्वा । अवसाय । सेयम् । स्यन् । सास्यन् । अव-समाप्तौ अवस्यति अवसायः अवसानम् । वि-अव उद्यमे बोधे च सक० व्यवस्यति व्यवसीयते व्यवसायः । अनु-वि-अव-बुद्धस्य पुनर्बोधे अनुव्यवस्यति अनुव्यवसायः ।

स्कन्द गतौ शोषणे च भ्वा० पर० सक० अनिट् ।

कर्त्तरि स्कन्दति । स्कन्देत् । स्कन्दतु । अस्कन्दत् । अस्कदत् अस्कांत्सीत् । चस्कन्द । स्कन्तासि । स्कद्यात् । स्कंत्स्यति । कर्म्मणि स्कद्यते । अस्कन्दि । चस्कदे चस्कन्दे । णिचि स्कन्दयति-ते अचस्कन्दत् त ।

कृत्सु स्कन्दनीयम् । स्कन्दनम् । स्कन्दः । स्कन्दी । स्कन्दकः । स्कन्ता । स्कन्नम् । स्कन्तिः । स्कन्तव्यम् । स्कन्तुम् । स्कन्त्वा । आस्कन्द्य । स्कन्द्यम् । स्कन्दन् स्कद्यमानः । आ—आस्कन्दने आप्लुत्य गतौ इदित् तेन न नलोप आत्म० आस्कन्दते आस्कन्दितम् । आचस्कन्दे । आस्कन्द्यते । अव-अवरोधने अवस्कन्दति । अवस्कन्दः ।

स्खल चलने भ्वा० पर० सक० सेट् वा घटादि ।

कर्त्तरि स्खलति । अस्खालीत् । चस्खाल । भावे । स्खल्यते । अस्खालि । णिचि स्खलयति ते स्खालयति ते ।

कृत्सु स्खलनीयम् । स्खलनम् । स्खालः । स्खालकः । स्खलिता । स्खलितः । स्खलितव्यम् । स्खलितुम् । स्खलित्वा । स्खलन् स्खलिष्य-न् ष्यमाणः ।

स्तन्भ स्तम्भने सौत्रः पर० सक० सेट् ।

कर्त्तरि स्तभ्नाति—स्तभ्नोति स्तभ्नुतः—स्तभ्नीतः स्तभ्नुवन्ति--स्तभ्नन्ति स्तभ्नीयात्—स्तभ्नुयात् । स्तभ्नातु—स्तभ्नोतु । अस्तभ्नोत्—अस्तभ्नात् । अस्तभत्--अस्तम्भीत् । तस्तम्भ । तस्तभतुः—तस्तम्भतुः । स्तम्भिता । स्तभ्यात् । कर्म्मणि स्तभ्यते । अस्तम्भि णिचि स्तम्भयति ते । अतस्तम्भत् त । विष्टभ्नाति व्यष्टभत् । णिचः व्यतस्तम्भत्-त ।

कृत्सु स्तम्भनीयम् । स्तम्भनम् । स्तम्भः । स्तम्भकः । स्तम्भी । स्तम्भिता । स्तब्धः । स्तब्धिः । स्तम्भितव्यम् । स्तम्भितुम् । स्तम्भित्वा स्तब्ध्वा । स्तम्भम् । स्तभ्नन् स्तभ्नुवन् । स्तभ्यमानः स्तम्भिष्यन् ष्यमाणः ।

ष्टु स्तवने अदा० उभ० सक० अनिट् । तादावार्द्धधातुके वेडित्यन्ये ।

कर्त्तरि स्तौति स्तवीति । स्तुवीतः । मतान्तरे स्तुतः । अस्तौत् न्यस्तौत् न्यष्टौत् पक्षे ईट् एवं वेः परेस्मै । अस्तौषीत् अस्तुत । तुष्टाव । तुष्टविथ-तुष्टोथ तुष्टुविव तुष्टुवे । स्तोतासिसे-स्तवि-

ताध्विसे। स्तूयात् स्तोषीष्ट। स्तोष्यति-ते। कर्म्मणि स्तूयते। अस्तावि णिचि स्तावयति-ते
अतुष्टवत्-त।
कृत्सु स्तवनीयम्। स्तवनम्। स्तवः। स्तावकः। स्तावी। स्तविता स्तोता। स्तुतः। परिष्टुतः।
स्तुतिः। स्तोतव्यम्—स्तवितव्यम्। स्तुत्वा। प्रस्तुत्य। स्तुत्यम्। स्तुवन् स्तूयमानः। स्तोष्यन्
ष्यमाणः कर्मणि स्ताविष्यमाणश्च। प्र—प्रस्तावे प्रस्तवीति प्रस्तुतः। प्रस्तावः।

स्तृ आवरणे स्वादि० उभ० सक० अनिट्।

कर्त्तरि स्तृणोति स्तृणुतः स्तृण्वन्ति स्तृणवः स्तृणुवः स्तृणुते। स्तृणुयात् स्तृण्वीत। स्तृणोतु
स्तृणुताम्। अस्तृणोत् अस्तृणुत। अस्तार्षीत् अस्तृत। तस्तार तस्तरतुः तस्तर्थ तस्तरिव
तस्तरे। स्तर्त्तासि-से। स्तर्य्यात् स्तृषीष्ट। स्तरिष्यति ते। कर्म्मणि स्तर्य्यते। अस्तारि
अस्तारिषाताम्-अस्तृषाताम्। णिचि स्तारयति ते अतस्तरत्-त। यङि तास्तर्य्यते।
कृत्सु स्तरणीयम्। स्तरणम्। स्तरः। विष्टरः आसने संस्तरः अवस्तरः। विस्तरः शब्दसमूहे
अन्यत्र विस्तारः। स्तारकः। स्तारी। स्तर्त्ता। स्तृतः। स्तृतिः। स्तर्त्तव्यम्। स्तृत्वा। विस्तृत्य।
स्तार्य्यम्। स्तृण्वन् स्तृण्वानः स्तर्य्यमाणः। स्तरिष्य-न् ष्यमाणः कर्मणि स्तारिष्यमाणश्च।
वि—विस्तारे विस्तृणाति विस्तरः। सम्-संस्तरे संस्तृणाति संस्तृतः।

स्था गतिनिरोधे भ्वा० अक० पर० अनिट् ।

कर्त्तरि तिष्ठति । तिष्ठेत् । तिष्ठतु । अतिष्ठत् । अस्थात् व्यष्ठात् । तस्थौ नितष्ठौ । स्थाता । स्थेयात् । स्थास्यति । भावे । स्थीयते । अस्थायि । णिचि स्थापयति-ते निष्ठापयति । अतिष्ठिपत्-त । सनि तिष्ठासति यङि तेष्ठीयते ।

कृत्सु स्थानीयम् । स्थानम् । स्थायः । स्थायी । स्थाता । स्थितः । स्थितिः । आस्था । स्थातव्यम् । स्थातुम् । स्थित्वा । स्थेयम् । तिष्ठन् । स्थास्यन् । क्वसु तस्थिवान् वितष्ठिवान् । क्नु स्थास्नुः । प्रति-प्रतिज्ञायाम् निर्णयार्थावलम्बने स्वाभिप्रायप्रकाशने च आत्म० पृथिव्यां गन्धमातिष्ठते प्रतिजानाति । विवादे संशय्य तिष्ठते निर्णयार्थमवलम्बते । पत्ये तिष्ठते कामिनी पतिमुद्दिश्य स्वाभिप्रायं प्रकाशयति । सम् वि-अव-आत्म० संतिष्ठते वितिष्ठते अवतिष्ठते । प्र-प्रस्थाने आत्म० प्रतिष्ठते । प्रति-प्रतिष्ठायां प्रतितिष्ठति प्रतिष्ठितः । अधि-अधिष्ठाने अधितिष्ठति अधिष्ठितः । उद्-उत्थाने उत्तिष्ठति अनूर्द्ध्वचेष्टायान्तु आत्म० विद्यायामुत्तिष्ठते यतते इत्यर्थः ।

स्ना शौचे अदा० पर० सक० अनिट् ।

कर्त्तरि स्नाति अभिस्नाति । स्नायात् । स्नातु । अस्नात् । अस्नासीत् । सस्नौ सस्निथ-सस्नाथ ।

स्नाता। स्नेयात्--स्नायात्। स्नास्यति। भावे स्नायते। अस्नायि। णिचि स्नापयति-ते वा घटादित्वे स्नपयति-ते। असिष्णपत्।

कृत्सु स्नानीयम्। स्नानम्। स्नायः। स्नायकः। स्नायी। स्नाता। स्नातः अभिष्णातः निष्णातः। नदीष्णातः कुशले। स्नातिः। स्नातव्यम्। स्नातुम्। स्नात्वा। उपस्नाय। स्नेयम्। स्नान् स्नास्यन्

स्निह प्रीतौ दिवा० पर० अक० वेट्।

कर्त्तरि। स्निह्यति परिस्निह्यति। स्निह्येत्। स्निह्यतु। अस्निह्यत्। अस्निहत्। सिष्णेह। स्नेहिता--स्नेढा। स्निह्यात्। स्नेहिष्यति--स्नेक्ष्यति। भावे स्निह्यते। अस्नेहि। णिचि स्नेहयति-ते असिष्णिहत्-त।

कृत्सु स्नेहनीयम्। स्नेहनम्। स्नेहः। स्नेही। स्नेहिता--स्नेढा। स्नीढः। स्नेहितव्यम्--स्नेढव्यम्। स्नीढ्वा। संस्निह्य। स्नेह्यम्। स्निह्यन्। स्नेहिष्यन्--स्नेक्ष्यन्। उद् क्विप् नि० उष्णिक्।

स्नु चरणे अदा० पर० अक० सेट्।

कर्त्तरि स्नौति परिस्नौति स्नुतः स्नुवन्ति। स्नुयात्। स्नौतु। अस्नौत्। अस्नावीत्। सुष्णाव सुष्णविथ सुष्णविव। स्नविता। स्नूयात्। स्नविष्यति। भावे स्नूयते। अस्नावि। णिचि स्नावयति-ते असुष्णवत्-त।

स्नविता । स्नुतः परिष्णुतः । स्नुतिः ।
कृतस् स्नवनीयम् । स्नवनम् । स्नवः । स्नावकः । स्नावी । स्नविता । स्नुतः परिष्णुतः । स्नुतिः ।
स्नवितव्यम् । स्नवितुम् । स्नुत्वा । अपस्नुत्य । स्नाव्यम् । स्नव्यम् । स्नुवन् । स्नविष्यन् ।

स्पन्द ईषत्कम्पे भ्वा० आत्म० अक० सेट् ।

कर्त्तरि स्पन्दते । अस्पन्दिष्ट । पस्पन्दे । भावे स्पद्यते अस्पन्दि । णिचि पर० स्पन्दयति । अपस्पन्दत् ।
कृतस् स्पन्दनीयम् । स्पन्दनम् । स्पन्दः । स्पन्दकः । स्पन्दी । स्पन्दिता । स्पन्दितः । स्पन्दा ।
स्पन्दितव्यम् । स्पन्दितुम् । स्पन्दित्वा । निस्पद्य । स्पन्द्यम् । स्पन्दमानः स्पन्दिष्यमाणः ।
निस् निस्पन्दे । निस्पन्दते निस्पन्दः ।

स्पर्द्ध हर्षे भ्वा० आत्म० अक० सेट् ।

कर्त्तरि स्पर्द्धते । अस्पर्द्धिष्ट । पस्पर्द्धे । स्पर्द्धिष्यते । भावे स्पर्द्ध्यते । अस्पर्द्धि । णिचि स्पर्द्ध-
यति-ते अपस्पर्द्धत् त ।
कृतस् स्पर्द्धनीयम् । स्पर्द्धनम् । स्पर्द्धः । स्पर्द्धकः । स्पर्द्धी । स्पर्द्धिता । स्पर्द्धितः । स्पर्द्धा ।
स्पर्द्धितव्यम् । स्पर्द्धितुम् । स्पर्द्धित्वा । आस्पर्द्ध्य । स्पर्द्ध्यम् । स्पर्द्धमानः । स्पर्द्धिष्यमाणः ।
आ—आस्फालने आस्पर्द्धते । आस्पर्द्धा ।

स्पृश स्पर्शने तु० पर० सक० अनिट् ।

कर्त्तरि स्पृशति । स्पृशेत् । स्पृशतु । अस्पृशत् । अस्प्राक्षीत्--अस्पार्क्षीत्-अस्पृक्षत् । पस्पर्श पस्पर्शिथ पस्पृशिव । स्प्रष्टा--स्पर्ष्टा । स्पृश्यात् । स्प्रक्ष्यति--स्पर्क्ष्यति । कर्म्मणि स्पृश्यते । अस्पर्शि । णिचि स्पर्शयति-ते अपस्पर्शत्-त अपस्पृशत्-त । णिजन्तस्तु दानेऽर्थेऽपि ।

कृत्सु स्पर्शनीयम् । स्पर्शनम् । णिचः स्पर्शनम् दानमित्यर्थः । स्पर्शः । स्पर्शकः । स्पर्शी । स्प्रष्टा- स्पर्ष्टा । स्पृष्टः । स्पृष्टिः । स्प्रष्टव्यम्-स्पर्ष्टव्यम् । स्प्रष्टुम्--स्पर्ष्टुम् । स्पृष्ट्वा । उपस्पृश्य । स्पर्शम् । स्पृशन् स्पृश्यमानः । स्प्र-स्पर्क्ष्यन् क्ष्यमाणः स्पर्क्ष्यमाणः । उप आचमने उपस्पृशति ।

स्पृह इच्छायाम् अदन्त चुरा० उभ० सक० सेट् ।

कर्त्तरि स्पृहयति-ते । अपस्पृहत्-त । कर्म्मणि स्पृह्यते । अस्पृहि ।

कृत्सु स्पृहणीयम् । स्पृहणम् । स्पृहकः । स्पृहयिता । स्पृहितः । क्तिन् आत्वि च स्पृहा । स्पृहयितव्यम् । स्पृहयितुम् । स्पृहयित्वा । उपस्पृह्य । स्पृहम् । स्पृहय-न् माणः स्पृह्यमाणः । स्पृहयि ष्यन् ष्यमाणः । कर्मणि स्पृहिष्यमाणस्तु ।

स्फुट विदारणे प्रकाशे च तु० पर० अक० अनिट् कुटादि ।

कर्त्तरि स्फुटति । अस्फुटीत् । पुस्फोट । भावे स्फुट्यते अस्फोटि । णिचि स्फोटयति-ते ।

कृत्सु स्फुटनीयम् । स्फुटनम् । स्फोटः । स्फोटकः । स्फोटी । स्फुटिता । स्फुटितः स्फुटिः ।
स्फुटितव्यम् । स्फुटितुम् । स्फुटित्वा । संस्फुट्य । स्फुटन् स्फुटिष्यन् ।

स्फुर स्फूर्त्तौ तुदा० पर० अक० सेट् कुटादि ।

कर्त्तरि स्फुरति सर्वं स्फुटवत् । नि-वि वा षत्वम् निष्फुरति निस्फुरति विस्फ(ष्फ)रति इतिभेदः। एवं स्फुल

स्मि विस्मये भ्वा० आत्म० अक० अनिट् ।

कर्त्तरि स्मयते विस्मयते । अस्मेष्ट । सिष्मिये । भावे स्मीयते । अस्मायि । णिचि स्माययति कर्त्तृतो
विस्मये आत्म० अच आत् पुक् च विस्मापयते ।

कृत्सु । स्मयनीयम् । स्मयनम् । स्मयः। स्मायकः । इनि स्मायी विस्मयी । स्मेता । स्मितः। स्मितिः।
स्मेतव्यम् । स्मित्वा । विस्मित्य । स्मेयम् । स्मयमानः । स्मेष्यमाणः ।

स्मृ स्मरणे भ्वा० पर० सक० अनिट् घटादिर्वा ।

कर्त्तरि स्मरति । स्मरेत् । स्मरतु । अस्मरत् । अस्मार्षीत् । सस्मार सस्मरतुः सस्मर्थ सस्मरिव ।
स्मर्त्ता । स्मियात् । स्मरिष्यति । कर्मणि स्मर्य्यते । अस्मारि । णिचि स्मारयति-ते असस्म-
रत्-त । घटादिपक्षे स्मरयति इति भेदः ।

कृत्सु स्मरणीयम् । स्मरणम् । स्मरः । स्मारकः । स्मारी । स्मर्त्ता । स्मृतः । स्मृतिः । स्मर्त्त-

व्यम् । स्मर्त्तुम् । विस्मृत्य । स्मार्य्यम् । स्मरन् । स्मर्य्यमाणः । स्मरिष्यन् ष्यमाणः । कर्मणि स्मारिष्यमाणस्य । वि—विस्मरणे विस्मरति । विस्मृतिः विस्मरणम् ।

स्यन्द क्षरणे स्वा० आत्म० अक० वेट् इतादि लुङि ऌटि ऌङि च उभ० ।

कर्त्तरि स्यन्दते निष्यन्दते--निस्यन्दते घृतम् । एवं परि-निर्-वि-अभि-अनु वा षत्वम् । निस्यन्दते हस्ती । निस्यन्देते मत्स्योदके । अस्य-दत् अस्यन्दिष्ट--अस्यन्त । सस्यन्दे--सस्यदे । स्यन्दितासे--स्यन्तासे । स्यन्दिषीष्ट--स्यन्त्सीष्ट । सन्त्स्यति स्यन्दिष्यते । अस्यन्त्स्यत् अस्यन्दिष्यत । भावे स्यद्यते । अस्यन्दि । णिचि स्यन्दयति-ते । असिस्यन्दत्-त ।

कृत्सु स्यन्दनीयम् । स्यन्दनम् । स्यन्दः । स्यन्दकः । स्यन्दी । निष्यन्दी । स्यन्दिता--स्यन्ता । स्यन्नः । स्यन्तिः । स्यन्दितव्यम्-स्यन्तव्यम् । स्यन्दितुम्-स्यन्तुम् । स्यन्त्वा । निष्यन्द्य । स्यन्द्यम् । स्यन्दमानः । स्यत्स्यन् स्यन्दिष्यमाणः ।

स्रन्स स्रंसे स्वा० आत्म० अक० सेट् ।

कर्त्तरि स्रंसते । लुङि उभ० अस्रसत् अस्रंसिष्ट । सस्रंसे--सस्रसे । स्रंसिषीष्ट । स्रंसिष्यते । भावे स्रस्यते । अस्रंसि । णिचि स्रंसयति-ते असस्रंसत्-त ।

कृत्सु स्रंसनीयम् । स्रंसनम् । स्रंसः । स्रंसकः । स्रंसी । स्रंसिता । स्रस्तः । स्रस्तिः ।

स्वंसितुम् । स्वंसितव्यम् । सुंसित्वा स्वस्त्वा । विस्रस्य । स्वंस्यम् । स्वंसमानः स्वंसिष्यमाणः ।

स्वन्ज आलिङ्गने भ्वादि० आत्म० सक० अनिट् ।

कर्त्तरि स्वजते विष्वजते अस्वङ्क्त न्यष्वङ्क्त--न्यस्वङ्क्त एवं वेः । सस्वजे--सस्वञ्जे विषस्वजे । स्वङ्क्ताहे । स्वङ्क्षीच । स्वङ्क्ष्यते । कर्म्मणि स्वज्यते । अस्वञ्जि । णिचि स्वञ्जयति-ते असिष्वञ्जत्-त ।

कृत्सु स्वञ्जनीयम् । स्वञ्जनम् । स्वङ्गः । निष्वङ्गः । स्वञ्जकः । घिणुन् परिष्वङ्गी । स्वङ्क्ता । स्वक्तः । सङ्क्तव्यम् । स्वङ्क्तुम् । स्वक्त्वा । परिष्वज्य । स्वजमानः । स्वज्यमानः । स्वङ्क्ष्यमाणः ।

स्वप शयने अदादि० पर० अक० अनिट् जक्षादिः रुदादिश्च ।

कर्त्तरि स्वपिति स्वपितः स्वपन्ति स्वपिषि स्वपिथः स्वपिथ स्वपिमि स्वपिवः । स्वप्यात् । स्वपितु स्वपिताम् स्वपन्तु स्वपिहि । अस्वपीत् अस्वपत् अस्वपिताम् अस्वपन् अस्वपीः अस्वपः । अस्वाप्सीत् । विसुष्वाप । सुषुपतुः । विसुष्वाप विषुषुपतुः सुष्वपिथ-सुष्वप्थ सुषुपिव । स्वप्ता । सुप्यात् । स्वप्स्यति । भावे सुप्यते । अस्वापि । णिचि स्वापयति-ते असिष्वपत्-त । सनि सुषुप्सति । णिचः सनि सुष्वापयिषति ते ।

कृत्सु स्वपनीयम् । स्वपनम् । स्वापः । स्वापकः । स्वापी । स्वप्ता । सुप्तः । सुषुप्तः । सुप्तिः । स्वप्तव्यम् । स्वप्तुम् । सुप्त्वा । विषुप्य स्वप्यम् । स्वपन् स्वप्स्यन् । न स्वप्नः नज् स्वप्नक् ।

हस हासे भ्वादि० पर० अक० सेट् ।

कर्त्तरि हसति । हसेत् । हसतु । अहसत् । अहसीत् । जहास ।। भावे हस्यते । अहासि ।

णिचि हासयति-ते अजीहसत्-त ।

कृत्सु । हसनीयम् । हसनम् । हासः । हासकः । हसिता । हसितः । हस्तिः । हसितव्यम् । हसितुम् । हसित्वा । उपहस्य । हास्यम् । हसन् । हसिष्यन् । उप उपहासे (हास्यपूर्व-कनिन्दने) सक० उपहसति उपहास्यः उपहसितः ।

हा त्यागे जुहो० पर० सक० अनिट् ।

कर्त्तरि जहाति जहीतः--जहितः जहति जहासि जहीथ--जहिथ जहामि जहीवः--जहिवः । जह्यात् । जहातु जहीताम्--जहिताम्--जहतु जहीहि--जहिहि--जहाहि । अजहात् । अहासीत् । जहौ जहतुः जहिथ--जहाथ । हाता । हीयात् । हास्यति । कर्मणि हीयते अहायि । णिचि हापयति-ते अजीहपत्-त ।

कृत्सु हानीयम् । हानम् प्रहाणम् । हायनो व्रीहिर्वर्षं च । हायः । हायकः । हायी । हाता । हीनः । हानिः । हातव्यम् । हातुम् । हित्वा । प्रहीय । हेयम् । जहत् हीयमानः । हा-स्यन् स्यमानः । कर्मणि हायिष्यमाणम् ।

हन हिंसायां गतौ च अदा॰पर॰सक॰अनिट्। [अयं प्रमादादत्र पठितः हसः प्राक् बोध्यः।
कर्त्तरि हन्ति प्रणिहन्ति हतः घ्नन्ति हंसि हथः हथ हन्मि प्रहण्वः—प्रहन्वः प्रहण्मः—प्रहन्मः। हन्यात्। हन्तु हताम् घ्नन्तु जहि। अहन् अहताम् अघ्नन्। अवधीत् अवधिष्टाम् अवधिषुः। जघान जघ्नतुः जघ्नुः जघनिथ-जघन्थ जघ्निव। हन्ता। वध्यात्। हनिष्यति।
कर्मणि हन्यते। अवधि--अघानि अघानिषाताम्--अवधिषाताम्। जघ्ने। घानिता--अवधिषाताम्--हन्ता। वधिषीष्ट। घानिष्यते--हनिष्यते। णिचि घातयति-त अजीघतत्-त। सनि जिघांसति। यङि जेघ्नीयते जंघन्यते।
कृत्सु हननीयम्। हननम्। वधः। घातः। उ तमोपहः शोकापहः। क शत्रुघ्नः रोगघ्नः। घातकः। घाती। उकञ् घातुकः। हन्ता। हतः। हतिः। हन्तव्यम्। हन्तुम्। हत्वा। प्रहत्य। घात्यम्। घ्नन् शतृ निघ्नानः हन्यमानः। हनिष्यन् ष्यमाणः कर्मणि घानिष्यमाणश्च। क्विप् ष्टत्रहा। क्वसु जघ्निवान् जघन्वान्। परा पराहतौ पराहन्ति पराहतः पराहतिः। सम्—संघाते संहन्ति संहतः संघातः। वि—विघाते विहन्ति विहन्यते विहतः विघातः। उद्—उद्घाते उद्घन्ति उद्घतः उद्घातः। प्रति—प्रतिघाते प्रतिहन्ति प्रतिहन्यते प्रतिहतः प्रतिघातः। अभि—आ—आघाते अभिहन्ति अभिहतः अभिघातः

आघ्नन्ति । आहतः आघातः । वि—आ—व्याघाते व्याघ्नन्ति व्याहतः व्याघातः ।

हा गतौ जुहो॰ आत्म॰ सक॰ अनिट् ।

कर्त्तरि जिहीते जिहाते जिहते । जिहीषे जिहाथे जिहीध्वे जिहे । जिहीत । जिहीताम् । अजिहीत । अहास्त । जहे । हातासे । हासीष्ट । हास्यते । कर्म्मणि हायते । अहायि ।

णिचि हापयति-ते अजीहपत्-त ।

कृत्सु हानम् । हानिः । हात्वा । प्रहाय । हेयम् । जिहानः हायमानः । हास्यमानः । कर्म्मणि हायिष्यमाणश्च । इति भेदः अन्यत् पूर्व्ववत् उद्—उदये उज्जिहीते उज्जिहानः ।

हि वर्द्धने गतौ स्वा॰ पर॰ सक॰ अनिट् ।

कर्त्तरि हिनोति प्रहिणोति हिनुतः हिन्वन्ति हिनोषि हिन्वः हिनुवः । हिनुयात् । हिनोतु । हिनु हिनवानि । अहिनोत् । अहैषीत् । जिघाय जिघ्यतुः जिघयिथ—जिघेथ । हेता । हीयात् । हेष्यति । कर्म्मणि हीयते । अहायि । णिचि हाययति-ते अजीहयत्-त ।

कृत्सु हयनीयम् । हयनम् । हयः । हायकः । हायी । हेता । हितः । हितिः । हेतुम् । हेतव्यम् । हित्वा । संहित्य । हेयम् । हिन्वन् हीयमानः । हे-ष्यन् ष्यमाणः । कर्म्मणि हायिष्यमाणश्च ।

प्र—प्रेरणे प्रहिणोति प्रहितः ।

हिसि हिंसने वा चुरा० उभय० पक्षे रुधा० पर० सक० सेट् इदित्।

कर्त्तरि हिंसयति-हिनस्ति हिंसयतः-हिंस्तः हिंसयते। हिंसयेत्-त हिंस्यात्। हिंसयतु तात्-हिनस्तु। हिंसय-स्व हिंसान। अहिंसयत्-त अहिनः। अजिहिंसत्-त अहिंसीत्। हिंसयाम्-बभूव आस चकार जिहिंस। हिंसयितासि-से हिंसितासि। कर्म्मणि हिंस्यते अहिंसि। अहिंसिषाताम्। अहिंसयिषाताम्।

कृत्सु हिंसनीयम्। हिंसनम्। हिंसः। हिंसकः। हिंसी। हिंसयिता हिंसिता। हिंसितः। हिंसना हिंसा। हिंसयितव्यम् हिंसितव्यम्। हिंसयितुम् हिंसितुम्। हिंसयित्वा हिंसित्वा। उपहिंस्य। हिंस्यम्। हिंसय-न्-मानः हिंसन् हिंस्यमानः। हिंसयि-ष्यन्-ष्यमाणः हिंसिष्यन् ष्यमाणः।

हु होमे जु० पर० सक० अनिट्।

कर्त्तरि जुहोति जुहुतः जुह्वति जुहोषि जुहुथः जुहोमि जुहुव। जुहुयात्। जुहोतु जुहुतात् जुहुधि जुहवानि। अजुहोत्। अहौषीत्। जुहाव जुहुवतुः जुहविथ-जुहोथ जुहुविव। पक्षे जुहवाम् बभूव-आस-चकार इत्यादि। होता। हूयात्। होष्यति। कर्म्मणि हूयते। अहावि। णिचि हावयति ते अजूहवत्-

कृत्सु हवनीयम् । हवनम् । हवः । हावः । हावकः । हावी । अपि हविः । हुत्वा होतुम् । होता ।
हुतः । हुतिः । होतव्यम् । हुत्वा । प्रहुत्य । हव्यम् हाव्यम् । जुह्वत् ह्वयमाणः ।
हो-ष्यन् ष्यमाणः कर्मणि हाविष्यमाणश्च ।

हृ हरणे भ्वा० उभय० द्विक० अनिट् ।

कर्त्तरि हरति-ते । हरेत्-त । हरतु-ताम् । अहरत्-त । अहार्षीत् अहृत । जहार जह्रतुः
जहर्थ जह्रिव जह्रे । हर्त्तासि-से । ह्रियात् हृषीष्ट । हरिष्यति-ते । कर्मणि ह्रियते । अहारि
अहारिषाताम् अहृषाताम् । णिचि हारयति-ते अजीहरत्-त । सनि जिहीर्षति-ते ।
कृत्सु हरणीयम् । हरणम् । हरः । प्रहारः । मनोहरः । हारकः । नाथहरिः । हारी । हर्त्ता ।
हृतः । हृतिः । हर्त्तव्यम् । हर्त्तुम् । हृत्वा । प्रहृत्य । हार्य्यम् । हर-न् माणः ह्रियमाणः ।
हरि-ष्यन् ष्यमाणः । कर्मणि हारिष्यमाणश्च । प्र-प्रहारे प्रहरति प्रहृतः प्रहरणम् ।
अप अपहृतौ (दूरीकरणे) अपहरति अपहृतः । सम् संहारे (नाशने) संहरति संहृतः
संहारः । अनु—अनुकरणे अनुहरति अनुहरणम् गत्यनुकारे आत्म० अनुहरते । वि—
विहारे । विहरति विहृतः विहारः । आ—आहारे आहरति आहृतः आहरणम् ।
उद् उद्धारे उद्धरति उद्धृतः उद्धारः । सम् अभि साहित्यकरणे । समभिहरति समभिहृतः

वि-आ-कथने व्याहरति व्याहारः व्याहृतिः। अभि अव भोजने अभ्यवहरति अभ्यवहारः। अभ्यवहृतः। निर्—निर्हरणे निर्हरति निर्हारः।

हृष तुष्टौ दिवा० पर० अक० सेट्।

कर्त्तरि हृष्यति। हृष्येत्। हृष्यतु। अहृष्यत्। अहृषत् अहर्षीत्। जहर्ष जहृषतुः। हर्षिता। हृष्यात्। हर्षिष्यति। भावे हृष्यते। अहर्षि। णिचि हर्षय ति-ते। अजीहृषत्-त -अजहर्षत्-त। कृत्सु हर्षणीयम् हर्षणम्। हर्षः। हर्षकः। हर्षी। हर्षिता। हृषितः--हृष्टः। हृष्टिः। हर्षितव्यम् हृष्ट्वा। प्रहृष्य। हृष्यम्। हृष्यन् हर्षिष्यन्।

ह्नु चौर्य्ये अदा० आत्म० सक० अनिट्।

कर्त्तरि ह्नुते ह्नुवाते ह्नुवते। ह्नुवीत। ह्नुताम्। अह्नुत। अह्नोष्ट। जुह्नुवे। ह्नोतासे। ह्नोषीष्ट ह्नोष्यते। कर्मणि ह्नूयते। अह्नावि अह्नाविषाताम् अह्नोषाताम्। णिचि ह्नावयति-ते अजुह्नवत् त। कृत्सु ह्नवनीयम्। ह्नवनम्। ह्नवः। ह्नावकः। ह्नावी। ह्नोता। ह्नुतः। ह्नुतिः। ह्नोतव्यम्। ह्नुत्वा। प्रह्नुत्य। ह्नव्यम् ह्नाव्यम्। ह्नुवानः ह्नूयमानः। ह्नोष्यमाणः कर्मणि ह्नाविष्यमाणश्च। अप--अपलापे अपह्नुते अपह्नुतः। नि-गोपने निह्नुते निह्नवः।

ह्री लज्जायां जुहो० पर० अक० अनिट्।

कर्त्तरि जिह्रेति जिह्रीतः जिह्रियति जिह्रेषि जिह्रीथः जिह्रेमि। जिह्रीयात्। जिह्रेतु। अजिह्रेत्।

अह्वैषीत् । जिह्रियाञ्चभूव आस-चकार-जिह्राय । आमभाव पक्षे जिह्रियतुः जिह्रयिथ जिह्रेथ । ह्रेतासि । ह्रीयात् । ह्रेष्यति । भावे ह्रीयते । अह्रायि । णिचि ह्रेपयति-ते अजिह्रिपत् त । कृत्सु ह्रयणीयम् । ह्रयणम् । ह्रयः । ह्रायकः । ह्रायी । ह्रेता । ह्रीणः । ह्रीतिः । ह्रेतुम् ह्रीत्वा प्रह्रीय । ह्रेयम् । जिह्रियत् ह्रेष्यन् ।

ह्वे स्पर्द्धायाम् भ्वा० उभ० सक० अनिट् । यजादि ।

कर्त्तरि ह्वयति-ते । ह्वयेत्-त । ह्वयतु-ताम् । अह्वयत् त । अह्वत् अह्वत--अह्वास्त । जुहाव जुहुवतुः जुहविथ--जुहोथ जुहुवे । ह्वाता-सि-से । हूयात् ह्वासीष्ट । ह्वास्यति-ते । कर्मणि हूयते । अह्वायि अह्वायिषाताम् अह्वासाताम् । णिचि ह्वापयति ते अजूहवत् त । कृत्सु ह्वानीयम् । ह्वानम् । ह्वायकः । ह्वायी । ह्वाता । हूतः । हूतिः । ह्वातुम् । हूत्वा । आहूय । ह्वेयम् । ह्वयन् मानः हूयमानः । ह्वास्यन् स्यमानः । कर्मणि ह्वायिष्यमाणश्च । आ—आह्वाने आत्म० आह्वयते आह्वयमानः । आह्वानम् आहूतः । ओं तत्सत् ।

इति श्री तारानाथ तर्कवाचस्पति भट्टाचार्य्य विरचितः अकारादिहान्तवर्णादिक प्रसिद्धधातुरूपादर्शः समाप्तः ।

तेषां महार्हासनसंस्थिताना
मुदारनेपथ्यभृतां स मध्ये।
रराज धाम्ना रघुसूनुरेव
कल्पद्रुमाणामिव पारिजातः॥ ६ ॥
नेत्रव्रजाः पौरजनस्य तस्मिन्
विहाय सर्वान् नृपतीन्निपेतुः।
मदोत्कटे रेचितपुष्पवृक्षा
गन्धद्विपे वन्य इव द्विरेफाः॥ ७ ॥

तेषामिति। महार्हासनसंस्थितानां श्रेष्ठसिंहासनस्थानाम् उदारनेपथ्यभृताम् उज्ज्वलवेषधारिणां तेषां राज्ञां मध्ये कल्पद्रुमाणां मध्ये पारिजात इव सुरद्रुमविशेष इव। पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः। स रघुसूनुरेव धाम्ना तेजसा रराज। भृशमिति पाठेऽतिशयेनेत्यर्थः। अत्र कल्पद्रुमशब्दः पञ्चान्यतमविशेषवचनः उपकल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकतया प्रयुक्त इत्यनुसन्धेयम्। कल्पा इति द्रुमाः कल्पद्रुमा इति विग्रहः॥ ६ ॥

नेत्रेति। पौरजनस्य नेत्रव्रजाः सर्वान् नृपतीन् विहाय तस्मिन्नजे निपेतुः सर्व एव सर्वोत्कर्षेण ददृशे इत्यर्थः। कथमिव मदोत्कटे मदेनोद्भिन्नगण्डे निर्भरमदे वा वन्ये गन्धद्विपे गन्धप्रधाने द्विपे गजे रेचिता रिक्तीकृताः पुष्पाणां वृक्षाः यैस्ते त्यक्तपुष्पवृक्षा इत्यर्थः द्विरेफा भृङ्गा इव। द्विपस्य वन्यविशेषणं द्विरेफाणां पुष्पवृक्षत्यागसमाधानार्थं कृतम्॥ ७ ॥

अथ स्तुते वन्दिभिरन्वयज्ञैः
सोमार्कवंश्ये नरदेवलोके ।
सञ्चारिते चागुरुसारोयोनौ
धूपे समुत्सर्पति वैजयन्तीः ॥ ८ ॥

पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितोदिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥ ९ ॥

मनुष्यवाह्यं चतुरस्रयान
मध्यास्य कन्या परिवारशोभि ।

अथेति, पुरेति, मनुष्येति च त्रिभिर्विशेषकम् । अथ अन्वयज्ञैः राजवंशाभिज्ञैः वन्दिभिः स्तुतिपाठकैः । वन्दिनः स्तुतिपाठकाः इत्यमरः । सोमार्कवंश्ये सोमसूर्य्यवंशभवे नरदेवलोके स्तुते सति, त्रिवंशेत्युत्तरेण सम्बन्धः एवमुत्तरत्रापि योज्यम् । सञ्चारिते समन्तात् प्रचारितेऽगुरुसारोयोनिः कारणं यस्य तस्मिन् धूपे च वैजयन्तीः पताकाः समुत्सर्पति सति अतिक्रम्य गच्छति सति ॥ ८ ॥

किञ्च, पुरस्योपकण्ठे समीपे उपवनान्याश्रयोयेषां तेषां कलापिनां बर्हिणाम् उद्धतनृत्यहेतौ मेघध्वनिसादृश्यात्ताण्डवकारणे प्रध्माताः पूरिताः शङ्खा यत्र तस्मिन् मङ्गलार्थे मङ्गलप्रयोजनके तूर्य्यस्वने वाद्यघोषे परितः सर्व्वतः दिगन्तान् मूर्च्छति व्याप्नुवति सति ॥ ९ ॥

पतिं वृणोतीति पतिंवरा स्वयंवरा । अथ स्वयंवरा पतिंवरा च वर्य्येत्यमरः । संज्ञाया भृतॄवृजीत्यादिना खच् प्रत्ययः । कृतविवाह

विवेश मञ्चान्तरराजमार्गं
पतिंवरा क्लृप्तविवाहवेषा ॥ १० ॥
तस्मिन् विधानातिशये विधातुः
कन्यामये नेत्रशतैकलक्ष्ये।
निपेतुरन्तःकरणैर्नरेन्द्राः
देहैः स्थिताः केवलमासनेषु ॥ ११ ॥
तां प्रत्यभिव्यक्तमनोरथानां
महीपतीनां प्रणयाग्रदूत्यः।

वेषा कन्या इन्दुमती मनुष्यैर्वाह्यं परिवारेण परिजनेन शोभि चतुरस्रयानं चतुरस्रवाहनं शिविकामध्यास्य आरुह्य मञ्चान्तरे मञ्चमध्ये योराजमार्गस्तं विवेश ॥ १० ॥

तस्मिन्निति। नेत्रशतानामेकलक्ष्ये एकदृश्ये कन्यामये कन्यारूपे तस्मिन् विधातुर्विधानातिशये सृष्टिविशेषे नरेन्द्राः अन्तःकरणैर्निपेतुः आसनेषु देहैः केवलं देहैरेव स्थिताः देहानपि निःसृत्य तत्रैव दत्तचित्ता बभूवुरित्यर्थः। अन्तःकरणकर्तृके निपतने नरेन्द्राणां कर्तृत्वव्यपदेशः आदरातिशयार्थः ॥ ११ ॥

तामिति। तामिन्दुमतीं प्रति अभिव्यक्तमनोरथानां प्रकटाभिलाषाणां महीपतीनां राज्ञां प्रणयाग्रदूत्यः। प्रणयः प्रार्थना प्रेम वा। प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाण इत्यमरः। प्रणयेष्वग्रदूत्यः प्रथमदूतिकाः। प्रणयप्रकाशकत्वसाम्यात् दूतीत्वव्यपदेशः। विविधाः शृङ्गारचेष्टाः शृङ्गारविकाराः पादपानां प्रवालशोभाः पल्लवसम्पद इव बभूवुः उत्पन्नाः। अत्र शृङ्गारलक्षणं रससुधाकरे। निर्भादैरनु-

प्रवालशोभा इव पादपानां
शृङ्गारचेष्टा विविधा बभूवुः ॥ १२ ॥

कश्चित् कराभ्यामुपगूढनाल
मालोलपत्राभिहतद्विरेफम्।
रजोभिरन्तः परिवेषबन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥ १३ ॥

भावैश्च स्वोचितैर्व्यभिचारिभिः। नीता सदस्यरस्यत्वं रतिः शृङ्गार उच्यते। रतिरिच्छाविशेषः तच्चोक्तं तत्रैव। यूनोरन्योन्यविषयस्थायिनीच्छा रतिः स्मृतेति। चेष्टाशब्देन तदनुभावविशेषा उच्यन्ते तेऽपि तत्रैवोक्ताः। 'भावं मनोगतं साक्षात् स्वहेतुं व्यञ्जयन्ति ये। तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः। ते चतुर्द्धा चित्तगात्रवाग्बुद्ध्यारम्भसम्भवा इति। तत्र गात्रारम्भसम्भवान् चेष्टाशब्दोक्तानुभावान् कश्चिदित्यादिभिः श्लोकैर्वक्ष्यति। शृङ्गाराभासश्चायम् एकत्रैव प्रतिपादनात् तदुक्तम् एकत्रैवानुरागश्चेत्तिर्यक्शब्दगतोपि वा। योषितां बहुसक्तिश्चेद्रसाभासस्त्रिधा मत इति ॥ १२ ॥

शृङ्गारचेष्टा बभूवुरित्युक्तं ता एव दर्शयति

कश्चिदिति। कश्चिद्राजा कराभ्यां पाणिभ्याम् उपगूढनालं गृहीतनालम् आलोलैः चञ्चलैः पत्रैः अभिहतास्ताडिताः द्विरेफाः भ्रमराः येन तत्तथोक्तं रजोभिः परागैरन्तःपरिवेषं मण्डलं बध्नातीति अन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार। कंरस्य लीलारविन्दवत् त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः। इत्थंभूयां कोटयनपलक्षयक इति इन्दुमत्यभिप्रायः ॥ १३ ॥

विस्रस्तमंसादपरोविलासी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बमुत्कृष्य यथावकाशं
निनाय साचीकृतचारुवक्रः॥ १४॥

आकुञ्चिताग्राङ्गुलिना ततोऽन्यः
किञ्चित्समावर्ज्जितनेत्रशोभः।
तिर्य्यग्विसंसर्पिनखप्रभेण
पादेन हैमं विलिलेख पीठम्॥ १५॥

विस्रस्तमिति। विस्रसनशीलोविलासी। वौ कषलसकत्थस्रम्भ इति घिणुन्प्रत्ययः। अपरोराजा अंसाद्विस्रस्तं रत्नानुविद्धं रत्न खचितं यदङ्गदं केयूरं तस्य कोटिलग्नं प्रालम्बमृजुलम्बिनी स्रजम्। प्रालम्बमृजुलम्बि स्यात् कण्ठादित्यमरः। प्रावारपाठे उत्तरीय-वस्त्रम्। उत्कृष्योद्धृत्य साचीकृतं तिर्य्यक्कृतं चारु वक्रं यस्य स तथोक्तः सन् यथावकाशं स्वस्थानं निनाय। प्रावारोत्क्षेपणच्छलेनाहं त्वामेवं परिरप्स्ये इति नृपाभिप्रायः। गोपनीयं किञ्चिदङ्गेऽस्ति ततोऽयं प्रावृणुतइति इन्दुमत्यभिप्रायः॥ १४॥

आकुञ्चितेति। ततः पूर्व्वोक्तादन्योऽपरोराजा किञ्चित् समा-वर्ज्जितनेत्रशोभः ईषदवाक्पातितनेत्रशोभः सन् आकुञ्चिताः आ-भुग्नाः अग्राङ्गुलयोयस्य तेन तिर्य्यग्विसंसर्पिण्योनखप्रभाः यस्य तेन च पादेन हैमं हिरण्मयं पीठं पादपीठं विलिलेख लिखितवान्। पादाङ्गुलीनामाकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाभिप्रायः। भूमि-विलेखकोऽयमपलक्षणकइति इन्दुमत्याशयः। भूमिविलेखनन्तु लक्ष्मी-विनाशहेतुः॥ १५॥

निवेश्य वामं भुजमासनार्द्धे
तत्सन्निवेशादधिकोन्नतांसः।
कश्चिद्विवृत्तत्रिकभिन्नहारः
सुहृत्समाभाषणतत्परोऽभूत्॥ १६॥
विलासिनीविभ्रमदन्तपत्र
मापाण्डुरं केतकवर्हमन्यः।
प्रियानितम्बोचितसन्निवेशै
र्विपाटयामास युवा नखाग्रैः॥ १७॥

निवेश्येति। कश्चिद्राजा वामं भुजम् आसनार्द्धे सिंहासनैकदेशे निवेश्य संस्थाप्य तत्सन्निवेशात् तस्य वामभुजस्य सन्निवेशात् संस्थापनात् अधिकोन्नतोऽंसो वामांस एव यस्य स तथोक्तः विवृत्ते परावृत्ते त्रिके त्रिकप्रदेशे भिन्नहारः लुण्ठितहारः सन्। पृष्ठवंशाधरे त्रिकमित्यमरः। सुहृत्समाभाषणतत्परोऽभूत् वामपार्श्ववर्त्तिनैव मित्रेण सम्भाषितुं प्रवृत्त इत्यर्थः। अतएव विवृत्तत्रिकत्वं घटते। त्वया वामाङ्के निवेशितया सह एवं वार्त्तां करिष्ये इति नृपाभिप्रायः। परं दृष्ट्वा पराङ्मुखोऽयं न कार्य्यकर्त्ता इतीन्दुमत्यभिप्रायः॥ १६॥

विलासिनीति। अन्यो युवा विलासिन्याः प्रियायाः विभ्रमार्थं दन्तपत्रं दन्तपत्रभूतम् आपाण्डुरं केतकवर्हं केतकदलम्। दलेऽपि वर्हमित्यमरः। प्रियानितम्बे उचितसन्निवेशैः अभ्यस्तनिक्षेपणैः नखाग्रैः विपाटयामास विदारयामास। अहं तव नितम्बे एवं नखक्षतादीन् दास्यामीति नृपाशयः। पत्रच्छेदकवत् पत्रपाटकोऽयमपदरवहतीन्दुमत्याशयः॥ १७॥

कुशेशयाताम्रतलेन कश्चित्
करेण रेखाध्वजलाञ्छनेन।
रत्नाङ्गुलीयप्रभयानुविद्धा-
नुदीरयामास सलीलमक्षान्॥ १८॥
कश्चिद्यथाभागमवस्थितेऽपि
स्वसन्निवेशात् व्यतिलङ्घिनीव।
वज्रांशुगर्भाङ्गुलिरन्ध्रमेकं
व्यापारयामास करं किरीटे॥ १९॥

कुशेशयेति। कश्चिद्राजा कुशेशयं शतपत्रमिव आताम्रं तलं यस्य तेन। शतपत्रं कुशेशयमित्यमरः। रेखारूपो ध्वजो लाञ्छनं यस्य तेन करेण अङ्गुलिषु भवान्यङ्गुलीयानि ऊर्मिकाः। अङ्गुलीयकमूर्मिकेत्यमरः। जिह्वामूलाङ्गुलेश्छ इति छप्रत्ययः। रत्नानामङ्गुलीयानि तेषां प्रभया अनुविद्धान् व्याप्तानक्षान् पाशान्। अक्षास्तु देवनाः पाशकाश्च ते इत्यमरः। सलीलमुदीरयामास उच्चिक्षेप। अहं त्वया सहैवं रंस्ये इति नृपाभिप्रायः। अक्षचातुर्यं कापुरुषोऽयमिति इन्दुमत्यभिप्रायः। अक्षैर्मादीव्य इति श्रुतिनिषेधात्॥ १८॥

कश्चिदिति। कश्चित् यथाभागं यथास्थानम् अवस्थितेऽपि स्वसन्निवेशात् व्यतिलङ्घिनीव स्वस्थानाच्चलिते इव किरीटे वज्राणां किरीटगतानामंशवो गर्भे येषां तान्यङ्गुलिरन्ध्राणि यस्य तमेकं करं व्यापारयामास। किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मन्ये इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोऽयमपलक्षण इतीन्दुमत्यभिप्रायः॥ १९॥

ततो नृपाणां श्रुतवृत्तवंशा
पुंवत् प्रगल्भा प्रतिहाररक्षी ।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥ २० ॥

असौ शरण्यः शरणोन्मुखानां
मगाधसत्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥ २१ ॥

तत इति । ततोऽनन्तरं नृपाणां श्रुतवृत्तवंशा श्रुतनृपवृत्तवंशेत्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । प्रगल्भा वाग्मिनी सुनन्दा सुनन्दाख्या प्रतिहारं रक्षतीति प्रतिहाररक्षी द्वारपालिका । कर्मण्यण् प्रत्ययः । टिड्ढाणञित्यादिना ङीप् । प्राक् प्रथमं कुमारीमिन्दुमतीं मगधेश्वरस्य सन्निकर्षं समीपं नीत्वा पुंवत् पुंसा तुल्यम् । तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः । अवदत् ॥ २० ॥

असाविति । असौ राजा । असाविति पुरोवर्त्तिनो निर्देशः एवमुत्तरत्रापि द्रष्टव्यम् । शरणोन्मुखानां शरणार्थिनां शरण्यः शरणे रक्षणे साधुः । तत्र साधुरिति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इति नाथनिरुक्तिर्निर्मूलैव । अगाधसत्वो गम्भीरस्वभावः । सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोरिति विश्वः । मगधाः जनपदाः तेषु प्रतिष्ठा आस्पदं यस्य स मगधप्रतिष्ठः । प्रतिष्ठा कृत्यमास्पदमित्यमरः । प्रजारञ्जने लब्धवर्णो विचक्षणः यद्वा प्रजारञ्जनेन लब्धोत्कर्षः परान् शत्रून् तापयतीति परन्तपः परन्तपाख्यः । द्विषत्परयोस्तापेरिति खच्प्रत्ययः खचि ह्रस्व इति ह्रस्वः अरुर्द्विषद् अजन्तस्य

कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम्।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः॥ २२॥

क्रियाप्रबन्धादयमध्वराणा
मजस्रमाहूतसहस्रनेत्रः।
शच्याश्चिरं पाण्डुकपोललम्बान्
मन्दारशून्यानलकांश्चकार॥ २३॥

*मुम् इति मुमागमः। नामेति प्रसिद्धौ यथार्थनामा शत्रुसन्तापनादिति भावः॥ २१॥

काममिति। अन्ये नृपाः कामं सहस्रशः सन्तु भूमिमनेन राजन्वतीं शोभनराजवतीमाहुः नैतादृक् कश्चिदस्तीत्यर्थः सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवानित्यमरः। राजन्वान् सौराज्ये इति निपातनात्साधुः। तथाहि नक्षत्रैरश्विन्यादिभिः ताराभिः साधारणैर्ज्योतिर्भिः ग्रहैर्भौमादिभिश्च सङ्कुलापि रात्रिः चन्द्रमसैव ज्योतिरस्या अस्तीति ज्योतिष्मती नान्येन ज्योतिष्मेत्यर्थः॥ २२॥

क्रियेति। अयं परन्तपोऽध्वराणां क्रतूनां क्रियाप्रबन्धादनुष्ठान सातत्यात् अविच्छिन्नादनुष्ठानादित्यर्थः अजस्रं नित्यम् आहूतसहस्र नेत्रः सन् चिरं शच्या अलकान् पाण्डुकपोलयोर्लम्बान् स्रस्तान्। पचाद्यच्। मन्दारैः कल्पद्रुमकुसुमैः शून्यान् चकार। प्रोषित-भर्तृका हि केशसंस्कारं न कुर्व्वन्ति, प्रोषिते मलिना कृशेति, क्रीड़ां शरीर संस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृकेति च स्मरणात्॥ २३॥

अनेन चेदिच्छसि गृह्यमाणं
पाणिं वरेण्येन कुरु प्रवेशे।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम्॥ २४॥
एवं तयोक्ते तमवेक्ष्य किञ्चि-
द्विस्रंसिदूर्वाङ्कमधूकमाला।
ऋजुप्रणामक्रिययैव तन्वी
प्रत्यादिदेशैनमभाषमाणा॥ २५॥
तां सैव वेत्रग्रहणे नियुक्ता
राजान्तरं राजसुतां निनाय।

अनेनेति। वरेण्येन वरणीयेन। वृणोतेरौणादिक एण्यप्रत्ययः। अनेन राज्ञा गृह्यमाणं पाणिमिच्छसि चेत् पाणिग्रहणमिच्छसि चेदित्यर्थः प्रवेशे प्रवेशकाले प्रासादवातायनसंश्रितानां राजभवन गवाक्षस्थितानां पुष्पपुराङ्गनानां पाटलीपुराङ्गनानां नेत्रोत्सवं कुरु। सर्वोत्तमानां तासामपि दर्शनीया भविष्यसीति भावः॥ २४॥

एवमिति। एवं तया सुनन्दयोक्ते सति तं परन्तपमवेक्ष्य किञ्चिद्विस्रंसिनो दूर्वाङ्का दूर्वाचिह्ना मधूकमाला गुडपुष्पमाला यस्याः सा। मधूके तु गुडपुष्पमधुद्रुमावित्यमरः। वरणे शिथिल प्रयत्नेति भावः। तन्वी इन्दुमती एनं नृपमभाषमाणा ऋज्वा भाव शून्यया प्रणामक्रिययैव प्रत्यादिदेश परिजहार॥ २५॥

तामिति। सैव नान्या चित्तज्ञत्वादिति भावः। वेत्रग्रहणे नियुक्ता दौवारिकी सुनन्दा तां राजसुतां राजान्तरम् अन्यराजानं

समीरणोत्थेव तरङ्गलेखा
पद्मान्तरं मानसराजहंसीम्॥ २६॥
जगाद चैनामयमङ्गनाथः
सुराङ्गनाप्रार्थितयौवनश्रीः।
विनीतनागः किल सूत्रकारै
रैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते॥ २७॥
अनेन पर्य्यासयताश्रुविन्दून्
मुक्ताफलस्थूलतमान् स्तनेषु।

निनाय। नयतिर्द्विकर्म्मकः। कथमिव समीरणोत्था वातोत्पन्ना तरङ्गलेखा ऊर्म्मिपङ्क्तिः मानसे सरसि या राजहंसी तां पद्मान्तरमिव॥ २६॥

जगादेति। एनामिन्दुमती जगाद। किमिति, अयमङ्गनाथोऽङ्गदेशाधीश्वरः सुराङ्गनाभिः प्रार्थिता कामिता यौवनश्रीर्यस्य स तथोक्तः। पुरा किलैनमिन्द्रसहायार्थमिन्द्रपुरगामिनम् अकामयन्त अप्सरस इति प्रसिद्धिः। किञ्च सूत्रकारैर्गजशास्त्रकृद्भिः पालकादिभिर्महर्षिभि विनीतनागः शिक्षितगजः। किलेत्यैतिह्ये। अतएव भूमिगतोऽपि ऐन्द्रं पदम् ऐश्वर्य्यं भुङ्क्ते भूर्लोकएव स्वर्गसुखमनुभवतीत्यर्थः। गजाप्सरोदेवर्षिसेव्यत्वम् ऐन्द्रपदशब्दार्थः। पुरा किल वृतश्चिच्छापकारणात् भुवमवतीर्णं दिग्गजवर्गमालोक्य स्वयमशक्तेरिन्द्रास्यनुज्ञया आनीतैर्देवर्षिभिः प्रणीतेन शास्त्रेण गजान् वशीकृत्य भुवि सम्प्रदायं प्रावर्त्तयदिति कथा गीयते॥ २७॥

अनेनेति। ऋतुविलासिनीनां स्तनेषु मुक्ताफलस्थूलतमान् अम्बुविन्दून्। अस्रमम्बुणीति विश्वः। पर्य्यासयता प्रस्तारयता भर्तृवधा-

प्रत्यर्पिताः शत्रुविलासिनीना
मुन्मुच्य सूत्रेण विनैव हाराः॥ २८॥
निसर्गभिन्नास्पदमेकसंस्थ
मस्मिन् द्वयं श्रीश्च सरस्वती च।
कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि तयोस्तृतीया॥ २९॥
अथाङ्गराजादवतार्य्य चक्षु
र्याहीति जन्यामवदत् कुमारी।

दिति भावः। अनेनाङ्गनाथेन उन्मुच्याक्षिप्य सूत्रेण विना हाराएव प्रत्यर्पिताः। अविच्छिन्नास्रुविन्दुप्रवर्त्तनादुत्सूत्रहारार्पणमेव कृतमित्युत्प्रेक्षा गम्यते॥ २८॥

निसर्गेति। निसर्गतः स्वभावतो भिन्नास्पदं भिन्नाश्रयं सहावस्थानविरोधीत्यर्थः श्रीश्च सरस्वती चेति द्वयम् अस्मिन्नङ्गनाथे एकत्र संस्था स्थितिर्यस्य तदेकसंस्थम् उभयमिह सङ्गतमित्यर्थः। हे कल्याणि। बह्वादिभ्यश्चेति ङीष्। कान्त्या सूनृतया सत्यप्रियया गिरा च योग्या ससर्गार्हा त्वमेव तयोः श्रीसरस्वत्योस्तृतीया। समान गुणयोर्युवयोः दाम्पत्यं युज्यतएवेति भावः। दक्षिणनायकत्वञ्चास्य ध्वन्यते तदुक्तं तुल्योऽनेकत्र दक्षिण इति॥ २९॥

अथेति। अथ कुमारी अङ्गराजाच्चक्षुरवतार्य्य अपनीयेत्यर्थः जन्यां मातृसखीं सुनन्दां याहि गच्छेत्यवदत्। अथवा, जनीं वधूं वहन्तीति जन्याः वधूबन्धवः तान् यात गच्छतेत्यवदत्। जन्या मातृ सखीमुदोः। जन्योवरवधूज्ञातिप्रियतुल्यहितेपि चेति पक्षद्वये विश्वः। अथवा जन्या वधूभृत्याः। भृत्यास्चापि नवोढ़ाया इति केशवः।

नासौ न काम्यो नच वेद सम्यक्
द्रष्टुं न सा भिन्नरुचिर्हि लोकः॥ ३०॥
ततः परं दुष्प्रसहं द्विषद्भि-
र्नृपं नियुक्ता प्रतिहारभूमौ।
निदर्शयामास विशेषदृश्य-
मिन्दुं नवोत्थानमिवेन्दुमत्यै॥ ३१॥
अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः।

संज्ञायां जन्यादिति यत्प्रत्ययान्तो निपातः। यदत्राह वृत्तिकारः जनीं वधूं वहन्तीति जन्या जामातुर्वयस्या इति, यच्चामरः जन्याः स्निग्धा वरस्य ये इति तत्सर्वमुपलक्षणार्थमित्यविरोधः। न चायमङ्गराज निषेधोऽस्य दोषान्नापि द्रष्टृदोषादित्याह नेत्यादिना असावङ्गराजः काम्यः कमनीयोनेति न किन्तु काम्य एवेत्यर्थः सा कुमारी च सम्यक् द्रष्टुं विवेक्तुं न वेदेति न वेदेत्यर्थः। किन्तु लोको जनो भिन्नरुचिर्हि रुचिरमपि किञ्चित् कस्मैचिन्न रोचते किं कुर्मो न हीच्छा नियन्तुं शक्यत इत्यर्थः॥ ३०॥

तत इति। ततोऽनन्तरं प्रतिहारभूमौ द्वारदेशे नियुक्ता दौवारिकी। स्त्री द्वाद्वारं प्रतीहार इत्यमरः। द्विषद्भिः शत्रुभिः दुष्प्रसहं दुःसहं शूरमित्यर्थः विशेषेण दृश्यं दर्शनीयं रूपवन्तमित्यर्थः परमन्यं नृपं नवोत्थानं नवोदयमिन्दुमिव इन्दुमत्यै निदर्शयामास॥ ३१॥

अवन्तीति। उदग्रबाहुर्दीर्घबाहुः विशालवक्षाः तनुवृत्तमध्यः कृशवर्तुलमध्योऽयं राजा अवन्तिनाथः अवन्तिदेशाधीश्वरः त्वष्ट्रा विश्वकर्मणा। भर्तुस्तेजोवेगमसहमानया दुहित्रा संज्ञादेव्या प्रार्थितेनेति

आरोप्य चक्रभ्रममुष्णतेजा
स्त्वष्ट्रेव यत्नोल्लिखितो विभाति ॥ ३२ ॥

अस्य प्रयाणेषु समग्रशक्ते
रग्रेसरैर्वाजिभिरुत्थितानि ।
कुर्वन्ति सामन्तशिखामणीनां
प्रभाप्ररोहास्तमयं रजांसि ॥ ३३ ॥

असौ महाकालनिकेतनस्य
वसन्नदूरे किल चन्द्रमौलेः ।
तमिस्रपक्षेऽपि सह प्रियाभि
र्ज्योत्स्नावतो निर्विशति प्रदोषान् ॥ ३४ ॥

शेषः। चक्रभ्रमं चक्राकारशस्त्रोत्तेजनयन्त्रम्। भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके इति विश्वः। आरोप्य यत्नेनोल्लिखितः उष्णतेजाः सूर्य इव विभाति। अत्र मार्कण्डेयः। विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वता। भ्रममारोप्य तत्तेजःशातनायोपचक्रमे इति ॥ ३२ ॥

अस्येति। समग्रशक्तेः शक्तित्रयसम्पन्नस्य अस्यावन्तिनाथस्य प्रयाणेषु यात्रासु अग्रेसरैर्वाजिभिरश्वैरुत्थितानि रजांसि सामन्तानां समन्ताद्भवानां राज्ञां ये शिखामणयः चूडामणयः तेषां प्रभाप्ररोहास्तमयं तेजोऽङ्कुरनाशं कुर्वन्ति। नाशीरैरेवास्य शत्रवः पराजीयन्त इति भाव ॥ ३३ ॥

असाविति। असाववन्तिनाथः महाकालं नाम स्थानविशेषः तदेव निकेतनं स्थानं यस्य तस्य चन्द्रमौलेरीश्वरस्य अदूरे समीपे वसन्

अनेन यूना सह पार्थिवेन
रम्भोरु कच्चिन्मनसो रुचिस्ते।
सिप्रातरङ्गानिलकम्पितासु
विहर्तुमुद्यानपरम्परासु ॥ ३५ ॥

तस्मिन्नभिद्योतितबन्धुपद्मे
प्रतापसंशोषितशत्रुपङ्के।
बबन्ध सा नोत्तमसौकुमार्य्या
कुमुद्वती भानुमतीव भावम् ॥ ३६ ॥

अतएव हेतोः तमिस्रपक्षे कृष्णपक्षेपि प्रियाभिः सह ज्योत्स्नावतः प्रदोषान् रात्रीर्निर्विशत्यनुभवति किल। नित्यज्योत्स्नाभिहारत्वमेतस्यैव नान्यस्येति भावः ॥ ३४ ॥

अनेनेति। रम्भे कदलीस्तम्भाविव ऊरू यस्याः सा रम्भोरूस्तस्याः सम्बोधनं हे रम्भोरु। ऊरूत्तरपदादौपम्यइत्यूङ्प्रत्ययः नदीत्वाद्ध्रस्वः। यूना अनेन पार्थिवेन सह सिप्रा नाम तत्रत्या नदी तस्यास्तरङ्गाणामनिलेन कम्पितासूद्यानानां परम्परासु पङ्क्तिषु विहर्तुं ते तव मनसो रुचिः कच्चित् स्पृहास्ति किमित्यर्थः। अभिष्वङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियामित्यमरः ॥ ३५ ॥

तस्मिन्निति। उत्तमसौकुमार्य्या उत्कृष्टाङ्गमार्दवा सा इन्दुमती अभिद्योतितानि उल्लासितानि बन्धवएव पद्मानि येन तस्मिन् प्रतापेन तेजसा संशोषिताः शत्रव एव पङ्काः कर्दमाः येन तस्मिन् तस्मिन्नवन्तिनाथे कुमुद्वती। कुमुदनड्वेतसेभ्योड्मतुप् इति ड्मतुप्प्रत्ययः। भानुमत्यंशुमतीव भावं चित्तं न बबन्ध न तत्रानुरागमकरोदित्यर्थः। बन्धून पद्मत्वेन शत्रूणां पङ्कत्वेन च रूपणं राज्ञः सूर्य्यसाम्यार्थम् ॥ ३६ ॥

तामग्रतस्तामरसान्तराभा
मनूपराजस्य गुणैरनूनाम्।
विधाय सृष्टिं ललितां विधातु
र्जगाद भूयः सुदतीं सुनन्दा ॥ ३७ ॥

संग्रामनिर्विष्टसहस्रबाहु
रष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः॥ ३८ ॥

तामिति। सुनन्दा तामरसान्तराभां पद्मोदरतुल्यकान्तिं कनकगौरीमित्यर्थः गुणैरनूनामधिकामित्यर्थः शोभना दन्ता यस्याः सा सुदती। वयसि दन्तस्य दतृिति दत्रादेशः उगितश्चेति ङीप्। तां तां प्रकृतां प्रसिद्धां वा विधातुर्ललितां सृष्टिं मधुरनिर्माणां स्त्रियमित्यर्थः। अनुगता आपोयेषु तेऽनूपा नाम देशाः। ऋक्पूरब्धूःपथामानक्षे इत्यप्रत्ययः समासान्तः ऊदनोर्देशेइत्यूदादेशः। तेषां राज्ञोऽनूपराजस्याग्रतोविधाय व्यवस्थाप्य भूयः पुनर्जगाद ॥ ३७ ॥

संग्रामेति। संग्रामेषु युद्धेषु निर्विष्टा अनुभूताः सहस्रं बाहवो यस्य स तथोक्तः युद्धादन्यत्र द्विभुजएव दृश्यतइत्यर्थः। अष्टादशसु द्वीपेषु निखाताः स्थापिताः यूपाः येन स तथोक्तः। सर्वक्रतुयाजी सार्वभौमश्चेति भावः। जरायुजादिसर्वभूतरञ्जनादनन्यसाधारणो राजशब्दो यस्य स तथोक्तः योगी ब्रह्मविद्वानित्यर्थः। स किल भगवतोदत्तात्रेयाल्लब्धयोगइति गाथाविदः। कृतवीर्य्यस्यापत्यं पुमान् कार्त्तवीर्य्योनाम राजा बभूव किलेति। अयञ्चास्य महिमा सर्वोपि दत्तात्रेयवरप्रसादलब्धइति भारते दृश्यते ॥ ३८ ॥

अकार्य्यचिन्तासमकालमेव
प्रादुर्भवंश्चापधरः पुरस्तात्।
अन्तःशरीरेष्वपि यः प्रजानां
प्रत्यादिदेशाविनयं विनेता॥ ३९॥

ज्याबन्धनिष्पन्दभुजेन यस्य
विनिःश्वसद्वक्त्रपरम्परेण।
कारागृहे निर्जितवासवेन
लङ्केश्वरेणोषितमाप्रसादात्॥ ४०॥

अकार्य्येति। विनेता शिक्षको यः कार्त्तवीर्य्यः अकार्य्यस्यासत्कार्य्यस्य चिन्तायाः अहं चौर्य्यादिकं करिष्यामीति बुद्ध्याः समकालमेककालमेव यथा तथा पुरस्तादग्रे चापधरः प्रादुर्भवन् सन् प्रजानाम्। प्रजा स्यात् सन्ततौ जने इत्यमरः। अन्तःशरीरेषु अन्तःकरणेषु। शरीरशब्देनेन्द्रियं लक्ष्यते। अविनयमपि प्रत्यादिदेश मानसापराधमपि निवारयामासेत्यर्थः। अन्येतु वाक्कायापराधमात्रप्रतिकर्त्तार इति भावः॥ ३९॥

ज्याबन्धेति। ज्यया मौर्व्या बन्धेन बन्धनेन निष्पन्दा निश्चेष्टा भुजा यस्य तेन विनिःश्वसती ज्याबन्धोपरोधात् दीर्घं निःश्वसती वक्त्रपरम्परा दशमुखी यस्य तेन निर्जितवासवेनेन्द्रविजयिना। अत्रेन्द्रादयोऽप्यनेन जितप्राया एवेति भावः। लङ्केश्वरेण दशास्येन यस्य कार्त्तवीर्य्यस्य कारागृहे बन्धनागारे। कारा स्याद्बन्धनालये इत्यमरः। आप्रसादादनुग्रहपर्य्यन्तम् उषितं स्थितम्। नपुंसके भावे क्त। एतत्प्रसादादेव तस्य मोक्षोपायो नतु बलमिति भावः॥ ४०॥

तस्यान्वये भूपतिरेष जातः
प्रतीपइत्यागमवृद्धसेवी ।
येन श्रियः संश्रयदोषरूढं
स्वभावलोलेत्ययशः प्रमृष्टम् ॥ ४१ ॥
आयोधने कृष्णगतिं सहाय
मवाप्य यः क्षत्रियकालरात्रिम् ।
धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥ ४२ ॥

तस्येति । आगमवृद्धसेवी श्रुतवृद्धसेवी प्रतीपइति ख्यातइति शेषः एषः भूपतिस्तस्य कार्त्तवीर्य्यस्यान्वये वंशे जातः । येन प्रतीपेन संश्रयस्याश्रयस्य पुंसो दोषै र्व्यसनादिभिः रूढमुत्पन्नं श्रियः सम्बन्धि स्वभावलोला प्रकृतिचञ्चलेत्येवंरूपमयशोऽपकीर्त्तिः प्रमृष्टं निरस्तम् । दुष्टाश्रयत्यागशीलायाः श्रियः प्रकृतिचापलप्रवादो मूढजनपरिकल्पित इत्यर्थः । अयन्तु दोषराहित्यान्न कदाचिदपि त्यज्यतइति भावः ॥ ४१ ॥

आयोधनइति । यः प्रतीपः आयोधने युद्धे कृष्णगतिं कृष्णवर्त्मानमग्निं सहायमवाप्य क्षत्रियाणां कालरात्रिं संहाररात्रिमित्यर्थः रामपरश्वधस्य जामदग्न्यपरशोः । द्वयोः कुठारः स्वधितिः परशुश्च परश्वधइत्यमरः । शितां तीक्ष्णां धारां मुखम् । खड्गादीनाञ्च निशितमुखे धारा प्रकीर्त्तितेति विश्वः । उत्पलपत्रस्य सारइव सारोयस्यास्तां तथाभूतां सम्भावयति मन्यते । एतन्नगरजिगीषयागतान् रिपून् स्वयमेव धक्ष्यामीति भगवता वैश्वानरेण दत्तवरोऽयं राजा, दृश्यन्तेच तथागताः शलभइति भारते कथानुसन्धेया ॥ ४२ ॥

अस्याङ्कलक्ष्मीर्भव दीर्घबाहो
र्माहिष्मतीवप्रनितम्बकाञ्चीम्।
प्रासादजालैर्जलवेणिरम्यां
रेवां यदि प्रेक्षितुमस्ति कामः॥ ४३॥
तस्याः प्रकामं प्रियदर्शनोऽपि
न स क्षितीशो रुचये बभूव।
शरत्प्रमृष्टाम्बुधरोपरोधः
शशीव पर्य्याप्तकलो नलिन्याः॥ ४४॥
सा शूरसेनाधिपतिं सुषेण
मुद्दिश्य लोकान्तरगीतकीर्त्तिम्।

अस्येति। दीर्घबाहोरस्य प्रतीपस्याङ्कलक्ष्मीर्भव एनं वृणीष्वेत्यर्थः। अनेनायं विष्णुतुल्यइति ध्वन्यते। माहिष्मती नामास्य नगरी तस्यावप्रः प्राकारएव नितम्बः तस्य काञ्चीं रशनाभूतां जलानां वेण्या प्रवाहेण रम्याम्। ओघः प्रवाहोवेणी चेति हलायुधः। रेवां नर्मदां प्रासादजालैः गवाक्षैः। जालं समूहआनायो गवाक्षक्षारकावपीत्यमरः। प्रेक्षितुं काम इच्छा अस्ति यदि॥ ४३॥

तस्याइति। प्रकामं प्रियं प्रीतिकरं दर्शनं यस्य सोऽपि दर्शनीयोऽपीत्यर्थः स क्षितीशः शरदा प्रमृष्टाम्बुधरोपरोधः निरस्तमेघावरणः पर्य्याप्तकलः पूर्णकलः शशी नलिन्याइव तस्या इन्दुमत्याः रुचये न बभूव रुचिं नाजीजनदित्यर्थः। लोकोभिन्नरुचिरिति भावः॥ ४४॥

सेति। लोकान्तरे स्वर्गादावपि गीतकीर्त्तिम् आच रेण शुद्धयोरुभयोः वंशयो र्मातापितृकुलयोः दीपं प्रकाशकम्। उभयवंशेत्य-

आचारशुद्धोभयवंशदीपं

शुद्धान्तरक्ष्या जगदे कुमारी ॥ ४५ ॥

नीपान्वयः पार्थिवएष यज्वा

गुणै र्यमाश्रित्य परस्परेण ।

सिद्धाश्रमं शान्तमिवैत्य सत्वै-

र्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥ ४६ ॥

यस्यात्मगेहे नयनाभिरामा

कान्तिर्हिमांशोरिव सन्निविष्टा ।

हर्म्याग्रसंरूढतृणाङ्कुरेषु

तेजोऽविषह्यं रिपुमन्दिरेषु ॥ ४७ ॥

[illegible] । शुद्धान्तमन्तःपुरं रक्षतीति [illegible]
[illegible] शुद्धान्तरक्ष्या [illegible] । कर्म-
ण्युपपदे [illegible] । सा कुमारी जगदे ॥ ४५ ॥

नीपेति । यज्वा विधिनेष्टवान् । [illegible] इति ङ्वनि-
प्प्रत्ययः । एष [illegible]
[illegible] गुणैः [illegible] शान्तं [illegible] सिद्धाश्रमम्
[illegible] सत्त्वैः [illegible] नैसर्गिकः
स्वाभाविकोऽपि परस्परेण विरोधः उत्ससृजे त्यक्तः ॥ ४६ ॥

यस्येति । हिमांशोः [illegible] यस्य
आत्मगेहे [illegible] संनिविष्टा [illegible] किंच-
[illegible] तेजः [illegible] हर्म्येषु [illegible]
[illegible] संरूढतृणाङ्कुरेषु [illegible]

यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्मिसंसक्तजलेव भाति ॥ ४८ ॥

त्रस्तेन तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः ।
वक्षःस्थलव्यापिरुचं दधानः
सकौस्तुभं ह्रेपयतीव कृष्णम् ॥ ४९ ॥

त्यर्थः रिपुमन्दिरेषु शत्रुनगरेषु। मन्दिरं नगरे स्त्रहे इति विश्वः। सन्निविष्टम्। स्वजनाह्लादको द्विषन्तपश्चेति भावः ॥ ४७ ॥

यस्येति। यस्य सुषेणस्य वारिविहारकाले जलक्रीडासमये अवरोधानामन्तःपुराङ्गनानां स्तनेषु चन्दनानां मलयजानां प्रक्षालनाद्धेतोः, कलिन्दो नाम शैलः तत्कन्या यमुना। कालिन्दी सूर्यतनया यमुना शमनस्वसेत्यमरः। मथुरा नामास्य राज्ञो नगरी तां गतापि गङ्गायाविप्रकृष्टापीत्यर्थः। मथुरायां गङ्गाऽभावं सूचयत्यपिशब्दः। कालिन्दीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति तत्कथमधुना मथुरासम्भवइति चिन्त्यम्। मथुरा मधुरा पुरीति शब्दभेदः यद्वा साम्येति। गङ्गाया भागीरथ्या ऊर्म्मिभिः संसक्तजलेव भाति धवलचन्दनसंसर्गात् प्रयागादन्यत्राप्यत्र गङ्गासङ्गतेव भातीत्यर्थः। सितासिते हि गङ्गायमुने इति घण्टापथः ॥ ४८ ॥

त्रस्तेनेति। तार्क्ष्यात् गरुडात् त्रस्तेन यमुना ओकः स्थानं यस्य तेन कालियेन नाम नागेन विसृष्टं किल अभयदाननिष्क्रयत्वेन दत्तं किलेत्यैतिह्ये वक्षःस्थलव्यापिरुचं मणिं दधानो यः सुषेणः सकौस्तुभः

सम्भाव्य भर्त्तारममुं युवानं
मृदुप्रवालोत्तरपुष्पशय्ये।
वृन्दावने चैत्ररथादनूने
निर्विश्यतां सुन्दरि यौवनश्रीः॥ ५०॥

अध्यास्य चाम्भःपृषतोक्षितानि
शैलेयगन्धीनि शिलातलानि।
कलापिनां प्रावृषि पश्य नृत्यं
कान्तासु गोवर्द्धनकन्दरासु॥ ५१॥

कृष्णं विष्णुं ह्रेपयतीव व्रीड़यतीव। अर्त्तिह्रीत्यादिना पुगागमः। कौस्तुभमणेरप्युत्कृष्टोऽस्य मणिरिति भावः॥ ४९॥

सम्भाव्येति। युवानममुं सुषेणं भर्त्तारं सम्भाव्य मत्वा पतित्वेनाङ्गीकृत्येत्यर्थः मृदुप्रवालोत्तरा उपरिप्रसारितकोमलपल्लवा पुष्पशय्या यस्मिन् तत् तस्मिन् चैत्ररथात् कुवेरोद्यानादनूने वृन्दावने वृन्दावननामके उद्याने हे सुन्दरि यौवनश्रीः यौवनफलं निर्विश्यतां भुज्यताम्॥ ५०॥

अध्यास्येति। किञ्च प्रावृषि वर्षासु कान्तासु गोवर्द्धनस्याद्रेः कन्दरासु दरीषु। दरी तु कन्दरो वा स्त्रीत्यमरः। अम्भसः पृषतैर्बिन्दुभिः उक्षितानि सिक्तानि शिलायां भवं शैलेयम्। शिलाजतु च शैलेयमिति यादवः। यद्वा शिलापुष्पाख्य ओषधिविशेषः। कालानुसार्य्यवृद्धाश्मपुष्पशीतशिवानि तु शैलेयमित्यमरः। शिलायाम्ढः इत्यत्र शिलायाढ इति योगविभागादिवार्थे ढक्प्रत्ययः। तद्गन्धवन्ति शैलेयगन्धीनि शिलातलान्यध्यास्याधिष्ठाय कलापिनां वर्हिणां नृत्यं पश्य॥ ५१॥

नृपं तमावर्त्तमनोज्ञनाभिः
सा व्यत्यगादन्यवधूर्भवित्री।
महीधरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव ॥ ५२ ॥

अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम्।
आसेदुषीं सादितशत्रुपक्षं
बालामबालेन्दुमुखीं बभाषे ॥ ५३ ॥

असौ महेन्द्राद्रिसमानसारः
पतिर्महेन्द्रस्य महोदधेश्च।

नृपमिति। स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः। आवर्त्तमनोज्ञा नाभिर्यस्याः सा इदञ्च नदीसाम्यार्थमुक्तम्। अन्यवधूरन्यपत्नी भवित्री भाविनी सा कुमारी तं नृपं सागरगामिनी सागरं गन्त्री स्रोतोवहा नदी मार्गवशादुपेतं प्राप्तं महीधरं पर्व्वतमिव व्यत्यगात् अतीत्य गता ॥ ५२ ॥

अथेति। अथ भुजिष्या किङ्करी सुनन्दा। भुजिष्या किङ्करी मतेति हलायुधः। अङ्गदाश्लिष्टभुजं केयूरनद्धबाहुं सादितशत्रुपक्षं विनाशितशत्रुवर्गं हेमाङ्गदं नाम कलिङ्गनाथम् आसेदुषीमासन्नाम-बालेन्दुमुखी पूर्णेन्दुमुखीं बालामिन्दुमती बभाषे ॥ ५३ ॥

असाविति। महेन्द्राद्रेः समानसारः तुल्यबलोऽसौ हेमाङ्गदः महेन्द्रस्य नाम कुलपर्व्वतस्य महोदधेश्च पतिः स्वामी। महेन्द्रमहोदधी एवास्य गिरिजलदुर्गे इति भावः। यस्य यात्रासु चरता मद-

यस्य क्षरत्सैन्यगजच्छलेन
यात्रासु यातीव पुरो महेन्द्रः ॥ ५४ ॥

ज्याघातरेखे सुभुजो भुजाभ्यां
बिभर्त्ति यश्चापभृतां पुरोगः।
रिपुश्रियां साञ्जनवाष्पसेके
वन्दीकृतानामिव पद्धती द्वे ॥ ५५ ॥

यं माऽत्मनः सद्मनि सन्निकृष्टो
मन्द्रध्वनित्याजितयामतूर्य्यः।
प्रासादवातायनदृश्यवीचिः
प्रबोधयत्यर्णवएव सुप्तम् ॥ ५६ ॥

स्राविणां सैन्यगजानां छलेन महेन्द्रो महेन्द्राद्रिः पुरोऽग्रे यातीव अद्रिकल्पा अस्य गजा इत्यर्थः ॥ ५४ ॥

ज्याघातेति। सुभुजश्चापभृतां पुरोगो धनुर्धराग्रेसरो यः वन्दीकृतानां प्रगृहीतानाम्। प्रग्रहोपग्रहौ वन्द्यामित्यमरः। रिपुश्रियां साञ्जनो वाष्पसेको ययोस्ते कज्जलमिश्राम्बुसिक्ते इत्यर्थः पद्धती इव द्वे ज्याघातानां मौर्व्वीकिणानां रेखे राजी भुजाभ्यां बिभर्त्ति। द्विवचनात्सव्यसाचित्वं गम्यते। रिपुश्रियां भुजाभ्यामेवाहरणात्तद्गतरेखयोस्तत्पद्धतित्वेनोत्प्रेक्षा तयोः श्यामत्वात् साञ्जनाम्बुसेकोक्तिः ॥ ५५ ॥

यमिति। आत्मनः सद्मनि सुप्तं यं हेमाङ्गदं सन्निकृष्टः समीपस्थः अतएव प्रासादवातायनैः दृश्यवीचिः मन्द्रेण गम्भीरेण। मन्द्रस्तु गम्भीरे इत्यमरः। ध्वनिना त्याजितं विवर्जितं यामस्य तूर्य्यं प्रहरावसानसूचकं वाद्यं येन स तथोक्तः। द्वौ यामप्रहरौ समावित्यमरः।

अनेन सार्द्धं विहराम्बुराशे
स्तीरेषु तालीवनमर्म्मरेषु।
द्वीपान्तरानीतलवङ्गपुष्पै
रपाकृतस्वेदलवा मरुद्भिः॥ ५७॥

प्रलोभिताप्याकृतिलोभनीया
विदर्भराजावरजा तथैवम्।
तस्मादपावर्त्तत दूरकृष्टा
नीत्येव लक्ष्मीः प्रतिकूलदैवात्॥ ५८॥

र्णवएव प्रबोधयति। अर्णवस्यैव तूर्य्यकार्य्यकारित्वात् तद्वैयर्थ्य-मित्यर्थः। समुद्रस्यापि सेव्यः किमन्येषामिति भावः॥ ५६॥

अनेनेति। अनेन राज्ञा सार्द्धं तालीवनैर्मर्मरेषु मर्मरेति ध्वनत्सु। अथ मर्म्मरः स्वनिते वस्त्रपर्णानामित्यमरवचनात् गुणपरस्यापि मर्मर-शब्दस्य गुणिपरत्वं प्रयोगादवसेयम्। अम्बुराशेः समुद्रस्य तीरेषु द्वीपान्तरेभ्य आनीतानि लवङ्गपुष्पाणि देवकुसुमानि यैस्तैः। लवङ्गं देवकुसुममित्यमरः। मरुद्भिर्व्वातैरपाकृता अपनीताः स्वेदस्य लवाः बिन्दवो यस्याः सा तथाभूता सती विहर क्रीड़॥ ५७॥

प्रलोभितेति। आकृत्या रूपेण लोभनीया आकर्षणीया नतु वर्णन-मात्रेणेत्यर्थः। विदर्भराजावरजा भोजानुजा इन्दुमती तया सुनन्दया एव प्रलोभिता प्रचोदितापि नीत्या पुरुषकारेण दूरकृष्टा दूरमानीता लक्ष्मीः प्रतिकूलं दैवं यस्य तस्मात् पुंस इव तस्मात्कलिङ्गादपावर्त्तत प्रतिनिवृत्ता॥ ५८॥

अथेति। अथ द्वारे नियुक्ता दौवारिकी सुनन्दा। तत्र नियुक्त इति ठक्प्रत्ययः। द्वारादीनाञ्चेत्यौआगमः। आकारेण देवरूपं

अथोरगाख्यस्य पुरस्य नाथं
दौवारिकी देवसरूपमेत्य।
इतश्चकोराक्षि विलोकयेति
पूर्व्वानुशिष्टां निजगाद भोज्याम् ॥५९॥

पाण्ड्योऽयमंसार्पितलम्बहारः
कॢप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥ ६० ॥

देवतुल्यम् उरगाख्यस्य पुरस्य पाण्ड्यदेशे कान्यकुब्जतीरवर्त्तिनागपुरस्य नाथमेत्य प्राप्य हे चकोराक्षि इतोविलोकयेति पूर्व्वानुशिष्टां पूर्व्वमुक्तां भोजस्य राज्ञोगोत्रापत्यं स्त्रियं भोज्यामिन्दुमतीम्। क्रौड्यादिभ्यश्चेत्यत्र भोजात् क्षत्रियादित्युपसंख्यानात् ष्यङ्प्रत्ययः यङश्चाबिति चाप्। निजगाद इतोविलोकयेति पूर्व्वमुक्ता पश्चाद्वक्तव्यं निजगादेत्यर्थः ॥ ५९ ॥

पाण्ड्यइति। अंसयोरर्पिताः लम्बन्ते इति लम्बा हारा यस्य सः हरिचन्दनेन गोशीर्षाख्येन चन्दनेन। तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियामित्यमरः। कॢप्ताङ्गरागः सिद्धानुलेपनोऽयं पाण्डूनां जनपदानां राजा पाण्ड्यः। पाण्डोर्जनपदशब्दात् क्षत्रियात् ड्यण् वक्तव्यइति ड्यण्प्रत्ययः तस्य राजन्यपत्यवदिति वचनात्। बालातपेन रक्ता अरुणाः सानवोयस्य सः सनिर्झरोद्गारः प्रवाहस्यन्दनसहितः। वारिप्रवाहोनिर्झरोझर इत्यमरः। अद्रिराजइवाभाति ॥ ६० ॥

बिन्ध्यस्येति। बिन्ध्यस्य नाम्नो महाद्रेः तपनमार्गनिरोधाय वर्द्ध-

विन्ध्यस्य संस्तम्भयिता महाद्रे
निःशेषपीतोज्झितसिन्धुराजः।
प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः
सौस्नातिको यस्य भवत्यगस्त्यः॥ ६१॥
अस्त्रं हरादाप्तवता दुरापं
येनेन्द्रलोकावजयाय दृप्तः।
पुरा जनस्थानविमर्द्दशङ्की
सन्धाय लङ्काधिपतिः प्रतस्थे॥ ६२॥
अनेन पाणौ विधिवद्गृहीते
महाकुलीनेन महीव गुर्व्वी।

मानस्येति शेषः संस्तम्भयिता निवारयिता निःशेषं पीतः उज्झितः पुनस्त्यक्तः सिन्धुराजः समुद्रो येन सः अगस्त्यः अश्वमेधस्यावभृथ दीक्षान्ते कर्म्मणि। दीक्षान्तोऽवभृथो यज्ञ इत्यमरः। आर्द्रमूर्त्तेः स्नातस्येत्यर्थः यस्य पाण्ड्यस्य प्रीत्या स्नेहेन नतु दाक्षिण्येन सुस्नातं पृच्छतीति सौस्नातिको भवति। पृच्छतौ सुस्नातादिभ्य इत्युपसंख्यानात् ठक् ॥ ६१॥

अस्त्रमिति। पुरा पूर्व्वं जनस्थानस्य खरालयस्य विमर्द्दशङ्की दृप्त उद्धतो लङ्काधिपती रावणः दुरापं दुर्लभमस्त्रं ब्रह्मशिरोनामकं हरादाप्तवता येन पाण्ड्येन सन्धाय इन्द्रलोकावजयाय इन्द्रलोकं जेतुं प्रतस्थे। इन्द्रविजयिनो रावणस्यापि विजेतेत्यर्थः ॥ ६२॥

अनेनेति। महाकुलीनेन महाकुले जातेन। महाकुलादञ्खञाविति खञ्प्रत्ययः। अनेन पाण्ड्येन पाणौ त्वदीये विधिवद्यथाशास्त्रं

रत्नानुविद्धार्णवमेखलायाः
दिशः सपत्नी भव दक्षिणस्याः ॥ ६३ ॥

ताम्बूलवल्लीपरिणद्धपूगा-
स्वेलालतालिङ्गितचन्दनासु ।
तमालपत्रास्तरणासु रन्तुं
प्रसीद शश्वन्मलयस्थलीषु ॥ ६४ ॥

इन्दीवरश्यामतनुर्नृपोऽसौ
त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां
योगस्तडित्तोयदयोरिवास्तु ॥ ६५ ॥

रुह्यते सति गुर्वी गुरुः । वोतोगुणवचनादिति ङीप् । मह्यीव रत्नैरनुविद्धोव्याप्तोऽर्णवएव मेखला यस्यास्तस्याः । इदं विशेषणं मह्यामिन्दुमत्याञ्च योज्यम् । दक्षिणस्यादिशः सपत्नी भव । अनेन सपत्न्यन्तराभावोध्वन्यते ॥ ६३ ॥

ताम्बूलेति । ताम्बूलवल्लीभिर्नागवल्लीभिः परिणद्धाः परिरब्धाः पूगाः क्रमुकाः यासु । ताम्बूलवल्ली ताम्बूली नागवल्ल्यपीति, घोण्टा तु पूगः क्रमुकइति चामरः । एलालताभिरालिङ्गिताश्चन्दना मलयजा यासु तासु । गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियामित्यमरः । तमालस्य तापिच्छस्य पत्राण्येवास्तरणानि यासु तासु । कालस्कन्धस्तमालः स्यात्तापिच्छोऽपीत्यमरः । मलयस्थलीषु शश्वत् मुहुः सदा वा रन्तुं प्रसीद अनुकूला भव ॥ ६४ ॥

इन्दीवरेति । असौ नृपः इन्दीवरश्यामतनुः त्वं रोचना गौरो-

स्वसुर्विदर्भाधिपतेस्तदीयो
लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे
नक्षत्रनाथांशुरिवारविन्दे ॥ ६६ ॥

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥ ६७ ॥

तस्यां रघोः सूनुरुपस्थितायां
वृणीत मां नेति समाकुलोऽभूत् ॥

चनेव गौरी शरीरयष्टिर्यस्याः सा ततस्तडित्तोयदयोः विद्युन्मेघयोरिव वा युवयोर्योगः समागमोऽन्योन्ययोग्ययोः परिच्छिद्यतेऽस्तु ॥ ६५ ॥

स्वसुरिति । विदर्भाधिपतेर्भोजस्य स्वसुरिन्दुमत्याः चेतसि तदीयः सुनन्दासम्बन्धी उपदेशो वाक्यं दिवाकरस्यादर्शनेन बद्धकोशे मुकुलिते अरविन्दे नक्षत्रनाथांशुः चन्द्रकिरण इव अन्तरमवकाशं न लेभे ॥ ६६ ॥

सञ्चारिणीति । पतिंवरा सा इन्दुमती रात्रौ सञ्चारिणी दीपशिखेव यं यं भूपालं व्यतीयाय अतीत्य गता स स भूमिपालः स सर्व इत्यर्थः । नित्यवीप्सयोरिति वीप्सायां द्विर्वचनम् । नरेन्द्रमार्गे राजपथे अट्टाख्यो गृहभेद इव । स्यादट्टः क्षौममस्त्रियामित्यमरः । विवर्णभावं विच्छायत्वम् अट्टस्तु तमोवृततां प्रपेदे ॥ ६७ ॥

तस्यामिति । तस्यामिन्दुमत्यामुपस्थितायामासन्नायां सत्यां रघोः सूनुरजः मां वृणीत न वेति समाकुलः संशयितोऽभूत् । अथास्याजस्य

वामेतरः संशयमस्य बाहुः
केयूरबन्धोच्छ्वसितैर्नुनोद ॥ ६८ ॥

तं प्राप्य सर्व्वावयवानवद्यं
व्यावर्त्ततान्योपगमात् कुमारी ।
न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति षट्पदाली ॥ ६९ ॥

तस्मिन् समावेशितचित्तवृत्ति-
मिन्दुप्रभामिन्दुमतीमवेक्ष्य ।

वामेतरो वामादितरो दक्षिणो बाहुः केयूरं बध्यतेऽनेनेति केयूरबन्धोऽङ्गदस्थानं तस्योच्छ्वसितैः स्फुरणैः संशयं नुनोद ॥ ६८ ॥

तमिति । कुमारी सर्व्वेष्ववयवेषु अनवद्यमदोषं तमजं प्राप्य अन्योपगमाद्राजान्तरोपगमात् व्यावर्त्तत निवृत्ता । तथाहि षट्पदाली भृङ्गावलिः प्रफुल्लतीति प्रफुल्लं विकसितं पुष्पितमित्यर्थः । प्रपूर्व्वात् फुल्लतेः पचाद्यच् फलतेस्तु प्रफुल्तमिति पठितव्यम् अनुपसर्गादिति निषेधादित्युभयथापि न कदाचिदनुपपत्तिरित्युक्तं प्राक् । सहकारं चूतविशेषमेत्य । आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभ इत्यमरः । वृक्षान्तरं न काङ्क्षति । न हि सर्व्वोत्कृष्टवस्तुलाभेऽपि वस्त्वन्तरस्याभिलाषः स्यादित्यर्थः ॥ ६९ ॥

तस्मिन्निति । तस्मिन्नजे समावेशिता संक्रामिता चित्तवृत्तिर्यया ताम् इन्दोः प्रभेव प्रभा यस्यास्ताम् । आह्लादकत्वादिन्दुसाम्यम् । इन्दुमतीमवेक्ष्य अनुक्रमज्ञा वाक्यपौर्वापर्य्याभिज्ञा सुनन्दा इदं वक्ष्यमाणं सविस्तरं सप्रपञ्चम् । प्रथने वावशब्द इति घञोनिषेधात् ऋदोरप्

प्रचक्रमे वक्तुमनुक्रमज्ञा
सविस्तरं वाक्यमिदं सुनन्दा॥ ७०॥
इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत्।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः॥ ७१॥
महेन्द्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकिलीलः।

इत्यप्प्रत्ययः। विस्तारोविग्रहोव्यासः सच शब्दस्य विस्तर इत्यमरः। वाक्यं वक्तु प्रचक्रमे॥ ७०॥

इक्ष्वाक्विति। इक्ष्वाकोर्मनुपुत्रस्य वंशे भवः नृपाणां ककुदं श्रेष्ठः। ककुच्च ककुदं श्रेष्ठे वृषांसे राजलक्ष्मणीति विश्वः। आहित लक्षणः प्रख्यातगुणः। गुणैः प्रतीते तु कृतलक्षणाहितलक्षणावित्यमरः। ककुदि वृषांसे तिष्ठतीति ककुत्स्थ इति प्रसिद्धः कश्चित् राजा अभूत् यतः ककुत्स्थादारभ्य उन्नतेच्छा महाशयाः। महेच्छस्तु महाशय इत्यमरः। उत्तरकोशलेन्द्रा राजानो दिलीपादयः श्लाघ्यं प्रशस्तं ककुत्स्थस्यापत्यं पुमान् काकुत्स्थइति शब्दं संज्ञां दधति बिभ्रति। तन्नामसंस्पर्शोपि वंशस्य कीर्त्तिकर इति भावः। पुरा किल पुरञ्जयो नाम साक्षाद्भगवतोविष्णोरंशावतारः कश्चिदैक्ष्वाको राजा देवैः सह समयबन्धेन देवासुरयुद्धे महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा पिनाकिलीलया निखिलमसुरकुलं निहत्य ककुत्स्थसंज्ञां लेभे इति-पौराणिकी कथानुसन्धेया वक्ष्यते चायमेवार्थ उत्तरश्लोके॥ ७१॥

महेन्द्रमिति। यः ककुत्स्थः संयति युद्धे महानुक्षा महोक्ष।

चकार वाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥ ७२ ॥
ऐरावतास्फालनविश्लथं यः
सङ्घट्टयन्नङ्गदमङ्गदेन।
उपेयुषः स्वामपि मूर्त्तिमग्र्या
मर्द्धासनं गोत्रभिदोऽधितष्ठौ ॥ ७३ ॥
जातः कुले तस्य किलोरुकीर्त्तिः
कुलप्रदीपो नृपतिर्द्दिलीपः।

अवतरेति निपातः। तस्य रूपमिव रूपं यस्य तं महेन्द्रमास्थायारुह्य अतएव प्राप्ता पिनाकिनः ईश्वरस्य लीला येन स तथोक्तः सन् वाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखा निवृत्तपत्ररचनाश्चकार तद्भर्त्तृनसुरानवधीदित्यर्थः। नहि विधवाः प्रसाध्यन्त इति भावः ॥ ७२ ॥

ऐरावतेति। यः ककुत्स्थः, ऐरावतस्य स्वर्गजस्यास्फालनेन ताड़नेन विश्लथं शिथिलमङ्गदमैन्द्रम् अङ्गदेन स्वकीयेन सङ्घट्टयन् सङ्घर्षयन् स्वां मघ्र्यां श्रेष्ठां मूर्त्तिमुपेयुषोपि प्राप्तस्यापि गोत्रभिद इन्द्रस्य अर्द्धमासनस्यार्द्धासनम्। अर्द्धं नपुंसकमिति समासः। अधितष्ठौ अधिष्ठितवान्। स्थादिष्वभ्यासेन चाभ्यासस्येति अभ्यासेन व्यवायेपि षत्वम्। न केवलं महोक्षरूपधारिण एव तस्य ककुदमारुरुक्षत् किन्तु निजरूपधारिणोऽपि इन्द्रस्यार्द्धासनमित्यपिशब्दार्थः। अथवा अर्द्धासनमपीत्येरन्वयः ॥ ७३ ॥

जातइति। उरुकीर्त्तिर्महायशाः कुलप्रदीपो दिलीपो नृपतिस्तस्य ककुत्स्थस्य कुले जातः किल योदिलीपः प्रजाभ्युदयाविनिवृत्तये न

अतिष्ठदेकोनशतक्रतुत्वे
शक्राभ्यसूयाविनिवृत्तये यः ॥ ७४ ॥
यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे गतानाम्।
वातोऽपि नास्रंसयदंशुकानि
कोलम्बयेदाहरणाय हस्तम् ॥ ७५ ॥
पुत्रोरघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजितः प्रयोक्ता।
चतुर्दिगावर्जितसम्भृतां यो
मृत्पात्रशेषामकरोद्विभूतिम् ॥ ७६ ॥

त्वगत्येति भावः एकेनोनाः शतं क्रतवो यस्य स एकोनशतक्रतुस्तस्य भावे तत्त्वेऽतिष्ठत् इन्द्रप्रीतये शततमं क्रतुमवशेषितवानित्यर्थः ॥ ७४ ॥

यस्मिन्निति। यस्मिन् दिलीपे महीं शासति सति विहरन्त्यत्रेति विहारः क्रीडास्थानं तस्यार्द्धपथे निद्रां गतानां वाणिनीनां मत्ताङ्गनानाम्। वाणिनी नर्त्तकी मत्ता विदग्धवनितासु चेति विश्वः। वाणिन्यो नर्त्तकीमत्ते इत्यमरश्च। अंशुकानि वस्त्राणि वातोऽपि नास्रंसयत् नाकम्पयत् आहरणाय अपहर्तुं को हस्तं लम्बयेत्। तस्य आज्ञासिद्धत्वादकुतोभयसञ्चाराः प्रजा इत्यर्थः। अर्द्धश्चासौ पन्थाश्चेति विग्रहः समप्रविभागे प्रमाणाभावात् नैकदेशिसमासः ॥ ७५ ॥

पुत्र इति। विश्वजितो नाम महाक्रतोः प्रयोक्ता अनुष्ठाता तस्य दिलीपस्य पुत्रो रघुः पदं पैतृकमेव प्रशास्ति पालयति यो रघुश्च चतसृभ्यो दिग्भ्यः आवर्जिता आहृता सम्भृता सम्यगर्जिता च या तां

आरूढमद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम्।
ऊर्द्ध्वं गतं यस्य न चानुबन्धि
यशः परिच्छेत्तुमियत्तयालम्॥ ७७॥
असौ कुमारस्तमजोऽनुजात-
स्त्रिविष्टपस्येव पतिं जयन्तः।
गुर्वीं धुरं यो भुवनस्य पित्रा
धुर्य्येण दम्यः सदृशं बिभर्त्ति॥ ७८॥

यतदिग्जयार्ज्जितसम्भृतां विभूतिं समग्रं स्वत्वात्मसेव शेषीयस्वामा मकरोत् विश्वजिद्यागस्य सर्वस्वदक्षिणाकत्वादित्यर्थः॥ ७९॥

आरूढमिति। किञ्च अद्रीनारूढम् उदधीन् वितीर्णम् अवगाढं सकलभूगोलव्यापकमित्यर्थः भुजङ्गमानां वसतिं पातालं प्रविष्टम् ऊर्द्ध्वं स्वर्गादिकं गतं व्याप्तम् इत्थं सर्वदिग्व्यापीत्यर्थः अनुबध्नातीत्यनुबन्धि च अविच्छेदकालत्रयव्यापकञ्चेत्यर्थः अतएवैवंभूतं यस्य यशः इयत्तया देशतः कालतोवा केनचिन्मानेन परिच्छेत्तुं परिमातुं नालं न शक्यम् ॥ ७७॥

असाविति। असावजाख्यः कुमारः त्रिविष्टपस्य स्वर्गस्य पतिमिन्द्रं जयन्तइव। जयन्तः पाकशासनिरित्यमरः। तं रघुमनुजातः तस्माज्जातइत्यर्थः। तज्जातोऽपि तदनुजातो भवति जन्यजनकयोरानन्तर्य्यात्। गत्यर्थाकर्म्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्चेति क्तः। सोपसृष्टत्वात् सकर्म्मकत्वम् आह चात्रैव सूत्रे वृत्तिकारः श्लिषादयः सोपसृष्टाः सकर्म्मकाः भवन्तीति। दम्यः शिक्षणीयावस्थः योऽजः गुर्वीं भुवनस्य धुरं धुर्य्येण धुरन्धरेण चिरनिरूढेन पित्रा

कुलेन कान्त्या वयसा नवेन
गुणैश्च तैस्तैर्विनयप्रधानैः।
त्वमात्मनस्तुल्यममुं वृणीष्व
रत्नं समागच्छतु काञ्चनेन ॥ ७९ ॥

ततः सुनन्दावचनावसाने
लज्जां तनूकृत्य नरेन्द्रकन्या।
दृष्ट्या प्रसादामलया कुमारं
प्रत्यग्रहीत् संवरणस्रजेव ॥ ८० ॥

सदृशं तुल्यं यथा तथा बिभर्त्ति। यथा कश्चिद्वत्सतरोपि धुर्य्येण महोक्षेण समं वहतीत्युपमालङ्कारोऽभ्यन्यते। दम्यवत्सतरौ समावित्यमरः ॥ ७८ ॥

कुलेनेति। कुलेन कान्त्या लावण्येन नवेन वयसा यौवनेन विनयः प्रधानं येषां तैः तैस्तैर्गुणैः श्रुतशीलादिभिश्च आत्मनस्तुल्यं स्वानुरूपममुमजं त्वं वृणीष्व किं बहुना रत्नं काञ्चनेन समागच्छतु सङ्गच्छताम्। प्रार्थनायां लोट्। रत्नकाञ्चनयोरिवात्यन्तानुरूपत्वाद्युवयोः समागमः प्रार्थ्यत इत्यर्थः ॥ ७९ ॥

तत इति। ततः सुनन्दावचनस्यावसानेऽन्ते नरेन्द्रकन्या इन्दुमती लज्जां तनूकृत्य* सङ्कोच्य प्रसादेन मनःप्रसादेनामलया प्रसन्नया दृष्ट्या संवरणस्य स्रजा स्वयं वरणार्थं स्रजेव कुमारमजं प्रत्यग्रहीत् स्वीचकार। सम्यगनुरागमपश्यदित्यर्थः ॥ ८० ॥

सेति। सा कुमारी यूनि तस्मिन्नजे अभिलाषबन्धम् अनुराग-पन्धिं शालीनतया अधृष्टतया। स्यादधृष्टस्तु शालीन इत्यमरः।

सा यूनि तस्मिन्नभिलाषबन्धं
शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्त्वा निराक्रामदरालकेश्याः ॥ ८१ ॥

तथागतायां परिहासपूर्वं
सख्यां सखी वेत्रभृदाबभाषे ।
आर्य्ये व्रजामोऽन्यत इत्यथैनां
वधूरसूयाकुटिलं ददर्श ॥ ८२ ॥

सा चूर्णगौरं रघुनन्दनस्य
धात्रीकराभ्यां करभोपमोरूः ।

शालीनकौपीने अधृष्टाकार्य्ययोरिति निपातः । वक्तुं न शशाक तथापि अरालकेश्याः सोऽभिलाषबन्धो रोमाञ्चलक्ष्येण पुलकव्याजेन । व्याजोऽपदेशो लक्ष्यञ्चेत्यमरः । गात्रयष्टिं भित्त्वा निराक्रामत् सात्त्विकाविर्भावलिङ्गेन प्रकाशितइत्यर्थः ॥ ८१ ॥

तथेति । सख्यामिन्दुमत्यां तथागतायां तथाभूतायां दृष्टानुरागायां सत्यामित्यर्थः सखी सहचरी । सख्यशिश्वीति भाषायामिति निपातनात् ङीप् । वेत्रभृत् सुनन्दा हे आर्य्ये पूज्ये अन्यतोऽन्यं प्रतिव्रजाम इति परिहासपूर्व्वमाबभाषे । अथ वधूरिन्दुमती एनां सुनन्दाम् असूयया रोषेण कुटिलं ददर्श अन्यगमनस्यासह्यत्वादित्यर्थः ॥ ८२ ॥

सेति । करभः करप्रदेशविशेषः । मणिबन्धादाकनिष्ठं करस्य करभोवहिरित्यमरः । करभउपमा ययोस्तावूरू यस्याः सा करभोपमोरूः । ऊरूत्तरपदादौपम्यइत्यूङ्प्रत्ययः । सा कुमारी चूर्णेन

आसञ्जयामास यथाप्रदेशं
कण्ठे गुणं मूर्त्तमिवानुरागम् ॥ ८३ ॥

तया स्रजा मङ्गलपुष्पमय्या
विशालवक्षःस्थललम्बया सः।
अमंस्त कण्ठार्पितबाहुपाशां
विदर्भराजावरजां वरेण्यः ॥ ८४ ॥

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ ८५ ॥

मङ्गलचूर्णेन गौरं लोहितं गुणं स्रजं मूर्त्तं मूर्त्तिमन्तमनुरागमिव धात्री उपमाता सुनन्दा कराभ्यां रघुनन्दनस्याजस्य कण्ठे यथा प्रदेशं यथास्थानम् आसञ्जयामास आसक्तं कारयामास न तु स्वयमासञ्जत् अनौचित्यात् ॥ ८३ ॥

तयेति। वरेण्यो वरणीय उत्कृष्टः। वृञ एण्यः। सोऽजः मङ्गलपुष्पमय्या मधूकादिकुसुममय्या विशालवक्षःस्थले लम्बया लम्बमानया तया प्रकृतया स्रजा विदर्भराजावरजामिन्दुमतीं कण्ठार्पितौ बाहुपाशौ यया तामिवामंस्त। मन्यतेर्लुङ्। बाहुपाशकल्पगुणसम्बन्धदृ- ष्टिरियं ॥ ८४ ॥

शशिनमिति। तत्र स्वयंवरे समगुणयोस्तुल्यगुणयोः इन्दुमतीरघुनन्दनयो योगेन प्रीतिर्येषां ते समगुणयोगप्रीतयः पौराः पुरेभवा जनाः इयमनल्पमङ्गला इन्दुमती मेघैर्मुक्तं शशिनं चन्द्रमुपगतां

प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतोवितानम्।
उषसि सरइव प्रफुल्लपद्मं
कुमुदवनप्रतिपन्ननिद्रमासीत् ॥ ८६ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
स्वयंवरवर्णनो नाम षष्ठः सर्गः।

कौमुदी, अनुरूपं सदृशं जलनिधिमवतीर्णा प्रविष्टा जह्नुकन्या भागीरथी तत्सदृशीत्यर्थः इत्येवं नृपाणां श्रवणयोः कटु परुषम् एकमविसंवादि वाक्यम् एकवाक्यं विवव्रुः। मालिनीवृत्तम् ॥ ८५ ॥

प्रमुदितेति। एकत एकत्र प्रमुदितोहृष्टो वरस्य जामातुः पक्षो वर्गो यस्य तत्तथोक्तम् अन्यतोऽन्यत्र वितानं शून्यं भग्नाशत्वादप्रहृष्टमित्यर्थः तत् क्षितिपतिमण्डलम् उषसि प्रभाते प्रफुल्लपद्मं कुमुदवनेन प्रतिपन्ननिद्रं प्राप्तनिमीलनं सरइव सरस्तुल्यमासीत्। पुष्पिताग्रा वृत्तमेतत् ॥ ८६ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशटीकायां सञ्जीवनीसमाख्यायां षष्ठः सर्गः।



सप्तमः सर्गः ।



अथोपयन्त्रा सदृशेन युक्तां
स्कन्देन साक्षादिव देवसेनाम् ।
स्वसारमादाय विदर्भनाथः
पुरप्रवेशाभिमुखो बभूव ॥ १ ॥
सेनानिवेशान् पृथिवीक्षितोऽपि
जग्मुर्विभातग्रहमन्दभासः ।

भजेमहि निपीयैकं मुग्धरन्यं पयोधरम् ।
मार्गन्तं बालमालोक्याश्वासयन्तौ हि दम्पती ॥

अथेति । अथ विदर्भनाथो भोजः सदृशेनोपयन्त्रा वरेण युक्ताम् अतएव साक्षात्प्रत्यक्षम् । साक्षात्प्रत्यक्षतुल्ययोरित्यमरः । स्कन्देन युक्तां देवसेनामिव देवसेना नाम देवपुत्री स्कन्दपत्नी तामिव स्थितां स्वसारं भगिनीमिन्दुमतीमादाय गृहीत्वा पुरप्रवेशाभिमुखो बभूव । उपजातिवृत्तं सर्गेऽस्मिन् ॥ १ ॥

सेनेति । भोजस्य राज्ञोऽगोत्रापत्यं स्त्री भोज्या तामिन्दुमतीं प्रति बद्धमनोरथत्वात् रूपेषु आकृतिषु वेषेषु नेपथ्येषु च साभ्यसूयाः इर्षेन

भोज्यां प्रति व्यर्थमनोरथत्वात्
रूपेषु वेषेषु च साभ्यसूयाः ॥ २ ॥

सान्निध्ययोगात् किल तत्र शच्याः
स्वयंवरक्षोभकृतामभावः ।
काकुत्स्थमुद्दिश्य समत्सरोऽपि
शशाम तेन क्षितिपाललोकः ॥ ३ ॥

तावत्प्रकीर्णाभिनवोपचार
मिन्द्रायुधद्योतिततोरणाङ्कम् ।
वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम् ॥ ४ ॥

निन्दन्तः किञ्च विभाते प्रातःकाले ये ग्रहाः चन्द्रादयस्ते इव मन्दभासः क्षीणकान्तयः पृथिवीक्षितोऽन्पा अपि सेनानिवेशान् शिविराणि जग्मुः ॥ २ ॥

ननु क्रुद्धाश्चेद्युध्यन्तां तत्राह

सान्निध्येति। तत्र स्वयंवरक्षेत्रे शच्या इन्द्राण्याः सन्निधिरेव सान्निध्यं तस्य योगात् सद्भावाद्धेतोः स्वयंवरस्य क्षोभकृतां विघ्नकारिणामभावः किल। किलेति स्वयंवरविघातकाः शच्या विनाश्यन्त इत्यागमसूचनार्थम्। तेन हेतुना काकुत्स्थमजमुद्दिश्य समत्सरोऽपि क्षितिपाललोकः शशाम नाक्षुभ्यत् ॥ ३ ॥

तावदिति। यावत्तावच्च साकल्यइत्यमरः। तावत्प्रकीर्णाः साकल्येन प्रसारिताः अभिनवाः नूतनाः उपचाराः पुष्पप्रकारादयो यस्य तं तथोक्तम् इन्द्रायुधानीव द्योतितानि प्रकाशितानि तोरणानि अङ्का-

ततस्तदालोकनतत्पराणां
सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां
त्यक्तान्यकार्य्याणि विचेष्टितानि ॥ ५ ॥

आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न सम्भावित एव तावत्
करेण रुद्धोऽपि च केशपाशः ॥ ६ ॥

चिह्नानि यस्य तं ध्वजानां छाया ध्वजच्छायम् । छाया बाहुल्य इति नपुंसकत्वम् । तेन निवारितवष्ण आतपो यत्र तं राजमार्गं स वरो वोढा वध्वा सह प्राप विवेश ॥ ४ ॥

तत इति । ततस्तदनन्तरं चामीकरजालवत्सु सौवर्णगवाक्षयुक्तेषु सौधेषु तस्याजस्यालोकने तत्पराणाम् आसक्तानां पुरसुन्दरीणाम् इत्थं वक्ष्यमाणप्रकाराणि त्यक्तान्यन्यकार्य्याणि केशबन्धनादीनि येषु तानि विचेष्टितानि व्यापारा बभूवुः ॥ ५ ॥

तान्येवाह पञ्चभिः श्लोकैः

आलोकेति । सहसा आलोकमार्गं गवाक्षपथं व्रजन्त्या कयाचित् उद्वेष्टनवान्तमाल्यः उद्वेष्टनो द्रुतगतिवशात् उन्मुक्तबन्धनः अतएव वान्तमाल्यः बन्धविश्लेषेणोद्गीर्णमाल्यः करेण रुद्धो गृहीतोऽपि च केशपाशः केशकलापः । पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः । तावदालोकमार्गप्राप्तिपर्य्यन्तं बन्धुं बन्धनार्थं न सम्भावि-तो न चिन्तितः ॥ ६ ॥

प्रसाधिकालम्बितमग्रपाद
माक्षिप्य काचित् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षा
दलक्तकाङ्कां पदवीं ततान ॥ ७ ॥
विलोचनं दक्षिणमञ्जनेन
सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं
ययौ शलाकामपरा वहन्ती ॥ ८ ॥
जालान्तरप्रेषितदृष्टिरन्या
प्रस्थानभिन्नां न बबन्ध नीवीम् ।

प्रसाधिकेति । काचित् प्रसाधिकया अलङ्कर्त्र्या आलम्बितं रञ्जनार्थं धृतं द्रवरागमेव आर्द्रालक्तकमेव, अग्रश्चासौ पादश्चाग्रपाद इति कर्म्मधारयसमासः । हस्ताग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्यामिति वामनः । तमाक्षिप्याकृष्य उत्सृष्टलीलागतिः त्यक्तमन्दगमना सती आ गवाक्षाद्गवाक्षपर्य्यन्तं पदवीं मार्गमलक्तकाङ्कां लाक्षारागचिह्नां ततान विस्तारयामास ॥ ७ ॥

विलोचनमिति । अपरा स्त्री दक्षिणं विलोचनमञ्जनेन सम्भाव्यालङ्कृत्य संभ्रमादिति भावः, तद्वञ्चितं तेनाञ्जनेन वर्ज्जितं वामनेत्रं यस्याः सा सती तथैव शलाकामञ्जनतूलिकां वहन्ती सती वातायनसन्निकर्षं गवाक्षसमीपं ययौ । दक्षिणग्रहणं सम्भ्रमात् व्युत्क्रम करणद्योतनार्थं सव्यं हि पूर्वं मनुष्या अञ्जत इति श्रुतेः ॥ ८ ॥

जालेति । अन्या स्त्री जालान्तरप्रेषितदृष्टिः गवाक्षमध्यप्रेरित

नाभिप्रविष्टाभरणप्रभेण
हस्तेन तस्थाववलम्ब्य वासः ॥ ९ ॥
अर्द्धाञ्चिता सत्वरमुत्थितायाः
पदेपदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद्रशना तदानो
मङ्गुष्ठमूलार्पितसूत्रशेषा ॥ १० ॥
तासां मुखैरासवगन्धगर्भै
र्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन् ॥ ११ ॥

इष्टिः सती प्रस्थानेन गमनेन भिन्नां त्रुटितां नीवीं वसनग्रन्थिम् । नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवासस इति विश्वः । न वबन्ध किन्तु नाभिप्रविष्टा आभरणानां कङ्कणादीना प्रभा यस्य तेन । प्रभैव नाभेराभरणमभूदिति भावः । हस्तेन वासोऽवलम्ब्य गृहीत्वा तस्थौ ॥ ९ ॥

अर्द्धेति । सत्वरमुत्थितायाः कस्याश्चित् अर्द्धाञ्चिता मणिभिरर्द्धगुम्फिता दुर्निमित्ते संभ्रमाद्दुरुत्क्षिप्ते । डुमिञ् प्रक्षेपण इति धातोः कर्म्मणि क्तः । पदेपदे प्रतिपदम् । वीप्सायां द्विर्भावः । गलन्ती गलद्रत्ना सती रशना मेखला तदानीम् अङ्गुष्ठमूलेऽर्पितं सूत्रमेव शेषो यस्याः सा आसीत् ॥ १० ॥

तासामिति । तदानीं सान्द्रकुतूहलाना तासां स्त्रीणाम् आसव गन्धो गर्भे येषां तैः विलोलानि नेत्राण्येव भ्रमराः येषां तैर्मुखैः

ता राघवं दृष्टिभिरापिबन्त्यो
नार्य्यो न जग्मुर्विषयान्तराणि।
तथाहि शेषेन्द्रियवृत्तिरासां
सर्व्वात्मना चक्षुरिव प्रविष्टा ॥ १२ ॥

स्थाने वृता भूपतिभिः परोक्षैः
स्वयंवरं साधुममंस्त भोज्या।
पद्मेव नारायणमन्यथासौ
लभेत कान्तं कथमात्मतुल्यम् ॥ १३ ॥

व्याप्तान्तराश्छन्नावकाशा गवाक्षाः सहस्रपत्राभरणाइव कमलालङ्कृता इव। सहस्रपत्रं कमलमित्यमरः। आसन् ॥ ११ ॥

तादृति। ताः नार्य्यः रघोरपत्यं राघवम् अजम्। तस्यापत्य-मित्यण्प्रत्ययः। दृष्टिभिरापिबन्त्योऽतितृष्णया पश्यन्त्यो विषयान्तराणि अन्यान् विषयान् न जग्मुर्न विविदुरित्यर्थः। तथाहि आसां नारीणां शेषेन्द्रियवृत्तिः चक्षुर्व्यतिरिक्तश्रोत्रादीन्द्रियव्यापारः सर्व्वात्मना स्वरूप-कात्स्न्येन चक्षुः प्रविष्टेव। श्रोत्रादीनीन्द्रियाणि स्वातन्त्र्येण ग्रहणा-शक्तेः चक्षुरेव प्रविश्य कौतुकात्स्वयमप्येनम् उपलभन्ते किमु, अन्यथा स्वविषयाधिगमः किं न स्यादिति भावः ॥ १२ ॥

इत्थम् कथाइति वक्ष्यति ताः कथयति

स्थाने इत्यादिभिस्त्रिभिः। भोज्या इन्दुमती परोक्षैरदृष्टैर्भूपति-भिर्वृता ममैवेयमिति प्रार्थितापि स्वयंवरमेव साधु हितममंस्तमेने नतु परोक्षमेव कञ्चित्प्रार्थकं वव्रे, स्थाने युक्तमेतत्। युक्ते द्वे साम्प्रतं स्थाने इत्यमरः। कुतः अन्यथा स्वयंवराभावे असाविन्दुमती पद्मस्यालीति पद्मा लक्ष्मीः। अर्शआदिभ्योऽच् इत्यच् प्रत्ययः। नारायणमिव

परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत्॥ १४॥

रतिस्मरौ नूनमिमावभूतां
राज्ञां सहस्रेषु तथाहि बाला।
गतेयमात्मप्रतिरूपमेव
मनोहि जन्मान्तरसङ्गतिज्ञम्॥ १५॥

इत्युद्गताः पौरवधूमुखेभ्यः
शृण्वन् कथाः श्रोत्रसुखाः कुमारः।

आत्मतुल्यं स्वानुरूपं कान्तं पतिं कथं लभेत न लभेतैव सदसद्विवेकासौकर्य्यादिति भावः॥ १३॥

परस्परेणेति। स्पृहणीयशोभं सर्व्वाशास्यसौन्दर्य्यमिदं द्वन्द्वं मिथुनम्। द्वन्द्वं रहस्येत्यादिना निपातः। परस्परेण नायोजयिष्यत् चेत् न योजयेद्यदि तर्हि प्रजानां पत्युर्विधातुः अस्मिन् द्वये द्वन्द्वे रूप विधानयत्नः सौन्दर्य्यनिर्म्माणप्रयासो वितथोऽभविष्यत् एतादृशानुरूप स्त्रीपुंसान्तराभावादिति भावः। लिङ्निमित्ते लृङ् क्रियातिपत्तावितिलृङ्। कुतश्चित् कारणवैगुण्यात् क्रियाया अनभिनिष्पत्तिः क्रियातिपत्तिरिति वृत्तिकारः॥ १४॥

रतीति। रतिस्मरौ यौ नित्यसहचरावित्यभिप्रायः नूनं तावेव इयञ्चायञ्च इमौ दम्पती अभूताम् एतद्रूपेण उत्पन्नौ कुतः तथाहि इयं बाला राज्ञां सहस्रेषु राजसहस्रमध्ये सत्यपि व्यत्यासकारणे इति

उद्भासितं मङ्गलसंविधाभिः
सम्बन्धिनः सद्म समाससाद ॥ १६ ॥

ततोऽवतीर्य्याशु करेणुकायाः
स कामरूपेश्वरदत्तहस्तः ।
वैदर्भनिर्द्दिष्टमथो विवेश
नारीमनांसीव चतुष्कमन्तः ॥ १७ ॥

महार्हसिंहासनसंस्थितोऽसौ
सरत्नमर्घ्यं मधुपर्कमिश्रम् ।

भावः । आत्मप्रतिरूपं स्वतुल्यमेव । तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाइति दण्डी । गता प्राप्ता । तदपि कथं जातमतआह हि यस्मात् मनो जन्मान्तरसङ्गतिज्ञं भवति । तदेवेदमिति प्रत्यभिज्ञाभावेऽपि वासनाविशेषवशादनुभूतार्थेषु मनःप्रवृत्तिरस्तीति ॥ १५ ॥

इतीति । इति स्थाने इत्याद्युक्तप्रकारेण पौरवधूमुखेभ्यः उद्गताः उत्पन्नाः श्रोत्रयोः सुखाः मधुराः । सुखशब्दो विशेष्यनिघ्नः । पापपुण्यसुखादि चेत्यमरः । कथाः गिरः शृण्वन् कुमारोऽजः मङ्गलसंविधाभिः मङ्गलरचनाभिः उद्भासितं शोभितं सम्बन्धिनः कन्यादायिनः सद्म गृहं समाससाद प्राप ॥ १६ ॥

ततइति । ततोऽनन्तरं करेणुकायाः हस्तिन्याः सकाशात् आशु शीघ्रम् अवतीर्य्य कामरूपेश्वरे दत्तोहस्तोयेन सोऽजः अथो अनन्तरं वैदर्भेण निर्द्दिष्टं प्रदर्शितम् अन्तश्चतुष्कं चत्वरं नारीणां मनांसीव विवेश ॥ १७ ॥

महार्हेति । महार्हसिंहासने संस्थितोऽसौ अजः भोजेनोपनीतं रत्नैः सहितं सरत्नं मधुपर्कमिश्रम् अर्घ्यं पूजासाधनद्रव्यं दुकूलयोः

भोजोपनीतञ्च दुकूलयुग्मं
जग्राह सार्द्धं वनिताकटाक्षैः ॥ १८ ॥

दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः।
वेलासकाशं स्फुटफेनराजि
र्नवैरुदन्वानिव चन्द्रपादैः ॥ १९ ॥

तत्रार्च्चितोभोजपतेः पुरोधाः
हुत्वाग्निमाज्यादिभिरग्निकल्पः।
तमेव चाधाय विवाहसाक्ष्ये
वधूवरौ सङ्गमयाञ्चकार ॥ २० ॥

क्षौमयोर्युग्मञ्च वनिताकटाक्षैः अन्यस्त्रीणामपाङ्गदर्शनैः सार्द्धं जग्राह गृहीतवान् ॥ १८ ॥

दुकूलेति। दुकूलवासाः सोऽजः विनितैर्नम्रैरवरोधरक्षैरन्तःपुराधिकृतैः वधूसमीपं निन्ये। तत्र दृष्टान्तः स्फुटफेनराजिरुदन्वान् समुद्रः नवैर्नूतनैश्चन्द्रपादैश्चन्द्रकिरणैः वेलायाः सकाशं समीपमिव। पूर्णदृष्टान्तोऽयम् ॥ १९ ॥

तत्रेति। तत्र सद्मन्यर्च्चितः पूजितोऽग्निकल्पोऽग्नितुल्योभोजपतेः भोजदेशाधीश्वरस्य पुरोधाः पुरोहितः। पुरोधास्तु पुरोहितः इत्यमरः। आज्यादिभिर्द्रव्यैरग्निं हुत्वा तमेव चाग्निं विवाहसाक्ष्ये आधाय साक्षिणं कृत्वेत्यर्थः, वधूवरौ सङ्गमयाञ्चकार योजयामास ॥ २० ॥

हस्तेन हस्तं परिगृह्य बध्वाः
स राजसूनुः सुतरां चकाशे।
अनन्तराशोकलताप्रवालं
प्राप्येव चूतः प्रतिपल्लवेन ॥ २१ ॥

आसीद्वरः कण्टकितप्रकोष्ठः
स्विन्नाङ्गुलिः संववृते कुमारी।
तस्मिन् द्वये तत्क्षणमात्मवृत्तिः
समं विभक्तेव मनोभवेन ॥ २२ ॥

हस्तेनेति। स राजसूनुः हस्तेन स्वकीयेन बध्वाः हस्तं परिगृह्य अनन्तरायाः सन्निहितायाः अशोकलतायाः प्रवालं पल्लवं प्रतिपल्लवेन स्वकीयेन प्राप्य चूत आम्र इव सुतरां चकाशे ॥ २१ ॥

आसीदिति। वरः कण्टकितः पुलकितः प्रकोष्ठोयस्य स आसीत्। सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकइत्यमरः। कुमारी स्विन्नाङ्गुलिः संववृते बभूव। अत्रोत्प्रेक्ष्यते तस्मिन् द्वये मिथुने तत्क्षणमात्मवृत्तिः सात्त्विकोदयरूपा वृत्तिः मनोभवेन कामेन समं विभक्तेव पृथक् कृतेव। अपरार्द्धस्य पाठान्तरे व्याख्यानान्तरम्। पाणिसमागमेन पाण्योः संस्पर्शेन कर्त्रा तयोर्वधूवरयो मनोभवस्य वृत्तिः स्थितिः समं विभक्तेव समीकृतेवेत्यर्थः। प्राक्सिद्धस्याप्यनुरागसाम्यस्य संप्रति तत्कार्यदर्शनात् पाणिस्पर्शकृतत्वमुत्प्रेक्ष्यते। अत्र वात्स्यायनः कन्या तु प्रथमसमागमे स्विन्नाङ्गुलिः स्विन्नमुखी च पुरुषस्तु रोमाञ्चितो- भवति एभिरनयोर्भावं परीक्षेतेति। स्त्रीपुरुषयोः स्वेदरोमाञ्चाभि- धानं सात्त्विकमात्रोपलक्षणं नतु प्रतिनियमोविवक्षितः एभिरिति

तयोरपाङ्गप्रतिसारितानि
क्रियासमापत्तिनिवर्त्तितानि।
ह्रीयन्त्रणामानशिरे मनोज्ञा
मन्योन्यलोलानि विलोचनानि ॥ २३ ॥

प्रदक्षिणप्रक्रमणात् कृशानो
रुदर्च्चिषस्तन्मिथुनं चकाशे।
मेरोरुपान्तेष्विव वर्त्तमान
मन्योन्यसंसक्तमहस्त्रियामम् ॥ २४ ॥

बहुवचनसामर्थ्याद्। एवं सति कुमारसम्भवे रोमोद्गमः प्रादुरभूदु-मायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् इति व्युत्क्रमवचनं न दोषा-येति ॥ २२ ॥

तयोरिति। अपाङ्गेषु नेत्रप्रान्तेषु प्रतिसारितानि प्रवर्त्तितानि क्रिययोर्निरीक्षणलक्षणयोः समापत्त्या यदृच्छासङ्गत्या निवर्त्तितानि प्रत्याहृतानि अन्योन्यस्मिन् लोलानि सतृष्णानि। लोलश्चलसतृष्णयो-रित्यमरः। तयोर्दम्पत्योर्विलोचनानि दृष्टयः मनोज्ञां रम्यां ह्रिया निमित्तेन यन्त्रणां सङ्कोचमानशिरे प्रापुः ॥ २३ ॥

प्रदक्षिणेति। तन्मिथुनम् उदर्च्चिष उन्नतज्वालस्य कृशानोर्वह्नेः प्रदक्षिणप्रक्रमणात् प्रदक्षिणीकरणात्, मेरोरुपान्तेषु समीपेषु वर्त्त-मानमावर्त्तमानं मेरुं प्रदक्षिणीकुर्वदित्यर्थः अन्योन्यसंसक्तं परस्पर सङ्गतं मिथुनस्यापेतद्विशेषणम् अहश्च त्रियामा चाहस्त्रियामं रात्रि-न्दिवमिव। समाहारे द्वन्द्वैकवद्भावः। चकाशे दिदीपे ॥ २४ ॥

नितम्बगुर्वी गुरुणा प्रयुक्ता
वधूर्विधातृप्रतिमेन तेन।
चकार सा मत्तचकोरनेत्रा
लज्जावती लाजविसर्गमग्नौ ॥ २५ ॥

हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः।
कपोलसंसर्पिशिखः स तस्याः
मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥ २६ ॥

तदञ्जनक्लेदसमाकुलाक्षं
प्रम्लानबीजाङ्कुरकर्णपूरम्।

नितम्बेति। नितम्बेन गुर्वी अलघ्वी। हुर्वरालघुनोर्गुर्वीति शाश्वतः। विधातृप्रतिमेन ब्रह्मतुल्येन तेन गुरुणा याजकेन प्रयुक्ता जुहुधीति नियुक्ता मत्तचकोरस्येव नेत्रे यस्याः सा लज्जावती सा वधूरग्नौ लाजविसर्गं चकार ॥ २५ ॥

हविरिति। हविष आज्यादेः शमीपल्लवानां लाजानाञ्च गन्धोऽस्यास्तीति हविःशमीपल्लवलाजगन्धी। शमीपल्लवमिश्रान् लाजान् अञ्जलिना वपतीति कात्यायनः। पुण्योधूमः कृशानोः पावकादुदियाय उद्भूतः। कपोलयोः संसर्पिणी प्रसरणशीला शिखा यस्य स तथोक्तः स धूमस्तस्याः वध्वाः मुहूर्त्तं कर्णोत्पलतां प्रपेदे ॥ २६ ॥

तदिति। तद्वधूमुखम् आचारेण प्राप्नाद्धूमग्रहणात् अञ्जनस्य क्लेदोऽञ्जन क्लेदः अञ्जनमिश्रवाष्पोदकमित्यर्थः। तेन समाकुलाक्षं

वधूमुखं पाटलगण्डलेख
माचारधूमग्रहणाद्बभूव॥२७॥
तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।
कन्याकुमारौ कनकासनस्था
वार्द्राक्षतारोपणमन्वभूताम्॥ २८॥
इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः॥२९॥

प्रम्लानो वीजाङ्कुरो यवाङ्कुरएव कर्णपूरोऽवतंसो यस्य तत् पाटलगण्डलेखमरुणगण्डस्थलञ्च बभूव॥ २७॥

ताविति। कनकासनस्थौ तौ कन्याकुमारौ स्नातकैर्गृहस्थविशेषैः। स्नातकस्त्वाप्लुतोव्रतीत्यमरः। बन्धुमता बन्धुपुरःसरेणेत्यर्थः राज्ञा च पुरन्ध्रिभिः पतिपुत्रवतीभिर्नारीभिश्च क्रमशः प्रयुक्तं स्नातकादीनां पूर्व्वपूर्व्ववैशिष्ट्यात् क्रमेण क्रतमार्द्राक्षतानामारोपण मन्वभूतामनुभूतवन्तौ॥ २८॥

इतीति। अधिश्रीरधिकसम्पन्नोभोजकुलप्रदीपः स राजा इति स्वसुरिन्दुमत्याः पाणिग्रहणं विवाहं सम्पाद्य कारयित्वा महीपतीनां राज्ञां पृथगेकैकशः अर्हणार्थं पूजार्थम् अधिकृतानधिकारिणः समादिदेशाज्ञापयामास॥ २९॥

लिङ्गैरिति। मुदः सन्तोषस्य लिङ्गैश्चिह्नैः कपटहासादिभिः-

लिङ्गैर्मुदः संवृतविक्रियास्ते
ह्रदाः प्रसन्ना इव गूढनक्राः।
वैदर्भमामन्त्र्य ययुस्तदीयां
प्रत्यर्प्य पूजामुपदाच्छलेन ॥३०॥

स राजलोकः कृतपूर्वसंवि
दारम्भसिद्धौ समयोपलभ्यम्।
आदास्यमानः प्रमदामिषं त-
दावृत्य पन्थानमजस्य तस्थौ ॥३१॥

संवृत विक्रियाः निगूहितमत्सराः अतएव प्रसन्नाबहिर्निर्मलाः गूढनक्राः अन्तर्लीनग्रहाः ह्रदाइव स्थिताः ते नृपाः वैदर्भं भोजमामन्त्र्यापृच्छ्य तदीयां वैदर्भीयां पूजामुपदाच्छलेन उपायनमिषेण प्रत्यर्प्य ययुः गतवन्तः ॥ ३० ॥

सइति। आरम्भसिद्धौ कार्य्यसिद्धौ विषये पूर्व्वं कृता कृतपूर्व्वा। सुप्सुपेति समासः। कृतपूर्व्वा संवित् सङ्केतोमार्गावरोधरूपउपायो येन स तथोक्तः। संवित् युद्धे प्रतिज्ञायां सङ्केताचारनामस्विति केशवः। स राजलोकः समयोपलभ्यम् अजप्रस्थानकाले लभ्यं तदा तस्यैकाकित्वादिति भावः। समरोपलभ्यमिति पाठे युद्धसाध्यमित्यर्थः। तत् प्रमदैवामिषं भोग्यवस्तु। आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनीति केशवः। आदास्यमानोग्रहीष्यमाणः सन् अजस्य पन्थानमावृत्यावरुध्य तस्थौ ॥ २१ ॥

भर्त्तेति। अनुष्ठितः सम्पादितः अनन्तरजाया अनुजाया विवाहो येन स तथोक्तः क्रथकैशिकानां देशानां भर्त्ता स्वामी भोजोऽपि तावत्तदा

भर्त्तापि तावत् क्रथकैशिकाना
मनुष्ठितानन्तरजाविवाहः।
सत्त्वानुरूपाहरणीकृतश्रीः
प्रास्थापयद्राघवमन्वगाच्च ॥३२॥

तिस्रस्त्रिलोकीप्रथितेन सार्द्ध
मजेन मार्गे वसतीरुषित्वा।
तस्मादपावर्त्तत कुण्डिनेशः
पर्वात्यये सोमइवोष्णरश्मेः ॥३३॥

प्रमन्यवः प्रागपि कोशलेन्द्रे
प्रत्येकमात्तस्वतया बभूवुः।

सत्वानुरूपमुत्साहानुरूपं यथा तथा आ समन्तात्। अनेनानियत-वस्तुदानमित्यर्थः। हरणं कन्यायै देयं धनम्। यौतुकादि तु यद्देयं सदायोहरणञ्च तदित्यमरः। अहरणं हरणीकृता श्रीर्येन तथोक्तः सन् राघवमजं प्रास्थापयत् प्रस्थापितवान् स्वयमन्वगात् अनुजगाम च ॥ ३२ ॥

तिस्रइति। कुण्डिनं विदर्भनगरं तस्येशोभोजः त्रिषु लोकेषु प्रथितेनाजेन सार्द्धं मार्गे पथि तिस्रोवसतीरात्रीरुषित्वा। वसती रात्रिवेश्मनोरित्यमरः। कालाध्वनोरत्यन्तसंयोगे इति द्वितीया। पर्वात्यये दर्शान्ते उष्णरश्मेः सूर्यात् सोमश्चन्द्रइव, तस्मादजादपावर्त्तत तं विसृज्य निवृत्तइत्यर्थः ॥ ३३ ॥

प्रमन्यवइति। नृपाः राजानः प्रागपि प्रत्येकमात्तस्वतया दिग्विजये गृहीतधनत्वेन कोशलेन्द्रे रघौ प्रमन्यवो रूढवैरा बभूवुः अतो

अतोनृपाश्चक्षमिरे समेताः
स्त्रीरत्नलाभं न तदात्मजस्य ॥३४॥

तमुद्वहन्तं पथि भोजकन्यां
रुरोध राजन्यगणः स दृप्तः।
बलिप्रदिष्टां श्रियमाददानं
त्रैविक्रमं पादमिवेन्द्रशत्रुः ॥३५॥

तस्याः स रक्षार्थमनल्पयोध
मादिश्य पित्र्यं सचिवं कुमारः।
प्रत्यग्रहीत् पार्थिववाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः ॥३६॥

हेतोः समेताः सङ्गताः सन्तः तदात्मजस्य रघुसूनोः स्त्रीरत्नलाभं न चक्षमिरे न सेहिरे ॥ ३४ ॥

तमिति। दृप्तः उद्धतः स राजन्यगणोराजसङ्घातो भोजकन्यामुद्वहन्तं नयन्तं तमजं बलिना वैरोचनिना प्रदिष्टां दत्तां श्रियमाददानं स्वीकुर्व्वाणं त्रिविक्रमस्येमं त्रैविक्रमं पादमिन्द्रशत्रुः प्रह्लादइव पथि रुरोध। तथा च ब्रह्माण्डपुराणे। विरोचनविरोधेऽपि प्रह्लादः प्राक्तनं स्मरन्। विष्णोस्तु क्रममाणस्य पादाम्भोजं रुरोध हेति॥ ३५ ॥

तस्याइति। स कुमारोऽजः तस्या इन्दुमत्याः रक्षार्थमनल्पयोधं बहुभटं पितृरागतं पित्र्यम् आप्तमित्यर्थः सचिवमादिश्य आज्ञाप्य तां पार्थिववाहिनी राजसेनाम्। ध्वजिनी वाहिनी सेनेत्यमरः। भागीरथीमुत्तरङ्गः शोणः शोणाख्योनदइव प्रत्यग्रहीदभियुक्तवान् ॥ २६ ॥

पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढम्।
यन्ता गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥३७॥

नदत्सु तूर्येष्वविभाव्यवाचो
नोदीरयन्ति स्म कुलोपदेशान्।
बाणाक्षरैरेव परस्परस्य
नामोर्जितं चापभृतः शशंसुः॥३८॥

पत्तिरिति। पत्तिः पादचारो योद्धा पदातिं पादचारमभ्यपतत्। पादाभ्यामततीति पदातिः। पादस्य पदित्यादिना पदादेशः। पदाति-पत्तिपदगपादातिकपदाजवदित्यमरः। रथेशो रथिकः रथिनं रथारोहमभ्यपतत् तुरङ्गसादी अश्वारोहस्तुरगाधिरूढम् अश्वारोहमभ्यपतत्। रथिनः स्यन्दनारोहाः अश्वारोहास्तु सादिन इत्यमरः। गजस्य यन्ता हस्त्यारोहो गजस्थं पुरुषमभ्यपतत् इत्यस्। अनेन प्रकारेण तुल्यप्रतिद्वन्द्वि एकजातीयप्रतिभटं युद्धं बभूव। अन्योन्यं द्वन्द्वं कलहोऽस्त्येषामिति प्रतिद्वन्द्विनो योधाः। द्वन्द्वं कलहयुग्मयोरित्यमरः॥ ३७॥

नदत्स्विति। तूर्येषु नदत्सु सत्सु अविभाव्यवाचः अनवधार्य्यगिरः चापभृतो धानुष्काः कुलमुपदिश्यते प्रख्याप्यते यैस्ते कुलोपदेशा स्तान् कुलनामानि नोदीरयन्ति स्म नोच्चारयामासुः श्रोतृसम्बन्धयत्वाद्वाचो नाम्नुवन्नित्यर्थः। किन्तु बाणाक्षरैर्बाणेषु लिखिताक्षरैरेव परस्परस्यान्योन्यस्य ऊर्ज्जितं प्रख्यातं नाम शशंसुरूचुः॥ ३८॥

उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः।
विस्तारितः कुञ्जरकर्णतालै
र्नेत्रक्रमेणोपरुरोध सूर्य्यम्॥ ३९॥
मत्स्यध्वजा वायुवशाद्विदीर्णै
र्मुखैः प्रवृद्धध्वजिनीरजांसि।
बभुः पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नवोदकानि॥ ४०॥
रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः।

उत्थापितइति। संयति संग्रामे अश्वैरुत्थापितः, स्यन्दनवंशानां रथसमूहानां चक्रैः रथाङ्गैः सान्द्रीकृतः घनीकृतः। वंशः पृष्ठास्थ्नि गेहोर्द्ध्वकाष्ठे वेणौ गणे कुले इति केशवः। कुञ्जरकर्णानां तालः ताडनैर्विस्तारितः प्रसारितोरेणुः नेत्रक्रमेण अंशुकपरिपाट्या अंशुकमिवेत्यर्थः। स्याज्जटांशुकयोर्नेत्रमिति, क्रमोऽङ्घ्रौ परिपाट्यां चेति च केशवः। सूर्य्यमुपरुरोध आच्छादयामास॥ ३९॥

मत्स्येति। वायुवशाद्विदीर्णैः विवृतै र्मुखैः प्रवृद्धानि ध्वजिनीं रजांसि सैन्यरेणून् पिबन्तोऽत्युच्छ्लन्तो मत्स्यध्वजामत्स्याकारा ध्वजाः, पर्य्याविलानि परितः कलुषाणि नवोदकानि पिबन्तः परमार्थमत्स्या इव बभुर्भान्ति स्म॥ ४०॥

रथइति। सान्द्रे प्रवृद्धे रजसि रथो रथाङ्गध्वनिना चक्रस्वनेन विजज्ञे ज्ञातः, नागोहस्ती विलोलानां घण्टाना क्वणितेन नादेन

स्वभर्तृनामग्रहणाद्बभूव
सान्द्रे रजस्यात्मपरावबोधः ॥४१॥

आवृण्वतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य ।
शस्त्रक्षताश्वद्विपवीरजन्मा
बालारुणोऽभूद्रुधिरप्रवाहः ॥४२॥

स च्छिन्नमूलः क्षतजेन रेणु-
स्तस्योपरिष्टात्पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य
पूर्वोत्थितो धूम इवाबभासे ॥४३॥

विजज्ञे । आत्मपरावबोधः स्वपरविवेकः योधानामिति शेषः स्वभर्तृणां स्वस्वामिनां नामग्रहणान्नामोच्चारणात् बभूव रजोऽन्धतया सर्वे स्वं परञ्च शब्दादेवानुमाय प्रजह्रुरित्यर्थः ॥ ४१ ॥

आवृण्वतइति । लोचनमार्गमावृण्वतो दृष्टिपथमुपरुन्धतः आजौ युद्धे विजृम्भितस्य व्याप्तस्य रजएवान्धकारं तस्य, शस्त्रक्षतेभ्योऽश्वद्विपेभ्यो वीरेभ्योजन्म यस्य स तथोक्तः रुधिरप्रवाहः बालारुणोबालार्कोऽभूत् । अरुणोभास्करेपि स्यादित्यमरः । बालविशेषणं रुधिरसावर्ण्यार्थम् ॥ ४२ ॥

सइति । क्षतजेन रुधिरेण छिन्नमूलः त्याजितभूतलसम्बन्ध इत्यर्थः तस्य क्षतजस्योपरिष्टात्पवनावधूतः वाताहतः स रेणुः अङ्गारशेषस्य हुताशनस्याग्नेः पूर्वोत्थितोधूमइव आबभासे दिदीपे ॥ ४३ ॥

प्रहारमूर्च्छापगमे रथस्था
यन्तॄनुपालभ्य निवर्त्तिताश्वान्।
यैः सादिता लक्षितपूर्वकेतूं-
स्तानेव सामर्षतया निजघ्नुः ॥४४॥

अप्यर्द्धमार्गे परवाणलूना
धनुर्भृतां हस्तवतां पृषत्काः।
संप्रापुरेवात्मजवानुवृत्त्या
पूर्वार्द्धभागैः फलिभिः शरव्यम् ॥४५॥

प्रहारेति। रथस्थाः रथिनः, प्रहारेण या मूर्च्छा तस्याः अपगमे सति। मूर्च्छितानामन्यत्र नीत्वा संरक्षणं सारथिधर्म्म इतिकृत्वा निवर्त्तिताश्वान् यन्तॄन् सारथीनुपालभ्य असाधु कृतमित्यधिक्षिप्य पूर्वं यैः स्वयं सादिताः हताः लक्षितपूर्वकेतून् पूर्वदृष्टैः केतुभिः प्रत्यभिज्ञातानित्यर्थः, तानेव सामर्षतया सक्रोधत्वेन हेतुना निजघ्नुः प्रजह्नुः ॥ ४४ ॥

अपीति। अर्द्धश्चासौ मार्गश्च तस्मिन्नर्द्धमार्गे परेषां वाणैर्लूनाः छिन्ना अपि हस्तवतां कृतहस्तानां धनुर्भृतां पृषत्काः शराः आत्मजवानुवृत्त्या स्ववेगानुवन्धेन हेतुना फलिभिर्लौहाग्रवद्भिः। शस्त्रवाणाग्रयोः फलमिति विश्वः। पूर्व्वार्द्धभागैः शृणातीति शरुः तस्मै हितं शरव्यं लक्ष्यम्। उगवादिभ्योयदिति यत्प्रत्ययः। लक्षं लक्ष्यं शरव्यञ्चेत्यमरः। संप्रापुरेव नतु मध्ये पतिता इत्यर्थः ॥ ४५ ॥

आधोरणानामिति। गजसन्निपाते गजयुद्धे निशितैः अतएव क्षुराग्रैः क्षुरस्याग्रमिवाग्रं येषां तैः चक्रैरायुधविशेषैः हृतानि छिन्ना-

आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः।
हृतान्यपि श्येननखाग्रकोटि
व्यासक्तकेशानि चिरेण पेतुः ॥४६॥

पूर्वं प्रहर्त्ता न जघान भूयः
प्रतिप्रहाराक्षममश्वसादी।
तुरङ्गमस्कन्धनिषण्णदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥४७॥

तनुत्यजां वर्म्मभृतां विकोशै
र्बृहत्सु दन्तेष्वसिभिः पतद्भिः।

न्यपि श्येनानां पक्षिविशेषाणाम्। पक्षी श्येन इत्यमरः। नखाग्र-कोटिषु व्यासक्ताः केशा येषां तानि आधोरणानां हस्त्यारोहाणाम्। आधोरणा हस्तिपका हस्त्यारोहा निषादिन इत्यमरः। शिरांसि चिरेण पेतुः पतितानि। शिरःपातात् प्रागेवारुह्य पश्चादुत्पततां पक्षिणां नखेषु केशसङ्गश्चिरपातहेतुरिति भावः ॥ ४६ ॥

पूर्व्वमिति। पूर्व्वं प्रथमं प्रहर्त्ता अश्वसादी तौरङ्गिकः प्रतिप्रहारेऽक्षममशक्तं तुरङ्गमस्कन्धं निषण्णदेहं मूर्च्छितमित्यर्थः रिपुं भूयो न जघान पुनर्न प्रजहार किन्तु प्रत्याश्वसन्तं पुनरुज्जीवन्तमाचकाङ्क्ष। नायुध व्यसनं प्राप्तं नार्त्तं नातिपरिक्षतमिति निषेधादिति भावः ॥ ४७ ॥

तनुत्यजामिति। तनुत्यजां तनुषु निस्पृहाणामित्यर्थः वर्म्मभृतां कवचिनां सम्बन्धिभिः बृहत्सु दन्तेषु पतद्भिः अतएव, विकोशैः पिधाना-

उद्यन्तमग्निं शमयाम्बभूवु
र्गजा विविग्नाः करशीकरेण ॥४८॥
शिलीमुखोत्कृत्तशिरःफलाढ्या
च्युतैः शिरस्त्रैश्चषकोत्तरेव।
रणक्षितिः शोणितमद्यकुल्या
रराज मृत्योरिव पानभूमिः ॥४९॥
उपान्तयोर्निष्कुषितं विहङ्गै
राक्षिप्य तेभ्यः पिशितप्रियापि।

कुड्मलैः। कोशोटस्त्री कुड्मले खड्गपिधाने इत्यमरः। असिभिः खड्गैरुद्यन्तमुत्थितमग्निं विविग्ना भीताः गजाः करशीकरेण शुण्डादण्डजलकणेन शमयाम्बभूवुः शान्तं चक्रुः ॥ ४८ ॥

शिलीमुखेति। शिलीमुखैर्बाणैरुत्कृत्तानि शिरांस्येव फलानि तैराढ्या सम्पन्ना च्युतैर्भ्रष्टैः शिरांसि त्रायन्त इति शिरस्त्राणि शीर्षण्यानि। शीर्षण्यञ्च शिरस्त्रे इत्यमरः। तैश्चषकोत्तरा चषकः पानपात्रमुत्तरं यस्यां सेव। चषकोटस्त्री पानपात्रमित्यमरः। शोणितान्येवमद्यं तस्य कुल्याः प्रवाहाः यस्यां सा। कुल्याल्पा कृत्रिमा सरिदित्यमरः। रणक्षितिः युद्धभूमिः मृत्योः पानभूमिरिव रराज ॥ ४९ ॥

उपान्तयोरिति। उपान्तयोः प्रान्तयोः विहङ्गैः तक्षिभिः निष्कुषितं खण्डितम्। इण्निष्ठायामितीड़ागमः। भुजच्छेदं भुजखण्डं तेभ्योविहङ्गेभ्यः आक्षिप्याच्छिद्य पिशितप्रिया मांसप्रियापि शिवा क्रोष्ट्री। शिवः कीलः शिवा क्रोष्ट्रीति विश्वः। केयूरकोट्या अङ्ग-

केयूरकोटिक्षततालुदेशा
शिवा भुजच्छेदमपाचकार ॥५०॥
कश्चित् द्विषत्खड्ग हृतोत्तमाङ्गः
सद्योविमानप्रभुतामुपेत्य।
वामाङ्गसंसक्तसुराङ्गनः स्वं
नृत्यत् कबन्धं समरे ददर्श ॥५१॥
अन्योन्यसूतोन्मथनादभूतां
तावेव सूतौ रथिनौच कौचित्।
व्यश्वौ गदाव्यायतसंप्रहारौ
भग्नायुधौ बाहुविमर्द्दनिष्ठौ ॥५२॥

टाग्रेण क्षतस्तालुदेशोयस्याः सा सती अपाचकार अपसारयामास। किरतेः करोतेर्वा लिट् ॥ ५० ॥

कश्चिदिति। द्विषतः खड्गेन हृतोत्तमाङ्गः छिन्नशिराः कश्चिद्वीरः सद्योविमानप्रभुतां विमानाधिपत्यं देवत्वमित्यर्थः उपेत्य प्राप्य वामाङ्ग-संसक्ता सव्योत्सङ्गसङ्गिनी सुराङ्गना यस्य स तथोक्तः सन् समरे नृत्यत् स्वं निजं कबन्धं विशिरस्कं कलेवरं ददर्श। कबन्धोऽस्त्री क्रियायुक्त-मपमूर्द्धकलेवरमित्यमरः ॥ ५१ ॥

अन्योन्येति। कौचिद्वीरौ अन्योन्यस्य सूतयोः सारथ्योः उन्म-थनान्निधनात् तावेव सूतौ रथिनौ च योद्धारावभूतां तावेव व्यश्वौ नष्टाश्वौ सन्तौ गदाभ्यां व्यायतोदीर्घः संप्रहारोयुद्धं ययोस्तौ अभूतां ततोभग्नायुधौ भग्नगदौ सन्तौ बाहुविमर्दे निष्ठा नाशो ययो स्तौ अभू-ताम्। निष्ठा निष्पत्तिनाशान्ता इत्यमरः ॥ ५२ ॥

परस्परेण क्षतयोः प्रहर्त्रो-
रुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्यभावेऽपि कयोश्चिदासी-
देकाप्सरः प्रार्थितयोर्व्विवादः ॥५३॥

व्यूहावुभौ तावितरेतरस्मात्
भङ्गं जयञ्चापतुरव्यवस्थम् ।
पश्चात्पुरोमारुतयोः प्रवृद्धौ
पर्य्यायवृत्त्येव महार्णवोर्म्मी ॥५४॥

परस्परेणेति। परस्परेण अन्योन्यं क्षतयोः क्षतवन्तौः समकाल-मेककालं यथा तथा उत्क्रान्तवाय्वोः युगपदुद्गत प्राणयोः एकैवाप्सराः प्रार्थिता याभ्यां तयोरेकाप्सरःप्रार्थितयोः प्रार्थितैकाप्सरसोरित्यर्थः। वाहिताग्न्यादिष्विति परनिपातः। अथवा एकस्यामप्सरसि प्रार्थितं प्रार्थना ययोरिति विग्रहः। स्त्रियां बहुष्वप्सरसइति बहुत्वाभिधानं प्रायिकम्। कयोश्चित्प्रहर्त्रोर्योधयोः अमर्त्यभावेपि देवत्वेपि विवादः कलहः आसीत्। एकामिषाभिलाषोहि महद्वैरवीजमिति भावः ॥ ५३ ॥

व्यूहाविति। तौ उभौ व्यूहौ सेनासङ्घातौ। व्यूहस्तु बलविन्यास इत्यमरः। पश्चात् पुरश्च यौ मारुतौ तयोः पर्य्यायवृत्त्या क्रमवृत्त्या प्रवृद्धौ महार्णवोर्म्मी इव इतरेतरस्मादन्योन्यस्मात् अव्यवस्थं व्यवस्था रहितम् अनियतं जयं भङ्गं पराजयं चापतुः प्राप्तवन्तौ ॥ ५४ ॥

परेणेति। बले स्वसैन्ये परेण परबलेन भग्नेपि महौजाः महा-बलोऽजः अरिसैन्यं प्रत्येव ययौ। तथाहि समीरणेन वायुना धूमो-

परेण भग्नेऽपि बले महौजा
ययावजः प्रत्यरिसैन्यमेव।
धूमो निवर्त्त्येत समीरणेन
यतस्तु कक्षस्तत एव वह्निः॥५५॥
रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः।
निवारयामास महावराहः
कल्पक्षयोद्वृत्तमिवार्णवाम्भः॥५६॥
स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ।

निवर्त्त्येत कक्षादपसार्य्येत। वर्त्ततेर्ण्यन्तात् कर्म्मणि सम्भावनायां लिङ्। वह्निस्तु यतो यत्र कक्षस्तृणम्। कक्षौ तु तृणवीरुधावित्यमरः। तत एव तत्रैव प्रवर्त्तते इति शेषः। सार्वविभक्तिकस्तसिः॥५५॥

रथीति। रथी रथारूढः निषङ्गी तूणीरवान्। तूणोपासङ्ग तूणीरनिषङ्गा इषुधिर्द्वयोरित्यमरः। कवची वर्म्मधरः धनुष्मान् धनुर्धरः दृप्तो रणदृप्तः एकवीरः असहायशूरः सोऽजः राजन्यकं राजसमूहम्। गोत्रोक्षेत्यादिना वुञ्प्रत्ययः। महावराहो वराहावतारो विष्णुः कल्पक्षये कल्पान्तकाले उद्वृत्तमुद्वेलमर्णवाम्भ इव निवारयामास॥५६॥

स इति। सोऽजः आजौ संग्रामे दक्षिणं हस्तं तूणमुखेन निषङ्गविवरेण वाममतिसुन्दरम्। वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे इति विश्वः। व्यापारयन्नलक्ष्यत शरसन्धानादयस्तु दुर्लक्ष्या इत्यर्थः।

आकर्णकृष्टा सकृदस्य योद्धु
र्मौर्व्वीव बाणान् सुषुवे रिपुघ्नान्॥५७॥
स रोषदष्टाधिकलोहितोष्ठै
र्व्यक्तोर्द्ध्वरेखा भ्रुकुटीर्व्वहद्भिः।
तस्तार गां भल्लनिकृत्तकण्ठै
र्हुङ्कारगर्भैं र्द्विषतां शिरोभिः॥५८॥
सर्व्वैर्बलाङ्गैर्द्विरदप्रधानैः
सर्व्वायुधैः कङ्कटभेदिभिश्च।

सकृदाकर्णकृष्टा योद्धुरस्याजस्य मौर्व्वी ज्या रिपून् हन्तीति रिपुघ्ना-स्तान्। अमनुष्यकर्तृके चेति टक् प्रत्ययः। बाणान् सुषुवे इवेत्यु-त्प्रेक्षा॥५७॥

स इति। सोऽजः रोषेण दष्टाः अतएव अधिकलोहिताः ओष्ठाः येषां तानि तैः व्यक्ता ऊर्द्ध्वा रेखा यासां ताः भ्रुकुटीः भ्रूभङ्गान् वहद्भिः भल्लनिकृत्ता बाणविशेषच्छिन्नाः कण्ठा येषां तैः हुङ्कारगर्भैः सहुङ्कारै-र्हुङ्कुर्वद्भिरित्यर्थः। द्विषतां शिरोभिः गां भूमिं तस्तार छादयामास॥५८॥

सर्व्वैरिति। द्विरदप्रधानैर्गजमुख्यैः सर्व्वैर्बलाङ्गैः सेनाङ्गैः। हस्त्यश्व-रथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः। कङ्कटभेदिभिः कवच-भेदिभिः। उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियामित्यमरः। सर्व्वायुधैश्च। बाह्यबलमुक्त्वा आन्तरमाह सर्व्वप्रयत्नेन च सर्व्वे एव भूमि-पालाः युधि तस्मिन्नजे प्रजह्रुः तं प्रजह्रुरित्यर्थः। सर्व्वत्र सर्व्वकारक-शक्तिसम्भवात् कर्म्मणोऽप्यधिकरणविवक्षायां सप्तमी। तदुक्तम् अनेक-

सर्व्वप्रयत्नेन च भूमिपाला
स्तस्मिन् प्रजहुर्युधि सर्व्व एव ॥५८॥

सोऽस्त्रव्रजैश्छन्नरथः परेषां
ध्वजाग्रमात्रेण बभूव लक्ष्यः।
नीहारमग्नोदिनपूर्व्वभागः
किञ्चित्प्रकाशेन विवस्वतेव ॥६०॥

प्रियंवदात्प्राप्तमसौ कुमारः
प्रायुङ्क्त राजस्वधिराजसूनुः।
गान्धर्व्वमस्त्रं कुसुमास्त्रकान्तः
प्रस्वापनं स्वप्ननिवृत्तलौल्यः ॥६१॥

प्रतियुक्तस्य विश्वस्यानेककर्म्मणः। सर्वदा सर्वथाभावात् क्वचित् किञ्चिद्विवक्ष्यत इति ॥ ५८ ॥

स इति। परेषां द्विषाम् अस्त्रव्रजैश्छन्नरथः सोऽजः नीहारैर्हिमैः मग्नोदिनपूर्व्वभागः प्रातःकालः किञ्चित्प्रकाशेनेषल्लक्ष्येण विवस्वतेव ध्वजाग्रमात्रेण लक्ष्यो बभूव ध्वजाग्रादन्यन्न किञ्चिल्लक्ष्यते स्मेत्यर्थः ॥ ६० ॥

प्रियंवदादिति। अधिराजसूनुर्महाराजपुत्रः कुसुमास्त्रकान्तो मदनसुन्दरः स्वप्ननिवृत्तलौल्यः स्वप्नवितृष्णः जागरूकइत्यर्थः असौ कुमारोऽजः प्रियंवदात्पूर्व्वोक्ताद्गन्धर्व्वात् प्राप्तं गान्धर्व्वं गन्धर्व्वदेवताकम्। साऽस्य देवतेत्यण्। प्रस्वापयतीति प्रस्वापनं निद्राजनकमस्त्रं राजसु प्रायुङ्क्त प्रयुक्तवान् ॥ ६१ ॥

तत इति। ततो धनुःकर्षणे मूढहस्तमव्याप्तहस्तम् एकस्मिन्नंसे

ततोधनुष्कर्षणमूढहस्त
मेकांसपर्य्यस्तशिरस्त्रजालम् ।
तस्थौ ध्वजस्तम्भनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यम् ॥६२॥

ततः प्रियोपात्तरसे ऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः ।
तेन स्वहस्तार्जितमेकवीरः
पिबन् यशोमूर्त्तमिवाबभासे ॥६३॥

शङ्खस्वनाभिज्ञतया निवृत्ता
स्तं सन्नशत्रुं ददृशुः स्वयोधाः ।
निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥६४॥

पर्य्यस्तं स्रस्तं शिरस्त्राणां शीर्षण्यानां जालं समूहो यस्य तत् ध्वजस्तम्भेषु निषण्णा अवष्टब्धा देहाः यस्य तत् नरदेवानां राज्ञां सेनैव सैन्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः । निद्राविधेयं निद्रापरतन्त्रं तस्थौ ॥ ६२ ॥

ततइति । ततः कुमारोऽजः प्रियया इन्दुमत्या उपात्तरसे आस्वादितमाधुर्य्ये अतिश्लाघ्ये इति भावः अधरोष्ठे जलजं शङ्खं निवेश्य । जलजं शङ्खपद्मयोरिति विश्वः । दध्मौ मुखमारुतेन पूरयामास तेनौष्ठनिविष्टेन शङ्खेन एकवीरः सः स्वहस्तार्जितं मूर्त्तं मूर्त्तिमत् यशः पिबन्निवाबभासे यशसः शुभ्रत्वादिति भावः ॥ ६३ ॥

शङ्खेति । शङ्खस्वनस्याजशङ्खध्वनेरभिज्ञतया प्रत्यभिज्ञातत्वान्नि-

सशोणितैस्तेन शिलीमुखाग्रै
र्निक्षेपिताः केतुषु पार्थिवानाम्।
यशोहृतं संप्रति राघवेण
न जीवितं वः कृपयेति वर्णाः॥६५॥
स चापकोटीनिहितैकबाहुः
शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धश्रमवारिबिन्दु
र्भीतां प्रियामेत्य वचो बभाषे॥ ६६ ॥

हन्ताः प्राक् पलाय्य सम्प्रति प्रत्यागताः स्वयोधाः सन्नशत्रु निद्राणशत्रु तम् अजं निमीलितानां मुकुलितानां पङ्कजानां मध्ये स्फुरन्तं प्रतिमा चासौ शशाङ्कश्च तं प्रतिमाशशाङ्कं प्रतिबिम्बचन्द्रमिव ददृशुः॥ ६४ ॥

सशोणितैरिति। संप्रति राघवेण रघुपुत्रेण। पूर्वं रघुणेति भावः। हे राजानः वोयुष्माकं यशोहृतं जीवितन्तु कृपया न हृतं न त्वशक्तेति भावः इत्येवंरूपा वर्णाः एतदर्थप्रतिपादकं वाक्यमित्यर्थः सशोणितैः शोणितदिग्धैः शिलीमुखाग्रैः बाणाग्रैः साधनैः तेनाजेन प्रयोजककर्त्रा पार्थिवानां राज्ञां केतुषु ध्वजस्तम्भेषु निक्षेपिताः प्रयोज्यैरन्यैर्निवे- शिताः लेखिताइत्यर्थः। क्षिपतेर्ण्यन्तात् कर्म्मणि क्तः॥ ६५ ॥

स इति। चापकोट्या निहितएकबाहुर्येन सः शिरस्त्रस्य निष्कर्ष- णेनापनयनेन भिन्नमौलिः श्लथकेशबन्धः। चूडा किरीटं केशाश्च संयता मौलयस्त्रयइत्यमरः। ललाटे बद्धाः श्रमवारिबिन्दवोयस्य सः सोऽजो भीता प्रियामिन्दुमतीम् एत्यागत्य वचोबभाषे॥ ६६ ॥

किमित्याह

इतइति। हे वैदर्भि इन्दुमति इतइदानीम् अर्भकहार्य्यशस्त्रान्

इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि पश्यानुमता मयासि ।
एवंविधेनाहवचेष्टितेन
त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥ ६७ ॥

तस्याः प्रतिद्वन्द्विभवाद्विषादात्
सद्योविमुक्तं मुखमाबभासे ।
निश्वासबाष्पापगमात् प्रपन्नः
प्रसादमात्मीयमिवात्मदर्शः ॥ ६८ ॥

हृष्टापि सा ह्रीविजिता न साक्षात्
वाग्भिः सखीनां प्रियमभ्यनन्दत् ।

बालकापहार्य्याणि आयुधानि येषां तान् परान् शत्रून् पश्य मयानुमतासि द्रष्टुमिति शेषः । एभिर्न्दैः एवंविधेन निद्रारूपेणाहवचेष्टितेन रणकर्म्मणा मम हस्तगता हस्तगतवत् दुर्ग्रहेत्यर्थः त्वं प्रार्थ्यसे अपजिहीर्य्यसे इत्यर्थः । एवंविधेनेत्यत्र स्वहस्तनिर्देशेन सोपहासमुवाचेति द्रष्टव्यम् ॥ ६७ ॥

तस्यादिति । प्रतिद्वन्द्विभवात् रिपूत्थात् विषादात् दैन्यात् सद्यो विमुक्तं तस्या मुखं निश्वासस्य योवाष्पः ऊष्मा । वाष्पोनेत्रजलोष्मणोरिति विश्वः । तस्यापगमाद्धेतोरात्मीयं प्रसादं नैर्म्मल्यं प्रपन्नः प्राप्तः आत्मा स्वरूपं दृश्यतेऽनेनेत्यात्मदर्शो दर्पणइवाबभासे ॥ ६८ ॥

हृष्टेति । सा इन्दुमती हृष्टापि पत्युः पौरुषेण प्रमुदितापि ह्रिया विजिता यतोऽतः प्रियसजं साक्षात् स्वयं नाभ्यनन्दत् न प्रशशंस किन्तु नवैरम्भःपृषतैः पयोविन्दुभिः अभिष्टाभिषिक्ता स्थली अवलिमा

स्थली नवाम्भःपृषताभिवृष्टा
मयूरकेकाभिरिवाभ्रवृन्दम् ॥ ६९ ॥

इति शिरसि स वामं पादमाधाय राज्ञा
मुदवहदनवद्यां तामवद्यादपेतः ।
रथतुरगरजोभिस्तस्य रूक्षालकाग्रा
समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ॥ ७० ॥

प्रथमपरिगतार्थस्तं रघुः सन्निवृत्तं
विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् ।
तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभूत्
नहि सति कुलधुर्य्ये सूर्य्यवंश्या गृहाय ॥ ७१ ॥

भूमिः । जानपदकुण्डगोणस्थलेत्यादिना अकृत्रिमार्थे ङीष् । अभ्रवृन्दं मेघसङ्घं मयूरकेकाभिरिव सखीनां वाग्भिरभ्यनन्दत् ॥ ६९ ॥

इतीति । नोद्यते नोच्यते इत्यवद्यं गर्ह्यम् । अवद्यपण्येत्यादिना निपातः । कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः । तस्मादपेतो निर्द्दोष इत्यर्थः सोऽजः, इति राज्ञां शिरसि वामं पादम् आधाय अनवद्यामदोषां तामिन्दुमतीमुदवहत् उपानयत् आत्मसाच्चकारेत्यर्थः । अयमर्थस्तमुद्वहन्तं पथि भोजकन्यामित्यत्र न श्लिष्टः । तस्याजस्य रथतुरगाणां रजोभिः रूक्षाणि परुषाणि अलकाग्राणि यस्याः सा सा इन्दुमत्येव मूर्त्ता मूर्त्तिमती समरविजयलक्ष्मीर्बभूव । एतल्लाभादन्यः कोऽपि विजयलक्ष्मीलाभ इत्यर्थः ॥ ७० ॥

प्रथमेति । प्रथममजागमनात्प्रागेव परिगतोऽवगतोऽर्थो विवाहविजयरूपो येन सः प्रथमपरिगतार्थः रघुः विजयिनं विजययुक्तं श्लाघ्य-

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अजपाणिग्रहणो नाम सप्तमः सर्गः।

जाया समेतं सन्निवृत्तं प्रत्यागतं तमजमभिनन्द्य तस्मिन्नजे उपहित-कुटुम्बः सन् सुतविन्यस्तपत्नीकइति याज्ञवल्क्यस्मरणादिति भावः। शान्ति मार्गे मोक्षमार्गे उत्सुकोऽभूत् तथाहि कुलधुर्ये कुलधुरन्धरे सति सूर्यवंश्याः गृहाय गृहस्थाश्रमाय न भवन्ति॥ ७१॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशटीकायां सञ्जीवनीसमाख्यायां सप्तमः सर्गः।



अष्टमः सर्गः ।



अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः ।
वसुधामपि हस्तगामिनी-
मकरोदिन्दुमतीमिवापराम् ॥ १ ॥
दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत् ।

हेरम्बमवलम्बेऽहं यस्मिन् पातालकेलिषु ।
दन्तेनोद्धरति क्षोणीं विश्राम्यन्ति फणीश्वराः ॥

अथेति । अथ पार्थिवो रघुर्ललितं सुभगं विवाहकौतुकं विवाहमङ्गलं विवाहहस्तसूत्रं वा बिभ्रत एव । कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले इति शाश्वतः । तस्याजस्य अपरामिन्दुमतीमिव वसुधामपि हस्तगामिनीमकरोत् । अस्मिन्सर्गे वैतालीयं छन्दः ॥ १ ॥

दुरितैरिति । नृपसूनवो राजपुत्राः यद्राज्यं दुरितैरपि विषप्रयोगादिनिषिद्धोपायैरपि आत्मसात् स्वाधीनम् । तदधीनवचन इति सातिप्रत्ययः । कर्त्तुं प्रयतन्ते हि प्रवर्त्तन्त एवेत्यर्थः । हि शब्दोऽव-

तदुपस्थितमग्रहीदजः
पितुराज्ञेति न भोगतृष्णया ॥ २ ॥
अनुभूय वशिष्ठसम्भृतैः
सलिलैस्तेन सहाभिषेचनम् ।
विशदोच्छ्वसितेन मेदिनी
कथयामास कृतार्थतामिव ॥ ३ ॥
स बभूव दुरासदः परै
र्गुरुणाथर्वविदा कृतक्रियः ।

यतन्ते । हि हेत्ववधारणे इत्यमरः । उपस्थितं स्वतः प्राप्तं तद्राज्यम् अजः पितुराज्ञेति हेतोरग्रहीत् स्वीचकार भोगतृष्णया तु नाग्रहीत् ॥ २ ॥

अनुभूयेति । मेदिनी भूमिः नायिका च ध्वन्यते वशिष्ठेन सम्भृतैः सलिलैः तेनाजेन सहाभिषेचनम् अनुभूय विशदोच्छ्वसितेन स्फुटमुद्गतेन आनन्दनिश्वासोच्छ्वसितेन चेति ध्वन्यते कृतार्थतां [illegible] साफल्यं कथयामासेव । न चैतावता [illegible] ॥ ३ ॥

स इति । अथर्वविदा अथर्ववेदाभिज्ञेन गुरुणा वशिष्ठेन कृत क्रियः अथर्वोक्तविधिना कृताभिषेकसंस्कारः सोऽजः परैः शत्रुभिः दुरासदोऽधर्षणीयो बभूव । तथाहि अस्त्रतेजसा क्षत्रतेजसा सहितं ब्रह्म यत् ब्रह्म ब्रह्मतेजः अयं पवनाग्निसमागमो हि तत्तुल्यमर्थः । पवनाग्नीत्यत्र पूर्वनिपातशास्त्रस्यानित्यत्वात् [illegible] नाभ्यर्हितस्य पूर्वनिपातः । यथाह काशिकायाम् [illegible] हेतोरिति निर्देशः

पवनाग्निसमागमो ह्ययं
सहितं ब्रह्म यदस्त्रतेजसा ॥ ४ ॥

रघुमेव निवृत्तयौवनं
तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं
प्रतिपेदे सकलान् गुणानपि ॥ ५ ॥

अधिकं शुशुभे शुभंयुना
द्वितयेन द्वयमेव सङ्गतम् ।
पदमृद्धमजेन पैतृकं
विनयेनास्य नवञ्च यौवनम् ॥ ६ ॥

पूर्वनिपातव्यभिचारचिह्नमिति । चात्रेणैवायं दुर्द्धर्षः किमयं पुनर्वशिष्ठमन्त्रप्रभावे सतीत्यर्थः । अत्र मनुः नाक्षत्रं ब्रह्म भवति क्षत्रं नाब्रह्म वर्द्धते । ब्रह्मक्षत्रे तु संयुक्ते इहामुत्र च वर्द्धते इति ॥ ४ ॥

रघुमिति । प्रजाः नवेश्वरं तम् अजं निवृत्तयौवनं प्रत्यावृत्तयौवनं रघुमेवामन्यन्त न किञ्चिद्भेदकमस्तीत्यर्थः । कुतः हि यस्मात् सोऽजः तस्य रघोः केवलामेकां श्रियं न प्रतिपेदे किन्तु सकलान् गुणान् शौर्य्यदाक्षिण्यादीनपि प्रतिपेदे अतस्तद्गुणयोगात्तद्बुद्धिरुक्तेत्यर्थः ॥ ५ ॥

अधिकमिति । द्वयमेव शुभंयुना शुभवता । शुभंयुस्तु शुभान्वित इत्यमरः । अहंशुभयोर्युस् इति युस् प्रत्ययः । द्वितयेन सङ्गतं युतं सत् अधिकं शुशुभे । किं केनेत्याह पदमिति पैतृकं पितुरागतम् । ऋतष्ठञ् इति ठञ्प्रत्ययः । ऋद्धं समृद्धं पदं राज्यमजेन अस्याजस्य नवं यौवनं विनयेन च ॥ ६ ॥

सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति।
अचिरोपनतां स मेदिनीं
नवपाणिग्रहणां वधूमिव ॥७॥
अहमेव मतोमहीपते
रिति सर्व्वः प्रकृतिष्वचिन्तयत्।
उदधेरिव निम्नगाशते-
ष्वभवन्नास्य विमानना क्वचित् ॥ ८ ॥

सदयमिति। महाभुजः सोऽजः अचिरोपनतां नवोपगतां मेदिनीं भुवं नवं पाणिग्रहणं विवाहोयस्यास्तां नवोढ़ां वधूमिव, सहसा बलात्कारेण चेत्। सहोबलं सहामार्गइत्यमरः। इयं मेदिनी बधूर्वा उद्वेगं भयं व्रजेदिति हेतोः सदयं सक्षमं बुभुजे भुक्तवान्। भुजोऽन वनइत्यात्मनेपदम् ॥ ७ ॥

अहमिति। प्रकृतिषु प्रजासु मध्ये सर्वोजनः अथवा प्रकृतिष्वह-मित्यनेनान्वयः व्यवधानन्तु सह्यम्। सर्वोजनः प्रकृतिष्वहमेव महीपतेः मतः महीपतिना मन्यमानः। मतिवुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः तस्य च वर्त्तमाने इति षष्ठी। इत्यचिन्तयत् अमन्यत। उदधे-र्निम्नगाशतेष्विवास्य नृपस्य कर्तुः। कर्तृकर्म्मणोः कृतीति कर्त्तरि षष्ठी। क्वचिदपि जने विषये विमानना अवगणना तिरस्कारो नाभवत् यतोन कश्चिदवमन्यतेऽतः सर्वोह्यहमेवास्य मतइत्यमन्यते-त्यर्थः ॥ ८ ॥

न खरइति। स नृपोभूयसा वाहुल्येन खरस्तीक्ष्णोन भूयसा मृदुर्नातिमृदुरपि न किन्तु पुरस्कृतमध्यमक्रमः सन् मध्यमपरिपाटी

न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपाननुद्धरन् ॥ ९ ॥

अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया ।
विषयेषु विनाशधर्मसु
त्रिदिवस्थेष्वपि निःस्पृहोऽभवत् ॥१०॥

गुणवत्सुतरोपितश्रियः
परिणामे हि दिलीपवंशजाः ।

मवलम्ब्येत्यर्थः पवमानो वायुः पृथिवीरुहान् वृक्षानिव नृपाननुद्धरन् अनुत्पाटयन्नेव नमयामास । अत्र कामन्दकः मृदुश्चेदवमन्येत तीक्ष्णादुद्विजते जनः । तीक्ष्णश्चैव मृदुश्चैव प्रजानां स च सम्मत इति ॥ ९ ॥

अथेति । अथ रघुः आत्मजं पुत्रम् आत्मवत्तया निर्व्विकारमनस्कतयेत्यर्थः । उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते । आत्मवान् सत्त्वयुक्तः इत्युत्पलमालायाम् । प्रकृतिषु अमात्यादिषु प्रतिष्ठितं दृढमूलं वीक्ष्य ज्ञात्वा विनाशोधर्म्मो येषां तेषु विनाशधर्म्मसु अनित्येष्वित्यर्थः । धर्म्मादनिच् केवलादित्यनिच्प्रत्ययः समासान्तः । त्रिदिवस्थेषु स्वर्गस्थेष्वपि विषयेषु शब्दादिषु निःस्पृहो निर्गतेच्छोऽभवत् ॥ १० ॥

कुलधर्म्मश्चायमेवेत्याह

गुणवदिति । दिलीपवंशजाः परिणामे वार्द्धके गुणवत्सुतेषु रोपितश्रियः स्थापितलक्ष्मीकाः प्रयताश्च सन्तः तरुवल्कान्येव वासांसि

पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ॥ ११ ॥
तमरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयो
रपरित्यागमयाचतात्मनः ॥ १२ ॥
रघुरश्रुमुखस्य तस्य तत्
कृतवानीप्सितमात्मजप्रियः ।
नतु सर्प इव त्वचं पुनः
प्रतिपेदे व्यपवर्जितां श्रियम् ॥ १३ ॥

येषां तेषां संयमिनां यतीनां पदवीं प्रपेदिरे यस्मात्तस्मादस्यापीदमुचितमित्यर्थः ॥ ११ ॥

तमिति । अरण्यसमाश्रयोन्मुखं वनवासोद्युक्तं पितरं तं रघुं सुतोऽजः वेष्टनशोभिना उष्णीषमनोहरेण शिरसा पादयोः प्रणिपत्यात्मनोऽपरित्यागमयाचत मां परित्यज्य न गन्तव्यमिति प्रार्थितवानित्यर्थः ॥ १२ ॥

रघुरिति । आत्मजप्रियः पुत्रवत्सलो रघुरश्रूणि मुखे यस्य तस्याश्रुमुखस्याजस्य तदपरित्यागरूपमीप्सितम् अभिलषितं कृतवान् किन्तु सर्पः त्वचमिव व्यपवर्ज्जितां त्यक्तां श्रियं पुनः न प्रतिपेदे न प्राप ॥ १३ ॥

सइति । स रघुः किलान्त्यमाश्रमं प्रव्रज्यामाश्रितः पुरान्नगराद्बहिः आवसथे स्थाने निवसन् अविकृतेन्द्रियः जितेन्द्रियः सन्नित्यर्थः अतएव स्नुषयेव वध्वेव पुत्रभोग्यया न स्वभोग्यया श्रिया समुपास्यत

स किलाश्रममन्त्यमाश्रितो
निवसन्नावसथे पुराद्बहिः।
समुपास्यत पुत्रभोग्यया
स्नुषयेवाविकृतेन्द्रियः श्रिया॥ १४॥
प्रशमस्थितपूर्वपार्थिवं
कुलमभ्युद्यतनूतनेश्वरम्।

शुश्रूषितः। जितेन्द्रियस्य तस्य स्नुषयेव श्रियापि पुष्पफलोदकाहरणादिशुश्रूषाव्यतिरेकेण न किञ्चिदपेक्षितमासीदित्यर्थः। अत्र यद्यपि ब्राह्मणाः प्रव्रजन्तीति श्रुतेः आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनुस्मरणात् मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्। बाहुजातोरुजातानामयं धर्मो न विद्यते इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरित्याहुः तथापि यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिस्मृतेस्त्रैवर्णिकसाधारण्यात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाइति सूत्रकारवचनात् ब्राह्मणः क्षत्रियोवापि वैश्यो वा प्रव्रजेद्गृहादिति स्मरणात् मुखजानामयं धर्मोवैष्णवं लिङ्गधारणम्। बाहुजातोरुजातानां त्रिदण्डं न विधीयते इति निषेधस्य त्रिदण्डविषयत्वदर्शनाच्च क्वचिद्ब्राह्मणपदस्योपलक्षणत्वाचक्षाणाः केचित्त्रैवर्णिकाधिकारं प्रपेदिरे। तथा सति स किलाश्रममन्त्यमाश्रितइति अत्रापि कविनाप्ययमेव पक्षो विवक्षितइति प्रतीमः। अन्यथा वानप्रस्थाश्रमतया व्याख्याते विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्धमनग्निमग्निचिदिति वक्ष्यमाणेनानग्निसंस्कारेण विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात् इत्यलं प्रासङ्गिकेन॥ १४॥

प्रशमेति। प्रशमे स्थितः पूर्वपार्थिवोरघुर्यस्य तत् अभ्युद्यतोऽभ्युदितोनूतनेश्वरोऽजो यस्य तत् तत्प्रसिद्धं कुलं निम्लतेन्दुना अस्तमया-

नभसा निभृतेन्दुना तुला
मुदितार्केण समारुरोह तत् ॥ १५ ॥
यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः ।
अपवर्गमहोदयार्थयो
र्भुवमंशाविव धर्म्मयोर्गतौ ॥ १६ ॥
अजिताधिगमाय मन्त्रिभि
र्युयुजे नीतिविशारदैरजः ।
अनपायिपदोपलब्धये
रघुराप्तैः समियाय योगिभिः ॥ १७ ॥

सन्नचन्द्रेण उदितार्केण प्रकटितसूर्य्येण नभसा तुलां सादृश्यमारुरोह आप । नच नभसा तुलामित्यत्र तुल्यार्थैरित्यादिना प्रतिषेधस्तृतीयायाः तस्य सदृशवाचितुलाशब्दविषयत्वात् कृष्णस्य तुला नास्तीति प्रयोगात् अस्य च सादृश्यवाचित्वात् ॥ १५ ॥

यतीति । यतिर्भिक्षुः पार्थिवो राजा तयोर्लिङ्गधारिणौ रघुराघवौ रघुतत्सुतौ अपवर्गमहोदयार्थयोः मोक्षाभ्युदयफलयोः धर्म्मयोः निवर्त्तकप्रवर्त्तकरूपयोः भुवं गतौ भूलोकमवतीर्णौ अंशाविव जनैर्ददृशाते दृष्टौ ॥ १६ ॥

अजितेति । अजोऽजिताधिगमाय अजितपदलाभाय नीतिविशारदैः नीतिज्ञैः मन्त्रिभिः युयुजे सङ्गतः । रघुरप्यनपायिपदस्य उपलब्धये मोक्षस्य प्राप्तये यथार्थदर्शिनो यथार्थवादिनश्चाप्ताः तैः योगिभिः समियाय सङ्गतः । उभयत्राप्युपायचिन्तार्थमिति शेषः ॥ १७ ॥

नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशु धारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥ १८ ॥

अनयत् प्रभुशक्तिसम्पदा
वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया
मरुतः पञ्च शरीरगोचरान् ॥ १९ ॥

नृपतिरिति । युवा नृपतिरजः प्रकृतीः प्रजाः कार्यार्थिनीरवेक्षितुं दुष्टादुष्टपरिज्ञानार्थमित्यर्थः व्यवहारासनं धर्मासनमाददे स्वीचकार । प्रवयाः स्थविरो नृपतिः रघुस्तु । प्रवयाः स्थविरो वृद्ध इत्यमरः । धारणां चित्तस्यैकाग्रतां परिचेतुमभ्यसितुमुपांशु विजने । उपांशु विजने प्रोक्तमिति हलायुधः । कुशैः पूतं विष्टरमाददे । यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैरिति वशिष्ठः ॥ १८ ॥

अनयदिति । एकोऽन्यतरोऽज इत्यर्थः अनन्तरान् स्वभूम्यनन्तरान् नृपतीन् यातव्यपार्ष्णिग्राहादीन् प्रभुशक्तिसम्पदा कोशदण्ड महिम्ना वशं स्वायत्ततामनयत् । अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन । योग्याभ्यासार्कयोषितोरिति विश्वः । शरीरगोचरान् देहाश्रयान् पञ्च मरुतः प्राणादीन् वशमनयत् ॥ १९ ॥

अकरोदिति । अचिरेश्वरोऽजः क्षितौ द्विषतामारब्धाः कर्माणि

अकरोदचिरेश्वरः क्षितौ
द्विषदारम्भफलानि भस्मसात् ।
इतरो दहने स्वकर्मणां
ववृते ज्ञानमयेन वह्निना ॥ २० ॥
पणबन्धमुखान् गुणानजः
षडुपायुङ्क्त समीक्ष्य तत्फलम् ।
रघुरप्यजयद्गुणत्रयं
प्रकृतिस्थं समलोष्टकाञ्चनः ॥ २१ ॥

तेषां फलानि भस्मसादकरोत् कार्त्स्न्येन भस्मीकृतवान् । विभाषा साति कार्त्स्न्ये इति सातिप्रत्ययः । इतरो रघुः ज्ञानमयेन तत्त्वज्ञानप्रचुरेण वह्निना करणेन स्वकर्मणां भवबीजभूतानां दहने भस्मीकरणे ववृते स्वकर्माणि दग्धुं प्रवृत्त इत्यर्थः । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेति वचनात् ॥ २० ॥

पणबन्धेति । पणबन्धः सन्धिरिति कौटिल्यः । अजः पणबन्धमुखान् सन्ध्यादीन् षड्गुणान् । सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणा इत्यमरः । तत्फलं तेषां गुणानां फलं समीक्ष्य आलोच्य उपायुङ्क्त फलिष्यन्तमेव गुणं प्रायुङ्क्तेत्यर्थः । प्रोपाभ्यां युजेरयज्ञपात्रेष्विति आत्मनेपदम् । समः तुल्यतया भावितो लोष्टो मृत्पिण्डः काञ्चनं सुवर्णञ्च यस्य स समलोष्टकाञ्चनो निःस्पृह इत्यर्थः । रघुरपि गुणत्रयं सत्त्वादिकम् । गुणाः सत्त्वं रजस्तम इत्यमरः । प्रकृतौ साम्यावस्थायामेव तिष्ठतीति प्रकृतिस्थं पुनर्विकारशून्यं यथा तथा अजयत् ॥ २१ ॥

नेति । स्थिरकर्मा आफलोदयकर्मकारी नृपः प्रभुरजः आफलो-

न नवः प्रभुराफलोदयात्
स्थिरकर्म्मा विरराम कर्म्मणः ।
न च योगविधेर्नवेतरः
स्थिरधीरापरमात्मदर्शनात् ॥२२॥

इति शत्रुषु चेन्द्रियेषु च
प्रतिषिद्धप्रसरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो
रुभयीं सिद्धिमुभाववापतुः ॥ २३ ॥

अथ काश्चिदजव्यपेक्षया
गमयित्वा समदर्शनः समाः ।

दयात् फलसिद्धिपर्य्यन्तं कर्मण आरम्भात् न विरराम न निवृत्तः । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानात् पञ्चमी । व्याङ्परिभ्योरम इति परस्मैपदम् । स्थिरधीः नवेतरारघुश्च आपरमात्मदर्शनात् परमात्मसाक्षात्कारपर्य्यन्तं योगविधेरैक्यानुसन्धानान्न विरराम ॥ २२ ॥

इतीति । इत्येवं प्रतिषिद्धः प्रसरः स्वार्थप्रवृत्तिर्येषां तेषु शत्रुषु चेन्द्रियेषु च जाग्रतावप्रमत्तौ उदयापवर्गयोः अभ्युदयमोक्षयोः प्रसितावासक्तौ । तत्परे प्रसितासक्ताविल्यमरः । उभावजरघू उभयीं द्विविधाम् अभ्युदयमोक्षरूपाम् । उभादुदात्तोनित्यमिति तयप्प्रत्ययस्यायजादेशः, टिड्ढेति ङीप् । सिद्धिं फलमवापतुः उभौ उभे सिद्धी यथासंख्यमवापतुरित्यर्थः ॥ २३ ॥

अथेति । अथ रघुः समदर्शनः सर्व्वभूतेषु समदृष्टिः सन् अज

तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः ॥ २४ ॥
श्रुतदेहविसर्जनः पितु
श्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्ठिकं
यतिभिः सार्द्धमनग्निमग्निचित् ॥२५॥
अकरोत् स तदौर्द्ध्वदैहिकं
पितृभक्त्या पितृकार्य्यकल्पवित् ।

व्यपेक्षया अजाकाङ्क्षानुरोधेन कांश्चित्समाः कतिचिद्वर्षाणि । समा वर्षं समं तुल्यमिति विश्वः । गमयित्वा नीत्वा योगसमाधिना ऐक्यानुसन्धानेन । संयोगोयोगइत्युक्तो जीवात्मपरमात्मनोरिति वशिष्ठः । अव्ययमविनाशिनं तमसः परमविद्यायाः परं मायातीतमित्यर्थः । पुरुषं परमात्मानमापत् प्राप सायुज्यं प्राप्तइत्यर्थः ॥ २४ ॥

श्रुतेति । अग्निचित् अग्निं चितवान् । अग्नौ चेरिति क्विप् प्रत्ययः । राघवोऽजः पितुः श्रुतदेहविसर्ज्जनः आकर्णितपितृतनुत्यागः सन् चिरमश्रूणि वाष्पान् विमुच्य विसृज्य अस्य पितुः अनग्निमग्निसंस्काररहितमित्यर्थः नैष्ठिकं निष्ठायामन्ते भवं विधिमाचारमन्त्येष्टिं यतिभिः सन्न्यासिभिः सार्द्धं विदधे चक्रे । अनग्निं विधिमित्यत्र शौनकः । सर्व्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्य्यं नैव पिण्डोदकक्रिया । निदध्यात् प्रणवेनैव विले भिक्षोः कलेवरम् । प्रोक्षणं खननञ्चैव सर्व्वं तेनैव कारयेदिति ॥ २५ ॥

अकरोदिति । पितृकार्य्यस्य श्राद्धस्य कल्पवित् विधानज्ञः सोऽजः पितृभक्त्या पितरि प्रेम्णा कारणेन, न पितुः परलोकसुखापेक्षया,

नहि तेन पथा तनुत्यज
स्तनयावर्जितपिण्डकाङ्क्षिणः ॥२६॥
स परार्द्ध्यगतेरशोच्यतां
पितुरुद्दिश्य सदर्थवेदिभिः।
शमिताधिरधिज्यकार्मुकः
कृतवानप्रतिशासनं जगत् ॥ २७ ॥
क्षितिरिन्दुमती च भामिनी
पतिमासाद्य तमग्र्यपौरुषम्।

मुक्तत्वादिति भावः। तस्य रघोरौर्द्ध्वदैहिकं देहादूर्द्ध्वं भवतीति तत्, तिलोदकपिण्डदानादिकमकरोत्। ऊर्द्ध्वदेहाच्चेतिवक्तव्यात् ठक्-प्रत्ययः। अनुशतिकादित्वादुभयपदवृद्धिः। ननु कथं भक्तिरेव श्राद्धादि-फलप्रेप्सापि कस्मान्नाभूदित्याशङ्क्याह नहीति। तेन पथा योगक्रमेण मार्गेण तनुत्यजः शरीरत्यागिनः पुरुषाः तनयेनावर्ज्जितं दत्तं पिण्डं काङ्क्षन्तीति तथोक्ता न हि भवन्ति ॥ २६ ॥

सइति। परार्द्ध्यगतेः प्रशस्तगतेः प्राप्तमोक्षस्य पितुः अशोच्यताम् अशोचनीयत्वम् उद्दिश्याभिसन्धाय शोको न कर्त्तव्य इत्युपदिश्येत्यर्थः सदर्थवेदिभिः परमार्थज्ञैः शमिताधिर्निवारितमनोव्यथः। पुंस्याधि-र्म्मानसी व्यथेत्यमरः। सोऽजः अधिज्यकार्मुकः अधिज्यम् आरोपित-मौर्व्वीकं कार्मुकं यस्य सतथोक्तः सन् जगत् कर्मभूतम् अप्रतिशासनं द्वितीयाज्ञारहितमात्माज्ञाविधेयमित्यर्थः कृतवान् चकार ॥ २७ ॥

क्षितिरिति। क्षितिर्मही भामिनी कामिनी इन्दुमती च। भामिनी कामिनी चेति हलायुधः। अग्र्यपौरुषं महापराक्रमम् उत्कृष्टभोग-

प्रथमा बहुरत्नसूरभू-
दपरा वीरमजीजनत्सुतम्॥ २८॥

दशरश्मिशतोपमद्युतिं
यशसा दिक्षु दशस्वपि श्रुतम्।
दशपूर्वरथं यमाख्यया
दशकण्ठारिगुरुं विदुर्बुधाः॥ २९॥

ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः।

क्षितिश्च तमग्र्यं पतिमासाद्य तत्र प्रथमा क्षितिः बहूनि रत्नानि श्रेष्ठवस्तूनि सूत इति बहुरत्नसूरभूत्। 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः। अपरा इन्दुमती वीरं सुतमजीजनत् जनयति स्म। जायतेर्णौ लुङि रूपम्॥ २८॥

किंनामकोऽसावित्यत आह

दशेति। दश रश्मिशतानि यस्य सः दशरश्मिशतः सूर्यः स उपमा यस्याः सा दशरश्मिशतोपमा द्युतिर्यस्य तं यशसा करणेन दशस्वपि दिक्षु श्रुतं प्रसिद्धं, दशकण्ठारेः रावणारेः रामस्य गुरुं पितरं यं श्रुतमाख्यया नाम्ना दशपूर्वो दशशब्दपूर्वो रथो रथशब्दः तं दशरथमित्यर्थः बुधाः विद्वांसो विदुर्वदन्ति। विदो लटो वेति झेर्जुसादेशः॥ २९॥

ऋषीति। श्रुतयागप्रसवैः अध्ययनयज्ञसन्तानैः यथासंख्यम् ऋषीणां देवगणानामिन्द्रादीनां स्वधाभुजां पितॄणाम् अनृणत्वम् ऋणविमुक्तत्वम् उपेयिवान् प्राप्तवान्। एष वा अनृणो यः पुत्री यज्वा

अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥ ३० ॥

बलमार्त्तभयोपशान्तये
विदुषां सत्कृतये बहु श्रुतम्।
वसु तस्य विभोर्न केवलं
गुणवत्तापि परप्रयोजना ॥ ३१ ॥

स कदाचिदवेक्षितप्रजः
सह देव्या विजहार सुप्रजाः।
नगरोपवने शचीसखो
मरुतां पालयितेव नन्दने ॥ ३२ ॥

ब्रह्मचारी वा इति मुनेः। स पार्थिवोऽज परिधेः परिवेशात्। परिवेशस्तु परिधिरित्यमरः। मुक्त उष्णदीधिति सूर्य इव बभाविल्युपमा ॥ ३० ॥

बलमिति। तस्य विभोरजस्य केवलं वसु धनमेव परप्रयोजनं परोपकारकं नाभूत् किन्तु गुणवत्तापि गुणित्वमपि परप्रयोजना परेषामन्येषां प्रयोजनं यस्यां सा विधेयांशत्वेन प्राधान्याद्गुणवत्त या विशेषणम् वसु इत्यत्रतूहनीयम्। तथाहि। बल पौरुषम् आर्त्तानामापन्नानां भयस्योपशान्तये नतु स्वार्थं परपीड़नाय वा। बहु भूरि श्रुतं विद्या विदुषां सत्कृतये सत्काराय नतूल्लेकाय बभूव ॥ ३१ ॥

सइति। अवेक्षितप्रजः अकुतोभयत्वेनानुसन्हितप्रजः। नित्यमसिच् प्रजामेधयोरिति असिच्प्रत्ययः। न केवलं स्वैरा इति भावः। शोभना प्रजा यस्यासौ सुप्रजाः लघुत्वात् पुत्रान्सभार इति भावः।

अथ रोधसि दक्षिणोदधेः
श्रितगोकर्णनिकेतमीश्वरम् ।
उपवीणयितुं ययौ रवे
रुदयावृत्तिपथेन नारदः ॥ ३३ ॥

कुसुमैर्ग्रथितामपार्थिवैः
स्रजमातोद्यशिरोनिवेशिताम् ।
अहरत् किल तस्य वेगवान्
अधिवासस्पृहयेव मारुतः ॥ ३४ ॥

सोऽजः कदाचिद्देव्या महिष्या इन्दुमत्या सह नगरोपवने, नन्दने नन्दनाख्ये अमरावत्युपकण्ठवने शचीसखः शच्या सहेत्यर्थः मरुतां देवानां पालयिता इन्द्र इव, विजह्रार चिक्रीड़ ॥ ३२ ॥

अथेति । अथ दक्षिणस्योदधेः समुद्रस्य रोधसि तीरे श्रितगोकर्णनिकेतमधिष्ठितगोकर्णाख्यस्थानमीश्वरं शिवमुपवीणयितुं वीणया उपगातुम् । सत्यापपाशेत्यादिना वीणाशब्दादुपगानार्थे णिच्प्रत्ययः । ततस्तुमुन् । नारदो देवर्षिः रवेः सम्बन्धिना उदयावृत्तिपथेन आकाशमार्गेण ययौ ॥ ३३ ॥

कुसुमैरिति । अपार्थिवैर्दिव्यैरित्यर्थः कुसुमैर्ग्रथितां रचितां तस्य नारदस्यातोद्यस्य वाद्यस्य वीणायाः शिरसि निवेशिताम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकमित्यमरः । स्रजं मालां वेगवान् मारुतः अधिवासे वासनायां स्पृहयेव स्रजा स्वाङ्गं संस्कर्तुमित्यर्थः । संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनमित्यमरः । अहरत् किल किलेत्यैतिह्ये ॥ ३४ ॥

भ्रमरैः कुसुमानुसारिभिः
परिकीर्णा परिवादिनी मुनेः।
ददृशे पवनावलेपजं
सृजती बाष्पमिवाञ्जनाविलम्॥ ३५॥

अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्।
नृपतेरमरस्रगाप सा
दयितोरुस्तनकोटिसुस्थितिम्॥ ३६॥

क्षणमात्रसखीं सुजातयोः
स्तनयोस्तामवलोक्य विह्वला।

भ्रमरैरिति। कुसुमानुसारिभिः पुष्पानुयायिभिः भ्रमरैः परिकीर्णा व्याप्ता मुनेर्नारदस्य परिवादिनी वीणा। वीणा तु वल्लकी। विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरः। पवनस्यावलेपोऽधिक्षेपः तज्जम् अञ्जनेनाविलं कलुषं बाष्पमस्रु सृजती मुञ्चतीव ददृशे दृष्टा। परिभूताः स्त्रियोऽपि हि रुदन्तीति भावः॥ ३५॥

अभिभूयेति। सा अमरस्रक् दिव्यमाला मधुगन्धयोर्मकरन्दसौरभयोरतिशयेनाधिक्येन वीरुधां लतानाम्। लता प्रतानिनी वीरुदित्यमरः। ऋतोः प्राप्तामार्त्तवीम् ऋतुसम्बन्धिनीं विभूतिं समृद्धिमभिभूय नृपतेः दयितायाः इन्दुमत्याः ऊर्व्वोर्विशालयोः स्तनयोः कोटी चूचुकौ तयोः सुस्थितिं स्थानम् आप॥ ३६॥

क्षणमिति। सुजातयोः सुजन्मनोः सुन्दरयोरित्यर्थः। स्तनयोः क्षणमात्रसखीं तां स्रजमवलोक्य विह्वला परवशा नरोत्तमप्रिया

निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ॥ ३७ ॥
वपुषा करणोज्झितेन सा
निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना
सह दीप्तार्चिरुपैति मेदिनीम् ॥ ३८ ॥
उभयोरपि पार्श्ववर्त्तिनां
तुमुलेनार्त्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः
समदुःखा इव तत्र चक्रुशुः ॥ ३९ ॥

इन्दुमती तमसा राहुणा । तमस्तु राहुः स्वर्भानुरित्यमरः । हृतचन्द्रा कौमुदीव निमिमील ममार । निमीलो दीर्घनिद्रा चेति हलायुधः ॥ ३७ ॥

वपुषेति । करणैरिन्द्रियैरुज्झितेन । करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः । वपुषा निपतन्ती सा इन्दुमती पतिमजमप्यपातयत् पातयति स्म । तथाहि निषिच्यत इति निषेकः तैलस्य निषेकस्तैलनिषेकः क्षरत्तैलमित्यर्थः तस्य बिन्दुना सह दीप्तार्चिः दीपज्वाला मेदिनीं भुवमुपैति ननु उपैत्येव । नन्वत्रावधारणे । प्रश्नावधारणानुज्ञानुनयामन्त्रणे नन्वित्यमरः ॥ ३८ ॥

उभयोरिति । उभयोरजेन्दुमत्योः पार्श्ववर्त्तिनां परिजनानां तुमुलेन सङ्कुलेनार्त्तरवेण करुणस्वनेन वेजिताः भीताः कमलाकरालयाः सरःस्थिताः विहगाः हंसादयोऽपि तत्रोपवने समदुःखा इव चुक्रुशुः ॥ ३९ ॥

नृपतेर्व्यजनादिभिस्तमो
नुनुदे सा तु तथैव संस्थिता।
प्रतिकारविधानमायुषः
सति शेषे हि फलाय कल्पते॥ ४०॥

प्रतियोजयितव्यवल्लकी
समवस्थामथ सत्वविप्लवात्।
स निनाय नितान्तवत्सलः
परिगृह्योचितमङ्कमङ्गनाम्॥ ४१॥

पतिरङ्कनिषण्णया तया
करणापायविभिन्नवर्णया।

नृपतेरिति। नृपतेरजस्य तमोऽज्ञानं व्यजनादिभिः साधनैः नुनुदे अपसारितं सा तु इन्दुमती तथैव संस्थिता मृता। तथाहि। प्रतिकारविधानं चिकित्सा आयुषः जीवितकालस्य शेषे सति विद्यमाने। आयुर्जीवितकालोनेत्यमरः। फलाय कल्पते आरोग्याय भवति नान्यथा नृपतेरायुःशेषसद्भावात् प्रतीकारस्य साफल्यं तस्यास्तु तदभावात् वैफल्यमित्यर्थः॥ ४०॥

प्रतीति। अथ सत्वस्य चैतन्यस्य विप्लवाद्विनाशाद्धेतोः। द्रव्यासु व्यवसायेषु सत्वमित्यमरः। प्रतियोजयितव्या तन्त्रिभिर्योजनीया ननु योजिततन्त्रीत्यर्थः या वल्लकी वीणा तस्याः समा वस्था अवस्था दशा यस्यास्तामङ्गनां वनितां नितान्तवत्सलोऽतिप्रेमवान् सोऽजः परिगृह्य हस्ताभ्यां गृहीत्वा उचितं परिचितमङ्कम् उत्सङ्गं निनाय नीतवान्॥ ४१॥

पतिरिति। पतिरजः अङ्कनिषण्णया करणानामपायेनापगमेन

समलक्ष्यत बिभ्रदाविलां
मृगलेखामुषसीव चन्द्रमाः ॥ ४२ ॥
विललाप स वाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु ॥ ४३ ॥
कुसुमान्यपि गात्रसङ्गमात्
प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं
किमिवान्यत् प्रहरिष्यतो विधेः ॥ ४४ ॥

विभिन्नवर्णया विच्छायया तया, उषसि आविलां मृगलेखां बिभ्रच्चन्द्रमा इव समलक्ष्यतेत्युपमा ॥ ४२ ॥

विललापेति । सोऽजः सहजां स्वाभाविकीमपि धीरतां धैर्य्यम् अपहाय वाष्पेण गद्गदं विशीर्णाक्षरं यथा तथा विललाप परिदेवितवान् । विलापः परिदेवनमित्यमरः । अभितप्तम् अग्निना सन्तप्तम् अयोऽपि मार्द्दवं मृदुत्वं भजते शरीरिषु देहिषु अभिसन्तप्तेष्विति शेषः विषये कैव कथा वार्त्ता अनुक्तसिद्धमित्यर्थः ॥ ४३ ॥

कुसुमानीति । कुसुमानि पुष्पाण्यपि । अपिशब्दो नितान्तमार्द्दवद्योतनार्थः । गात्रसङ्गमात् देहसंसर्गात् आयुरपोहितुम् अपहर्त्तुं प्रभवन्ति यदि । हन्त विषादे । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः । प्रहरिष्यतो विधेरन्यत् कुसुमातिरिक्तं किमिव

अथवा मृदु वस्तु हिंसितुं
मृदुनैवारभते प्रजान्तकः।
हिमसेकविपत्तिरत्र मे
नलिनी पूर्वनिदर्शनं मता ॥ ४५ ॥
स्रगियं यदि जीवितापहा
हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद्भवे
दमृतं वा विषमीश्वरेच्छया ॥ ४६ ॥
अथवा मम भाग्यविप्लवा
दशनिः कल्पित एष वेधसा।

वस्तु। इवशब्दो वाक्यालङ्कारे कीदृशमित्यर्थः। साधनं न भविष्यति सर्वमपि साधनं भविष्यत्येवेत्यर्थः ॥ ४४ ॥

अथवेति। अथवा पक्षान्तरे प्रजान्तकः कालः मृदु कोमलं वस्तु मृदुनैव वस्तुना हिंसितुं हन्तुम् आरभते उपक्रमते। अत्रार्थे हिमसेकेन तुषारनिष्यन्देन विपत्तिर्यस्याः सा नलिनी मे पूर्वं प्रथमं निदर्शनमुदाहरणं मता ॥ ४५ ॥

स्रगिति। इयं स्रक् जीवितम् अपहन्तीति जीवितापहा यदि। हृदये वक्षसि। हृदयं वक्षसि स्वान्त इत्यमरः। निहिता सती मां किं न हन्ति। ईश्वरेच्छया क्वचित्प्रदेशे विषमप्यमृतं भवेत् क्वचिदमृतं वा विषं भवेत्। दैवमेवात्र कारणमित्यर्थः ॥ ४६ ॥

अथवेति। अथवा मम भाग्यस्य विप्लवात् विपर्यासात् एष स्रगित्यर्थः। विधेयप्राधान्यात् पुंलिङ्गनिर्देशः। वेधसा विधात्रा अशनि-

यदनेन तरुर्न पातितः
क्षपिता तद्विटपाश्रया लता ॥ ४७ ॥
कृतवत्यसि नावधीरणा
मपराद्धेऽपि यदा चिरं मयि।
कथमेकपदे निरागसं
जनमाभाष्यमिमं न मन्यसे ॥ ४८ ॥
ध्रुवमस्मि शठः शुचिस्मिते
विदितः कैतववत्सलस्तव।
परलोकमसन्निवृत्तये
यदनापृच्छ्य गतासि मामितः ॥ ४९ ॥

विद्युतोऽग्निः कल्पितः। दम्भोलिरशनिर्द्वयोरित्यमरः। यत् यस्मा-दनेनाप्यशनिना प्रसिद्धाशनिनेव तरुस्तत्स्थानीयः स्वयमेव न पातितः। किन्तु तस्य तरोर्विटपाश्रया लता क्षपिता नाशिता ॥ ४७ ॥

कृतेति। मयि चिरं भूरिशः अपराद्धेऽपि अपराधं कृतवत्यपि। राधेः कर्त्तरि क्तः। यदा यस्मात् हेतोः। यदेति हेत्वर्थः स्वरादौ पठ्यते यदेति हेताविति गणव्याख्यानात्। अवधीरणामवज्ञा न कृत-वत्यसि। तत्कथम् एकपदे तत्क्षणे। स्यात्तत्क्षणे एकपदमिति विश्वः। निरागसं नितरामनपराधम् इमं जनम्। इममिति स्वात्म-निर्देशः। मामित्यर्थः आभाष्यं सम्भाष्यं न मन्यसे ॥ ४८ ॥

ध्रुवमिति। हे शुचिस्मिते शठोगूढविप्रियकारी कैतवेन कपटेन वत्सलः कैतववत्सलइति ध्रुवं सत्यं तव विदितः त्वया विज्ञातोऽस्मि। मतिबुद्धीत्यादिना कर्त्तरि क्तः। क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी।

दयिता यदि तावदन्वगा
द्विनिवृत्तं किमिदं तया विना।
सहतां हतजीवितं मम
प्रबलामात्मकृतेन वेदनाम् ॥ ५० ॥

सुरतश्रमसम्भृतो मुखे
ध्रियते स्वेदलवोद्गमोऽपि ते।
अथ चास्तमिता त्वमात्मना
धिगिमां देहभृतामसारताम् ॥ ५१ ॥

मनसापि न विप्रियं मया
कृतपूर्वं तव किं जहासि माम्।

कुतः, यस्मात् मामनापृच्छ्य अनामन्त्र्य इतः अस्माल्लोकात्परलोकम् अनिवृत्तये अपुनरावृत्तये गतासि ॥ ४९ ॥

दयितामिति। इदं मम हतजीवितं तावद्दयितामन्वगादन्वगच्छद्यदि अन्वगादेव। यद्यत्रावधारणे। पूर्वं मूर्च्छितत्वादिति भावः। तया विना किं किमर्थं विनिवृत्तम् प्रत्यागतं प्रत्यागमनं न युक्तमित्यर्थः। अतएवात्मकृतेन स्वदुश्चेष्टितेन निवृत्तिरूपेण प्रबलां वेदनां सहताम्। स्वयङ्कृतापराधेषु सहिष्णुतैव शरणमिति भावः ॥ ५० ॥

सुरतेति। सुरतश्रमेण सम्भृतो जनितः स्वेदलवोद्गमोऽपि ते तव मुखे ध्रियते वर्त्तते अथच त्वम् आत्मना स्वरूपेण अस्तं नाशम् इता प्राप्ता, अतः कारणात् देहभृतां प्राणिनाम् इमामसारतामस्थिरतां धिक् ॥ ५१ ॥

मनसेति। मया मनसापि तव विप्रियं न कृतपूर्वं पूर्वं न कृत-

ननु शब्दपतिः क्षितेरहं
त्वयि मे भावनिबन्धना रतिः ॥५२॥

कुसुमोत्खचितान् वलीभृत
श्चलयन् भृङ्गरुचस्तवालकान ।
करभोरु करोति मारुत
स्त्वदुपावर्त्तनशङ्कि मे मनः ॥ ५३ ॥

तदपोहितुमर्हसि प्रिये
प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तम
स्तुहिनाद्रेरिव नक्तमोषधिः ॥ ५४ ॥

सित्यर्थः। कुसुमेति समासः। किं मां जहासि। ननु अहं क्षितेः शब्दपतिः शब्दतएव पतिः नत्वर्थतइत्यर्थः भावनिबन्धना अभिप्रायनिबन्धना स्वभावहेतुका मे रतिस्तु त्वय्येव अस्तीति शेषः ॥ ५२ ॥

कुसुमेति। कुसुमैः उत्खचितान् उत्कृष्टेन रचितान् वलीभृतो भङ्गीयुक्तान् भृङ्गरुचोनीलान् तवालकान् चलयन् कम्पयन् मारुतः हे करभोरु मे मनस्त्वदुपावर्त्तनशङ्कि तव पुनरागमने शङ्कावत्करोति त्वदुज्जीवने शङ्कां कारयतीत्यर्थः ॥ ५३ ॥

तदिति। हे प्रिये तत्तस्मात्कारणात् आशु मे विषादं दुःखं, नक्तं रात्रौ ओषधिः तृणज्योतिराख्या लता ज्वलितेन प्रकाशेन तुहिनाद्रेर्गुहागतं तमइव, प्रतिबोधेन ज्ञानेन अपोहितुं निरसितुमर्हसि ॥ ५४ ॥

इदमुच्छ्वसितालकं मुखं
तव विश्रान्तकथं दुनोति माम्।
निशि सुप्तमिवैकपङ्कजं
विरताभ्यन्तरषट्पदस्वनम्॥ ५५॥

शशिनं पुनरेति शर्वरी
दयिता द्वन्द्वचरं पतत्रिणम्।
इति तौ विरहान्तरक्षमौ
कथमत्यन्तगता न मां दहेः॥ ५६॥

नवपल्लवसंस्तरेऽपि ते
मृदु दूयेत यदङ्गमर्पितम्।

इदमिति। इदमुच्छ्वसितालकं चलितचूर्णकुन्तलं विश्रान्तकथं निवृत्तसंलापं तव मुखं, निशि सुप्तं निमीलितं विरतः अभ्यन्तराणामन्तर्वर्त्तिनां षट्पदानां स्वनो यत्र तत् निःशब्दभृङ्गमित्यर्थः एकपङ्कजमिव, मां दुनोति परितापयति॥ ५५॥

शशिनमिति। शर्वरी रात्रिः शशिनं चन्द्रं पुनरेति प्राप्नोति, द्वन्द्वीभूय चरतीति द्वन्द्वचरस्तं पतत्रिणं चक्रवाकं दयिता चक्रवाकी पुनरेति, इति हेतोः तौ चन्द्रचक्रवाकौ विरहान्तरक्षमौ विरहावधि सहौ। अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये इत्यमरः। अत्यन्तगता पुनरावृत्तिरहिता त्वन्तु कथं न मां दहेः अपितु दहेरेवेत्यर्थः॥ ५६॥

नवेति। नवपल्लवसंस्तरे नूतनप्रवालास्तरणेऽपि अर्पितं स्थापितं मृदु ते तव यदङ्गं शरीरं दूयेत परितप्तं भवेत्। तामौ सुन्दरौ

तदिदं विषहिष्यते कथं
वद वामोरु चिताधिरोहणम् ॥ ५७ ॥

इयमप्रतिबोधशायिनीं
रशना त्वां प्रथमा रहःसखी ।
गतिविभ्रमसादनीरवा
न शुचा नानु मृतेव लक्ष्यते ॥ ५८ ॥

कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं
पवनाधूतलतासु विभ्रमाः ॥ ५९ ॥

ऊरू यस्याः सा हे वामोरु । वामं स्यात् सुन्दरे सव्यइति केशवः । संहितशफलक्षणेत्यादिना ऊङ्प्रत्ययः । तदिदमङ्गं चितायाः काष्ठसञ्चयस्याधिरोहणं कथं विषहिष्यते । वद ॥ ५७ ॥

इयमिति । इयं प्रथमा रहःसखी सुरतसमयेऽप्यनुयानादिति भावः । गतिविभ्रमसादेन नीरवा विलासोपरमेण निःशब्दा रशना मेखला अप्रतिबोधम् अपुनरुद्बोधं यथा तथा शायिनीं मृतामित्यर्थः त्वाम् अनु त्वया सह । तृतीयार्थइत्यनुशब्दस्य कर्म्मप्रवचनीयत्वेनकर्म्मप्रवचनीययुक्ते द्वितीया । शुचा शोकेन मृतेव न लक्ष्यतइति न लक्ष्यतएवेत्यर्थः । सम्भाव्यनिषेधनिवर्त्तनाय द्वौ प्रतिषेधौ ॥ ५८ ॥

कलमिति, त्रिदिवेति । युग्मम् । अन्यभृतासु कोकिलासु कलं मधुरं भाषितं भाषणम्, कलहंसीषु मदालसं मन्थरं गतं गमनम्, पृषतीषु हरिणीषु विलोलमीक्षितं चञ्चला दृष्टिः, पवनेन वायुना आधूतलतासु ईषत्कम्पितलतासु विभ्रमा विलासाः ॥ ५९ ॥

त्रिदिवोत्सुकयाप्यवेक्ष्य मां
निहिताः सत्यममी गुणास्त्वया।
विरहे तव मे गुरुव्यथं
हृदयं न त्ववलम्बितुं क्षमाः ॥ ६० ॥
मिथुनं परिकल्पितं त्वया
सहकारः फलिनी च नन्विमौ।
अविधाय विवाहसत्क्रिया-
मनयोर्गम्यत इत्यसाम्प्रतम् ॥ ६१ ॥
कुसुमं कृतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति।

अमी पूर्वोक्ताः कलभाषणादयो गुणाः, एषु कोकिलादिस्थानेष्विति शेषः। त्रिदिवोत्सुकयापि इह जीवन्त्येव स्वर्गं प्रति प्रस्थितयापि त्वया मामवेक्ष्य विरहासहं विचार्य्य सत्यं निहिताः मत्प्राणधारणोपायतया स्थापिता इत्यर्थः तव विरहे गुरुव्यथमतिदुःखं मे हृदयमवलम्बितुं स्थापयितुं न क्षमाः न शक्ताः। ते तु त्वत्सङ्गमे एव सुखकारिणः नान्यथा प्रत्युत प्राणानपहरन्तीति भावः ॥ ६० ॥

मिथुनमिति। ननु हे प्रिये सहकारश्चूतविशेषः फलिनी प्रियङ्गुलता च इमौ त्वया मिथुनं परिकल्पितं मिथुनत्वेनाभ्यमानि। अनयोः फलिनीसहकारयोर्विवाहसत्क्रियां विवाहमङ्गलमविधाय अकृत्वा गम्यत इत्यसाम्प्रतमयुक्तम्। मातृहीनानां न किञ्चित् सुखमस्तीति भाव' ॥ ६१ ॥

कुसुममिति। वृक्षादिपोषकं दोहदम्। त्वया कृतं दोहदं पाद-

अलकाभरणं कथन्नु तत्
तव नेष्यामि निवापमाल्यताम् ॥ ६२ ॥

स्मरतेव सशब्दनूपुरं
चरणानुग्रहमन्यदुर्लभम् ।
असुना कुसुमास्रुवर्षिणा
त्वमशोकेन सुगात्रि शोच्यसे ॥ ६३ ॥

तव निःश्वसितानुकारिभि
र्वकुलैरर्द्धचितां समं मया ।
असमाप्य विलासमेखलां
किमिदं किन्नरकण्ठि सुप्यते ॥ ६४ ॥

ताड़नरूपं यस्य सः अयमशोको यत् कुसुमम् उदीरयिष्यति प्रसविष्यते तत्रालकानामाभरणम् आभरणभूतं तत् कुसुमं कथं निवापमाल्यतां नेष्यामि । निवापः पितृदानं स्यादित्यमरः ॥ ६२ ॥

स्मरतेति । अन्यदुर्लभं किन्तु स्मर्त्तव्यमेवेत्यर्थः सशब्दं नूपुरं यस्य तं चरणेनानुग्रहं पादेन ताडनरूपं स्मरतेव कुसुमान्येवास्रूणि तद्वर्षिणा असुना अशोकेन हे सुगात्रि । अङ्गगात्रकण्ठेभ्यश्चेति वक्तव्यात् ङीप् । त्वं शोच्यसे ॥ ६३ ॥

तवेति । तव निःश्वसितानुकारिभिः वकुलैः वकुलकुसुमैः मया समं सार्द्धम् अर्द्धचिताम् अर्द्धं यथा तथा रचितां विलासमेखलाम् असमाप्य किन्नरस्य देवयोनिविशेषस्य कण्ठइव कण्ठोयस्याः तत्सम्बुद्धिः हे किन्नरकण्ठि । अङ्गगात्रकण्ठेभ्यश्चेति ङीप । किमिदं

समदुःखसुखः सखीजनः
प्रतिपच्चन्द्रनिभोऽयमात्मजः।
अहमेकरसस्तथापि ते
व्यवसायः प्रतिपत्तिनिष्ठुरः ॥६५॥

धृतिरस्तमिता रतिश्च्युता
विरतं गेयमृतुर्निरुत्सवः।
गतमाभरणप्रयोजनं
परिशून्यं शयनीयमद्य मे ॥६६॥

सुप्यते। वचिस्वपोरित्यादिना सम्प्रसारणम्। अनुचितमिदं स्वपनमित्यर्थः ॥६४॥

समेति। सखीजनः समदुःखसुखः त्वद्दुःखेन दुःखी त्वत्सुखेन सुखीत्यर्थः। अयमात्मजोबालः प्रतिपच्चन्द्रनिभः दर्शनीयोवर्द्धिष्णुश्चेत्यर्थः। प्रतिपच्छब्देन द्वितीया लक्ष्यते प्रतिपदि चन्द्रस्यादर्शनात्। अहमेकरसोऽभिन्नरागः। शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस इत्यमरः। तथापि जीवनसामग्रीसत्त्वेऽपीत्यर्थः ते तव व्यवसायोऽस्मत्परित्यागरूपोव्यापारः प्रतिपत्त्या निश्चयेन निष्ठुरः। प्रतिपत्तिः पदप्राप्तौ प्रकृतौ गौरवेपि च। प्रागल्भ्ये च प्रबोधे चेति विश्वः। स्मर्त्तुं न शक्यं किमुताधिकर्त्तुमिति भावः ॥६५॥

धृतिरिति। अद्य मे धृतिर्धैर्यं प्रतीतिर्वा अस्तं नाशमिता, रतिश्च्युता गता, गेयं गानं विरतम्, ऋतुर्वसन्तादिर्निरुत्सवः, आभरणानां प्रयोजनं गतम् अपगतं, शेते अस्मिन्निति शयनीयं तल्पम्। कृत्यल्युटोबहुलमित्यधिकरणार्थेऽनीयर्प्रत्ययः। परिशून्यम्। त्वां विना सर्वमपि निष्फलमिति भावः ॥६६॥

गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम् ॥६७॥

मदिराक्षि मदाननार्पितं
मधु पीत्वा रसवत् कथं नु मे।
अनुपास्यसि वाष्पदूषितं
परलोकोपनत जलाञ्जलिम् ॥ ६८ ॥

गृहिणीति। त्वमेव गृहिणी दाराः सचिवो बुद्धिसहायोमन्त्री मिथोरहसि सखी नर्मसचिवः ललिते मनोहरे कलाविधौ वादित्रादिचतुःषष्टिकलाप्रयोगे प्रियशिष्या, अतस्त्वां समष्टिरूपां हरता अतएव करुणाविमुखेन कृपाशून्येन मृत्युना मे मत्सम्बन्धि किं न हृतं वद सर्वमपि हृतमित्यर्थः ॥ ६७ ॥

मदिरेति। माद्यत्यनयेति मदिरा लोकप्रसिद्धा तथापि नार्य्यो-मदिरलोचना इत्यादिप्रयोगदर्शनात् माद्यत्याभ्यामिति मदिरे अक्षिणी यस्यास्तत्सम्बुद्धिः हे मदिराक्षि मदाननेनार्पितं रसवत्स्वादुतरं मधु मद्यं पीत्वा वाष्पदूषितम् अश्रुतप्तं परलोकोपनतं परलोकप्राप्तं मे जलाञ्जलिं कथं नु अनु अनन्तरं पास्यसि। तदनन्तरमिदमनर्हमित्यर्थः। यथाह भाट्टमल्लः अनुपानं हिमजल यवगोधूमनिर्म्मिते। दध्नि मद्ये विषे द्राक्षे पिष्टे मिष्टमयेपि चेति। तन्न इहैव युज्यते। इदं तूष्णं लोकान्तरोपयोगि चेत्यायुर्वेदविरोधात् कथमनुपास्यसीति भावः ॥ ६८ ॥

विभवेऽपि सति त्वया विना
सुखमेतावदजस्य गण्यताम्।
अहृतस्य विलोभनान्तरै
र्मम सर्व्वे विषयास्त्वदाश्रयाः ॥६९॥
विलपन्निति कोशलाधिपः
करुणार्थग्रथितं प्रियां प्रति।
अकरोत् पृथिवीरुहानपि
स्रुतशाखारसबाष्पदूषितान् ॥ ७० ॥
अथ तस्य कथञ्चिदङ्कतः
स्वजनस्तामपनीय सुन्दरीम्।

विभवेइति। विभवे ऐश्वर्य्ये सत्यपि त्वया विना अजस्य एतावदेव सुखं गण्यताम् यावत् त्वया सह भुक्तं ततोऽन्यन्न किञ्चिद्भविष्यति-त्यर्थः। कुतः विलोभनान्तरैर्विषयान्तरैरहृतस्य अनाकृष्टस्य मम सर्व्वे विषयाः भोगादयः त्वदाश्रयास्त्वदधीनाः त्वां विना मे न किञ्चिद्रोचत इत्यर्थः ॥ ६९ ॥

विलपन्निति। कोशलाधिपोऽज इति, करुणः शोकरसः स एवार्थस्तेन ग्रथितं सम्बद्धं यथा तथा, प्रियां प्रति विलपन् पृथिवी रुहान् वृक्षानपि स्रुताः शाखारसा मकरन्दाएव बाष्पास्तैर्दूषितान-करोत्। अचेतनानप्यरोदयदित्यर्थः ॥ ७० ॥

अथेति। अथ स्वजनो बन्धुवर्गः तस्याजस्य अङ्कतउत्सङ्गात् कथ-ञ्चिदपनीय तद्दिव्यकुसुममेव अन्त्यं मण्डनमलङ्कारोयस्यास्ता तां सुन्दरीम् अगुरूणि चन्दनानि एधांसि यस्य तस्मै अनलायाग्नये विस-

विससर्ज्ज तदन्त्यमण्डना
मनलायागुरुचन्दनैधसे ॥ ७१ ॥

प्रमदामनु संस्थितः शुचा
नृपतिः सन्निति वाच्यदर्शनात्।
न चकार शरीरमग्निसात्
सह देव्या न तु जीविताशया ॥ ७२ ॥

अथ तेन दशाहतः परे
गुणशेषामुपदिश्य भामिनीम्।

सर्ज्ज विसृष्टवान्। क्रियाग्रहणमपि कर्त्तव्यमिति क्रियामात्रप्रयोगे सम्प्रदानत्वाच्चतुर्थी ॥ ७१ ॥

प्रमदामिति। नृपतिः सन्नपि विद्वानपि शुचा शोकेन प्रमदामनु प्रमदया सह संस्थितो मृत इति वाच्यदर्शनात् निन्दादर्शनात् देव्या इन्दुमत्या सह शरीरम् अग्निसादग्न्यधीनं न चकार। तदधीन वचने इति सातिप्रत्ययः। जीविताशया प्राणेच्छया तु न ॥ ७२ ॥

अथेति। अथ विदुषा तेनाजेन गुणाएव शेषा यस्यास्ता गुणशेषां भामिनीमिन्दुमतीमुपदिश्योद्दिश्य दशानामह्नां समाहारो दशाहः। तद्धितार्थेत्यादिना समासः, सामाहारस्यैकत्वादेकवचनम्, राजाहः-सखिभ्यष्टजिति टच्, रात्राह्नाहाः पुंसीति पुंवत्, ततस्तसिल्। तस्मात् दशाहतः परे कर्त्तव्याः सहर्द्धयो महासम्द्धयो विधयः क्रियाः पुरः पुर्य्यां उपवने एव समापिताः सम्पूर्णमनुष्ठिताः। दशाहत इत्यत्र विप्रः शुध्येद्दशाहेन द्वादशाहेन भूमिप इतिवचनविरोधो नाशङ्कनीयः तस्य निर्गुणक्षत्रियविषयत्वात्। गुणवत्क्षत्रियस्य दशाहेन शुद्धिमाह

विदुषा विषयो महर्द्धयः
पुरएवोपवने समापिताः ॥ ७३ ॥

स विवेश पुरीं तया विना
क्षणदापायशशाङ्कदर्शनः।
परिवाहमिवावलोकयन्
स्वशुचः पौरवधूमुखाश्रुषु ॥ ७४ ॥

अथ तं सवनाय दीक्षितः
प्रणिधानाद्गुरुराश्रमस्थितः।
अभिषङ्गजडं विजज्ञिवा-
निति शिष्येण किलान्वबोधयत् ॥ ७५ ॥

पराशरः, क्षत्रियस्तु दशाहेन स्वधर्म्मनिरतः शुचिरिति। सूच्यते-ऽस्यापि गुणवत्त्वं विदुषेत्यनेन ॥ ७३ ॥

स इति। तयेन्दुमत्या विना क्षणदाया रात्रेरपायेऽपगमे यः शशाङ्कः चन्द्रः स इव दृश्यते इति कर्म्मार्थे ल्युट्। प्रातःकालिकचन्द्र इव दृश्यमान इत्यर्थः सोऽजः पौरवधूमुखाश्रुषु स्वशुचः स्वशोकस्य परिवाहं जलोच्छ्वासमिवावलोकयन्। जलोच्छ्वासाः परीवाहा इत्यमरः। स्वदुःखपूरातिशयमिव पश्यन् पुरीं विवेश। वधूग्रहणात् तस्यामिन्दुमत्यां सख्याभिमानात् अजसमानदुःखसूचकपरीवाहोक्ति-र्निर्व्वहति ॥ ७४ ॥

अथेति। अथ सवनाय यागाय दीक्षितो गुरुर्वशिष्ठः आश्रमे स्वकीयाश्रमे स्थितः सन् तमजमभिषङ्गजडं दुःखमोहितं प्रणिधानात् चित्तैकाग्र्यात् विजज्ञिवान् ज्ञातवान्। कसुश्चेति कसुप्रत्ययः।

असमाप्तविधिर्यतोमुनि
स्तव विद्वानपि तापकारणम्।
न भवन्तमुपस्थितः स्वयं
प्रकृतौ स्थापयितुं पथश्च्युतम्॥ ७६॥
मयि तस्य सुवृत्त वर्त्तते
लघुसन्देशपदा सरस्वती।
शृणु विश्रुतसत्त्वसार तां
हृदि चैनामुपधातुमर्हसि॥ ७७॥

इति वक्ष्यमाणप्रकारेण्ये शिष्यं अन्वबोधयत् किल। बुधेर्ण्यन्ताण्णिचि लङ्॥ ७५॥

वशिष्ठशिष्य आह

असमाप्तेति। यतोहेतोर्मुनिरसमाप्तविधिः असमाप्तक्रतुः ततः तव तापकारणं दुःखहेतुं कलत्रनाशरूपं विद्वान् जानन्नपि। विदेः शतुर्वसुरिति वस्वादेशः, न लोकेत्यादिना षष्ठीप्रतिषेधः। पथश्च्युतं स्वभावाद्भ्रष्टं भवन्तं प्रकृतौ स्वभावे स्थापयितुं समाश्वासयितुम् इत्यर्थः स्वयं नोपस्थितः नागतः॥ ७६॥

मयीति। हे सुवृत्त सदाचार। सन्दिश्यतइति सन्देशः सन्देष्टव्यार्थः तस्य पदानि वाचकानि लघूनि संक्षिप्तानि सन्देशपदानि यस्यां सा लघुसन्देशपदा तस्य मुनेः सरस्वती वाक् मयि वर्त्तते हे विश्रुतसत्त्वसार प्रख्यातधैर्यातिशय तां सरस्वतीं शृणु एनां वाचं हृदि उपधातुं धर्त्तुं चार्हसि॥ ७७॥

वक्ष्यमाणार्थानुगुणं मुनेः सर्वज्ञत्वं तावदाह

पुरुषस्येति। अजन्मनः पुरुषस्य पुराणपुरुषस्य भगवतस्त्रिविक्र-

पुरुषस्य पदेष्वजन्मनः
समतीतञ्च भवच्च भावि च ।
सहि निष्प्रतिघेन चक्षुषा
त्रितयं ज्ञानमयेन पश्यति ॥ ७८ ॥
चरतः किल दुश्चरं तप
स्तृणविन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं
हरिरस्मै हरिणीं सुराङ्गनाम् ॥ ७९ ॥
स तपःप्रतिबन्धमन्युना
प्रमुखाविष्कृतचारुविभ्रमाम् ।

मस्य पदेषु विक्रमेषु त्रिभुवनेष्वपीत्यर्थः समतीतं भूतञ्च भवत् वर्त्तमानञ्च भावि भविष्यच्चेति त्रितयं स मुनिः निष्प्रतिघेन अप्रतिबन्धेन ज्ञानमयेन चक्षुषा ज्ञानदृष्ट्या पश्यति हि अतस्तदुक्तिषु न संशयितव्यमित्यर्थः ॥ ७८ ॥

चरतइति। पुरा किल दुश्चरं तीव्रं तपश्चरतः तृणविन्दोस्तृणविन्दुनामकात् कस्माच्चिदृषेः परिशङ्कितः भीतः। कर्त्तरि क्तः। भीत्रार्थानां भयहेतुरित्यपादानात् पञ्चमी। हरिरिन्द्रः समाधिभेदिनीं तपोविघातिनी हरिणी नाम सुराङ्गनाम् अस्मै तृणविन्दवे प्रजिघाय प्रेरितवान् ॥ ७९ ॥

सइति। स मुनिः शमः शान्तिरेव वेला मर्य्यादा तस्याः प्रलयोर्म्मिणा प्रलयकालतरङ्गेण शमविघातकेनेत्यर्थः। अब्ध्यम्बु विकृतौ वेला कालमर्य्यादयोरपीत्यमरः। तपसः प्रतिबन्धेन विघ्नेन यो मन्युः

अशपद्भव मानुषीति तां
शमवेलाप्रलयोर्म्मिणा भुवि ॥ ८० ॥

भगवन् परवानयं जनः
प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं
कृतवाना सुरपुष्पदर्शनात् ॥ ८१ ॥

क्रथकैशिकवंशसम्भवा
तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं
विवशा शापनिवृत्तिकारणम् ॥ ८२ ॥

क्रोधत्वेन हेतुना प्रमुखे अग्रे आविष्कृतचारुविभ्रमां प्रकाशितमनोहरविलासां तां हरिणी भुवि भूलोके मानुषी मनुष्यस्त्री भवेत्यशपत् ॥ ८० ॥

भगवन्निति । हे भगवन् महर्षे अयं जनः परोऽस्यास्तीति स्वामित्वेन परवान् पराधीनः । अयमिति आत्मनिर्देशः अहं पराधीनेत्यर्थः । मे मम प्रतिकूलाचरितमपराधं क्षमस्व इति अनेन प्रकारेणोपनतां शरणागतां च हरिणीम् आ सुरपुष्पदर्शनात् सुरपुष्पदर्शनपर्य्यन्तं क्षितिं स्पृशतीति क्षितिस्पृक् तां क्षितिस्पृशं मानुषी कृतवान् दिव्यपुष्पदर्शनं शापावधिरित्यनुगृहीतवानित्यर्थः ॥ ८१ ॥

क्रथेति । क्रथकैशिकानां राज्ञां वंशे सम्भवोयस्याः सा हरिणी तव महिषी अभिषिक्ता स्त्री । कृताभिषेका महिषीत्यमरः । भूत्वा चिराय दिवः स्वर्गात् च्युतं शापनिवृत्तिकारणं सुरपुष्परूपम् उपलब्धवती विवशा अभूदिति शेषः मृतेत्यर्थः ॥ ८२ ॥

तदलं तदपायचिन्तया
विपदुत्पत्तिमतामुपस्थिता।
वसुधेयमवेक्ष्यतां त्वया
वसुमत्या हि नृपाः कलत्रिणः ॥८३॥

उदये मदवाच्यमुज्झता
श्रुतमाविष्कृतमात्मवत् त्वया।
मनसस्तदुपस्थिते ज्वरे
पुनरक्लीवतया प्रकाश्यताम् ॥८४॥

तदिति। तत्तस्मात् तस्याः अपायचिन्तयालं तस्या मरणं न चिन्त्यमित्यर्थः। निषेधक्रियां प्रति करणत्वात् चिन्तयेति तृतीया। कुतोन चिन्त्यमतआह उत्पत्तिमतां जन्मवतां विपद्विपत्तिरुपस्थिता सिद्धा जातस्य हि ध्रुवोमृत्युरित्यर्थः। तथापि कलत्ररहितस्य किं जीवितेन तत्राह त्वया इयं वसुधा भूमिरवेक्ष्यतां पाल्यतां हि यस्मात् नृपाः वसुमत्या पृथिव्या कलत्रिणः कलत्रवन्तः अतो न शोचितव्यमित्यर्थः ॥ ८३ ॥

उदयइति। उदयेऽभ्युदये सति मदेन यद्वाच्यं निन्दा तदुज्झता परिहरता सत्यपि मदहेतावमाद्यता त्वया यत् आत्मवत् अध्यात्मप्रचुरं श्रुतं शास्त्रं तज्जनितं ज्ञानमिति यावत् आविष्कृतं प्रकाशितं तत् श्रुत मनसोज्वरे सन्तापे उपस्थिते प्राप्ते अक्लीवतया धैर्येण लिङ्गेन पुनः प्रकाश्यतां विदुषा सर्वास्ववस्थास्वपि धीरेण भवितव्यमित्यर्थः ॥ ८४ ॥

इतोऽपि न रोदितव्यमित्याह

रुदतेति। रुदता भवता सा कुतएव लभ्यते न लभ्यतएव अनु-

रुदता कुतएव सा पुन
र्भवता नानुमृतापि लभ्यते।
परलोकजुषां स्वकर्मभि
र्गतयोभिन्नपथा हि देहिनाम्॥ ८५॥

अपशोकमनाः कुटुम्बिनी
मनुगृह्णीष्व निवापदत्तिभिः।
स्वजनास्रु किलातिसन्ततं
दहति प्रेतमिति प्रचक्षते॥ ८६॥

मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवितमुच्यते बुधैः।

म्रियतइत्यनुमृत् क्विप् तेन अनुमृता अनुमृतवतापि भवता पुनः न लभ्यते। कथं न लभ्यते इत्याह परलोकजुषां लोकान्तरभाजां देहिनां गम्यन्तइति गतयोगम्यस्थानानि स्वकर्म्मभिः पूर्व्वाचरितपुण्यपापैः भिन्नपथाः पृथक्कृतमार्गाः हि। परत्रापि स्वस्वधर्म्मानुरूपफलभोगाय भिन्नदेहगमनान्मृतेनापि लभ्यतइत्यर्थः॥ ८५॥

अपेति। किन्त अपशोकमनाः निर्दुःखचित्तः सन् कुटुम्बिनी पत्नी निवापदत्तिभिः पिण्डोदकादिदानैः अनुगृह्णीष्व तर्पयेत्यर्थः अन्यथा दोषमाह अतिसन्ततमविच्छिन्नं स्वजनानां बन्धूनाम्। बन्धुस्वस्वजनाः समा इत्यमरः। अस्रु कर्त्तृ प्रेतं मृतं दहतीति प्रचक्षते किल। अत्र याज्ञवल्क्यः श्लेष्मास्रु बन्धुभिर्मुक्तं प्रेतोभुङ्क्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाः कार्य्याः स्वशक्तितइति॥ ८६॥

मरणमिति। शरीरिणां मरणं प्रकृतिः स्वभावः ध्रुवमित्यर्थः

क्षणमप्यवतिष्ठते श्वसन्
यदि जन्तुर्ननु लाभवानसौ ॥८७॥

अवगच्छति मूढचेतनः
प्रियनाशं हृदि शल्यमर्पितम्।
स्थिरधीस्तु तदेव मन्यते
कुशलद्वारतया समुद्धृतम् ॥ ८८ ॥

स्वशरीरशरीरिणावपि
श्रुतसंयोगविपर्ययौ यदा।
विरहः किमिवानुतापयेद्
वद बाह्यैर्विषयैर्विपश्चितम् ॥८९॥

जीवित विकृतिर्यादृच्छिकं बुधैरुच्यते एवं स्थिते जन्तुः प्राणी क्षणमपि। अत्यन्तसंयोगे द्वितीया। श्वसन् जीवन् अवतिष्ठते यदि असौ क्षणजीवी लाभवान् ननु। जीवने यथालाभ सन्तोष्टव्यम् अलभ्यलाभात्, मरणे तु न शोचितव्यम् अस्य स्वाभाव्यादिति भावः ॥ ८७ ॥

अवेति। मूढचेतनो भ्रान्तबुद्धिः प्रियनाशमिष्टनाशं हृदि अर्पितं निखात शल्यं शङ्कुमवगच्छति मन्यते स्थिरधीर्विद्वांस्तु तदेव शल्यं समुद्धृतमुत्खात मन्यते प्रियनाशे सतीति शेषः, कुतः कुशलद्वार तया प्रियनाशस्य मोक्षोपायतयेत्यर्थः। विषयलाभविनाशयोर्यथाक्रमं हिताहितसाधनत्वाभिमानः पामराणां विपरीतन्तु विपश्चितामिति भावः ॥ ८८ ॥

स्वेति। स्वस्य शरीरशरीरिणौ देहात्मानावपि यदा यतः श्रुतौ श्रुत्यवगतौ संयोगविपर्ययौ संयोगवियोगौ ययो स्तौ तथोक्तौ तदा,

न पृथग्जनवच्छुचो वशं
वशिनामुत्तम गन्तुमर्हसि।
द्रुमसानुमतां किमन्तरं
यदि वायौ द्वितयेऽपि ते चलाः ॥९०॥

स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम्।
तदलब्धपदं हृदि शोकघने
प्रतियातमिवान्तिकमस्य गुरोः ॥९१॥

वाह्यैर्विषयैः पुत्रकलत्रादिभिर्विरहोविप्रश्नितं विद्वांसं किमिवानुतापयेत् त्वं वद न किञ्चिदित्यर्थः। अथवा स्वशब्दस्य शरीरेणैव सम्बन्धः ॥ ८९ ॥

नेति। हे वशिनामुत्तम जितेन्द्रियवर्य्य पृथग्जनवत् शुचः शोकस्य वशं गन्तुं नार्हसि। तथाहि द्रुमसानुमतां तरुशिखरिणां किमन्तरं को विशेषः वायौ सति द्वितयेपि द्विप्रकारा अपि। प्रथमचरमेत्यादिना जसि विभाषया सर्व्वनामसंज्ञा। ते द्रुमसानुमन्तश्चला यदि सानुमतामपि चलने द्रुमवत्तेषामपि अचलसंज्ञा न स्यादित्यर्थः ॥ ९० ॥

सइति। सोऽजः उदारमतेर्विनेतुर्गुरोः वशिष्ठस्य वचः तच्छिष्यमुखेरितं तथेति प्रतिगृह्याङ्गीकृत्य मुनिं वशिष्ठशिष्यं विससर्ज्ज प्रेषयामास। किन्तु तद्वचः शोकघने दुःखसान्द्रेऽस्याजस्य हृदि अलब्धपदमप्राप्तावकाशं सद्गुरोर्वशिष्ठस्यान्तिकं प्रतियातमिव प्रतिनिवृत्तं किमु इत्युत्प्रेक्षा। तोटकवृत्तमेतत्। इह तोटकमम्बुधिसैः प्रथितमिति लक्षणम् ॥ ९१ ॥

तेनाष्टौ परिगमिताः समाः कथञ्चि
द्बालत्वादवितथसूनृतेन सूनोः ।
सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥९२॥

तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद ।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमने त्वरया स मेने ॥९३॥

तेनेति । अवितथं यथार्थं सूनृतं प्रियवचनं यस्य तेनाजेन सूनोः पुत्रस्य बालत्वाद्राज्याक्षमत्वादित्यर्थः प्रियायाः इन्दुमत्याः सादृश्यं वस्त्वन्तरगतमाकारसाम्यं प्रतिकृतिश्चित्रं तयोर्दर्शनैः स्वप्नेषु क्षणिकाः क्षणभङ्गुराः ये समागमोत्सवाः तैश्च कथञ्चित् कृच्छ्रेण अष्टौ समाः वत्सराः । संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समा इत्यमरः । परिगमिताः अतिवाहिताः । उक्तञ्च । वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारः कामव्यथितमनसां कोपि कथितइति । प्रकृते सादृश्यादित्रितयाभिधानं तदङ्गस्पृष्टपदार्थस्पृष्टेरप्युपलक्षणम् । प्रहर्षिणी वृत्तमेतत् ॥ ९२ ॥

तस्येति । शोकएव शङ्कुः कीलः । शङ्कुः कीले शिवे चेति विश्वः । तस्याजस्य हृदयं प्लक्षप्ररोहः सौधतलमिव प्रसह्य बलात् किल बिभेद । सोऽजः प्राणान्तहेतुं मरणकारणमपि भिषजामसाध्यमप्रतिसमाधेयं तं शोकशङ्कुं रोगमध्यवसितं प्रियाया अनुगमने त्वरयोत्कण्ठया लाभं

सम्यग्विनीतमथ वर्महरं कुमार-
मादिश्य रक्षणविधौ विधिवत् प्रजानाम् ।
रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः
प्रायोपवेशनमतिर्नृपतिर्बभूव ॥ ९४ ॥
तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।

मन तद्विरहस्यातिदुःसहत्वात् तत्राग्निकारणं मरणमेव वरमित्यमन्यतेत्यर्थः ॥ ९३ ॥

सम्यगिति । अथ नृपतिरजः सम्यग्विनीतं निसर्गसंस्काराभ्यां विनयवन्तं वर्म हरतीति वर्महरः कवचधारणार्हवयस्कः । वयसि चेत्यच्प्रत्ययः । तं कुमारं दशरथं प्रजानां रक्षणविधौ राज्ये विधिवद्विध्यर्हं यथाशास्त्रमित्यर्थः । तदर्हमिति वतिप्रत्ययः । आदिश्य नियुज्य रोगोपसृष्टाया व्याप्तायास्तनोः शरीरस्य दुर्वसतिं दुःखावस्थितिं मुमुक्षुः जिहासुः सन् प्रायोपवेशनेऽनशनावस्थाने मतिर्यस्य स बभूव । प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपीति विश्वः । अत्र पुराणवचनं समासक्तो भवेद्यस्तु पातकैर्महदादिभिः । दुश्चिकित्स्यैर्महारोगैः पीड़ितो वा भवेत्तु यः । स्वयं देहविनाशस्य काले प्राप्ते महामतिः । आब्रह्माणं वा स्वर्गादिमहाफलजिगीषया । प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा । एतेषामधिकारोऽस्ति नान्येषां सर्वजन्तुषु । नराणामथ नारीणां सर्ववर्णेषु सर्वदेति । अनयोर्वसन्ततिलकाच्छन्दः तल्लक्षणम् उक्ता वसन्ततिलका तभजाजगौ ग इति ॥ ९४ ॥

तीर्थ इति । असावजो जह्नुकन्यासरय्वोस्तोयानां जलानां व्यतिकरेण सम्भेदेन भवे तीर्थे गङ्गासरयूसङ्गमे देहत्यागात् सद्य एवामरगणनायां लेख्यं लेखनम् । तयोरेव कृत्यक्तखलर्था इति भावार्थे ण्यत्

किंकिणिदृष्यकांतया

पूर्वाकाराधिकतररुचा सङ्गतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ ९५ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अजविलापोनाम अष्टमः सर्गः ।

प्रत्ययः । आसाद्य प्राप्य पूर्वस्मादाकारादधिकतरा रुक् यस्याः तया कान्तया रमण्या सङ्गतः सन् नन्दनस्य इन्द्रोद्यानस्य अभ्यन्तरेषु अन्तर्वर्त्तिषु लीलागारेषु क्रीडाभवनेषु पुनररमत । यथाकथञ्चित्तीर्थेऽस्मिन् देहत्यागं करोति यः । तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपीति स्कान्दे । मन्दाक्रान्ता छन्दः तल्लक्षणं मन्दाक्रान्ता जलधिषड्गैर्म्भौ नतौ ताद्गुरू चेदिति ॥ ९५ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायाम् अष्टमः सर्गः ।



नवमः सर्गः।



पितुरनन्तरमुत्तरकोशलान्
समधिगम्य समाधिजितेन्द्रियः।
दशरथः प्रशशास महारथो
यमवतामवतां च धुरि स्थितः॥ १॥

अधिगतं विधिवद्यदपालयत्
प्रकृतिमण्डलमात्मकुलोचितम्।

एकलोचनमेकार्द्धं सार्द्धलोचनमन्यतः।
नीलार्द्धं नीलकण्ठार्द्धं महः किमपि मन्महे॥

पितुरिति। समाधिना संयमेन जितेन्द्रियः। समाधिर्नियमे ध्याने इतिकोषः। यमवतां संयमिनाम् अवतां रक्षतां च धुरि अग्रे स्थितो महारथः। एको दश सहस्राणि योधयेत् यस्तु धन्विनाम्। शस्त्र-शास्त्रप्रवीणश्च स महारथ उच्यते। दशरथः पितुरनन्तरम् उत्तर कोशलान् जनपदान् समधिगम्य प्रशशास। अत्र मनुः। क्षत्रियस्य परो धर्मः प्रजानां परिपालनमिति। द्रुतविलम्बितमेतद्वृत्तं तल्लक्षणं द्रुतविलम्बितमाह नभौ भराविति॥ १॥

अधिगतमिति। अधिगतं प्राप्तम् आत्मकुलोचितं स्वकुलागतं सन-गरं नगरजनसहितं प्रकृतिमण्डलं जानपदमण्डलम्। अत्र प्रकृति-

अभवदस्य ततो गुणवत्तरं
सनगरं नगरन्ध्रकरौजसः ॥ २ ॥
उभयमेव वदन्ति मनीषिणः
समयवर्षितया कृतकर्म्मणाम् ।
बलनिषूदनमर्थपतिञ्च तं
श्रमनुदं मनुदण्डधरान्वयम् ॥ ३ ॥
जनपदे न गदः पदमादधा-
वभिभवः कुतएव सपत्नजः ।

शब्देन प्रजामात्रवाचिना नगरशब्दयोगाद्गोबलीवर्दन्यायेन जानपदमात्रम् उच्यते । यद्यस्माद्विधिवद्यथाशास्त्रमपालयत् ततो हेतोः रन्ध्रं करोतीति रन्ध्रकरः रन्ध्रहेतुरित्यर्थः । कृञोहेतुताच्छील्यानुलोम्येष्विति टप्रत्ययः । नगस्य रन्ध्रकरः नगरन्ध्रकरः कुमारः । कुमारः क्रौञ्चदारण इत्यमरः । तदोजसस्तत्तुल्यबलस्यास्य दशरथस्य गुणवत्तरमभवत् तत् पौरजानपदमण्डलं तस्मिन्नतीव रक्तमभूदित्यर्थः ॥ २ ॥

उभयमिति । मनस ईषिणोमनीषिणो विद्वांस । पृषोदरादित्वात् साधुः । बलनिषूदनम् इन्द्रं दण्डस्य धरो राजा मनुरिति यो दण्डधरः स एवान्वयः कूटस्थोयस्य तमर्थपतिं दशरथं चेत्युभयमेव समयेऽवसरे जलं धनं च वर्षतीति समयवर्षी तस्य भावेन समयवर्षितया हेतुना कृतकर्मणां स्वकर्मकारिणां नुदतीति नुदम् । इगुपधज्ञाप्रीतिकारः कइति कप्रत्ययः । श्रमस्य नुदं श्रमनुदम् । क्विबन्तत्वे नपुंसकलिङ्गेनोभयशब्देन सामानाधिकरण्यं न स्यादिति । वदन्ति ॥ ३ ॥

जनपद इति । प्रशस्ते शान्तिपरे अमरतेजसि अजनन्दने दशरथे

क्षितिरभूत फलवत्यजनन्दने
शमरतेऽमरतेजसि पार्थिवे ॥ ४ ॥

दशदिगन्तजिता रघुणा यथा
श्रियमपुष्यदजेन ततःपरम् ।
तमधिगम्य तथैव पुनर्बभौ
न न महीनमहीनपराक्रमम् ॥ ५ ॥

समतया वसुवृष्टिविसर्जनै-
र्नियमनादसताञ्च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥ ६ ॥

पार्थिवे पृथिव्याः ईश्वरे सति । तस्येश्वर इत्यण्प्रत्ययः । जनपदे देशे गदोव्याधिः । उपताप रोगव्याधिगदामयाइत्यमरः । पद नादधे नाचक्रामेत्यर्थः शत्रुजः शत्रुजन्यः अभिभवः कुतएव असम्भावितएवेत्यर्थः क्षितिः फलवत्यभूत् ॥ ४ ॥

दशेति । महीं दशदिगन्तान् जितवानिति दशदिगन्तजित् तेन रघुणा यथा श्रियं कान्तिमपुष्यत् ततःपरं रघोरनन्तरम् अजेन च श्रियमपुष्यत् । तथैव अहीनपराक्रमं न हीनः पराक्रमोयस्य तं अन्यूनपराक्रमं तं दशरथम् इनं स्वामिनम् अधिगम्य पुनर्न बभाविति न बभावेवेत्यर्थः । द्वौ नञौ प्रकृतमर्थं गमयतः ॥ ५ ॥

समतयेति । नराधिपोदशरथः समतया समवर्त्तित्वेन मध्यस्थत्वेनेत्यर्थः वसुवृष्टेर्धनवृष्टेर्विसर्जनैः असतां दुष्टानां नियमनान्निग्रहाच्च सवरुणौ वरुणसहितौ यमपुण्यजनेश्वरौ यमकुबेरौ यमकुबेर वरुणान्

न मृगयाभिरतिर्न दुरोदरं
न च शशिप्रतिमाभरणं मधु।
तमुदयाय न वा नवयौवना
प्रियतमा यतमानमपाहरत् ॥ ७॥
न कृपणा प्रभवत्यपि वासवे
न वितथा परिहासकथास्वपि।
न च सपत्नजनेष्वपि तेन वा-
गपरुषा परुषाक्षरमीरिता ॥ ८ ॥

यथासंख्यमनुययौ अनुचकार। रुचा तेजसा अरुणाग्रसरम् अरुणसारथिं सूर्यम् अनुययौ ॥ ६ ॥

तस्य व्यसनासक्तिर्नासीदित्याह

नेति। उदयाय यतमानमभ्युदयार्थं व्याप्रियमाणं तं दशरथं मृगयाभिरतिराखेटव्यसनं नापाहरत् नाचकर्ष। आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः। दुष्टमा समन्तादुदरमस्येति दुरोदरं द्यूतं न चापाहरत्। दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः। शशिनः प्रतिमा प्रतिबिम्बम् आभरणं यस्य तन्मधु नापाहरत्। नेति पदच्छेदः वाशब्दः समुच्चये। नवयौवना नवं नूतनं यौवनं तारुण्यं यस्यास्तादृशी प्रियतमा स्त्री नापाहरत्। जातावेक वचनम्। अत्र मनुः। पानमक्षाः स्त्रियश्चेति मृगया च यथाक्रमम्। एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे इति ॥ ७ ॥

नेति। तेन राज्ञा प्रभवति प्रभौ सति वासवेऽपि कृपणादीना वाक् नेरिता नोक्ता परिहासकथास्वपि वितथा अनृता वाक् नेरिता, किञ्च अपरुषा रोषशून्येन तेन सपत्नजनेष्वपि परुषाक्षरं निष्ठुराक्षरं यथा

उदयमस्तमयं च रघूद्वहा-

दुभयमानशिरे वसुधाधिपाः।

स हि निदेशमलङ्घयतामभूत्

सुहृदयोहृदयः प्रतिगर्जताम्॥ ९॥

अजयदेकरथेन स मेदिनी-

मुदधिनेमिमधिज्यशरासनः।

जयमघोषयदस्य तु केवलं

गजवती जवतीव्रहया चमूः॥ १०॥

तथा वाक् नेरिता किमुतान्यथेति सर्वथापि शब्दार्थः। किन्त्वदीना तथा मधुरैव वागुक्तेति फलितार्थः॥ ८॥

उदयमिति। वसुधाधिपा राजानः उद्वहतीत्युद्वहो नायकः पचाद्यच् रघूणामुद्वहो रघुनायकस्तस्माद्रघुनायकात् उदयं वृद्धिम् अस्तमयं नाशं चेत्युभयमानशिरे लेभिरे। कुतः हि यस्मात् स दशरथो निदेशमाज्ञाम् अलङ्घयतां शोभनं हृदयमस्येति सुहृन्मित्रमभूत्। सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः। प्रतिगर्जतां प्रतिस्पर्द्धिनाम् अयइव हृदयं यस्येति अयोहृदयः कठिनचित्तोऽभूत् आज्ञाकारिणो रक्षति अन्यान्मारयतीत्यर्थः॥ ९॥

अजयदिति। अधिज्यशरासनः स दशरथः उदधिनेमिं समुद्रवेष्टनाम् मेदिनीमेकरथेनाजयत् स्वयमेकरथेनाजैषीदित्यर्थः। गजवती गजयुक्ता जवेन तीव्राः जवाधिकाः हयाः यस्याः सा चमूस्तु अस्य नृपस्य केवलं जयमघोषयत् अप्रथयत्। स्वयमेकवीरस्य चमूरुपकरणमात्रमिति भावः॥ १०॥

अवनिमेकरथेन वरूथिना
जितवतः किल तस्य धनुर्भृतः।
विजयदुन्दुभितां ययुरर्णवा
घनरवा नरवाहनसम्पदः॥ ११॥
शमितपक्षबलः शतकोटिना
शिखरिणां कुलिशेन पुरन्दरः।
स शरवृष्टिमुचा धनुषा द्विषां
स्वनवता नवतामरसाननः॥ १२॥
चरणयोर्नखरागसमृद्धिभि-
र्मुकुटरत्नमरीचिभिरस्पृशन्।

अवनिमिति। वरूथिना गुप्तिमता। वरूथो रथगुप्तिर्यो तिरो-धत्ते रथस्थितिमिति सज्जनः। एकरथेन अवनिं जितवतो धनुर्भृतो नरवाहनसम्पदः कुबेरश्रीकस्य तस्य दशरथस्य घनरवाः मेघसमघोषाः अर्णवाः विजयदुन्दुभितां ययुः अर्णवान्तविजयीत्यर्थः॥ ११॥

शमितेति। पुरन्दरः इन्द्रः शतकोटिना शतास्रिणा कुलिशेन वज्रेण शिखरिणां पर्वतानां शमितपक्षबलः विनाशितपक्षसारः नव-तामरसानन नवपङ्कजाननः। पङ्केरुहन्तामरसमित्यमरः। स दश-रथ. शरवृष्टिमुचा स्वनवता धनुषा द्विषां शमितः नाशितः पक्षः सहायोबलञ्च येन स तथोक्तः। पक्षः सहायेऽपीत्यमरः॥ १२॥

चरणयोरिति। शतशोऽन्यतयोऽखण्डितपौरुषं तं दशरथं मरुतो-देवाः शतमख यथा शतक्रतुमिव नखरागेण चरणनखकान्त्या समृ-

नृपतयः शतशो मरुतो यथा
शतमखं तमखण्डितपौरुषम् ॥ १३ ॥
निववृते स महार्णवरोधसः
सचिवकारितबालसुताञ्जलीन् ।
समनुकम्प्य सपत्नपरिग्रहा-
ननलकानलकानवमां पुरीम् ॥ १४ ॥
उपगतोऽपि च मण्डलनाभितां
अनुदितान्यसितातपवारणः ।

द्धिभिः सम्पादितर्द्धिभिः मुकुटरत्नमरीचिभिः चरणयोरस्पृशन् प्रणेमु-रित्यर्थः ॥ १३ ॥

निववृतइति। स दशरथः सचिवैः सम्प्रयोज्यैः कारिताः बाल-सुतानामञ्जलयो यैस्तान् स्वयमसम्मुखागतानित्यर्थः अनलकान् हृत भर्त्त-कतया अलकसंस्कारशून्यान् सपत्नपरिग्रहान् शत्रुपत्नीः। पत्नी परिजनादानमूलशापाः परिग्रहा इत्यमरः। समनुकम्प्यानुकम्प्य अलकानवमाम् अनकानगरात् अन्यूनां पुरीमयोध्यां प्रति महार्णवानां रोधसः पर्य्यन्तान्निववृते। शरणागतवत्सल इति भावः ॥ १४ ॥

उपगतइति। अनुदितमनुच्छ्रितम् अन्यत् स्वच्छत्रातिरिक्तं सिता तपवारणं श्वेतच्छत्रं यस्य सः अनलसोमयोरग्निचन्द्रयोः समे द्युती तेजःकान्ती यस्य स तथोक्तः श्रियं लक्ष्मीं रन्ध्रे अन्यायालस्यादि रूपे छिद्रे चलां चञ्चलामवेक्ष्यावलोक्य। श्रीर्हि कैनचिच्छिद्रेण पुमांसं परि-हरति। स दशरथो मण्डलस्य नाभितां द्वादशराजमण्डलस्य प्रधान-महीपतित्वमुपगतोऽपि चक्रवर्त्ती सन्नपीत्यर्थः। अथ नाभिस्तु जन्त्वङ्गे यस्य संज्ञा प्रतारिका। रथचक्रस्य मध्यस्थपिण्डिकायश्च ना पुनः।

श्रियमवेक्ष्य स रन्ध्रचलामभू-
दनलसोऽनलसोमसमद्युतिः ॥१५॥

तमपहाय ककुत्स्थकुलोद्भवं
पुरुषमात्मभवञ्च पतिव्रता।
नृपतिमन्यमसेवत देवता
सकमला कमलाघवमर्थिषु ॥१६॥

आद्यं ...षड्भेदे तु मनोर्मुख्यमहीपताविति केशवः। पाठान्तरे। अजितं नृपास्पदमस्तीति बुद्ध्वा अनलसोऽप्रमत्तोऽभूत् विजितनिखिलजेतव्योऽपि पुनर्जेतव्यान्तरवानिव जागरूक एवावातिष्ठतेत्यर्थः। द्वादशराजमण्डलन्तु कामन्दकेनोक्तम्। अरिर्मित्रमरेर्मित्रं मित्रमित्रमतःपरम्। तथारिमित्रमित्रञ्च विजिगीषोः पुरःसराः। पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम्। आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे। मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः। अनुग्रहे संहतानां व्यस्तानाञ्च वधे प्रभुरिति। अरिमित्रादयः पञ्च विजिगीषोः पुरःसराः। पार्ष्णिग्राहाक्रन्दपार्ष्णिग्राहासाराक्रन्दासाराः इति पृष्ठतः चत्वारः। मध्यमोदासीनौ द्वौ विजिगीषुरेकः इत्येवं द्वादशराजमण्डलम्। तत्रोदासीनमध्यमोत्तरश्चक्रवर्त्ती दशरथश्चैतादृशमिति तात्पर्यार्थः ॥१५॥

तमिति। पत्यौ व्रतं नियमो यस्याः सा पतिव्रता सकमला कमलहस्ता देवता लक्ष्मीरर्थिषु विषयेऽलाघवं लघुत्वरहितम् अपराङ्मुखमित्यर्थः ककुत्स्थकुलोद्भवं तं दशरथम् आत्मभवं पुरुषं विष्णुञ्च अपहाय त्यक्त्वा अन्यं कं नृपतिमसेवत कमपि नासेवतेत्यर्थः। विष्णाविव विष्णुतुल्ये तस्मिन्नपि श्रीः स्थिराभूदित्यर्थः ॥१६॥

तमलभन्त पतिं पतिदेवताः
शिखरिणामिव सागरमापगाः।
मगधकोशलकेकयशासिनां
दुहितरोऽहितरोपितमार्गणम् ॥१७॥

प्रियतमाभिरसौ तिसृभिर्बभौ
तिसृभिरेव भुवं सह शक्तिभिः।
उपगतो विनिनीषुरिव प्रजाः
हरिहयोऽरिहयोगविचक्षणः ॥१८॥

तमिति। पतिरेव देवता यासां ता पतिदेवताः पतिव्रताः मगधाश्च कोशलाश्च केकयाश्च तान् जनपदान् शासतीति तच्छासिनः तेषां राज्ञां दुहितरः पुत्र्यः सुमित्राकौशल्याकैकेय्य इत्यर्थः। अत्र क्रमो न विवक्षितः। अहितरोपितमार्गणं शत्रुनिखातशरम्। कलम्ब मार्गणशराद्य इत्यमरः। तं दशरथं शिखरिणां क्ष्माभृतां दुहितरः, आ समन्तात् पगच्छन्तीति अथवा आपेन अम्भश्चक्षिना वेगेन गच्छन्तीति आपगा इति क्षीरस्वामी। नद्यः सागरमिव, पतिं भर्त्तारमलभन्त प्रापुः ॥ १७ ॥

प्रियतमाभिरिति। अरीन् घ्नन्तीति अरिहा रिपुघ्नः। हन्तेः क्विप् ब्रह्मभ्रूणवृत्रेषु क्विविति नियमस्य प्रायिकत्वात्। यथाह न्यासकारः प्रायिकश्चायं नियमः क्वचिदन्यस्मिन्नप्युपपदे दृश्यते मधुहा प्रायिकत्वञ्च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यत इति। तेषु योगेषूपायेषु विचक्षणः दक्षः। योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वित्यमरः। द्वन्द्वेऽपि योज्यमेतत्। असौ दशरथः तिसृभिः प्रियतमाभिः सह, प्रजाः विनिनीषुर्विनेतुमिच्छुः तिसृभिः शक्तिभिः

स किल संयुगमूर्ध्नि सहायतां
मघवतः प्रतिपद्य महारथः।
स्वभुजवीर्य्यमगापयदुच्छ्रितं
सुरवधूरवधूतभयाः शरैः ॥१९॥

क्रतुषु तेन विसर्जितमौलिना
भुजसमाहृतदिग्वसुना कृताः।
कनकयूपसमुच्छ्रयशोभिनो
वितमसा तमसासरयूतटाः ॥२०॥

प्रभुमन्त्रोत्साहशक्तिभिरेव सह भुवमुपगतो हरिहयः इन्द्रइव बभौ" ॥ १८ ॥

स इति। महारथः स दशरथः संयुगमूर्ध्नि रणाग्रे मघवतः इन्द्रस्य सहायतां प्रतिपद्य प्राप्य शरैरवधूतभयाः निवर्त्तितत्रासाः सुरवधूः उच्छ्रितं स्वभुजवीर्य्यम् अगापयत् किल खलु। गायतेः शब्दकर्मत्वा-द्गतिबुद्धीत्यादिना सुरवधूनामपि कर्मत्वम् ॥ १९ ॥

क्रतुष्विति। क्रतुष्वश्वमेधेषु विसर्ज्जितमौलिना अवरोपितकिरी-टेन। यावद्यज्ञमध्वर्युरेव राजा भवतीति राजचिह्नत्यागविधाना-दित्यभिप्रायः। मौलिः कीरीटे धम्मिल्लइति विश्वः। भुजसमाहृत-दिग्वसुना भुजार्ज्जितदिगन्तसम्पदा। अनेन क्षत्रियस्य विजितनि-खिलत्वं नियमार्ज्जितधनत्वं शास्त्रनियोगकारित्वञ्च सूच्यते। वितमसा तमोगुणरहितेन तेन दशरथेन तमसा च सरयूश्च नद्यौ तयोस्तटाः कनकयूपानां समुच्छ्रयेण समुन्नतनेन शोभिनः कृताः। कनकमयत्वञ्च यूपानां शोभार्थं विध्यभावात्। हेमयूपस्तु शोभिकइति यादवः ॥२०॥

अजिनदण्डभृतं कुशमेखलां
यतगिरं मृगशृङ्गपरिग्रहाम् ।
अधिवसंस्तनुमध्वरदीक्षिता
मसमभासमभासयदीश्वरः ॥ २१ ॥

अवभृथप्रयतो नियतेन्द्रियः
सुरसमाजसमाक्रमणोचितः ।
नमयति स्म स केवलमुन्नतं
वनमुचे नमुचेरस्ये शिरः ॥ २२ ॥

अजिनेति । ईश्वरोभगवान् अष्टमूर्त्तिः अजिनं कृष्णाजिनं दण्डमौदुम्बरं बिभर्त्तीति ताम् अजिनदण्डभृतं कृष्णाजिनं दीक्षयति औदुम्बरं दण्डं यजमानाय प्रयच्छतीति वचनात् । कुशमयी मेखला यस्यास्तां कुशमेखलां शरमयी मौञ्जी वा मेखला तया यजमानं दीक्षयतीति विधानात् । प्रकृते कुशग्रहणं क्वचित् प्रतिनिधि दर्शनात् कृतम् । यतगिरं वाचंयमां वाचं यच्छतीति श्रुतेः । मृगशृङ्गं परिग्रहः कण्डूयनसाधनं यस्यास्तां कृष्णविषाणया कण्डूयतइति श्रुतेः । अध्वरदीक्षितां संस्कारविशेषयुक्तां तनुं दाशरथीमधिवसन् अधितिष्ठन् सन् असमा भासा दीप्तयो यस्मिन् कर्म्मणि तद्यथा तथा अभासयत् भासयति स्म ॥ २१ ॥

अवभृथेति । अवभृथेन प्रयतोनियतेन्द्रियः सुरसमाजसमाक्रमणोचितः देवसभाधिष्ठानार्हः स दशरथः उन्नतं शिरो वनमुचे जलवर्षिणे । जलं नीरं वनमिति शाश्वतः । नमुचेररये केवलमिन्द्रायैव, नमयति स्म न कस्मैचिदन्यस्मै मानुषायेत्यर्थः ॥ २२ ॥

असकृदेकरथेन तरस्विना
हरिहयाग्रसरेण धनुर्भृता।
दिनकराभिमुखा रणरेणवो
रुरुधिरे रुधिरेण सुरद्विषाम् ॥२३॥
अथ समाववृते कुसुमैर्नवै-
स्तमिव सेवितुमेकनराधिपम्।
यमकुबेरजलेश्वरवज्रिणां
समधुरं मधुरञ्चितविक्रमम् ॥२४॥

असकृदिति। एकरथेनाद्वितीयरथेन तरस्विना बलवता हरिहयस्येन्द्रस्याग्रसरेण धनुर्भृता दशरथेन असकृद्बहुशो दिनकरस्याभिमुखाः अभिमुखस्थिता इत्यर्थः रणरेणवः सुरद्विषां दैत्यानां रुधिरेण रुरुधिरे निवारिताः ॥ २३ ॥

अथेति। अथ यमकुबेरजलेश्वरवज्रिणां धर्मराजधनदवरुणामरेन्द्राणां समा धूर्भारो यस्य स समधुरः साम्यस्य वितरणनियमनैश्वर्यैस्तुल्यकक्ष इत्यर्थः। ऋक्पूरित्यादिना समासान्तः। तं समधुरम् अञ्चितविक्रमं पूजितपराक्रममेकनराधिपं तं दशरथं सेवितुमिव मधुर्वसन्तः। मधु पुष्परसे मधुः दैत्ये चैत्रे वसन्ते च मधुरिति विश्वः। नवैः कुसुमैरुपलक्षितः सन् समाववृते समागतः। रिक्तहस्तेन नोपेयाद्राजानं देवतां गुरुमिति वचनात् पुष्पसमेतोपायनं सेवितुमागत इत्यर्थः ॥ २४ ॥

जिगमिषुरिति। धनदाध्युषिता कुबेराधिष्ठिता दिशं जिगमिषुः गन्तुमिच्छुः रथयुजा सारथिना अरुणेन परिवर्तितवाहनः निवर्ति-

जिगमिषुर्धनदाध्युषितां दिशं
रथयुजा परिवर्त्तितवाहनः।
दिनमुखानि रविर्हिमनिग्रहै
र्विमलयन्मलयन्नगमत्यजत् ॥२५॥

कुसुमजन्म ततो नवपल्लवा
स्तदनु षट्पदकोकिलकूजितम्।
इति यथाक्रममाविरभून्मधु
र्द्रुमवतीमवतीर्य्य वनस्थलीम् ॥ २६ ॥

नयगुणोपचितामिव भूपतेः
सदुपकारफलां श्रियमर्थिनः।

तामोरविः हिमस्य निग्रहैः निराकरणैर्दिनमुखानि प्रभातानि विमल-यन् विशदयन् मलयं नगं मलयाचलमत्यजत् दक्षिणां दिशमत्याक्षी-दित्यर्थः ॥ २५ ॥

कुसुमेति। आदौ कुसुमजन्म ततो नवपल्लवाः तदनुः। अनुर्लक्षणे इति कर्म्मप्रवचनीयत्वाद्द्वितीया। यथासंख्यं तदुभयानन्तरं षट्प-दानां कोकिलानाञ्च कूजितमित्येवंप्रकारेण यथाक्रमं क्रममनतिक्रम्य द्रुमवती द्रुमभूयिष्ठां वनस्थलीमवतीर्य्य मधुः वसन्तः आविरभूत्। केषाञ्चित् द्रुमाणां पल्लवप्रायत्वात् केषाञ्चित् कुसुमप्रायत्वान्नोत्‌ क्रमस्य दृष्टविरोधः ॥ २६ ॥

नयेति। नयोनीतिरेव गुणः तेन अथवा नयेन गुणैः शौर्य्यादि-भिश्च उपचिताम्। सताम् उपकारः फलं यस्यास्तां सदुपकार फलां

अभिययुः सरसो मधुसम्भृतां
कमलिनीमलिनीरपतत्त्रिणः ॥२७॥
कुसुममेव न केवलमार्त्तवं
नवमशोकतरोः स्मरदीपनम्।
किसलयप्रसवोऽपि विलासिनां
मदयिता दयिताश्रवणार्पितः ॥ २८ ॥
विरचिता मधुनोपवनश्रिया
मभिनवा इव पत्त्रविशेषकाः।
मधुलिहां मधुदानविशारदाः
कुरवका रवकारणतां ययुः ॥ २९ ॥

भूपतेर्दशरथस्य श्रियमर्थिन इव मधुना वसन्तेन सम्भृतां सम्यक् पुष्टां सरसः सम्बन्धिनीं कमलिनीं पद्मिनीम् अलिनीरपतत्त्रिणः अलयो भृङ्गाः नीरपतत्त्रिणो जलपतत्त्रिणो हंसादयश्चाभिययुः ॥ २७ ॥

कुसुममिति। ऋतुरस्य प्राप्तः आर्त्तवम्। ऋतोरण् इत्यण्। नवं प्रत्यग्रमशोकतरोः केवलं कुसुममेव स्मरदीपनम् उद्दीपनं न, किन्तु विलासिनां मदयिता मदजनकः दयिताश्रवणार्पितः किसलयप्रसवोऽपि पल्लवसन्तानोऽपि स्मरदीपनः अभवत् ॥ २८ ॥

विरचिता इति। मधुना वसन्तेन विरचिताः उपवनश्रियाम् अभिनवाः पत्त्रविशेषकाः पत्त्ररचना इव स्थिताः मधुनः मकरन्दस्य दाने विशारदाः चतुराः कुरवकाः तरवो मधुलिहां मधुपानां रवकारणतां ययुः भृङ्गाः कुरवकाणां मधूनि पीत्वा जगुरित्यर्थः। दानशौण्डान् अर्थिजनाः स्तुवन्तीति भावः ॥ २९ ॥

सुवदनावदनासवसम्भृत
स्तदनुवादिगुणः कुसुमोद्गमः।
मधुकरैरकरोन्मधुलोलुपै
र्बकुलमाकुलमायतपङ्क्तिभिः॥ ३० ॥

उपहितं शिशिरापगमश्रिया
मुकुलजालमशोभत किंशुके।
प्रणयिनीव नखक्षतमण्डनं
प्रमदया मदयापितलज्जया॥ ३१ ॥

व्रणगुरुप्रमदाधरदुःसहं
जघननिर्विषयीकृतमेखलम्।

सुवदनेति। सुवदनावदनासवेन कान्तामुखमद्येन सम्भृतोजनितः। तत्तस्य दोहदमिति प्रसिद्धिः। तस्यासवस्यानुवादी सदृशो गुणो यस्य तदनुवादिगुणः कुसुमोद्गमः कर्त्ता मधुलोलुपैः आयतपङ्क्तिभिः दीर्घपङ्क्तिभिर्मधुकरैः मधुपैः करणैः बकुलं बकुलवृक्षम् आकुलमकरोत् ॥ ३० ॥

उपहितमिति। शिशिरापगमश्रिया वसन्तलक्ष्म्या किंशुके पलाशवृक्षे। पलाशः किंशुकः पर्णइत्यमरः। उपहितं दत्तं मुकुलजालं कुड्मलसंहतिः मदेन यापितलज्जया अपसारितत्रपया प्रमदया प्रणयिनि प्रियतमे उपहितं नखक्षतमेव मण्डनं तदिव अशोभत ॥ ३१ ॥

व्रणेति। व्रणैर्दन्तक्षतैः गुरुभिर्दुर्द्धरैः प्रमदानामधरैरधरोष्ठैः दुःसहं हिमस्य व्यथाकरत्वादसह्यं जघनेषु निर्विषयीकृता निरव-

न खलु तावदशेषमपोहितुं
रविरलं विरलं कृतवान् हिमम् ॥३२॥

अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा।
अमदयत् सहकारलता मनः
सकलिका कलिकामजितामपि ॥३३॥

प्रथममन्यभृताभिरुदीरिताः
प्रविरला इव मुग्धवधूकथाः।
सुरभिगन्धिषु शुश्रुविरे गिरः
कुसुमितासु मिता वनराजिषु ॥३४॥

काञ्चीकृता मेखला येन तत् शैत्याच्छादितमेखलमित्यर्थः एवंभूतं हिमं रविस्तावदा वसन्तादशेषं निःशेषं यथा तथा अपोहितुं निरसितुं नालं खलु न शक्तो हि, किन्तु विरलं कृतवान् तनूचकार ॥ ३२ ॥

अभिनयानिति। अत्र चूतलतायां नर्त्तकीसमाधिरभिधीयते। अभिनयान् अर्थव्यञ्जकान् व्यापारान्। व्यञ्जकाभिनयौ समावित्यमरः। परिचेतुमभ्यसितुम् उद्यतेव स्थिता, कुतः, मलयमारुतेन कम्पितपल्लवा पल्लवशब्देन हस्तोऽपि लक्ष्यते, सकलिका सकोरका। कलिका कोरकः पुमानित्यमरः। सहकारलता कलिः कलहो द्वेष उच्यते। कलिः स्यात् कलहे शूरे कलिरन्त्ययुगे युधीति विश्वः। कामो रागः तज्जितामपि जितरागद्वेषाणामपीत्यर्थः मनोऽमदयत ॥ ३३ ॥

प्रथममिति। सुरभिर्गन्धो येषां तासु सुरभिगन्धिषु। गन्धस्ये-दित्यादिना इः। कुसुमान्यासां सञ्जातानि कुसुमिताः तासु वनराजिषु

श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो बभुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः ॥ ३५॥
ललितविभ्रमबन्धविचक्षणं
सुरभिगन्धपराजितकेसरम्।
पतिषु निर्विविशुर्मधुमङ्गनाः
स्मरसखं रसखण्डनवर्जितम् ॥ ३६ ॥

वनपङ्क्तिषु अन्यभृताभिः कोकिलाभिः प्रथमं प्रारम्भेषूदीरिताः उक्ताः अतएव मिताः परिमिताः गिरः आलापाः प्रविरलाः मौग्ध्यात् स्तोकोक्ताः मुग्धबधूनां कथाः वाचइव शुश्रुविरे श्रुताः ॥ ३४ ॥

श्रुतीति। श्रुतिसुखाः कर्णमधुराः भ्रमरस्वनाएव गीतयो यासां ताः, कुसुमान्येव कोमलादन्तरुचोदन्तकान्तयो यासां ताः अनेन स्मितत्वं विवक्षितम् उपवनान्तलताः पवनेनाहतैः कम्पितैः किसलयैः सलयैः साभिनयैः। लयशब्देन लयानुगतोऽभिनयोलक्ष्यते उपवनान्ते पवनाहतैरिति सक्रियत्वाभिधानात्। पाणिभिरिव बभुः। अनेन लतानां नर्त्तकीसाम्यं गम्यते ॥ ३५ ॥

ललितेति। अङ्गनाः ललितविभ्रमबन्धविचक्षणं मधुरविलास घटनापटुतरं सुरभिणा मनोहरेण गन्धेन पराजितकेसरं निर्ज्जित वकुलपुष्पम्। अथ केसरे वकुलइत्यमरः। स्मरस्य सखायं स्मरसखं स्मरोद्दीपकमित्यर्थः मधुं मद्यम्। अर्द्धर्चाः पुंसि चेति पुंलिङ्गता उक्ताच। मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्द्धर्चादिगणे पाठाद् पुंनपुंसकयोर्मधुरिति। पतिषु विषये रसखण्डनवर्ज्जितम्

शुशुभिरे स्मितचारुतराननाः
स्त्रिय इव श्लथशिञ्जितमेखलाः ।
विकचतामरसा गृहदीर्घिका
मदकलोदकलोलविहङ्गमाः ॥ ३७ ॥

उपययौ तनुतां मधुखण्डिता
हिमकरोदयपाण्डुमुखच्छविः ।
सदृशमिष्टसमागमनिर्वृतिं
वनितयानितया रजनीवधूः ॥ ३८ ॥

अनुरागभङ्गरहितं यथा तथा निर्विविशुः परस्परानुरागपूर्वकं पतिभिः सह पपुरित्यर्थः ॥ ३६ ॥

शुशुभिर इति । विकचतामरसाः विकसितकमलाः, मदेन कलाः अव्यक्तमधुरं ध्वनन्तः उदकलोलविहङ्गमाः जलप्रियपक्षिणो हंसादयो यासु ताः मदकलोदकलोलविहङ्गमाः गृहेषु दीर्घिकाः वाप्यः स्मितेन चारुतराणि आननानि यासां ताः श्लथाः शिञ्जिताः मुखरा मेखलाः यासां ताः । शिञ्जितेति कर्त्तरि क्तः । स्त्रिय इव शुशुभिरे ॥ ३७ ॥

उपययाविति । मधुना मधुसमयेन खण्डिता ह्रासं गमिता । क्षीयन्ते ह्युत्तरायणे रात्रयः । खण्डिताख्या च नायिका ध्वन्यते । हिमकरोदयेन चन्द्रोदयेन पाण्डुर्मुखस्य प्रदोषस्य वक्त्रस्य च छविर्यस्याः सा रजन्येव वधूः इष्टसमागमनिर्वृतिं प्रियसङ्गमसुखम् अनितया अप्राप्तया । इण् गतौ इति धातोः कर्त्तरि क्तः । वनितया सदृशं तुल्यं तनुतां न्यूनतां कार्श्यञ्चोपययौ ॥ ३८ ॥

अपतुषारतया विशदप्रभैः
सुरतसङ्गपरिश्रमनोदिभिः ।
कुसुमचापमतेजयदंशुभि-
र्हिमकरो मकरोर्जितकेतनम् ॥ ३९ ॥

हुतहुताशनदीप्ति वनश्रियः
प्रतिनिधिः कनकाभरणस्य यत् ।
युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम् ॥ ४० ॥

अलिभिरञ्जनबिन्दुमनोहरैः
कुसुमपङ्क्तिनिपातिभिरङ्कितः ।

अपेति । हिमकरश्चन्द्रः अपतुषारतया अपगतनीहारतया विशदप्रभैर्निर्मलकान्तिभिः सुरतसङ्गपरिश्रमनोदिभिः सुरतखेदहारिभिरंशुभिः किरणैः मकरोर्जितकेतनं मकरेणोर्जितं केतनं ध्वजो यस्य तं लब्धावकाशत्वादुच्छ्रितध्वजमित्यर्थः कुसुमचापं कामम् अतेजयत् । तिज निशाने इति धातोर्ण्यन्ताल्लुङ् । सहकारित्वात् कामोऽपि तीक्ष्णोऽभूदित्यर्थः ॥ ३९ ॥

हुतेति । हुतहुताशनदीप्ति आज्यादिप्रज्वलिताग्निप्रभं यत् कुसुमं कर्णिकारमित्यर्थः वनश्रियः उपवनलक्ष्म्याः कनकाभरणस्य प्रतिनिधिरभूदिति शेषः । दलेषु केसरेषु च पेशलं सुकुमारपत्रकिञ्जल्कमित्यर्थः आहितं प्रियैरर्पितमिति शेषः तत् कुसुमं युवतयोऽलके कुन्तले दधुः ॥ ४० ॥

अलिभिरिति । अञ्जनबिन्दुमनोहरैः कज्जलकणसुन्दरैः कुसुमपङ्क्तिषु निपतन्ति ये तैः अलिभिः अङ्कितः चिह्नितः तिलकः श्रीमान्

न खलु शोभयति स्म वनस्थलीं
न तिलकस्तिलकः प्रमदामिव ॥ ४१ ॥
अमदयन्मधुगन्धसनाथया
किसलयाधरसङ्गतया मनः ।
कुसुमसम्भृतया नवमल्लिका
स्मितरुचा तरुचारुविलासिनी ॥ ४२ ॥
अरुणरागनिषेधिभिरंशुकैः
श्रवणलब्धपदैश्च यवाङ्कुरैः ।

नाम वृक्ष । तिलकः क्षुरकः श्रीमान् इत्यमरः । वनस्थली तिलको विशेषकः । तमालपत्रतिलकचित्रकाणि विशेषकम् । द्वितीयञ्च तुरीयं च न स्त्रियामित्यमरः । प्रमदामिव न शोभयति स्मेति न खलु अपि त्वशोभयदेवेत्यर्थः । लट् स्मे इति स्मशब्दयोगात् भूतार्थे लट् ॥ ४१ ॥

अमदयदिति । तरुचारुविलासिनी तरोः पुंसश्च चारुविलासिनी नवमल्लिका सप्तलाख्या लता । सप्तला नवमल्लिकेत्यमरः । मधुनो मकरन्दस्य मद्यस्य च गन्धेन सनाथया गन्धप्रधानयेत्यर्थः । किसलयैरेवाधरैस्तैः सङ्गतया सम्बद्धयेत्यर्थः । कुसुमैः सम्भृतया सम्पादितया कुसुमरूपयेत्यर्थः स्मितरुचा हासकान्त्या मनः पश्यतामिति शेषः अमदयत् ॥ ४२ ॥

अरुणेति । विरहिभिर्विरहिणीभिः दृष्टाः । अरुणस्य रागं निषेधन्ति निरस्यन्तीति अरुणरागनिषेधिनः तैः शुकपक्षादिरक्तत्वात् तनुकरैः-

परभृताविरुतैश्च विलासिनः
स्मरबलैरबलैकरसाः कृताः ॥ ४३ ॥

उपचितावयवा शुचिभिः कणै-
रलिकदम्बकयोगमुपेयुषी ।
सदृशकान्तिरलक्ष्यत मञ्जरी
तिलकजालकजालकमौक्तिकैः ॥ ४४ ॥

ध्वजपटं मदनस्य धनुर्भृत-
श्छविकरं मुखचूर्णमृतुश्रियः ।
कुसुमकेसररेणुमलिव्रजाः
सपवनोपवनोत्थितमन्वयुः ॥ ४५ ॥

रित्यर्थः । तमन्वेत्यनुबध्नाति तच्छीलन्निषेधति । तस्येवानुकरोतीति शब्दाः सादृश्यवाचकाइति दण्डी । अंशुकैरम्बरैः श्रवणेषु कर्णेषु लब्धपदैः निवेशितैरित्यर्थः यवाङ्कुरैश्च परभृताविरुतैः कोकिलाकूजितैश्चेत्येतैः स्मरबलैः कामसैन्यैः अबलास्वेकएव रसोरागोयेषां ते अबलैकरसाः स्त्रीपरतन्त्राः कृताः ॥ ४३ ॥

उपचितेति । शुचिभिः शुभ्रैः कणैरजोभिरुपचितावयवा पुष्टावयवा अलिकदम्बकयोगम् उपेयुषी प्राप्ता तिलकजा तिलकवृक्षोत्था मञ्जरी अलकेषु यज्जालकमाभरणविशेषः तस्मिन् मौक्तिकैः सदृशकान्तिरलक्ष्यत । भृङ्गसङ्गिनी शुभ्रा तिलकमञ्जरी नीलालकसक्तमुक्ताजालमिवालक्ष्यतेति वाक्यार्थः ॥ ४४ ॥

ध्वजेति । अलिव्रजाः षट्पदनिवहाः धनुर्भृतोधानुष्कस्य मदनस्य कामस्य ध्वजपटं पताका तम् ऋतुश्रियोवसन्तलक्ष्म्याः छविकरं

अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे
भुजलतां जडतामबलाजनः ॥ ४६ ॥

त्यजत मानमलं बत विग्रहै-
र्न पुनरेति गतं चतुरं वयः।
परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥ ४७ ॥

शोभाकरं मुखचूर्णं मुखालङ्कारचूर्णीभूतं सपवनोपवनोत्थितं सपवनं पवनेन सहितं यदुपवनं तस्मादुत्थितं कुसुमानां केसरेषु किञ्जल्केषु यो रेणुः तमन्वयुः अन्वगच्छन्। यातेर्लङ् ॥ ४५ ॥

अनुभवन्निति। नवा दोला प्रेङ्खा यस्मिन् तं नवदोलमृतूत्सवम् अनुभवन्नबलाजनः पटुरपि निपुणोऽपि प्रियकण्ठस्य जिघृक्षया ग्रहीतुमालिङ्गितुमिच्छया आसनरज्जुपरिग्रहे पीठरज्जुग्रहणे भुजलतां बाहुलतां जडतां शैथिल्यं डलयोरभेदः. अनयत् दोलाक्रीडासु पतनभयनाटितकेन प्रियकण्ठमाश्लिष्यदित्यर्थः ॥ ४६ ॥

त्यजतेति। बतेत्यामन्त्रणे। खेदानुकम्पासन्तोषविस्मयामन्त्रणे बतेत्यमरः। बत अङ्गनाः मानं कोपं त्यजत। तदुक्तं स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये इति। विग्रहैर्विरोधैरलं विग्रहो न कार्य्य इत्यर्थः गतमतीतं चतुरमुपभोगक्षमं वयो यौवनं पुनर्नैति नागच्छतीत्येवं स्मरमते स्मराभिप्राये। स्मरं कर्मे भावे क्तः। परभृताभिः कोकिलाभिः निवेदिते सति वधूजनो रमते स्म रेमे कोकिलाकूजितैर्दीपितस्मरः स्त्रीजनः [illegible]-ष्टः ॥ ४७ ॥

अथ यथासुखमार्त्तवमुत्सवं
समनुभूय विलासवतीसखः।
नरपतिश्चकमे मृगयारतिं
स मधुमन्मधुमन्मथसन्निभः॥ ४८॥

परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
श्रमजयात् प्रगुणाञ्च करोत्यसौ
तनुमतोऽनुमतः सचिवैर्ययौ॥ ४९॥

अथेति। अथानन्तरं मधुं मथ्नातीति मधुमत् विष्णुः। सम्पदादित्वात् क्विप्। मधुर्वसन्तः कथ्नातीति मथः। पचाद्यच्। मनसो मथः मन्मथः तेषां सन्निभः सदृशः मधुमन्मधुमन्मथसन्निभः स नरपतिः दशरथो विलासवतीसखः स्त्रीसहचरः सन् ऋतुः प्राप्तोऽस्यार्त्तवः तमुत्सवं वसन्तोत्सवं यथासुखं समनुभूय मृगयारतिं मृगया विहारं चकमे आचकाङ्क्ष॥ ४८॥

व्यसनासङ्गदोषं परिहरन्नाह

परिचयमिति। असौ मृगया चललक्ष्याणि मृगगवयादीनि तेषां निपातने परिचयम् अभ्यासं करोति। भयरुषोर्भयक्रोधयोः तदिङ्गितबोधनं तेषां चललक्ष्याणामिङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानञ्च करोति। तनुं शरीरं श्रमस्य जयात् निरासात प्रगुणां प्रकृष्टलाघवादिगुणवतीं च करोति। अतोहेतोः सचिवैरनुमतोऽनुमोदितः सन् ययौ। सर्वञ्चैतद्युद्धोपयोगीत्यतः तदपेक्षया मृगयाप्रवृत्तिर्नतु व्यसनितयेति भावः॥ ४९॥

मृगवनोपगमक्षमवेषभृद्
विपुलकण्ठनिषक्तशरासनः।
गगनमश्वखुरोद्धतरेणुभि
र्नृसविता स वितानमिवाकरोत्॥ ५०॥
ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः।
तुरगवल्गनचञ्चलकुण्डलो
विरुरुचे रुरुचेष्टितभूमिषु॥ ५१॥

मृगेति। मृगाणां वनं तस्योपगमः प्राप्तिः तस्य क्षमम् अर्हं वेषं बिभर्तीति स तथोक्तः मृगयाविहारानुगुणवेषधारीत्यर्थः। विपुलकण्ठे निषक्तशरासनो [illegible] ना सवितेव नृसविता पुरुषश्रेष्ठः। उपमितसमासः। स राजा अश्वखुरोद्धतरेणुभिः गगनं वितानं तुच्छम् अवकाशरहितम् अकरोत् गगनं नाप्रकाशतेत्यर्थः। वितानं तुच्छमन्दयोरिति विश्वः। अथवा सवितानमित्येकं पदं सवितानमुल्लोचसहितमिवाकरोत्। अस्त्री वितानमुल्लोच इत्यमरः॥ ५०॥

ग्रथितेति। वनमालया वन्यपुष्पस्रजा ग्रथितमौलिः बद्धकेशः तरूणां पलाशैः पत्रैः सवर्णाः समानाः तनुच्छदाः वर्म यस्य स तथोक्तः [illegible]। तुरगस्य वल्गनेन गतिविशेषेण चञ्चलकुण्डलोऽसौ रुरवो मृगविशेषाः [illegible] चेष्टितासु [illegible] भूमिषु विरुरुचे॥ ५१॥

[illegible]

तनुलताविनिवेशितविग्रहा
भ्रमरसंक्रमितेक्षणवृत्तयः ।
ददृशुरध्वनि तं वनदेवताः
सुनयनं नयनन्दितकोशलम् ॥ ५२ ॥

श्वगणिवागुरिकैः प्रथमास्थितं
व्यपगतानलदस्यु विवेश सः ।
स्थिरतुरङ्गमभूमि निपानवत्
मृगवयोगवयोपचितं वनम् ॥ ५३ ॥

सुनयनं सुलोचनं नयेन नीत्या नन्दितास्तोषिताः कोशलाः येन तं दशरथमध्वनि ददृशुः । प्रसन्नभावनतया तं देवता अपि गूढवृत्त्या ददृशुरित्यर्थः ॥ ५२ ॥

श्वगणीति । स दशरथः शुनां गणः स एषामस्तीति श्वगणिनः श्वग्राहिणः तैः वागुरा मृगबन्धनरज्जुः । वागुरा मृगबन्धनीत्यमरः । तया चरन्तीति वागुरिकाः जालिकाः । चरतीति ठक्प्रत्ययः । द्वौ वागुरिकजालिकावित्यमरः । तैश्च प्रथममास्थितम् अधिष्ठितं व्यपगता अनला दावाग्नयो दस्यवस्तस्कराश्च यस्मात् तथोक्तम् । दस्युतस्करमोषकाइत्यमर । कारयेद्वनविशोधनमादौ नाह्यरन्तिकमपि प्रविविक्षुः । आप्तशस्त्रनुगतः प्रविशेद्वा सङ्कटे च गहने न च तिष्ठेदिति कामन्दकः । स्थिरा दृढा पङ्कादिरहिता तुरङ्गयोग्या भूमिर्यस्य तत् । निपानवत् आहावयुतम् । आहावस्तु निपानं स्यादुपकूपजलाशये इत्यमरः । मृगैर्हरिणादिभिः वयोभिः पक्षिभिः गवयैः गोसदृशैः अरण्यपशुविशेषैश्चोपचितं समृद्धं वनं विवेश प्रविष्टवान् ॥ ५३ ॥

अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेसरी ॥ ५४ ॥

तस्य स्तनप्रणयिभिर्मुहुरेणशावै
र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदग्रसरगर्वितकृष्णसारम् ॥ ५५ ॥

अथेति । अथ अनाधिः मनोव्यथारहितः नरवरः नरश्रेष्ठः रवेण धनुष्टङ्कारेण रोषिताः केसरिणः सिंहाः येन स राजा कनकमिव पिङ्गः पिशङ्गोयस्तड़िदेव गुणोमौर्वी तेन संयुतं त्रिदशायुधमिन्द्रचापं नभस्यो भाद्रपदमासइव । स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समा इत्यमरः । अधिज्यमधिगतमौर्वीकं धनुरुपाददे जग्राह ॥ ५४ ॥

तस्येति । स्तनप्रणयिभिः स्तनपायिभिः एणशावैर्हरिणशिशुभिः । पृथुकः शावकः शिशुरित्यमरः । मुहुर्व्याहन्यमानं तद्वत्सलतया तद्गमनानुसारेण मुहुर्मुहुः प्रतिबध्यमानं हरिणीनां गमनं गतिर्यस्य तत् । कुशा गर्भे येषां तानि मुखानि यस्य तत् कुशगर्भमुखं तस्य यूथस्य अग्रेसरः पुरःसरो गर्वितः दृप्तश्च कृष्णसारो यस्य तत् मृगाणां यूथं कुलम् । सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकमित्यमरः । तस्य दशरथस्य पुरस्तादग्रे आविर्बभूव । वसन्ततिलकं वृत्तम् ॥ ५५ ॥

तद्रिति । जवनोजवशीलः । जुचङ्क्रम्येत्यादिना युच् प्रत्ययः । तरस्वी त्वरितोवेगी प्रजवी जवनोजवइत्यमरः । तं वाजिनमश्वं गते-

तं प्रार्थितं जवनवाजिगतेन राज्ञा
तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति ।
श्यामीचकार वनमाकुलदृष्टिपातै-
र्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ॥ ५६ ॥

लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम् ।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसञ्जहार ॥ ५७ ॥

नारूढेन तूणी इषुधिः । बह्वादिभ्यश्चेति स्त्रियां ङीप् । तस्या मुखात् विवरात् उद्धृतशरेण राज्ञा प्रार्थितम् अभियातम् । याच्ञायामभियाने च प्रार्थना कथ्यते बुधैरिति केशवः । अतएव विशीर्णा पङ्क्तिः सङ्घीभावो यस्य तत् मृगयूथं कर्तृ आर्द्रैर्भयादश्रुसिक्तैः आकुला भयचकिता ये दृष्टिपाताः तैर्वातेरितोत्पलप्रकरैः पवनकम्पितेन्दीवरदलवृन्दैरिव वनं श्यामीचकार ॥ ५६ ॥

लक्ष्यीकृतेति । हरिरिन्द्रः विष्णुर्वा तस्येव प्रभावः सामर्थ्यं यस्य सः तथोक्तः धन्वी धनुष्मान् स नृपः । लक्ष्यीकृतस्य वेद्धुमिष्टस्य हरिणस्य स्वप्रेयसो देहं व्यवधायानुरागादन्तर्धाय स्थिता सह चरतीति सहचरी । पचादिषु चरतेः टित् करणात् ङी । यथाह वामनः अनुचरीति चरेष्टित्वात् इति । तां सहचरीं हरिणीं प्रेक्ष्य कामितया स्वयं कामुकत्वात् कृपामृदुमनाः करुणार्द्रचित्तः सन् आकर्णं कृष्टमपि दुष्प्रतिसंहरमपीत्यर्थः बाणं प्रतिसंजहार नैपुण्यातिशयोऽर्थः । नैपुण्यं तु धन्वीत्यनेन गम्यते ॥ ५७ ॥

तस्येति । त्रासाद्भयादतिमात्रचटुलैः अत्यन्तचञ्चलैः स्वनेत्रैः

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ।
त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि ॥ ५८ ॥

उत्तस्थुषः सपदि पल्वलपङ्कमध्या-
न्मुस्ताप्ररोहकवलावयवानुकीर्णम् ।
जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥ ५९ ॥

तं वाहनादवनतोत्तरकायमीष-
द्विध्यन्तमुद्धृतसटाः प्रतिहन्तुमीषुः ।

प्रौढप्रियानयनविभ्रमचेष्टितानि प्रगल्भकान्ताविलोचनविलासव्यापारान् सादृश्यात् स्मरतः अपरेष्वपि मृगेषु शरान्मुमुक्षोर्मोक्तुमिच्छोः तस्य नृपस्य निबिडो दृढोऽपि मुष्टिः कर्णान्तमेत्य बिभिदे स्वयमेव भिद्यते स्म । भिदेः कर्मकर्त्तरि लिट् । कामिनस्तस्य प्रियाविभ्रमस्मृतिजनितकम्पातिरेकात् मुष्टिभेदो न त्वनैपुण्यादिति तात्पर्य्यार्थः ॥ ५८ ॥

उत्तस्थुष इति । स नृपः मुस्ताप्ररोहाणां मुस्ताङ्कुराणां कवलाः ग्रासाः तेषामवयवैः अर्धविदष्टमुखभ्रंशिभिः शकलैरनुकीर्णं व्याप्तम् आयताभिर्दीर्घाभिरार्द्रपदपङ्क्तिभिः सुव्यक्तं सपदि पल्वलपङ्कमध्यादुत्तस्थुषः उत्थितस्य द्रुतवराहकुलस्य पलायितवराहयूथस्य मार्गं जग्राह अनुससार ॥ ५९ ॥

तमिति । वराहाः वाहनादश्वादीषदवनतोत्तरकायं किञ्चिदानतपूर्वकायं विध्यन्तं प्रहरन्तं तं नृपम् उद्धृतसटाः ऊर्द्ध्वकेसराः सन्तः ।

नात्मानमस्य विविदुः सहसा वराहाः
वृत्तेषु विद्धमिषुभिर्जघनाश्रयेषु ॥६०॥

तेनाभिघातरभसस्य विकृष्य पत्री
वन्यस्य नेत्रविवरे महिषस्य मुक्तः।
निर्भिद्य विग्रहमशोणितलिप्तपुङ्ख
स्तं पातयांप्रथममास पपात पश्चात् ॥६१॥

प्रायो विषाणपरिमोक्षलघूत्तमाङ्गान्
खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः।

सटा जटाकेसरयोरिति केशवः। प्रतिहन्तुमीषुः प्रतिहर्त्तुमैच्छन् अस्येषुभिः सहसा जघनानामाश्रयेषु अवष्टम्भेषु वृत्तेषु विद्धमात्मानं न विविदुः। एतेन वराहाणां मनस्वित्वं नृपस्य हस्तलाघवं चोक्तम् ॥ ६० ॥

तेनेति। अभिघाते रभसः औत्सुक्यं यस्य तस्याभिहन्तुमुद्यतस्येत्यर्थः। वन्यस्य वने भवस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्य मुक्तः पत्री शरः विग्रहं महिषदेहं निर्भिद्य विदार्य्य शोणितलिप्तो न भवतीति अशोणितलिप्तः पुङ्खो यस्य स तथोक्तः सन् तं महिषं प्रथमं पातयामास स्वयं पश्चात् पपात। कृञ्चानुप्रयुज्यते लिटीत्यत्र अनुशब्दस्य व्यवहितविपर्य्यस्तप्रयोगनिवृत्त्यर्थत्वात् पातयां प्रथममासेत्यपप्रयोग इति पाणिनीयाः। यथाह वार्त्तिककारः विपर्य्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थञ्च इति ॥ ६१ ॥

प्राय इति। नृपतिर्निशितैः क्षुरप्रैः शरविशेषैः खड्गान् खड्गाख्यान् मृगान्। गण्डके खड्गखड्गिनावित्यमरः। प्रायोबाहुल्येन विषाणपरिमोक्षेण शृङ्गभङ्गेन लघून्यगुरूणि उत्तमाङ्गानि शिरांसि

शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः॥६२॥
व्याघ्रानभीरभिमुखोत्पतितान् गुहाभ्यः
फुल्लासनाग्रविटपानिव वायुरुग्णान्।
शिक्षाविशेषलघुहस्ततया निमेषात्
तूणीचकार शरपूरितवक्त्ररन्ध्रान्॥६३॥
निर्घातोग्रैः कुञ्जलीनान् जिघांसु-
र्ज्यानिर्घोषैः क्षोभयामास सिंहान्।

येषां तांश्चकार नत्वबधीदित्यर्थः कुतः दृप्तविनयाधिकृतः दुष्टनिग्रहनियुक्तः स राजा परेषां प्रतिकूलानाम् अत्युच्छ्रितं शृङ्गं विषाणं प्राधान्यञ्च। शृङ्गं प्राधान्यसान्वोश्चेत्यमरः। न ममृषे न सेहे दीर्घमायुर्जीवित कालम्। आयुर्जीवितकालोनेत्यमरः। न ममृषे इति न किन्तु ममृषे एवेत्यर्थः॥ ६२॥

व्याघ्रानिति। अभीर्निर्भीकः स धन्वी गुहाभ्योऽभिमुखमुत्पतितान् वायुना रुग्णान् भग्नान् फुल्लाः विकसिताः। अनुपसर्गात् फुल्लक्षीबकृशोल्लाघा इति निष्ठातकारस्य लत्वनिपातः। ये असनस्य सर्जवृक्षस्य। सर्जकासनबन्धूकपुष्पप्रियकजीवका इत्यमरः। अग्र विटपास्तानिव स्थितान् व्याघ्राणां चित्ररूपत्वात् उपमाने फुल्लविशेषणम्। शरैः पूरितानि वक्त्ररन्ध्राणि येषां तान् व्याघ्रान् शिक्षाविशेषेण अभ्यासातिशयेन लघुहस्ततया क्षिप्रहस्ततया निमेषात् तूणीचकार तूणं शरैः पूरितवानित्यर्थः॥ ६३॥

निर्घातेति। कुञ्जेषु लीनान्। निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे इत्यमरः। सिंहान् जिघांसुः हन्तुमिच्छुः निर्घातो-

नूनं तेषामभ्यसूयापरोऽभू-
द्वीर्य्योदग्रे राजशब्दे मृगेषु ॥ ६४ ॥

तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् ।
आत्मानं रणकृतकर्म्मणां गजाना-
मानृण्यं गतमिव मार्गणैरमंस्त ॥ ६५ ॥

चमरान् परितः प्रवर्त्तिताश्वः
क्वचिदाकर्णविकृष्टभल्लवर्षी ।

व्योमोत्थित· औत्पातिकः शब्दविशेष· तद्वदुग्रैः रौद्रैः ज्यानिर्घोषै· मौर्वीशब्दैः क्षोभयामास । अथोत्प्रेक्षते तेषां सिंहानां सम्बन्धिनि वीर्य्येणोदग्रे उन्नते मृगेषु विषये योराजशब्दस्तस्मिन् अभ्यसूयापरोऽभूत् नूनम् अन्यथा कथमेतान्निविध्य हन्यादित्यर्थः । मृगाणामिति पाठे समासे गुणभूतत्वाद्राजशब्देन सम्बन्धोदुर्घटः । शालिनीवृत्तम् । शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैरिति लक्षणात् ॥ ६४ ॥

तानिति । काकुत्स्थोदशरथः गजकुलेषु बद्धं तीव्रं वैरं यै· तान् कुटिलेषु नखाग्रेषु लग्ना मुक्ता गजकुम्भमौक्तिकानि येषां तान् तान् सिंहान् हत्वा आत्मानं रणेषु कृतकर्म्मणां कृतोपकाराणां गजानामानृण्यम् अनृणत्वं मार्गणैः शरैः । मार्गणोयाचके शरइति विश्वः । गतं प्राप्तवन्तमिवामंस्त मेने ॥ ६५ ॥

चमरानिति । क्वचिच्चमरान् परितः । अभितः समयेत्यादिना द्वितीया । प्रवर्त्तिताश्वः प्रधाविताश्व· आकर्णविकृष्टभल्ला निषुविशेषान् वर्षतीति तथोक्त· स नृपो नृपतीनिव तांश्चमरान् सितवालव्यजनैः शुभ्रचामरैः वियोज्य विरहय्य सद्यः शान्तिं जगाम ।

नृपतीनिव तान् वियोज्य सद्यः
सितबालव्यजनैर्जगाम शान्तिम्॥६६॥

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः॥६७॥

तस्य कर्कशविहारसम्भवं
स्वेदमाननविलग्नजालकम्।
आचचाम सतुषारशीकरो
भिन्नपल्लवपुटो वनानिलः॥६८॥

शूराणां परकीयमैश्वर्यमेवासह्यं न तु जीवितमिति भावः। औपच्छन्दसिकं वृत्तम्॥६६॥

अपीति। स नृप तुरगसमीपात् उत्पतन्तमपि सुप्रहारमपीत्यर्थः रुचिरकलापं भासुरबर्हं मह्यां रौतीति मयूरो बर्ही तम्। पृषोदरादित्वात् साधु। चित्रेण माल्येनानुकीर्णे रतौ विगलितबन्धे प्रियायाः केशपाशे सपदि गतमनस्कः प्रवृत्तचित्तः। उरःप्रभृतिभ्यः कप् इति कप् प्रत्ययः। न बाणलक्ष्यीचकार न प्रजहारेत्यर्थः॥६७॥

तस्येति। कर्कशविहारादतिव्यायामात् सम्भवो यस्य तमानने विलग्नजालकं बद्धकदम्बकं तस्य नृपस्य स्वेदं सतुषारशीकरः शिशिराम्बुकणसहितः भिन्ना निर्दलिताः पल्लवानां पुटाः कोशाः येन सः वनानिलः आचचाम जहारेत्यर्थः। रथोद्धता वृत्तमेतत्॥६८॥

इति विस्मृतान्यकरणीयमात्मनः
सचिवावलम्बितधुरं धराधिपम् ।
परिवृद्धरागमनुबन्धसेवया
मृगया जहार चतुरेव कामिनी ॥६९॥

स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ।
नरपतिरतिवाहयाम्बभूव
क्वचिदसमेतपरिच्छदस्त्रियामाम् ॥ ७०॥

इतीति। इति पूर्वोक्तप्रकारेण आत्मनोविस्मृतमन्यत् करणीयं कार्य्यं येन तं विस्मृतात्मकार्य्यान्तरमित्यर्थः सचिवैरवलम्बिता धृता धूर्य्यस्य तम् । ऋक्पूरब्धूःपथामानक्षइति समासान्तः अप्रत्यय । अनुबन्धसेवया सन्ततसेवया परिवृद्धो रागो यस्य तं धराधिपं मृग्यन्ते यस्यां मृगाइति मृगया। मृगयादीनामुपसंख्यानमिति शप्रत्ययान्तो निपात.। चतुरा विदग्धा कामिनीव जहार आचकर्ष। न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूयएवाभिवर्द्धतइति भावः॥ ६९॥

सइति। स नरपतिः ललितानि कुसुमानि प्रवालानि पल्लवानि शय्या यस्यां ता ज्वलिताभिर्महौषधिभिरेव दीपिकाभिः सनाथां तत्प्रधानामित्यर्थः। त्रियामां रात्रिं क्वचिदसमेतपरिच्छदः परिहृतपरिजनः सन्नित्यर्थः अतिवाहयाम्बभूव गमयामास। पुष्पिताग्रा वृत्तम् ॥ ७०॥

उषसीति। उषसि प्रातः पटूनां पटहानामिव ध्वनिर्येषां तैः

उषसि स गजयूथकर्णतालैः
पटुपटहध्वनिभिर्विनीतनिद्रः।
अरमत मधुराणि तत्र शृण्वन्
विहगविकूजितबन्दिमङ्गलानि॥७१॥

अथ जातु रुरोर्गृहीतवर्त्मा
विपिने पार्श्वचरैरलक्ष्यमाणः।
श्रमफेनमुचा तपस्विगाढां
तमसां प्राप नदीं तुरङ्गमेण॥ ७२ ॥

कुम्भपूरणभवः पटुरुच्चै-
रुच्चचार निनदोऽम्भसि तस्याः।
तत्र स द्विरदबृंहितशङ्की
शब्दपातिनमिषुं विससर्ज॥ ७३ ॥

गजयूथानां कर्णैरेव तालैः वाद्यप्रभेदैर्विनीतनिद्रः स नृपस्तत्र वने मधुराणि विहगाना विकूजितान्येव बन्दिनां मङ्गलानि मङ्गलगीतानि शृण्वन्नरमत॥ ७१ ॥

अथेति। अथ जातु कदाचित् रुरोः मृगस्य गृहीतवर्त्मा स्वीकृतरुरुमार्गो विपिने वने पार्श्वचरैरलक्ष्यमाणस्तुरगवेगादित्यर्थः श्रमेण फेनमुचा सफेनं स्विद्यतेत्यर्थः तुरङ्गमेण तपस्विभिर्गाढां सेवितां तमसां नाम नदी प्राप॥ ७२॥

कुम्भेति। तस्यास्तमसायाः अम्भसि कुम्भपूरणेन भवः उत्पन्नः। पचाद्यच्। पटुर्मधुरः उच्चैर्गम्भीरः निनदोध्वनिरुच्चचार उदियाय

नृपतेः प्रतिषिद्धमेव तत्
कृतवान् पङ्क्तिरथो विलङ्घ्य यत्।
अपथे पदमर्पयन्ति हि
श्रुतवन्तोऽपि रजोनिमीलिताः॥७४॥

हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि॥७५॥

तत्र निनदे स नृपः द्विरदबृंहितं शङ्कत इति द्विरदबृंहितशङ्की सन् शब्देन शब्दानुसारेण पततीति शब्दपातिनमिषुं विससर्ज। स्वागता वृत्तम्॥७३॥

नृपतेरिति। तत्कर्म नृपतेः क्षत्रियस्य प्रतिषिद्धमेव यदेतत् कर्म गजवधरूपं पङ्क्तिरथोदशरथः विलङ्घ्य, लङ्घ्नीकामोयुद्धादन्यत्र करिवधं न कुर्य्यादिति शास्त्रमुल्लङ्घ्य, कृतवान्। ननु विदुषस्तस्य कथमीदृग्विचेष्टितम् अतआह, अपथइति। श्रुतवन्तोऽपि विद्वांसोऽपि रजोनिमीलिता रजोगुणावृताः सन्तः न पन्था इत्यपथम्। पथो विभाषेति समासान्तः। अपथं नपुंसकमिति नपुंसकत्वम्। अपन्थास्त्वपथं तुल्यमित्यमरः। तस्मिन्नपथे अमार्गे पदमर्पयन्ति निक्षिपन्ति हि प्रवर्त्तन्त इत्यर्थः। वैतालीयं वृत्तम्॥७४॥

हा तातेति। हेत्यार्त्तौ। तातोजनकः। हा विषादशुगर्त्तिषु, तातस्तु जनकः पितेति चामरः। हा तातेति क्रन्दितं क्रोशनमाकर्ण्य विषण्णो भग्नोत्साहः सन् तस्य क्रन्दितस्य वेतसैर्गूढं छन्नं प्रभवत्यस्मादिति प्रभवः कारणं तमन्विष्यन् शल्येन शरेण प्रोतं स्यूतम्। शल्यं

तेनावतीर्य्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषस्सदेहः ।
तस्मै द्विजेतरतपस्विसुतं स्खलद्भि
रात्मानमक्षरपदैः कथयाम्बभूव ॥ ७६ ॥

तच्चोदितश्च तमनुद्धृतशल्यमेव
पित्रोः सकाशमवसन्नदृशोर्निनाय ।

शङ्कौ शरे वंशइति विश्वः । सकुम्भं मुनिपुत्रं प्रेक्ष्य क्षितिपोऽपि तापात् दुःखात् अन्तः शल्यं यस्य सोऽन्तःशल्यइवासीत् । मत्तमयूरं वृत्तम् ॥ ७५ ॥

तेनेति । प्रथितान्वयेन प्रख्यातवंशेन । एतेन पापभीरुत्वं सूचितम् । तेन राज्ञा तुरगादवतीर्य्य पृष्टान्वया ब्रह्महत्याशङ्कया पृष्टकुलः जलकुम्भं निषस्सदेहः स मुनिपुत्रः तस्मै राज्ञे स्खलद्भिरशक्तिवशादर्धोच्चरितैरित्यर्थः अक्षरपदैः आत्मानं द्विजेतरश्चासौ तपस्विसुतश्च तं द्विजेतरतपस्विसुतं कथयाम्बभूव । न तावत्त्रैवर्णिकएवाहमस्मि किन्तु करणः । वैश्यात्तु करणः शूद्रायामिति याज्ञवल्क्यः । कुतो ब्रह्महत्येत्यर्थः । तथा च रामायणे ब्रह्महत्याकृतं पापं हृदयादपनीयताम् । न द्विजातिरहं राजन् मा भूत्ते मनसोव्यथा । शूद्रायामस्मि वैश्येन जातो जनपदाधिपेति ॥ ७६ ॥

तदिति । तच्चोदितस्तेन पुत्रेण चोदितः पितृसमीपं प्रापयेत्युक्तः स नृपतिः अनुद्धृतशल्यम् अनुत्पाटितशरमेव तं मुनिपुत्रम् अवसन्नदृशोर्नष्टदृशोरन्धयोरित्यर्थः पित्रोर्मातापित्रोः । पिता मात्रेत्येकशेषः । सकाशं समीपं निनाय । इदञ्च रामायणविरुद्धम् । तत्र अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ । अस्पर्शयमहं पुत्रं तं मुनिं

ताभ्यां तथागतमुपेत्य तमेकपुत्र
मज्ञानतः स्वचरितं नृपतिः शशंस ॥७७॥
तौ दम्पती बहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥७८॥
दिष्टान्तमाप्स्यति भवानपि पुत्रशोका
दन्त्ये वयस्यहमिवेति तमुक्तवन्तम्।

सह भार्य्ययेति नदीतीरएव मृतं पुत्रं प्रति पित्रोरानयनाभिधानात्। तथागतं वेतसगूढम् एकश्चासौ पुत्रश्च एकपुत्रस्तम्। एक ग्रहणं पित्रोरनन्यगतिकत्वसूचनार्थम्। उपेत्य सन्निकृष्य अज्ञानतः करिभ्रान्त्या स्वचरितं स्वकृतं ताभ्यां मातापितृभ्याम्। क्रियाग्रहणा-च्चतुर्थी। शशंस कथितवान् ॥ ७७ ॥

ताविति। तौ जाया च पतिश्च दम्पती। राजदन्तादिषु जाया शब्दस्य दम्भावोजम्भावश्च विकल्पेन निपातितः। दम्पती जम्पती जायापती भार्य्यापती च ताविल्यमरः। बहु विलप्य भूरि परिदेव्य। विलापः परिदेवनमित्यमरः। शिशोः उरस्तोवक्षसः। पञ्चम्यास्त-सिल्। निखातं शल्यं शरं प्रहर्त्रा राज्ञा उदहारयताम् उद्धारया-मासतुः, स शिशुः परासुर्गतप्राणोऽभूत्, अथ वृद्धः हस्तार्पितैर्नयन-वारिभिरेव शापदानस्य जलपूर्व्वकत्वात्तैरेव भूमिपतिं शशाप ॥ ७८ ॥

दिष्टेति। हे राजन् भवानप्यन्त्ये वयसि अहमिव पुत्रशोकात् दिष्टान्तं कालावसानं मरणमित्यर्थः। दिष्टः काले च दैवे स्यादिति विश्वः। आप्स्यति प्राप्स्यति इत्युक्तवन्तम्। आक्रान्तः पादाहतः

आक्रान्तपूर्व्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥७९॥
शापोऽप्यदृष्टतनयाननपद्मशोभे
सानुग्रहो भगवता मयि पातितोऽयम्।
कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो
वीजप्ररोहजननीं ज्वलनः करोति ॥८०॥
इत्थङ्गते गतघृणः किमयं विधत्तां
वध्यस्तवेत्यभिहितो वसुधाधिपेन।

पूर्व्वम् आक्रान्तपूर्व्वः। सुप्सुपेति समासः। तं प्रथममपकृतमित्यर्थः मुक्तविषमपकारात् पश्चादुत्सृष्टविषं भुजङ्गमिव स्थितं तं वृद्धं प्रति प्रथमापराद्धः प्रथमापराधी। कर्त्तरि क्तः। इदञ्च सहने कारणमुक्तम्। कोशलपतिः दशरथः शापदानात् पश्चादप्येनं मुनिं प्रोवाच ॥ ७९ ॥

शापइति। अदृष्टा तनयाननपद्मशोभा येन तस्मिन्नपुत्रके मयि भगवता पातितः। वज्रप्रायत्वात् पातितइत्युक्तम्। अयं पुत्रशोकात् म्रियस्वेत्येवंरूपः शापोपि सानुग्रहः वृद्धकुमारीवरन्यायेनेष्टावाप्तेरन्तरीयकत्वात् सोपकारएव। निग्रहस्याप्यनुग्राहकत्वम् अर्थान्तरन्यासेनाह कृष्यामिति। इन्धनैः काष्ठैरिद्धः प्रज्वलितोज्वलनोऽग्निः कृष्यां कर्षणार्हां क्षितिं दहन्नपि वीजप्ररोहाणां वीजाङ्कुराणां जननीम् उत्पादनक्षमां करोति ॥ ८० ॥

इत्थमिति। इत्थङ्गते प्रवृत्ते सति वसुधाधिपेन राज्ञा, गतघृणः निष्करुणो हन्तृत्वान्निष्कृपइत्यर्थः अतएव तव वध्योवधार्हः अयं जनः। अयमिति राज्ञो निर्वेदादनादरेण स्वात्मनिर्देशः। किं विधत्ताम् इत्यभिहितः मया किंविधेयमिति विज्ञापितइत्यर्थः. स मुनिः सदारः

एधान् हुताशनवतः स मुनिर्ययाचे
पुत्रं परासुमनुगन्तुमनाः सदारः ॥८१॥
प्राप्तानुगः सपदि शासनमस्य राजा
सम्पाद्य पातकविलुप्तधृतिर्निवृत्तः।
अन्तर्निविष्टपदमात्मविनाशहेतुं
शापं दधज्ज्वलनमौर्व्वमिवाम्बुराशिः॥८२॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
मृगयावर्णनोनाम नवमः सर्गः।

सभार्य्यः परासुङ्गतासुं पुत्रम् अनुगन्तुं मनोयस्य सोऽनुगन्तु मनाः सन्। तुंकाममनसोरपीति मकारलोपः। हुताशनवतः साग्नीन् एधान् काष्ठानि ययाचे। न चात्मघातदोषः अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्य्यतः। भृग्वग्निजलसम्पातैर्मरणं प्रविधीयतइतिस्मृतेः॥ ८१॥

प्राप्तेति। प्राप्तानुगः प्राप्तानुचरो राजा सपद्यस्य मुनेः शासनं काष्ठसम्भरणारूपं प्राक् एकोपि सम्प्रति प्राप्तानुचरत्वात् सम्पाद्य पातकेन मुनिवधरूपेण विलुप्तधृतिः नष्टोत्साहः सन् अन्तर्निविष्टपदमन्तर्लब्धस्थानम् आत्मविनाशहेतुं शापम् अम्बुराशिरौर्व्वं ज्वलनं वड़वानलमिव। और्व्वस्तु वाड़वोवड़वानलइत्यमरः। दधत् धृतवान् सन् निवृत्तः वनादिति शेषः॥ ८२॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां नवमः सर्गः।



विज्ञापनम् ।



कलिकाताराजधान्यां श्रीयुतभुवनचन्द्रवसाकसंस्थापित संवाद
ज्ञानरत्नाकराख्य यन्त्रे देवनागराक्षरे मुद्रितपुस्तकविवरणम् ।
(निमतलाघाटष्ट्रीट ८ संख्यक भवन ।)

वेणीसंहार नाटकम् (महाकवि भट्टनारायण प्रणीतम्) श्रीतारानाथ
तर्कवाचस्पतिकृत व्याख्यान सहितम् । मूल्य २

सुश्रुतः, आयुर्वेदः, भगवताधन्वन्तरिणोपदिष्टेन सुश्रुतनामधेयेन
तच्छिष्येण विरचितः । मूल्य ७

कुमारसम्भवम्, सप्तमसर्गान्तम् (महाकवि कालिदास कृतम्)
श्रीमल्लिनाथ कृत व्याख्यान सहितम् । मूल्य २

कुमारसम्भव,उत्तरखण्डम् (कालिदासकृतम्) मूलमात्र । मूल्य ॥०

किरातार्ज्जुनीयम् (भारविकृतम्) मूलमात्रम् । मूल्य ॥०

दशकुमारचरित, पूर्वखण्डम् (दण्डग्राचार्य्य कृतम्) मूल्य ॥०

वसन्ततिलकभाण (वरदाचार्य्यकृत) मूल्य ।=

साहित्यदर्पण (विश्वनाथकविराजकृत) मूल्य २

रघुवंश(महाकविकालिदास कृत)मल्लिनाथ कृत टीका सहित । मूल्य ६

शिशुपाल वध (महाकवि माघकृत) मल्लिनाथकृत टीका सहित मूल्य ८

किरातार्ज्जुनीयम्,(भारविकृत) मल्लिनाथकृत टीका सहित । ४

हिन्दी ।

श्रीमद्भगवद्गीता मूल्य २
प्रेमसागर ”
वैतालपच्चीसी
माधवविलास

रघुवंशम्

(उत्तरार्द्धम् ।)

महाकविश्रीकालिदासकृतम् ।

श्रीमल्लिनाथसूरिविरचितया सञ्जीवनीसमाख्यया
व्याख्यासहितम् ।



कलिकातानगरे
श्रीयुतभुवनचन्द्रवसाकसंस्थापित संवादज्ञानरत्नाकराख्य
यन्त्रे तद्द्वारैव
१९२६ संवत्सरे
मुद्रितम् ।
(निमतला घाट ष्ट्रीट नं० ८)

दशमः सर्गः ।



पृथिवीं शासतस्तस्य पाकशासनतेजसः ।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ ॥ १ ॥
न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥ २ ॥

आशंसे नित्यमानन्दं रामनामकथामृतम् ।
सद्भिः श्रवणयोर्नित्यं पेयं पापप्रणोदितम् ॥

पृथिवीमिति । पृथिवीं शासतः पालयतः पाकशासनतेजसः इन्द्रवर्चसः अनूनर्द्धेर्महासम्पत्तेस्तस्य दशरथस्य किञ्चिदूनम् ईषन्न्यूनं शरदां वत्सराणाम् । स्याद्दतौ वत्सरे शरदित्यमरः । अयुतं दशसहस्रं ययौ । एकदशशतसहस्राण्ययुतं नियुतं तथा प्रयुतम् । कोट्यर्बुदञ्च पद्मं स्थानात् स्थानं दशगुणं स्यादित्यार्यभट्टः । इदञ्च मुनिशापात् परं वेदितव्यं न तु जननात् । षष्टिवर्षसहस्राणि जातस्य मम कौशिक । दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसीति रामायणविरोधात् । नाप्यभिषेकात्परं तस्यापि सम्यग्विनीतमथ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत् प्रजानामिति कौमारानुष्ठितत्वाभिधानात् सएव विरोधइति ॥ १ ॥

न चेति । स दशरथः पूर्वेषां पितॄणाम् ऋणान्मोक्षसाधनम् एष वा अनृणो यः पुत्रीति श्रुतेः पितृणामृणविमुक्तिकारणं सद्यः शोकएव

अतिष्ठत् प्रत्ययापेक्षसन्ततिः स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥३॥

ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥४॥

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः ॥५॥

तमः तदपहन्तीति श्रोकतमोपहम् । अन्ताभयङ्करइति वद्दुपपदेपि तदन्तविधिमाश्रित्य अपेक्लेशतमसोरिति डप्रत्ययः । श्रुताभिधानं श्रुताख्यं ज्योतिर्नोपलेभे न प्राप च ॥ २ ॥

अतिष्ठदिति । प्रत्ययं हेतुमपेक्षतइति प्रत्ययापेक्षा सन्ततिर्यस्य स तथोक्तः । प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः । स नृपो मन्थात् प्राक् मन्थनात् पूर्वमनभिव्यक्ता अदृष्टा रत्नोत्पत्तिर्यस्य सोऽर्णवइव चिरम् अतिष्ठत् । सामग्र्यभावाद्विलम्बो नतु वन्ध्यत्वादिति भावः ॥ ३ ॥

ऋष्यशृङ्गेति । ऋष्यशृङ्गादयः ऋष्यशृङ्गोनाम कश्चिदृषिः तदादयः ऋतुमृतौ वा यजन्तीति ऋत्विजः याज्ञिकाः । ऋत्विग्दधृगित्यादिना क्विन्तो निपातः । जितात्मानो जितान्तःकरणाः सन्तः सन्तानकाङ्क्षिणः पुत्रार्थिनस्तस्य दशरथस्य पुत्रीयां पुत्रनिमित्ताम् । पुत्राच्छ च इति छप्रत्ययः । इष्टिं यागमारेभिरे प्रचक्रमिरे ॥ ४ ॥

तस्मिन्निति । तस्मिन्नवसरे पुत्रकामेष्टिप्रवृत्तिसमये देवाः पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः रावणः तेनोपप्लुताः पीड़िताः सन्तो निदाघार्त्ताः घर्म्मातुराः अध्वानं गच्छन्तीत्यध्वगाः पान्थाः । अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डइति डप्रत्ययः । छायाप्रधानं वृक्षं छाया वृक्षमिव । शाकपार्थिवादित्वात् समासः । हरिं विष्णुमभिजग्मुः ॥ ५ ॥

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः।
अव्याक्षेपो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम्॥६॥
भोगिभोगासनासीनं ददृशुस्तं दिवौकसः।
तत्फणामण्डलोदर्च्चिर्मणिद्योतितविग्रहम् ॥७॥
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥८॥

त इति। ते देवाश्चोदन्वन्तं समुद्रम्। उदन्वानुदधौ चेतिनिपातः। प्रापुः आदिपूरुषोविष्णुश्च बुबुधे योगनिद्रां जहावित्यर्थः। गमनप्रतिबोधयोरविलम्बार्थौ चकारौ। तथाहि अव्याक्षेपो गम्यस्याव्यासङ्गः अविलम्बइति यावत् भविष्यन्त्याःकार्य्यसिद्धेर्लक्षणं लिङ्गं हि। उक्तञ्च अनन्यपरता चास्य कार्य्यसिद्धेस्तु लक्षणमिति ॥ ६ ॥

भोगीति। द्यौरोको येषां ते दिवौकसोदेवाः। पृषोदरादित्वात् साधुः। यद्वा दिवशब्दोऽदन्तोप्यस्ति तथा च बुद्धचरिते न शोभते तेन हि नो विना पुरं मरुत्वता वृत्रवधे यथा दिवमिति। तत्र दिवु क्रीड़ादाविति धातोरिगुपधेति कः, दिवमोको येषामिति विग्रहः। भोगिनः शेषस्य भोगः शरीरम्। भोगः सुखे स्त्र्यादिभृतावहेश्च फणाकाययोरित्यमरः। सएवासनं सिंहासनं तत्रासीनमुपविष्टम्। आसेः शानच् ईदासइतीकारादेश'। तस्य भोगिनः फणामण्डले ये उदर्च्चिषः मणयः तैः द्योतितविग्रहं तं विष्णुं ददृशुः ॥ ७ ॥

श्रियइति। कीदृशं विष्णुं पद्मे निषण्णायाः उपविष्टायाः श्रियः क्षौमान्तरिता दुकूलव्यवहिता मेखला यस्य तस्मिन् आस्तीर्णः करपल्लवौयस्मिन्। विशेषणद्वयेनापि चरणयोः सौकुमार्य्यात् कटिमेखलास्पर्शासहत्वं सूच्यते। तस्मिनङ्के निक्षिप्तौ चरणौ येन तम् ॥ ८ ॥

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥९॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥१०॥
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥११॥
दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ॥१२॥

प्रबुद्धेति । पुनः कीदृशं प्रबुद्धे विकसिते पुण्डरीके इव अक्षिणी यस्य तं दिवसे तु पुण्डरीकमेवाक्षि यस्येति विग्रहः बालातपनिभं संशुकं यस्य तं पीताम्बरधरमित्यर्थः अन्यत्र बालातपरूपांशुकमित्यर्थः । निभोव्याजसदृक्षयोरिति विश्वः । प्रकृष्ट आरम्भो येषां ते प्रारम्भा योगिनः तेषां सुखदर्शनम् । अन्यत्र प्रारम्भे आदौ सुखदर्शनं शारदं शरत्सम्बन्धिनं दिवसमिव स्थितम् ॥ ९ ॥

प्रभेति । पुनः किंविधं प्रभयानुलिप्तमनुरञ्जितं श्रीवत्सं नाम लाञ्छनं येन तं लक्ष्म्याः विभ्रमदर्पणं कौस्तुभइति आख्या यस्य तम् अपां समुद्राणां सारं स्थिरांशं मणिमित्यर्थः बृहता उरसा बिभ्राणम् ॥ १० ॥

बाहुभिरिति । विटपाकारैः शाखाकारैः दिव्याभरणभूषितैः बाहुभिरुपलक्षितम् अतएव अपां [illegible] मध्ये आविर्भूतमपरं द्वितीयं पारिजातमिव स्थितम् ॥ ११ ॥

दैत्येति । दैत्यस्त्रीगण्डलेखानाम् असुराङ्गनागण्डस्थलीनां यो मदरागः तं विलुम्पन्ति हरन्तीति मदरागविलोपिनः तैश्चेतनावद्भिः

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥१३॥
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥१४॥
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ १५॥

सजीवैर्हेतिभिः सुदर्शनादिभिः शस्त्रैः । रवेरर्चिश्च शस्त्रञ्च वह्निज्वाला च हेतय इत्यमरः । उदीरितजयध्वनं जयशब्दमुद्घोषयन्तीभिः मूर्त्तिमतीभिः अस्त्रदेवताभिरुपास्यमानमित्यर्थः ॥ १२ ॥

मुक्तेति । मुक्तो भगवत्सन्निधानात् त्यक्तः शेषेण सह विरोधः सहजमपि वैरं येन तेन कुलिशव्रणा अमृताहरणकाले इन्द्रयुद्धे ये वज्रप्रहारास्त एव लक्ष्माणि यस्य स तेन प्रबद्धः अञ्जलिर्येन तेन प्राञ्जलिना प्रबद्धाञ्जलिनेत्यर्थः विनीतेन,नम्रेण गरुत्मता उपस्थितम् उपासितम् । पुरा किल तेन विष्णुना प्राञ्जलिप्रार्थितेन दुहितृगुणकेश्याः पत्युः कस्यचित् सर्पस्य गरुडादभयदाने कृते रुषितपक्षरक्षणक्षुभित पक्षिराजं त्वद्वोढाहं त्वत्तोबलाढ्यइतिगर्व्वितं स्ववामतर्ज्जनीभरेणैव भगवान् विनिनायेति महाभारतीया कथा सूचयन्ति विनीतेनेत्यनेन ॥ १३ ॥

योगेति । योगो मनसोविषयान्तरव्यावृत्तिः तद्रूपा या निद्रा तस्या अन्ते अवसाने विशदैः प्रसन्नैः पावनैः शोधनैः अवलोकनैः सुखशयन पृच्छन्तीति सौखशायनिकाः तान् । पृच्छतौ सुस्नातादिभ्य इत्युपसंख्यानाट्ठक् प्रत्ययः । भृग्वादीन्ऋषीननुगृह्णन्तम् ॥ १४ ॥

प्रणिपत्येति । अथ दर्शनानन्तरं सुराः सुरद्विषामसुराणां शमयित्रे विनाशकाय तस्मै विष्णवे प्रणिपत्य स्तुत्यं स्तोत्रार्हम् । एतिस्तु

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने ॥१६॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥१७॥
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥१८॥

शास्वृदृजुषः क्यप् इति क्यप्प्रत्ययः । वाक् च मनश्च वाङ्मनसे । अचतुरेत्यच्प्रत्ययान्तो निपातः । तयोर्गोचरो विषयो न भवतीत्यवाङ्मनसगोचरस्तम् एवं विष्णुं तुष्टुवुः ॥ १५ ॥

नम इति । पूर्वं सर्गादौ विश्वसृजे विश्वस्रष्ट्रे तदनु सृष्ट्यनन्तरं विश्वं बिभ्रते अथ विश्वस्य संहर्त्रे एवं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुरुद्रात्मने तुभ्यं नमः । १६ ।

ननु कूटस्थस्य कथं नैरूप्यमित्याशङ्क्य दृष्टान्तमाह

रसान्तराणीति । एकरसं मधुरैकरसं दिवि भवं दिव्यं पयः उदकं देशे देशे ऊषरादिदेशे अन्यान् रसान् रसान्तराणि लवणादीनि यथा अश्नुते प्राप्नोति एवमविक्रियो निर्विकारः एकरूप एव त्वं गुणेषु सत्त्वादिषु अवस्थाः स्रष्टृत्वादिरूपा अश्नुषे ॥ १७ ॥

अमेय इति । हे देव त्वममेयोऽनेकैरियत्तया न परिच्छेद्यः मितलोकः परिच्छिन्नलोकः अनर्थी निःस्पृहः । आवहतीति आवहः । पचाद्यच् । प्रार्थनानाम् आवहः दायकः । अजितः अन्यैर्न जितः । जिष्णुर्जयशीलः । अत्यन्तमव्यक्तः अतिसूक्ष्मरूपः व्यक्तस्य स्थूलस्य कारणम् ॥ १८ ॥

हृद्गतमिति । हे देव त्वां हृदयस्थं सर्वान्तर्यामितया निकटवर्तिनं

हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥१९॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥२०॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्च्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥२१॥

तथाप्यनासन्नम् अगम्यरूपत्वात् विप्रकृष्टञ्च विदुः तथा अकामं न कामोऽभिलाषोऽस्य तं परिपूर्णत्वान्निःस्पृहत्वाच्च निष्कामं तथापि तपस्विनं प्रशस्ततपोयुक्तं विदुः, योनिष्कामः स कथं तपः कुरुतइति विरोधः परिहारस्तु ऋषिरूपेण दुस्तरं तपस्तप्यते। दयालुं परदुःखप्रहरणपरं तथाप्यनघस्पृष्टं नित्यानन्दस्वरूपत्वाददुःखिनं विदुः। अघं दुरितदुःखयोरिति विश्वः। दयालुरदुःखी चेति विरोधः। ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनोनित्यशङ्कितः। परभाग्योपजीवी च षडेते नित्यदुःखिताइति महाभारते। पुराणमनादिमजरं निर्विकारत्वादजरं विदुः चिरन्तनं न जीर्य्यतइति विरोधालङ्कारः। उक्तञ्च आभासत्वे विरोधस्य विरोधालङ्कृतिर्म्मतेति। विरोधेन चालौकिक महिमत्वं व्यज्यते ॥ १९ ॥

सर्वज्ञइति। त्वं सर्वं जानातीति सर्वज्ञः। इगुपधेति कप्रत्ययः। अविज्ञातो न केनापि विज्ञातइत्यर्थः। त्वं सर्वस्य योनिः कारणं त्वमात्मनएव भवतीत्यात्मभूः न ते किञ्चित् कारणमस्तीत्यर्थः। त्वं सर्वस्य प्रभुः त्वमनीशः त्वमेकः सर्वरूपभाक् त्वमेक एव सर्वात्मना वर्त्तसे ॥ २० ॥

सप्तेति। हे देव त्वां सप्तभिः सामभिः रथन्तरादिभिरुपगीतम्। तद्धितार्थेत्युत्तरपदसमासः। सप्तानामर्णवानां जलं सप्तार्णवजलं पूर्व-

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥२२॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये॥२३॥
अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥२४॥

वत् समासः। तत्र शेते यः स सप्तार्णवजलेशयः तम्। शयवास-वासिष्व कालादित्यलुक्। सप्तार्चिर्मुखं यस्य तम्। अग्निमुखा वै देवा इति श्रुतेः। सप्तानां लोकानां भूर्भुवः स्वरादीनाम् एकसंश्रयम् एवंभूतमाचख्युः ॥२१॥

चतुरिति। चतुर्णां धर्मार्थकाममोक्षाणां वर्गः चतुर्वर्गः। त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः। तत्फलकं यत् ज्ञानं चत्वारि युगानि कृतत्रेतादीनि यासु ताः चतुर्युगाः कालावस्थाः कालपरिमाणं चत्वारोवर्णाः प्रकृता. उच्यन्ते यस्मिन्निति चतुर्वर्णमयः चातुर्वर्ण्यप्रचुरइत्यर्थः। तत्प्रकृतवचने मयट्। तद्धितार्थेति तद्धितार्थे विषये तत्पुरुषः। स लोक. इत्येवरूपं सर्वं चतुर्मुखात् चतुर्मुखरूपिणः त्वत्तः जातमिति शेषः। इदं सर्वमसृजत यदिदं किञ्चिदिति श्रुतेः ॥२२॥

अभ्यासेति। अभ्यासेन निगृहीतं विषयान्तरेभ्यो निवर्त्तितं तेन मनसा य.गिनो हृदयाश्रयं हृत्पद्मस्थं ज्योतिर्मयं त्वां विमुक्तये मोक्षार्थं विचिन्वन्ति अन्विष्यन्ति ध्यायन्तीत्यर्थ. ॥२३॥

अजस्येति। न जायतइत्यजः। अन्येष्वपि दृश्यतइति डप्रत्ययः। तस्याजस्य जन्मशून्यस्यापि जन्म गृह्णतः मत्स्यादिरूपेण जायमा-

शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः।
पर्य्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्त्तितुम्॥२५॥
बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥२६॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्म्मणाम्।
गतिस्त्वं वीतरागाणामभूयःसन्निवृत्तये॥२७॥

नस्य निरीहस्य चेष्टारहितस्यापि हतद्विषः शत्रुघातिनः जागरूकस्य सर्वसाक्षितया नित्यप्रबुद्धस्यापि स्वपतो योगनिद्रामनुभवतः इत्थं विरुद्धचेष्टस्य तव याथार्थ्यं को वेद वेत्ति। विदोलटोवेति णलादेशः ॥ २४ ॥

शब्दादीनिति। शब्दादीन् विषयान् भोक्तुं नरनारायणादिरूपेण दुश्चरं तपश्चरितुं तथा दैत्यमर्द्दनेन प्रजाः पातुम् औदासीन्येन ताटस्थ्येन वर्त्तितुञ्च पर्य्याप्तः समर्थोऽसि। भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोराचरणे त्वदन्यः कः समर्थ इत्यर्थः ॥ २५ ॥

बह्वधेति। आगमैस्त्रयीसाङ्ख्यादिभिर्दर्शनैर्बहुधा भिन्ना अपि सिद्धिहेतवः पुरुषार्थसाधकाः पन्थान उपायाः, जाह्नव्या इमे जाह्नवीयाः गाङ्गाः। वृद्धाच्छ इति छप्रत्ययः। ओघाः प्रवाहाः तेऽप्यागमैः आगतिभिर्बहुधा भिन्नाः सिद्धिहेतवश्च अर्णवइव त्वय्येव निपतन्ति प्रविशन्ति येन केनापि रूपेण त्वामेवोपयान्तीत्यर्थः। यदाहुराचार्य्याः किं बहुना कारवोऽपि विश्वकर्म्माणमुपासते ॥ २६ ॥

त्वयीति। त्वय्यावेशितं निवेशितं चित्तं यैस्तेषां त्वय्यं समर्पितानि कर्म्माणि यैस्तेषाम्, मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे इति भगवद्वचनात्। वीतरा-

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥२८॥
केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥२९॥
उदधेरिव रत्नानि तेजांसीव विवस्वतः।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते॥३०॥

गाणां विरक्तानाम् अभूयःसन्निवृत्तये अपुनरावृत्तये मोक्षायेत्यर्थः त्वमेव गतिः साधनम्, तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेरित्यर्थः॥ २७॥

प्रत्यक्षइति। प्रत्यक्षः प्रत्यक्षप्रमाणगम्योऽपि तव मह्यादिः पृथिव्यादिर्महिमा ऐश्वर्य्यमपरिच्छेद्यः इयत्तया नावधार्य्यः, आप्तवाग्वेदः यतो वा इमानीत्यादिः श्रुतिः अनुमानं चित्यादिकं सकर्तृकं कार्य्यत्वाद्घटवदित्यादि ताभ्यां साध्यं गम्यं त्वां प्रति का कथा प्रत्यक्षमपि त्वत्कृतं जगदपरिच्छेद्यं तत्कारणमप्रत्यक्षत्वम् अपरिच्छेद्य इति किमु वक्तव्यमित्यर्थः॥ २८॥

केवलमिति। स्मरणेन केवलं कृत्स्नम्। केवलः कृत्स्नएकश्चेति शाश्वतः। पुरुषं स्मर्त्तारं जनं पुनासि यतोयदित्यर्थः, अनेनैव स्मृतिकार्य्येणैव त्वयि त्वद्विषये याः अवशिष्टाः वृत्तयो दर्शनस्पर्शनादयो व्यापारास्ता निवेदितफलाः ज्ञापितकार्य्याः तव स्मरणस्यैव एतत्फलं दर्शनादीनान्तु कियदिति नावधारयामः इतिभावः॥ २९॥

उदधेरिति। उदधेः रत्नानीव विवस्वतस्तेजांसीव दूराणि अवाङ्मनसगोचराणि ते चरितानि स्तुतिभ्यो व्यतिरिच्यन्ते निःशेषं स्तोतुं न शक्यन्तइत्यर्थः॥ ३०॥

अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्म्मणोः॥३१॥
महिमानं यदुत्कीर्त्य तव संह्रियते वचः।
श्रमेण तदशक्त्या वा न गुणानामियत्तया॥३२॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजम्।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥३३॥

अनवाप्तमिति। अनवाप्तमप्राप्तम् अवाप्तव्यं ते तव किञ्चन किञ्चि-दपि न विद्यते नित्यपरिपूर्णत्वादिति भावः। तर्हि किनिबन्धने जन्म कर्म्मणी तत्राह लोकेति। एकः लोकानुग्रह एव ते जन्मकर्म्मणोर्हेतुः परमकारुणिकस्य ते परार्थैव प्रवृत्तिर्न स्वार्थेत्यर्थः॥३१॥

महिमानमिति। तव महिमानमुत्कीर्त्य वचः संह्रियते इति यत् तत् वचःसंहरणं श्रमेण वाग्व्यापारश्रान्त्या अशक्त्या कार्त्स्न्येन वक्तुम-शक्यत्वाद्वा गुणानामियत्तया एतावन्मात्रतया न, तेषामानन्त्यादिति भावः॥३२॥

इतीति। इति ते सुराः तम् अधोभूतमक्षजमिन्द्रियजं ज्ञानं यस्मिंस्तमधोक्षजं विष्णुं प्रसादयामासुः प्रसन्नं चक्रुः हि यस्मात् पर-मेष्ठिनः सर्वोत्तमस्य तस्य देवस्य सा देवैः कृता भूतार्थव्याहृतिः भूतस्य सत्यस्यार्थस्य व्याहृतिरुक्तिः। युक्ते क्ष्मादावृते भूतमित्यमरः। न स्तुतिर्न प्रशंसामात्रम्। महान्तो हि यथाकथञ्चित् सुलभा इति भावः। परमे स्थाने तिष्ठतीति परमेष्ठी, परमे कितिटितिलुणादिसूत्रेण तिष्ठतेर्णिनिः, तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक्, स्थास्थिन् स्थृणामिति वक्तव्यात् षत्वम्॥३३॥

तस्मा इति। सुराः देवाः कुशलस्य संप्रश्नेन व्यञ्जिता प्रकटीकृता

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः।
भयमप्रलयोद्वेलादाचख्युर्नैर्ऋतोदधेः॥३४॥
अथ वेलासमासन्नशैलरन्ध्रानुनादिना।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः॥३५॥
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।
बभूव कृतसंस्कारा चरितार्थैव भारती॥३६॥
बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता।
निर्यातशेषा चरणात् गङ्गेवोर्ध्वप्रवर्त्तिनी॥३७॥

प्रीतिर्यस्य तस्मै व्यञ्जितप्रसादायेत्यर्थः। अन्यथा अनवसरविज्ञप्तिर्मुख-रागाणामिव निष्फला स्यादिति भावः। तस्मै विष्णवे अप्रलये प्रलया-भावेऽप्युद्वेलादुन्मर्यादात् नैर्ऋतो राक्षसः स एवोदधिस्तस्मात् भयम् आचख्युः कथितवन्तः॥३४॥

अथेति। अथ वेलायाम् अब्धिकूले समासन्नानां सन्निकृष्टानां शैलानां रन्ध्रेषु गह्वरेषु अनुनादिना प्रतिध्वनिमता स्वरेण परिभूता-र्णवध्वनिः तिरस्कृतसमुद्रघोषः भगवान् उवाच॥३५॥

पुराणस्येति। पुराणस्य चिरन्तनस्य कवेस्तस्य भगवतो वर्ण-स्थानेषूरःकण्ठादिषु समीरिता सम्यगुच्चारिता अतएव कृतः सम्पा-दितः संस्कारः साधुत्वस्पष्टतादिप्रयत्नो यस्याः सा भारती वाणी चरि-तार्था कृतार्था बभूवेव। एवकारस्त्वसम्भावनाविपरीतभावनाव्युदा-सार्थः॥३६॥

बभाविति। विभोर्विष्णोर्वदनादुद्गता निःसृता सदशनज्योत्स्ना दन्तकान्तिसहिता, इदञ्च विशेषणं भावस्यातिशयार्थम्, अतएव सा भारती चरणादंघ्रेर्निर्याता चासौ शेषा च निर्यातशेषा निःसृताव-

जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥३८॥
विदितं तप्यमानञ्च तेन मे भुवनत्रयम्।
अकामोपनतेनेव साधोर्हृदयमेनसा ॥३९॥
कार्य्येषु चैककार्य्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा।
स्वय नेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥४०॥

गिष्टेत्यर्थः। स्त्रियाः पुंवदित्यनुवर्त्त्य पुंवत् कर्म्मधारयेति पुंवद्भावः। निर्यातशब्दस्य या निर्याता सावशेषा सागङ्गेवेति सामानाधिकरण्य निर्वाहः, निर्यातायाः शेषेति विग्रहे पुंवद्भावोदुर्घटएव। ऊर्द्ध्वप्रवर्त्तिनी ऊर्द्ध्ववाहिनी गङ्गेव बभावित्युत्प्रेक्षा ॥ ३७ ॥

यदाह भगवान् तदाह

जानइति। हे देवाः वो युष्माकम् अनुभावपराक्रमौ, महिमपुरुषकारौ रक्षसा रावणेन अङ्गिना शरीरिणां प्रथममध्यमौ उभौ गुणौ सत्वरजसी तमसेव तमोगुणेनेव आक्रान्तौ जाने। वाक्यार्थः कर्म ॥ ३८ ॥

विदितमिति। किञ्च अकामेन अनिच्छया उपनतेन प्रमादादागतेन एनसा पापेन साधोः सज्जनस्य हृदयमिव तेन रक्षसा तप्यमानं सन्ताप्यमानम्। तपेर्भौवादिकात् कर्मणि शानच्। भुवनत्रयं मे विदितं मया ज्ञायतइत्यर्थः। गतिबुद्धीत्यादिना वर्त्तमाने क्तः, क्तस्य च वर्त्तमानइति षष्ठी ॥ ३९ ॥

कार्य्येष्विति। किञ्च एककार्य्यत्वादावयोः एककार्य्यत्वाद्धेतोः कार्य्येषु कर्त्तव्यार्थेषु विषयेषु वज्रिणेन्द्रेण अभ्यर्थ्य इदं कुर्विति प्रार्थनीयो नास्मि तथा हि वातः स्वयमेवाग्नेः सारथ्यं साहाय्यं प्रतिपद्यते प्राप्नोति नतु

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे।
स्थापितो दशमो मूर्द्धा लभ्यांश इव रक्षसा॥४१॥
स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः॥४२॥
धातारं तपसा प्रीतं ययाचे स हि राक्षसः।
दैवात् सर्गादवध्यत्वं मर्त्त्येष्वास्थापराङ्मुखः॥४३॥

वह्निप्रार्थनया इत्येवकारार्थः। प्रेक्षावतां स्वार्थेषु स्वतएव प्रवृत्तिः नतु परप्रार्थनया सार्थश्चायं समापीत्यर्थः॥ ४०॥

पुरा किल त्रिपुरारिप्रीणनाय स्वशिरांसि छिन्दता दशकन्धरेण वह्नमं शिरोऽवशेषितं तन्मच्चक्रार्थमित्याह

स्वेति। स्वासिधारया स्वखड्गधारया परिहृतोऽच्छिन्न इत्यर्थः दशमोमूर्द्धा मे मम चक्रस्य कामं पर्य्याप्तोलभ्यांशः प्राप्तव्यभागइव तेन रक्षसा स्थापितः। सर्व्वथा तमहं हनिष्यामीत्यर्थः॥ ४१॥

तर्हि किं प्रागुपेक्षितमतआह

स्रष्टुरिति। किन्तु स्रष्टुर्ब्रह्मणो वरातिसर्गात् वरदानाद्धेतोः मया तस्य दुरात्मनो रिपोः रावणस्य अत्यारूढमत्यारोहणमतिवृद्धिरित्यर्थः। नपुंसके भावे क्तः। भोगिनः सर्पस्यात्यारूढं चन्दनेनेव सोढम्। चन्दनस्यापि तथा सहनं स्रष्टुर्नियतेरिति द्रष्टव्यम्॥ ४२॥

सम्प्रति वरस्वरूपमाह

धातारमिति। स राक्षसस्तपसा प्रीतं सन्तुष्टं धातारं ब्रह्माणं मर्त्त्येषु विषये आस्थापराङ्मुखः आदरविमुखः सन् मर्त्यानगणयन्नित्यर्थः दैवादष्टविधात् सर्गात् दैवसृष्टेरवध्यत्वं ययाचे हि॥ ४३॥

तर्हि का गतिरित्याशङ्क्य मनुष्यावतारेण हनिष्यामीत्याह

सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमम्।
करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्॥४४॥
अचिराद्यज्वभिर्भागं कल्पितं विधिवत् पुनः।
मायाविभिरनालीढमादास्यध्वे निशाचरैः॥४५॥
वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः॥४६॥
मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान्।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥४७॥

सोऽहमिति। सोऽहं दशरथस्य अपत्यं पुमान् दाशरथिः। अत इञ् इति इञ् प्रत्ययः। रामो भूत्वा तीक्ष्णैः शरैः तस्य रावणस्य शिरांस्येव कमलानि तेषामुच्चयं राशिं रणभूमेर्बलिक्षमं पूजार्हं करिष्यामि। पुष्पविपदा हि पूजेति भावः॥ ४४॥

अचिरादिति। हे देवाः यज्वभिर्याज्ञिकैः विधिवत् कल्पितमुपहृतं भागं हविर्भागं मायाविभिः मायावद्भिः। अस्मायामेधास्रजो विनिरिति विनिप्रत्ययः। निशाचरैः रक्षोभिरनालीढकनास्वादितं यथा तथा अचिरात् पुनरादास्यध्वे ग्रहीष्यध्वे॥ ४५॥

वैमानिकाइति। मरुतां देवानां पथि व्योम्नि वैमानिकाः विमानैश्चरन्तीति। चरतीति ठक्प्रत्ययः। मेघावरणतत्पराः रावणभयान्मेघेष्वन्तर्धानतत्पराः पुण्यकृत सुकृतिनः पुष्पकालोकेन यदृच्छया रावणविमानदर्शनेन यः संक्षोभः भयचकितं तं त्यजन्तु संक्षोभो भयचकितमिति शब्दार्णवः॥ ४६॥

मोक्ष्यध्वइति। हे देवाः यूयं शापेन नलकूबरशापेन यन्त्रिताः प्रतिबद्धाः पौलस्त्यस्य रावणस्य बलात्कारेण ये कचग्रहाः केशाकर्षा-

रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥४८॥
पुरुहूतप्रभृतयः सुरकार्य्योद्यतं सुराः ।
अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥४९॥
अथ तस्य विशाम्पत्युरन्ते काम्यस्य कर्म्मणः ।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥५०॥

तैरदूषितानजुपहतान् स्वर्गवन्दीनां हृतस्वर्गाङ्गनानां वेणीबन्धान् मोक्ष्यसे। पुरा किल नलकूवरेण आत्मानम् अभिसरन्त्या रम्भाया बलात्कारेण सम्भोगात् क्रुद्धेन दुरात्मा रावणः शप्तः स्त्रीणां बलाद्-ग्रहणे मूर्द्धा ते शतधा भविष्यतीति भारतीया कथानुसन्धेया ॥ ४७ ॥

रावणेति। सः कृष्णोविष्णुः सएव मेघः नीलमेघश्च, विश्रवसो-ऽपत्यं पुमानिति विग्रहे रावणः। विश्रवःशब्दात् शिवादित्वादणि विश्रवसो विश्रवणरवणावित्यन्तर्गणसूत्रेण विश्रवःशब्दस्य वृत्तिविषये रवणादेशे रावणइति सिद्धम्। सएवावग्रहो वर्षप्रतिबन्धः तेन क्लान्तं ग्लानं मरुतो देवाएव सस्यं तत् इति एवंरूपेण वागमृतेन वाक्सलि-लेन। अमृतं यज्ञशेषे स्यात् पीयूषे सलिलेऽमृतमिति विश्वः। अभि-वृष्य अभिषिच्य तिरोदधे अन्तर्दधे ॥ ४८ ॥

पुरुहूतेति। पुरुहूतप्रभृतयः इन्द्राद्याः सुराः सुरकार्य्ये रावण वधरूपे उद्यतं विष्णुम् अंशैर्भागैः द्रुमाः पुष्पैः स्वांशैर्वायुमिवानु-ययुः। सुग्रीवादिरूपेण वानरयोनिषु जाता इत्यभिप्रायः ॥ ४९ ॥

अथेति। अथ तस्य विशांपत्युः दशरथस्य सम्बन्धिनः काम्यस्य कर्म्मणः पुत्रकामेष्टेरन्तेऽवसाने अग्नेः पावकात् पुरुषः कश्चित् दिव्यः पुमान् ऋत्विजां विस्मयेन सह प्रबभूव प्रादुर्बभूव तदाविर्भावात्तेषामपि विस्मयोऽभूदित्यर्थः ॥ ५० ॥

हैमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥५१॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ।
वृषेव पयसां सारमाविष्कृतमुदन्वता ॥५२॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे तस्मिन् त्रैलोक्यप्रभवोऽपि यत्॥५३॥

तमेव पुरुषं विशिनष्टि

हैमपात्रेति । आद्यस्य पुंसोऽनुप्रवेशादधिष्ठानाद्धेतोः तेन दिव्यपुरुषेणापि दुर्वहं चतुर्द्दशभुवनोदरस्य भगवतो हरेरतिगरीयस्त्वाद्बोढुमशक्यं हैमपात्रगतं पयसि पक्वं चरुं पयश्चरुं पायसान्नं दोर्भ्यामादधानो वहन् । अनन्ताग्निभिरुष्णपक्व ओदनश्चरुरिति याज्ञिकाः ॥ ५१ ॥

प्राजापत्येति । नृपो दशरथः प्राजापत्येन प्रजापतिसम्बन्धिना पुरुषेणोपनीतं नतु वशिष्ठेन, प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृपेति रामायणात् । तदन्नं पायसान्नम् उदन्वतोदधिनाविष्कृतं प्रकाशितं पयसां सारममृतं वृषा वासव इव । वासवो वृत्रहा वृषेत्यमरः । प्रत्यग्रहीत् स्वीचकार ॥ ५२ ॥

अनेनेति । तस्य राज्ञो दशरथस्य अन्यैर्दुर्लभाः असाधारणाः गुणाः अनेन कथिताः यद्यस्मात् त्रयो लोकास्त्रैलोक्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तस्य प्रभवः कारणं विष्णुरपि तस्मिन् राज्ञि प्रसूतिमुत्पत्तिं चकमे कामितवान् त्रिभुवनकारणस्यापि कारणमिति परत्वानधिगुणसमान्वयइत्यर्थः ॥ ५३ ॥

सइति । स नृपः चरुसंप्राप्त सञ्जाता चरुसंभृतं वैष्णवं तेजः

स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम्।
द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥५४॥
अर्च्चिता तस्य कौसल्या प्रिया केकयवंशजा।
अतः सम्भाविता ताभ्यां सुमित्रामैच्छदीश्वरः॥५५॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः।
चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे ॥५६॥

पत्न्योः कौसल्याकैकेय्योः द्यौश्च पृथिवी च द्यावापृथिव्यौ। दिवश्च पृथिव्यामिति चकाराद्दिव्शब्दस्य द्यावादेशः। तयोर्द्यावापृथिव्योः अह्नः पतिरहर्पतिः। अहरादीनां पत्यादिषु वा रेफः इत्युपसंख्यानाद्वैकल्पिकोरेफस्य रेफादेशोविसर्गापवादः। प्रत्यग्रमातपं बालातपमिव विभेजे विभज्य ददावित्यर्थः॥ ५४॥

पत्नीत्रये सति द्वयोरेव विभागे कारणमाह

अर्च्चितेति। तस्य राज्ञः, कौ पृथिव्यां सलति गच्छतीति कोसलः। सलः गतौ पचाद्यच् कुशब्दस्य पृषोदरादित्वाद्गुणः। कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या। वृद्धेत्कोसलाजादाञ्ञ्यङिति ञ्यङ्, यङश्चापिति चाप्। अतएव सूत्रे निर्द्देशात् कोसलशब्दोदन्त्यसकारमध्यमः। अर्च्चिता ज्येष्ठा मान्या, केकयवंशजा कैकयी प्रिया इष्टा अतोहेतोरीश्वरोभर्त्ता नृपः सुमित्रां ताभ्यां कौसल्याकैकयीभ्यां सम्भावितां भागदानेन मानिताम् ऐच्छदिच्छति स्म। एवञ्च सामान्यं तिसृणाञ्च भागप्रापणमिति राज्ञि उचितज्ञता कौशलञ्च लभ्यते ॥ ५५ ॥

ते इति। बहुज्ञस्य सर्व्वज्ञस्य उचितज्ञस्येत्यर्थः पत्युर्महीक्षितः क्षितीश्वरस्य। विशेषणत्रयेण राज्ञोऽनुसरणीयतामाह। चित्तज्ञे

सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि।
भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥५७॥
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसम्भवः।
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः॥५८॥

अभिप्रायज्ञे ते उभे पत्न्यौ कौसल्याकैकय्यौ चरोर्यावर्द्धभागौ स्वभागौ तयोर्यावर्द्धौ तौ च तौ भागौ चेत्यर्द्धभागौ एकदेशौ ताभ्यामर्द्धार्द्धभागाभ्याम्। पुंस्यर्द्धोऽर्द्धं समेंऽशके इत्यमर.। ता सुमित्रामयोजयतां युक्तामकुरुतः। अयञ्च विभागो न रामायणसंवादी। तत्र चरोरर्द्धं कौसल्यायै अवशिष्टार्द्धं कैकय्यै शिष्टं पुन. सुमित्रायाइत्यभिधानात्। किन्तु पुराणान्तरसंवादो द्रष्टव्यः उक्तञ्च नारसिंहे। ते पिण्डप्राशने काले सुमित्रायै महीपतेः। पिण्डाभ्यामल्पमल्पन्तु स्वभगिन्यै प्रयच्छत इति। एवमन्यत्रापि विरोधे पुराणान्तरात् समाधातव्यम् ॥ ५६ ॥

नचैत्र सत्यमीर्ष्या स्यादित्याह

सा हीति। सा सुमित्रा उभयोरपि समान एकः पतिर्ययोः तयोः सपत्न्योः। नित्यं सपत्न्यादिष्विति ङीप् नकारादेशश्च। भ्रमरी भृङ्गाङ्गना वारणस्य गजस्य मदनिस्यन्दरेखयोरिव गण्डद्वयगतयोरिति भावः। प्रणयवती प्रेमवती आसीत्। सपत्न्योरित्यत्र समासान्तर्गतस्य पत्युरुपमानं वारणस्येति ॥ ५७ ॥

ताभिरिति। ताभिः कौसल्यादिभिः प्रजाना भूत्यै अभ्युदयाय देवस्य विष्णोरंशः सम्भवः कारणं यस्य स गर्भः, सूर्य्यस्येमा सौर्य्यः ताभिः सौरीभिः। सूर्य्यतिष्येत्युपधायकारस्य लोपः। अमृताइत्याख्या यासां ताभिः जलवहनसाम्यात् नाडीभिरिव नाडीभिः वृष्टिविसर्ज्जनीभिः दीधितिभिः अपां विकारोऽम्मयो जलमयोगर्भइव दध्रे धृतः जातावेकवचनं गर्भा दधिरे इत्यर्थः। अत्र यादव. तासां प्रतानि

सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः ।
अन्तर्गतफलारम्भाः सस्यानामिव सम्पदः ॥ ५९ ॥
गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ।
जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्त्तिभिः ॥ ६० ॥
हेमपक्षप्रभाजालं गगने च वितन्वता ।
उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६१ ॥

चत्वारि राज्ञीनां हविरर्पणे । यतस्त्वयं हि मोत्सर्गे तारकस्य रक्षणे । आनन्दाश्च हि मेघाश्च भूतनाः पूतना इति । चतुःसत्वं हविर्व्याहाः ताः सर्वा अभूताः स्त्रिय इति ॥ ५८ ॥

सममिति । समं युगपदापन्नाः प्राप्ताः सत्त्वाः प्राणिनः आपन्नसत्त्वाः गर्भिण्यः । आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणीत्यमरः । अतएव आपाण्डुरत्विषः पाण्डुरवर्णाः ताः राजपत्न्यः अन्तर्गताः फलारम्भाः फलप्रादुर्भावाः यासां ताः सस्यानां सम्पद इव रेजुः बभुः ॥ ५९ ॥

वक्ष्यति तासां स्वप्नदर्शनमाह

गुप्तमिति । सर्वास्ताः स्वप्नेषु जलजः शङ्खः, जलजासिगदाशार्ङ्गचक्रैः लाञ्छिता मूर्त्तयो येषां तैः वामनैः ह्रस्वैः पुरुषैः गुप्तं रक्षितम् आत्मानं स्वरूपं ददृशुः ॥ ६० ॥

हेमेति । विभ्रुति चार्थः । हेम्नः सुवर्णस्य पक्षयोः प्रभाजालं कान्तिपुञ्जं वितन्वता विस्तारयता वेगेनाकृष्टाः पयोमुचो मेघाः येन तेन सुपर्णेन गरुत्मता गगने ताः उह्यन्ते स्म ऊढाः ॥ ६१ ॥

बिभ्रत्येति । किञ्च स्तनयोरन्तरे मध्ये विलम्बिनं लम्बमानं न्यस्यतइति न्यासः कौस्तुभ एव न्यासः तं न्यस्तां कौस्तुभनिक्षेपं बि-

बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम्।
पर्य्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ॥६२॥
कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः।
ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥६३॥
ताभ्यस्तथाविधान् स्वप्नान् श्रुत्वा प्रीतोहि पार्थिवः।
मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः॥६४॥
विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा।
उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ॥६५॥

त्मत्या पद्ममेव व्यजनं हस्ते यस्याः तया लक्ष्म्या पर्य्युपास्यन्त उपासिताः ॥ ६२ ॥

कृतेति। किञ्च दिवि भवायां दिव्यायां त्रिस्रोतसि आकाशगङ्गायां कृताभिषेकैः कृतावगाहैः परं ब्रह्म वेदरहस्यं गृणद्भिः पठद्भिः सप्तभिः ब्रह्मर्षिभिः कश्यपप्रभृतिभिरुपतस्थिरे उपासाञ्चक्रिरे ॥ ६३ ॥

ताभ्य इति। पार्थिवोदशरथस्ताभ्यः पत्नीभ्यः। आख्यातोपयोगइत्यपादानत्वात् पञ्चमी। तथाविधान् उक्तप्रकारान् स्वप्नान् श्रुत्वा प्रीतः सन् आत्मानं जगद्गुरोर्विष्णोरपि गुरुत्वेन हेतुना परार्द्ध्यं सर्वोत्कृष्टं मेने हि ॥ ६४ ॥

विभक्तेति। एकः एकरूपोविभुर्विष्णुः तासां राजपत्नीनां कुक्षिषु गर्भेषु, प्रसन्नानां निर्म्मलानामपां कुक्षिषु प्रतिमाचन्द्रः प्रतिबिम्बचन्द्र इव अनेकधा विभक्तात्मा सन् उवास ॥ ६५ ॥

अथेति। अथ राज्ञो दशरथस्य सती पतिव्रता अग्र्या चासौ महिषी चाग्र्यमहिषी कौसल्या प्रसूतिसमये प्रसूतिकाले, ओषधि-

अथाग्रमहिषी राज्ञः प्रसूतिसमये सती ।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥६६॥

राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥६७॥

रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥६८॥

शय्यागतेन रामेण माता शातोदरी बभौ ।
सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ॥६९॥

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥७०॥

नक्तं रात्रिसमये तमोऽपहन्तीति तमोपहम् । अपे क्लेशतमसोरिति डप्रत्ययः । ज्योतिरिव तमोपहं तमोनाशकरं पुत्रं लेभे प्राप ॥६६॥

रामइति । अभिरमते अत्रेति अभिरामं मनोहरम् । अधिकरणार्थे घञ् । तेन वपुषा चोदितः प्रेरितो गुरुः पिता दशरथः तस्य पुत्रस्य जगतां प्रथमं मङ्गलं सुलक्षणं रामइति नामधेयं चक्रे । अभिरामत्वमेव रामशब्दप्रवृत्तिनिमित्तमित्यर्थः ॥ ६७ ॥

रक्षेति । रघुवंशस्य प्रदीपेन प्रकाशकेन अप्रतिमतेजसा तेन रामेण रक्षागृहगताः सूतिकागृहगता· दीपाः प्रत्यादिष्टाः प्रतिबद्धा इव अभवन् । महादीपसमीपे नाल्पाः स्फुरन्तीति भावः ॥ ६८ ॥

शय्येति । शातोदरी गर्भमोचनात् कृशोदरी माता शय्यागतेन रामेण सैकते पुलिने योऽम्भोजबलिः पद्मोपहारस्तेन शरदि कृशा जाह्नवी गङ्गेव बभौ ॥ ६९ ॥

कैकेय्याइति । केकयस्य राज्ञोऽपत्यं स्त्री कैकेयी । तस्यापत्य-

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ।
सम्यगाराधिता विद्या प्रबोधविनयाविव ॥७१॥
निर्दोषमभवत् सर्व्वमाविष्कृतगुणं जगत्।
अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम्॥७२॥
तस्योदये चतुर्मूर्त्तेः पौलस्त्यचकितेश्वराः।
विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥७३॥

मित्यर्थः तत केकयमित्रयुप्रलयानां यादेरिय इतीयादेशः। तस्याः भरतोनाम शीलवान् तनयो जज्ञे जातः, यस्तनयः प्रश्रयोविनयः श्रियमिव जनयित्री मातरमलञ्चक्रे ॥ ७० ॥

सुताविति। सुमित्रा लक्ष्मणशत्रुघ्नौ नाम यमौ युग्मजातौ सुतौ पुत्रौ सम्यगाराधिता स्वभ्यस्ता विद्या प्रबोधविनयौ तत्त्वज्ञानेन्द्रियजयाविव सुषुवे ॥ ७१ ॥

निर्दोषमिति। सर्व्वं जगत् भूलोको निर्दोषं दुर्भिक्षादिदोषरहितम् आविष्कृतगुणं प्रकटीकृतारोग्यादिगुणं चाभवत्। अतोत्प्रेक्ष्यते, गां भुवं गतनवतीर्णं पुरुषोत्तमं विष्णुं स्वर्गोऽप्यन्वगादिव, स्वर्गोऽपि गुणवान्निर्दोषस्तत्यागमः स्वर्गतुल्यमभूदित्यर्थः ॥ ७२ ॥

तस्येति। चतुर्मूर्त्तेः रामादिरूपेण चतूरूपस्य सतः तस्य हरेरुदये सति पौलस्त्याद्रावणाच्चकिताः भीताः ईश्वराः नाथाः इन्द्रादयो यासां ताः दिशस्तस्तः विरजस्कैरमधूलिभिः नभस्वद्भिः वायुभिः निपेपोच्छ्वसिता इवेत्युत्प्रेक्षा। श्वसेः कर्त्तरि क्तः। सनाथशरणलाभ सन्तुष्टाना दिशामुच्छ्वासवाताइव वाता ववुरित्यर्थः। चतुर्हिगीश रक्षणं मूर्त्तिचतुष्टयप्रयोजनमिति भावः ॥ ७३ ॥

रुग्णानुरिति। रक्षसा रावणेन विप्रकृतौ पीड़िताविलर्थः स्थानु-

क्रशानुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः।
रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥७४॥
दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः।
मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुविन्दवः॥७५॥
पुत्रजन्मप्रवेश्यानां तूर्य्याणां तस्य पुत्रिणः।
आरम्भं प्रथमं चक्रुर्देवदुन्दुभयो दिवि ॥७६॥
सन्तानकमयी वृष्टिर्भवने चास्य पेतुषी।
सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ॥७७॥

रश्मिः प्रभाकरः सूर्य्यश्च यथासङ्ख्यम् अपधूमत्वात् प्रसन्नत्वाच्च अपविद्धशुचौ निरस्तदुःखाविवास्तामभवताम् ॥ ७४ ॥

दशाननेति। तत्क्षणं तस्मिन् क्षणे रामोत्पत्तिसमये राक्षसश्रियः अश्रुबिन्दवः दशाननकिरीटेभ्यः मणीनां व्याजेन मिषेण पृथिव्यां पर्य्यस्ताः पतिताः रामोदये सति तद्वध्यस्य रावणस्य किरीटे मणिभ्रंशलक्षणं दुर्निमित्तमभूदित्यर्थः ॥ ७५ ॥

पुत्रेति। पुत्रिणोजातपुत्रस्य तस्य दशरथस्य पुत्रजन्मनि प्रवेश्यानां प्रवेशयितव्यानां वादनीयानामित्यर्थः तूर्य्याणां वाद्यानाम् आरम्भमुपक्रमं प्रथमं दिवि देवदुन्दुभयः चक्रुः पितुर्दशरथादपि देवा अधिकं प्रहृष्टा इत्यर्थः ॥ ७६ ॥

सन्तानकेति। अस्य राज्ञोभवने सन्तानकानां कल्पवृक्षकुसुमानां विकारः सन्तानकमयी वृष्टिश्च पेतुषी पपात। क्वसुश्चेति क्वसु प्रत्ययः, उगितश्चेति ङीप्। सा वृष्टिरेव सन्तः पुत्रजन्मन्यावश्यकाः ये मङ्गलोपचारास्तेषामादिरचना प्रथमक्रिया अभवत् ॥ ७७ ॥

कुमारइति। कृताः संस्कारा जातकर्मादयो येषां ते धात्रीणाम्

कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः ।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥७८॥
स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा ।
मुमूर्च्छ सहजं तेजो हविषेव हविर्भुजाम् ॥७९॥
परस्पराविरुद्धास्ते तद्रघोरनघं कुलम् ।
अलमुद्योतयामासुर्देवारण्यमिवर्त्तवः ॥८०॥
समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥८१॥

उपमातृणां स्तन्यानि पयांसि पिबन्तीति तथोक्ताः ते कुमारा अग्रजेन ज्येष्ठेनेव स्थितेन पितुरानन्देन समं ववृधिरे कुमारवृद्ध्या पिता महान्तमानन्दमवापेत्यर्थः । कुमारजन्मनः प्रागेव जातत्वादग्रजत्वोक्तिरानन्दस्य ॥ ७८ ॥

स्वाभाविकमिति । तेषां कुमाराणां सम्बन्धि स्वाभाविकं सहजं विनीतत्वं विनयकर्मणा शिक्षया हविर्भुजामग्नीनां सहजं तेजो हविषा आज्यादिकेनेव मुमूर्च्छ ववृधे निसर्गसंस्काराभ्यां विनीताः इत्यर्थः ॥ ७९ ॥

परस्परेति । परस्परमविरुद्धाः अविद्विष्टाः सौभ्रात्रगुणेनेत्यर्थः ते कुमाराः तत्प्रसिद्धम् अनघं निष्पापं रघोः कुलम्, ऋतवो वसन्तादयो देवारण्यं नन्दनमिव । सहजविरोधिनामपि ऋतूनां स्वारस्यानास्वादनार्थं देवादिष्टानाम् । अलमत्यन्तमुद्योतयामासुः प्रकाशयामासुः । सौभ्रात्रकं कुलभूषणमलं इति भावः ।८०॥

समानेति । शोभनाः स्निग्धाः भ्रातरो येषां ते सुभ्रातरः । नद्यृतश्चेति कप् न भवति नन्दिते भ्रातुरिति निषेधात् । तेषां भावः

तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।
यथा वायुविभावस्वोर्यथा चन्द्रसमुद्रयोः॥ ८२॥
ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव॥ ८३॥
स चतुर्द्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ।
धर्म्मार्थकाममोक्षाणामवतार इवाङ्गवान्॥ ८४॥

सौभ्रात्रम्। युवादित्वादण्। तस्मिन् समाने चतुर्णां तुल्येऽपि यदा उभौ रामलक्ष्मणौ प्रीत्या द्वन्द्वं बभूवतुः तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं द्वौ द्वौ साहचर्य्येणाभिव्यक्तौ। द्वन्द्वं रहस्यमर्य्यादेति निपातः। क्वचित् कस्यचित् स्नेहोऽतिरिच्यतइति भावः॥ ८१॥

तेषामिति। तेषां चतुर्णां मध्ये द्वयोर्द्वयोः रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्चेत्यर्थः। यथा वायुविभावस्वोर्वातवह्न्योरिव यथा चन्द्रसमुद्रयोः चन्द्रसमुद्रयोरिव ऐक्यमैकमत्यं कदाचन न विभिदे। एककार्य्यत्वं समानसुखदुःखत्वञ्च क्रमादुभमादयःलक्ष्यते, सहजः सहकारी हि वह्नेर्वायुः, चन्द्रवृद्धौ हि वर्द्धते सिन्धुः तत्क्षये च क्षीयतइति॥ ८२॥

तइति। प्रजानाथास्ते कुमाराः तेजसा प्रभावेण प्रश्रयेण विनयेन च निदाघान्ते ग्रीष्मान्ते श्यामान्यभ्राणि येषां ते श्यामाभ्राः नातिशीतोष्णाइत्यर्थः दिवसाइव, प्रजानां मनो जह्रुः॥ ८३॥

सइति। स चतुर्द्धा। संख्यायाविधार्थे इत्यनेन धाप्रत्ययः। व्यस्तो-विभक्तः पृथिवीपतेः दशरथस्य प्रसवः सन्तानः चतुर्द्धा अङ्गवान् मूर्त्तिमान् धर्म्मार्थकाममोक्षाणाम् अवतारइव बभौ॥ ८४॥

गुणैरिति। गुरुवत्सलाः पितृभक्ताः ते कुमाराः गुर्णैर्विनया-

गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः।
तमेव चतुरन्तेशं रत्नैरिव महार्णवाः॥८५॥

सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव पणबन्धव्यक्तयोगैरुपायैः।
हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः॥८६॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रामावतारो नाम दशमः सर्गः।

दिभिः गुरुं पितरम्, चतुरन्तानां दिगन्तानामीशं चतुरन्तेशम्। तद्धितार्थेत्यादिना उत्तरपदसमासः। तं दशरथमेव महार्णवाश्चत्वारो रत्नैरिव आराधयामासुः॥८५॥

सुरगज इति। भग्ना दैत्यानामसिधारा यैस्तैः चतुर्भिर्दन्तैः सुरगजः ऐरावत इव पणबन्धेन फलसिद्ध्या व्यक्तयोगैरनुमितप्रयोगैरुपायैश्चतुर्भिः सामादिभिः नयो नीतिरिव युगवद्दीर्घैश्चतुर्भिर्दोर्भिर्भुजैः हरिर्विष्णुरिव तदीयैः हरिसम्बन्धिभिरंशैरंशभूतैश्चतुर्भिस्तैः पुत्रैः अवनिपतीनां पतिः राजराजो दशरथ श्चकाशे दिदीपे॥८६॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां दशमः सर्गः।



एकादशः सर्गः ।



कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचित-
स्तेजसां हि न वयः समीक्ष्यते ॥ १ ॥
कृत्स्नलब्धमपि लब्धवर्णभाक्
तं दिदेश मुनये सलक्ष्मणम् ।

रामचन्द्रचरणारविन्दयोरत्र रङ्ग चर भृङ्गलीलया ।
तत्र सन्ति हि रसाश्श्रुतिविश्रुतास्तान् यथारुचि सदैव निर्विश ॥

कौशिकेनेति । कौशिकेन कुशिकापत्येन विश्वामित्रेण एत्य अभ्यागत्य स क्षितीश्वरो दशरथः अध्वरविघातशान्तये यज्ञविघ्नविध्वंसनाय काकपक्षधरं बालकोचितशिखाधरम् । बालानां तु शिखा प्रोक्ता काकपक्षः शिखण्डक इति हलायुधः । रामं याचितः किल प्रार्थितः खलु । याचेर्द्विकर्म्मकात् प्रधाने कर्मणि क्तः अप्रधाने दुहादीनामिति वचनात् । नायं बालाधिकार इत्याशङ्क्याह तेजसां तेजस्विनां वयो बाल्यादि न समीक्ष्यते हि अप्रयोजकमित्यर्थः । अत्र सर्गे रथोद्धता वृत्तम् उक्तञ्च रान्नराविह रथोद्धता लगाविति ॥ १ ॥

कृत्स्नलब्धमिति । लब्धाः वर्णाः प्रसिद्धयो यैस्ते लब्धवर्णा विचक्षणाः । लब्धवर्णो विचक्षण इत्यमरः । तान् भजत इति लब्धवर्णभाक्

अप्यसुप्रणयिनां रघोः कुले
न व्यहन्यत कदाचिदर्थिता ॥२॥
यावदादिशति पार्थिवस्तयो
र्निर्गमाय पुरमार्गसंस्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः ॥३॥
तौ निदेशकरणोद्यतौ पितु
र्धन्विनौ चरणयोर्निपेततुः ।
भूपतेरपि तयोः प्रवत्स्यतो
र्नम्रयोरुपरि वाष्पबिन्दवः ॥४॥

विद्वत्सेवीत्यर्थः । स राजा दुर्लभमपि सलक्ष्मणं तं रामं मुने-
दिदेश अतिसृष्टवान् । तथाहि असुप्रणयिनां प्राणार्थिनामपि अर्थिता
याच्ञा रघोः कुले कदाचित् न व्यहन्यत न विहता न निष्फलीकृते-
त्यर्थः । यैरर्थिभ्यः प्राणा अपि समर्प्यन्ते तेषां पुत्रत्यागो न विस्म-
यावह इति भावः ॥ २ ॥

यावदिति । पार्थिवः दशरथः तयोः रामलक्ष्मणयोः निर्ग-
माय निष्क्रमाय पुरमार्गसंस्क्रिया धूलिसंमार्जनगन्धोदकसेचन माल्यो-
पहारादिरूपसंस्कारं यावदादिशति आज्ञापयति तावत् मरुत्सखैर्वात-
सखैः, अनेन धूलिसंमार्जनं गम्यते, स पुष्पजलवर्षिभिः पुष्पसहित-
जलवर्षिभिर्घनैः सा मार्गसंस्क्रिया आशु विदधे विहिता । एतेन च
कार्यप्रवृत्तयोर्दैवानुकूल्यं सूचितम् । ३ ॥

तौ इति । निदेशकरणोद्यतौ निदेशकरणोद्युक्तौ धन्विनौ ...

तौ पितुर्नयनजेन वारिणा
किञ्चिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां
पौरदृष्टिकृतमार्गतोरणौ ॥ ५ ॥

लक्ष्मणानुचरमेव राघवं
नेतुमैच्छदृषिरित्यसौ नृपः ।
आशिषं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा ॥ ६ ॥

अन्तौ तौ कुमारौ पितुश्चरणयोः निमेतलुः प्रणताविन्यर्थः । भूपतेरपि वाष्पविन्दवः प्रवत्स्यतोः प्रवासं करिष्यतोः अतएव नम्रयोः प्रणतयोः। नमिकम्पीति रप्रत्ययः । तयोरुपरि निपेतुः पतिताः ॥ ४ ॥

ताविति । पितुर्नयनजेन वारिणा किञ्चिदुक्षितशिखण्डकौ ईषत् सिक्तचूड़ौ । शिखा चूड़ा शिखण्डः स्यादित्यमरः । शेषाद्विभाषेति कप्रत्ययः । धन्विनौ तावुभौ पौरदृष्टिभिः कृतानि मार्गतोरणानि सम्पाद्यानि कुवलयानि ययोस्तौ तयोक्तौ संघशो निरीक्ष्यमाणावित्यर्थः । तमृषिमन्वगच्छताम् ॥ ५ ॥

लक्ष्मणेति । ऋषिः लक्ष्मणानुचरमेव लक्ष्मणमात्रानुचरं त राघवं नेतुमैच्छत् इति हेतोः असौ नृपः आशिषं प्रयुयुजे प्रयुक्तवान् वाहिनी सेना न प्रयुयुजे न प्रेषितवान् हि यस्मात् सा आशीरेव तयोः कुमारयोः रक्षणविधौ क्षमा शक्ता ॥ ६ ॥

मातृवर्गेति । मातृवर्गस्य चरणान् स्पृशतइति मातृवर्गचरणस्पृशौ कृतमातृवर्गनमस्कारावित्यर्थः । स्पृशोऽनुदके क्विन्निति क्विन्

मातृवर्गचरणस्पृशौ मुने-
स्तौ प्रपद्य पदवीं महौजसः ।
रेजतुर्गतिवशात् प्रवर्त्तिनौ
भास्करस्य मधुमाधवाविव ॥७॥

वीचिलोलभुजयोस्तयोर्गतं
शैशवाच्चपलमप्यशोभत ।
तोयदागमइवोद्ध्रभिद्ययो-
र्नामधेयसदृशं विचेष्टितम् ॥८॥

मात्रिति । तौ महौजसो मुनेः पदवीं प्रपद्य महौजसो भास्करस्य गतिवशात् मेषादिराशिसंक्रान्त्यनुसारात् प्रवर्त्तिनौ मधुमाधवाविव चैत्रवैशाखाविव रेजतुः । फणाञ्च सप्तानामिति वैकल्पिकावेत्वाभ्यासलोपौ । स्याच्चैत्रे चैत्रिको मधुः, वैशाखे माधवो राधः इति चामरः ॥ ७ ॥

वीचीति । वीचिलोलभुजयोः तरङ्गचञ्चलबाह्वोः । इदं विशेषणं नदीपक्षानुषङ्गि वेदितव्यम् । तयोः चपलं चञ्चलमपि गतं गतिः शैशवाद्धेतोरशोभत । किमिव तोयदागमे वर्षासमये उद्ध्रमुत्कलिलुद्ध्रं भिनत्ति कूलमिति भिद्यं । भिद्योद्ध्रौ नदे इति क्यबन्तौ निपात्यौ । उद्ध्रभिद्ययोर्नदविशेषयोः नामधेयसदृशं नामानुरूपं विचेष्टितमिव उद्ध्रोज्झनकूलभेदनरूपव्यापार इव । मददोत्पन्नं चापल्यमपि शोभत इति भावः । ८ ।

ताविति । [illegible] तौ [illegible] सिद्धयो [illegible]

तौ बलातिबलयोः प्रभावतो
विद्ययोः पथि मुनिप्रदिष्टयोः।
मम्लतुर्न मणिकुट्टिमोचितौ
मातृपार्श्वपरिवर्त्तिनाविव ॥९॥

पूर्व्ववृत्तकथितैः पुराविदः
सानुजः पितृसखस्य राघवः।
उह्यमान इव वाहनोचितः
पादचारमपि न व्यभावयत् ॥१०॥

तौ सरांसि रसवद्भिरम्बुभिः
कूजितैः श्रुतिसुखैः पतत्त्रिणः।
वायवः सुरभिपुष्परेणुभि
श्छायया च जलदाः सिषेविरे ॥११॥

बलाख्ययोर्मन्त्रयोः प्रभावतः सामर्थ्यात् मातृपार्श्वपरिवर्त्तिनाविव पथि न मम्लतुः न ग्लानाविच्यर्थः। अत्र रामायणश्लोकः। क्षुत्पिपासे न ते राम भविष्यते नरोत्तम। बलामतिबलाञ्चैव पठतः पथि राघव ॥ ९ ॥

पूर्वेति। वाहनोचितः सानुजो राघवः पुराविदः पूर्व्ववृत्ताभिज्ञस्य पितृसखस्य मुनेः पूर्ववृत्तकथितैः पुरावृत्तकथाभिरुह्यमान इव वाहनेन प्राप्यमाण इव। वहेर्धातोः कर्मणि शानच्। पादचारमपि न व्यभावयत् न ज्ञातवान् ॥ १० ॥

ताविति। तौ राघवौ कर्मभूतौ सरांसि कर्तॄणि रसवद्भिर्मधुरैरम्बुभिः सिषेविरे, पतत्त्रिणः पक्षिणः सुखयन्तीति सुखानि पचा-

नाम्भसां कमलशोभिनां तथा
शाखिनाञ्च न परिश्रमच्छिदाम् ।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः ॥ १२॥

स्थाणुदग्धवपुषस्तपोवनं
प्राप्य दाशरथिरात्तकार्मुकः ।
विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥१३॥

यच् । ऋतूनां सुखानि तैः कूजितैः, वायवः सुरभिपुष्परेणुभिः, जलदाः छायया च, सिषेविरे इति सर्वत्र सम्बध्यते ॥ ११ ॥

नेति । तप एषामस्तीति तपस्विनः । तपःसहस्राभ्यां विनिनिति विनिप्रत्ययः । लघुना दृष्टेन । विशिष्टेऽपि लघुरित्यमरः । तयोरुभयोः कर्म्मभूतयोर्दर्शनेन यथा प्रीतिमापुः तथा कमलशोभिनामम्भसां दर्शनेन नापुः, परिश्रमच्छिदां शाखिनां दर्शनेन च नापुः ॥ १२ ॥

स्थाण्विति । स आत्तकार्मुकः दशरथस्यापत्यं पुमान् दाशरथी रामः । अत इञिति इञ् प्रत्ययः । स्थाणुना हरेण । स्थाणुः कीले हरे क्लीबे इति विश्वः । तेन दग्धवपुषो मदनस्य तपोवनं प्राप्य चारुणा विग्रहेण कायेन । विग्रहः कलहे काये इति विश्वः । प्रतिनिधिः प्रतिकृतिः सदृशोऽभवत् कर्म्मणा न पुनः । देहेन मदनसुन्दर इति भावः ॥ १३ ॥

ताविति । अथ [illegible] । अगस्त्यः मदन [illegible]-

तौ सुकेतुसुतया खिलीकृते
कौशिकाद्विदितशापया पथि।
निन्यतुः स्थलनिवेशिताटनी
लीलयैव धनुषी अधिज्यताम् ॥१४॥
ज्यानिनादमथ गृह्णती तयोः
प्रादुरास बहुलक्षपाच्छविः।
ताड़का चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी ॥१५॥

कामभिशप्तवान्। पुरुषादी महायक्षी विकृता विकृतानना। इदं रूपमपाहाय दारुणं रूपमस्तु ते इति। तदेतदाह विदितशापयेति। कौशिकादाख्यातुः। आख्यातोपयोगइत्यपादानात् पञ्चमी। विदितशापया सुकेतुसुतया ताडकया खिलीकृते पथि। खिलमप्रहतं स्थानमिति हलायुधः। तौ रामलक्ष्मणौ स्थले निवेशिते अटनी धनुःकोटी याभ्यां तौ तथोक्तौ। कोटिरस्याटनिरित्यमरः। लीलयैव धनुषी अधिकृते ज्ये मौर्व्यौ ययोस्ते अधिज्ये। ज्या मौर्व्वी मातृभूमिषु इति विश्वः। तयोर्भावस्तत्तामधिज्यतां निन्यतुः नीतवन्तौ। नयतिर्द्विकर्म्मकः ॥ १४ ॥

ज्येति। अथ तयोर्ज्यानिनादं गृह्णती जानती शृण्वतीत्यर्थः। बहुलक्षपाच्छविः कृष्णपक्षरात्रिवर्णा। बहुलः कृष्णपक्षे चेति विश्वः। चले कपाले एव कुण्डले यस्याः सा तथोक्ता ताड़का, निविड़ा सान्द्रा बलाकिनी बलाकावती। व्रीह्यादिभ्यस्तेतीनिः। कालिकेव घनावलीव। कालिका योगिनीभेदे काल्यां गौर्य्यां घनावलाविति विश्वः। प्रादुरास प्रादुर्बभूव ॥ १५ ॥

तीव्रवेगधुतमार्गवृक्षया
प्रेतचीवरवसा स्वनोग्रया।
अभ्यभावि भरताग्रजस्तया
वात्ययेव पितृकाननोत्थया ॥१६॥

*उद्यतैकभुजयष्टिमायतीं
श्रोणिलम्बिपुरुषान्त्रमेखलाम्।
तां विलोक्य वनितावधे घृणां
पत्रिणा सह मुमोच राघवः ॥१७॥

तीव्रेति। तीव्रवेगेन धुताः कम्पिताः मार्गवृक्षा यया तयोक्तया प्रेतचीवराणि वस्ते इति प्रेतचीवरवाः तया प्रेतचीवरवसा। वसतेराच्छादनार्थात् क्विप्। स्वनेन सिंहनादेन उग्रया तया ताडकया पितृकानने श्मशाने उत्था उत्पन्ना। आतश्चोपसर्गे इति उत्पूर्वात्तिष्ठतेः कर्तरि कप्रत्ययः। तया वात्ययेव वातसमूहेनेव। पाशादिभ्यो यः इति यः। भरताग्रजो रामोऽभ्यभावि अभिभूतः। कर्मणि लुङ्। तीव्रवेगेत्यादिविशेषणानि वात्यायामपि योज्यानि ॥ १६ ॥

उद्यतेति। उद्यता उन्नमिता एको भुज एव यष्टिर्यस्यास्ताम् आयतीमायान्तीम्। इणो धातोः शतरि उगितश्चेति ङीप्। श्रोणिलम्बिनी पुरुषाणामन्त्राण्येव मेखला यस्यास्ताम्। विशेषणद्वयेनापि आततायित्वं सूचितम्। अतएव तां विलोक्य राघवो वनितावधे घृणां जुगुप्सां करुणां वा। जुगुप्साकरुणे घृणे इत्यमरः। पत्रिणा इषुणा सह। पत्री रोप इषुर्द्वयोरित्यमरः। मुमोच मुक्तवान्। आततायिवधे मनुः। आततायिनमायान्तं हन्यादेवाविचारयन्। नाततायिवधे दोषो हन्तुर्भवति कश्चनेति ॥ १७ ॥

यच्चकार विवरं शिलाघने
ताडकोरसि स रामसायकः।
अप्रविष्टविषयस्य रक्षसां
द्वारतामगमदन्तकस्य तत्॥१८॥
बाणभिन्नहृदया निपेतुषी
सा स्वकाननभुवं न केवलाम्।
विष्टपत्रयपराजयस्थिरां
रावणश्रियमपि व्यकम्पयत्॥१९॥

यदिति। स रामसायकः शिलावत् घने सान्द्रे ताडकोरसि यद्विवरं रन्ध्रं चकार तद्विवरं रक्षसामप्रविष्टविषयस्य अप्रविष्टरक्षोदेशस्येत्यर्थः। सापेक्षत्वेऽपि गमकत्वात् समासः विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि चेति विश्वः। अन्तकस्य यमस्य द्वारताम् अगमत्। इयं प्रथमा रक्षोहतिरिति भावः॥१८॥

बाणेति। बाणभिन्नहृदया निपेतुषी निपतिता सती। क्वसुश्चेति क्वसुप्रत्ययः, उगितश्चेति ङीप्। सा केवलामेकाम्। निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोरित्यमरः। स्वकाननभुवं न व्यकम्पयत् किन्तु विष्टपत्रयस्य लोकत्रयस्य पराजयेन स्थिरां रावणश्रियमपि व्यकम्पयत्। ताडकावधश्रवणेन रावणस्यापि भयमुत्पन्नमिति भावः॥१९॥

अत्र ताडकायाः अभिसारिकायाः समाधिरभिधीयते

रामेति। सा निशासु चरतीति निशाचरी राक्षसी अभिसारिका च दु सहेन सोढुमशक्येन रामएव मन्मथः अन्यत्राभिरामो मन्मथस्तस्य

* राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥२०॥

नैर्ऋतघ्नमथ मन्त्रवन्मुनेः
प्रापदस्त्रमवदानतोषितात् ।
ज्योतिरिन्धननिपाति भास्करात्
सूर्य्यकान्त इव ताडकान्तकः ॥२१॥

वामनाश्रमपदं ततः परं
पावनं श्रुतमृषेरुपेयिवान् ।

…शरेण हृदये उरसि मनसि च । हृदयं मनउरसोरिति विश्वः । ताडिता विद्धा गन्धवत् दुर्गन्धि तद्रुधिरम् असृक् तदेव चन्दनं तेनोक्षिता सिक्ता अपरत्र गन्धवती सुगन्धिनी ये रुधिरचन्दने कुङ्कुमचन्दने ताभ्या-मुक्षिता । रुधिरं कुङ्कुमासृजोरित्युभयत्रापि विश्वः । जीवितेशस्या-न्तकस्य प्राणेश्वरस्य च वसतिं जगाम ॥ २० ॥

नैर्ऋतेति । अथानन्तरं ताडकान्तको रामः अवदानं पराक्रमः । पराक्रमोऽवदानं स्यादिति भागुरिः । तेन तोषितात् मुनेः नैर्ऋतान् राक्षसान् हन्तीति नैर्ऋतघ्नम् । अमनुष्यकर्तृके चेति टक् । मन्त्र-वन्मन्त्रयुक्तम् अस्त्रं सूर्यकान्तो मणिविशेषः भास्करात् इन्धनानि निपा-तयतीति इन्धननिपाति काष्ठदाहकं ज्योतिरिव प्रापत् प्राप्तवान् ॥ २१ ॥

वामनेति । ततः परं राघवः ऋषेः कौशिकात् श्रुतं पावनं

उन्मनाः प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि बभूव राघवः ॥२२॥
आससाद मुनिरात्मनस्ततः
शिष्यवर्गपरिकल्पितार्हणम्।
बद्धपल्लवपुटाञ्जलिद्रुमं
दर्शनोन्मुखमृगं तपोवनम् ॥२३॥
तत्र दीक्षितमृषिं ररक्षतु-
र्विघ्नतो दशरथात्मजौ शरैः।
लोकमन्धतमसात् क्रमोदितौ
रश्मिभिः शशिदिवाकराविव ॥२४॥

शोधनं वामनस्य स्वपूर्वावतारविशेषस्य आश्रमपदमुपेयिवान् उपगतः सन्। उपेयिवाननाश्वाननूचानश्चेति निपातः। प्रथमजन्मचेष्टितानि रामवामनयोरैक्यात् स्मृतियोग्यान्यपि रामस्याज्ञानावतारत्वेन संस्कारदौर्बल्यादस्मरन्नपि उन्मना उत्सुको बभूव ॥ २२ ॥

आससादेति। ततोमुनिः शिष्यवर्गेण परिकल्पिता सज्जिता अर्हणा पूजासामग्री यस्मिन् तत्तथोक्तं बद्धाः पल्लवपुटा एव अञ्जलयो-यैस्ते तथाभूताः द्रुमा यस्मिन् तत्तथोक्तं दर्शनेन मुनिदर्शनेन उन्मुखाः मृगाः यस्मिंस्तत् आत्मनस्तपोवनम् आससाद। एतेन विशेषणत्रयेणातिथिसत्कारताच्छील्यविनयशान्तयः सूचिता ॥ २३ ॥

तत्रेति। तत्र तपोवने दशरथात्मजौ दीक्षितं दीक्षासंस्कृतम् ऋषिं शरैः विघ्नतोविघ्नेभ्यः, क्रमेण पर्यायेण रात्रिदिवसयोः उदितौ शशिदिवाकरौ रश्मिभिः अन्धतमसाद्गाढध्वान्तात्। ध्वान्ते गाढेऽन्ध-

वीक्ष्य वेदिमथ रक्तबिन्दुभि
र्बन्धुजीवपृथुभिः प्रदूषिताम् ।
सम्भ्रमोऽभवदपोढकर्म्मणा
मृत्विजां च्युतविकङ्कतस्रुचाम् ॥२५॥
उन्मुखः सपदि लक्ष्मणाग्रजो
बाणमाश्रयमुखात् समुद्धरन् ।
रक्षसां बलमपश्यदम्बरे
गृध्रपक्षपवनेरितध्वजम् ॥२६॥

तमसमित्यमरः । अवसमन्धेभ्यस्तमस इति समासान्तोऽच् प्रत्ययः । लोकमिव ररक्षतुः रक्षणप्रवृत्तावभूतामित्यर्थः ॥ २४ ॥

वीक्ष्येति । अथ बन्धुजीवपृथुभिः बन्धुजीवकुसुमस्थूलैः । रक्तकस्तु बन्धूको बन्धुजीवकः इत्यमरः । रक्तबिन्दुभिः प्रदूषिताम् उपहतां वेदिं वीक्ष्य अपोढकर्म्मणा त्यक्तव्यापाराणां च्युताः विकङ्कतस्रुचो येभ्यस्तेषाम् ऋत्विजां याजकानां सम्भ्रमोऽभवत् । विकङ्कतग्रहणं खदिराद्युपलक्षणं स्रुगादीनां खदिरादिप्रकृतिकत्वात् स्रुगादीपात्रस्यैव विकङ्कतप्रकृतिकत्वात् । विकङ्कतः स्रुवावृक्ष इत्यमरः । यद्वा स्रुक्शब्दस्य विकङ्कतप्रकृतिकत्वमस्तु उभयथापि ग्राम्यकल्पयात् । यथाह भगवानापस्तम्बः । खादिरस्रुवः पर्णमयीर्जुहूवा वैकङ्कतीः स्रुचो वेति ॥ २५ ॥

उन्मुख इति । सपदि लक्ष्मणाग्रजो रामो बाणम् आश्रयमुखात् तूणीरमुखात् समुद्धरन् उन्मुखः ऊर्ध्वमुखः । अम्बरे गृध्रपक्षपवनेरिताः कम्पिता ध्वजा यस्य तत्तथोक्तम् । रक्षसां दुर्निरूपणत्व-

तत्र यावधिपती मखद्विषां
तौ शरव्यमकरोत् स नेतरान्।
किं महोरगविसर्पिविक्रमो
राजिलेषु गरुड़ः प्रवर्त्तते॥२७॥
सोऽस्त्रमुग्रजवमस्त्रकोविदः
सन्दधे धनुषि वायुदैवतम्।
तेन शैलगुरुमप्यपातयत्
पाण्डुपत्रमिव ताड़कासुतम्॥२८॥
यः सुबाहुरिति राक्षसोऽपर
स्तत्र तत्र विससर्प मायया।

मेतत्। तदुक्तं यज्ञार्णवे। आसन्नमस्तो निकटे वसन्ति मध्यादयो मूर्ध्नि मस्तोर्ध्वभागे इति। रक्षसां बलमपश्यत्॥ २६॥

तत्रेति। स रामः तत्र रक्षसां बले यौ मखद्विषामधिपती तौ सुबाहुमारीचौ शरव्यं लक्ष्यमकरोत्। वेध्यं लक्ष्यं शरव्यं चेति हलायुधः। इतरान्नाकरोत्। तथाहि महोरगविसर्पिविक्रमो गरुड़ो गरुत्मान् राजिलेषु जलव्यालेषु प्रवर्त्तते किं, न प्रवर्त्तते इत्यर्थः। अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ इत्यमरः॥ २७॥

सइति। अस्त्रकोविदोऽस्त्रज्ञः स रामः उग्रजवम् उत्कटजवं वायुदैवतं वायुर्दैवतं यस्य तद्वायव्यमस्त्रं धनुषि सन्दधे-सन्धितवान्। कर्त्तरि लिट्। तेनास्त्रेण शैलवद्गुरुमपि ताड़कासुतं मारीचं पाण्डुपत्रमिव परिणतपर्णमिवेत्यर्थः अपातयत् पातितवान्॥ २८॥

यइति। सुबाहुरिति योऽपरो राक्षसः तत्र तत्र मायया सम्बर

तं क्षुरप्रशकलीकृतं कृती
पत्रिणां व्यभजदाश्रमाद्बहिः ॥२९॥

इत्यपास्तमखविघ्नयोस्तयोः
सांयुगीनमभिनन्द्य विक्रमम्।
ऋत्विजः कुलपतेर्यथाक्रमं
वाग्यतस्य निरवर्त्तयन् क्रियाः ॥३०॥

तौ प्रणामचलकाकपक्षकौ
भ्रातराववभृथाप्लुतो मुनिः।
आशिषामनुपदं समस्पृशत्
दर्भपाटिततलेन पाणिना ॥३१॥

द्विधा [illegible] क्षुरप्रैः शकलीकृतं खण्डीकृतं [illegible] कृती कुशलो राम । कृती च कुशल [illegible] । [illegible] पत्रिणां पक्षिणाम् । पत्रिणौ शरपक्षिणौ इत्यमरः । व्यभजत् [illegible] ॥ २९ ॥

इत्येति । इति अपास्तमखविघ्नयोस्तयोः [illegible] सांयुगीनं [illegible] । [illegible] विक्रमम् [illegible] । [illegible] ऋत्विजः कुलपतेः [illegible] वाग्यतस्य [illegible] क्रियाः [illegible] निरवर्त्तयन् निष्पादितवन्तः ॥ ३० ॥

तौ इति । [illegible] मुनिः [illegible] । [illegible] भ्रातरौ [illegible] अनुपदम् [illegible] दर्भपाटिततलेन [illegible]

तं न्यमन्त्रयत सम्भृतक्रतु
मैथिलः स मिथिलां व्रजन् वशी।
राघवावपि निनाय बिभ्रतौ
तद्धनुःश्रवणजं कुतूहलम् ॥३२॥
तैः शिवेषु वसतिर्गताध्वभिः
सायमाश्रमतरुष्वगृह्यत।
येषु दीर्घतपसः परिग्रहो
वासवक्षणकलत्रतां ययौ ॥३३॥
प्रत्यपद्यत चिराय यत् पुन
श्चारु गौतमवधूः शिलामयी।

भक्तिविशेषेत्यर्थः पाणिना समस्पृशत् संस्पृष्टवान् सन्तोषादिति भावः ॥ ३१ ॥

तमिति। सम्भृतक्रतुः सङ्कल्पितसम्भारः मिथिलायां भवो मैथिलो जनकः तं विश्वामित्रं न्यमन्त्रयत आहूतवान्, वशी स मुनिः मिथिला जनकनगरीं व्रजन् तस्य जनकस्य यद्धनुः तच्छ्रवणजं कुतूहलं बिभ्रतौ राघवावपि निनाय नीतवान् ॥ ३२ ॥

तैरिति। गताध्वभिस्तैस्त्रिभिः सायं शिवेषु रम्येषु आश्रमतरुषु वसतिः स्थानमगृह्यत, येष्वाश्रमतरुषु दीर्घतपसो गौतमस्य परिग्रहः पत्नी। पत्नीपरिजनादानमूलशापाः परिग्रहा इत्यमरः। अहल्येति यावत्। वासवस्येन्द्रस्य क्षणकलत्रतां ययौ ॥ ३३ ॥

प्रत्यपद्यतेति। शिलामयी भर्तृशापात् शिलात्वं प्राप्ता गौतमवधूरहल्या चारु स्वं वपुश्चिराय पुनः प्रत्यपद्यत प्राप्तवती यत्, स किलि-

स्वं वपुः स किल किल्बिषच्छिदां
रामपादरजसामनुग्रहः ॥३४॥
राघवान्वितमुपस्थितं मुनिं
तं निशम्य जनको जनेश्वरः।
अर्थकामसहितं सपर्य्यया
देहबद्धमिव धर्म्ममभ्यगात् ॥३५॥
तौ विदेहनगरीनिवासिनां
गां गताविव दिवः पुनर्वसू।
मन्यते स्म पिबतां विलोचनैः
पक्ष्मपातमपि वञ्चनां मनः ॥३६॥

षच्छिदां पापहारिणाम्। पापं किल्बिषकल्मषमित्यमरः। रामपादरजसाम् अनुग्रहः प्रसादः किल श्रूयते ॥ ३४ ॥

राघवेति। राघवाभ्यामन्वितं युक्तम् उपस्थितम् आगतं तं मुनिं जनको जनेश्वरः निशम्य, अर्थकामाभ्यां सहितं देहबद्धं बद्धदेहं मूर्त्तिमन्तमित्यर्थः। वाहिताग्न्यादित्वात् साधुः। धर्म्ममिव, सपर्य्यया अभ्यगात् प्रत्युद्गतवान् ॥ ३५ ॥

ताविति। दिवः स्वर्गात् आकाशात्। द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः। गां भुवं गतौ। स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः। पुनर्वसू इव नक्षत्रविशेषाविव स्थितौ तौ राघवौ विलोचनैः पिबतां अत्यासक्त्या पश्यतामित्यर्थः। विदेहनगरी मिथिला तन्निवासिनां मनः कर्तृ पक्ष्मपातं

यूपवत्यवसिते क्रियाविधौ
कालवित् कुशिकवंशवर्द्धनः।
राममिष्वसनदर्शनोत्सुकं
मैथिलाय कथयाम्बभूव सः॥३७॥

तस्य वीक्ष्य ललितं वपुः शिशोः
पार्थिवः प्रथितवंशजन्मनः।
स्वं विचिन्त्य च धनुर्दुरानमं
पीड़ितो दुहितृशुल्कसंस्थया॥३८॥

निमेषमपि तद्दर्शनप्रतिबन्धकत्वात् वत्मनां विड़म्बनां वन्यते स्म मेने। लट्स्मइति भूतार्थे लट्॥ ३६॥

यूपेति। यूपवति क्रियाविधौ कर्म्मानुष्ठाने क्रताविव्यर्थः अवसिते समाप्ते सति कालविदवसरज्ञः कुशिकवंशवर्द्धनः स मुनिः रामम्, अस्यतेऽनेनेति असनम् इषूणामसनम् इष्वसनं चापं तस्य दर्शने उत्सुकम्, मैथिलाय जनकाय कथयाम्बभूव कथितवान्॥ ३७॥

तस्येति। पार्थिवोजनकः प्रथितवंशे जन्म यस्य तथोक्तस्य, एतेन वरसम्पत्तिरुक्ता। शिशोस्तस्य रामस्य ललितं कोमलं वपुः वीक्ष्य. स्वं स्वकीयं दुरानममानमयितुमशक्यम्। नमेर्खल्प्रत्ययात् खल्। धनुः विचिन्त्य च, दुहितृशुल्कं कन्यामूल्यं जामातृदेयं, शुल्कं घट्टादिदेये स्यात् जामातुर्वस्त्रकेऽपि चेति विश्वः। तस्य धनुर्भङ्गरूपस्य संस्थया स्थित्या। संस्था स्थितौ इति विश्वः। पीड़ितो बाधित. शिशुना रामेण दुष्करमिति दुःखितइति भावः॥ ३८॥

अब्रवीदिति। अब्रवीच्च मुनिमिति शेषः। किमिति, हे भगवन् मुने दृष्टद्भिः मतङ्गजैर्महागजैरपि दुष्करं यत् कर्म तत्र कर्म्मणि कल-

अब्रवीच्च भगवन् मतङ्गजै
र्यद्बृहद्भिरपि कर्म्म दुष्करम् ।
तत्र नाहमनुमन्तुमुत्सहे
मोघवृत्ति कलभस्य चेष्टितम् ॥३९॥

ह्रेपिता हि बहवो नरेश्वरा
स्तेन तात धनुषा धनुर्भृतः ।
ज्यानिघातकठिनत्वचो भुजान्
स्वान् विधूय धिगिति प्रतस्थिरे ॥४०॥

प्रत्युवाच तमृषिर्निशम्यतां
सारतोऽयमथवा गिरा कृतम् ।
चाप एव भवतो भविष्यति
व्यक्तशक्तिरशनिर्गिराविव ॥४१॥

भस्य बालगजस्य । कलभः करिशावकस्मृत । मोघवृत्ति व्यर्थ व्यापारं चेष्टितं नाहमनुमन्तुमहं नोत्सहे ॥ ३९ ॥

ह्रेपिता इति । हे तात तेन धनुषा बहवो धनुर्भृतो नरेश्वरा ह्रेपिताः त्रपां प्रापिताः हि । [illegible] कठिनत्वचो [illegible] भुजान् । ते नरेश्वरा [illegible] स्वान् भुजान् धिगिति विधूय प्रतस्थिरे निर्गताः ॥ ४० ॥

प्रत्युवाचेति । ऋषिस्तं प्रत्युवाच [illegible] किमिति, अयं रामः सारतो बलेन [illegible] अथवा गिरा [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible]

एवमाप्तवचनात् स पौरुषं
काकपक्षकधरेऽपि राघवे।
श्रद्दधे त्रिदशगोपमात्रके
दाहशक्तिमिव कृष्णवर्त्मनि ॥४२॥
व्यादिदेश गणशोऽथ पार्श्वगान्
कार्मुकाभिहरणाय मैथिलः।
तैजसस्य धनुषः प्रवृत्तये
तोयदानिव सहस्रलोचनः ॥४३॥

क्रियां प्रति करणत्वात्। किन्तु अशनिर्वज्रो गिराविव चापे धनुष्येव भवतस्तव व्यक्तशक्तिः दृष्टसारो भविष्यति ॥ ४१ ॥

एवमिति। एवम् आप्तस्य मुनेर्वचनात् स जनकः काकपक्षकधरे बालेऽपि राघवे पुरुषस्य कर्म्म पौरुषं पराक्रमम्। हायनान्त युवादिभ्योऽणिति युवादित्वादण्। पौरुषं पुरुषस्योक्तं भावे कर्म्मणि तेजसीति विश्वः। त्रिदशगोप इन्द्रगोपकीटः प्रमाणमस्य त्रिदशगोपमात्रः। प्रमाणे द्वयसजित्यादिना मात्रच्प्रत्ययः ततः स्वार्थे कः। तस्मिन् कृष्णवर्त्मनि वह्नौ दाहशक्तिमिव श्रद्दधे विश्वस्तवान् ॥ ४२ ॥

व्यादिदेशेति। अथ मैथिलः पार्श्वगान् पुरुषान् कार्मुकाभिहरणाय कार्मुकमानेतुम्। तुमर्थाच्चेति चतुर्थी। सहस्रलोचनः इन्द्रः तैजसस्य तेजोमयस्य धनुषः प्रवृत्तये आविर्भावाय तोयदान् मेघानिव गणान् गणान् गणशः। सङ्ख्यैकवचनाच्च वीप्सायामिति शस् प्रत्ययः। व्यादिदेश प्रजिघाय ॥ ४३ ॥

तदिति। दाशरथी रामः प्रसुप्तभुजगेन्द्र इव भीषणं भयङ्करं तद्धनुर्वीक्ष्य आददे जग्राह। वृषोध्वजः चिह्नं यस्य स शिवो येन धनुषा,

तत प्रसुप्तभुजगेन्द्रभीषणं
वीक्ष्य दाशरथिराददे धनुः ।
विद्रुतक्रतुमृगानुसारिणं
येन वाणमसृजत् वृषध्वजः ॥४४॥

आततज्यमकरोत् स संसदा
विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः
पुष्पचापमिव पेशलं स्मरः ॥४५॥

भज्यमानमतिमात्रकर्षणात्
तेन वज्रपरुषस्वनं धनुः ।
भार्गवाय दृढमन्यवे पुनः
क्षत्रमुद्यतमिव न्यवेदयत् ॥४६॥

क्रतुरेव मृगः विद्रुतं पलायितं क्रतुमृगमनुसरति । ताच्छील्ये णिनिः । तं विद्रुतक्रतुमृगानुसारिणं वाणमसृजत् मुमोच ॥ ४४ ॥

आततेति । स रामः संसदा सभया विस्मयेन स्तिमितं नेत्रं यस्मिन् कर्मणि तत् यथा तथा ईक्षितः सन् शैलस्येव सारो यस्य तत् शैलसारमपि धनुः स्मरः पेशलं कोमलं पुष्पचापमिव नातियत्नतः नातियत्नात् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । आततज्यमधिज्यमकरोत् ॥ ४५ ॥

भज्यमानमिति । तेन रामेण अतिमात्रकर्षणात् भज्यमानम् अत एव वज्रवत्परुषः स्वनो यस्य तत् धनुः कर्तृ दृढ-

दृष्टसारमथ रुद्रकार्मुके
वीर्य्यशुल्कमभिनन्द्य मैथिलः।
राघवाय तनयामयोनिजां
रूपिणीं श्रियमिव न्यवेदयत् ॥४७॥

* मैथिलः सपदि सत्यसङ्गरो
राघवाय तनयामयोनिजाम्।
सन्निधौ द्युतिमतस्तपोनिधे
रग्निसाक्षिकइवातिसृष्टवान् ॥४८॥

मन्यवे दृढ़क्रोधाय। मन्युः क्रोधे क्रतौ दैन्ये इति विश्वः। भार्गवाय क्षत्रं क्षत्त्रकुलं पुनरुद्यतं न्यवेदयदिव ज्ञापयामासेव ॥ ४६ ॥

दृष्टेति। अथ मैथिलो जनकः रुद्रकार्मुके दृष्टः सारः स्थिरांशो यस्य तद्दृष्टसारम्। सारो बले स्थिरांशे चेति विश्वः। वीर्य्यमेव शुल्कं धनुर्भङ्गरूपमित्यर्थः। अभिनन्द्य राघवाय रामाय अयोनिजां देवयजनसम्भवा तनया सीतां रूपिणीं श्रियमिव साक्षाल्लक्ष्मीमिव न्यवेदयत् अर्पितवान् वाचेति शेषः ॥ ४७ ॥

उक्तमेवार्थं सोपस्कारमाह

मैथिलइति। सत्यसङ्गरः सत्यप्रतिज्ञः। अथ प्रतिज्ञातनिर्वाहात् सम्पदापत्सु सङ्गरदूत्यमरः। मैथिलो राघवाय अयोनिजां तनयां द्युतिमतस्तेजस्विनः तपोनिधेः कौशिकस्य सन्निधौ अग्निः साक्षी यस्य सः अग्निसाक्षिकः। शेषाद्विभाषेति कप्प्रत्ययः। सइव सपदि अति सृष्टवान् दत्तवान् ॥ ४८ ॥

प्राहिणोदिति। महाद्युतिर्जनकः महितं पूजितं पुरोधसं कोसलाधिपतये दशरथाय प्राहिणोत् प्रहितवान्। किमिति, निमिर्नाम

प्राहिणोच्च महितं महाद्युतिः
कोसलाधिपतये पुरोधसम्।
भृत्यभावि दुहितुः परिग्रहा
द्दिश्यतां कुलमिदं निमेरिति ॥४९॥
अन्वियेष सदृशीं स च स्नुषां
प्राप चैनमनुकूलवाक् द्विजः।
सद्य एव सुकृतां हि पच्यते
कल्पवृक्षफलधर्मि काङ्क्षितम् ॥५०॥
तस्य कल्पितपुरस्क्रियाविधेः
शुश्रुवान् वचनमग्रजन्मनः।

[illegible] वशिष्ठ । इदं निमेः कुलं दुहितुः सीतायाः परि-
ग्रहात् स्वीकारेण हेतोः भृत्यस्य भावो भृत्यत्वं सोऽस्यास्तीति
भृत्यभावि दिश्यतामनुमन्यतामिति ॥ ४९ ॥

अन्वियेषेति । स दशरथश्च सदृशीमनुरूपां स्नुषामन्वियेष राम-
[illegible] अनुकूलवाक् [illegible]
[illegible] पुरोधा [illegible] प्राप । [illegible]
[illegible] सोऽस्यास्तीति कल्पवृक्षफलधर्मि अतः सुकृतां
[illegible] पच्यते हि । [illegible]
[illegible]
[illegible] ॥ ५० ॥

[illegible]
[illegible]

उच्चचाल बलभित्सखो वशी
सैन्यरेणुमुषितार्कदीधितिः ॥५१॥
आससाद मिथिलां स वेष्टयन्
पीड़ितोपवनपादपां बलैः।
प्रीतिरोधमसहिष्ट सा पुरी
स्त्रीव कान्तपरिभोगमायतम् ॥५२॥
तौ समेत्य समये स्थितावुभौ
भूपती वरुणवासवोपमौ।
कन्यकातनयकौतुकक्रियां
स्वप्रभावसदृशीं वितेनतुः ॥५३॥

जन्मनो द्विजस्य वचनं जनकेन सन्दिष्टं शुश्रुवान् श्रुतवान्। श्रृणोतेः क्वसुः। सैन्यरेणुमुषितार्कदीधितिः सन् उच्चचाल प्रतस्थे ॥ ५१ ॥

आससादेति। स दशरथो वशैः सैन्यैः पीड़ितोपवनपादपां मिथिलां वेष्टयन् परिधीकुर्वन् आससाद। सा पुरी स्त्री युवतिः आयतम् अतिप्रसक्तं कान्तपरिभोगं प्रियसम्भोगमिव प्रीत्या रोधं प्रीतिरोधम् असहिष्ट सोढ़वती। द्वेषरोधन्तु न सहत इति भावः ॥ ५२ ॥

ताविति। समये स्थितौ आचारनिष्ठौ। समयाः शपथाचार कालसिद्धान्तसंविद इत्यमरः। वरुणवासवौ उपमा उपमानं ययोस्तौ तथोक्तौ तावुभौ भूपती जनकदशरथौ समेत्य स्वप्रभावसदृशीम् आत्ममहिमानुरूपां कन्यकानां सीतादीनां तनयानां रामादीनाञ्च कौतुकक्रियां विवाहोत्सवं वितेनतुर्विस्तृतवन्तौ। तनोतेर्लिट् ॥ ५३ ॥

पार्थिवीमिति। उद्वहतीत्युद्वहः। पचाद्यच्। रघूणामुद्वहौ

पार्थिवीमुदवहद्रघूद्वहो
लक्ष्मणस्तदनुजामथोर्मिलाम् ।
यौ तयोरवरजौ वरौजसौ
तौ कुशध्वजसुते सुमध्यमे ॥५४॥
ते चतुर्थसहितास्त्रयो बभुः
सूनवो नववधूपरिग्रहात् ।
सामदानविधिभेदनिग्रहाः
सिद्धिमन्तइव तस्य भूपतेः ॥५५॥

रघूद्वहो रामः पृथिव्या अपत्यं स्त्री पार्थिवी । तस्यापत्यमित्यण् टिड्ढाणञिति ङीप् । तां सीतामुदवहत् परिणीतवान् । अथ लक्ष्मणस्तस्याः सीताया अनुजां जनकस्यौरसीम् ऊर्मिलाम् उदवहत् । यौ वरौजसौ तयोः रामलक्ष्मणयोरवरजौ अनुजातौ भरतशत्रुघ्नौ तौ सुमध्यमे कुशध्वजस्य जनकानुजस्य सुते कन्यके माण्डवी श्रुतकीर्ति उदवहताम् । नात्र [illegible] । तदुक्तं [illegible] च । [illegible] परिसंख्या[illegible]मिति ॥ ५४ ॥

तइति । ते चतुर्थसहिता[illegible] । [illegible] सूनवो [illegible] सिद्धिमन्तः [illegible] तस्य भूपतेः [illegible] सामदानविधिभेदनिग्रहाः [illegible] बभुः । [illegible] ॥ ५५ ॥

[illegible]

ता नराधिपसुता नृपात्मजै-
स्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः॥५६॥

एवमात्तरतिरात्मसम्भवां-
स्तान्निवेश्य चतुरोऽपि तत्र सः।
अध्वसु त्रिषु विसृष्टमैथिलः
स्वां पुरीं दशरथोन्यवर्त्तत॥५७॥

तस्य जातु मरुतः प्रतीपगाः
वर्त्मसु ध्वजतरुप्रमाथिनः।
चिक्लिशुर्भृशतया वरूथिनी-
मुत्तटा इव नदीरयाः स्थलीम्॥५८॥

पुत्रैः कृतार्थतां कुलशीलवयोरूपादिसाफल्यमगमन् ते च ताभिस्तथा। किञ्च स वराणां वधूनाञ्च समागमः प्रत्ययानां प्रकृतीनाञ्च योगइव सन्निभातीति सन्निभोऽभवत्। पचाद्यच्। प्रत्ययाः सनादयो येभ्यो विधीयन्ते ताः प्रकृतयः। यथा प्रकृतिप्रत्यययोः सहैकार्थसाधनत्वं तद्वदत्रापीति भावः॥५६॥

एवमिति। एवमात्तरतिरनुरागवान् स दशरथः तांश्चतुरोऽप्यात्मसम्भवान् पुत्रान् तत्र मिथिलायां निवेश्य विवाह्य। निवेशः शिविरोद्वाहविन्यासेषु प्रकीर्त्तितइति विश्वः। त्रिष्वध्वसु प्रयाणेषु गतेषु विसृष्टमैथिलः स्वां पुरीं न्यवर्त्तत। उद्देश्यक्रियापेक्षया कर्मत्वं पुर्याः॥५७॥

लक्ष्यते स्म तदनन्तरं रवि
र्बद्धभीमपरिवेशमण्डलः ।
वैनतेयशमितस्य भोगिनो
भोगवेष्टितइव च्युतो मणिः ॥५९॥
*श्येनपक्षपरिधूसरालकाः
सान्ध्यमेघरुधिरार्द्रवाससः ।
अङ्गना इव रजस्वला दिशो
नो बभूवुरवलोकनक्षमाः ॥६०॥

तस्येति । जातु कदाचित् वर्त्मसु ध्वजाएव तरवस्तान् प्रसह्य घ्नन्ति ये ते ध्वजतरुप्रमाथिनः प्रतीपगाः प्रतिकूलगामिनो मरुत उत्तटा नदीरयाः स्थलीम अकृत्रिमभूमिमिव । जानपदेत्यादिना ङीप् । तस्य वरूथिनी सेना भृशतया भृशं चिक्लिशुः क्लिश्यन्ति स्म ॥ ५८ ॥

लक्ष्यतइति । तदनन्तरं प्रतीपपवनानन्तरं बद्धं भीमं परिवेशस्य परिवेशमण्डलं यस्य सः । परिवेशस्तु परिधिरुपसूर्यकमण्डले इत्यमरः । रविः वैनतेयशमितस्य गरुडहतस्य भोगिनः सर्पस्य भोगेन कायेन । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । वेष्टितस्ततः शिरोभ्रष्टो मणिरिव लक्ष्यते स्म ॥ ५९ ॥

श्येनेति । श्येनपक्षा एव परिधूसराः अलका यासां ताः सान्ध्यमेघाएव रुधिरार्द्राणि वासांसि यासां तास्तथोक्ताः रजोधूलिरासाम् अस्तीति रजस्वलाः । रजः कृष्यासुतिपरिषदो वलजिति वलच् प्रत्ययः । दिशो रजस्वलाः ऋतुमत्योऽङ्गनाइव । स्याद्रजः पुष्प मार्त्तवमित्यमरः । अवलोकनक्षमाः दर्शनार्हा नो बभूवुः । एक-

भास्करश्च दिशमध्युवास यां
तां श्रिताः प्रतिभयं ववाशिरे।
क्षत्रशोणितपितृक्रियोचितं
चोदयन्त्यइव भार्गवं शिवाः ॥६१॥
तत् प्रतीपपवनादि वैकृतं
प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित्।
अन्वयुङ्क्त गुरुमीश्वरः क्षितेः
स्वन्तमित्यलघयत् स तद्व्यथाम् ॥६२॥

त्वादृष्टदोषादपरत्र शास्त्रदोषादिति विज्ञेयम्। अत्र रजोदृष्टिरुत्पात उक्तः ॥ ६० ॥

भास्करइति। भास्करो यां दिशमध्युवास च यस्यां दिश्युषित। उपान्वध्याङ्वसइति कर्मत्वम्। तां दिशं श्रिता शिवाः गोमायवः। स्त्रियां शिवा भूरिमायगोमायुमृगधूर्त्तकाइत्यमरः। क्षत्रशोणितेन या पितृक्रिया पितृतर्पणं तत्रोचितं परिचितं भार्गवं चोदयन्त्यइव प्रतिभयं भयङ्करं ववाशिरे रुरुवुः। वाशृशब्दइतिधातोर्लिट्। 'तिरश्चा वाशितं रुतमित्यमरः ॥ ६१ ॥

तदिति। तत् प्रतीपपवनादि वैकृतं दुर्निमित्तं प्रेक्ष्य कृत्यवित् कार्य्यज्ञः क्षितेरीश्वरः शान्तिमनर्थनिवृत्तिमधिकृत्य उद्दिश्य गुरुं वशिष्ठमन्वयुङ्क्त अपृच्छत्। प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। स गुरुः स्वन्तं शुभोदर्कं भावीति तस्य राज्ञो व्यथामलघयत् लघूकृतवान् ॥ ६२ ॥

तेजसइति। सपदि उत्थितः तेजसोराशिः वाहिनीमुखे सेनाग्रे

तेजसः सपदि राशिरुत्थितः
प्रादुरास किल वाहिनीमुखे ।
यः प्रमृज्य नयनानि सैनिकै-
र्लक्षणीयपुरुषाकृतिश्चिरात् ॥६३॥

पित्र्यमंशमुपवीतलक्षणं
मातृकञ्च धनुरूर्जितं दधत् ।
यः ससोमइव घर्मदीधिति
सद्विजिह्वइव चन्दनद्रुमः ॥६४॥

येन रोषपरुषात्मनः पितुः
शासने स्थितिभिदोऽपि तस्थुषा ।
वेपमानजननीशिरश्छिदा
प्रागजीयत घृणा ततो मही ॥६५॥

प्रादुरास किल. यः सैनिकै र्नयनानि प्रमृज्य चिराल्लक्षणीया भावनीया पुरुषाकृतिर्यस्य स तथोक्तः अभूदिति शेषः ॥ ६३ ॥

पित्र्यमिति। उपवीतं लक्षणं चिह्नं यस्य तं पितुरयं पित्र्यः। वाय्वृतुपित्रुषसोयदिति यत्प्रत्ययः। तमंशम्, धनुषा ऊर्जितं धनुरूर्जितं मातुरयं मातृकः। ऋतष्ठञिति ठक् प्रत्ययः। तमंशञ्च दधत् यो भार्गवः ससोमश्चन्द्रयुक्तोघर्मदीधितिः सूर्यइव, सद्विजिह्वः ससर्पः चन्दनद्रुमइव स्थितः ॥ ६४ ॥

येनेति। रोषपरुष आत्मा बुद्धिर्यस्य सः। आत्मा यत्नोधृति र्बुद्धिरित्यमरः। तस्य रोषपरुषात्मनः स्थितिभिदो मर्यादालङ्घि-

अक्षबीजवलयेन निर्बभौ
दक्षिणश्रवणसंस्थितेन यः ।
क्षत्रियान्तकरणैकविंशते
र्व्याजपूर्वगणनामिवोद्वहन् ॥ ६६ ॥
तं पितुर्वधभवेन मन्युना
राजवंशनिधनाय दीक्षितम् ।
बालसूनुरवलोक्य भार्गवं
स्वां दशाञ्च विषसाद पार्थिवः ॥ ६७ ॥

नोपि पितुः शासने तस्थुषा स्थितेन वेपमानजननीशिरश्छिदा येन प्राक् घृणा अजीयत ततोऽनन्तरं मही अजीयत । मातृहन्तुः क्षत्त्रवधात् कुतो जुगुप्सेति भावः ॥ ६५ ॥

अक्षेति । यो भार्गवः दक्षिणश्रवणे संस्थितेनाक्षबीजवलयेन अक्षमालया क्षत्रियान्तकरणानां क्षत्रियवधानां एकविंशतेरेकविंशति संख्यायाः व्याजोऽक्षमालारूपः पूर्वो यस्यास्तां गणनामुद्वहन्निव निर्बभौ ॥ ६६ ॥

तमिति । पितुर्जमदग्नेर्वधभवेन क्षत्रियकर्तृकवधोद्भवेन मन्युना कोपेन राजवंशानां निधनाय नाशार्थम् । निधनं स्यात् कुले नाशे इति विश्वः । दीक्षितं प्रवृत्तमित्यर्थः तं भार्गवं स्वां दशां चावलोक्य बालाः सूनवो यस्य स पार्थिवो विषसाद । स्वस्यातिदौर्बल्यात् शत्रोश्चाति-क्रोधात् कार्य्यनाशोऽभवदित्यर्थः ॥ ६७ ॥

नादेति । आत्मजे पुत्रे दारुणे घोरेऽहिते मन्तौ च तुल्यनविशेषेण

नाम राम इति तुल्यमात्मजे
वर्त्तमानमहिते च दारुणे।
हृद्यमस्य भयदायि चाभव-
द्रत्नजातमिव हारसर्पयोः ॥६८॥
अर्घ्यमर्घ्यमिति वादिनं नृपं
सोऽनवेक्ष्य भरताग्रजो यतः।
क्षत्रकोपदहनार्च्चिषं ततः
सन्दधे दृशमुदग्रतारकाम् ॥६९॥
तेन कार्म्मुकनिषक्तमुष्टिना
राघवो विगतभीः पुरोगतः।
अङ्गुलीविवरचारिणं शरं
कुर्व्वता निजगदे युयुत्सुना ॥७०॥

वर्त्तमानं रामइति नाम हारसर्पयोर्वर्त्तमानं रत्नजातमिवास्य दशरथस्य हृद्यं हृदयङ्गमं भयदायि भयङ्करं चाभवत् ॥ ६८ ॥

अर्घ्यमिति। स भार्गवोऽर्घ्यम् अर्घ्यमिति वादिनं नृपमनवेक्ष्य यतो यत्र भरताग्रजः ततस्तत्र। इतराभ्योपि दृश्यन्ते इति सार्व्वविभक्तिकस्तसिः। क्षत्रे क्षत्रकुले विषये यः कोपदहनो रोषाग्निस्तस्यार्च्चिषं ज्वालामिव स्थिताम्। ज्वालाभासोर्नपुंस्यर्च्चिरित्यमरः। उदग्रा तारका कनीनिका यस्यास्ताम्। तारकाक्ष्णः कनीनिकेत्यमरः। दृशं सन्दधे ॥ ६९ ॥

तेनेति। कार्म्मुकनिषक्तमुष्टिना शरमङ्गुलीविवरचारिणं कुर्व्वता

क्षत्रजातमपकारवैरि मे
तन्निहत्य बहुशः शमं गतः ।
सुप्तसर्प इव दण्डघट्टना-
द्रोषितोऽस्मि तव विक्रमश्रवात् ॥७१॥
मैथिलस्य धनुरन्यपार्थिवै
स्त्वं किलानमितपूर्व्वमक्षणोः ।
तन्निशम्य भवता समर्थये
वीर्य्यशृङ्गमिव भग्नमात्मनः ॥७२॥
अन्यदा जगति राम इत्ययं
शब्द उच्चरित एव मामगात् ।

योद्धुमिच्छता युयुत्सुना तेन भार्गवेण विगतभीः निर्भीकः पुरोऽवस्थितो ऽपगतः राघवो निजगदे उक्तः । कर्मणि लिट् ॥ ७० ॥

क्षत्त्रेति । क्षत्त्रजातं क्षत्त्रजाति मे अपकारेण पितृवधरूपेण वैरि द्वेषि तत् क्षत्त्रजातं बहुशः एकविंशतिवारान् निहत्य शमं गतो-ऽस्मि तथापि सुप्तसर्पः दण्डघट्टनादिव तव विक्रमस्य श्रवादाकर्णनात् रोषितो रोषं प्रापितोऽस्मि ॥ ७१ ॥

मैथिलस्येति । अन्यैः पार्थिवैः अनमितपूर्वं पूर्वमनमितम् । सुप्सुपेति समासः । अस्य मैथिलस्य धनुस्त्वमक्षणोः क्षतवान् किलेति वार्त्तायाम् । वार्त्तासम्भाव्ययोः किलेत्यमरः । तद्धनुर्भङ्गं निशम्या-कर्ण्य भवता आत्मनो मम वीर्य्यमेव शृङ्गं भग्नमिव समर्थये मन्ये ॥ ७२ ॥

अन्यदेति । अन्यदा अन्यस्मिन् काले जगति राम इत्ययं शब्दः

व्रीडमावहति मे स सम्प्रति
व्यस्तवृत्तिरुदयोन्मुखे त्वयि ॥७३॥
बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं
द्वौ रिपू मम मतौ समागसौ।
धेनुवत्सहरणाच्च हैहय
स्त्वञ्च कीर्त्तिमपहर्त्तुमुद्यतः ॥७४॥
क्षत्रियान्तकरणोऽपि विक्रम
स्तेन मामवति नाजिते त्वयि।
पावकस्य महिमा स गण्यते
कक्षवज्ज्वलति सागरेऽपि यः ॥७५॥

उद्धरितः सन् मामेवागात् सम्प्रति त्वयि उदयोन्मुखे सति व्यस्तवृत्ति विपरीतवृत्तिः अन्यगामीति यावत् स शब्दो मे व्रीडमावहति लज्जां करोति ॥ ७३ ॥

बिभ्रतइति। अचले क्रौञ्चाद्रावपि अकुण्ठितम् अस्त्रं बिभ्रतो मम द्वौ समागसौ तुल्यापराधौ रिपू मतौ, धेनोः पितृहोमधेनो र्वत्सस्य हरणाद्धेतोः हैहयः कार्त्तवीर्य्यस्य, कीर्त्तिमपहर्त्तुमुद्यतः उद्युक्तस्त्वञ्च। वत्सहरणे भारतश्लोकः। प्रमत्तस्याश्रमात्तस्य होमधेन्वास्ततोबलात्। जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमानिति ॥ ७४ ॥

क्षत्रियेति। तेन कारणेन क्रियते येनासौ करणः क्षत्रियान्तस्य करणोपि विक्रमः त्वयि अजिते मा नावति न प्रीणाति। तथाहि। पावकस्य अग्नेर्महिमा स गण्यते यः कक्षवत् कक्षेइव। तत्र तस्येवेति सप्तम्यर्थे वतिः। सागरेऽपि ज्वलति ॥ ७५ ॥

विद्धि चात्तबलमोजसा हरे
रैश्वरं धनुरभाजि यत्त्वया।
खातमूलमनिलो नदीरयैः
पातयत्यपि मृदुस्तटद्रुमम् ॥७६॥
तन्मदीयमिदमायुधं ज्यया
संगमय्य सशरं विकृष्यताम्।
तिष्ठतु प्रधनमेवमप्यहं
तुल्यबाहुतरसा जितस्त्वया ॥७७॥
कातरोऽसि यदि वोद्गतार्चिषा
तर्जितः परशुधारया मम।

विद्धीति। त्वं यदैश्वरं धनुः हरेर्विष्णोरोजसा बलेनात्तबलं हृतसारं विद्धि यद्धनुस्त्वया अभाजि भग्नम्। भञ्जेश्च चिणीति विभाषया न लोपः। तथाहि। नदीरयैः खातमूलम् अवदारितपादं तटद्रुमं मृदुरप्यनिलः पातयति। ततः शिशुरपि रौद्रं धनुरभाङ्क्षमिति मा गर्वीरिति भावः॥ ७६॥

तदिति। तत्तस्मात् मदीयमिदमायुधं शार्ङ्गं ज्यया संगमय्य संयोज्य। ल्यपि लघुपूर्वादिति णेरयादेशः। सशरं यथा तथा त्वया विकृष्यताम्। प्रधनं रणस्तिष्ठतु प्रधनं तावदास्तामित्यर्थः। प्रधनं दारणं रण इति विश्वः। एवमपि मद्धनुःकर्षणेऽपि अहं तुल्यबाहुतरसा समबाहुबलेन। तरसी बलरंहसी इत्यमरः। त्वया जितः॥ ७७॥

कातर इति। यदि वा उद्गतार्चिषा उद्गतज्वालया मम परशुधारया तर्जितः कातरोऽसि भीतोऽसि तथा ज्यानिघातेन कठिना अङ्गुलयो

ज्यानिघातकठिनाङ्गुलिर्वृथा
बध्यतामभययाचनाञ्जलिः ॥७८॥

एवमुक्तवति भीमदर्शने
भार्गवे स्मितविकम्पिताधरः।
तद्धनुर्ग्रहणमेव राघवः
प्रत्यपद्यत समर्थमुत्तरम् ॥७९॥

पूर्वजन्मधनुषा समागतः
सोऽतिमात्रलघुदर्शनोऽभवत्।
केवलोऽपि सुभगो नवाम्बुदः
किं पुनस्त्रिदशचापलाञ्छितः ॥८०॥

यस्य स तथोक्तः अभययाचनाञ्जलिः बध्यताम्। तौ युतावञ्जलिः पुमानित्यमरः ॥ ७८ ॥

एवमिति। भीमदर्शने भार्गवे एवमुक्तवति सति राघवः स्मितेन हासेन विकम्पिताधरः सन् तद्धनुर्ग्रहणमेव समर्थमुचितम् उत्तरं प्रत्यपद्यत अङ्गीचकार ॥ ७९ ॥

पूर्वेति। पूर्वं जन्मनि नारायणावतारे यद्धनुस्तेन समागतः सङ्गतः स रामोऽतिमात्रमत्यन्तं लघुदर्शनः प्रियदर्शनोऽभवत् तथाहि नवाम्बुदः केवलः रिक्तोऽपि सुभगः त्रिदशचापेनेन्द्रधनुषा लाञ्छितश्चिह्नितः किं पुनः। सुभगएवेति भावः ॥ ८० ॥

तेनेति। बलिना तेन रामेण, भूमिनिहिता एका कोटिर्यस्य तत् तत् कर्म्मणे प्रभवतीति कार्मुकं धनुश्च। कर्मण उकञित्युकञ् प्रत्ययः।

तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम्।
निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ॥८१॥

तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनात्यये
पार्व्वणौ शशिदिवाकराविव ॥८२॥

तं कृपामृदुरवेक्ष्य भार्गवं
राघवः स्खलितवीर्य्यमात्मनि।
स्वञ्च संहितममोघमाशुगं
व्याजहार हरसूनुसन्निभः ॥८३॥

अधिरोपितं भूभृतां रिपुर्भार्गवश्च धूमशेषो धूमकेतनः अग्निरिव निष्प्रभो निस्तेजस्कः आस बभूव। आसेति तिङन्तप्रतिरूपकमव्ययं दीप्त्यर्थकस्यास्तेरूपं वा॥ ८१॥

तावितिः। परस्परास्थितावन्योन्याभियुक्तौ। वर्द्धमानञ्च परिहीनञ्चेति द्वन्द्वः। वर्द्धमानपरिहीने तेजसी ययोस्तौ तावुभौ राघव भार्गवावपि दिनात्यये सायंकाले पर्व्वणि भवौ पार्व्वणौ शशिदिवाकराविव जनता जनसमूहः। ग्रामजनबन्धुभ्यस्तलिति तल् प्रत्ययः। पश्यति स्म अपश्यत्। अत्र राघवस्य शशिना भार्गवस्य भानुना औपम्यं द्रष्टव्यम्॥ ८२॥

तमिति। हरसूनुसन्निभः स्कन्दसमः कृपामृदुः राघवः आत्मनि

न प्रहर्तुमलमस्मि निर्दयं
विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्त्रिणा
हन्मि लोकमुत ते मखार्जितम् ॥ ८४ ॥
प्रत्युवाच तमृषिर्न तत्त्वत
स्त्वां न वेद्मि पुरुषं पुरातनम् ।
गां गतस्य तव धाम वैष्णवं
कोपितोह्यसि मया दिदृक्षुणा ॥ ८५ ॥
भस्मसात् कृतवतः पितृद्विषः
पात्रसाच्च वसुधां ससागराम् ।

विषये स्खलितवीर्यं कुण्ठितशक्तिं तं भार्गवं स्वं स्वकीयं संहितम् अमोघमाशुगं बाणं चावेक्ष्य व्यजहार बभाषे ॥ ८३ ॥

नेति । अभिभवत्यपि त्वयि विप्र इति हेतोः निर्दयं प्रहर्तुम् अलं शक्तो नास्मि किन्तु अनेन पत्त्रिणा शरेण ते गतिं गमनं हन्मि उत मखार्ज्जितं लोकं स्वर्गं हन्मि शंस ब्रूहि ॥ ८४ ॥

प्रतीति । ऋषिर्भार्गवस्तं रामं प्रत्युवाच किमिति तत्त्वतः स्वरूपतः त्वां पुरातनं पुरुषं न वेद्मि इति न किन्तु वेद्म्येवेत्यर्थः किन्तु गां गतस्य भुवमवतीर्णस्य तव वैष्णवं धाम तेजो दिदृक्षुणा द्रष्टुमिच्छुना मया कोपितोह्यसि ॥ ८५ ॥

भस्मसादिति । पितृद्विषः पितृवैरिणो भस्मसात् कृतवतः कोपेन भस्मीकुर्वतः । विभाषा साति कार्त्स्न्ये इति सातिप्रत्ययः । ससागरां वसुधाञ्च पात्रसात् पात्राधीनं देयं कृतवतः । देये त्राचेति

आहितो जयविपर्य्ययोऽपि मे
श्लाघ्य एव परमेष्ठिना त्वया ॥८६॥

तद्गतिं मतिमतां वरेप्सितां
पुण्यतीर्थगमनाय रक्ष मे।
पीड़यिष्यति न मां खिलीकृता
स्वर्गपद्धतिरभोगलोलुपम् ॥८७॥

प्रत्यपद्यत तथेति राघवः
प्राङ्मुखश्च विससर्ज सायकम्।
भार्गवस्य सुकृतोऽपि सोऽभवत्
स्वर्गमार्गपरिघो दुरत्ययः ॥८८॥

चकारात् सातिः। कृतकृत्यस्य मे परमेष्ठिना परमपुरुषेण त्वया आहितः कृतः जयविपर्य्ययः पराजयोऽपि श्लाघ्यः आघ्राय एव ॥ ८६ ॥

तदिति। तत्तस्मात् कारणात् हे मतिमतां वर पुण्यतीर्थगमनाय आप्तुमिच्छामीप्सितां मे गतिं रक्ष पालय किन्तु खिलीकृता दुर्गमीकृतापि स्वर्गपद्धति रभोगलोलुपं भोगनिस्पृहं मां न पीड़यिष्यंति। अतस्तामेव जहीत्यर्थः ॥ ८७ ॥

प्रत्यपद्यतेति। राघवः तथेति प्रत्यपद्यत अङ्गीकृतवान्, प्राङ्मुख इन्द्रदिङ्मुखः सायकं विससर्ज्ज च। स सायकः सुकृतोपि साधुकारिणोपि। करोतेः क्विप्। भार्गवस्य दुरत्ययो दुरतिक्रमः स्वर्गमार्गस्य परिघः प्रतिबन्धोऽभवत् ॥ ८८ ॥

राघवइति। राघवोऽपि क्षम्यतामिति वदन् तपोनिधेर्भार्गवस्य

राघवोऽपि चरणौ तपोनिधेः
क्षम्यतामिति वदन् समस्पृशत् ।
निर्जितेषु तरसा तरस्विनां
शत्रुषु प्रणतिरेव कीर्त्तये ॥८९॥

राजसत्वमवधूय मातृकं
पित्र्यमस्मि गमितः शमं यदा ।
नन्वनिन्दितफलो मम त्वया
निग्रहोऽप्ययमनुग्रहीकृतः ॥९०॥

साधयाम्यहमविघ्नमस्तु ते
देवकार्य्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं
लक्ष्मणाग्रजमृषिस्तिरोदधे ॥९१॥

चरणौ समस्पृशत् प्रणनाम । तथाहि तरस्विनां बलवतां तरसा बलेन निर्ज्जितेषु शत्रुषु प्रणतिरेव कीर्त्तये भवतीति शेषः ॥ ८९ ॥

राजसत्वमिति । मातुरागतं मातृकं राजसत्वं रजोगुणप्रधानत्व मवधूय पितुरागतं पित्र्यं शमं यदा गमितोऽस्मि तदा त्वया मम अपेक्षितत्वात् अनिन्दितम् अगर्हितं फलं स्वर्गज्ञानलक्षणं यस्य सोऽयं निग्रहोऽपकारोऽप्यनुग्रहीकृतो ननु उपकारीकृत खलु ॥ ९० ॥

साधयामीति । अहं साधयामि गच्छामि, देवकार्य्यमुपपादयिष्यतः सम्पादयिष्यतस्तेऽविघ्नमस्तु विघ्नाभावोऽस्तु । अव्ययं विभक्ती-त्यादिना अर्थाभावेऽव्ययीभावः । सह लक्ष्मणेन सलक्ष्मणः तम् । तेन सहेति तुल्ययोग इति बहुव्रीहिः । लक्ष्मणाग्रजं रामम् इति वचः ऊचिवान् उक्तवान् । ब्रूञः क्वसुः । ऋषिस्तिरोदधे अन्तर्दधे ॥९१॥

तस्मिन् गते विजयिनं परिरभ्य रामं
स्नेहादमन्यत पिता पुनरेव जातम् ।
तस्याभवत् क्षणशुचः परितोषलाभः
कक्षाग्निलङ्घिततरोरिव वृष्टिपातः ॥९२॥

अथ पथि गमयित्वा क्लृप्तरम्योपकार्ये
कतिचिदवनिपालः शर्वरीः शर्वकल्पः ।
पुरमविशदयोध्यां मैथिलीदर्शनीनां
कुवलयितगवाक्षां लोचनैरङ्गनानाम् ॥९३॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ सीताविवाहवर्णनो नाम एकादशः सर्गः ॥

तस्मिन्निति । तस्मिन् भार्गवे गते सति विजयिनं रामं पिता स्नेहात् परिरभ्य आलिङ्ग्य पुनर्जातमेवामन्यत । क्षणं शुक् यस्येति विग्रहः क्षणशुचस्तस्य दशरथस्य परितोषलाभः सन्तोषप्राप्तिः कक्षाग्निना दावानलेन । कक्षः शुष्ककाननवीरुधोरिति विश्वः । लङ्घितस्यालिङ्गितस्य तरोर्वृष्टिपात इवाभवत् ॥ ९२ ॥

अथेति । अथ, ईषदूनः शर्वः शर्वकल्पः । ईषदसमाप्ताविति कल्पप् प्रत्ययः । अवनिपालः क्लृप्ता रम्या नवा उपकार्या यस्मिन् तस्मिन् पथि कतिचित् शर्वरीः रात्रीर्गमयित्वा मैथिलीदर्शनीनामङ्गनानां लोचनैः कुवलयानि येषां सञ्जातानि कुवलयिताः । तदस्य सञ्जातं तारकादिभ्य इतच् इति इतच्प्रत्ययः । कुवलयिताः गवाक्षाः यस्यास्तां पुरमयोध्याम् अविशत् प्रविष्टवान् ॥ ९३ ॥

इति श्रीकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायामेकादशः सर्गः ।

द्वादशः सर्गः ।

निर्व्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्व्वाणः प्रदीपार्च्चिरिवोषसि ॥ १॥
तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥२॥

वन्दामहे महोद्दण्डदोर्दण्डौ रघुनन्दनौ ।
तेजोनिर्ज्जितमार्त्तण्डमण्डलौ लोकनन्दनौ ॥

निर्व्विष्टेति । स्नेहयन्ति प्रीणयन्ति पुरुषमिति स्नेहाः । पचाद्यच् । स्निह्यन्ति पुरुषा येषु इति वा स्नेहाः । अधिकरणार्थे घञ् । विषयाः शब्दादयः त एव स्नेहाः निर्व्विष्टा भुक्ताः विषयस्नेहा येन स तथोक्तः । निर्वेशो भृतिभोगयोरिति विश्वः । दशा जीवनावस्था तस्या अन्तं वार्द्धकमुपेयिवान् स दशरथः उषसि प्रदीपार्च्चिरिव दीपज्वालेव आसन्नं निर्व्वाणं मोक्षो यस्य स तथोक्तः आसीत् । अर्च्चिः पक्षे तु विषयो देशः आश्रयो भाजनमिति यावत् । विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि चेति विश्वः । स्नेहस्तैलादिः । स्नेहस्तैलादिकरसे द्रवे स्यात् सौहृदेऽपि चेति विश्वः । दशा वर्त्तिका । दशा वर्त्तावस्थायामिति विश्वः । निर्वाणं विनाशः । निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जनइति यादवः ॥ १ ॥

तमिति । जरा कैकेयीशङ्कयेव पलितस्य केशादिशौक्लस्य छद्मना मिषेण । पलितं जरसा शौक्ल्यं केशादावित्यमरः । कर्णमूलं कर्णोपकण्ठमागत्य रामे श्रीः राजलक्ष्मीः न्यस्यतां निधीयतामिति तम्

सा पौरान् पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयाञ्चक्रे कुल्येवोद्यानपादपान् ॥३॥
तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया ।
दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः ॥४॥
सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥५॥
तयोश्चतुर्दशैकेन रामं प्राव्राजयत् समाः ।
द्वितीयेन सुतस्यैच्छत् वैधव्यैकफलां श्रियम् ॥६॥

आह । दशरथः वृद्धोऽहमिति विचार्य रामस्य यौवराज्याभिषेक चकाङ्क्षेत्यर्थः ॥ २ ॥

सेति । सा पौरकान्तस्य रामस्य अभ्युदयश्रुतिः अभिषेकवार्ता कुल्या कृत्रिमा सरित् । कुल्याल्पा कृत्रिमा सरिदित्यमरः । उद्यानपादपानिव पौरान् प्रत्येकं ह्लादयाञ्चक्रे ॥ ३ ॥

तस्येति । क्रूरनिश्चया कैकेयी तस्य रामस्य कल्पितं सम्भृतम् अभिषेकस्य सम्भारम् उपकरणं शोकोष्णैः पार्थिवाश्रुभिर्दूषयामास स्वदुःखमूलेन राजशोकेन प्रतिबबन्धेत्यर्थः ॥ ४ ॥

सेति । चण्डी अतिकोपना । चण्डस्त्वत्यन्तकोपन इत्यमरः । सा किल भर्त्रा आश्वासिता अनुनीता सती तेन भर्त्रा संश्रुतौ प्रतिज्ञातौ वरौ इन्द्रेण सिक्ता अभिवृष्टा भूः बिले वल्मीकादौ मग्नावुरगाविव उद्ववाम उज्जगार ॥ ५ ॥

तयोरिति । सा तयोर्वरयोर्मध्ये एकेन वरेण रामं चतुर्दश समाः संवत्सरान् । अत्यन्तसंयोगे द्वितीया । प्राव्राजयत् प्रावासयत्

पित्रा दत्तां रुदन् रामः प्राङ्महीं प्रत्यपद्यत।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्॥ ७॥
दधतो मङ्गलक्षौमे वसानस्य च वल्कले।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः॥ ८॥
स सीतालक्ष्मणसखः सत्याङ्गुरुमलोपयन्।
विवेश दण्डकारण्यं प्रत्येकञ्च सतां मनः॥ ९॥
राजापि तद्वियोगार्त्तः स्मृत्वा शापं स्वकर्म्मजम्।
शरीरत्यागमात्रेण शुद्धिलाभममन्यत॥ १०॥

द्वितीयेन वरेण सुतस्य भरतस्य वैधव्यैकफलां स्ववैधव्यमात्रफलां न तूपभोगफलामिति भावः, श्रियमैच्छत् इयेष॥ ६॥

पित्रेति। रामः प्राक् पित्रा दत्तां महीं रुदन् प्रत्यपद्यत अङ्गीचकार स्वत्यागदुःखादिति भावः। पश्चात् वनाय गच्छ इति एवंरूपां तदाज्ञां पित्राज्ञां मुदितोऽग्रहीत् पित्राज्ञाकरणलाभादिति भावः॥ ७॥

दधतइति। मङ्गलक्षौमे दधतो वल्कले वसानस्य आच्छादयतश्च तस्य रामस्य सममेकविधं मुखरागं मुखवर्णं जनाः विस्मिताः ददृशुः। सुखदुःखयोरविकृतइति भावः॥ ८॥

सइति। स रामः गुरुं पितरं सत्याद्वरदानरूपाटलोपयन् अभ्रंशयन् सीतालक्ष्मणयोः सखेति विग्रहः ताभ्यां सहितः सन् दण्डकारण्यं विवेश सतां मनश्च प्रत्येकं विवेश। पितृभक्त्या सर्व्वे सन्तः सन्तुष्टाः इति भावः॥ ९॥

राजेति। तद्वियोगार्त्तः पुत्रवियोगदुःखित राजापि स्वकर्म्मणा मुनिपुत्रवधरूपेण जातः स्वकर्म्मजस्तं शापं पुत्रशोकजं मरणात्मकं स्मृत्वा शरीरत्यागमात्रेण शुद्धिलाभं प्रायश्चित्तममन्यतेत्यर्थः॥ १०॥

विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥११॥
अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥१२॥
श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः ।
मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः॥१३
ससैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥१४॥

विप्रोषितेति । विप्रोषिताः गताः कुमारा' यस्मिंस्तयोक्तम् अस्तमित ईश्वरो राजा यस्य तत्तयोक्तं तद्राज्यं रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां भोग्यवस्तुतां ययौ । आमिषं भोग्यवस्तुनीति केशवः ॥ ११ ॥

अथेति । अथ अनाथाः प्रकृतयोऽमात्याः । प्रकृतिः सहजे योनावमात्ये परमात्मनीति विश्वः । मातृबन्धुनिवासिनं भरतं स्तम्भिताश्रुभिः पितृमरणगुप्त्यर्थमिति भावः, मौलैः सचिवैरानाययामासुः आगमयाञ्चक्रुः ॥ १२ ॥

श्रुत्वेति । कैकेयीतनयो भरतः पितुस्तथाविधं स्वमातृमूलं मृत्युं मरणं श्रुत्वा स्वस्या मातुः केवलं पराङ्मुखो न किन्तु श्रियोपि पराङ्मुख आसीत् ॥ १३ ॥

ससैन्यइति । ससैन्यो भरतः राममन्वगाच्च, किं कुर्वन् आश्रमालयैर्वनवासिभि दर्शितान् एते रामनिवासा इति कथितान् ससौमित्रेर्लक्ष्मणसहितस्य तस्य रामस्य वसतिद्रुमान् निवासवृक्षान् पश्यन् उदश्रुः रुदन् ॥ १४ ॥

चित्रकूटवनस्थञ्च कथितस्वर्गतिर्गुरोः ।
लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा ॥ १५ ॥
सहि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे ।
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥ १६ ॥
तमशक्यमपाक्रष्टुं निदेशात् स्वर्गिणः पितुः ।
ययाचे पादुके पश्चात् कर्त्तुं राज्याधिदेवते ॥ १७ ॥
स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत् पुरीम् ।
नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक् ॥ १८ ॥

चित्रेति । चित्रकूटवनस्थं तं रामञ्च गुरोः पितुः कथितस्वर्गतिः कथितपितृमरणः सन्नित्यर्थः । अनुच्छिष्टा अननुभूतपूर्वा सम्पत् गुणोत्कर्षो यस्या ता । सम्पत् गुणोत्कर्षे इति केशवः । तया लक्ष्म्या करणेन निमन्त्रयाञ्चक्रे आहूतवान् ॥ १५ ॥

सहीति । स हि भरत प्रथमजेऽग्रजे तस्मिन् रामे अकृतश्री परिग्रहे सति स्वयं भुवः स्वीकरणात् आत्मानं परिवेत्तारं मेने । परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहादित्यमरः । भूपरिग्रहोऽपि दारपरिग्रहवदिति भावः ॥ १६ ॥

तमिति । स्वर्गिणः पितुः निदेशात् अपाक्रष्टुं निवर्त्तयितुमशक्यं तं रामं पश्चाद्राज्याधिदेवते स्वामिन्यौ कर्त्तुं पादुके ययाचे ॥ १७ ॥

सइति । स भरतो भ्रात्रा रामेण तथेत्युक्त्वा विसृष्टः सन् पुरीम् अयोध्यां नाविशदेव, किन्तु नन्दिग्रामगतः सन् तस्य रामस्य राज्यं न्यासमिव निक्षेपमिवाभुनक् अपालयत् नतूपभुक्तवानित्यर्थः । अन्यथा भुजोऽनवनइत्यात्मनेपदप्रसङ्गात् । भुजेर्लङ् ॥ १८ ॥

दृढ़भक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः।
मातुः पापस्य भरतः प्रायश्चित्तमिवाकरोत्॥१९॥
रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन्।
चचार सानुजः शान्तो वृद्धेक्ष्वाकुव्रतं युवा॥२०॥
* प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम्।
कदाचिदङ्के सीतायाः शिश्ये किञ्चिदिव श्रमात्॥२१

दृढेति। ज्येष्ठे दृढभक्तिः राज्यतृष्णापराङ्मुखो भरतः इति पूर्वोक्तानुष्ठानेन मातुः पापस्य प्रायश्चित्तम् अपनोदकं कर्म्म अकरोदिवेत्युत्प्रेक्षा। दृढभक्तिरित्यत्र दृढशब्दस्य स्त्रियाःपुंवदित्यादिना पुंवद्भावो दुर्घटः अप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठात्, अतो दृढं भक्तिरस्येति नपुंसकपूर्वपदो बहुव्रीहिः इति गण व्याख्याने दृढभक्तिरित्येवमादिषु पूर्वपदस्य नपुंसकत्वस्य विवक्षितत्वात् सिद्धमिति समाधेयम्। वृत्तिकारास्तु दीर्घनिवृत्तिमात्रपरो दृढभक्तिशब्दो। लिङ्गविशेषस्यानुपकारत्वात् स्त्रीत्वमविवक्षितमेव तस्मादस्त्रीलिङ्गत्वात् दृढभक्तिशब्दस्यायं प्रयोगइत्यभिप्राय। न्यासकारोऽप्येवम्। भोजराजस्तु कर्म्मसाधनस्यैव भक्तिशब्दस्य प्रियादिपाठात् भवानीभक्तिरित्यादौ कर्मसाधनत्वात् पुंवद्भावप्रतिषेधः, दृढ़ भक्तिरित्यादौ भावसाधनत्वात् पुंवद्भावसिद्धिः पूर्वपदस्येत्याह॥ १९॥

रामइति। सानुजः शान्तो रामोऽपि वैदेह्या सह वने वन्येन वनभवेन कन्दमूलादिना वर्त्तयन् वृत्तिं कुर्वन् जीवन् वृद्धेक्ष्वाकूणां व्रतं वनवासात्मकं युवा यौवनस्थएव चचार॥ २०॥

प्रभावेति। स रामः कदाचित् प्रभावेण स्वमहिम्ना स्तम्भिता स्थिरीकृता छाया यस्य तं वनस्पतिमाश्रितः सन् किञ्चिदीषत् श्रमादिव सीताया अङ्के शिश्ये सुष्वाप॥ २१॥

* ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः।
प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन् ॥२२॥
*तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः।
आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥२३॥
रामस्त्वासन्नदेशत्वात् भरतागमनं पुनः।
आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥२४॥
प्रययावातिथेयेषु वसन्नृषिकुलेषु सः।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥२५॥

ऐन्द्रिरिति। ऐन्द्रिरिन्द्रस्य पुत्रो द्विजः पक्षी काकः तस्याः सीतायाः स्तनौ प्रियस्य रामस्योपभोगचिह्नेषु तत्कृतनखक्षतेष्वित्यर्थः पुरोभागिनो दोषैकदर्शिनः कर्म्म पौरोभाग्यम्। दोषैकदृक् पुरोभागीत्यमरः। दुःश्लिष्टदोषघातमाचरन् कुर्वन्निव नखै र्विददार विलिलेख। किलेत्यैतिह्ये ॥ २२ ॥

तस्मिन्निति। रामया सीतया अवबोधितो रामस्तस्मिन् काके इषीकास्त्रं काशास्त्रम्। इषीका काशमुच्यतइति हलायुधः। आस्थत् अस्यति स्म। असु क्षेपणइति धातोर्लुङ्, अस्यतिवक्तिख्यातिभ्योऽङिति च्लेरङ्प्रत्ययः, अस्यतेस्थुगिति थुगागमः। स काकः एकनेत्रस्य व्ययेन दानेन तस्मादस्त्रादात्मानं मुमुचे मुक्तवान्। मुचेः कर्त्तरि लिट्। धेनुं मुमोचेतिवत् प्रयोगः ॥ २३ ॥

रामइति। रामस्त्वासन्नदेशत्वाद्धेतोः पुनर्भरतागमनमाशङ्क्य उत्सुकसारङ्गाम् उत्कण्ठितहरिणां चित्रकूटस्थलीं जहौ तत्याज। आसन्नस्यासौ देशस्चेति विग्रहः ॥ २४ ॥

प्रययाविति। स रामः अतिथिषु साधून्यातिथेयानि। पथ्यतिथि-

बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी॥२६॥
अनुसूयातिसृष्टेन पुण्यगन्धेन काननम्।
सा चकाराङ्गरागेण पुष्पोच्चलितषट्पदम्॥२७॥
सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः॥२८॥
स जहार तयोर्मध्ये मैथिलीं लोकशोषणः।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे॥२९॥

वसतिस्वपतेर्वृद्धिरिति ठञ्प्रत्ययः। तेषु ऋषिकुलेषु आश्रमेषु। कुलं कुल्ये गणे देहे गेहे जनपदेऽन्वयइति हैमः। वर्षासु भवानि वार्षिकाणि। वर्षाभ्यष्ठगिति ठक्प्रत्ययः। तेषु ऋक्षेषु नक्षत्रेषु राशिषु वा भास्करइव, वसन् दक्षिणां दिशं प्रययौ॥ २५॥

बभाविति। तं राममनुगच्छन्ती विदेहाधिपतेः सुता सीता कैकेय्या प्रतिषिद्धा निवारितापि गुणोन्मुखी गुणोत्सुका लक्ष्मीः राजलक्ष्मीरिव बभौ॥ २६॥

अनुसूयेति। सा सीता अनुसूयया अत्रिभार्य्यया अतिसृष्टेन दत्तेन पुण्यगन्धेनाङ्गरागेण काननं वनं पुष्पेभ्यः उच्चलिताः निर्गताः षट्पदा यस्मिंस्तत्तथाभूतं चकार॥ २७॥

सन्ध्येति। सन्ध्याभ्रकपिशो विराधोनाम राक्षसः ग्रहो राहुरिवेन्दोः तस्य रामस्य मार्गमध्वानमावृत्यावरुध्यातिष्ठत्॥ २८॥

सइति। लोकस्य शोषणः शोषकः स राक्षसः तयोः रामलक्ष्मणयोर्मध्ये मैथिली नभोनभस्ययोः श्रावणभाद्रपदयोरन्तरे मध्ये वृष्टिमव-

तं विनिक्षिप्य काकुत्स्थौ पुरा दूषयति स्थलीम्।
गन्धेनाशुचिना चेति वसुधायां निचख्नतुः ॥३०॥
पञ्चवट्यां ततो रामः शासनात् कुम्भजन्मनः।
अनपोढस्थितिस्तस्थौ विन्ध्याद्रिः प्रकृताविव ॥३१॥
रावणावरजा तत्र राघवं मदनातुरा।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥३२॥
*सा सीतासन्निधावेव तं वव्रे कथितान्वया।
अत्यारूढो हि नारीणामकालज्ञो मनोभवः ॥३३॥

ग्रहो वर्षप्रतिबन्धइव जहार। वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समावित्यमरः ॥ २९ ॥

तमिति। ककुत्स्थस्य गोत्रापत्ये पुमांसौ काकुत्स्थौ रामलक्ष्मणौ तं विराधं विनिक्षिप्य हत्वा, अशुचिना अपवित्रेण गन्धेन स्थलीमाश्रमभुवं पुरा दूषयति दूषयिष्यतीति हेतोः। यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट्। वसुधायां निचख्नतुः भूमौ खनित्वा निक्षिप्तवन्तौ च ॥ ३० ॥

पञ्चवट्यामिति। ततो रामः कुम्भजन्मनोऽगस्त्यस्य शासनात् पञ्चानां वटानां समाहारः पञ्चवटी। तद्धितार्थेति तत्पुरुषः, संख्यापूर्वो द्विगुरिति द्विगुसंज्ञायां द्विगोरिति ङीप्, द्विगुरेकवचनमिति एकवचनम्। तस्यां पञ्चवट्यां विन्ध्याद्रिः प्रकृतौ वृद्धेः पूर्वावस्थायामिव अनपोढस्थितिरनतिक्रान्तमर्यादः तस्थौ ॥ ३१ ॥

रावणावरजेति। तत्र पञ्चवट्यां मदनातुरा रावणावरजा शूर्पणखा। पूर्वपदात् संज्ञायामगइति णत्वम्। राघवम्, निदाघार्त्ता घर्म्मतप्ता व्याकुला व्याली भुजङ्गी मलयद्रुमं चन्दनद्रुममिव, अभिपेदे प्राप ॥ ३२ ॥

सेति। सा शूर्पणखा सीतासन्निधावेव कथितान्वया कथितवंशा

* कलत्रवानहं बाले कनीयांसं भजस्व मे।
इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम्॥३४
*ज्येष्ठाभिगमनात् पूर्व्वं तेनाप्यनभिनन्दिता।
साभूद्रामाश्रया भूयो नदीवोभयकूलभाक्॥३५॥
संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम्।
निवातस्तिमिता वेलां चन्द्रोदय इवोदधेः॥३६॥

सती तं रामं वव्रे वृतवती, तथाहि अत्यारूढोऽतिप्रवृद्धो नारीणां मनोभवः कामः कालज्ञोऽवसरज्ञो न भवतीति अकालज्ञो हि ॥ ३३ ॥

कलत्रवानिति। वृषः पुमान्। वृषः स्याद्वासवे धर्म्मे सौरभेये च शुक्रले। पुंराशिभेदयोः शृङ्ग्यां मूषकश्रेष्ठयोरपीति विश्वः। वृषं पुरुषम् आत्मार्थमिच्छतीति वृषस्यन्ती कामुकी। वृषस्यन्ती च कामुकीत्यमरः। सुप आत्मनः क्यजिति क्यच्प्रत्ययः, अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचीति असुगागमः, ततः लटः शत्रादेशः, उगितश्चेति ङीप्। श्लोकार्थस्तु, वृषस्कन्धो रामः वृषस्यन्तीं तां राक्षसीं हे बाले अहं कलत्रवान् मे कनीयांसं कनिष्ठं भजस्वेति शशास आज्ञापितवान् ॥ ३४ ॥

ज्येष्ठाभिगमनादिति। पूर्व्वं ज्येष्ठाभिगमनात् तेन लक्ष्मणेनापि अनभिनन्दिता नाङ्गीकृता भूयो रामाश्रया सा राक्षसी उभे कूले भजतीत्युभयकूलभाक् नदीवाभूत्। सा हि यातायाताभ्यां पर्य्यायेण कूलद्वयगामिनी नदीसदृश्यभूदित्यर्थः ॥ ३५ ॥

संरम्भमिति। मैथिलीहासः क्षणं सौम्यां सौम्याकारां तां राक्षसीम्, निवातेन स्तिमितां निश्चलामुदधेर्वेलाम् अम्बुविकृतिम् अम्बुपूरमित्यर्थः। अब्ध्यम्बुविकृतौ वेलेत्यमरः। चन्द्रोदयइव, संरम्भं संक्षोभं निनाय ॥ ३६ ॥

फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम्।
मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम्॥३७॥
इत्युक्त्वा मैथिलीं भर्त्तुरङ्के निविशतीं भयात्।
रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत॥३८॥
लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
शिवाघोरस्वनां पश्चाद्बुबुधे विकृतेति ताम्॥३९॥
पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत्॥४०॥

फलमिति। श्लोकद्वयेनान्वयः, अस्योपहासस्य फलं सद्यः तत्क्षणे एव प्राप्स्यसि मां पश्य, त्वया कलत्रो कृतम् उपहासरूप करणं व्याघ्र्या विषये मृग्याः कलत्रोः परिभव इत्यवेहि॥३७॥

इतीति। भयाद्भर्त्तुरङ्के निविशतीमालिङ्गन्ती मैथिलीम् इत्युक्त्वा शूर्पणखा नाम्नः सदृशं शूर्पाकारनखयुक्तमित्यर्थः रूपमाकारं प्रत्यपद्यत स्वीचकार अदर्शयदित्यर्थः॥३८॥

लक्ष्मणइति। लक्ष्मणः प्रथम कोकिलावन्मञ्जुवादिनी पश्चात् शिवावद्घोरस्वनां तां शूर्पणखा श्रुत्वा तस्याः स्वनं श्रुत्वेत्यर्थः विकृता मायाविनीति बुबुधे बुद्धवान्। कर्त्तरि लिट्॥३९॥

पर्णशालामिति। अथ स लक्ष्मणो विकृष्टासिः कोशोद्धृतखड्गः सन् क्षिप्रं पर्णशाला प्रविश्य भीषयतीति भीषणाम्। नन्द्यादित्वात् ल्युः कर्त्तरि। तां राक्षसीं वैरूप्यस्य पौनरुक्त्यं द्वैगुण्यं लक्षणया, तेनायोजयत् योजितवान्। स्वभावतएव विकृता ता कर्णादिच्छेदेन पुनरतिविकृतामकरोदित्यर्थः॥४०॥

सा वक्रनखधारिण्या वेणुकर्कशपर्व्वया।
अङ्कुशाकारयाङ्गुल्या तावतर्जयदम्बरे॥४१॥
प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम्।
रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्॥४२॥
मुखावयवलूनां तां नैर्ऋता यत् पुरो दधुः।
रामाभियायिनां तेषां तदेवाभूदमङ्गलम्॥४३॥

सेति। सा वक्रनखं धारयतीति वक्रनखधारिणी तया वेणुवत् कर्कशपर्व्वया अतएवाङ्कुशस्याकारइवाकारो यस्याः सा तया अङ्गुल्या तौ राघवौ अम्बरे व्योम्नि स्थिता। अम्बरं व्योम्नि वाससीत्यमरः। अतर्ज्जयत् अभर्त्सयत्। तर्ज्ज भर्त्सनइतिधातोश्चौरादिकादनुदात्तेत्वा दात्मनेपदेन भाव्यं तथापि चचिङोङित्करणात् ज्ञापकादनुदात्तेत्त्व-निमित्तस्यात्मनेपदस्यानित्यत्वात् परस्मैपदमप्यस्तित्युक्तम् आख्यात चन्द्रिकायां तर्ज्जयते भर्त्सयते तर्जयतीत्यपि दृश्यते कविभिरिति ॥४१॥

प्राप्येति। सा आशु जनस्थानं प्राप्य खरादिभ्यो राक्षसेभ्य स्तथा-विधं स्वाङ्गच्छेदात्मकम् उपक्रम्यतइत्युपक्रमः। कर्म्मणि घञ्प्रत्ययः, रामस्य कर्त्तुरुपक्रमः रामोपक्रमं रामेणादावुपक्रान्तमित्यर्थः, उप-ज्ञोपक्रमं तदाद्याचिख्यासायामिति क्लीवत्वम्। तन्नवं रक्षसां कर्म्म-भूतानां परिभवमाचख्यौ च॥४२॥

मुखेति। नैर्ऋता राक्षसाः। नैर्ऋतो यातुरक्षसी इत्यमरः। मुखावयवेषु कर्णादिषु लूनां छिन्नां तां पुरो दधुः अग्रे चक्रुरिति यत् तदेव रामाभियायिनां राममभिद्रवतां तेषाममङ्गलमभूत्॥४३॥

उदिति। उदायुधान् उद्यतायुधान् आपततआगच्छतो दृप्तान्

उदायुधानापततस्तान् दृप्तान् प्रेक्ष्य राघवः।
निदधे विजयाशंसां चापे सीताञ्च लक्ष्मणे॥४४॥
एको दाशरथिः कामं यातुधानाः सहस्रशः।
ते तु यावन्त एवाजौ तावांश्च दद्दृशे स तैः॥४५॥
असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्।
न चक्षमे शुभाचारः स दूषणमिवात्मनः॥४६॥
तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः।
क्रमशस्ते पुनस्तस्य चापात् सममिवोद्ययुः॥४७॥

खरादीन् प्रेक्ष्य राघवश्चापे विजयस्याशंसाम् आशां लक्ष्मणे सीताञ्च निदधे। सीतारक्षणे लक्ष्मणं नियुज्य स्वयं युद्धाय सन्नद्ध इति भावः ॥ ४४ ॥

एक इति। दाशरथी रामः एकोऽद्वितीयः यातुधानाः कामं सहस्रशः सन्तीति शेषः, तैर्यातुधानैस्तु स रामः आजौ ते यातुधानाः यावन्तो यावत्संख्यका एव तावांस्तावत्संख्यकश्च दद्दृशे ॥ ४५ ॥

असदिति। अथ शुभाचारो रणे साधुचारी सद्वृत्तश्च स काकुत्स्थः असज्जनेन दुर्जनेन रक्षोजनेन च प्रयुक्तं प्रेषितम् उच्चारितञ्च दूषणं दूषणाख्यं राक्षसम् आत्मनो दूषणं दोषमिव न चक्षमे न सेहे प्रतिकर्त्तुं प्रवृत्त इत्यर्थः ॥ ४६ ॥

तमिति। स रामस्तं दूषणं खरत्रिशिरसौ च शरैः प्रतिजग्राह प्रतिजहारेत्यर्थः। क्रमशः यथाक्रमं प्रयुक्ता अपीति शेषः तस्य ते शराः पुनः चापात् समं युगपदिवोद्ययुः। अतिलघुहस्त इति भावः ॥ ४७ ॥

तैस्त्रयाणां शितैर्वाणैर्यथापूर्व्वविशुद्धिभिः।
आयुर्देहातिगैः पीतं रुधिरन्तु पतत्त्रिभिः॥४८॥
तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम्।
उत्थितं ददृशेऽन्यच्च कवन्धेभ्यो न किञ्चन॥४९॥
सा वाणवर्षिणं रामं योधयित्वा सुरद्विषाम्।
अप्रबोधाय सुष्वाप गृध्रच्छाये वरूथिनी॥५०॥
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम्।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराभवत्॥५१॥

तैरिति। देहमतीत्य भित्त्वा गच्छन्तीति देहातिगाः तैः यथा स्थिता पूर्वविशुद्धिर्येषां तैः अतिवेगत्वेन देहभेदात् प्रागिव रुधिरलेप-रहितैरित्यर्थः शितैः तीक्ष्णैः तैर्वाणैः त्रयाणां खरादीनाम् आयुः पीतं रुधिरन्तु पतत्त्रिभिः पीतम्॥४८॥

तस्मिन्निति। तस्मिन् रामशरैरुत्कृत्ते छिन्ने महति रक्षसां बले उत्थितम् उत्थानक्रियाविशिष्टं प्राणिनां कवन्धेभ्यः शिरोहीन शरी-रेभ्यः। कवन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः। अन्यच्च अन्यत् किञ्चन ददृशे। कवन्धेभ्य इत्यत्रान्यारादिति पञ्चमी। निःशेषं हतमित्यर्थः॥४९॥

सेति। सा सुरद्विषां वरूथिनी वाणवर्षिणं रामं योधयित्वा युद्धं कारयित्वा गृध्राणां छाया गृध्रच्छायम्। छायावाहुल्ये इति क्लीवत्वम्। तस्मिन् अप्रबोधाय अपुनर्वोधाय सुष्वाप ममारेत्यर्थः। अत्र सुरतश्रान्तकान्तासमाधिर्ध्वन्यते॥५०॥

राघवेति। एका शूर्पवन्नखानि यस्याः सा शूर्पणखा। पूर्वप-दात् संज्ञायामिति णत्वम्, नखमुखात् संज्ञायामिति ङीप्प्रतिषेधः।

निग्रहात् स्वसुराप्तानां बधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्द्धसु ॥५२॥
रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥५३॥
तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम्।
प्राणैर्दशरथप्रीतेरनृणं कण्ठवर्त्तिभिः ॥५४॥
स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम्।
आत्मनः सुमहत्कर्म्म व्रणैरावेद्य संस्थितः ॥५५॥

सैव रावणं प्रति राघवास्त्रैः विकीर्णानां हतानां तेषां रक्षसां खरादीनां दुष्प्रवृत्तिर्दुर्वार्त्ता तां हरति प्रापयतीति दुष्प्रवृत्तिहराभवत्। हरतेरनुद्यमनेऽजिति अच् प्रत्ययः ॥ ५१ ॥

निग्रहादिति। स्वसुः शूर्पणखाया निग्रहादङ्गच्छेदात् आप्तानां बन्धूनां खरादीनां बधाच्च कारणात् धनदानुजो रावणो रामेण दशसु मूर्द्धसु पदं पादं निहितं मेने ॥ ५२ ॥

रक्षसेति। स रावणः मृगरूपेण रक्षसा मारीचेन राघवौ वञ्चयित्वा प्रतार्य्य पक्षीन्द्रस्य जटायुषः प्रयासेन युद्धरूपेण क्षणं विघ्नितः सञ्जातविघ्नः सन् सीतां जहार ॥ ५३ ॥

ताविति। सीतान्वेषिणौ तौ राघवौ लूनपक्षं रावणेन छिन्नपक्षं कण्ठवर्त्तिभिः प्राणैः दशरथप्रीतेः दशरथसख्यस्यानृणम् ऋणैः विमुक्तं गृध्रं जटायुषमपश्यतां दृष्टवन्तौ। दृशेर्लङि रूपम् ॥ ५४ ॥

सइति। स जटायुः रावणहृतां मैथिलीं ताभ्यां रामलक्ष्मणाभ्याम्। क्रियाग्रहणमपि कर्त्तव्यमिति सम्प्रदानत्वाच्चतुर्थी। वचसा

तयोस्तस्मिन् नवीभूतपितृव्यापत्तिशोकयोः।
पितरीवाग्निसंस्कारात् परा ववृतिरे क्रियाः॥५६॥
वधनिर्धूतशापस्य कबन्धस्योपदेशतः।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ॥५७॥
स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत्॥५८॥

वाग्वृत्त्या आचष्ट, आत्मनः सुमहत्कर्म युद्धरूपं प्रयौरावेद्य संस्थितो मृतः॥५५॥

तयोरिति। व्यापत्तिर्मरणं नवीभूतः पितृव्यापत्तिशोको ययोस्तौ तयोः राघवयो स्तस्मिन् गृध्रे पितरीव अग्निसंस्कारादग्निसंस्कारमारभ्य पराः उत्तराः क्रियाः ववृतिरे अवर्त्तन्त तस्य पितृवदौर्द्धदेहिकं च कृतवन्तावित्यर्थः॥५६॥

वधेति। वधेन रामकृतेन निर्धूतशापस्य देवभुवं गतस्य कबन्धस्य रक्षोविशेषस्य उपदेशतो रामस्य समानव्यसने समानापदि सख्यार्थिनीत्यर्थः हरौ कपौ सुग्रीवे। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः। सख्यं मुमूर्च्छ ववृधे॥५७॥

सइति। वीरः स रामो वालिनं सुग्रीवाग्रजं हत्वा चिरकाङ्क्षिते तत्पदे वालिस्थाने, धातोः स्थाने आदेशमिव आदेशभूतं धात्वन्तरमिवेत्यर्थः, सुग्रीवं संन्यवेशयत् स्थापितवान्। यथा अस्तेर्भूरिति अस्तिधातोः स्थाने आदेशो भूधातुरस्तिकार्य्यमशेषं समभिधत्ते तद्वदिति भावः। आदेशो नाम शब्दान्तरस्य स्थाने विधीयमानं शब्दान्तरमभिधीयते॥५८॥

इतस्ततश्चेति। वैदेहीमन्वेष्टुं मार्गितुं भर्त्रा सुग्रीवेण नोदिताः

इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृनोदिताः।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥५९॥
प्रवृत्तावुपलब्धायां तस्याः सम्पातिदर्शनात्।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥६०॥
दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥६१॥
तस्यै भर्त्तुरभिज्ञानमङ्गुलीयं ददौ कपिः।
प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः ॥६२॥

प्रयुक्ताः कपयो हनुमत्प्रमुखाः आर्त्तस्य विरहातुरस्य रामस्य मनोरथाः कामाइव इतस्ततश्चेरुः नानादेशेषु बभ्रमुश्च ॥ ५९ ॥

प्रवृत्ताविति। सम्पातिर्नाम जटायुषो ज्यायान् भ्राता तस्य दर्शनात् तन्मुखादिति भावः तस्याः सीतायाः प्रवृत्तौ वार्त्तायाम्। वार्त्ता प्रवृत्तिर्वृत्तान्तइत्यमरः। उपलब्धायां ज्ञातायां सत्यां मरुतस्यापत्यं पुमान् मारुतिः हनुमान् सागरम्, ममेत्येतदव्ययम् ममतावाचि तद्रहितो निर्ममः निस्पृहः संसारमविद्याबन्धनमिव तीर्णः ततार। तरतेः कर्त्तरि क्तः ॥ ६० ॥

दृष्टेति। लङ्कायां रावणराजधान्यां विचिन्वता मृगयमाणेन तेन मारुतिना राक्षसीभिर्वृताः जानकी, विषवल्लीभिः परीता परिवृता महौषधि सञ्जीवनी लतेव, दृष्टा ॥ ६१ ॥

तस्यादति। कपिर्हनुमान् भर्त्तुः रामस्य सम्बन्धि अभिज्ञानं प्रत्यभिज्ञानसाधकम् अङ्गुलीयम् ऊर्म्मिकाम्। अङ्गुलीयकमूर्मिकेत्यमरः। जिह्वामूलाङ्गुलेश्छइति छप्रत्ययः। तस्यै जानक्यै ददौ। किंविध

निर्वाप्य प्रियसन्देशैः सीतामक्षवधोद्धतः।
स ददाह पुरीं लङ्कां क्षणसोढारिनिग्रहः॥६३॥
प्रत्यभिज्ञानरत्नञ्च रामायादर्शयत् कृती।
हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत्॥६४॥
* स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम्॥६५॥
श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम्॥६६॥

मङ्गुलीयम्, अनुष्णैः शीतलैः तस्याः आनन्दाम्बुविन्दुभिः प्रत्युद्गतमिव स्थितम्। भर्त्त्रभिज्ञानदर्शनादानन्दबाष्पो जातइत्यर्थः॥६२॥

निर्वाप्येति। स कपिः प्रियस्य रामस्य सन्देशैः वाचिकैः सीतां निर्वाप्य सुखयित्वा अक्षस्य रावणकुमारस्य वधेनोद्धतोद्दृप्तः क्षणं सोढः कृतेरिन्द्रजितः कर्तुर्निग्रहो बाधा ब्रह्मास्त्रबन्धनरूपा येन स तथोक्तः सन् लङ्कां पुरीं ददाह भस्मीचकार॥६३॥

प्रत्यभीति। कृती कृतकृत्यः कपिः स्वयमायातं मूर्त्तिमत् वैदेह्याः हृदयमिव स्थितं तस्याएव प्रत्यभिज्ञानरत्नञ्च रामायादर्शयत्॥६४॥

सइति। हृदये वक्षसि न्यस्तस्य धृतस्य मणेरभिज्ञानरत्नस्य स्पर्शेन निमीलितो मोहितः स रामः अविद्यमानः पयोधरसंसर्गः स्तनस्पर्शो यस्यास्तां तथाभूतां प्रियाया आलिङ्गनेन या निर्वृतिरानन्दस्तां प्राप॥६५॥

श्रुत्वेति। प्रियायाः उदन्तं वार्त्ताम्। उदन्तः साधुवार्त्तयोरिति विश्वः। श्रुत्वा तस्याः सीतायाः सङ्गमे उत्सुको रामो लङ्कायाः सम्बन्धी

स प्रतस्थेऽरिनाशाय हरिसैन्यैरनुद्रुतः ।
न केवलं धरापृष्ठे व्योम्नि सम्बाधवर्त्तिभिः ॥६७॥

निविष्टमुदधेः कूले तं प्रपेदे विभीषणः ।
स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमाविश्य नोदितः ॥६८॥

तस्मै निशाचरैश्वर्य्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥६९॥

स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥७०॥

यो महार्णवएव परिक्षेपः परिवेष्टस्तं परिखालघुं दुर्गवेष्टनवत् सुतरं मेने ॥६६॥

स इति । केवलं भुवः पृष्ठे भूतले न किन्तु व्योम्नि च सम्बाधवर्त्तिभिः सङ्कटगामिभिः हरिसैन्यैः कपिबलैरनुद्रुतोऽन्वितः सन् स रामोऽरिनाशाय प्रतस्थे चचाल ॥ ६७ ॥

निविष्टमिति । उदधेः कूले निविष्टं तं रामं विशेषेण भीषयते विभीषणो रावणानुजो राक्षसः लक्ष्म्या स्नेहात् बुद्धिं कर्त्तव्यताज्ञानम् आविश्य नोदितः प्रणोदितइव प्रपेदे प्राप्तः ॥ ६८ ॥

तस्मा इति । राघवस्तस्मै विभीषणाय । प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता इति सम्प्रदानत्वाच्चतुर्थी । निशाचरैश्वर्य्यं राक्षसाधिपत्यं प्रतिशुश्राव प्रतिज्ञातवान्, तथाहि कालेऽवसरे समारब्धाः प्रक्रान्ताः नीतयः फलं बध्नन्ति रचयन्ति जनयन्तीत्यर्थः खलु ॥ ६९ ॥

स इति । स रामः लवणं क्षारम् अम्भो यस्यासौ लवणाम्भास्तस्मिन् लवणाब्धौ प्लवगैः प्रयोज्यैः शार्ङ्गिणो विष्णोः स्वप्नाय शयनाय

तेनोत्तीर्य्य पथा लङ्कां रोधयामास पिङ्गलैः।
द्वितीयं हेमप्राकारं कुर्व्वद्भिरिव वानरैः ॥७१॥
रणः प्रववृते तत्र भीमः प्लवगरक्षसाम्।
दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः ॥७२॥
पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः।
अतिशस्त्रनखन्यासः शैलरुग्णमतङ्गजः ॥७३॥
अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनाम्।
सीतां मायेति शंसन्ती त्रिजटा समजीवयत्॥७४॥

रसातलात् पातालादुन्मग्नमुत्थितं शेषमिव स्थितं सेतुं बन्धयामास ॥ ७० ॥

तेनेति। रामः तेन पथा सेतुमार्गेण उत्तीर्य्य सागरमिति शेषः पिङ्गलैः सुवर्णवर्णैः अतएव द्वितीयं हेमप्राकारं कुर्व्वद्भिरिव स्थितैः वानरैः लङ्कां रोधयामास ॥ ७१ ॥

रणइति। तत्र लङ्कायां प्लवगानां रक्षसाञ्च भीमो भयङ्करः दिग्विजृम्भितं काकुत्स्थपौलस्त्ययोः रामरावणयोः जयघोषणं जयशब्दो यस्मिन् स तथोक्तो रणः प्रववृते प्रवृत्तः। अस्त्रिया समरानीकरणाः कलहविग्रहावित्यमरः ॥ ७२ ॥

पादपेति। किंविधो रणः पादपैर्वृक्षैराविद्धाः भग्नाः परिघाः लोहबद्धकाष्ठानि यस्मिन् स तथोक्तः। परिघः परिघातनइत्यमरः। शिलाभिर्निष्पिष्टा चूर्णिता मुद्गरा अयोघनाः यस्मिन् स तथोक्तः। द्रुघणो मुद्गरघनावित्यमरः। अतिशस्त्राः शस्त्राण्यतिक्रान्ताः नखन्यासाः यस्मिन् स तथोक्तः शैलैः रुग्णाः भग्नाः मतङ्गजाः यस्मिन् स तथोक्तः ॥ ७३ ॥

कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मत्वासत्यमस्यान्तं जीवितास्मीति लज्जिता॥७५॥
गरुड़ापातविश्लिष्टमेघनादास्त्रबन्धनः।
दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत्॥७६॥
ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम्।
रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा॥७७॥

अथेति। अथानन्तरं छिद्यतइति छेदः खण्ड. शिरएव छेदइति विग्रहः। रामशिरश्छेदस्य विद्युज्जिह्वाख्यराक्षसमायानिर्म्मितस्य दर्शनेनोद्भ्रान्तचेतनां गतसंज्ञां सीतां त्रिजटा नाम काचित् सीतापक्षपातिनी राक्षसी माया कल्पितं नत्वेतत् सत्यमिति शंसन्ती ब्रुवाणा। शप्स्नोर्नित्यमिति नित्यं नुमागमः। समजीवयत्॥७४॥

काममिति। सा सीता मे नाथः जीवतीति हेतोः शुचं शोकं कामं विजहौ किन्तु प्राक् पूर्व्वमस्य नाथस्यान्तं नाशं सत्यं यथार्थं मत्वा जीविता जीवितवत्यस्मीति हेतोर्लज्जिता लज्जावती। कर्त्तरि क्तः। दुःखादपि दुःसहो लज्जाभरइति भावः॥७५॥

गरुड़ेति। गरुड़स्तार्क्ष्यः तस्यापातेनागमनेन विश्लिष्टं मेघनादस्य इन्द्रजितोऽस्त्रेण नागपाशेन बन्धनं यस्मिन् स तथोक्तः क्षणक्लेशः दाशरथ्योः रामलक्ष्मणयोः स्वप्न.वृत्तः स्वप्नावस्थायां भूत इवाभवत्॥७६॥

ततइति। ततः पौलस्त्यो रावणः शक्त्या कासूनामकेनायुधेन। कासूसामर्थ्ययोः शक्तिरित्यमरः। लक्ष्मणं वक्षसि बिभेद विदारयामास। रामस्त्वनाहतोपि अहतोपि शुचा शोकेन विदीर्णहृदयः आसीत्॥७७॥

स मारुतिसमानीतमहौषधिहृतव्यथः।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः॥ ७८॥
स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम्।
मेघस्येव शरत्कालो न किञ्चित्पर्य्यशेषयत्॥ ७९॥
कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः।
रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः॥ ८०॥
अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान्।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः॥८१॥

सइति। स लक्ष्मणो मारुतिना मरुत्सुतेन हनुमता समानीतया महौषध्या सञ्जीविन्या हृतव्यथः सन् पुनः शरैः लङ्कास्त्रीणां विलापे परिदेवने। विलापः परिदेवनमित्यमरः। आचार्य्यकम् आचार्य्यकर्म्म। योपधाद्गुरूपोत्तमाद्वुञ् इति वुञ्। चक्रे। पुनरपि राक्षसान् जघानेति व्यज्यते॥ ७८॥

स नादमिति। स लक्ष्मणः शरत्कालो मेघस्य मेघनादस्येन्द्रजितो नादं सिंहनादम् अन्यत्र गर्ज्जितम् इन्द्रायुधप्रभं शक्रधनुःप्रभं धनुश्च किञ्चिदल्पमपि न पर्य्यशेषयत् नावशेषितवान् तमवधीदित्यर्थः॥ ७९॥

कुम्भकर्णइति। कपीन्द्रेण सुग्रीवेण स्वसुः शूर्पणखायाः तुल्यावस्थो नासाकर्णच्छेदेन सदृशः कृतः कुम्भकर्णः टङ्केन शिलाभेदकशस्त्रेण छिन्ना मनःशिला रक्तवर्णधातुविशेषोयस्य स तथोक्तः। टङ्कः पाषाणभेदनइति, धातुर्मनःशिलाद्यद्रेरिति चामरः। शृङ्गी शिखरीव रामं रुरोध॥ ८०॥

अकालइति। प्रियस्वप्नः दृष्टनिद्रोऽनुजः भवान् वृथा भ्रात्रा राव-

इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥८२॥
निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात्।
अरावणमरामं वा जगदद्येति निश्चितः ॥८३॥
रामं पदातिमालोक्य लङ्केशञ्च वरूथिनम्।
हरियुग्यं रथं तस्मै प्रजिघाय पुरन्दरः ॥८४॥

योनाकाले बोधितः इतीवास्तौ कुम्भकर्णः रामेषुभिः रामबाणैः दीर्घनिद्रा मरणं प्रवेशितो गमितः। यथा लोकेषु दृष्टवस्तुविनाशदुःखितस्य ततोपि भूयिष्ठमुपपाद्यते तद्वदिति भावः ॥ ८१ ॥

इतराणीति। इतराणि रक्षांस्यपि वानरकोटिषु, समरोत्थानि रजांसि तेषां रक्षसां शोणितनदीषु रक्तप्रवाहेषु इव, पेतुः निपत्य स्थितानीत्यर्थः ॥ ८२ ॥

निर्ययाविति। अथ पौलस्त्यो रावणः अद्य जगत् अरावणं रावणशून्यम् अरामं रामशून्यं वा भवेदिति निश्चितो निश्चितवान्। कर्त्तरि क्तः। विजयमरणयोरन्यतरनिश्चयवान् पुनर्युद्धाय मन्दिरात् निर्ययौ निर्जगाम ॥ ८३ ॥

राममिति। पादाभ्यामततीति पदातिस्तं पादचारिणं रामम्, वरूथो रथगुप्तिः। रथगुप्तिर्वरूथोनेत्यमरः। अस्त वरूथेन रथो लक्ष्यते। वरूथिनं रथिनं लङ्केशं च आलोक्य पुरन्दरः इन्द्रः युगं वहन्तीति युग्याः रथाश्वाः। तद्वहति रथयुगप्रासङ्गमिति यत् प्रत्ययः। हरियुग्यं कपिलवर्णाश्वम्। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः। रथं तस्मै रामाय प्रजिघाय प्रहितवान् ॥ ८४ ॥

तमिति। राघवो व्योमगङ्गोर्मिवायुभिराधूतध्वजपटं मातलिना-

तमाधूतध्वजपटं व्योमगङ्गोर्म्मिवायुभिः ।
देवसूतभुजालम्बी जैत्रमध्यास्त राघवः ॥८५॥

मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम् ।
यत्रोत्पलदलक्लैव्यमस्त्राण्यापुः सुरद्विषाम् ॥८६॥

अन्योऽन्यदर्शनप्राप्तविक्रमावसरं चिरात् ।
रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥८७॥

भुजमूर्द्धोरुबाहुल्यादेकोऽपि धनदानुजः ।
ददृशे ह्ययथापूर्वो मातृवंश इव स्थितः ॥८८॥

दिति भावः । जेतैव जैत्रो जयनशीलः तं जैत्रम् । जेतृशब्दात् तृनन्तात् प्रज्ञादिभ्यश्चेति स्वार्थेऽणप्रत्ययः । तं रथं देवसूतभुजालम्बी मातलिहस्तावलम्बः सन् अध्यास्त अधिष्ठितवान् । आसेर्लङ् ॥ ८५ ॥

मातलिरिति । मातलिरिन्द्रसारथिः माहेन्द्र तनुः छाद्यतेऽनेनेति तनुच्छदो वर्म्म । पुंसि संज्ञायां घः प्रायेणेति घः । त तस्य रामस्य आमुमोचासञ्जयामास यत्र तनुच्छदे सुरद्विषामस्त्राणि उत्पलदलानां यत् क्लैव्यं नपुंसकत्वं निरर्थकत्वं तदापुः ॥ ८६ ॥

अन्योन्येति । चिरादन्योन्यदर्शनेन प्राप्तविक्रमावसरं रामरावणयोर्युद्धं योधनं चरितार्थं सफलमभवदिव । प्राक् पराक्रमावसर दौर्लभ्याद्विफलस्य अद्य तल्लाभात् साफल्यमुत्प्रेक्ष्यते ॥ ८७ ॥

भुजेति । यथाभूतः पूर्वं यथापूर्वः । सुप्सुपेति समासः । यथा पूर्वो न भवतीत्ययथापूर्वः निहतबन्धुत्वादूनः परिवारशून्यत्वादर्थः अतएवैकोऽपि सन् धनदानुजो रावणः भुजाश्च मूर्द्धानश्चोरवः पादाश्च भुजमूर्द्धोरु । प्राण्यङ्गत्वात् द्वन्द्वैकवद्भावः । तस्य बाहुल्याद्बहुत्वाद्धेतोः, तद्वत्त्वे यादवः । दशास्यो विंशतिभुज स्तदल्पनूनात्म-

जेतारं लोकपालानां स्वमुखैरर्च्चितेश्वरम् ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥८९॥
तस्य स्फुरति पौलस्त्यः सीतासङ्गमशंसिनि ।
निचखानाधिकक्रोधः शरं सव्येतरे भुजे ॥९०॥
रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥९१॥

न्द्रिरे इति । मातृवंशे मातृसम्बन्धिनि वर्गे स्थित इव ददृशे इत्युक्तिः । वंशो वेणौ कुले वर्गे इति विश्वः । अत्र रावणमातूरक्षो जातित्वात् तद्वर्गो रक्षोवर्ग इति लभ्यते, अतस्त्वेकोपि अनेकरक्षःपरिवृतइव लक्ष्यते इत्यर्थः ॥ ८८ ॥

जेतारमिति । लोकपालानामिन्द्रादीनां जेतारम् । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । स्वमुखैः स्वशिरोभिरर्च्चितेश्वरं तुलितकैलासम् अतएवाप्रधृष्यम् एव शौर्य्यधैर्य्यसत्त्वसम्पन्नं महावीर्य्यम् अरातिं शत्रुं रामो गुणग्राहित्वात् जेतव्योत्कर्षस्य जतृत्कर्षहेतुत्वाच्च बहुमन्यत साधुः शत्रुरिति मानितवानित्यर्थः । बह्विति क्रियाविशेषणम् ॥ ८९ ॥

तस्येति । अधिकक्रोधः पौलस्त्यः स्फुरति स्पन्दमानोऽतएव सीतासङ्गमशंसिनि तस्य रामस्य सव्यइतरो यस्मात् सव्येतरे दक्षिणे । न बहुव्रीहाविति इतरशब्दस्य सर्वनामसंज्ञाप्रतिषेधः । भुजे शरं निचखान निखातवान् ॥ ९० ॥

रावणस्येति । रामेणास्तः क्षिप्तः आशुगो बाणः, विश्रवसोऽपत्यं पुमान् रावणः । विश्रवःशब्दादपत्यार्थेऽण्प्रत्यये सति, विश्रवसो विश्रवणरवणाविति रवणादेशः । तस्य रावणस्यापि हृदयं वक्षो

वचसैव तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः।
अन्योऽन्यजयसंरम्भो ववृधे वादिनोरिव ॥९२॥
विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि।
जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥९३॥
कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः।
परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ॥९४॥
अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥९५॥

भित्त्वा विदार्य उरगेभ्यः पातालवासिभ्यः प्रियमाख्यातुमिव भुवं विवेश ॥ ९१ ॥

वचसेति। वाक्यं वचसैव अस्त्रम् अस्त्रेण निघ्नतोः प्रतिकुर्वतोः तयोः रामरावणयोः वादिनोः कथकयोरिव अन्योन्यविषये जयसंरम्भो ववृधे ॥ ९२ ॥

विक्रमेति। जयश्रीः विक्रमस्य व्यतिहारेण पर्य्यायकरणेन तयोर्द्वयोरप्यन्तरा मध्ये। अव्ययमेतत्। वेदिर्वेद्याकारा भित्तिः मत्तवारणयोरिव सामान्या साधारणा अभूत् नत्वन्यतरनियतेत्यर्थः। अत्र मत्तवारणयोरित्यत्र द्वयोरित्यत्र च, अन्तरान्तरेण युक्ते इति द्वितीया न भवति अन्तराशब्दस्योक्तरीत्या अव्ययत्वात्। मध्ये कामपि भित्तिं कृत्वा गजौ योधयन्तीति प्रसिद्धिः ॥ ९३ ॥

कृतेति। स्वयमस्त्रप्रयोगः कृतं प्रतिकृतं परकृतप्रतीकारः ताभ्यां प्रीतैः सुरासुरैर्यथासङ्ख्यं तयोः रामरावणयोर्मुक्तां पुष्पवृष्टिं द्वयोर्मिति शेषः परस्परं शरव्राताः न सेहिरे। अहमेवालं किं त्वयेति

राघवो रथमप्राप्तां तामाशाञ्च सुरद्विषाम्।
अर्द्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीसुखम्॥ ९६॥
अमोघं सन्दधे चास्मै धनुष्येकधनुर्द्धरः।
ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम्॥ ९७॥

चान्तराल एव, इतरेतरबाणवृष्टिरितरेतरपुष्पवृष्टिमवारयदित्यर्थः ॥ ९४ ॥

अयइति। अथ रक्षो रावणः अयसः शङ्कुभिः कीलैः चितां कीर्णां शतघ्नीं लौहकण्टककीलितयष्टिविशेषम्। शतघ्नी तु चतुस्ताला लौहकण्टकैः कसञ्चिता यष्टिरिति केशवः। हृतां विजयलक्ष्मीं वैवस्वतस्यान्तकस्य कूटशाल्मलिमिव शत्रवे राघवायाक्षिपत् क्षिप्तवान्। कूटशाल्मलिरिव कूटशाल्मलिरिति व्यक्त्या वैवस्वतगदायाः गौणी संज्ञा। कूटशाल्मलिर्नाम एकमूलप्रकृतिः कण्टकी वृक्षविशेषः। रोचनः कूटशाल्मलिरित्यमरः। तत्सादृश्यञ्च गदायाः अयःशङ्कुचितत्वादनुसन्धेयम् ॥ ९५ ॥

राघवइति। राघवो रथमप्राप्तां तां शतघ्नीं सुरद्विषां रक्षसाम् आशां विजयतृष्णाञ्च। आशा तृष्णादिशोः प्रोक्तेति विश्वः। अर्द्धचन्द्र इव मुखं येषां तैर्बाणैः कदलीवत् सुखं यथा तथा चिच्छेद। अथवा कदल्यामिव सुखम् अक्लेशो यस्मिन् कर्मणि तदिति विग्रहः ॥ ९६ ॥

अमोघमिति। एकोऽद्वितीयो धनुर्धरो रामः प्रियायाः शोकएव शल्यं तस्य निष्कर्षणम् उद्धारकं यदौषधं तत् अमोघं ब्राह्मं ब्रह्मदेवताकम् अस्त्रम् अभिमन्त्रितं बाणम् अस्मै रावणाय च, तद्वधार्थमित्यर्थः, धनुषि सन्दधे ॥ ९७ ॥

तदिति। व्योम्नि शतधा भिन्नं प्रसृतं दीप्तिमन्ति मुखानि यस्य

तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखम्।
वपुर्महोरगस्येव करालफणमण्डलम् ॥९८॥
तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत्।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम् ॥९९॥
बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः।
रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ॥१००॥
मरुतां पश्यतां तस्य शिरांसि पतितान्यपि।
मनो नातिविशश्वास पुनःसन्धानशङ्किनाम् ॥१०१॥

तत् ब्रह्मास्त्रम्, करालं भीषणं तुङ्गं वा फणामण्डलं यस्य तत्तथोक्तम्। करालो दन्तुरे तुङ्गे करालो भीषणेऽपि चेति विश्वः। महोरगस्य शेषस्य वपुरिव, ददृशे दृष्टम् ॥ ९८ ॥

तेनेति। स रामो मन्त्रप्रयुक्तेन तेनास्त्रेण अज्ञातव्रणवेदनाम् अतिशैघ्र्यादननुभूतव्रणदुःखां रावणशिरःपङ्क्तिं निमेषार्द्धात् अपातयत् पातयामास ॥ ९९ ॥

बालेति। पतिष्यतः आसन्नपातस्य रक्षःकायस्य रावणकलेवरस्य छिद्यन्ते इति छेदाः खण्डाः कण्ठानां ये छेदाः तेषां परम्परा पङ्क्तिः वीचिभिर्भिन्ना नाना कृता अप्सु बालार्कस्य प्रतिमा प्रतिबिम्बमिव, रराज। 'अर्कस्य बालविशेषणमारुण्यार्थमिति भावः ॥ १०० ॥

मरुतामिति। पतितानि तस्य रावणस्य शिरांसि पश्यतामपि पुनःसन्धानशङ्किनाम्, पूर्वं तथादर्शनादिति भावः। मरुताममराणाम्। मरुतौ पवनामरावित्यमरः। मनो नातिविशश्वास अति विश्वासं न प्राप ॥ १०१ ॥

अथ मदगुरुपक्षैर्लोकपालद्विपाना
मनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय।
उपनतमणिबन्धे मूर्ध्नि पौलस्त्यशत्रोः
सुरभि सुरविमुक्तं पुष्पवर्षं पपात ॥१०२॥

यन्ता हरेः सपदि संहृतकार्मुकज्य
मापृच्छ्य राघवमनुष्ठितदेवकार्य्यम्।
नामाङ्करावणशराङ्कितकेतुयष्टि
मूर्द्ध्वं रथं हरिसहस्रयुजं निनाय ॥१०३॥

अथेति। अथ मदेन गजगण्डसञ्चारसंक्रान्तेन गुरुपक्षैः भाराय-माणपक्षैरलिवृन्दैः लोकपालद्विपानाम् ऐरावतादीनां गगनवर्त्तिना गण्डभित्ती र्विहाय अनुगतं सुरभि सुगन्धि। सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः। गन्धोपले सौरभेय्यां सल्लकीमातृभेदयोः। सुगन्धौ च मनोज्ञे च वाच्यवत् सुरभि स्मृतमिति विश्वः। सुरविमुक्तं पुष्पवर्षम् उपनत आसन्नो मणिबन्धो राज्याभिषेकसमये भावी यस्य तस्मिन् पौलस्त्यशत्रो' रामस्य मूर्ध्नि पपात। इदमेव राज्याभिषेक सूचकमिति भाव. ॥ १०२ ॥

यन्तेति। हरेरिन्द्रस्य यन्ता मातलि' सपदि संहृतकार्मुकज्यम् अनुष्ठितं देवकार्य्यं रावणवधरूपं येन त राघवम् आपृच्छ्य साधु यामी-त्यामन्त्र्य, नामाङ्कैर्नामाक्षरचिह्नैः रावणशरैरङ्किता चिह्निता केतुयष्टि र्ध्वजदण्डो यस्य तं हरीणां वाजिनां सहस्रेण युज्यतइति हरिसहस्रयुक् तम्। यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। हरि रित्युभयतोऽयनर'। रथम् ऊर्द्ध्वं निनाय नीतवान् ॥ १०३ ॥

रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम्॥१०४॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
रावणवधो नाम द्वादशः सर्गः॥

रघुपतिरिति। रघुपतिरपि जातवेदस्यग्नौ विशुद्धां जातशुद्धिं प्रियां सीतां प्रगृह्य स्वीकृत्य, प्रियसुहृदि विभीषणे वैरिणो रावणस्य श्रियं राज्यलक्ष्मीं सङ्गमय्य सङ्गतां कृत्वा। गमेर्ण्यन्तात् ल्यप्प्रत्ययः, मितां ह्रस्व इति ह्रस्वः, ल्यपि लघुपूर्वादिति णेरयादेशः। रविसुत सहितेन सुग्रीवयुक्तेन ससौमित्रिणा सलक्ष्मणेन तेन विभीषणेनानुयातोऽनुजातोऽनुगतः सन्। विमानं रत्नमिव विमानरत्नमित्युपमितसमासः। भुजविजितं यद्विमानरत्नं पुष्पकं तदारूढः सन् पुरीमयोध्यां प्रतस्थे। समवप्रविभ्यः स्थ इत्यात्मनेपदम्। अत्र प्रस्थानक्रियाया अकर्मकत्वेपि तदङ्गभूतोद्देश्यक्रियापेक्षया सकर्मकत्वम्। अस्ति च धातूनां क्रियान्तरोपसर्ज्जनकस्वार्थाभिधायकत्वम्, यथा कुसूलात् पचतीत्यादौ आदानक्रियागर्भः पाकोविवीयत इति॥१०४॥

इति श्रीकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां द्वादशः सर्गः॥



त्रयोदशः सर्गः ।



अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥ १ ॥
वैदेहि पश्या मलयात् विभक्तं
मत्सेतुना फेनिलमम्बुराशिम् ।

त्रैलोक्यशल्योद्धरणाय सिन्धोश्चकार बन्धं मरणं रिपूणाम् ।
पुण्यं प्रणामं भुवनाभिरामं रामं विरामं विपदामुपासे ॥

अथेति । अथ प्रस्थानानन्तरम्, जानातीति ज्ञः । इगुपधेत्यादिना कप्रत्ययः । गुणानां ज्ञः गुणज्ञः रत्नाकरादिवर्ण्यगुणाभिज्ञ इत्यर्थः स रामाभिधानो हरिः विष्णुः शब्दो गुणो यस्य तच्छब्दगुणम् आत्मनः स्वस्य पदं विष्णुपदमाकाशमित्यर्थः । वियद्विष्णुपदमित्यमरः। शब्दगुणमाकाशमिति तार्किकाः । विमानेन पुष्पकेण विगाहमानः सन् रत्नाकरं वीक्ष्य मिथोरहसि । मिथोऽन्योन्यं रहसीत्यमरः । जायां पत्नीं सीताम् इति वक्ष्यमाणप्रकारेणोवाच । रामस्य हरिरित्यभिधानं निरङ्कुशमहिमद्योतनार्थम् । मिथोग्रहणं गोष्ठीविश्रम्भसूचनार्थम् ॥ १ ॥

वैदेहीति । हे वैदेहि सीते आ मलयात् मलयपर्य्यन्तम् । पश्च-

छायापथेनेव शरत्प्रसन्न
माकाशमाविष्कृतचारुतारम् ॥२॥
गुरोर्यियक्षोः कपिलेन मेध्ये
रसातलं संक्रमिते तुरङ्गे।
तदर्थमुर्वीमवदारयद्भिः
पूर्व्वैः किलायं परिवर्द्धितो नः ॥३॥
गर्भं दधत्यर्कमरीचयोऽस्मात्
विवृद्धिमत्राश्नुवते वसूनि।

स्यपाङ्परिभिरिति पञ्चमी। पदद्वयं चैतत्। मत्सेतुना विभक्तं द्विधा कृतम् अत्यायतसेतुनेत्यर्थः। हर्षाधिक्याच्च मद्ग्रहणम्। फेनिलं फेनवन्तम्। फेनादिलच्चेतीलच्प्रत्ययः। चिप्रकारी चाहमिति भावः। अम्बुराशिम्, छायापथेन विभक्तं शरत्प्रसन्नम् आविष्कृतचारु तारम् आकाशमिव, पश्य। मम महानयं प्रयासस्त्वदर्थइति हृदयम्। छायापथो नाम ज्योतिश्चक्रमध्यवर्त्ती कश्चित्तिरश्चीनोऽवकाशः॥ २॥

गुरोरिति। यियक्षोर्यष्टुमिच्छोः। यजेः सन्नन्तादुप्रत्ययः। गुरोः सगरस्य मेध्येऽश्वमेधार्हे तुरङ्गे कपिलेन मुनिना रसातलं पातालं संक्रमिते सति, तदर्थमुर्वीमवदारयद्भिः खनद्भिः नः अस्माकं पूर्व्वैः वृद्धैः सगरसुतैः अयं समुद्रः परिवर्द्धितः किल। किलेत्यैतिह्ये। अतो नः पूज्यइति भावः। यद्यपि तुरङ्गहारी शतक्रतुः तथापि तस्य कपिलसमीपे दर्शनात् सएवेति भ्रान्तिः, तन्मत्यैव कविना कपिलेनेति निर्द्दिष्टम्॥ ३॥

गर्भमिति। अर्कमरीचयः अस्मादब्धेरपादानात् गर्भमन्मयं दधति,

अविन्धनं वह्निमसौ बिभर्त्ति
प्रह्लादनं ज्योतिरजन्यनेन ॥४॥
तां तामवस्थां प्रतिपद्यमानं
स्थितं दश व्याप्य दिशो महिम्ना।
विष्णोरिवास्यानवधारणीय
मीदृक्तया रूप मियत्तया वा ॥५॥
नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धाता।

दृष्ट्यर्थमित्यर्थः। अयमर्थो दशमसर्गे ताभिर्गर्भ इत्यत्र स्पष्टी कृतः। अयं लोकोपकारीति भावः। घनाढ्यौ वसूनि धनानि। इने रत्न वसु स्मृतमिति विश्वः। विदद्भिमश्नुवते प्राप्नुवन्ति, सम्पद्वानित्यर्थः। असौ आपः इन्धनं दाह्यं यस्य तद्दाहकं वह्निं बिभर्त्ति। अपकारेऽप्याश्रितं न त्यजतीति भावः। अनेन प्रह्लादनं ज्योतिश्चन्द्रोऽजनि जनितम्। जनेर्ण्यन्तात्कर्मणि लुङ्। सौम्य इति भावः ॥ ४ ॥

तां तामिति। तांतामनेकाम्। नित्यवीप्सयोरिति वीप्सायां द्विरुक्तिः। अवस्थामक्षोभाद्यवस्थाम्, विष्णुपक्षे सत्त्वाद्यवस्थाम्, प्रतिपद्यमानं भजमानं महिम्ना दश दिशो व्याप्य स्थितं विष्णोरिवास्य रत्नाकरस्य रूपं स्वरूपम् उक्तरीत्या बहुप्रकारत्वाद्व्यापकत्वाच्च ईदृक्तया इयत्तया वा प्रकारतः परिमाणतश्च अनवधारणीयं दुर्निरूपम् ॥ ५ ॥

नाभीति। युगान्ते कल्पान्ते उचिता परिचिता योगः स्वात्मनिष्ठैव निद्रेव निद्रा यस्य स पुरुषो विष्णुः लोकान् संहृत्य, नाभ्यां प्ररूढ

अमुं युगान्तोचितयोगनिद्रः
संहृत्य लोकान् पुरुषोऽधिशेते ॥६॥
पक्षच्छिदा गोत्रभिदात्तगन्धाः
शरण्यमेनं शतशो महीध्राः।
नृपा इवोपप्लविनः परेभ्यो
धर्म्मोत्तरं मध्यममाश्रयन्ते ॥७॥
रसातलादादिभवेन पुंसा
भुवः प्रयुक्तोद्वहनक्रियायाः।
अस्याच्छमम्भः प्रलयप्रवृद्धं

यदम्बुरुहं पद्मं तदासनेन यन्नाभिकमलाश्रयेण प्रथमेन धात्रा दक्षादीनामपि स्रष्ट्रा पितामहेन संस्तूयमानः सन्, अमुम् अधिशेते अमुष्मिन् शेते इत्यर्थः। कल्पान्तेऽप्यस्तीति भावः ॥ ६ ॥

पक्षेति। पक्षच्छिदा गोत्रभिदा इन्द्रेण। उभयत्र सत्सूद्विषेत्यादिना क्विप्। आत्तगन्धाः हृतगर्वाः अभिभूताइत्यर्थः। गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः। आत्तगर्वोऽभिभूतः स्यादित्यमरः। महीं धारयन्तीति महीध्राः पर्व्वताः। मूलविभुजादित्वात् कप्रत्ययः। शतं शतं शतशः शरण्यं रक्षणसमर्थमेनं समुद्रम्, परेभ्यः शत्रुभ्यः उपप्लविनो भयवन्तो नृपाः धर्मोत्तरं धर्म्मप्रधानं मध्यमं मध्यभूपालमिव, आश्रयन्ते। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तर इति कामन्दकः। आर्त्तबन्धुरिति भावः ॥ ७ ॥

रसातलादिति। आदिभवेन पुंसा आदिवराहेण रसातलात् प्रयुक्तोद्वहनक्रियायाः कृतोद्धरणक्रियायाः, विवाहक्रिया च व्यज्यते, भुवो भूदेवतायाः प्रलये प्रवृद्धमस्याब्धेरच्छमम्भो मुहूर्त्तं वक्त्राभरणं

मुहूर्त्तवक्त्राभरणं बभूव ॥८॥

*मुखार्पणेषु प्रकृतिप्रगल्भाः
स्वयं तरङ्गाधरदानदक्षः।
अनन्यसामान्यकलत्रवृत्तिः
पिबत्यसौ पाययते च सिन्धूः ॥९॥

ससत्वमादाय नदीमुखाम्भः
संमीलयन्तो विवृताननत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥१०॥

लज्जारक्षणार्थं मुखावगुण्ठनं बभूव। तदुक्तम् उद्धृताऽसि वराहेण कृष्णेन शतबाहुनेति ॥८॥

मुखेति। अन्येषां पुंसां सामान्या साधारणा न भवतीति अनन्यसामान्या कलत्रेषु वृत्ति र्भोगो यस्य स तथोक्तः। इममेवार्थं प्रतिपादयति, तरङ्ग एवाधरस्तस्य दाने समर्पणे दक्षश्चतुरोऽसौ समुद्रः मुखार्पणेषु प्रकृत्या स्वभावेन सख्यादिप्रेषणं विना प्रगल्भाः धृष्टाः सिन्धूर्नदीः। सिन्धुः समुद्रे नद्यां चेति विश्वः। स्वयं पिबति पाययते च तरङ्गाधरमिति शेषः। न पादम्याङ्यमेत्यादिना पिबतेर्ण्यन्तान्नित्यं परस्मैपदनिषेधः, गतिबुद्धीत्यादिना सिन्धूनां कर्मत्वम्। दम्पत्योर्युगपत् परस्परधरपानमनन्यसाधारणमिति भावः ॥९॥

ससत्वमिति। अमी तिमयो मत्स्यविशेषाः। तदुक्तम्। अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतइति। विवृताननत्वाद् व्यात्तमुखत्वाद्धेतोः व्याननविवृत्त्यर्थः ससत्वं मत्स्यादिप्राणिसहितं नदीमुखाम्भः

मातङ्गनक्रैः सहसोत्पतद्भि
र्भिन्नान् द्विधा पश्य समुद्रफेनान्।
कपोलसंसर्पितया य एषां
व्रजन्ति कर्णक्षणचामरत्वम् ॥११॥
वेलानिलाय प्रसृता भुजङ्गाः
महोर्म्मिविस्फूर्ज्जथुनिर्व्विशेषाः।
सूर्य्यांशुसम्पर्कसमृद्धरागै
र्व्यज्यन्त एते मणिभिः फणस्थैः ॥१२॥
तवाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्म्मिवेगात्।

आदाय संमीलयन्तः चञ्चुपुटानि सङ्कुचयन्तः सन्तः सरन्ध्रैः शिरोभिः जलप्रवाहान् ऊर्द्ध्वं वितन्वन्ति। जलयन्त्रक्रीडासमाधिर्व्यज्यते ॥१०॥

मातङ्गेति। सहसोत्पतद्भिः मातङ्गनक्रैः मातङ्गाकारैर्ग्राहैः द्विधा भिन्नान् समुद्रफेनान् पश्य, ये फेनाः एषां जलमातङ्गनक्राणां कपोलेषु संसर्पितया संसर्पणेन हेतुना कर्णेषु क्षणं चामरत्वं व्रजन्ति॥ ११ ॥

वेलेति। वेलानिलाय वेलानिलं पातुमित्यर्थः। क्रियार्थोपपदेत्यादिना चतुर्थी। प्रसृताः निर्गताः महोर्म्मीणां विस्फूर्ज्जथुः उद्रेकः। ट्वितोऽथुजित्यथुच्प्रत्ययः। तस्माान्निर्व्विशेषाः दुर्ग्रहभेदाः एते भुजङ्गाः सूर्य्यांशुसम्पर्केण समृद्धरागैः प्रवृद्धकान्तिभिः फणस्थै र्मणिभि र्व्यज्यन्ते उन्नीयन्ते ॥ १२ ॥

तवेति। तव अधरस्पर्द्धिषु अधरसदृशेष्वित्यर्थः विद्रुमेषु प्रवालेषु सहसा ऊर्म्मिवेगात् पर्य्यस्तं प्रोत्क्षिप्तम् जलाङ्कुरैः विद्रुम प्ररोहैः

ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम् ॥१३॥

प्रवृत्तमात्रेण पयांसि पातु
मावर्त्तवेगाद्भ्रमता घनेन।
आभाति भूयिष्ठमयं समुद्रः
प्रमथ्यमानो गिरिणेव भूयः ॥१४॥

दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला।
आभाति वेला लवणाम्बुराशे
र्द्धारानिबद्धेव कलङ्करेखा ॥१५॥

प्रोतमुखं स्यूतवदनमेतत् शङ्खानां यूथं वृन्दं कथञ्चित् क्लेशात् अपक्रामति विलम्ब्यापसरतीत्यर्थः ॥ १३ ॥

प्रवृत्तेति। पयांसि पातुं प्रवृत्तमात्रः नतु पीतवान् तम् आवर्त्तवेगात्। स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः। भ्रमता घनेन अयं समुद्रो भूयः पुनरपि गिरिणा मन्दरेण प्रमथ्यमान इव भूयिष्ठमत्यन्तमाभाति ॥ १४ ॥

दूरादिति। अयश्चक्रनिभस्य लवणाम्बुराशेः दूरात् तन्वी अणुत्वेनावभासमाना तमालतालीवनराजिभिर्नीला वेला तीरभूमिः धारानिबद्धा चक्राश्रिता कलङ्करेखा मालिन्यरेखेव आभाति। मालिन्यरेखान्तु कलङ्काङ्काविति दण्डी ॥ १५ ॥

वेलानिलइति। हे आयताक्षि। वेला स्यात्तीरनीरयोरिति

* वेलानिलः केतकरेणुभिस्ते
सम्भावयत्याननमायताक्षि।
मामक्षमं मण्डनकालहाने
र्वेत्तीव विम्बाधरबद्धतृष्णम्॥१६॥
एते वयं सैकतभिन्नशुक्ति-
पर्य्यस्तमुक्तापटलं पयोधेः।
प्राप्ता मुहूर्त्तेन विमानवेगात्
कूलं फलावर्ज्जितपूगमालम्॥१७॥
कुरुष्व तावत् करभोरु पश्चा-
न्मार्गे मृगप्रेक्षिणि दृष्टिपातम्।

विश्व' वेलानिलः केतकरेणुभिः ते आननं सम्भावयति। किमर्थमित्य-पेक्षायामुत्प्रेक्ष्यते, विम्बाधरे बद्धतृष्णां मां मण्डनेन आभरणक्रियया कालहानिर्विलम्बः तस्याक्षममसहमानम्। कर्म्मणि षष्ठी। कालहानि मसहमान वेत्तीव किम्, नो चेत् कथं सम्भावयेदित्यर्थः॥१६॥

एतइति। एते वय सैकतेषु भिन्नाभिः शुक्तिभिः पर्य्यस्तानि परितः क्षिप्तानि मुक्तानां पटलानि यस्मिंस्तत्तथोक्तं फलैरावर्जिताः आन-मिताः पूगमाला यस्मिंस्तत् पयोधेः कूलं विमानवेगान्मुहूर्त्तेन प्राप्ताः॥१७॥

कुरुष्वेति। मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः। करभइव ऊरू यस्याः सा करभोरूः। ऊरूत्तरपदादौपम्यइत्यूङ्। तस्याः सम्बुधिः, हे करभोरु। मृगवत्प्रेक्षतइति विग्रहः। हे मृग-

एषा विदूरीभवतः समुद्रात्
सकानना निष्पततीव भूमिः ॥१८॥

क्वचित् पथा सञ्चरते सुराणां
क्वचिद्घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः
प्रवर्त्तते पश्य तथा विमानम् ॥१९॥

असौ महेन्द्रद्विपदानगन्धि
स्त्रिमार्गगावीचिविमर्द्दशीतः।
आकाशवायुर्दिनयौवनोत्थान्
आचामति स्वेदलवान् मुखे ते ॥२०॥

प्रेक्षिणि तावत्पश्चान्मार्गे लङ्घिताध्वनि दृष्टिपातं कुरुष्व। एषा सकानना भूमिः विदूरीभवतः समुद्रान्निष्पतति निष्क्रामतीव। विदूरशब्दाद्विशेष्यनिघ्नात् च्विः ॥ १८ ॥

क्वचिदिति। हे देवि विमानं पुष्पकं मे मनसोऽभिलाषो यथाविधः तथा प्रवर्त्तते पश्य। क्वचित् सुराणां पथा सञ्चरते, क्वचिद्घनानां क्वचित्पततां पक्षिणाञ्च पथा सञ्चरते। समस्तृतीयायुक्तादिति संपूर्वाच्चरतेरात्मनेपदम् ॥ १९ ॥

असाविति। महेन्द्रद्विपदानगन्धिः ऐरावतमदगन्धिः त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा गङ्गा। तद्धितार्थेत्यादिना उत्तरपदसमासः। तस्याः वीचीनां विमर्द्देन सम्पर्केण शीतः असौ आकाशवायुः दिनयौवनोत्थान् मध्याह्नसम्भवान् ते मुखे स्वेदलवान् आचामति हरति। अनेन सुरपथसञ्चारो दर्शितः ॥ २० ॥

करेण वातायनलम्बितेन
स्पृष्टस्त्वया चण्डि कुतूहलिन्या।
आमुञ्चतीवाभरणं द्वितीय-
मुद्भिन्नविद्युद्वलयो घनस्ते॥२१॥
अमी जनस्थानमपोढविघ्नं
मत्वा समारब्धनवोटजानि।
अध्यासते चीरभृतो यथास्वं
चिरोज्झितान्याश्रममण्डलानि॥२२॥
सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम्।

करेणेति। हे चण्डि कोपने। चण्डस्त्वत्यन्तकोपन इत्यमरः। कुतूहलिन्या विनोदार्थिन्या त्वया कर्त्र्या वातायने गवाक्षे लम्बितेनावस्रंसितेन करेण स्पृष्टः उद्भिन्नविद्युद्वलयो घनस्ते द्वितीयमाभरणं वलयमामुञ्चतीवार्पयतीव। चण्डीत्यनेन कोपनशीलत्वाद्भीतः क्षिप्रं त्वां मुञ्चति मेघ इति व्यज्यते॥ २१॥

अमीति। अमी चीरभृतस्तापसाः जनस्थानमपोढविघ्नमस्तविघ्नं मत्वा समारब्धा नवाः उटजाः पर्णशालाः येषु तानि। पर्णशालोटजोऽस्त्रियामित्यमरः। चिरोज्झितानि राक्षसभयादित्यर्थः आश्रममण्डलानि आश्रमविभागान् यथास्वं स्वमनतिक्रम्य अध्यासते अधितिष्ठन्ति॥ २२॥

सैषेति। सा पूर्वानुभूता स्थली एषा, दृश्यत इत्यर्थः। यत्र स्थल्यां त्वां विचिन्वता अन्विष्यता मया त्वच्चरणारविन्देन यो विश्लेषो

अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ॥२३॥

त्वं रक्षसा भीरु यतोऽपनीता
तं मार्गमेताः कृपया लता मे।
अदर्शयन् वक्तुमशक्नुवन्त्यः
शाखाभिरावर्जितपल्लवाभिः ॥२४॥

मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्तवागतिज्ञं समबोधयन्माम्।

वियोगः तेन यद्दुःखं तस्मादिव बद्धमौनं निःशब्दम्। ऊर्व्यां स्पष्टम् एकं नूपुरं मञ्जीरं। मञ्जीरो नूपुरोऽस्त्रियामित्यमरः। अदृश्यत दृष्टम्। हेतूत्प्रेक्षा ॥ २३ ॥

त्वमिति। हे भीरु भयशीले। जङुतश्च्यूङ् ततो नदीत्वात् सम्बुद्धौ ह्रस्वः। त्वं रक्षसा रावणेन यतो येन मार्गेण। सार्वविभक्तिकस्तसिः। अपनीता अपहृता तं मार्गं वागिन्द्रियाभावाद्वक्तुमशक्नुवन्त्यः एताः लताः आवर्जिताः नमिताः पल्लवाः पाणिस्थानीयाः याभिस्ताभिः शाखाभिः बाहुभूताभिः कृपया मेऽदर्शयन् हस्तचेष्टयादर्शयन्नित्यर्थः। शाखा वृक्षान्तरे भुजे इति विश्वः। लतादीनामपि ज्ञानमस्त्येव। तदुक्तं मनुना। अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः इति ॥ २४ ॥

मृग्यश्चेति। दर्भाङ्कुरेषु भक्ष्येषु निर्व्यपेक्षाः निस्पृहा मृग्यः मार्गा-ज्ञानाद्वा उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्यां दिशि व्यापारयन्त्यः

व्यापारयन्त्यो दिशि दक्षिणस्या-
मुत्पक्ष्मराजीनि विलोचनानि ॥२५॥

एतद्गिरेर्माल्यवतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम्।
नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥२६॥

गन्धश्च धाराहतपल्वलानां
कादम्बमर्द्धोद्गतकेसरञ्च।
स्निग्धाश्च केकाः शिखिनां बभूवु-
र्यस्मिन्नसह्यानि विना त्वया मे ॥२७॥

प्रवर्त्तयन्त्यः सत्यः तव अगतिज्ञं गत्यनभिज्ञं मां समबोधयन् दृष्टि-चेष्टया त्वद्गतिमवोधयन्नित्यर्थः ॥ २५ ॥

एतदिति। माल्यवतोनाम गिरेरम्बरलेखि अभ्रङ्कषं शृङ्गमेतत् पुरस्तादग्रे आविर्भवति। यत्र शृङ्गे घनैर्मेघैः नवं पयो मया त्वद्वि-प्रयोगेन यदश्रु तच्च समं युगपद्विसृष्टम्। मेघदर्शनाद्दर्षतुल्यमश्रु मुक्तमिति भावः ॥ २६ ॥

गन्धश्चेति। यस्मिन् शृङ्गे धाराभिर्वर्षधाराभिराहतानां पल्वलानां गन्धश्च, अर्द्धोद्गतकेसरं कादम्बं नीपकुसुमञ्च, स्निग्धाः मधुराः शिखिनां बर्हिणाम्। शिखिनौ वह्निवर्हिणावित्यमरः केकाश्च, त्वया विना मे असह्यानि बभूवः। नपुंसकमनपुंसकेनेति नपुंसकैकशेषः ॥२७॥

पूर्वेति। किञ्च हे भीरु यत्र शृङ्गे पूर्वानुभूतं कम्पोत्तरं कम्प प्रधानं

* पूर्व्वानुभूतं स्मरता च यत्र
कम्पोत्तरं भीरु तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि
मया कथञ्चिद्घनगर्ज्जितानि ॥२८॥

आसारसिक्तक्षितिबाष्पयोगात्
मामक्षिणोद्यत्र विभिन्नकोशैः ।
विडम्ब्यमाना नवकन्दलैस्ते
विवाहधूमारुणलोचनश्रीः ॥२९॥

उपान्तवानीरवनोपगूढा-
न्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतीव खेदा-
दमूनि पम्पासलिलानि दृष्टिः ॥३०॥

तवोपगूढमुपगूहनं स्मरता मया गुहाविसारीणि घनगर्ज्जितानि कथञ्चिदतिवाहितानि स्मारकत्वेनोद्दीपकत्वात् क्लेशेन गमितानीत्यर्थः ॥ २८ ॥

आसारेति । यत्र शृङ्गे विभिन्नकोशैः विकसितकुट्मलैः नवकन्दलैः कन्दलीकुसुमैररुणवर्णैः आसारेण धारासम्पातेन । धारासम्पात आसार इत्यमरः । सिक्तायाः क्षितेर्बाष्पस्य धूमवर्णस्य योगाद्धेतोः विडम्ब्यमाना अनुक्रियमाणा ते विवाहधूमेनारुणा लोचनश्रीः, सादृश्यात् स्मर्यमाणेति शेषः, मामक्षिणोत् अपीडयत् ॥ २९ ॥

उपान्तेति । उपान्तवानीरवनोपगूढानि पार्श्ववञ्जुलवनच्छन्नानि आलक्ष्याः ईषद्दृश्याः पारिप्लवाश्चञ्चलाः सारसाः येषु तानि अमूनि

अत्राावियुक्तानि रथाङ्गनाम्ना
मन्योन्यदत्तोत्पलकेसराणि।
द्वन्द्वानि दूरान्तरवर्त्तिना ते
मया प्रिये सस्पृहमीक्षितानि ॥३१॥
* इमां तटाशोकलताञ्च तन्वीं
स्तनाभिरामस्तवकाभिनम्राम्।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः
सौमित्रिणा साश्रुरहं निषिद्धः ॥३२॥
अमूर्विमानान्तरलम्बिनीनां
श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम्।

पम्पासलिलानि पम्पासरोजलानि दूरादवतीर्णा मे दृष्टिः अतएव खेदात् पिबतीव न विहाहतृप्यतीत्यर्थः ॥ ३० ॥

अत्रेति। अत्र पम्पासरसि अन्योन्यस्मै दत्तोत्पलकेसराणि अवियुक्तानि रथाङ्गनाम्ना द्वन्द्वानि चक्रवाकमिथुनानि ते तव दूरान्तरवर्त्तिना दूरदेशवर्त्तिना मया हे प्रिये सस्पृहं साभिलाषमीक्षितानि तदानी त्वामस्मार्षमित्यर्थः ॥ ३१ ॥

इमामिति। किञ्च स्तनवदभिरामाभ्यां स्तवकाभ्याम् अभिनम्रां तन्वीमिमां तटाशोकलताम् अतस्त्वत्प्राप्तिबुद्ध्या त्वमेव प्राप्नोति भ्रान्त्या परिरब्धुमालिङ्गितुं कामो यस्य सोऽहं सौमित्रिणा लक्ष्मणेन साश्रुः निषिद्धः नेयं सीतेति निवारितः। परिरब्धुकामः इत्यत्र तुंकाममनसोरपीति वचनात् मकारलोपः ॥ ३२ ॥

अमूरिति। विमानस्यान्तरेषु अवकाशेषु लम्बन्ते यास्तासां काञ्चन-

प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो
गोदावरीसारसपङ्क्तयस्त्वाम् ॥३३॥

एषा त्वया पेशलमध्ययापि
घटाम्बुसंवर्द्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णसारा
दृष्टा चिरात् पञ्चवटी मनो मे ॥३४॥

अत्रानुगोदं मृगयानिवृत्त-
स्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्द्धा
स्मरामि वानीरगृहेषु सुप्तः ॥३५॥

शिञ्जिनीनां स्वनं श्रुत्वा स्वयूथ्यशब्दभ्रमात् खमाकाशमुत्पतन्त्योऽमूः गोदावरीसारसपङ्क्तयः त्वां प्रत्युद्व्रजन्तीव ॥ ३३ ॥

एषेति । पेशलमध्ययापि भाराक्षमयापीत्यर्थः त्वया घटाम्बुभिः संवर्द्धिता बालचूताः यस्याः सा उन्मुखाः अस्मदभिमुखाः त्वत्संवर्द्धिता एव कृष्णसाराः यस्याः सा चिरात् दृष्टा एषा पञ्चवटी मे मनः आनन्दयति आह्लादयति । पञ्चवटीशब्दः पूर्वमेव व्याख्यातः ॥ ३४ ॥

अत्रेति । अत्र पञ्चवट्यां गोदा गोदावरी तस्याः समीपे अनुगोदम् । अनुर्यत्समयेत्यव्ययीभावः । मृगयायाः निवृत्तः तरङ्गवातेन विनीतखेदः रहो रहसि । अत्यन्तसंयोगे द्वितीया । त्वदुत्सङ्गनिषण्णमूर्द्धा सन् अहं वानीरगृहेषु सुप्तः स्मरामि । वाक्यार्थः कर्म । सुप्त इति-यत्तत् स्मरामीत्यर्थः ॥ ३५ ॥

भ्रूभेदेति । यो मुनिः भ्रूभेदमात्रेण भ्रूभङ्गमात्रेणैव नहुषं

भ्रूभेदमात्रेण पदान्मघोनः
प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भःपरिशुद्धिहेतो
र्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥ ३६॥
त्रेताग्निधूमाग्रमनिन्द्यकीर्त्ते
स्तस्येदमाक्रान्तविमानमार्गम् ।
घ्रात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा ॥ ३७॥
एतन्मुनेर्मानिनि शातकर्णेः
पञ्चाप्सरो नाम विहारवारि ।

राजानं मघोनः पदादिन्द्रत्वात् प्रभ्रंशयाञ्चकार प्रभ्रंशयति स्म । आविलाम्भःपरिशुद्धिहेतोः कलुषजलप्रसादहेतोः तस्य मुनेरगस्त्यस्य, अगस्त्यस्योदये शरदि जलं प्रसीदतीति उक्तं प्राक्, भूमौ भवः भौमः स्थानपरिग्रहः आश्रमोऽयं दृश्यतइति शेषः । भौमइत्यनेन दिव्योऽप्यस्तीत्युक्तम् । परिगृह्यतइति परिग्रहः स्थानमेव परिग्रहइति विग्रहः ॥ ३६ ॥

त्रेतेति । अनिन्द्यकीर्त्तेस्तस्यागस्त्यस्य आक्रान्तविमानमार्गं हविर्गन्धोऽस्यास्तीति हविर्गन्धि, त्रयएव त्रेता अग्नित्रयम् । अग्नित्रयमिदं त्रेतेत्यमरः । पृषोदरादित्वादेत्वम् । त्रेतेत्यग्नयः त्रेताग्नयः तेषां धूमाग्रमिदं घ्रात्वा आघ्राय रजोगुणाद्विमुक्तः मे मम आत्मा अन्तःकरणं लघिमानं लघुत्वगुणं समश्नुते प्राप्नोति ॥ ३७ ॥

एतदिति । हे मानिनि शातकर्णेः मुनेः सम्बन्धि पञ्चाप्सरो नाम पञ्चाप्सरइति प्रसिद्धम् । पञ्च अप्सरसो यस्मिन्निति विग्रहः । पर्य्यन्तेषु

आभाति पर्य्यन्तवनं विदूरात्

मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ॥ ३८ ॥

पुरा स दर्भाङ्कुरमात्रवृत्ति-

श्चरन्मृगैः सार्द्धमृषिर्मघोना।

समाधिभीतेन किलोपनीतः

पञ्चाप्सरोयौवनकूटबन्धम् ॥ ३९ ॥

तस्यायमन्तर्हितसौधभाजः

प्रसक्तसङ्गीतमृदङ्गघोषः।

वियद्गतः पुष्पकचन्द्रशालाः

क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥

वनानि यस्य तत् पर्य्यन्तवनम् एतत् विहारवारि क्रीडासरो विदूरात्, मेघानामन्तरे मध्ये आलक्ष्यमीषद्दृश्यम्। 'आ ईषदर्थेऽभिव्याप्तावित्यमरः। इन्दुबिम्बमिव, आभाति ॥ ३८ ॥

पुरेति। पुरा पूर्वस्मिन् काले दर्भाङ्कुरमात्रवृत्तिः तन्मात्राहारः मृगैः सार्द्धं सह चरन् स ऋषिः समाधेस्तपसो भीतेन मघोना इन्द्रेण पञ्चानामप्सरसां यौवनम्। तद्धितार्थेत्यादिना उत्तरपद समासः। तदेव कूटबन्धं कपटयन्त्रमुपनीतः। उन्माथः कूटयन्त्रं स्यादित्यमरः। किलेत्यैतिह्ये। मृगसाहचर्यात् मृगवदेव बद्ध इति भावः ॥ ३९ ॥

तस्येति। अन्तर्हितसौधभाजः जलान्तर्गतप्रासादगतस्य तस्य शातकर्णेः अयं प्रसक्तः सन्ततः सङ्गीतमृदङ्गघोषो वियद्गतः सन् पुष्पकस्य चन्द्रशालाः शिरोगृहाणि। चन्द्रशाला शिरोगृहमित्यमरः। क्षणं प्रतिश्रुद्भिः प्रतिध्वानैः मुखराः ध्वनन्तीः करोति। स्त्री प्रतिश्रुत्प्रतिध्वाने इत्यमरः ॥ ४० ॥

हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥४१॥

* अमुं सहासप्रहितेक्षणानि
व्याजार्द्धसन्दर्शितमेखलानि ।
नालं विकर्त्तुं जनितेन्द्रशङ्कं
सुराङ्गनाविभ्रमचेष्टितानि ॥४२॥

हविरिति । नाम्ना सुतीक्ष्णः सुतीक्ष्णनामा चरितेन दान्तः सौम्यः असौ अपरस्तपस्वी एधवतामिन्धनवताम् । काष्टं दार्विन्धनं त्वेध इत्यमरः । चतुर्णां हविर्भुजाम् अग्नीनां मध्ये ललाटं तपतीति ललाटन्तपः सूर्यः । असूर्य्यललाटयोर्दृशितपोरिति खश्प्रत्ययः, अरुर्द्विषदित्यादिना मुमागमः । ललाटन्तपः सप्तसप्तिः सप्ताश्वः सूर्य्योयस्य स तथोक्तः सन् तपस्यति तपश्चरति । कर्मणोरोमन्थ तपोभ्यां वर्त्तिचरोरिति क्यङ्, तपसः परस्मैपदञ्चेति वक्तव्यम् ॥ ४१ ॥

अमुमिति । जनितेन्द्रशङ्कं तपसेति शेषः अमुं सुतीक्ष्णं सहासं प्रहितानीक्षणानि दृष्टयो येषु तानि व्याजेन केनचिन्मिषेण । पुंस्यद्धों ऽर्द्धं समेंऽशके इति विश्वः । अर्द्धमीषत् सन्दर्शिताः मेखलाः येषु तानि सुराङ्गनानां विभ्रमाः विलासा एव चेष्टितानि विकर्त्तुं स्खलयितुम् अलं समर्थानि न बभूवुरिति शेषः ॥ ४२ ॥

एषइति । ऊर्द्धबाहुरेषः सुतीक्ष्णः अक्षमालैव वलयं यस्य तं मृगाणां कण्डूयितारं कुशाएव सूचयः ताः लूनातीति कुशसूचिलावन्तम् । कर्म्मण्यणित्यण् । एभिर्विशेषणैः जयशीलत्वं भूतदया कर्म-

एषोऽक्षमालावलयं मृगाणां
कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे भुजमूर्ध्वबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥४३॥
वाचंयमत्वात् प्रणतिं ममैषः
कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः ।
दृष्टिं विमानव्यवधानमुक्तां
पुनः सहस्रार्चिषि सन्निधत्ते ॥४४॥
अदः शरण्यं शरभङ्गनाम्न-
स्तपोवनं पावनमाहिताग्नेः ।

चमत्वञ्च द्योत्यते। सव्यादितरं दक्षिणं भुजं मे मम सभाजने सम्मान निमित्ते। निमित्तात्कर्मयोगइति सप्तमी। इतः प्राध्वं प्रकृतानुकूलं बन्धं प्रयुङ्क्ते। आनुकूल्यार्थकं प्राध्वमित्यमरः। अव्ययञ्चैतत् ॥ ४३ ॥

वाचयमत्वादिति। एष सुतीक्ष्णः वाचं यच्छतीति वाचयमो मौनव्रती। वाचि यमोव्रतइति खच्प्रत्ययः, वाचंयमपुरन्दरौ चेति मुम्। तस्य भावस्तत्त्वात् मम प्रणतिं किञ्चिन्मूर्ध्नः कम्पेन प्रतिगृह्य विमानेन व्यवधानं तिरोधानं तस्मान्मुक्ताम्। अपेतापोढमुक्तपतितेति पञ्चमीसमासः। दृष्टिं पुनः सहस्रार्चिषि सूर्ये सन्निधत्ते सम्यक् धत्तइत्यर्थः, अन्यथा स्वर्गाकल्पभङ्गात् ॥ ४४ ॥

अदइति। शरणे रक्षणे साधु शरण्यं पावयतीति पावनम् अदो दृश्यमानं तपोवनम् आहिताग्नेः शरभङ्गनाम्नो मुनेः सम्बन्धि, यः

चिराय सन्तर्प्य समिद्भिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत् ॥४५॥
छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसम्भाव्यफलेष्वमीषु।
तस्यातिथीनामधुना सपर्य्या
स्थिता सुपुत्रेष्विव पादपेषु ॥४६॥
धारास्वनोद्गारिदरीमुखोऽसौ
शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः।
बध्नाति मे बन्धुरगात्रि चक्षुः
दृप्तः ककुद्मानिव चित्रकूटः ॥४७॥

शरभङ्गः चिराय अग्निं समिद्भिः सन्तर्प्य तर्पयित्वा ततो मन्त्रैः पूतां शुद्धां तनुमप्यहौषीत् हुतवान्। जुहोतेर्लुङ् ॥ ४५ ॥

छायेति। अधुना अस्मिन् काले तस्य शरभङ्गस्य सम्बन्धिनी अतिथीनां सपर्य्या अतिथिपूजा। पूजा नमस्यापचितिः सपर्य्यार्च्चार्हणाः समाइत्यमरः। छायाभिः विनीतोऽपनीतः अध्वपरिश्रमो यैः तेषु भूयिष्ठानि बहुतमानि सम्भाव्यानि श्लाघ्यानि फलानि येषां तेषु अमीषु पादेषु आश्रमवृक्षेषु सुपुत्रेष्विव स्थिता, पुत्रैरिव पादपैरनुष्ठीयतइत्यर्थः ॥ ४६ ॥

धारेति। धारा निर्झराः यद्वा धारया सातत्येन स्वनोद्गारि दर्य्येव मुखं यस्य सः शृङ्गं शिखरं विषाणञ्च तस्याग्रे लग्नोऽम्बुदएव वप्रपङ्को वप्रक्रीड़ासक्तपङ्को यस्य सः असौ चित्रकूटः हे बन्धुरगात्रि

एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥४८॥

अयं सुजातोऽनुगिरं तमालः
प्रवालमादाय सुगन्धि यस्य।
यवाङ्कुरापाण्डुकपोलशोभी
मयावतंसः परिकल्पितस्ते ॥४९॥

उन्नतानताङ्गि। वन्धुरं तून्नतानतमित्यमरः। दृप्तः ककुद्मान् वृषभ इव मे चक्षुः बध्नाति नान्यासक्तं करोति ॥ ४७ ॥

एषेति। प्रसन्नोनिर्मलः स्तिमितो निस्पन्दः प्रवाहो यस्याः सा विदूरस्यान्तरस्य मध्यवर्त्त्यवकाशस्य भावात् तन्वी दूरदेशवर्त्तित्वात्तनुत्वेनावभासमाना मन्दाकिनी नाम काचिच्चित्रकूटनिकटगा एषा सरित् नगोपकण्ठे भूमेः कण्ठगता मुक्तावलीव भाति। अत्र नगस्य गिरस्त्वनुपकण्ठस्य कण्ठत्वञ्च गम्यते ॥ ४८ ॥

अयमिति। गिरेः समीपे अनुगिरम्। गिरेश्च सेनकस्येति समासान्तः टच्प्रत्ययः। सुजात समालोऽयं दृश्यते। यस्य तमालस्य शोभनोगन्धो यस्य तत् सुगन्धि। गन्धस्येत्यादिना इकारः समासान्तः। प्रवालं पल्लवमादाय मया ते यवाङ्कुरवदापाण्डौ कपोले शोभते यः सोऽवतंसः परिकल्पितः ॥ ४९ ॥

अनिग्रहेति। अनिग्रहत्रासा दण्डभयरहिता अपि विनीताः सत्वाः जन्तवो यस्मिंस्तत् अपुष्पलिङ्गात् पुष्पनिमित्तं विनैव फलबन्धि-

अनिग्रहत्रासविनीतसत्त्व
मपुष्पलिङ्गात् फलबन्धिवृक्षम्।
वनं तपःसाधनमेतदत्रे
राविष्कृतोदग्रतरप्रभावम् ॥५०॥

अत्राभिषेकाय तपोधनानां
सप्तर्षिहस्तोद्धृतहेमपद्माम्।
प्रवर्त्तयामास किलानुसूया
त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥५१॥

वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः।
निर्वातनिष्कम्पतया विभान्ति
योगाधिरूढा इव शाखिनोऽपि ॥५२॥

नः फलबन्धिनः वृक्षाः यस्मिन् तत् अतएव आविष्कृतोदग्रतरप्रभावम् अत्रेर्मुने स्तपसः साधनं वनमेतत् ॥ ५० ॥

अत्रेति। अत्र वने अनुसूया अत्रिपत्नी, सप्त च ते ऋषयश्च सप्तर्षयः दिक् संख्ये संज्ञायामिति समासः। तेषां हस्तैरुद्धृतानि हेमपद्मानि यस्यास्तां त्र्यम्बकमौलिमालां हरशिरःस्रजं त्रिस्रोतसं भागीरथीं तपोधनानाम् ऋषीणाम् अभिषेकाय स्नानाय, प्रवर्त्तयामास, किलेत्यैतिह्ये ॥ ५१ ॥

वीरेति। वीरासनैः जयसाधनैः ध्यानं जुषन्ते सेवन्ते ध्यानजुषः तेषां तैरुपविश्य ध्यायताम् ऋषीणां सम्बन्धिनः समध्यासितवेदिमध्याः। इदं वीरासनस्थानीयम्। अमी शाखिनोऽपि निवातनिष्कम्पतया

त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः।
राशिर्मणीनामिव गारुड़ानां
सपद्मरागः फलितो विभाति ॥५३॥

क्वचित् प्रभालेपिभिरिन्द्रनीलै
र्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजाना-
मिन्दीवरैरुत्खचितान्तरेव ॥५४॥

योगाधिरूढाइव ध्यानभाजइव विभान्ति। ध्यायन्तोपि निश्चलाङ्गा भवन्ति। वीरासने बध्निचः। एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितम्। इतरस्मिन् तथा चान्यं वीरासनमुदाहृतमिति ॥ ५२ ॥

त्वयेति। त्वया पुरस्तात् पूर्वं यः उपयाचितः प्रार्थितः। तथा च रामायणे। न्यग्रोधं तमुपस्थाय वैदेही वाक्यमब्रवीत्। नमस्तेऽस्तु महावृक्ष पारयेन्मे व्रतं पतिरिति। श्याम इति प्रतीतः स वटोऽयं फलितः सन् सपद्मरागो गारुड़ानां मणीनां राशिरिव विभाति ॥ ५३ ॥

क्वचिदित्यादिभिश्चतुर्भिः श्लोकैः प्रयागे गङ्गायमुनासङ्गमं वर्णयति

क्वचिदिति। हे अनवद्याङ्गि यमुनातरङ्गैर्भिन्नप्रवाहा मिश्रौघा गङ्गा जाह्नवी विभाति त्वं पश्य। कैव, क्वचित्प्रदेशे प्रभया लिम्पन्ति सन्निहितमिति प्रभालेपिभिरिन्द्रनीलैरनुविद्धा सह गुम्फिता मुक्तामयी यष्टिरिव हारावलिरिव विभाति। अन्यत्र प्रदेशे इन्दीवरै-र्नीलोत्पलैरुत्खचितान्तरा सह ग्रथिता सितपङ्कजानां पुण्डरीकाणां मालेव, विभातीति सर्वत्र सम्बन्धः ॥ ५४ ॥

क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥५५॥

क्वचित्प्रभा चान्द्रमसी तमोभि-
श्छायाविलीनैः शबलीकृतेव।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥५६॥

क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य।
पश्यानवद्याङ्गि विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः ॥५७॥

क्वचिदिति। क्वचित् कादम्बसंसर्गवती नीलहंससंसृष्टा प्रियं मानसं नाम सरो येषां तेषां खगानां राजहंसानां पङ्क्तिरिव। राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता इत्यमरः। अन्यत्र कालागुरुणा दत्तपत्रा रचितमकरिका भुवश्चन्दनकल्पिता भक्तिरिव ॥ ५५ ॥

क्वचिदिति। क्वचित् छायासु विलीनैः स्थितैस्तमोभिः शबलीकृता कर्बुरीकृता चान्द्रमसी प्रभा चन्द्रिकेव। अन्यत्र रन्ध्रेष्वालक्ष्यनभःप्रदेशा शुभ्रा शरदभ्रलेखा शरन्मेघपङ्क्तिरिव ॥ ५६ ॥

क्वचिदिति। क्वचित् कृष्णोरगभूषणा भस्माङ्गरागा ईश्वरस्य तनुरिव विभाति। शेषो व्याख्यातः। कलापकम् ॥ ५७ ॥

समुद्रपत्न्योर्जलसन्निपाते
पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूय-
स्तनुत्यजां नास्ति शरीरबन्धः ॥५८॥

पुरं निषादाधिपतेरिदं तत्
यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत् सुमन्त्रः
कैकेयि कामाः फलितास्तवेति ॥५९॥

* पयोधरैः पुण्यजनाङ्गनानां
निर्विष्टहेमाम्बुजरेणु यस्या. ।

समुद्रेति । अत्र समुद्रपत्न्योः गङ्गायमुनयो र्जलसन्निपाते सङ्गमे अभिषेकात् स्नानात् पूतात्मनां तनुत्यजां पुंसां तत्त्वावबोधेन तत्त्वज्ञानेन विनापि प्रारब्धशरीरत्यागानन्तरं भूयः पुनः शरीरबन्धः शरीरयोगो नास्ति किल । अन्यत्र ज्ञानादेव मुक्तिः अत्र स्नानादेव मुक्तिरित्यर्थः ॥ ५८ ॥

पुरमिति । निषादाधिपते गुहस्य तत्पुरमिदं यस्मिन् पुरे मया मौलिमणिं विहाय जटासु बद्धासु रचितासु सतीषु सुमन्त्रः हे कैकेयि तव कामाः मनोरथाः फलिताः सफला जाताः इत्यरुदत् । रुदिरश्रुविमोचने लुङ् ॥ ५९ ॥

पयोधरैरिति । पुण्यजनाङ्गनानां यक्षस्त्रीणां पयोधरैः स्तनैः निर्विष्ट उपभुक्तो हेमाम्बुजरेणु र्यस्य तत् । तत्र ताः क्रीडन्तीति व्यज्यते । ब्रह्मणइदं ब्राह्मम् । नस्तद्धितइति टिलोपः । ब्राह्मं

ब्राह्मं सरः कारणमाप्तवाचो
बुद्धेरिवाव्यक्तमुदाहरन्ति ॥६०॥
जलानि या तीरनिखातयूपा
वहत्ययोध्यामनु राजधानीम्।
तुरङ्गमेधावभृथावतीर्णै-
रिक्ष्वाकुभिः पुण्यतरीकृतानि ॥६१॥
यां सैकतोत्सङ्गसुखोचितानां
प्राज्यैः पयोभिः परिवर्द्धितानाम्।
सामान्यधात्रीमिव मानसं मे
सम्भावयत्युत्तरकोशलानाम् ॥६२॥

सरो मानसाख्यं सरय्वाः, बुद्धेर्महत्तत्त्वस्याव्यक्तं प्रधानमिव, कारणम् आप्तस्य वाचः आप्तवाचो वेदाः यद्वा बहुव्रीहिणा मुनयः उदाहरन्ति प्रचक्ष्यते ॥ ६० ॥

जला ेति। यूपः संस्कृतः पशुबन्धनार्थो दारुविशेषः। तीरनिखातयूपा या सरयूः तुरङ्गमेधाः अश्वमेधाः तेष्ववभृथार्थमेवावतीर्णैरवरूढ़ै रिक्ष्वाकुभिरिक्ष्वाकुगोत्रापत्यैः पूर्वैः। तद्राजत्वादणो-लुक्। पुण्यतरीकृतानि अतिशयेन पुण्यानि कृतानि जलानि अयोध्यां राजधानी नगरीम् अनु समीपे तया लक्षितेत्यर्थः। अनुशब्दस्य लक्षणेत्थम्भूतेत्यादिना कर्मप्रवचनीयत्वात् तद्योगे द्वितीया। वहति प्रापयति ॥ ६१ ॥

यामिति। यां सरयूं मे मानसं कर्तृ, सैकतं पुलिनं तदेवोत्सङ्गः तत्र यत्सुखं तत्रोचितानां प्राज्यैः प्रभूतैः पयोभिरम्बुभिः क्षीरैश्च।

सेयं मदीया जननीव तेन
मान्येन राज्ञा सरयूर्वियुक्ता।
दूरे वसन्तं शिशिरानिलैर्मां
तरङ्गहस्तैरुपगूहतीव॥६३॥

विरक्तसन्ध्याकपिशं पुरस्तात्
यतो रजः पार्थिवमुज्जिहीते।
शङ्के हनूमत्कथितप्रवृत्तिः
प्रत्युद्गतो मां भरतः ससैन्यः॥६४॥

पयः क्षीरं पयोऽम्बु चेत्यमरः। परिवर्द्धितानां पुष्टानाम् उत्तरकोशलानाम् उत्तरकोशलेश्वराणां सामान्यधात्रीं साधारणमातरमिव, सम्भावयति। धात्री जनन्यामलकी वसुमत्युपमातृष्विति विश्वः ॥ ६२ ॥

सेति। मदीया जननी कौशल्येव मान्येन पूज्येन तेन राज्ञा दशरथेन वियुक्ता सेयं सरयूः दूरे वसन्तं प्रोष्यागच्छन्तमित्यर्थः मां पुत्रभूतं शिशिरानिलैः तरङ्गैरेव हस्तैरुपगूहतीवालिङ्गतीव ॥ ६३ ॥

विरक्तेति। विरक्ता अतिरक्ता या सन्ध्या तद्वत् कपिशं ताम्रं पृथिव्या इदं पार्थिवं रजो धूलिः पुरस्तादग्रे यतो यस्मात् कारणादुज्जिहीते उद्गच्छति तस्मात् हनुरस्यास्तीति हनूमान्। शरादीनाञ्चेति दीर्घः। तेन कथिता प्रवृत्तिः अस्मदागमनवार्त्ता यस्मै स भरतः ससैन्यः सन् मां प्रत्युद्गत इति शङ्के तर्कयामि। शङ्का भयवितर्कयोरिति शब्दार्णवः। अत्र यत्तदोर्नित्यसम्बन्धात्तच्छब्दलाभः ॥ ६४ ॥

अद्धा श्रियं पालितसङ्गराय
प्रत्यर्पयिष्यत्यनघां स साधुः।
हत्वा निवृत्ताय मृधे खरादीन्
संरक्षितां त्वामिव लक्ष्मणो मे ॥६५॥

असौ पुरस्कृत्य गुरुं पदातिः
पश्चादवस्थापितवाहिनीकः।
वृद्धैरमात्यैः सह चीरवासाः
मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥६६॥

* पित्रा विसृष्टां मदपेक्षया यः
श्रियं युवाप्यङ्कगतामभोक्ता।

अद्धेति। किञ्च, साधुः सज्जनः स भरतः। साधुर्वार्द्धुषिके चारौ सज्जने चापि वाच्यवदिति विश्वः। पालितसङ्गराय पालितपितृप्रतिज्ञाय मे मह्यम् अनघाम् अदोषां भोगाभावादनुच्छिष्टां किन्तु संरक्षितां श्रियम्, मृधे युद्धे खरादीन् हत्वा निवृत्ताय लक्ष्मणः संरक्षिताम् अनघां त्वामिव, प्रत्यर्पयिष्यति अद्धा सत्यम्। सत्ये त्वद्धाञ्जसा द्वय-मित्यमरः ॥ ६५ ॥

असाविति। असौ पदातिः पादचारी चीरवासाः वल्कलवसनो भरतः पश्चात् पृष्ठभागेऽवस्थापिता वाहिनी सेना येन स तथोक्तः सन्। नद्यृतश्चेति कप्। गुरुं वशिष्ठं पुरस्कृत्य वृद्धैरमात्यैः सह अर्घ्यपाणिः सन् मामभ्युपैति ॥ ६६ ॥

पित्रेति। योभरतः पित्रा विसृष्टां दत्ताम् अङ्कमुत्सङ्गं गतामपि यां श्रियं युवापि मदपेक्षया मद्भक्त्या अभोक्ता सन्। दृढव्रतत्वाज्जितेन्द्रियत्वाच्चेति

इयन्ति वर्षाणि तया सहोग्र-
मभ्यस्यतीव व्रतमासिधारम् ॥ ६७॥

एतावदुक्तवति दाशरथौ तदीया-
मिच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयाभि-
रुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥ ६८ ॥

तस्मात् पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्तः ।
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फाटिकेन रामः ॥ ६९ ॥

षष्ठीनिषेधः। इयन्ति वर्षाणि एतावतो वत्सरान् । अत्यन्तसंयोगे द्वितीया। तया श्रिया सह, स्त्रियेति गम्यते, उग्रं दुश्चरम् आसिधारं नाम व्रतम् अभ्यस्यतीव वर्त्तयतीव। युवा युवत्या सार्द्धं यन्मुग्धभर्तृव-दाचरेत्। अन्तर्निवृत्तसङ्गः स्यादासिधारव्रतं हि तदिति यादवः। इदञ्चासिधाराचङ्क्रमणतुल्यत्वादासिधारव्रतमित्युक्तम् ॥ ६७ ॥

एतावदिति। दाशरथौ रामे एतावदुक्तवति सति विमानं पुष्पकं कर्तृ तदीयां रामसम्बन्धिनीमिच्छाम् अधिदेवतया नियन्त्र्या विदित्वा तत्प्रेरितं सदित्यर्थः सविस्मयाभिर्भरतानुगाभिः प्रकृतिभिः प्रजाभिः उद्वीक्षितं ज्योतिष्पथादाकाशादवततार ॥ ६८ ॥

तस्मादिति। रामः सेवायां विचक्षणः कुशलो हरीश्वरः सुग्रीवः तेन दत्तो हस्तो हस्तावलम्बो यस्य तादृशः सन् स्वजनत्वात् पुरःसरो विभीषणस्तेन दर्शितेन अदूरं महीतलं यस्य तेन भङ्गिभिर्विच्छित्तिभिः

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
सभ्रातरं भरतमर्घ्यपरिग्रहान्ते।
पर्य्यश्रुरस्वजत मूर्द्धनि चोपजघ्रौ
तद्भक्त्यपोढ़पितृराज्यमहाभिषेके ॥७०॥

श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान्।
अन्वग्रहीत् प्रणमतः शुभदृष्टिपातैः
वार्त्तानुयोगमधुराक्षरया च वाचा ॥७१॥

रचितस्फाटिकेन सोपानपर्वणा मार्गेण तस्मात् यानात् पुष्पकात् अवातरत् अवतीर्णवान्। तरतेर्लङ् ॥ ६९ ॥

इक्ष्वाकिति। प्रयतः स रामः इक्ष्वाकुवंशगुरवे वशिष्ठाय प्रणम्य नमस्कृत्य अर्घ्यस्य परिग्रहः स्वीकार स्तस्यान्ते पर्य्यश्रुः परिगतानन्दवाष्पः सन् सभ्रातरं भरतम् अस्वजत आलिङ्गत्, तस्मिन् रामे भक्त्या अपोढः परिहृतः पितृराज्यमहाभिषेको येन तस्मिन् मूर्द्धनि उपजघ्रौ च। घ्रागन्धोपादाने लिटि रूपम् ॥ ७० ॥

श्मश्रुविति। श्मश्रूणां मुखरोम्णां प्रवृद्ध्या संस्काराभावादभिवृद्ध्या जनिता आननेषु विक्रिया विकृतिर्येषां तान् अतएव प्ररोहैः शाखावलम्बिभिः अधोमुखैर्मूलैः जटिलान् जटावतः प्लक्षान् न्यग्रोधानिव स्थितान् प्रणमतो मन्त्रिवृद्धांश्च शुभैः कृपार्द्रैः दृष्टिपातैः वार्त्तस्यानुयोगेन कुशलप्रश्नेन मधुराक्षरया वाचा च अन्वग्रहीत् अनुगृहीतवान् ॥ ७१ ॥

दुर्ज्जातेति। अयं मे दुर्ज्जातबन्धुः आपद्बन्धुः। दुर्ज्जातं व्यसनं प्रोक्तमिति विश्वः। ऋक्षहरीश्वरः सुग्रीवः, एषः समरेषु पुरःप्रहर्त्ता

दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरःप्रहर्त्ता ।
इत्यादृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ ७२ ॥
सौमित्रिणा तदनु संससृजे स चैन-
मुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन
क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥ ७३ ॥

पौलस्त्यो विभीषणः इति आदृतेनादरवता। कर्त्तरि क्तः। रघूणां नन्दनेन रामेण कथितावुभौ विभीषणसुग्रीवौ लक्ष्मणमनुजमपि व्युत्क्रम्य आलिङ्गनादिभिरसम्भाव्य भरतो ववन्दे ॥ ७२ ॥

सौमित्रिणेति। तदनु सुग्रीवादिवन्दनानन्तरं स भरतः सौमित्रिणा संससृजे सङ्गतः। सृज विसर्गे दैवादिकात् कर्त्तरि लिट्। नम्रशिरसं प्रणतमेनं सौमित्रिमुत्थाप्य भृशं गाढमालिलिङ्ग च, किं कुर्वन्, रूढेन्द्रजित् प्रहरणव्रणैः कर्कशेनास्य सौमित्रेरुरःस्थलेन भुजमध्यं स्वकीयं क्लिश्यन्निव पीडयन्निव। क्लिश्नातिरयं सकर्म्मकः क्लिश्नाति भुवनत्रयमिति दर्शनात्। ननु रामायणे, ततो लक्ष्मणमासाद्य वैदेहीञ्च परन्तप। अभिवाद्य ततः प्रीतो भरतो नाम चाब्रवीदिति भरतस्य कानिष्ठं प्रतीयते किमर्थं ज्यैष्ठमवलम्ब्य आर्ज्जवेन श्लोकौ व्याख्यातः सत्यम्। किन्तु रामायणश्लोकार्थटीकाकृतोक्तः श्रूयताम्, ततो लक्ष्मणमासाद्येत्यादिश्लोके आसादनं लक्ष्मणवैदेह्योः, अभिवादनन्तु वैदेह्या एव, अन्यथा पूर्वोक्त भरतस्य ज्यैष्ठ्यं विरुध्येतेति ॥ ७३ ॥

रामाज्ञया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान्।
तेषु क्षरत्सु बहुधा मदवारिधाराः
शैलाधिरोहणसुखान्युपलेभिरे ते ॥७४॥

सानुप्लवः प्रभुरपि क्षणदाचराणां
भेजे रथान् दशरथप्रभवानुशिष्टः।
मायाविकल्परचितैरपि ये तदीयै-
र्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥७५॥

रामेति। तदानीं हरिचमूपतयः रामाज्ञया मनुष्यवपुः कृत्वा गजेन्द्रानारुरुहुः, बहुधा मदवारिधाराः क्षरत्सु वर्षत्सु तेषु गजेन्द्रेषु ते कपियूथनाथाः शैलाधिरोहणसुखानि उपलेभिरे अनुबभूवुः ॥ ७४ ॥

सानुप्लवइति। सानुप्लवः सानुगः। अभिसारस्त्वनुसरः सहायोऽनुप्लवोऽनुगइति यादवः। क्षणदाचराणां प्रभुः विभीषणोऽपि प्रभवत्यस्मादिति प्रभवो जनकः दशरथः प्रभवो यस्य स दशरथप्रभवः रामः तेनानुशिष्ट आज्ञप्तः सन् रथान् भेजे। तानेव विशिनष्टि, ये रथाः मायाविकल्परचितैः सङ्कल्पविशेषनिर्मितैरपि तदीयैर्विभीषणीयैः स्यन्दनैः तुलितकृत्रिमभक्तिशोभाः तुलिता समीकृता कृत्रिमा क्रियया निर्वृत्ता भक्तीनां शोभा येषां ते तथोक्ताः न भवन्ति तेऽपि तत्साम्यं न लभन्तइत्यर्थः। कृत्रिमेत्यत्र ड्वितः क्त्रिरिति क्त्रिप्रत्ययः, क्त्रेर्म्मम् नित्यमिति ममागमः ॥ ७५ ॥

भूयइति। ततो रघुपतिः सावरजो भरतलक्ष्मणसहितः अन्

भूयस्ततो रघुपतिर्विलसत्पताक-
मध्यास्त कामगति सावरजो विमानम्।
दोषातनं बुधबृहस्पतियोगदृश्य-
स्तारापतिस्तरलविद्युदिवाभ्रवृन्दम्॥७६॥

तत्रेश्वरेण जगतां प्रलयादिवोर्वीं
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्
प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे॥७७॥

लङ्केश्वरप्रणतिभङ्गदृढव्रतं तत्
वन्द्यं युगं चरणयोर्जनकात्मजायाः।

विलसत्पताकं कामेनेच्छानुसारेण गतिर्यस्य तद्विमानं भूयः पुनरपि, बुधबृहस्पतिभ्यां योगेन दृश्यो दर्शनीयः तारापतिश्चन्द्रो दोषाभवं दोषातनम्। सायञ्चिरं प्राह्णे इत्यादिना दोषाशब्दादव्ययात् ट्यु प्रत्ययः। तरलविद्युच्चञ्चलतडिदभ्रवृन्दमिव, अध्यास्त अधिष्ठितवान् ॥ ७६ ॥

तत्रेति। तत्र विमाने, जगताम् ईश्वरेणादिवराहेण प्रलयादुर्वीमिव, वर्षात्ययेन शरदागमेन अभ्रघनान्मेघसङ्घातादिन्दोरुचं चन्द्रिकामिव, रामेण दशकण्ठ एव कृच्छ्रं सङ्कटं तस्मात् प्रत्युद्धृतां धृतिमतीं सन्तोषवतीं मैथिलसुतां सीतां भरतो ववन्दे ॥ ७७ ॥

लङ्केश्वरेति। लङ्केश्वरस्य रावणस्य प्रणतीनां भङ्गेन निरासेन दृढव्रतमखण्डितपातिव्रत्यम् अतएव वन्द्यं तत् जनकात्मजायाश्चरणयो र्युगम्, ज्येष्ठानुवृत्त्या जटिलं जटायुक्तं साधोः सज्जनस्यास्य भर-

ज्येष्ठानुवृत्तिजटिलञ्च शिरोऽस्य साधो
रन्योन्यपावनमभूदुभयं समेत्य ॥७८॥

क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्य्यमार्य्यः
साकेतोपवनमुदारमध्युवास ॥७९॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
दण्डकाप्रत्यागमनो नाम त्रयोदशः सर्गः ।

तस्य शिरश्च इत्युभयं समेत्य मिलित्वा अन्योन्यस्य पावनं शोधकम् अभूत् ॥ ७८ ॥

क्रोशेति । आर्य्यः पूज्यः काकुत्स्थो रामः प्रकृतयः प्रजाः पुरःसराः यस्य तेन स्तिमितजवेन मन्दवेगेन पुष्पकेण । क्रोशोऽध्वपरिमाणविशेषः । क्रोशार्द्धं क्रोशैकदेशं गत्वा शत्रुघ्नेन प्रतिविहिताः सज्जिताः उपकार्य्याः पटभवनानि यस्मिंस्तत् उदारं महत् साकेतस्यायोध्यायाः उपवनम् अध्युवास अधितष्ठौ । साकेतः स्यादयोध्यायां कोशला नन्दिनी तथेति यादवः ॥ ७९ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां त्रयोदशः सर्गः ॥



चतुर्दशः सर्गः ।



भर्तुः प्रणाशादथ शोचनीयं
दशान्तरं तत्र समं प्रपन्ने ।
अपश्यतां दाशरथी जनन्यौ
छेदादिवोपघ्नतरोर्व्रतत्यौ ॥१॥

उभावुभाभ्यां प्रणतौ हतारी
यथाक्रमं विक्रमशोभिनौ तौ ।
विस्पष्टमस्त्रान्धतया न दृष्टौ
ज्ञातौ सुतस्पर्शसुखोपलम्भात् ॥२॥

वर्ण्योदनं मैथिलकन्यकायाः सौन्दर्यसर्वस्वमहानिधानम् ।
गयाङ्घ्रिपङ्केरुहयोः समानं रामस्य वन्दे रमणीयमास्यम् ॥

भर्तुरिति । अथ उपवनाभिषेकानन्तरं दाशरथी रामलक्ष्मणौ, उपघ्नतरोराश्रयवृक्षस्य । 'उपघ्न आश्रये' इति निपातः । छेदात् व्रतत्यौ लते इव । 'वल्ली तु व्रततिर्लता' इत्यमरः । भर्तुर्दशरथस्य प्रणाशात् शोचनीयं दशान्तरम् अवस्थान्तरम् । 'अवस्थायां वस्त्वन्ते स्याद्दशा-' इति विश्वः । प्रपन्ने प्राप्ते जनन्यौ कौशल्यासुमित्रे तत्र साकेतोपवने समं युगपदपश्यताम् । दृशेः कर्तरि लङ् ॥ १ ॥

उभाविति । यथाक्रमं स्वस्वनामपूर्वकं प्रयातौ नमस्कुर्वन्तौ हतारी हतशत्रुकौ विक्रमशोभिनौ तावुभौ रामलक्ष्मणौ उभाभ्यां मातृ-

आनन्दजः शोकजमश्रु वाष्प-
स्तयोरशीतं शिशिरो विभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं
हिमाद्रिनिस्यन्द इवावतीर्णः ॥३॥

ते पुत्रयोर्नैर्ऋतशस्त्रमार्गा-
नार्द्रानिवाङ्गे सदयं स्पृशन्त्यौ ।
अपीप्सितं क्षत्रकुलाङ्गनानां
न वीरसूशब्दमकामयेताम् ॥४॥

क्लेशावहा भर्त्तुरलक्षणाहं
सीतेति नाम स्वमुदीरयन्ती ।

भ्याम् अस्रैः अम्बुभिः अन्धतया हेतुना । अस्रमश्रु च शोणितमिति यादवः । विस्पष्टं न ददृशौ किन्तु सुतस्पर्शेन यत्सुखं तस्योपलम्भादनुभवात् ज्ञातौ ॥ २ ॥

आनन्दजइति । तयोर्मात्रोः आनन्दजः शिशिरो वाष्पः शोकजमशीतमुष्णमश्रु, उष्णतप्तं घोष्णतप्तं गङ्गासरय्वोर्जलं कर्म अवतीर्णो हिमाद्रेर्निस्यन्दो निर्झर इव, विभेद । आनन्देन शोकस्तिरस्कृत इत्यर्थः ॥ ३ ॥

ते इति । ते मातरौ पुत्रयोरङ्गे शरीरे नैर्ऋतशस्त्राणां राक्षसशस्त्राणां मार्गान् व्रणान् आर्द्रान् सरसानिव सदयं स्पृशन्त्यौ क्षत्रकुलाङ्गनानाम् ईप्सितमिष्टमपि वीरसूर्वीरमातेति शब्दं नाकामयेताम् । वीरप्रसवो दुःखहेतुरिति भावः ॥ ४ ॥

क्लेशावहेति । आवहतीत्यावहा, भर्त्तुः क्लेशावहा क्लेशकारिणी

स्वर्गप्रतिष्ठस्य गुरोर्महिष्या-
वभक्तिभेदेन वधूर्ववन्दे ॥५॥
उत्तिष्ठ वत्से ननु सानुजोऽसौ
वृत्तेन भर्त्ता शुचिना तवैव।
कृच्छ्रं महत्तीर्ण इति प्रियार्हां
तामूचतुस्ते प्रियमप्यमिथ्या ॥६॥
अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्योः।
निर्वर्त्तयामासुरमात्यवृद्धा-
स्तीर्थाहृतैः काञ्चनकुम्भतोयैः ॥७॥

अतएव अलक्षणाहं सीतेति स्वं नाम उदीरयन्ती स्वर्गः प्रतिष्ठा आस्पदं यस्य तस्य स्वर्गस्थितस्य गुरोः श्वशुरस्य महिष्यौ श्वश्र्वौ वधूः स्नुषा। वधूः स्नुषा वधूर्जायेत्यमरः। अभक्तिभेदेन ववन्दे। स्वर्गप्रतिष्ठस्येत्यनेन श्वश्र्वोर्वैधव्यदर्शनदुःखं सूचितम् ॥ ५ ॥

उत्तिष्ठेति। ननु वत्से उत्तिष्ठ असौ सानुजो भर्त्ता तवैव शुचिना वृत्तेन महत्कृच्छ्रं दुःखं तीर्णः तीर्णवान्, इति प्रियार्हां तां वधूं प्रियमप्यमिथ्या सत्यं ते श्वश्र्वौ ऊचतुः। उभयं दुर्वचमिति भावः ॥ ६ ॥

अथेति। अथ जनन्योरानन्दजलैरानन्दवाष्पैः प्रारब्धं प्रक्रान्तं रघुवंशकेतो रामस्य अभिषेकम् अमात्यवृद्धाः तीर्थेभ्यो गङ्गाप्रमुखेभ्य आहृतैरानीतैः काञ्चनकुम्भतोयैः निर्वर्त्तयामासुः निष्पादयामासुः ॥ ७ ॥

सरित्समुद्रान् सरसीश्च गत्वा
रक्षःकपीन्द्रैरुपपादितानि ।
तस्यापतन् मूर्ध्नि जलानि जिष्णो-
र्विन्ध्यस्य मेघप्रभवा इवापः ॥८॥

तपस्विवेषक्रिययापि तावत्
यः प्रेक्षणीयः सुतरां बभूव ।
राजेन्द्रनेपथ्यविधानशोभा
तस्योदितासीत् पुनरुक्तदोषा ॥९॥

स मौलरक्षोहरिभिः ससैन्य-
स्तूर्य्यस्वनानन्दितपौरवर्गः ।
विवेश सौधोद्गतलाजवर्षा-
मुत्तोरणामन्वयराजधानीम् ॥१०॥

सरिदिति। रक्षःकपीन्द्रैः सरितो गङ्गाद्याः समुद्रान् पूर्वादीन् सरसीर्मानसादींश्च गत्वा उपपादितानि उपनीतानि जलानि जिष्णोर्जयशीलस्य। ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः। तस्य रामस्य मूर्ध्नि विन्ध्यस्य विन्ध्याद्रेः मूर्ध्नि मेघप्रभवा आप इव अपतन् ॥ ८ ॥

तपस्वीति। यो रामः तपस्विवेषक्रिययापि तपस्विवेषरचनयापि सुतरामत्यन्तं प्रेक्षणीयस्तावत् दर्शनीयो बभूव, तस्य राजेन्द्रनेपथ्यविधानेन राजवेशरचनया उदिता या शोभा सा पुनरुक्तं नाम दोषो यस्याः सा पुनरुक्तदोषा द्विगुणा आसीत् ॥ ९ ॥

सइति। स रामः ससैन्यः तूर्य्यस्वनैरानन्दितपौरवर्गः सन् मूले

सौमित्रिणा सावरजेन मन्द-
माधूतबालव्यजनो रथस्थः ।
धृतातपत्रो भरतेन साक्षात्
उपायसङ्घात इव प्रवृद्धः ॥११॥
प्रासादकालागुरुधूमराजि-
स्तस्याः पुरो वायुवशेन भिन्ना ।
वनान्निवृत्तेन रघूत्तमेन
मुक्ता स्वयं वेणिरिवावभासे ॥१२॥
श्वश्रूजनानुष्ठितचारुवेषां
कर्णीरथस्थां रघुवीरपत्नीम् ।

भवाः मौलाः मन्त्रिवृद्धाः तैः रक्षोभिः हरिभिश्च सह सौधेभ्यः उद्गत-लाजवर्षामुत्तोरणामन्वयराजधानीं विवेश प्रविष्टवान् ॥ १० ॥

सौमित्रिणेति । सावरजेन शत्रुघ्नयुक्तेन सौमित्रिणा लक्ष्मणेन मन्दमाधूते बालव्यजने चामरे यस्य सः रथस्थः भरतेन धृतातपत्रः एव चतुर्व्यूहो रामः प्रवृद्धः साक्षादुपायानां सामादीनां सङ्घातः समष्टिरिव, विवेशेति पूर्वेण सम्बन्धः ॥ ११ ॥

प्रासादेति । वायुवशेन भिन्ना प्रासादे यः कालागुरुधूमः तस्य राजिः रेखा वनान्निवृत्तेन रघूत्तमेन रामेण स्वयं मुक्ता तस्याः पुरः पुर्याः वेणिरिव आवभासे । पुरोऽपि पतिव्रतासमाधिकृता । न प्रोषिते तु संस्कुर्यान्न वेणीञ्च प्रमोचयेदिति हारीतः ॥ १२ ॥

श्वश्रूजनेति । श्वश्रूजनैरनुष्ठितचारुवेषां कृतसौम्यनेपथ्याम् । क्षा-

प्रासादवातायनदृश्यबन्धैः
साकेतनार्य्योऽञ्जलिभिः प्रणेमुः ॥१३॥

स्फुरत्प्रभामण्डलमानुसूयं
सा बिभ्रती शाश्वतमङ्गरागम् ।
रराज शुद्धेति पुनः स्वपुर्य्यै
सन्दर्शिता वह्निगतेव भर्त्रा ॥१४॥

वेश्मानि रामः परिवर्हवन्ति
विश्राण्य सौहार्द्दनिधिः सुहृद्भ्यः ।
वाष्पायमाणो बलिमन्निकेत-
मालेख्यशेषस्य पितुर्विवेश ॥१५॥

कल्पवेषौ नेपथ्यमित्यमरः । कर्णीरथः स्त्रीयोग्यरे(?)ऽल्परथः । कर्णीरथः प्रवहणमिति यादवः । तत्रस्थां रघुवीरपत्नीं सीतां साकेतनार्य्यः प्रासादवातायनेषु दृश्यबन्धैः लब्धपुटैरञ्जलिभिः प्रणेमुः ॥ १३ ॥

स्फुरदिति । स्फुरत्प्रभामण्डलम् आनुसूयम् अनुसूयया दत्तं शाश्वतं सदातनम् अङ्गरागं बिभ्रती सा सीता भर्त्रा स्वपुर्य्यै शुद्धेति सन्दर्शिता पुनर्वह्निगतेव रराज ॥ १४ ॥

वेश्मानीति । सुहृदो भावः सौहार्द्दं सौजन्यम् । हृद्भगसिन्ध्वन्ते पूर्वपदस्येत्युभयपदवृद्धिः । सौहार्द्दनिधिः रामः सुहृद्भ्यः सुग्रीवादिभ्यः परिवर्हवन्ति उपकरणवन्ति वेश्मानि विश्राण्य दत्त्वा आलेख्यशेषस्य चित्रमात्रशेषस्य पितुः बलिमत् पूजायुक्तं निकेतं गृहं वाष्पायमाणो वाष्पमुद्वमन् विवेश । वाष्पोष्माभ्यामुद्वमने इति क्यङ् प्रत्ययः ॥ १५ ॥

कृताञ्जलिस्तत्र यदम्ब सत्या-
न्नाभ्रश्यत स्वर्गफलाद्गुरुर्नः।
तच्चिन्त्यमानं सुकृतं तवेति
जहार लज्जां भरतस्य मातुः ॥१६॥

तथैव सुग्रीवविभीषणादीन्
उपाचरत् कृत्रिमसंविधाभिः।
सङ्कल्पमात्रोदितसिद्धयस्ते
क्रान्ता यथा चेतसि विस्मयेन ॥१७॥

सभाजनायोपगतान् स दिव्यान्
मुनीन् पुरस्कृत्य हतस्य शत्रोः।

कृताञ्जलिरिति। तत्र निकेतने कृताञ्जलिः सन् रामः, हे अम्ब नो गुरुः पिता स्वर्गः फलं यस्य तस्मात् सत्यात् नाभ्रश्यत न भ्रष्टवान् इति यदभ्रंशनं तत् चिन्त्यमानं विचार्य्यमाणं तव सुकृतम् इत्येव प्रकारेण, भरतस्य मातुः कैकेय्याः लज्जां जहार अपानयत्। राज्ञा प्रतिज्ञा परिपालनं स्वर्गसाधनमित्यर्थः। भरतग्रहणं तदपेक्षयापि कैकेय्यनुसरणद्योतनार्थम् ॥ १६ ॥

तथेति। सुग्रीवविभीषणादीन् संविधीयन्त इति संविधाः भोग्यवस्तूनि कृत्रिमसंविधाभिः तथा तेन प्रकारेणैव उपाचरत् यथा सङ्कल्पमात्रेण इच्छामात्रेणोदितसिद्धयस्ते सुग्रीवादयः चेतसि विस्मयेन क्रान्ताः आक्रान्ताः ॥ १७ ॥

सभाजनायेति। स रामः सभाजनायाभिवन्दनाय उपगतान्

शुश्राव तेभ्यः प्रभवादि वृत्तं
स्वविक्रमे गौरवमादधानम् ॥१८॥
प्रतिप्रयातेषु तपोधनेषु
सुखादविज्ञातगतार्द्धमासान्।
सीतास्वहस्तोपहृताग्र्यपूजान्
रक्षःकपीन्द्रान् विससर्ज्ज रामः ॥१९॥
तच्चात्मचिन्तासुलभं विमानं
हृतं सुरारेः सह जीवितेन।
कैलासनाथोद्वहनाय भूयः
पुष्पं दिवः पुष्पकमन्वमंस्त ॥२०॥

दिवि भवान् मुनीन् अगस्त्यादीन् पुरस्कृत्य हतस्य प्रत्नोरावणस्य प्रभवादि जन्मादिकं स्वविक्रमे गौरवमुत्कर्षमादधानं वृत्तं तेभ्यो मुनिभ्यः शुश्राव स्रुतवान्। विजितोत्कर्षाज्जेतुरुत्कर्ष इत्यर्थः ॥ १८ ॥

प्रतीति। तपोधनेषु मुनिषु प्रतिप्रयातेषु प्रतिनिवृत्य गतेषु सत्सु सुखादविज्ञातएव गतोऽर्द्धमासो येषां तान् अनन्तरं सीतायाः स्वहस्तेनोपहृता दत्ता अग्र्यपूजा उत्तमसम्भावना येभ्यस्तान्, एतेन सौहार्द्दातिशय उक्तः, रक्षः कपीन्द्रान् रामः विससर्ज्ज विसृष्टवान् ॥ १९ ॥

तच्चेति। तत्र आत्मचिन्तासुलभं स्वेच्छामात्रलभ्यं सुरारेः रावणस्य जीवितेन सह हृतं दिवः पुष्पं पुष्पवदाभरणभूतं पुष्पकं विमानं भूयः पुनरपि कैलासनाथस्य कुवेरस्य उद्वहनाय अन्वमंस्त अनुज्ञातवान्। मन्यतेर्लुङ्। भूयोग्रहणेन पूर्वमप्येतत् कौवेरमेवेति सूच्यते ॥ २० ॥

पितुर्नियोगाद्वनवासमेवं
निस्तीर्य्य रामः प्रतिपन्नराज्यः।
धर्म्मार्थकामेषु समां प्रपेदे
यथा तथैवावरजेषु वृत्तिम् ॥२१॥

सर्व्वासु मातृष्वपि वत्सलत्वात्
स निर्विशेषप्रतिपत्तिरासीत्।
षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥२२॥

तेनार्थवान् लोभपराङ्मुखेन
तेन घ्नता विघ्नभयं क्रियावान्।

पितुरिति। रामः एवं पितुर्नियोगात् शासनात् वनवासं निस्तीर्य्य अनन्तर प्रतिपन्नराज्यः सन् धर्मार्थकामेषु यथा तथैवावरजेषु अनुजेषु समां वृत्तिं प्रपेदे अवैषम्येण व्यवहृतवानित्यर्थः ॥ २१ ॥

सर्वास्विति। स रामो वत्सलत्वात् स्निग्धत्वात् नतु लोकप्रतीत्यर्थम्। स्निग्धस्तु वत्सलइत्यमरः। सर्वासु मातृष्वपि निर्विशेषप्रतिपत्तिः तुल्यसत्कार आसीत्। कथमिव चमूनां नेता षण्मुखः षड्भिराननैरापीताः पयोधराः स्तना यासां तासु कृत्तिकास्विव ॥ २२ ॥

तेनेति। लोको लोभपराङ्मुखेन वदान्येन तेन रामेण अर्थवान् धनिकः आस बभूव। तिङन्तप्रतिरूपकमव्ययमेतत्। विघ्नेभ्यो भयं घ्नता नुदता तेन क्रियावाननुष्ठानवान्। विनेत्रा नियामकेन तेन पितृमान् पितृवन्नियच्छतीत्यर्थः। शोकमपनुदतीति शोकापनुदः

तेनास लोकः पितृमान् विनेत्रा
तेनैव शोकापनुदेन पुत्री ॥२३॥
स पौरकार्य्याणि समीक्ष्य काले
रेमे विदेहाधिपतेर्दुहित्रा।
उपस्थित श्चारु वपुस्तदीयं
कृत्वोपभोगोत्सुकयेव लक्ष्म्या ॥२४॥
तयोर्यथाप्रार्थितमिन्द्रियार्थान्
आसेदुषोः सद्मसु चित्रवत्सु।
प्राप्तानि दुःखान्यपि दण्डकेषु
सञ्चिन्त्यमानानि सुखान्यभूवन् ॥२५॥

सुखस्याहर्त्ता तेन। तुन्दशोकयोः परिमृजापनुदोरिति कप्रत्ययः। तेन पुत्री पुत्रवानास पुत्रवदानन्दयतीत्यर्थः ॥ २३ ॥

सइति। स रामः कालेऽवसरे पौराणां कार्य्याणि प्रयोजनानि समीक्ष्य विदेहाधिपतेर्दुहित्रा सीतया, उपभोगोत्सुकया अतएव तदीयं सीतासम्बन्धि चारु वपुः कृत्वा स्थितया लक्ष्म्येव, उपस्थितः सङ्गतः सन् रेमे। उपस्थानं सङ्गतिरिति यादवः ॥ २४ ॥

तयोरिति। चित्रवत्सु वनवासवृत्तान्तलेख्यवत्सु सद्मसु यथा प्रार्थितं यथेष्टम् इन्द्रियार्थानिन्द्रियविषयान् शब्दादीन् आसेदुषोः प्राप्तवतोस्तयोः सीतारामयोः दण्डकेषु दण्डकारण्येषु प्राप्तानि दुःखान्यपि विरहविलापान्वेषणादीनि सञ्चिन्त्यमानानि स्मर्य्यमाणानि सुखानि अभूवन्। स्मारकन्तु चित्रदर्शनमिति द्रष्टव्यम् ॥ २५ ॥

अथेति। अथ सीता अधिकस्निग्धविलोचनेन अत्यन्तमस्खलोच-

अथाधिकस्निग्धविलोचनेन
मुखेन सीता शरपाण्डुरेण।
आनन्दयित्री परिणेतुरासीत्
अनक्षरव्यञ्जितदौर्हृदेन ॥२६॥

तामङ्कमारोप्य कृशाङ्गयष्टिं
वर्णान्तराक्रान्तपयोधराग्राम्।
विलज्जमानां रहसि प्रतीतः
पप्रच्छ रामां रमणोऽभिलाषम् ॥२७॥

सा दष्टनीवारबलीनि हिंस्रैः
सम्बद्धवैखानसकन्यकानि।
इयेष भूयः कुशवन्ति गन्तुं
भागीरथीतीरतपोवनानि ॥२८॥

नेन शरवत् तृणविशेषवत् पाण्डुरेण अतएव अनक्षरमवाग्व्यापारं यथा भवति तथा व्यञ्जितं दौर्हृदं गर्भो येन तेन मुखेन परिणेतुः पत्युरानन्दयित्री आसीत् ॥ २६ ॥

तामिति। प्रतीतो गर्भज्ञानवान् रमयतीति रमणः प्रियां कृशाङ्गयष्टिं वर्णान्तरेण नीलिम्ना आक्रान्तपयोधराग्रां विलज्जमानां तां रामां रहसि अङ्कम् आरोप्य अभिलाषं मनोरथं पप्रच्छ। यतश्च दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयादिति शास्त्रात् नतु लौल्यादित्यनुसन्धेयम् ॥ २७ ॥

सेति। सा सीता हिंस्रैर्दष्टा नीवारा एव बलयो येषु तानि,

तस्मै प्रतिश्रुत्य रघुप्रवीरः
तदीप्सितं पार्श्वचरानुयातः ।
आलोकयिष्यन् मुदितामयोध्यां
प्रासादमभ्रंलिहमारुरोह ॥२९॥

ऋद्धापणं राजपथं स पश्यन्
विगाह्यमानां सरयूञ्च नौभिः ।
विलासिभिश्चाध्युषितानि पौरैः
पुरोपकण्ठोपवनानि रेमे ॥३०॥

स किंवदन्तीं वदतां पुरोगः
स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ।

तिर्य्यग्भिक्षुकादिदानं बलिः । सम्बद्धाः कृतसम्बन्धाः कृतसख्याः वैखानसानां कन्यका येषु तानि कुशवन्ति भागीरथीतीरतपोवनानि भूयः पुनरपि गन्तुमियेषाभिललाष ॥ २८ ॥

तस्मैइति । रघुप्रवीरो रामः तस्मै सीतायै तत् पूर्वोक्तम् ईप्सितं मनोरथं प्रतिश्रुत्य पार्श्वचरैः स्वकालोचितैरनुयातः सन् मुदितामयोध्यामालोकयिष्यन् अभ्रं लेढ़ीत्यभ्रंलिहमभ्रङ्कषं प्रासादमारुरोह । वह ास्रे लिह्इति खश्प्रत्ययः, अरुर्द्विषदिति मुमागमः ॥ २९ ॥

ऋद्धापणमिति । स रामः ऋद्धाः सम्पन्नाः आपणाः पण्यभूमयो यस्मिन् तं राजपथं नौभिः समुद्रवाहिनीभिः विगाह्यमानां सरयूञ्च पौरैर्विलासिभिः अध्युषितानि पुरोपकण्ठोपवनानि च पश्यन् रेमे । विलासिन्यश्च विलासिनश्च विलासिनः । पुमान् स्त्रियेत्येकशेषः ॥ ३० ॥

सइति । वदतां वाग्मिनां पुरोगः श्रेष्ठः विशुद्धवृत्तः सर्वाधिराजः

सर्पाधिराजोरुभुजोऽपसर्पं
पप्रच्छ भद्रं विजितारिभद्रः ॥३१॥
निर्बन्धपृष्टः स जगाद सर्वं
स्तुवन्ति पौराश्चरितं त्वदीयम् ।
अन्यत्र रक्षोभवनोषितायाः
परिग्रहान्मानवदेव देव्याः ॥३२॥
कलत्रनिन्दागुरुणा किलैव-
मभ्याहतं कीर्त्तिविपर्य्ययेण ।
अयोघनेनाय इवाभितप्तं
वैदेहिबन्धोर्हृदयं विदद्रे ॥३३॥

शेष तद्वदुरू भुजौ यस्य सः विजितारिभद्रो विजितारिश्रेष्ठः स रामः स्ववृत्तम् उद्दिश्य भद्रं भद्रनामकम् अपसर्पं चरं किंवदन्ती जनवादं पप्रच्छ । अपसर्पश्चरः स्पशः, किंवदन्ती जनश्रुतिरिति चामरः ॥ ३१ ॥

निर्बन्धेति । निर्बन्धेन आग्रहेण पृष्टः सोऽपसर्पः जगाद । किमिति, हे मानवदेव रक्षोभवने उषितायाः देव्याः सीतायाः परिग्रहात् स्वीकारात् अन्यत्र इतरांशे तं वर्जयित्वेत्यर्थः त्वदीयं सर्वं चरितं पौराः स्तुवन्ति ॥ ३२ ॥

कलत्रेति । एवं किल कलत्रनिन्दया गुरुणा दुर्वहेण कीर्त्तिविपर्ययेण अपकीर्त्त्या अभ्याहतं वैदेहिबन्धोः [illegible] । उभयोः [illegible] इति [illegible], कालिदास इतिवत् । हृदयम् अयो-

किमात्मनिर्व्वादकथामुपेक्षे
जायामदोषामुत सन्त्यजामि।
इत्येकपक्षाश्रयविक्लवत्वा-
दासीत् स दोलाचलचित्तवृत्तिः ॥३४॥

निश्चित्य चानन्यनिवृत्ति वाच्यं
त्यागेन पत्न्याः परिमार्ष्टुमैच्छत्।
अपि स्वदेहात् किमुतेन्द्रियार्थात्
यशोधनानां हि यशो गरीयः ॥३५॥

स सन्निपात्यावरजान् हतौजाः
तद्विक्रियादर्शनलुप्तहर्षान्।

घनेन व्यभितप्तं सन्तप्तम् अयइव विदद्रे विदीर्णम्। कर्त्तरि लिट् ॥ ३३ ॥

किमिति। आत्मनो निर्वादोऽपवादएव कथा ताम् किम् उपेक्षे उत अदोषां साध्वीं जायां सन्त्यजामि। उभयत्रापि प्रश्ने लट्। इत्येकपक्षाश्रये अन्यतरपक्षपरिग्रहे विक्लवत्वादपरिच्छेत्तृत्वात् स रामो दोलाइव चला चित्तवृत्तिर्यस्य स आसीत् ॥ ३४ ॥

निश्चित्येति। किञ्च वाच्यमपवादम् नास्ति अन्येन त्यागातिरिक्तोपायेन निवृत्तिर्यस्य तदनन्यनिवृत्ति निश्चित्य पत्न्यास्त्यागेन परिमार्ष्टुं परिहर्त्तुमैच्छत्। तथाहि, यशोधनानां पुंसां स्वदेहादपि यशो गरीयः गुरुतरम् इन्द्रियार्थात् स्रक्चन्दनवनितादेरिन्द्रियविषयात् गरीय इति किमुत वक्तव्यम्। पञ्चमी विभक्ते इत्युभयत्रापि पञ्चमी। सीता चेन्द्रियार्थएव ॥ ३५ ॥

सइति। हतौजाः निस्तेजस्कः स रामः तस्य रामस्य विक्रिया-

कौलीनमात्माश्रयमाचचक्षे
तेभ्यः पुनश्चेदमुवाच वाक्यम् ॥३६॥
राजर्षिवंशस्य रविप्रसूते-
रुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः
पयोदवातादिव दर्पणस्य ॥३७॥
पौरेषु सोऽहं बहुलीभवन्तम्
अपां तरङ्गेष्विव तैलबिन्दुम् ।
सोढुं न तत्पूर्वमवर्णमीशे
आलानिकं स्थाणुमिव द्विपेन्द्रः ॥३८॥

दर्शनेन लुप्तहर्षान् अवरजान् सन्निपात्य संगमय्य आत्माश्रयं स्वविषयकं कौलीनं निन्दां तेभ्यः आचचक्षे पुनरिदं वाक्यमुवाच च ॥ ३६ ॥

राजर्षीति । रवेः प्रसूतिर्जन्म यस्य तस्य राजर्षिवंशस्य सदाचारशुचेः सद्वृत्तात् शुद्धात् मत्तो मत्सकाशात्, दर्पणस्य पयोदवातादिव अम्भःकणादित्यर्थः कीदृशोऽयं कलङ्कः उपस्थितः प्राप्तः पश्यत । ३७ ।

पौरेष्विति । सोऽहम् अपां तरङ्गेषु तैलबिन्दुमिव पौरेषु बहुलीभवन्तं प्रसरन्तं रूपं पूर्वो यस्य स तं तत्पूर्वम् अवर्णमपवादम् । अवर्णाक्षेपनिर्वादपरीवादापवादवदित्यमरः । द्विपेन्द्रः आलानमेव आलानिकम् । विनयादित्वात्स्वार्थे ठक् । अथवा आलानं बन्धनं प्रयोजनमस्येति आलानिकम् । प्रयोजनमिति ठञ् । स्थाणुं स्तम्भ-

तस्यापनोदाय फलप्रवृत्ता-
वुपस्थितायामपि निर्व्यपेक्षः।
त्यक्ष्यामि वैदेहसुतां पुरस्तात्
समुद्रनेमिं पितुराज्ञयेव ॥३९॥
अवैमि चैनामनघेति किन्तु
लोकापवादो बलवान् मतो मे।
छाया हि भूमेः शशिनो मलत्वे-
नारोपिता शुद्धिमतः प्रजाभिः ॥४०॥
रक्षोवधान्तो नच मे प्रयासः
व्यर्थः स वैरप्रतिमोचनाय।

मिव, चूतवृक्षइतिवत् सामान्यविशेषभावादपौनरुक्त्यं द्रष्टव्यम्। सोढुं नेशे न शक्नोमि ॥ ३८ ॥

तस्येति। तस्यावर्णस्यापनोदाय फलप्रवृत्तौ अपत्योत्पत्तौ उपस्थितायां सत्यामपि निर्व्यपेक्षो निःस्पृहः सन् वैदेहसुताम्, पुरस्तात् पूर्वं पितुराज्ञया समुद्रनेमिं समुद्रो नेमिरिव नेमिर्यस्याः सा भूमिः तामिव, त्यक्ष्यामि ॥ ३९ ॥

ननु सर्वथा साध्वी न त्याज्येत्याह

अवैमीति। एनां सीताम् अनघा साध्वीति चावैमि किन्तु मे मम लोकापवादः बलवान् मतः। कुतः हि यस्मात् प्रजाभिः भूमेश्छाया प्रतिबिम्बं शुद्धिमतो निर्मलस्य शशिनो मलत्वेन कलङ्कत्वेनारोपिता, अतो लोकापवादएव बलवानित्यर्थः ॥ ४० ॥

रक्षइति। किञ्च मे रक्षोवधान्तः प्रयासः व्यर्थो न किन्तु सः

अमर्षणः शोणितकाङ्क्षया किं
पदा स्पृशन्तं दशति द्विजिह्वः ॥४१॥

तदेष सर्गः करुणार्द्रचित्तै
र्न मे भवद्भिः प्रतिषेधनीयः।
यद्यर्थिता निर्हृतवाच्यशल्यान्
प्राणान् मया धारयितुं चिरं वः ॥४२॥

इत्युक्तवन्तं जनकात्मजायां
नितान्तरूक्षाभिनिवेशमीशम्।
न कश्चन भ्रातृषु तेषु शक्तो
निषेद्धुमासीदनुमोदितुं वा ॥४३॥

वैरप्रतिमोचनाय वैरशोधनाय। तथाहि, अमर्षणोऽसहनो द्विजिह्वः सर्पः पदा पादेन स्पृशन्तं पुरुषं शोणितकाङ्क्षया दशति किम्, किन्तु वैरनिर्यातनायेत्यर्थः ॥ ४१ ॥

तदिति। तत्तस्मादेष मे सर्गः निश्चयः। सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिष्वित्यमरः। करुणार्द्रचित्तैर्भवद्भिर्न प्रतिषेधनीयः निर्हृतं वाच्यमेव शल्यं येषां तान् प्राणान् मया चिरं धारयितुं धारणं कारयितुं वो युष्माकम् अर्थिता अर्थित्वम् इच्छा यदि अस्तीति शेषः ॥ ४२ ॥

इतीति। इत्युक्तवन्तं जनकात्मजायां विषये नितान्तरूक्षाभिनिवेशम् अतिक्रूराग्रहम् ईशं स्वामिनं तेषु भ्रातृषु मध्ये कश्चनापि निषेद्धुं निवारयितुम् अनुमोदितुं प्रवर्त्तयितुं वा शक्तो नासीत् पक्षद्वयस्यापि प्रत्यवायादित्यर्थः ॥ ४३ ॥

स लक्ष्मणं लक्ष्मणपूर्व्वजन्मा
विलोक्य लोकत्नयगीतकीर्त्तिः।
सौम्येति चाभाष्य यथार्थभाषी
स्थितं निदेशे पृथगादिदेश ॥ ४४ ॥
प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव।
स त्वं रथी तद्व्यपदेशनेयां
प्रापय्य वाल्मीकिपदं त्यजैनाम् ॥ ४५ ॥
स शुश्रुवान् मातरि भार्गवेण
पितुर्नियोगात् प्रहृतं द्विषद्वत्।

सइति। लोकत्नयगीतकीर्त्तिः यथार्थभाषी लक्ष्मणपूर्व्वजन्मा लक्ष्मणाग्रजः स रामो निदेशे स्थितम् आज्ञाकारिणं लक्ष्मणं विलोक्य हे सौम्य सुभग इत्याभाष्य च पृथक् भरतशत्रुघ्नाभ्यां विनाकृत्य आदिदेश आज्ञापयामास ॥ ४४ ॥

प्रजावतीति। दोहदो गर्भिणीमनोरथः तच्छंसिनी ते प्रजावती भ्रातृजाया। प्रजावती भ्रातृजायेत्यमरः। तपोवनेषु स्पृहयालुरेव सस्पृहैव। स्पृहिगृहीत्यादिना आलुच्प्रत्ययः। स त्वं रथी सन् तद्व्यपदेशेन दोहदमिषेण नेयां नेतव्यामेनां सीतां वाल्मीकेः पदं स्थानं प्रापय्य गमयित्वा। विभाषापइत्ययादेशः। त्यज ॥ ४५ ॥

सइति। पितुर्नियोगाच्छासनात् भार्गवेण जामदग्न्येन कर्त्रा। न लोकेत्यादिना षष्ठीप्रतिषेधः। मातरि द्विषतीव द्विषद्वत्। तत्र तस्येवेति वतिप्रत्ययः। प्रहृतं प्रहारं शुश्रुवान् श्रुतवान्। भाषायां

प्रत्यग्रहीदग्रजशासनं तत्
आज्ञा गुरूणां ह्यविचारणीया ॥४६॥
अथानुकूलश्रवणप्रतीताम्
अत्रस्नुभिर्युक्तधुरं तुरङ्गैः।
रथं सुमन्त्रप्रतिपन्नरश्मिम्
आरोप्य वैदेहसुतां प्रतस्थे ॥४७॥
सा नीयमाना रुचिरान् प्रदेशान्
प्रियङ्करो मे प्रिय इत्यनन्दत्।
नाबुद्ध कल्पद्रुमतां विहाय
जातं तमात्मन्यसिपत्रवृक्षम् ॥४८॥

सटवसन्त्ववदिति क्तप्रत्ययः। स लक्ष्मणः तत् अग्रजशासनं प्रत्यग्रहीत्, हि यस्मात् गुरूणामाज्ञा अविचारणीया ॥ ४६ ॥

अथेति। अथासौ लक्ष्मणः अनुकूलश्रवणेन प्रतीताम् इष्टाकर्णनेन हृष्टां वैदेहसुताम् अत्रस्नुभिरभीरुभिः गर्भिणीवहनयोग्यैः। त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः। तुरङ्गैर्युक्तधुरं सुमन्त्रेण प्रतिपन्नरश्मिं गृहीतप्रग्रहं रथमारोप्य प्रतस्थे ॥ ४७ ॥

सेति। सा सीता रुचिरान् प्रदेशान् नीयमाना प्राप्यमाणा सती मे मम प्रियः प्रियं करोतीति प्रियङ्करः प्रियकारी इत्यनन्दत्। क्षेमप्रियेति चकारात् खच्प्रत्ययः। तं प्रियम् आत्मनि विषये कल्पद्रुमतां विहाय असिपत्रवृक्षं जातं नाबुद्ध नाज्ञासीत्। बुध्यतेर्लुङ्। असिपत्रः खड्गाकारदलः कोट्यपूर्वो वृक्षविशेषः। असिपत्रो भवेत् कोषकारे च नरकान्तरे इति विश्वः। आसन्नघातुकइति भावः ॥४८॥

जुगूह तस्याः पथि लक्ष्मणो यत्
सव्येतरेण स्फुरता तदक्ष्णा।
आख्यातमस्यै गुरु भावि दुःखम्
अत्यन्तलुप्तप्रियदर्शनेन ॥४९॥

सा दुर्निमित्तोपगताद्विषादात्
सद्यः परिम्लानमुखारविन्दा।
राज्ञः शिवं सावरजस्य भूयात्
इत्याशशंसे करणैरबाह्यैः ॥५०॥

गुरोर्नियोगाद्वनितां वनान्ते
साध्वीं सुमित्रातनयो विहास्यन्।

जुगूहेति। पथि लक्ष्मणो यत् दुःखं तस्याः सीतायाः जुगूह प्रतिसंहृतवान् तत् गुरु भावि भविष्यत् दुःखम् अत्यन्तलुप्तं प्रियदर्शनं यस्य तेन स्फुरता सव्येतरेण दक्षिणेन अक्ष्णा अस्यै सीतायै आख्यातम्। स्त्रीणां दक्षिणाक्षिस्फुरणं दुर्निमित्तमाहुः ॥ ४९ ॥

सेति। सा सीता दुर्निमित्तेन दक्षिणाक्षिस्फुरणरूपेण उपगतात् प्राप्तात् विषादात् दुःखात् सद्यः परिम्लानमुखारविन्दा सती सावरजस्य सानुजस्य राज्ञो रामस्य शिवं भूयादिति अबाह्यैः करणैः अन्तःकरणैः आशशंसे। शंसतेरपेक्षायामात्मनेपदमिष्यते। करणैरिति बहुवचनं क्रियावृत्त्यभिप्रायं, पुनः पुनराशशंसे इत्यर्थः ॥ ५० ॥

गुरोरिति। गुरोर्ज्येष्ठस्य नियोगात् साध्वीं वनिताम् अत्याज्यामित्यर्थः वनान्ते विहास्यन् त्यक्ष्यन् सुमित्रातनयो लक्ष्मणः पुरस्तादग्रे

अवार्य्यतेवोत्थितवीचिहस्तैः
जह्नोर्दुहित्रा स्थितया पुरस्तात् ॥५१॥

रथात् स यन्त्रा निगृहीतवाहात्
तां भ्रातृजायां पुलिनेऽवतार्य्य।
गङ्गां निषादाहृतनौविशेषः
ततार सन्धामिव सत्यसन्धः ॥५२॥

अथ व्यवस्थापितवाक् कथञ्चित्
सौमित्रिरन्तर्गतवाष्पकण्ठः।
औत्पातिकं मेघ इवाश्मवर्षं
महीपतेः शासनमुज्जगार ॥५३॥

स्थितया जह्नोर्दुहित्रा जाह्नव्या उत्थितैर्वीचिहस्तैः अवार्य्यत इव। अकार्य्यं मा कुर्व्वित्यवार्य्यतइवेत्युत्प्रेक्षा ॥ ५१ ॥

रथादिति। सत्यसन्धः सत्यप्रतिज्ञः स लक्ष्मणो यन्त्रा सारथिना निगृहीतवाहात् रुद्धाश्वात् रथात् भ्रातृजायां पुलिने अवतार्य्य आरोप्य निषादेन किरातेन आहृतनौविशेषः आनीतनौकः सन् गङ्गां भागीरथीं सन्धां प्रतिज्ञामिव ततार। सन्धा प्रतिज्ञा मर्य्यादेत्यमरः॥ ५२ ॥

अथेति। अथ कथञ्चित् व्यवस्थापिता प्रकृतिमापादिता वाक् येन सः अन्तर्गतवाष्पः कण्ठोयस्य सः कण्ठस्तम्भिताश्रुरित्यर्थः सौमित्रिः महीपतेः शासनम्, मेघः उत्पातभवमौत्पातिकमश्मवर्षं शिलावर्षमिव, उज्जगार उद्गीर्णवान्। दारुणत्वेनावाच्यत्वादुज्जगारेत्युक्तम् ॥ ५३ ॥

ततोऽभिषङ्गानिलविप्रविद्धा
प्रभ्रश्यमानाभरणप्रसूना ।
स्वमूर्त्तिलाभप्रकृतिं धरित्रीं
लतेव सीता सहसा जगाम ॥५४॥

इक्ष्वाकुवंशप्रभवः कथं त्वां
त्यजेदकस्मात् पतिरार्य्यवृत्तः ।
इति क्षितिः संशयितेव तस्यै
ददौ प्रवेशं जननी न तावत् ॥५५॥

सा लुप्तसंज्ञा न विवेद दुःखं
प्रत्यागतासुः समतप्यतान्तः ।

तत इति । ततः, अभिषङ्गः पराभवः । अभिषङ्गः पराभवः इत्यमरः । स एवानिलस्तेन विप्रविद्धा अभिहिता प्रभ्रश्यमानानि पतन्ति आभरणान्येव प्रसूनानि यस्याः सा सीता लतेव सहसा स्वमूर्त्तिलाभस्य स्वशरीरलाभस्य स्वोत्पत्तेः प्रकृतिं कारणं धरित्रीं जगाम भूमौ पपातेत्यर्थः ॥ ५४ ॥

इक्ष्वाकिति । इक्ष्वाकुवंशप्रभवो महाकुलप्रसूतिरित्यर्थः आर्य्यवृत्तः साधुचरितः पतिर्भर्त्ता त्वाम् अकस्मादकारणात् कथं त्यजेत् असम्भावितमित्यर्थः, इति संशयितेव सन्दिहानेव तावत् त्यागहेतुज्ञानावधेः प्रागित्यर्थः जननी क्षितिः तस्यै सीतायै प्रवेशम् आत्मनीति शेषः न ददौ ॥ ५५ ॥

सेति । लुप्तसंज्ञा नष्टचेतना मूर्च्छिता सा दुःखं न विवेद, प्रत्यागतासुः लब्धसंज्ञा सती अन्तः समतप्यत दुःखेनादह्यतेत्यर्थः । तमेः

तस्याः सुमित्रात्मजयत्नलब्धो
मोहादभूत् कष्टतरः प्रबोधः ॥५६॥

न चावदद्भर्त्तुरवर्णमार्य्या
निराकरिष्णोर्वृजिनादृतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं
पुनः पुनर्दुष्कृतिनं निनिन्द ॥५७॥

आश्वास्य रामावरजः सतीं ताम्
आख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्त्तृनिदेशरौक्ष्यं
देवि क्षमस्वेति बभूव नम्रः ॥५८॥

कर्मणि लङ् । कर्मकर्त्तरीति केचित्तन्न तपस्तपःकर्मकस्यैवेति यङ्-नियमात् । तस्याः सीतायाः सुमित्रात्मजयत्नलब्धः प्रबोधः मोहात् कष्टतरो दुःखदोऽभूत्, दुःखवेदनासम्भवादिति भावः ॥ ५६ ॥

नचेति । आर्य्या साध्वी सा सीता वृजिनादृते एनसा विनापि । कलुषं वृजिनैनोऽघमित्यमरः । अन्यारादितरर्त्तेइति पञ्चमी । निराकरिष्णोर्निरासकस्य । अलं कृञिति इष्णुच् प्रत्ययः । भर्त्तुः अवर्ण-मपवादं न चावदत् नैवावादीत्, किन्तु स्थिरदुःखभाजम् अतएव दुष्कृतिनमात्मानं पुनर्निनिन्द ॥ ५७ ॥

आश्वास्येति । रामावरजो लक्ष्मणः सती साध्वी तामाश्वास्य आख्यात उपदिष्टो वाल्मीकेः निकेतस्याश्रमस्य मार्गो येन स तथोक्तः सन्, निघ्नस्य पराधीनस्य । अधीनो निघ्न आयत्तइत्यमरः । मे भर्त्तृ निदेशेन स्वाम्यनुज्ञया हेतुना यद्रौक्ष्यं पारुष्यं तत् हे देवि क्षमस्व नम्रः प्रणतो बभूव ॥ ५८ ॥

सीता तमुत्थाप्य जगाद वाक्यं
प्रीतास्मि ते सौम्य चिराय जीव।
बिडौजसा विष्णुरिवाग्रजेन
भ्रात्रा यदित्थं परवानसि त्वम्॥५९॥
श्वश्रूजनं सर्वमनुक्रमेण
विज्ञापय प्रापितमत्प्रणामः।
प्रजानिषेकं मयि वर्त्तमानं
सूनोरनुध्यायत चेतसेति॥६०॥
वाच्यस्त्वया मद्वचनात् स राजा
वह्नौ विशुद्धामपि यत समक्षम्।

सीतेति। सीता तं लक्ष्मणम् उत्थाप्य वाक्यं जगाद, किमिति हे सौम्य साधो ते प्रीतास्मि चिराय चिरं जीव, यत् यस्मात् बिडौजसा इन्द्रेण विष्णुरिव अग्रजेन ज्येष्ठेन भ्रात्रा त्वमित्थं परवान् परतन्त्रोऽसि॥५९॥

श्वश्रूजनमिति। सर्वं श्वश्रूजनम् अनुक्रमेण प्रापितमत्प्रणामः सन् मत्प्रणाममुक्त्वेत्यर्थः विज्ञापय। किमिति, निषिच्यतइति निषेकः, मयि वर्त्तमानं सूनोस्तव तस्य प्रजानिषेकं गर्भं चेतसा अनुध्यायत शिवमस्त्विति चिन्तयत इति॥६०॥

वाच्यइति। स राजा त्वया मद्वचनात् मद्वचनमिति कृत्वा। ल्यब्लोपे पञ्चमी। वाच्यः वक्तव्यः। किमित्यतआह वह्नावित्यादिभिः सप्तभिः श्लोकैः। अक्ष्णोः समीपे समक्षम्, विभक्त्यर्थेऽव्ययीभावः सामीप्यार्थे वा, अव्ययीभावे शरदादित्वात् समासान्तः टच्प्रत्ययः। समक्षमग्नै ... तामपि मां लोकवादस्य मिथ्यापवादस्य श्रवणाद्धेतोः अहा-

मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत् सदृशं कुलस्य ॥६१॥

कल्याणबुद्धेरथवा तवायं
न कामचारो मयि शङ्कनीयः।
ममैव जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्यः ॥६२॥

उपस्थितां पूर्व्वमपास्य लक्ष्मीं
वनं मया सार्द्धमसि प्रपन्नः।
तदास्पदं प्राप्य तयातिरोषात्
सोढास्मि न त्वद्भवने वसन्ती ॥६३॥

कौरत्याक्षीरिति यत् तत् श्रुतस्य प्रख्यातस्य कुलस्य सदृशं किं किन्तु असदृशमित्यर्थः। यद्वा श्रुतस्य श्रवणस्य कुलस्य चेति योजना। कामचार्य्यसीति भावः ॥ ६१ ॥

कल्याणेति। अथवा कल्याणबुद्धेः सुधियः तव कर्त्तुः मयि विषये अयं त्यागो न कामचारः इच्छया करणं न शङ्कनीयः कामचारशङ्कापि न क्रियतइत्यर्थः। किन्तु ममैव जन्मान्तरपातकानाम् अप्रसह्यः विपच्यतइति विपाकः फलितएव विस्फूर्ज्जथुः अशनि निर्घोषः। स्फूर्ज्जथुर्व्वज्रनिर्घोषइत्यमरः ॥ ६२ ॥

उपस्थितामिति। पूर्व्वमुपस्थितां प्राप्तां लक्ष्मीमपास्य मया सार्द्धं वनं प्रपन्नोऽसि प्राप्तोऽसि। तत्तस्मात् तया लक्ष्म्या अतिरोषात् त्वद्भवने आस्पद प्रतिष्ठाम्। आस्पदं प्रतिष्ठायामिति निपातः। प्राप्य

निशाचरोपप्लुतभर्तृकाणां
तपस्विनीनां भवतः प्रसादात् ।
भूत्वा शरण्या शरणार्थमन्यं
कथं प्रपत्स्ये त्वयि दीप्यमाने ॥ ६४ ॥

किंवा तवात्यन्तवियोगमोघे
कुर्य्यामुपेक्षां हतजीवितेऽस्मिन् ।
स्याद्रक्षणीयं यदि मे न तेजः
त्वदीयमन्तर्गतमन्तरायः ॥ ६५ ॥

साहं तपः सूर्य्यनिविष्टदृष्टिः
ऊर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।

निशाचरेति । निशाचरैः उपप्लुताः पीड़िताः भर्त्तारो यासां ताः निशाचरोपप्लुतभर्तृका । नद्यृतश्चेति कप्प्रत्ययः । तासां तपस्विनीनां भवतः प्रसादात् अनुग्रहात् शरण्या शरणसमर्था भूत्वा अद्य त्वयि दीप्यमाने प्रकाशमाने सत्येव शरणार्थम् अन्यं तपस्विनं कथं प्रपत्स्ये प्राप्स्यामि ॥ ६४ ॥

किंवाइति । किंवा अथवा तव सम्बन्धिना अत्यन्तेन पुनःप्राप्ति रहितेन वियोगेन मोघे निष्फलेऽस्मिन् हतजीविते तुच्छजीविते उपेक्षां कुर्य्यां कुर्य्यामेव, रक्षणीयं रक्षणार्हम् अन्तर्गतं कुक्षिस्थं त्वदीयं तेजः शुक्रं गर्भरूपम् । शुक्रं तेजोरेतसी च बीजवीर्य्येन्द्रियाणि चेत्यमरः । मे मम अन्तरायो विघ्नो न स्यादिति ॥ ६५ ॥

सेति । साहं प्रसूतेरूर्द्धं सूर्य्यनि[illegible] विभक्त्यर्थेऽनी कृष्णादिभ्यं तपः [illegible]ति समासान्तः टच्प्रत्ययः ।

[illegible] स्य मिथ्यापवादस्य श्रवणाद्

भूयो यथा मे जननान्तरेऽपि
त्वमेव भर्त्ता नच विप्रयोगः ॥६६॥

नृपस्य वर्णाश्रमपालनं यत्
स एव धर्म्मो मनुना प्रणीतः।
निर्व्वासिताप्येवमतस्त्वयाहं
तपस्विसामान्यमवेक्षणीया ॥६७॥

तथेति तस्याः प्रतिगृह्य वाचं
रामानुजे दृष्टिपथं व्यतीते।
सा मुक्तकण्ठं व्यसनातिभारात्
चक्रन्द विग्ना कुररीव भूयः ॥६८॥

चरितुं यतिष्ये, यथा भूयः तेन तपसा मे मम जननान्तरेऽपि त्वमेव भर्त्ता स्याः विप्रयोगश्च स्यान्न ॥ ६६ ॥

नृपस्येति। वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्यादीनाञ्च पालनं यत् सएव नृपस्य धर्म्मः मनुना प्रणीतः उक्तः अतः कारणात् एव त्वया निर्वासिता निष्कासितापि अहं तपस्विभिः सामान्यं साधारणं यथा भवति तथा अवेक्षणीया, कलत्रदृष्ट्यभावेऽपि वर्णाश्रमदृष्टिः सीताया कर्त्तव्येत्यर्थः ॥ ६७ ॥

तथेति। तथेति तस्याः सीतायाः वाचं प्रतिगृह्याङ्गीकृत्य रामानुजे लक्ष्मणे दृष्टिपथं व्यतीते अतिक्रान्ते सति सा सीता व्यसनातिभारात् दुःखातिरेकात् मुक्तकण्ठं यथा स्यात्तथा वाग्वृत्त्येत्यर्थः. विग्ना भीता कुररीव उत्क्रोशीव। उत्क्रोशकुररौ समावित्यमरः। भयो भूयिष्ठ चक्रन्द चुक्रोश ॥ ६८ ॥

नृत्यं मयूराः कुसुमानि वृक्षाः
दर्भानुपात्तान् विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावम्
अत्यन्तमासीद्रुदितं वनेऽपि ॥६९॥

तामभ्यगच्छद्रुदितानुसारी
कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः
श्लोकत्वमापद्यत यस्य शोकः ॥७०॥

तमश्रु नेत्रावरणं प्रमृज्य
सीता विलापाद्विरता ववन्दे ।

नृत्यमिति । मयूराः नृत्यं विजहुः त्यक्तवन्तः, वृक्षाः कुसुमानि, हरिण्यः उपात्तान् दर्भान्, इत्थं तस्याः सीतायाः समदुःखभावं प्रपन्ने तुल्यदुःखत्वं प्राप्ते वनेऽपि अत्यन्तं रुदितमासीत् । यथा राम गेहेऽपि इत्यपिशब्दार्थः ॥ ६९ ॥

तामिति । कुशेध्माहरणाय यातः कविर्वाल्मीकिः रुदितानुसारी सन् तां सीतामभ्यगच्छत् अभिगमनं चक्रे । दयालुतयेत्याह निषादेति । निषादेन व्याधेन विद्धस्याण्डजस्य क्रौञ्चस्य दर्शनेनोत्थ उत्पन्नो यस्य शोकः श्लोकत्वमापद्यत श्लोकरूपेणावोचदित्यर्थः । स च श्लोकः पठ्यते । मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत् क्रौञ्चमिथुनादेकमवधीः काममोहितमि[illegible]त । तस्यामपि दुःखं न सेहे किमुतान्येषामिति भावः [illegible] ॥ ७० ॥

तमिति । सीता [illegible] विलापाद्विरता सती नेत्रावरणं दृष्टिप्रतिबन्धक-

तस्यै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राशिषमित्युवाच ॥७१॥

जाने विसृष्टां प्रणिधानतस्त्वां
मिथ्यापवादक्षुभितेन भर्त्रा।
तन्मा व्यथिष्ठा विषयान्तरस्थं
प्राप्तासि वैदेहि पितुर्निकेतम् ॥ ७२ ॥

उत्खातलोकत्रयकण्टकेऽपि
सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि।
त्वां प्रत्यकस्मात् कलुषप्रवृत्ता-
वस्त्येव मन्युर्भरताग्रजे मे ॥ ७३ ॥

मधु प्रच्छ्य तं मुनिं ववन्दे। दोहदलिङ्गदर्शी गर्भचिह्नदर्शी मुनिस्तस्यै सीतायै सुपुत्राशिषं तत्प्राप्तिहेतुभूतां दाश्वान् दत्तवान् इति वक्ष्यमाणप्रकारेणोवाच। दाश्वान् साह्वान् मीढ्वांश्चेति क्वसन्तो निपातः ॥ ७१ ॥

जानइति। त्वां मिथ्यापवादेन क्षुभितेन भर्त्रा विसृष्टां त्यक्तां प्रणिधानतः समाधिदृष्ट्या जाने। हे वैदेहि विषयान्तरस्थं देशान्तरस्थं पितुर्जनकस्यैव निकेतं गृहं प्राप्तासि। तत्तस्मान्मा व्यथिष्ठाः मा शोचीः। व्यथेर्लुङ्। न माङ्योगे इत्यडागमप्रतिषेधः। भर्त्रोपेक्षितानां पितृगृहवासएव उचितइति भावः ॥ ७२ ॥

उत्खातेति। उत्खातलोकत्रयकण्टकेऽपि सर्वलोकोपकारिण्यपीत्यर्थः सत्यप्रतिज्ञे सत्यसन्धेऽपि अविकत्थने अश्लाघिन्यपि त्वां प्रत्यकस्मादकारणात् कलुषप्रवृत्तौ गर्हितव्याग ... ताग्रजे मे

तवोरुकीर्त्तिः श्वशुरः सखा मे
सतां भवोच्छेदकरः पिता ते।
धुरि स्थिता त्वं पतिदेवतानां
किन्तन्न येनासि ममानुकम्प्या॥ ७४॥

तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसास्मिन्।
इतो भविष्यत्यनघप्रसूते-
रपत्यसंस्कारमयो विधि स्ते॥ ७५॥

अशून्यतीरां मुनिसन्निवेशैः
तमोऽपहन्त्रीं तमसां वगाह्य।

कोपोऽस्त्वेव। सर्वगुणाच्छादकोऽयं दोष इत्यर्थः। सीतानुनयार्थोऽयं रामोपलम्भः॥ ७३॥

तवेति। उरुकीर्त्तिस्तव श्वशुरो दशरथो मे सखा, ते पिता जनकः सतां विदुषां भवोच्छेदकरः ज्ञानोपदेशादिना संसार दुःखध्वंसकारी, त्वं पतिदेवतानां पतिव्रतानां धुर्य्यंशे स्थिता, येन निमित्तेन मम अनुकम्प्या अनुग्राह्या नासि तत् किम् न किञ्चिदित्यर्थः॥ ७४॥

तपस्वीति। तपस्विसंसर्गेण विनीतसत्त्वे शान्तजन्तुकेऽस्मिंस्तपोवने वीतभया निर्भीका वस। इतोऽस्मिन् वने अनघप्रसूतेः सुखप्रसूतेस्ते अपत्यसंस्कारमयो जातकर्म्मादिरूपो विधिरनुष्ठानं भविष्यति॥ ७५॥

अशून्येति। सन्निविशन्ते येष्विति सन्निवेशा उटजाः। अधिकरणार्थे घञ्। मुनीनां सन्निवेशैरुटजैरशून्यतीरा पूर्णतीरां तमसः शोकस्य पापस्य... ...गीम्। तमस्तु क्लीवे पापे नरकशोकयोरि-

तत्सैकतोत्सङ्गबलिक्रियाभिः
सम्पत्स्यते ते मनसः प्रसादः ॥ ७६ ॥

पुष्पं फलं चार्त्तवमाहरन्त्यो
बीजञ्च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गाम्
उदारवाचो मुनिकन्यकास्त्वाम् ॥७७॥

पयोघटैराश्रमबालवृक्षान्
संवर्द्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक् तनयोपपत्तेः
स्तनन्धयप्रीतिमवाप्स्यसि त्वम् ॥७८॥

त्यमरः। तमसां नदी वगाह्य तत्र स्नात्वा। वलिक्रियापेक्षया पूर्व्व-कालता। तस्याः सैकतोत्सङ्गेषु वलिक्रियाभिरिष्टदेवतापूजाविधिभिः ते मनसः प्रसादः सम्पत्स्यते भविष्यति ॥ ७६ ॥

पुष्पमिति। ऋतुरस्य प्राप्तः आर्त्तवं स्वकालप्राप्तं पुष्पं फलञ्च चाकृष्टरोहि अकृष्टक्षेत्रोत्पम् अकृष्टपच्यमित्यर्थः बलये हित वालेयं पूजायोग्यम्। छदिरुपधिवलेर्ढञिति ढञ्प्रत्ययः। वीजं नीवारादि-धान्यञ्च आहरन्त्यः उदारवाचः प्रगल्भगिरो मुनिकन्यकाः नवाभिषङ्गा नूतनदुःखा त्वां विनोदयिष्यन्ति ॥ ७७ ॥

पयइति। स्वबलानुरूपैः स्वशक्त्यनुसारिभिः पयसामम्भसा घटैः। स्तन्यैरिति च ध्वन्यते। आश्रमवालवृक्षान् संवर्द्धयन्ती त्वं तनयोपपत्तेः प्राक् पूर्व्वम् असंशयं यथा तथा स्तनं धयति पिबतीति स्तनन्धयः शिः। यु नासिकास्तनयोर्ध्माधेटोरिति खश्प्रत्ययः, अरुर्द्विषदिति

अनुग्रहप्रत्यभिनन्दिनीं तां
वाल्मीकिरादाय दयार्द्रचेताः ।
सायं मृगाध्यासितवेदिपार्श्वं
स्वमाश्रमं शान्तमृगं निनाय ॥ ७९ ॥

तामर्पयामास च शोकदीनां
तदागमप्रीतिषु तापसीषु ।
निर्विष्टसारां पितृभिर्हिमांशो-
रन्त्यां कलां दर्श इवौषधीषु ॥ ८० ॥

ता इङ्गुदीस्नेहकृतप्रदीप-
मास्तीर्णमेध्याजिनतल्पमन्तः ।

सुतागतः । तस्मिन् वा प्रीतिलाभमवाप्स्यसि । ततः परं सुखमेव विनोद इति भावः ॥ ७८ ॥

अनुग्रहेति । दयार्द्रचेताः वाल्मीकिः अनुग्रहं प्रत्यभिनन्दतीति तथोक्तां तां सीताम् आदाय सायं मृगैरध्यासितवेदिपार्श्वम् अधिष्ठित-वेदिप्रान्तं शान्तमृगं स्वमाश्रमं निनाय ॥ ७९ ॥

तामिति । शोकदीनां तां सीतां तस्याः सीतायाः आगमेन प्रीति-र्यासां तासु तापसीषु, पितृभिरग्निष्वात्तादिभिर्निर्विष्टसारां भुक्तसारां हिमांशोरन्त्यामवशिष्टां कलां दर्शोऽमावास्याकालः ओषधीष्विव अर्पयामास । अत्र पराशरः, अमावास्यान्तु सदा सोम ओषधीः प्रति-पद्यत इति ॥ ८० ॥

तास्विति । तास्तापस्यः तस्यै सीतायै सपर्यानुपदं पूजानन्तरं दिनान्ते सायंकाले निवासएव हेतुस्तस्य निवासहेतोः निवासार्थ-

तस्मै सपर्य्यानुपदं दिनान्ते
निवासहेतोरुटजं वितेरुः ॥ ८१ ॥
तत्राभिषेकप्रयता वसन्ती
प्रयुक्तपूजा विधिनातिथिभ्यः ।
वन्येन सा वल्कलिनी शरीरं
पत्युः प्रजासन्ततये बभार ॥ ८२ ॥
अपि प्रभुः सानुशयोऽधुना स्यात
किमुत्सुकः शक्रजितोऽपि हन्ता ।
शशंस सीता परिदेवनान्त-
मनुष्ठितं शासनमग्रजाय ॥ ८३ ॥

नित्यर्थः। षष्ठी हेतुप्रयोगइति षष्ठी। इङ्गुदी तापसतरुरित्यमरः। इङ्गुदीस्नेहेन कृतप्रदीपम् अन्तरास्तीर्णं मेध्य शुद्धमजिनमेव तल्प शय्या यस्मिन् तमुटजं पर्णशालां वितेरुर्ददुः ॥ ८१ ॥

तत्रेति। तत्राश्रमे अभिषेकेण स्नानेन प्रयता नियता वसन्ती विधिना शास्त्रेण अतिथिभ्यः प्रयुक्तपूजा कृतसत्कारा वल्कलिनी सा सीता पत्युः प्रजासन्ततये सन्तानाविच्छेदाय हेतोः वन्येन कन्दमूलादिना शरीरं बभार पुपोष ॥ ८२ ॥

अपीति। प्रभुः राजा अधुनापि सानुशयः सानुतापः स्यात् किम् इति काकुः। उत्सुकः शक्रजितः इन्द्रजितो हन्ता लक्ष्मणोऽपि सीतापरिदेवनान्तं सीताविलापान्तमनुष्ठितं शासनम् अग्रजाय शशंस ॥ ८३ ॥

बभूव रामः सहसा सबाष्पः

तुषारवर्षीव सहस्यचन्द्रः।

कौलीनभीतेन गृहान्निरस्ता

न तेन वैदेहसुता मनस्तः॥ ८४॥

निगृह्य शोकं स्वयमेव धीमान्

वर्णाश्रमावेक्षणजागरूकः।

स भ्रातृसाधारणभोगमृद्धं

राज्यं रजोरिक्तमनाः शशास॥ ८५॥

तामेकभार्य्यां परिवादभीरोः

साध्वीमपि त्यक्तवतो नृपस्य।

वक्षस्यसङ्घट्टसुखं वसन्ती

रेजे सपत्नीरहितेव लक्ष्मीः॥ ८६॥

बभूवेति। सहसा तपदि सबाष्पो रामः तुषारवर्षी सहस्यचन्द्र इव बभूव अत्यन्ततया तुषारवर्षिणा पौषचन्द्रेण तुल्योऽभूत्। पौषे तैषसहस्यौ द्वावित्यमरः। दुष्कृतैरदित्वाच्च, कौलीनाल्लोकापवादात् भीतेन तेन रामेण वैदेहसुता सीता गृहान्निरस्ता न मनसः मनसश्चित्तान्न निरस्ता। पञ्चम्यास्तसिल्॥ ८४॥

निगृह्येति। धीमान् वर्णानामाश्रमाणाञ्चावेक्षणे अनुसन्धाने जागरूकोऽप्रमत्तः। जागरूकइति ऊकप्रत्ययः। रजोरिक्तमनाः रजोगुणशून्यचेताः स रामः स्वयमेव शोकं निगृह्य निरुध्य भ्रातृभिः साधारणभोगं शरीरैरसितिनातोपभुक्तमित्यर्थः ऋद्धं राज्यं शशास॥ ८५॥

तामिति। परिवादभीरोः अतएव एकभार्य्यामपि साध्वीमपि तां

सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत् क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः
सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥८७

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
सीतापरित्यागो नाम चतुर्दशः सर्गः ।

सीतां त्यक्तवतो नृपस्य वक्षसि अमङ्गलदुःखम् असम्भाव्यसुखं वसन्ती लक्ष्मीः सपत्नीरहितेव रेजे दिदीपे । तस्य स्त्र्यन्तरपरिग्रहो नाभूदिति भावः ॥ ८६ ॥

सीतामिति । दशमुखरिपुः रामः सीतां हित्वा त्यक्त्वा अन्यां स्त्रियं नोपयेमे न परिणीतवानिति यत् । उपाद्यमः स्वकरणे इत्यात्मनेपदम् । किञ्च तस्याः सीताया एव प्रतिकृतेः प्रतिमाया हिरण्मय्याः सखा प्रतिकृतिसखः सन् क्रतूनाजहार आहृतवानिति यत् तेन श्रवणविषयप्रापिणा श्रोत्रदेशगामिना भर्तुर्वृत्तान्तेन वार्त्तया हेतुना सा सीता दुर्वारं दुर्निरोधं परित्यागेन यद्दुःखं तत् कथमपि विषेहे विसोढवती ॥ ८७ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां
चतुर्दशः सर्गः ।



पञ्चदशः सर्गः ।



कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥ १॥
लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ।
मुनयो यमुनाभाजः शरण्यं शरणार्थिनः ॥२॥
अवेक्ष्य रामं ते तस्मिन् न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम् ॥३॥

कृतेति । कृतसीतापरित्यागः स पृथिवीपालो रामः रत्नाकर एव मेखला यस्यास्तां सार्णवामित्यर्थः केवलामेकामित्यर्थः पृथिवीमेव बुभुजे भुक्तवान् नतु पार्थिवीमित्यर्थः । सापि रत्नखचितमेखला । पृथिव्याः कान्तासमाधिर्व्यज्यते । रामस्य त्वन्यतरपरिग्रहो नास्तीति श्लोकाभिप्रायः ॥ १ ॥

लवणेनेति । लवणेन लवणाख्येन तामिस्रेण तमिस्राचारिणा रक्षसेत्यर्थः विलुप्तेज्याः लुप्तयागक्रियाः अतएव शरणार्थिनो यमुनाभाजो यमुनातीरवासिनो मुनयः शरण्यं शरणार्हं रक्षणसमर्थं तं रामं रक्षितारम् अभ्ययुः प्राप्ताः । यातेर्लङ् ॥ २ ॥

अवेक्ष्येति । ते मुनयो राममवेक्ष्य रक्षितारमिति शेषः तस्मिन् लवणे स्वतेजसा शापरूपेण न प्रजह्रुः । तथाहि, त्रायतइति त्राणम् । कर्त्तरि ल्युट् । तदभावे शाप एवास्त्रं येषां ते शापास्त्राः सन्तः तपसो व्ययं कुर्व्वन्ति । शापदानात्तपसोव्यय इति प्रसिद्धेः ॥ ३ ॥

प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम्।
धर्म्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः॥४॥
ते रामाय बधोपायमाचख्युर्विबुधद्विषः।
दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति॥५॥
आदिदेशाथ शत्रुघ्नं तेषां क्षेमाय राघवः।
करिष्यन्निव नामास्य यथार्थमरिनिग्रहात्॥६॥

प्रतीति। काकुत्स्थो रामस्तेभ्यो मुनिभ्यो विघ्नप्रतिक्रियां लवणं बधरूपां प्रतिशुश्राव प्रतिजज्ञे। तथाहि, भुवि शार्ङ्गिणो विष्णोः प्रवृत्तिः रामरूपेणावतरणं धर्म्मसंरक्षणमेवार्थः प्रयोजनं यस्याः सा तथैव॥ ४॥

ते इति। ते मुनयो रामाय विबुधद्विषः सुरारेः लवणस्य बधोपायमाचख्युः। लूनातीति लवणः, नन्द्यादित्वात्ल्युः तत्रैव निपातनाण्णत्वम्। लवणः शूली शूलवान् दुर्जयः अक्षयः, किन्तु विशूलः शूलरहितः प्रार्थ्यताम् अभिगम्यताम्। याच्ञायामभियाने च प्रार्थना कथ्यते बुधैरिति केशवः॥ ५॥

आदिदेशेति। अथ तेषां मुनीनां क्षेमाय क्षेमकरणाय राघवो रामः शत्रुघ्नमादिदेश। अत्रोत्प्रेक्ष्यते। अस्य शत्रुघ्नस्य नाम अरिनिग्रहात् शत्रुहननाद्धेतोः यथाभूतोऽर्थो यस्य तत् यथार्थं करिष्यन्निव। शत्रून् हन्तीति शत्रुघ्नः। अमनुष्यकर्त्तृके चेति चकारात् कृतघ्नशत्रुघ्नादयः सिद्धाः इति दुर्गसिंहः। पाणिनीयेपि बहुलग्रहणाद्यथेष्टसिद्धिः कृतल्युटोबहुलमिति॥ ६॥

रामस्य स्वयमप्रयाणे हेतुमाह

यदिति। हि यस्मात्, परान् शत्रून् तापयतीति परन्तपः। द्विषत्परयोस्तापेरिति खच्प्रत्ययः, खचि ह्रस्वइति ह्रस्वः। रघूणां मध्ये

यः कश्चन रघूणां हि परमेकः परन्तपः।
अपवाद इवोत्सर्गं व्यावर्त्तयितुमीश्वरः ॥७॥
अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी।
ययौ वनस्थलीः पश्यन् पुष्पिताः सुरभीरभीः ॥८॥
रामादेशादनुगता सेना तस्यार्थसिद्धये।
पश्चादध्ययनार्थस्य धातोरधिरिवाभवत् ॥९॥
आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥१०॥

यः कश्चन एकः, अपवादो विशेषशास्त्रम् उत्सर्गं सामान्यशास्त्रमिव, परं शत्रुं व्यावर्त्तयितुं बाधितुम् ईश्वरः समर्थः। अतः शत्रुघ्नमेवादिदेशेति पूर्वेणान्वयः॥ ७॥

अग्रजेनेति। ततः अग्रजेन रामेण प्रयुक्ताशीः कृताशीर्वादो रथी अभीर्निर्भीको दाशरथिः पुष्पाणि सञ्जातानि यासां ताः पुष्पिताः सुरभीः आमोदमानाः वनस्थलीः पश्यन् ययौ॥ ८॥

रामेति। रामादेशादनुगता सेना तस्य शत्रुघ्नस्य, अध्ययनमर्थोऽभिधेयो यस्य तस्य धातोरिङध्ययनइत्यस्य धातोः पश्चात् अधिरुपसर्गइव, अर्थसिद्धये प्रयोजनसाधनाय इत्येकत्र, अन्यत्र अभिधेय साधनाय अभवत्। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः। यथा, इङिकावध्युपसर्गं न व्यभिचरतइतिन्यायेन अध्युपसर्गः स्वयमेवार्थसाधकस्य धातोः सन्निधिमात्रेणोपकरोति सेनापि तस्य तद्वदिति भावः॥ ९॥

आदिष्टेति। रथप्रष्ठैः रथाग्रगामिभिः। प्रष्ठोऽग्रगामिनीति निपातः। मुनिभिः पूर्वोक्तैरादिष्टवर्त्मा निर्दिष्टमार्गः गच्छन् तपतां

तस्य मार्गवशादेका बभूव वसतिर्यतः ।
रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने ॥११॥

तमृषिः पूजयामास कुमारं क्लान्तवाहनम् ।
तपःप्रभावसिद्धाभिर्विशेषप्रतिपत्तिभिः ॥१२॥

तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती ।
सुतावसूत सम्पन्नौ कोशदण्डाविव क्षितिः ॥१३॥

सन्तानश्रवणाद्भ्रातुः सौमित्रिः सौमनस्यवान् ।
प्राञ्जलिर्मुनिमामन्त्र्य प्रातर्युक्तरथो ययौ ॥१४॥

देदीप्यमानानां मध्ये वरः श्रेष्ठः स शत्रुघ्नो वालखिल्यैर्मुनिभिः अंशुमान् सूर्य इव विरराज। तेऽपि रथमग्रादित्यनुसन्धेयम् ॥ १० ॥

तस्येति। यतो गच्छतः। इण्धातोः शतृप्रत्ययः। तस्य शत्रुघ्नस्य मार्गवशात् रथस्वने उत्कण्ठा उद्ग्रीवा मृगा यस्मिन् तस्मिन् वाल्मीकीये वाल्मीकिसम्बन्धिनि। वृद्धाच्छ इति छप्रत्ययः। तपोवने एका वसतिः रात्रिर्बभूव। तत्रैका रात्रिमुषित इत्यर्थः। वसती रात्रि वेश्मनोरित्यमरः ॥ ११ ॥

तमिति। क्लान्तवाहनं श्रान्तयुग्यं तं कुमारं शत्रुघ्नम् ऋषिः वाल्मीकिः तपःप्रभावसिद्धाभिः विशेषप्रतिपत्तिभिः उत्कृष्टसम्भावनाभिः पूजयामास ॥ १२ ॥

तस्यामिति। तस्यामेव यामिन्यां रात्रौ अस्य शत्रुघ्नस्य अन्तरस्त्यस्मीति अन्तर्वत्नी गर्भिणी। अन्तर्वत्नी च गर्भिणीत्यमरः। अन्तर्वत्पतिवतोर्नुगिति ङीप् नुगागमश्च। प्रजावती भ्रातृजाया सीता क्षितिः सम्पन्नौ तनयौ कोशदण्डाविव सुतौ असूत ॥ १३ ॥

सन्तानेति। भ्रातुर्ज्येष्ठस्य सन्तानश्रवणाद्धेतोः सौमनस्यवान्

स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः ।
वनात् करमिवादाय सत्त्वराशिमुपस्थितः ॥१५॥
धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ।
क्रव्याद्गणपरिवारश्चिताग्निरिव जङ्गमः ॥१६॥
अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।
रुरोध संमुखीनो हि जयो रन्ध्रप्रहारिणाम्॥१७॥

प्रीतिमान् सौमित्रिः शत्रुघ्नः प्रातर्युक्तरथः सज्जरथः सन् प्राञ्जलिः कृताञ्जलिः मुनिम् आमन्त्र्य आपृच्छ्य ययौ ॥ १४ ॥

स चेति । स शत्रुघ्नश्च मधूपघ्नं नाम लवणपुरं प्राप, कुम्भीनसी नाम रावणस्वसा तस्याः कुक्षिजः पुत्रो लवणश्च वनात् करं बलिमिव सत्वानां प्राणिनां राशिमादायोपस्थितः प्राप्तः ॥ १५ ॥

धूमेति । किम्भूतो लवणः, धूमइव धूम्रः कृष्णलोहितवर्णः । धूम्रधूमलौ कृष्णलोहिते इत्यमरः । वसागन्धो हृन्मेदोगन्धः सोऽस्यास्तीति वसागन्धी । हृन्मेदस्तु वपा वसेत्यमरः । ज्वालाइव बभ्रव पिशङ्गाः शिरोरुहाः केशाः यस्य स तथोक्तः । विपुले नकुले विष्णौ बभ्रुः स्यात् पिङ्गले त्रिष्वित्यमरः । क्रव्यं मांसमदन्तीति क्रव्यादो राक्षसास्तेषां गणएव परीवारो यस्य स तथोक्तः अतएव जङ्गमश्चरिष्णुश्चिताग्निरिव स्थितः । कृशानुपक्षे धूमैर्धूम्रवर्णः, ज्वाला एव शिरोरुहाः, क्रव्यादो गृध्रादय इत्यनुसन्धेयम् ॥ १६ ॥

अपशूलमिति । लक्ष्मणानुजः शत्रुघ्नः अपशूलं शूलरहितं तं लवणम् आसाद्य रुरोध । तथाहि, रन्ध्रप्रहारिणां रन्ध्रप्रहरणशीलानाम्, अपशूलतैवात्र रन्ध्रम् । जयः सम्मुखीनो हि सम्मुखस्य दर्शनो हि । यथामुखसम्मुखस्य दर्शनः खइति खप्रत्ययः । अधिकारलक्षणार्थस्तु दुर्लभएव ॥ १७ ॥

नातिपर्य्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनम् ।
दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः ॥ १८ ॥
इति सन्तर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया ।
प्रांशुमुत्पाटयामास मुस्तास्तम्बमिव द्रुमम् ॥ १९ ॥
सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः ।
गात्रं पुष्परजः प्राप न शाखी नैरृतेरितः ॥ २० ॥
विनाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलम् ।
प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ॥ २१ ॥
ऐन्द्रमस्त्रमुपादाय शत्रुघ्नेन स ताडितः ।
सिकतात्वादपि परां प्रपेदे परमाणुताम् ॥ २२ ॥

नेति। इतीति। राक्षसो लवणः, अद्य मत्कुक्षेः भुज्यत इति भोजनं भोज्यं मृगादिकं नातिपर्य्याप्तम् अनतिसमग्रमालक्ष्य दृष्ट्वा भीतेनेव धात्रा दिष्ट्या भाग्येन मे त्वम् उपपादितः कल्पितोऽसि, इति शत्रुघ्नं सन्तर्ज्य तस्य शत्रुघ्नस्य जिघांसया हन्तुमिच्छया प्रांशुमुन्नतं द्रुमं मुस्तास्तम्बमिव अक्लेशेन उत्पाटयामास ॥ १८ ॥ १९ ॥

सौमित्रेरिति। नैरृतेरितो रक्षःप्रेरितः शाखी अन्तरा मध्ये निशितैर्बाणैः शकलीकृतः सन् सौमित्रेः शत्रुघ्नस्य गात्रं न प्राप, किन्तु पुष्परजः प्राप ॥ २० ॥

विनाशादिति। रक्षो लवणस्तस्य वृक्षस्य विनाशाद्धेतोः महोपलं महान्तं पाषाणं पृथक् स्थितं कृतान्तस्य यमस्य मुष्टिमिव। मुष्टिशब्दो द्विलिङ्गः। तस्मै शत्रुघ्नाय प्रजिघाय प्रहितवान् ॥ २१ ॥

ऐन्द्रमिति। स महोपलः शत्रुघ्नेन ऐन्द्रमिन्द्रदेवताकमस्त्रमुपा-

तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः।
एकताल इवोत्पातपवनप्रेरितो गिरिः॥२३॥
कार्ष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन्।
आनिनाय भुवः कम्पं जहाराश्रमवासिनाम्॥२४॥
वयसां पङ्क्तयः पेतुर्हतस्योपरि विद्विषः।
तत्प्रतिद्वन्द्विनो मूर्ध्नि दिव्याः कुसुमवृष्टयः॥२५॥

दाय ताडितोऽभिहतः सन् सिकतात्वात् सिकताभावादपि परां परमाणुतां प्रपेदे। यतोऽणुर्नास्ति स परमाणुरित्याहुः॥ २२॥

तमिति। निशाचरो राक्षसः दक्षिणं दोः। ककुद्दोषणी इति भगवतो भाष्यकारस्य प्रयोगात् दोष्शब्दस्य नपुंसकत्वं द्रष्टव्यम्। भुज-बाहू प्रवेष्टोदोरिति पुंलिङ्गसाहचर्यात् पुंस्त्वञ्च। तथा च प्रयोगः। दोषं तस्य तथाविधस्य भजतइति। सव्येतरं बाहुम् उद्यम्य एकताल स्ताडाख्यवृक्षो यस्मिन् स एकतालः उत्पातपवनेन प्रेरितो गिरिरिव तं शत्रुघ्नम् उपाद्रवत् अभिद्रुतः॥ २३॥

कार्ष्णेनेति। स शत्रुर्लवणः कार्ष्णेन वैष्णवेन पत्रिणा बाणेन। उक्तञ्च रामायणे। एकमेव प्रजनितो विष्णोस्तेजोमयः शरइति। विष्णुर्नारायणः कृष्ण इत्यमरः। भिन्नहृदयः पतन् भुवः कम्पम् आनिनाय नीतवान् देहभारादित्यर्थः, आश्रमवासिनां कम्पं जहार तन्नाशादकुतोभया बभूवुरित्यर्थः॥ २४॥

वयसामिति। हतस्य विद्वेष्टीति विद्विट् तस्य विद्विषो राक्षसस्य उपरि वयसां पक्षिणां पङ्क्तयः पेतुः, तत्प्रतिद्वन्द्विनः शत्रुघ्नस्य मूर्ध्नि तु दिव्याः कुसुमवृष्टय पेतुः॥ २५॥

सइति। स वीरः शत्रुघ्नो लवणं हत्वा तदा आत्मानं महौजसो

स हत्वा लवणं वीरस्तदा मेने महौजसः।
भ्रातुः सोदर्य्यमात्मानमिन्द्रजिद्वधशोभिनः॥२६॥
तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः।
शुशुभे विक्रमोदग्रं व्रीडयावनतं शिरः॥२७॥
उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः।
निर्ममे निर्ममोऽर्थेषु मथुरां मधुराकृतिः॥२८॥
या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशिता॥२९॥

महाबलस्य इन्द्रजिद्वधेन शोभिनो भ्रातुर्लक्ष्मणस्य समानोदरे शयितं सोदर्य्यम् एकोदरं मेने। सोदराद्यादिति यत्प्रत्ययः ॥ २६ ॥

तस्येति। चरितार्थैः कृतार्थैः कृतकार्य्यैः तपस्विभिः संस्तूयमानस्य तस्य शत्रुघ्नस्य विक्रमेण उदग्रमुन्नतं व्रीडया लज्जया अवनतं नम्रं शिरः शुशुभे। विक्रान्तस्य लज्जैव भूषणमिति भावः ॥ २७ ॥

उपेति। पौरुषभूषणः अर्थेषु विषयेषु निर्ममो निस्पृहः मधुराकृतिः सौम्यरूपः स शत्रुघ्नः कालिन्द्याः यमुनायाः उपकूलं कूले। विभक्त्यर्थेऽव्ययीभावः। मथुरा नाम पुरीं निर्ममे निर्मितवान् ॥ २८ ॥

येति। या पूः शोभनो राजा यस्याः पुरः सा सुराज्ञी सुराज्ञ्याः भावः सौराज्यं तेन प्रकाशाभिः प्रकाशमानाभिः पौराणां विभूतिभिः ऐश्वर्य्यैः स्वर्गस्याभिष्यन्दोऽतिरिक्तजनस्य वमनम् आहरणं कृत्वा उपनिवेशिता उपस्थापितेव बभौ। अत्र कौटिल्यः। भूतपूर्वमभूतपूर्वं वा जनपदं परदेशप्रवाहेण स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति ॥ २९ ॥

तत्र सौधगतः पश्यन् यमुनां चक्रवाकिनीम्।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥३०॥

सखा दशरथस्यापि जनकस्य च मन्त्रकृत्।
सञ्चस्कारोभयप्रीत्या मैथिलेयौ यथाविधि ॥३१॥

स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया।
कविः कुशलवावेव चकार किल नामतः ॥३२॥

साङ्गञ्च वेदमध्याप्य किञ्चिदुत्क्रान्तशैशवौ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम् ॥३३॥

तत्रेति। तत्र मथुरायां सौधगतो हर्म्यारूढः स चक्रवाकिनी चक्रवाकवतीं यमुनां हेमभक्तिमतीं सुवर्णरचनावतीं भूमेः प्रवेणीं वेणीमिव। वेणी प्रवेणीत्यमरः। पश्यन् पिप्रिये प्रीतः। प्रीङ्- प्रीणन इति धातोर्दैवादिकाल्लिट्॥ ३०॥

सखाइति। दशरथस्य जनकस्य च सखा मन्त्रकृत् मन्त्रद्रष्टा स वाल्मीकिरपि। सुकर्मपापमन्त्रपुण्येषु कृञ इति क्विप्। उभयोर्दश- रथजनकयोः प्रीत्या स्नेहेन मैथिलेयौ मैथिलीपुत्रौ यथाविधि यथा शास्त्रं सञ्चस्कार संस्कृतवान्॥ २१॥

सइति। स कवि र्वाल्मीकिः कुशैर्दर्भैः लवैर्गोपुच्छलोमभिः। लवोलवणकिञ्जल्कपच्छगोपुच्छलोमसु इति वैजयन्ती। उन्मृष्टो गर्भ क्लेदो गर्भोपद्रवो ययोस्तौ कुशलवोन्मृष्टगर्भक्लेदौ तौ मैथिलेयौ तेषां कुशानाञ्च लवानाञ्चाख्यया नामतो नाम्ना यथासंख्यं कुशलवावेव चकार किल। कुशोन्मृष्टः कुशः, लवोन्मृष्टो लवः॥ ३२॥

साङ्गमिति। किञ्चिदुत्क्रान्तशैशवौ अतिक्रान्तबाल्यौ तौ साङ्गञ्च वेदमध्याप्य कवीनां प्रथमपद्धतिं कवितावीजमित्यर्थः स्वकृतिं काव्यं

रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
तद्वियोगव्यथां किञ्चित् शिथिलीचक्रतुः सुतौ ॥३४॥
इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ॥३५॥
शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते ।
मधुराविदिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥३६॥
भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् ।
मैथिलीतनयोद्गीतनिःस्पन्दमृगमाश्रमम् ॥३७॥

रामायणाख्यं गाययामास । गायतेर्लिटि । शब्दकर्मत्वाद्गतिबुद्धीत्यादिना द्विकर्मकत्वम् ॥ ३३ ॥

रामस्येति । तौ सुतौ रामस्य वृत्तं मातुरग्रतो मधुरं गायन्तौ तद्वियोगव्यथां रामविरहवेदनां किञ्चिच्छिथिलीचक्रतुः ॥ ३४ ॥

इतरेऽपीति । रघोर्वंश्याः वंशे भवाः त्रेतेत्यग्नयस्त्रेताग्नयः तेषां तेज इव तेजो येषां ते त्रेताग्नितेजसः इतरे रामादन्ये त्रयो भरतादयोऽपि तद्योगाद्भरतादिसम्बन्धात् पतिवत्नीषु भर्तृमतीषु जीवत्पतिकासु ख्यातिमतीष्वित्यर्थः । पतिवत्नी सभर्तृकेत्यमरः । अन्तर्वत्पतिवतोर्नुगिति ङीप्प्रत्ययो नुगागमश्च । पत्नीषु द्विसूनवः आसन् । द्वौ द्वौ सूनू येषां ते द्विसूनव इति विग्रहः । क्वचित् संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत् ॥ ३५ ॥

शत्रुघातिनीति । पूर्वजोत्सुको ज्येष्ठप्रियः शत्रुघ्नो बहुश्रुते शत्रुघातिनि सुबाहौ च तन्नामकयोः सून्वोः मधुरां च विदिशां च ते नगर्यौ निदधे निधाय गत इत्यर्थः ॥ ३६ ॥

भूय इति । स शत्रुघ्नो मैथिलीतनययोः कुशलवयोः उद्गीतेन निःस्प-

वशी विवेश चायोध्यां रथ्यासंस्कारशोभिनीम्।
लवणस्य वधात् पौरैरीक्षितोऽत्यन्तगौरवम्॥३८॥
स ददर्श सभामध्ये सभासद्भिरुपस्थितम्।
रामं सीतापरित्यागादसामान्यपतिं भुवः॥३९॥
तमभ्यनन्दत् प्रणतं लवणान्तकमग्रजः।
कालनेमिवधात् प्रीतस्तुराषाडिव शार्ङ्गिणम्॥४०॥
स पृष्टः सर्वतो वार्त्तमाख्यद्राज्ञे न सन्ततिम्।
प्रत्यर्पयिष्यतः काले कवेराद्यस्य शासनात्॥४१॥

न्द्वगं गीतप्रियतया निश्चलहरिणं वाल्मीकेराश्रमम् भूयः पुनरपि तयोर्व्ययः संविधानकरणार्थं तपोहानि र्मा भूदिति हेतोः, उत्सवात् अतिक्रम्य गतइत्यर्थः॥ ३७॥

वशीति। वशी सः लवणस्य वधाद्धेतोः पौरैः पौरजनैः अत्यन्तं गौरवं यस्मिन् कर्मणि तत्तथा ईक्षितः सन् रथ्यासंस्कारैः तोरणादिभिः शोभते या तामयोध्यां विवेश च॥ ३८॥

स इति। स शत्रुघ्नः सभामध्ये सभासद्भिः सभ्यैः उपस्थितं सेवितं सीतापरित्यागात् भुवोऽसामान्यपतिम् असाधारणपतिं रामं ददर्श ॥ ३९॥

तमिति। अग्रजो रामो लवणस्यान्तकं हन्तारं प्रणतं तं शत्रुघ्नम्, कालनेमिर्नाम राक्षसः तस्य वधात् प्रीतः तुरं वेगं सहते इति तुराषाडिन्द्रः। छन्दसि साहइति ण्विः। यद्वा सहतेर्णिचि कृते साहयतेः क्विप्। अन्येषामपि दृश्यतइति पूर्वपदस्य दीर्घः। सहेः साडः सः इति षत्वम्। शार्ङ्गिणमुपेन्द्रमिव, अभ्यनन्दत्॥ ४०॥

स इति। स शत्रुघ्नः पृष्टः सन् सर्वतो वार्त्तां कुशलं राज्ञे आख्यत्

अथ जानपदो विप्रः शिशुमप्राप्तयौवनम्।
अवतार्य्याङ्कशय्यास्थं द्वारि चक्रन्द भूपतेः॥४२॥
शोचनीयासि वसुधे या त्वं दशरथाच्च्युता।
रामहस्तमनुप्राप्य कष्टात् कष्टतरं गता॥४३॥
श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः।
न ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत्॥४४॥
स मुहूर्त्तं क्षमस्वेति द्विजमाश्वास्य दुःखितम्।
यानं सस्मार कौवेरं वैवस्वतजिगीषया॥४५॥

आख्यातवान्। चक्षिङोलुङ्। चक्षिङः ख्याञिति ख्याञादेशः, अस्यति वक्तीत्यङ्, आतोलोपइति चेत्याकारलोपः। ख्यातेर्वा लुङ्। सन्ततिं कुशलवोत्पत्तिं नाख्यत्। कुतः, कालेऽवसरे प्रत्यर्पयिष्यतः आद्यस्य कवेर्वाल्मीकेः शासनात्॥४१॥

अथेति। अथ जनपदे भवो जानपदो विप्रः कश्चिदिति शेषः अप्राप्तयौवनं शिशुं पुत्रमिति शेषः भूपतेः रामस्य द्वारि अङ्कशय्यास्थं यथा तथा अवतार्य्य अङ्कस्थलेनैवावरोप्य चक्रन्द चुक्रोश॥४२॥

शोचनीयेति। हे वसुधे दशरथात् च्युता या त्वं रामहस्तम् अनुप्राप्य कष्टात् कष्टतरं गता सती शोचनीयासि॥४३॥

श्रुत्वेति। गोप्ता रक्षको राघवः तस्य विप्रस्य शुचः शोकस्य हेतुं पुत्रमरणरूपं श्रुत्वा जिह्राय लज्जितः। कुतः, हि यस्मात् अकालभवो मृत्युः इक्ष्वाकूणां पदं राष्ट्रं नास्पृशत्। वृद्धे जीवति यवीयान् म्रियत इत्यर्थः॥४४॥

स इति। स रामो दुःखितं द्विजं मुहूर्त्तं क्षमस्वेति आश्वास्य वैव-

आत्तशस्त्रस्तदध्यास्य प्रस्थितः स रघूद्वहः।
उच्चचार पुरस्तस्य गूढरूपा सरस्वती ॥४६॥
राजन् प्रजासु ते कश्चिदपचारः प्रवर्त्तते।
तमन्विष्य प्रशमये र्भवितासि ततः कृती ॥४७॥
इत्याप्तवचनाद्रामो विनेष्यन् वर्णविक्रियाम्।
दिशः पपात पत्रेण वेगनिष्कम्पकेतुना ॥४८॥
अथ धूमाभिताम्राक्षं वृक्षशाखावलम्बिनम्।
ददर्श कञ्चिदैक्ष्वाकस्तपस्यन्तमधोमुखम् ॥४९॥

स्ततस्यान्तकस्यापि जिगीषया जेतुमिच्छया कौबेरं यानं पुष्पकं सस्मार ॥ ४५ ॥

आत्तेति। स रघूद्वहो रामः आत्तशस्त्रः सन् तत् पुष्पकमध्यास्य प्रस्थितः। अथ तस्य पुरो गूढरूपा सरस्वती अशरीरा वाक् उच्चचार उद्बभूव ॥ ४६ ॥

राजन्निति। हे राजन् ते प्रजासु कश्चिदपचारो वर्णधर्मव्यतिरेकः प्रवर्त्तते, तम् अपचारमन्विष्य प्रशमयेः, ततः कृती कृतकृत्यो भवितासि भविष्यसि ॥ ४७ ॥

इतीति। इत्याप्तवचनाद्रामो वर्णविक्रियां वर्णापचारं विनेष्यन् वेगेन निष्कम्पकेतुना पत्रेण वाहनेन पुष्पकेण। पत्रं वाहनपक्षयो रित्यमरः। दिशः पपात धावति स्म ॥ ४८ ॥

अथेति। अथ इक्ष्वाकुवंशप्रभव ऐक्ष्वाको रामः। कोपधादणि त्यणि कृते दाण्डिनायनेत्यादिना उकारलोपनिपातः। धूमेन पीयमानेनाभिताम्राक्षं वृक्षशाखावलम्बिनमधोमुखं तपस्यन्तं तपश्चरन्तं कञ्चित् पुरुषं ददर्श ॥ ४९ ॥

दृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः।
आत्मानं शम्बुकं नाम शूद्रं सुरपदार्थिनम् ॥ ५० ॥
तपस्यनधिकारित्वात् प्रजानां तमघावहम्।
शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रमाददे ॥ ५१ ॥
स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम्।
ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत् ॥ ५२ ॥
कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम्।
तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना ॥ ५३ ॥

दृष्टेति। राज्ञा नाम चान्वयश्च तौ दृष्टौ नामान्वयौ यस्य स तथोक्तः धूमं पिबतीति धूमपः। सुपीति योगविभागात् कप्रत्ययः। स पुरुषः आत्मानं सुरपदार्थिनं स्वर्गार्थिनम्। अनेन प्रयोजनमपि दृष्टमिति ज्ञेयम्। शम्बुकं नाम शूद्रम् आचष्ट बभाषे किल ॥ ५० ॥

तपसीति। तपस्यनधिकारित्वात् प्रजानामघावहं दुःखावहं तं शूद्रं शीर्षच्छेद्यम्। शीर्षच्छेदात् यदिति यत्प्रत्ययः। परिच्छिद्य निश्चित्य नियन्ता रक्षको रामः शस्त्रम् आददे जग्राह ॥ ५१ ॥

सइति। स रामः ज्योतिष्कणैः स्फुलिङ्गैः आहतानि दग्धानि श्मश्रूणि यस्य तत् तस्य वक्त्रं हिमक्लिष्टकिञ्जल्कं पङ्कजमिव कण्ठएव नालं तस्मादपातयत् ॥ ५२ ॥

कृतेति। शूद्रः शम्बुकः राज्ञा स्वयं कृतदण्डः कृतशिक्षः सन् सतां गतिं लेभे, दुश्चरेणापि स्वमार्गविलङ्घिना अनधिकारदुष्टेनेत्यर्थः. तपसा न लेभे। तथा मनुः। राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथेति ॥ ५३ ॥

रघुनाथ इति। रघुनाथोऽपि मार्गसन्दर्शितात्मना महौजसा

रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ॥ ५४ ॥

कुम्भयोनिरलङ्कारं तस्मै दिव्यपरिग्रहम् ।
ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ॥ ५५ ॥

तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना ।
पश्चान्निववृते रामः प्राक् परासुर्द्विजात्मजः ॥ ५६ ॥

तस्य पूर्वोदितां निन्दां द्विजः पुत्रसमागतः ।
स्तुत्या निवर्त्तयामास त्रातुर्वैवस्वतादपि ॥ ५७ ॥

तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः ।
मेघाः सस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ॥ ५८ ॥

अगस्त्येन, इन्दुना शरत्काल इव, संयुयुजे सङ्गतः । इन्दावपि विशेषणं योज्यम् । रघुनाथेऽत्र कुम्भादित्यागस्त्यभावः ॥ ५४ ॥

कुम्भेति । कुम्भयोनिरगस्त्यः पीतेन समुद्रेण आत्मनिष्क्रयमिव आत्ममोचनमूल्यमिव दत्तम् अतएव परिगृह्यत इति व्युत्पत्त्या परिग्रहः दिव्यानां परिग्रहः परिग्राह्य इत्यर्थः तम् अलङ्कारं तस्मै रामाय ददौ ॥ ५५ ॥

तमिति । मैथिलीकण्ठनिर्व्यापारेण बाहुना तमलङ्कारं दधद्रामः पश्चात् निववृते निवृत्तः, परासुर्मृतो द्विजात्मजः प्राक् रामात् पूर्वं निववृते ॥ ५६ ॥

तस्येति । पुत्रसमागतः पुत्रेण सङ्गतो द्विजः वैवस्वतादन्तका-दपि त्रातुः रक्षकस्य । भीत्रार्थानां भयहेतुरित्यपादानात् पञ्चमी । तस्य रामस्य पूर्वोदितां पूर्वोक्तां निन्दां स्तुत्या निवर्त्तयामास ॥ ५७ ॥

तमिति । अध्वरायाश्वमेधाय मुक्ताश्वं तं रामं रक्षःकपिनरेश्वराः

दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः। [५९]॥
न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि॥

उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ।
अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः॥ ६०॥

श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः।
अनन्यजानेः सैवासीत् यस्माज्जाया हिरण्मयी॥ ६१॥

सुग्रीवविभीषणादयो राजानश्च, मेघाः अम्भोभिः शस्यमिव, उपायनै-रभ्यवर्षन् ॥ ५८ ॥

दिग्भ्य इति। निमन्त्रिता आहूता महर्षयश्च भूम्याः सम्बन्धीनि भौमानि धिष्ण्यानि स्थानान्येव न। धिष्ण्यं स्थाने गृहे भेऽग्नावित्यमरः। किन्तु ज्योतिर्मयानि नक्षत्ररूपाणि धिष्ण्यान्यपि हित्वा दिग्भ्य एनं राममभिजग्मुः ॥ ५९ ॥

उपेति। चत्वारि द्वाराण्येव मुखानि यस्याः सा चतुर्द्वारमुखी अयोध्या उपशल्येषु ग्रामान्तेषु निविष्टैः। ग्रामान्त उपशल्यं स्यादित्यमरः। तैः महर्षिभिः, सद्यः सृष्टलोका पितामहस्येयं पैतामही तनुर्मूर्तिरिव, बभौ ॥ ६० ॥

श्लाघ्य इति। वैदेह्यास्त्यागोऽपि श्लाघ्यो न गर्ह्य एव, कुतः, यस्मात् प्राग्वंशे प्राचीनस्थूणे यजमानगृहे तद्वासिनः नास्त्यन्या जाया यस्य तस्य अनन्यजानेः। जायाया निङिति समासान्तो निङादेशः। पत्युः रामस्य हिरण्मयी सौवर्णी। दाण्डिनायनादिसूत्रेण निपातः। सैव जाया पत्नी आसीत् ॥ ६१ ॥

[illegible]रिति। ततः [illegible] [illegible]ऽधिक[illegible]तिरिच्यमान [illegible] [illegible] प्रवृत्तः। [illegible] [illegible] [illegible]

विधेरधिकसम्भारस्ततः प्रवदृते मखः।
आसन् यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः॥ ६२ ॥

अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगतुर्गुरुनोदितौ॥ ६३॥

वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ।
किं तद्येन मनो हर्त्तुमलं स्यातां न शृण्वताम्॥ ६४ ॥

रूपे गीते च माधुर्य्यं तयोस्तज्ज्ञैर्निवेदितम्।
ददर्श सानुजो रामः शुश्राव च कुतूहली॥ ६५॥

प्रत्यूहाः। मखे यज्ञे यज्ञार्थे कविधानमिति कः। क्रियाविघ्ना अनुष्ठानविघातकाः राक्षसा एव रक्षिणः रक्षका आसन्॥ ६२ ॥

अथेति। अथ मैथिलेयौ मैथिलीतनयौ। स्त्रीभ्योढक्। कुशलवौ गुरुणा वाल्मीकिना नोदितौ प्रेरितौ सन्तौ प्राचेतसो वाल्मीकिः उपज्ञायतेऽत्युपज्ञा। आतश्चोपसर्गे इति कर्मण्यङ् प्रत्ययः। प्राचेतसस्योपज्ञा प्राचेतसोपज्ञं प्राचेतसेनादौ ज्ञातमित्यर्थः। उपज्ञा ज्ञानमाद्यं स्यादित्यमरः। उपज्ञोपक्रमं तदाचिख्यासायामिति नपुंसकत्वम्। अय्यते ज्ञायते अनेनेत्ययनं रामस्यायनं चरितं रामायणं रामायणाख्यं काव्यम्। पूर्वपदात् संज्ञायामगइति णत्वम् उत्तरायणमितिवत्। इतस्ततो जगतुः। गायतेर्लिट्॥ ६३ ॥

वृत्तमिति। रामस्य वृत्तं वर्ण्यं वस्त्विति शेषः, वाल्मीकेः कृतिः काव्यं गेयमिति शेषः, तौ कुशलवौ किन्नरस्वनौ किन्नरकण्ठौ गायकौ पुनरिति शेषः, अतएव तत् किं येन निमित्तेन तौ शृण्वतां मनोहर्त्तुम् अलं शक्तौ न स्याताम्। सर्वं सरसमित्यर्थः॥ ६४ ॥

रूपइति। ते जानन्तीति तज्ज्ञास्तैस्तज्ज्ञैरभिज्ञैर्निवेदितं तयोः

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली॥ ६६॥
वयोवेषविसंवादि रामस्य च तयोस्तदा।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत॥६७॥
उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा॥ ६८॥
गेये को नु विनेता वां कस्य चेयं कृतिः कवेः।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम्॥ ६९॥

कुशलवयोः रूपे आकारे गीते च माधुर्य्यं रामणीयकं सानुजो रामः कुतूहली सानन्दः सन् यथासंख्यं ददर्श शुश्राव च॥ ६५॥

तदिति। तयोर्गीतश्रवणे एकाग्रा आसक्ता अश्रुमुखी आनन्दादिति भावः, संसत् सभा, प्रातर्हिमनिष्यन्दिनी निर्वाता वातरहिता वनस्थलीव, बभौ शुशुभे। आनन्दपारवश्यान्निष्पन्दमासीत्यर्थः॥६६॥

वयइति। जनता जनानां समूहः। ग्रामजनबन्धुभ्यस्तलिति तल् प्रत्ययः। वयोवेषाभ्यामेव विसंवादि विलक्षणं तदा तयोः रामस्य च सादृश्यं प्रेक्ष्य नास्त्यक्षिकम्पो यस्मिन् कर्मणि तत् यथा तथा। नञर्थस्य नशब्दस्य बहुव्रीहिः। व्यतिष्ठत अतिष्ठत्। समवप्रविभ्यस्थइत्यात्मनेपदम्। विस्मयादनिमिषदृष्टीऽदित्यर्थः॥ ६७॥

उभयोरिति। लोको जनः उभयोः कुमारयोः प्रावीण्येन नैपुण्येन तथा न विसिष्मिये न विस्मितवान् यथा नृपतेः प्रीतिदानेषु वीतस्पृहतया नैस्पृह्येण विसिष्मिये॥ ६८॥

गेयइति। गेये गीते कोनु वा युवयो र्विनेता शिक्षकः। नुशब्दः प्रश्ने। न प्र॰ [illegible] वितर्के चेत्यमरः। गेये केन विनीतौ वामिति पाठे

अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
उरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥ ७० ॥
स तावाख्याय रामाय मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम् ॥ ७१ ॥
तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि ।
दौरात्म्याद्रक्षसस्तान्तु नात्रत्याः श्रद्दधुः प्रजाः ॥ ७२ ॥

वामिति युष्मदर्थप्रतिपादकमव्ययम् द्रष्टव्यम् । तथाचायमर्थः, केन पुंसा वां युवां गेये विषये विनीतौ शिक्षितौ । कर्मणि निष्ठा प्रत्ययः । इयञ्च कस्य कवेः कृतिरिति राज्ञा स्वयं पृष्टौ तौ कुशलवौ वाल्मीकिमशंसतामुक्तवन्तौ विनेतारं कविञ्चेत्यर्थः ॥ ६९ ॥

अथेति । अथ सावरजो रामः प्राचेतस वाल्मीकिमुपेयिवान् प्राप्तः सन् देहमात्मन उरीकृत्य आत्मानं स्थापयित्वेत्यर्थः, राज्यमस्मै प्राचेतसाय न्यवेदयत् समर्पितवान् ॥ ७० ॥

स इति । करुणा प्रयोजनमस्य कारुणिको दयालुः । प्रयोजनमिति ठञ् । स्याद्दयालुः कारुणिक इत्यमरः । स कविः रामाय तौ मैथिलेयौ तदात्मजौ रामसुतौ आख्याय सीतायाः सम्परिग्रहं स्वीकारं वव्रे ययाचे ॥ ७१ ॥

तातेति । हे तात ते स्नुषा नोऽस्माकम् अक्ष्णोः समीपं समक्षम् । अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तष्टच् । जातवेदसि वह्नौ शुद्धा, नास्माकमविश्वास इत्यर्थः । किन्तु रक्षसो रावणस्य दौरात्म्यादत्रत्याः प्रजाः तां न श्रद्दधुः न विश्वस्ताः ॥ ७२ ॥

तामिति । मैथिलीं स्वचारित्रमुद्दिश्य ताः प्रजाः प्रत्याययतु विश्वासयतु । विश्वासस्य बुद्धिरूपत्वात् णौ गमिरबोधन इति इणो गम्या-

ताः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥ ७३ ॥
इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥७४॥
अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः ।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥७५॥
स्वरसंस्कारवत्यासौ पुत्राभ्यामथ सीतया ।
ऋचेवोदर्चिषं सूर्य्यं रामं मुनिरुपस्थितः ॥७६॥
काषायपरिवीतेन स्वपदार्पितचक्षुषा ।
अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ॥७७॥

दोषो नास्ति । ततोऽनन्तरं पुत्रवतीमेनां सीतां त्वदाज्ञया प्रतिपत्स्ये स्वीकरिष्ये ॥ ७३ ॥

इतीति । राज्ञा इति प्रतिश्रुते सति मुनिः आश्रमात् जानकीं शिष्यैः प्रयोज्यैः, स्वसिद्धिं स्वार्थसिद्धिं नियमैस्तपोभिरिव, आनाययामास ॥ ७४ ॥

अन्येद्युरिति । अथ काकुत्स्थो रामः अन्येद्युरन्यस्मिन्नहनि प्रस्तुत प्रतिपत्तये प्रकृतकार्य्यानुसन्धानाय पुरौकसः पौरान् सन्निपात्य मेलयित्वा कविं वाल्मिकिम् आह्वाययामास आकारयामास ॥ ७५ ॥

स्वरेति । अथ स्वर उद [illegible] दिः संस्कारः शुद्धिः तद्वत्या ऋचा सावित्र्या उदर्चिषं सूर्य्यं [illegible], पुत्राभ्यामुपलक्षितया सीतया करणेन उदर्चिषं रामम् असौ मुनिरुपस्थित उपतस्थे ॥ ७६ ॥

काषायेति । कषायेण रक्तं काषायम् । तेन रक्तं रागादित्यण् ।

जनास्तदालोकपथात् प्रतिसंहृतचक्षुषः ।
तस्थुस्तेऽवाङ्मुखाः सर्व्वे फलिता इव शालयः॥ ७८ ॥
तां दृष्टिविषये भर्त्तुर्म्मुनिरास्थितविष्टरः ।
कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात्॥ ७९ ॥
अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः ।
आचम्योदीरयामास सीता सत्यां सरस्वतीम्॥ ८० ॥
वाङ्मनःकर्म्मभिः पत्यौ व्यभिचारो यथा न मे ।
तथा विश्वम्भरे देवि मामन्तर्द्धातुमर्हसि ॥ ८१ ॥

तेन परिवीतेन संवृतेन स्वपदार्पितचक्षुषा शान्तेन प्रसन्नेन वपुषैव सा सीता शुद्धा साध्वीत्यन्वमीयत अनुमिता ॥ ७७ ॥

जनाइति। तस्याः सीतायाः कर्मणः आलोकपथाद्दर्शनमार्गात् प्रतिसंहृतचक्षुषः निवर्त्तितदृष्टय सर्वे जनाः फलिताः शालयइव अवाङ्मुखा अवनतमुखास्तस्थुः ॥ ७८ ॥

तामिति। आस्थितविष्टरोऽधिष्ठितासनो मुनिः हे वत्से भर्त्तु र्दृष्टिविषये समक्षं स्ववृत्ते स्वचरिते विषये लोकं निःसंशयं कुर्विति तां सीतामशात् शास्ति स्म ॥ ७९ ॥

अथेति। अथ वाल्मीकिशिष्येण आवर्ज्जितं दत्तं पुण्यं पयः आचम्य सीता सत्यां सरस्वतीं वाचम् उदीरयामास उच्चारयामास ॥ ८० ॥

वाङ्मनइति। वाङ्मनःकर्मभिः पत्यौ विषये मे व्यभिचारः स्खालित्य न यथा नास्ति यदि तथा तर्हि विश्वं बिभर्त्तीति विश्वम्भरा भूमिः। संज्ञायां भृतॄ इत्यादिना खच्प्रत्यय, अरुर्द्विषदित्यादिना मुमागम.। हे विश्वम्भरे देवि मामन्तर्द्धातुं गर्भे वासयितुमर्हसि ॥ ८१ ॥

एवमुक्ते तया साध्व्या रन्ध्रात् सद्योभवाद्भुवः।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ॥८२॥
तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी।
समुद्ररशना साक्षात् प्रादुरासीद्वसुन्धरा॥८३॥
सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम्।
मामेति व्याहरत्येव तस्मिन् पातालमभ्यगात्॥८४॥
धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः।
गुरुर्विधिबलापेक्षी शमयामास धन्विनः॥८५॥
ऋषीन् विसृज्य यज्ञान्ते सुहृदश्च पुरस्कृतान्।
रामः सीतागतं स्नेहं निदधे तदपत्ययोः॥८६॥

एवमिति। साध्व्या पतिव्रतया तया सीतया एवमुक्ते सति सद्योभवाद्भुवोरन्ध्रात् शातह्रद वैद्युतं ज्योतिरिव प्रभामण्डलमुद्ययौ॥८२॥

तत्रेति। तत्र प्रभामण्डले नागफणोत्क्षिप्ते सिंहासने निषेदुषी आसीना समुद्ररशना समुद्रमेखला साक्षात् वसूनि धारयतीति वसुन्धरा भूमिः। खचि ह्रस्व इति ह्रस्वः। प्रादुरासीत्॥८३॥

सेति। सा वसुन्धरा भर्त्तरि प्रणिहितेक्षणा दत्तदृष्टिं सीताम् अङ्कमारोप्य तस्मिन् भर्त्तरि मामेति व्याहरति वदत्येव व्याहरन्तमनादृत्येत्यर्थः। षष्ठी चानादरे इति सप्तमी। पातालमभ्यगात्॥८४॥

धरायामिति। सीताप्रत्यर्पणमिच्छतीति तथोक्तस्य धन्विनः आत्तधनुषः तस्य रामस्य धराया विषये संरम्भं विधिबलापेक्षी दैवशक्तिदर्शी गुरुर्ब्रह्मा शमयामास, अवश्यम्भावी विधिरिति भावः॥८५॥

ऋषीनिति। रामो यज्ञान्ते पुरस्कृतान् पूजितान् ऋषीन् सुहृदश्च विसृज्य सीतागतं स्नेहं तदपत्ययोः कुशलवयोर्निदधे॥८६॥

युधाजितश्च सन्देशात् स देशं सिन्धुनामकम्।
ददौ दत्तप्रभावाय भरताय भृतप्रजः ॥८७॥
भरतस्तत्र गन्धर्व्वान् युधि निर्ज्जित्य केवलम्।
आतोद्यं ग्राहयामास समत्याजयदायुधम् ॥८८॥
स तक्षपुष्कलौ पुत्त्रौ राजधान्योस्तदाख्ययोः।
अभिषिच्याभिषेकार्हौ रामान्तिकमगात् पुनः॥८९॥
अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवौ।
शासनाद्रघुनाथस्य चक्रे कारापथेश्वरौ ॥९०॥
इत्यारोपितपुत्त्रास्ते जननीनां जनेश्वराः।
भर्त्तृलोकप्रपन्नानां निवापान् विदधुः क्रमात्॥९१॥

युधाजितइति। किञ्च भृतप्रजः स रामो युधाजितः भरतमातुलस्य सन्देशात् सिन्धुनामकं देशं दत्तप्रभावाय दत्तैश्वर्य्याय रामेणेति शेषः भरताय ददौ ॥ ८७ ॥

भरतइति। तत्र सिन्धुदेशे भरतो युधि गन्धर्व्वान्निर्ज्जित्य केवलमेकमातोद्यं वीणां ग्राहयामास आयुधं समत्याजयत्। अहिंस्यत्वोपपन्नयो द्विकर्मकत्वं नित्यमित्यनुसन्धेयम् ॥ ८८ ॥

स इति। स भरतः अभिषेकार्हौ तक्षपुष्कलौ नाम पुत्त्रौ तदाख्ययोस्तक्षपुष्कलाख्ययोरित्यर्थः पुष्कलं पुष्कलावत्यां तक्षकं तक्षशिलायामिति राजधान्योर्नगर्य्योरभिषिच्य पुनः रामान्तिकमगात् ॥ ८९ ॥

अङ्गदमिति। लक्ष्मणोऽपि रघुनाथस्य रामस्य शासनात् अङ्गदं चन्द्रकेतुञ्च तदाख्यौ आत्मसम्भवौ पुत्त्रौ कारापथो नाम देशः तस्येश्वरौ चक्रे ॥ ९० ॥

इतीति। इत्यारोपितपुत्त्रा स्ते वनेश्वराः रामादयो भर्त्तृलोक-

उपेत्य मुनिवेषोऽथ कालः प्रोवाच राघवम्।
रहःसंवादिनौ पश्येदावां यस्तं त्यजेरिति॥ ९२॥
तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः।
आचख्यौ दिवमध्यास्स्वशासनात् परमेष्ठिनः॥ ९३॥
विद्वानपि तयोर्द्वाःस्थः समयं लक्ष्मणोऽभिनत्।
भीतो दुर्वाससः शापात् रामसन्दर्शनार्थिनः॥ ९४॥
स गत्वा सरयूतीरं देहत्यागेन योगवित्।
चकाराऽवितथां भ्रातुः प्रतिज्ञां पूर्व्वजन्मनः॥ ९५॥

प्रपन्नानां जननीनां क्रमात् निवापान् श्राद्धादीन् विदधुश्चक्रुः ॥ ९१ ॥

उपेत्येति। अथ कालोऽन्तको मुनिवेषः सन् उपेत्य राघवं प्रोवाच, किमित्याह र रं न्नो संवादिनौ सम्भाषिणौ आवां यः पश्येत् रहस्य भङ्गं कुर्य्यादित्य तजेरिति ॥ ९२ ॥

तथेति। स त्वमस्तथेति प्रतिपन्नाय नृपाय रामाय विवृतात्मा प्रकाशितनिजरूप परमेष्ठिनः ब्रह्मणः शासनात् दिवमध्यास्स्वेति आचख्यौ ॥ ९३

विद्वानिति। द्वाःस्थो द्वारि नियुक्तो लक्ष्मणो विद्वानपि पूर्वं श्लोकोक्तं जानन्नपि रामसन्दर्शनार्थिनो दुर्वाससो मुनेः शापाद्भीतः सन् तयोः कालरामयोः समयं संवादम् अभिनत विभेद ॥ ९४ ॥

सइति। योगविद्योगमार्गवेदी स लक्ष्मणः सरयूतीरं गत्वा देहत्यागेन पूर्वजन्मनो भ्रातुः प्रतिज्ञामवितथां सत्यां चकार ॥ ९५ ॥

तस्मिन्निति। चतुर्थो भाग श्चतुर्भागः। संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वं प्रतांगनत्। आत्मचतुर्भागे तस्मिन् लक्ष्मणे प्राक् नाक-

तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषि।
राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव॥९६॥
स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्।
शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम्॥९७॥
उदक् प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः।
अन्वितः पतिवात्सल्यात् गृहवर्जमयोध्यया॥९८॥

मधितस्थुषि पूर्वं स्वर्गं जग्मुषि सति राघवो रामः भुवि त्रिपात् धर्म इव शिथिलं तस्थौ। पादविकलो हि शिथिलं तिष्ठतीति भावः। त्रेतायां धर्मस्त्रिपादित्याङ्कः। पाद स्तुर्य्यांशः चङ्घ्रिश्च भन्यते। पादा रश्म्यङ्घ्रितूर्य्यांशा इत्यमरः। त्रयः पादा यस्यासौ त्रिपात् संख्यासुपूर्वस्येत्यकारलोपः समासान्तः॥ ९६॥

सइति। उदगिति। युग्मम्। स्थिरधीः स रामः, रिपवएव नागाः गजा स्तेषामङ्कुशं निवारकं कुशं कुशावत्यां पुर्य्यां निवेश्य स्थापयित्वा, सूक्तैः समीचीनवचनैः सतां जनिता अश्रुलवा अश्रुलेशा येन तं लवं लवाख्यं पुत्रम्। लवो लेशे विलासे च छेदने रामनन्दने इति विश्वः। शरावत्यां पुर्य्याम्। शरादीनाञ्चेति शरकशयोः दीर्घः। निवेश्य, सानुजोऽग्निपुरःसरः सन् पत्यौ भर्त्तरि वात्सल्यात् अनुरागात् गृहान् वर्ज्जयित्वा गृहवर्ज्जम्। द्वितीयायाञ्चेति णमुल्। अयं क्वचिदपरीक्षायामपि दृश्यते, अनुदात्तं पदमेकवर्जमित्येकाचः शेषतया व्याख्याततवात्। परीक्षा त्वरा। अयोध्यया अन्वितोऽनुगतः उदक् प्रतस्थे॥ ९७, ९८॥

जगृहुरिति। विकचा हरिराजसाः कदम्बमुकुलस्थूलैः प्रजा-

जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ।
कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः ॥९९॥
उपस्थितविमानेन तेन भक्तानुकम्पिना ।
चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम् ॥१००
यद्गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम् ।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥१०१॥
स विभुर्विबुधांशेषु प्रतिपन्नात्ममूर्त्तिषु ।
त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ॥१०२॥
निर्वर्त्त्यैवं दशमुखशिरश्छेदकार्य्यं सुराणां
विष्वक्सेनः स्वतनुमविशत् सर्वलोकप्रतिष्ठाम् ।

श्रुभिः अभिवृष्टां तस्य रामस्य पदवीं जगृहुः तमनुजग्मुरित्यर्थः ॥ ९९ ॥

उपस्थितेति । उपस्थितं प्राप्तं विमानं यस्य तेन भक्ताननुकम्पत इति भक्तानुकम्पिना तेन रामेण अनुयायिनां सरयूस्त्रिदिवनिःश्रेणिः स्वर्गाधिरोहणी चक्रे । निःश्रेणिस्त्वधिरोहणीत्यमरः ॥ १०० ॥

यदिति । यद्यस्मात्तत्र सरय्वां मज्जतां संमर्दो गोप्रतरो गोप्रतरणं तत्कल्पोऽभूत् अतस्तदाख्यया गोप्रतराख्यया पावनं शोधकं तीर्थं भुवि पप्रथे ॥ १०१ ॥

स इति । विभुः प्रभुः स रामः विबुधानामंशेषु सुग्रीवादिषु प्रतिपन्नात्ममूर्त्तिषु सत्सु त्रिदशीभूता देवत्वं गता ये पौरास्तेषां नूतनसुराणां स्वर्गान्तरमकल्पयत् ॥ १०२ ॥

निर्वर्त्त्येति । विष्वक्सेनो विष्णुः एवं सुराणां दशमुखशिरश्छेद-

लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्त्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च॥१०२

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
श्रीरामस्वर्गारोहणो नाम पञ्चदशः सर्गः।

कार्य्यं निर्वर्त्त्य निष्पाद्य, लङ्कानाथं विभीषणं पवनतनयं हनुमन्तं चोभयं कीर्त्तिस्तम्भद्वयमिव दक्षिणे गिरौ चित्रकूटे च उत्तरे गिरौ हिमवति च स्थापयित्वा, सर्वलोकप्रतिष्ठा सर्वलोकाश्रयभूतां स्वतनुं स्वमूर्त्तिमविशत् ॥ १०२ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां
पञ्चदशः सर्गः।



षोड़शः सर्गः ।



अथेतरे सप्त रघुप्रवीरा
ज्येष्ठं पुरोजन्मतया गुणैश्च ।
चक्रुः कुशं रत्नविशेषभाजं
सौभ्रात्रमेषां हि कुलानुसारि ॥ १ ॥

ते सेतुवार्त्तागजबन्धमुख्यै-
रभ्युच्छ्रिताः कर्म्मभिरप्यवन्ध्यैः ।
अन्योन्यदेशप्रविभागसीमां
वेलां समुद्रा इव न व्यतीयुः ॥ २ ॥

वृन्दारका यस्य भवन्ति भृङ्गा मन्दाकिनी यन्मकरन्दबिन्दुः ।
तवारविन्दाक्ष पदारविन्दं वन्दे चतुर्वर्गचतुष्पदं तत् ॥

अथेति । अथ रामनिर्वाणानन्तरम् इतरे लवादयः सप्त रघुप्रवीराः पुरः पूर्वं जन्म यस्य तस्य भावस्तत्ता तया गुणैश्च ज्येष्ठं कुशं रत्नविशेषभाजं तच्छ्रेष्ठवस्तुभागिनं चक्रुः । तदुक्तं जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते इति । तथाहि सुभ्रातॄणां भावः सौभ्रात्रम् । हायनान्तेत्यादिना युवादित्वादण्प्रत्ययः । एषां कुशलवादीनां कुलानुसारि वंशानुगतं हि ॥ १ ॥

त इति । सेतुर्जलबन्धः, वार्त्ता कृषिगोरक्षणादिः । वार्त्ता कृष्यादावुदन्तयोरिति विश्वः । गजबन्धः काननेभ्यो गजग्रहणम्, त मुख्यं

चतुर्भुजांशप्रभवः स तेषां
दानप्रवृत्तेरनुपारतानाम्।
सुरद्विपानामिव सामयोनि-
र्भिन्नोऽष्टधा विप्रससार वंशः ॥३॥

अथार्द्धरात्रे स्तिमितप्रदीपे
शय्यागृहे सुप्तजने प्रबुद्धः।
कुशः प्रवासस्थकलत्रवेषाम्
अदृष्टपूर्व्वां वनितामपश्यत् ॥४॥

प्रधानं देशां तैः अवन्ध्यैः सफलैः कर्मभिरभ्युच्छ्रिताः अतिसमर्था अपी-त्यर्थः ते कुशादयः प्रविभज्यन्तइति प्रविभागाः अन्योन्यदेशप्रविभागानां या सीमा ताम्, वेलां समुद्रा इव, न व्यतीयु. नातिचक्रमुः। अत्र कामन्दकः। कृषि र्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम्। खन्या-करधनादानं शून्यानाञ्च निवेशनम्। अष्टवर्गमिमं साधुः स्वयं वृद्धो-ऽपि वर्द्धयेदिति ॥ २ ॥

चतुर्भुजेति। चतुर्भुजो विष्णु स्तस्यांशाः रामादयः ते प्रभवाः कारणानि यस्य स तथोक्तः, दानं त्यागो मदश्च। दानं गजमदे त्यागे इति विश्वः। प्रवृत्तिर्व्यापारः प्रवाहश्च दानप्रवृत्तेरनुपारतानां तेषां कुशलवादीनां स वंशः, सामयोनिः सामवेदप्रभवो दानप्रवृत्तेरनुपा-रतानां सुरद्विपानां दिग्गजानां वंशइव, अष्टधा भिन्नः विप्रससार विसृतोऽभूत्। सामयोनिरित्यत्र पालकाव्यः। सूर्य्यस्याण्डकपाले द्वे समानीय प्रजापतिः। हस्ताभ्यां परिगृह्याथ सप्त सामान्य गायत। गायतो ब्रह्मणस्तस्मात् समुत्पेतुर्मतङ्गजा इति ॥ ३ ॥

अथेति। अथ, अर्द्धरात्रे: अर्द्धरात्रः। अर्द्धं नपुंसकमित्येकदेश

सा साधुसाधारणपार्थिवर्द्धेः
स्थित्वा पुरस्तात् पुरुहूतभासः।
जेतुः परेषां जयशब्दपूर्वं
तस्याञ्जलिं बन्धुमतो बबन्ध ॥ ५ ॥

अथानपोढार्गलमप्यगारं
छायामिवादर्शतलं प्रविष्टाम्।
सविस्मयो दाशरथेस्तनूजः
प्रोवाच पूर्वार्द्धविसृष्टतल्पः ॥ ६ ॥

समासः, अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेरिति समासान्तोऽच् प्रत्ययः, रात्राह्नाहाः पुंसि इति नियमात् पुंस्त्वम्। अर्द्धरात्रे निशीथे स्तिमितप्रदीपे सुप्तजने शय्यागृहे प्रबुद्धो न तु सुप्तः कुशः प्रवासस्थ कलत्रवेषां प्रोषितभर्तृकावेषाम् अदृष्टां पूर्वमित्यदृष्टपूर्वां ताम्। सुप्सुपेति समासः। वनितामपश्यत् ॥ ४ ॥

सेति। सा वनिता साधुसाधारणपार्थिवर्द्धेः सज्जनसाधारणराज्यश्रियः पुरुहूतभासः इन्द्रतेजसः परेषां शत्रूणां जेतुः बन्धुमतः तस्य कुशस्य पुरस्तात् स्थित्वा जयशब्दपूर्वं यथा तथा अञ्जलिं बबन्ध ॥ ५ ॥

अथेति। अथ सविस्मयः पूर्वार्द्धेन शरीरपूर्वभागेण विसृष्टतल्पः त्यक्तशय्यः दाशरथेस्तनूजः कुशः अनपोढार्गलम् अनुद्घाटितविष्कम्भमपि। तद्विष्कम्भोऽर्गलं न नेत्यमरः। अगारम्, आदर्शतलं छायामिव प्रविष्टां तां वनितां प्रोवाच अवदत् ॥ ६ ॥

लब्धेति। का त्वमिति। सावरणेऽपि गेहे लब्धान्तरा लब्धाव-

लब्धान्तरा सावरणेऽपि गेहे
योगप्रभावो नच लक्ष्यते ते।
बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम् ॥७॥

का त्वं शुभे कस्य परिग्रहो वा
किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां
मनः परस्त्रीविमुखप्रवृत्ति ॥८॥

तमब्रवीत् सा गुरुणानवद्या
या नीतपौरा स्वपदोन्मुखेन।
तस्याः पुरः सम्प्रति वीतनाथां
जानीहि राजन्नधिदेवतां माम् ॥९॥

काशा त्वमिति शेषः, योगप्रभावश्च ते न लक्ष्यते, मृणालिनी हैमं हिमकृतमुपरागम् उपद्रवमिव अनिर्वृतानां दुःखितानामाकारं बिभर्षि च, नहि योगिनां दुःखमस्तीति भावः। किञ्च हे शुभे त्वं का कस्य वा परिग्रहः पत्नी, ते तव मदभ्यागमे कारणं वा किम्, वशिनां जितेन्द्रियाणां रघूणां मनः परस्त्रीषु विषये विमुखा प्रवृत्ति र्यस्य तत्तथाभूतं मत्वा आचक्ष्व ॥ ७ ॥ ८ ॥

तमिति। सा वनिता तं कुशम् अब्रवीत्, अनवद्या अदोषा या पूः स्वपदोन्मुखेन विष्णुपदोन्मुखेन गुरुणा त्वत्पित्रा नीतपौरा, हे

वस्वौकसारामभिभूय साहं
सौराज्यबद्धोत्सवया विभूत्या।
समग्रशक्तौ त्वयि सूर्य्यवंश्ये
सति प्रपन्ना करुणामवस्थाम् ॥१०॥

विशीर्णतल्पाट्टशतो निवेशः
पर्य्यस्तशालः प्रभुणा विना मे।
विडम्बयत्यस्तनिमग्नसूर्य्यं
दिनान्तमुग्रानिलभिन्नमेघम् ॥११॥

राजन् मां सम्प्रति वीतनाथाम् अनाथां तस्याः पुरो नगर्य्या अयोध्यायाः अधिदेवतां जानीहि ॥ ९ ॥

वस्वौकसारामिति। साहं सौराज्येन राजन्वत्तया हेतुना बद्धोत्सवया विभूत्या, वस्वौकसारा अलकापुरी। अलका पुरी वस्वौकसारा स्यादितिकोषः। अथवा मानसोत्तरशैलशिखरवर्त्तिनी शक्रनगरी, वस्वौकसारा शक्रस्येति विष्णुपुराणात्। तामभिभूय तिरस्कृत्य समग्रशक्तौ त्वयि सूर्य्यवंश्ये सति करुणामवस्थां दीनां दशां प्रपन्ना प्राप्ता ॥ १० ॥

विशीर्णेति। तल्पानि अट्टालकाः। तल्पं शय्याट्टदारेष्वित्यमरः। अट्टानि क्षौमभेदाः। अट्टं भक्ते च शुष्के च क्षौमेऽट्टेऽपि ध्वजान्तरे इति विश्वः। विशीर्णानि तल्पानाम् अट्टानाञ्च शतानि यस्य स तथोक्तः। अथवा विशीर्णतल्पेति पाठः, अट्टाः क्षौमाः। स्यादट्टः क्षौममस्त्रियामित्यमरः। ईदृक्स्थले विशीर्णानि विशीर्णतल्पानि अट्टशतानि यस्य स तथोक्तः पर्य्यस्तशालः स्रस्तप्राकारः। प्राकारो वरणः शाल इत्यमरः। प्रभुणा स्वामिना विना त्वत्कृतो मे निवेशो निवेशनम्

* निशासु भास्वत्कलनूपुराणां
यः सञ्चरोऽभूदभिसारिकाणाम्।
नदन्मुखोल्काविचितामिषाभिः
स वाह्यते राजपथः शिवाभिः ॥१२॥

आस्फालितं यत् प्रमदाकराग्रैः
मृदङ्गधीरध्वनिमन्वगच्छत्।
वन्यैरिदानीं महिषैस्तदम्भः
शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥१३॥

जलनिमग्नस्तम्भम् जलाद्रिलीनार्धम् उपान्तेन निरुद्धं दिङ्नागं विडम्बयति अनुकरोति ॥ ११ ॥

निशास्विति। निशासु भास्वन्ति दीप्तिमन्ति कलानि अव्यक्तमधुराणि नूपुराणि यासां तासामभिसारिकाणाम्। 'कान्तार्थिनी तु या याति सङ्केतं साभिसारिका' इत्यमरः। यो राजपथः सञ्चरत्यनेनेति सञ्चरः सञ्चारसाधनमभूत्। 'गोचरसञ्चर' इत्यादिना घप्रत्ययान्तो निपातः। नदत्सु मुखेषु या उल्काः ताभिर्विचितामिषाभिः अन्विष्टमांसाभिः शिवाभिः क्रोष्ट्रीभिः स वाह्यते गम्यते ॥ १२ ॥

आस्फालितमिति। यदम्भः प्रमदाकराग्रैः आस्फालितं ताडितं सत् जलक्रीडास्विति शेषः मृदङ्गानां यो धीरध्वनिः तमन्वगच्छत् अन्वकरोत् तत् दीर्घिकाणामम्भः इदानीं वन्यैर्महिषैः कर्तृभिः शृङ्गैर्विषाणैराहतं सत् क्रोशति न तु मृदङ्गध्वनिमनुकरोतीत्यर्थः ॥ १३ ॥

वृक्षेशया इति। यष्टिरेव निवासः स्थानं तस्य भङ्गात् वृक्षे शेरते इति वृक्षेशयाः। 'अधिकरणे शेतेः' इत्यच्प्रत्ययः, 'शयवासवासिष्व-

वृक्षेशया यष्टिनिवासभङ्गात्
मृदङ्गशब्दापगमादलास्याः।
प्राप्ता दवोल्काहतशेषवर्हाः
क्रीडामयूरा वनवर्हिणत्वम्॥१४॥
सोपानमार्गेषु च येषु रामाः
निक्षिप्तवत्यश्चरणान् सरागान्।
सद्यो हतन्यङ्कुभिरस्रदिग्धं
व्याघ्रैः पदं तेषु निधीयते मे॥१५॥
चित्रद्विपाः पद्मवनावतीर्णाः
करेणुभिर्दत्तमृणालभङ्गाः।
नखाङ्कुशाघातविभिन्नकुम्भाः
संरब्धसिंहप्रहृतं वहन्ति॥१६॥

कालादित्यलुक् सप्तम्याः। मृदङ्गशब्दानामपगमादभावात् अलास्याः नृत्यशून्याः। दवोऽरण्यवह्निः। दवदावौ वनारण्यवह्नी इत्यमरः। तस्योल्काभिः स्फुलिङ्गैः हृतेभ्यः शेषाणि वर्हाणि येषां ते क्रीडामयूराः वनवर्हिणत्वं वनमयूरत्वं प्राप्ताः॥ १४॥

सोपानेति। किञ्च येषु सोपानमार्गेषु रामाः रमण्यः सरागान् लाक्षारसार्द्रान् चरणान् निक्षिप्तवत्यः तेषु मे मम मार्गेषु अद्य सद्यो हतन्यङ्कुभिः मारितमृगैः व्याघ्रैः अस्रदिग्धं रुधिरलिप्तं पदं निधीयते॥ १५॥

चित्रेति। पद्मवनम् अवतीर्णाः प्रविष्टाः तदा निर्मिता[illegible]

* स्तम्भेषु योषित्प्रतियातनानाम्
उत्क्रान्तवर्णक्रमधूसराणाम्।
स्तनोत्तरीयाणि भवन्ति सङ्गात्
निर्मोकपट्टाः फणिभिर्विमुक्ताः ॥१७॥
कालान्तरश्यामसुधेषु नक्तम्
इतस्ततो रूढतृणाङ्कुरेषु।
त एव मुक्तागुणशुद्धयोऽपि
हर्म्येषु मूर्च्छन्ति न चन्द्रपादाः ॥१८॥

करेणुभिः करिणीभिः चित्रगताभिरेव। करेणुरिभ्यां स्त्री नेभे इत्यमरः। दत्तमृणालभङ्गाः चित्रद्विपाः आलेख्यमातङ्गाः नखा एवाङ्कुशाः तेषामाघातैः विभिन्नकुम्भाः सन्तः संरब्धसिंहप्रहृतं कुपितसिंहप्रहारं वहन्ति ॥ १६ ॥

स्तम्भेष्विति। उत्क्रान्तवर्णक्रमा विशीर्णवर्णविन्यासाः ताश्च धूसराश्च यास्तासां स्तम्भेषु योषित्प्रतियातनानां स्त्रीप्रतिकृतीनां दारुमयीणां फणिभिर्विमुक्ता निर्मोकाः कञ्चुका एव पट्टाः। समौ कञ्चुकनिर्मोकावित्यमरः। सङ्गात् सक्तत्वात् स्तनोत्तरीयाणि स्तनाच्छादनवस्त्राणि भवन्ति ॥ १७ ॥

कालेति। कालान्तरेण कालभेदवशेन-श्यामसुधेषु मलिनचूर्णेषु इतस्ततो रूढतृणाङ्कुरेषु हर्म्येषु गृहेषु नक्तं रात्रौ मुक्तागुणानां शुद्धिरिव शुद्धिः स्वाच्छ्यं येषां तादृशा अपि ततः पूर्वं ये मूर्च्छन्ति स्म त एव चन्द्रपादाः चन्द्ररश्मयः। पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः। न मूर्च्छन्ति न प्रतिफलन्तीत्यर्थः ॥ १८ ॥

आवर्ज्य शाखाः सदयञ्च यासां
पुष्पाण्युपात्तानि विलासिनीभिः ।
वन्यैः पुलिन्दैरिव वानरैस्ताः
क्लिश्यन्त उद्यानलता मदीयाः ॥१९॥

रात्रावनाविष्कृतदीपभासः
कान्तामुखश्रीवियुता दिवापि ।
तिरस्क्रियन्ते कृमितन्तुजालैः
विच्छिन्नधूमप्रसरा गवाक्षाः ॥२०॥

बलिक्रियावर्ज्जितसैकतानि
स्नानीयसंसर्गमनाप्नुवन्ति ।
उपान्तवानीरगृहाणि दृष्ट्वा
शून्यानि दूये सरयूजलानि ॥२१॥

आवर्ज्येति । किञ्च विलासिनीभिः सदयं शाखाः लतावयवान् आवर्ज्य आनमय्य यासां लतानां पुष्पाण्युपात्तानि स्वीकृतानि ता मदीया उद्यानलताः वन्यैः पुलिन्दैः म्लेच्छविशेषैरिव वानरैः भङ्गैरित्यर्थः क्लिश्यन्ते पीड्यन्ते । क्लिश्नातेः कर्मणि लट् । भेदाः किरातशबरपुलिन्दा म्लेच्छजातयइत्यमरः ॥ १९ ॥

रात्राविति । रात्रावनाविष्कृतदीपभासः दीपप्रभाशून्या इत्यर्थः दिवापि दिवसेऽपि कान्तामुखानां श्रिया कान्त्या वियुता रहिताः विच्छिन्नो नष्टो धूमप्रसरो येषां ते गवाक्षाः कृमितन्तुजालैः लूतातन्तुवितानैस्तिरस्क्रियन्ते छाद्यन्ते ॥ २० ॥

बलिक्रियेति । बलिः पूजोपहार स्यादिति शाश्वतः । बलि-

तदर्हसीमां वसतिं विसृज्य
मामभ्युपेतुं कुलराजधानीम्।
हित्वा तनुं कारणमानुषीं तां
यथा गुरुस्ते परमात्ममूर्त्तिम्॥२२॥
तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत् प्राग्रहरो रघूणाम्।
पूरप्यभिव्यक्तमुखप्रसादा
शरीरबन्धेन तिरोबभूव॥२३॥

क्रियावर्ज्जितानि सैकतानि येषां तानि स्नानीयानि स्नानसाधनानि चूर्णादीनि। कृत्यल्युटो बहुलमिति करणे अनीयञ् प्रत्ययः। स्नानीय संसर्गमनाप्नुवन्ति सरयूजलानि शून्यानि रिक्तानि उपान्तेषु वानीर गृहाणि येषां तानि च दृष्ट्वा दूये परितप्ये॥ २१॥

तदिति। तत्तस्मादिमां वसतिं कुशावती विसृज्य कुलराजधानीम् अयोध्यां मामभ्युपैतुमर्हसि। कथमिव ते गुरुः पिता रामः तां प्रसिद्धां कारणवशान्मानुषी तनुं मानुषमूर्त्तिं हित्वा परमात्ममूर्त्तिं यथा विष्णुमूर्त्तिमिव॥ २२॥

तथेति। रघूणां प्राग्रहरः श्रेष्ठः कुशः तस्याः पुरः प्रणयं याच्ञां प्रतीतो हृष्टः सन् तथेति प्रत्यग्रहीत् स्वीकृतवान् पूः पुराधि देवतापि अभिव्यक्तमुखप्रसादा सती इष्टलाभादिति भावः शरीर बन्धेन शरीरयोगेन करणेन तिरोबभूव अन्तर्दधे। मानवं रूपं विहाय दैवं रूपमग्रहीदित्यर्थः॥ २३॥

तदिति। नृपतिः कुश स्तदद्भूतं रात्रिवृत्तं रात्रिवृत्तान्तं प्रातः

तदद्भुतं संसदि रात्रिवृत्तं
प्रातर्द्विजेभ्यो नृपतिः शशंस।
श्रुत्वा त एनं कुलराजधान्या
साक्षात् पतित्वे वृतमभ्यनन्दन् ॥२४॥
कुशावतीं श्रोत्रियसात् स कृत्वा
यात्रानुकूलेऽहनि सावरोधः।
अनुद्रुतो वायुरिवाभ्रवृन्दैः
सैन्यैरयोध्याभिमुखः प्रतस्थे ॥२५॥
सा केतुमालोपवना बृहद्भि-
र्विहारशैलानुगतेव नागैः।

संसदि सभायां द्विजेभ्यः शशंस, ते द्विजाः श्रुत्वा एनं कुशं कुलराजधान्याः साक्षात् स्वयमेव पतित्वे विषये वृतम् अभ्यनन्दन् पतित्वेन वृतोऽसीत्यपूजयन् आशीर्भिरिति शेषः। अत्र गार्ग्यः, दृष्ट्वा स्वप्नं शोभनं नैव ब्रूयात् पश्चाद्दृष्टो यः स पाकं विधत्ते। शंसेदिष्टं तत्र साधुर्द्विजेभ्य स्तं चाशीर्भिः प्रीणयेयु र्नरेन्द्रम्। दृष्टमपि स्वप्नतुल्यमिति। २४।

कुशावतीमिति। स कुशः कुशावतीं श्रोत्रियेषु छान्दसेषु अधीनां श्रोत्रियसात्। तदधीनवचने इति सातिप्रत्ययः, श्रोत्रियञ्छन्दोऽधीते इति निपातः। श्रोत्रियश्छान्दसौ समौ इत्यमरः। कृत्वा यात्रानुकूलेऽहनि सावरोधः सान्तःपुरः सन् वायुरभ्रवृन्दैरिव, सैन्यैरनुद्रुतोऽनुगतः सन् अयोध्याभिमुखः प्रतस्थे। २५।

सेति। केतुमाला एव उपवनानि यस्याः सा बृहद्भिर्नागैः गजैः

सेना रथोदारगृहा प्रयाणे
तस्याभवज्जङ्गमराजधानी ॥२६॥
तेनातपत्रामलमण्डलेन
प्रस्थापितः पूर्वनिवासभूमिम् ।
बभौ बलौघः शशिनोदितेन
वेलामुदन्वानिव नीयमानः ॥२७॥
तस्य प्रयातस्य वरूथिनीनां
पीडामपर्याप्तवतीव सोढुम् ।
वसुन्धरा विष्णुपदं द्वितीय-
मध्यारुरोहेव रजश्छलेन ॥२८॥

विहारशैलैः क्रीडाशैलैः अनुगतेव स्थिता रथा एव उदारगृहाः यस्याः सा सा सेना तस्य कुशस्य प्रयाणे जङ्गमराजधानी सञ्चारिणी नगरीवाभवत् बभूव ॥ २६ ॥

तेनेति । आतपत्रमेवामलं मण्डलं बिम्बं यस्य तेन तेन कुशेन पूर्वनिवासभूमिम् अयोध्यां प्रस्थापितः बलौघः आतपत्रवदमलमण्डलेनोदितेन शशिना वेलां नीयमानः प्राप्यमाणः उदकमस्यास्तीत्युदन्वान् उदधिरिव बभौ । उदन्वानुदधौ चेति निपातनात्साधुः ॥ २७ ॥

तस्येति । प्रयातस्य प्रस्थितस्य तस्य कुशस्य वरूथिनीनां सेनानां कर्त्रीणाम् । कर्तृकर्मणोः कृतीति कर्त्तरि षष्ठी । पीडां सोढुमपर्याप्तवतीव अशक्तेव वसुन्धरा रजश्छलेन द्वितीयं विष्णुपदम् आकाशमध्यारुरोहेवेत्युत्प्रेक्षा ॥ २८ ॥

उद्यच्छमानेति । पश्चात् कुशावत्याः सकाशात् गमनाय प्रयाणाय

उद्यच्छमाना गमनाय पश्चात्
पुरो निवेशे पथि च व्रजन्ती ।
सा यत्र सेना ददृशे नृपस्य
तत्रैव सामग्र्यमतिं चकार ॥ २९ ॥

तस्य द्विपानां मदवारिसेकात्
खुराभिघाताच्च तुरङ्गमाणाम् ।
रेणुः प्रपेदे पथि पङ्कभावं
पङ्कोऽपि रेणुत्वमियाय नेतुः ॥ ३० ॥

मार्गैषिणी सा कटकान्तरेषु
वैन्ध्येषु सेना बहुधा विभिन्ना ।
चकार रेवेव महाविरावा
बद्धप्रतिश्रुन्ति गुहामुखानि ॥ ३१ ॥

तदा पुरोऽग्रे निवेशे निमित्ते निवेष्टुमित्यर्थः उद्यच्छमाना उद्योगं कुर्वती । समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदम् । पथि च व्रजन्ती नृपस्य कुशस्य सा सेना यत्र पश्चात् पुरो मध्ये वा ददृशे तत्रैव सामग्र्यमतिं तत्कृत्स्नताबुद्धिं चकार, अपरिमिता तस्य सेनेत्यर्थः ॥ २९ ॥

तस्येति । नेतुस्तस्य कुशस्य द्विपानां मदवारिभिः सेकात् तुरङ्गमाणां खुराभिघाताच्च यथासंख्यं पथि रेणुः रजः पङ्कभावं पङ्कतां प्रपेदे पङ्कोऽपि रेणुत्वमियाय । ३० ॥

मार्गेति । वैन्ध्येषु विन्ध्यसम्बन्धिषु कटकान्तरेषु नितम्बप्रदेशेषु । कटकोऽस्त्री नितम्बोऽद्रेरित्यमरः । मार्गैषिणी मार्गान्वेषिणी बहु-

स धातुभेदारुणयाननेमिः
प्रभुः प्रयाणध्वनिमिश्रतूर्य्यः ।
व्यलङ्घयद्विन्ध्यमुपायनानि
पश्यन् पुलिन्दैरुपपादितानि ॥३२॥

तीर्थे तदीये गजसेतुबन्धात्
प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नबालव्यजनीबभूवुः
हंसा नभोलङ्घनलोलपक्षाः ॥३३॥

स पूर्व्वजानां कपिलेन रोषात्
भस्मावशेषीकृतविग्रहाणाम् ।

एव बहुधा विभिन्ना महाविरावा दीर्घगह्वरा सा सेना रेवेव नर्मदेव । रेवा तु नर्मदा सोमोद्भवा मेखलकन्यकेत्यमरः । गुहामुखानि बहुप्रतिश्रुन्ति प्रतिध्वानवन्ति चकार अकरोत् ॥ ३१ ॥

स इति । धातूनां गैरिकादीनां भेदेन अरुणा याननेमिः रथचक्रधारा यस्य प्रयाणे ये ध्वनयः दवेड़ह्रेषादयः तन्मिश्राणि तूर्य्याणि यस्य एवंविधः स प्रभुः कुशः पुलिन्दैः किरातैः उपपादितानि समर्पितानि उपायनानि पश्यन् विन्ध्यं व्यलङ्घयत् ॥ ३२ ॥

तीर्थ इति । तदीये वैन्ध्ये तीर्थे अवतारे गजा एव सेतुः तस्य बन्धाद्धेतोः प्रतीपगां पश्चिमवाहिनीं गङ्गाम् उत्तरतोऽस्य कुशस्य नभोलङ्घनेन लोलपक्षाः हंसाः अयत्नेन बालव्यजनीबभूवुः चामराण्यभूवन् । अभूततद्भावे च्विः ॥ ३३ ॥

स इति । स कुशः कपिलेन मुनिना रोषाद्भस्मावशेषीकृता विग्रहाः

सुरालयप्राप्तिनिमित्तमम्भ-
स्त्रैस्रोतसं नौलुलितं ववन्दे ॥ ३४ ॥

इत्यध्वनः कैश्चिदहोभिरन्ते
कूलं समासाद्य कुशः सरय्वाः ।
वेदिप्रतिष्ठान् विततावराणां
यूपानपश्यच्छतशो रघूणाम् ॥ ३५ ॥

आधूय शाखाः कुसुमद्रुमाणां
स्पृष्ट्वा च शीतान् सरयूतरङ्गान् ।
तं क्लान्तसैन्यं कुलराजधान्याः
प्रत्युज्जगामोपवनान्तवायुः ॥ ३६ ॥

देष्टाः येषां तेषां पूर्वजानां वृद्धानां सागराणां सुरालयस्य स्वर्गस्य प्राप्तौ निमित्तं नौभिर्लुलितं क्षुभितं त्रिस्रोतसः इदं त्रैस्रोतसं गाङ्गमम्भो ववन्दे ॥ ३४ ॥

इतीति । इति कैश्चिदहोभिः अध्वनोऽन्ते अवसाने कुशः सरय्वाः कूलं समासाद्य विततावराणां विस्तृतयज्ञानां रघूणां वेदिः प्रतिष्ठा आस्पदं येषां तान् यूपान् शतशोऽपश्यत् ॥ ३५ ॥

आधूयेति । कुलराजधान्याः उपवनान्तवायुः कुसुमद्रुमाणां शाखाः आधूय ईषत् धूत्वा, सुरभिर्मन्दश्चेत्यर्थः, शीतान् सरयूतरङ्गांश्च स्पृष्ट्वा, अनेन शैत्योक्तिः, क्लान्तसैन्यं तं कुशं प्रत्युज्जगाम ॥ ३६ ॥

अथेति । अथ रिपुषु मग्नं शल्यं शङ्कुः शरो वा यस्य सः । शल्यं शङ्कौ शरे वंशे इति विश्वः । पौराणां सखा पौरसखः कुलस्य ध्वजः

अथोपशल्ये रिपुमग्नशल्य-
स्तस्याः पुरः पौरसखः स राजा।
कुलध्वजस्तानि चलध्वजानि
निवेशयामास बली बलानि॥ ३७॥
तां शिल्पिसङ्घाः प्रभुणा नियुक्ता-
स्तथागतां सम्भृतसाधनत्वात्।
पुरं नवीचक्रुरपां विसर्गात्
मेघा निदाघग्लपितामिवोर्वीम्॥ ३८॥
ततः सपर्य्यां सपशूपहारां
पुरः परार्द्ध्यप्रतिमागृहायाः।

चिह्नभूतः बली स राजा चला चलन्तो वा ध्वजाः येषां तानि तानि बलानि सैन्यानि तस्याः पुरः पुर्य्याः उपशल्ये ग्रामान्ते। ग्रामान्त उपशल्यं स्यादित्यमरः। निवेशयामास॥ ३७॥

तामिति। प्रभुणा नियुक्ताः शिल्पिनां तक्षादीनां सङ्घाः सम्भृतसाधनत्वात् मिलितोपकरणत्वात्, तां तथागतां शून्यामित्यर्थः पुरमयोध्याम्. मेघाः अपां विसर्गाज्जलसेकात् निदाघग्लपितां ग्रीष्मतप्तामुर्वीमिव, नवीचक्रुः परिपूर्णाञ्चक्रुः॥ ३८॥

तत इति। ततो रघुप्रवीरः कुशः प्रतिमाः देवताप्रतिकृतयः अर्च्चा इत्यर्थः परार्द्ध्यप्रतिमागृहायाः प्रशस्तदेवतायतनायाः पुरः उपोषितैः वास्तुविधानविद्भिः प्रयोक्तृभिः पशूपहारैः सहितां सपशूपहारां सपर्य्यां निर्वर्त्तयामास कारयामास। अत्र ण्यन्तात् णिच् पुनर्णिच्यनु-त्पन्नेयम् अन्यथा वृतेरकर्मकस्य करोत्यर्थत्वे कारयत्यर्थानवगमप्रसङ्गात्

उपोषितैर्वास्तुविधानविद्भिः
निर्वर्त्तयामास रघुप्रवीरः ॥ ३९ ॥

तस्याः स राजोपपदं निशान्तं
कामीव कान्ताहृदयं प्रविश्य ।
यथार्हमन्यैरनुजीविलोकं
सम्भावयामास यथाप्रधानम् ॥ ४० ॥

सा मन्दुरासंश्रयिभिस्तुरङ्गैः
शालाविधिस्तम्भगतैश्च नागैः ।
पूराबभासे विपणिस्थपण्या
सर्व्वाङ्गनद्धाभरणेव नारी ॥ ४१ ॥

भवितव्यं इतेरण्यन्तकर्त्ता प्रयोज्यत्वेन तन्निर्द्देशात् प्रयोगान्तरस्यापे क्षितत्वात् ॥ ३९ ॥

तस्या इति । स कुशः तस्याः पुरः सम्बन्धि राजोपपदं राजशब्दपूर्वं निशान्तं राजभवनमित्यर्थः । निशान्तं भवनोषसोरिति विश्वः । कामी कान्ताहृदयमिव प्रविश्य अन्यैर्निशान्तैरनुजीविलोकम् अमात्यादिकं यथाप्रधानं मान्यानुसारेण यथार्हं यथोचितं तत्तदुचितस्थलैरित्यर्थः सम्भावयामास ॥ ४० ॥

सेति । शिल्पिन्यस्तानि पदानि मन्दिरवर्त्तीनि यस्याः सा । किर्मीर मन्दुरा वाजिशालेत्यमरः । सा पूः अयोध्या मन्दुरासंश्रयिभिः अश्वशालास्थैस्तुरङ्गैः । शालाविधिस्तम्भेषु स्थितैः । विरचितशालाविना इभिन्नवः । तुरङ्गैरश्वैः शालाविधिस्तम्भेषु ये निविष्टाः स्तम्भिताः

वसन् स तस्यां वसतौ रघूणां
पुराणशोभामधिरोपितायाम्।
न मैथिलेयः स्पृहयाम्बभूव
भर्त्रे दिवो नाप्यलकेश्वराय॥ ४२॥

* अथास्य रत्नग्रथितोत्तरीय-
मेकान्तपाण्डुस्तनलम्बिहारम्।
निःश्वासहार्यांशुकमाजगाम
घर्मः प्रियावेषमिवोपदेष्टुम्॥ ४३।

लक्ष्याः तान् गतैः प्राप्तैः नागैश्च, सर्वाङ्गेषु नद्धानि आभरणानि यस्याः सा नारीव, आबभासे॥ ४१॥

वसन्निति। स मैथिलेयः कुशः पुराणशोभां पूर्वशोभाम् अधिरोपितायां तस्यां रघूणां वसतौ अयोध्यायां वसन् दिवो भर्त्रे देवेन्द्राय तथा अलकेश्वराय कुवेरायापि न स्पृहयाम्बभूव तावपि न गणयामासेत्यर्थः। स्पृहेरीप्सितइति सम्प्रदानत्वाच्चतुर्थी। एतेनायोध्याया अन्यनगरातिशयित्वं गम्यते॥ ४२॥

कुशस्य कुमुद्वतीसङ्गमं प्रस्तौति।

अथेति। अथ अस्य कुशस्य रत्नैर्मुक्तामणिभिः ग्रथितानि उत्तरीयाणि यस्मिंस्तम् एकान्तमत्यन्तं पाण्डवौ स्तनयो र्लम्बिनो हाराः यस्मिंस्तं निःश्वासहार्याणि अतिसूक्ष्माणि अंशुकानि यत्र तम् एवं शीतलप्रायं प्रियाया वेषं नेपथ्यम् उपदेष्टुमिव घर्मो ग्रीष्मः आजगाम॥ ४३॥

अगस्त्येति। अगस्त्यश्चिह्नं यस्य तस्मादयनात् मार्गात् दक्षिणा-

अगस्त्यचिह्नादयनात् समीपं
दिगुत्तरा भास्वति सन्निवृत्ते ।
आनन्दशीतामिव बाष्पवृष्टिं
हिमस्रुतिं हैमवतीं ससर्ज ॥ ४४ ॥

*प्रवृद्धतापो दिवसोऽतिमात्र-
मत्यर्थमेव क्षणदा च तन्वी ।
उभौ विरोधक्रियया विभिन्नौ
जायापती सानुशयाविवास्ताम् ॥ ४५ ॥

*दिने दिने शैवलवन्त्यधस्तात्
सोपानपर्व्वाणि विमुञ्चदम्भः ।
उद्दण्डपद्मं गृहदीर्घिकाणां
नारीनितम्बद्वयसं बभूव ॥ ४६ ॥

यनात् भास्वति समीपं सन्निवृत्ते सति उत्तरा दिक् आनन्दशीतां बाष्पवृष्टिमिव हैमवतीं हिमवत्सम्बन्धिनीं हिमस्रुतिं हिमनिष्यन्दं ससर्ज । अत्र प्रोषितप्रियागमनसमाधिर्गम्यते ॥ ४४ ॥

प्रवृद्धेति । अतिमात्रं प्रवृद्धतापो दिवसः अत्यर्थमेव तन्वी कृशा क्षणदा च इत्येतावुभौ, विरोधक्रियया प्रणयकलहादिना विरोधाचरणेन विभिन्नौ सानुशयौ सानुतापौ जायापती दम्पती इव, आस्तां तयोरपि तापकार्श्यसम्भवात् तत्र दृष्टान्तभूतावित्यर्थः ॥ ४५ ॥

दिनेदिने इति । दिने दिने प्रतिदिनं शैवलवन्ति अधस्तात् यानि सोपानानां पर्वाणि भङ्गाः तानि विमुञ्चत् त्यजदुद्दण्डपद्मं गृहदीर्घि-

वनेषु सायन्तनमल्लिकानां
विजृम्भणोद्गन्धिषु कुट्मलेषु ।
प्रत्येकनिक्षिप्तपदः सशब्दं
संख्यामिवैषां भ्रमरश्चकार ॥ ४७ ॥

*स्वेदानुविद्धार्द्रनखक्षताङ्के
भूयिष्ठसन्दष्टशिखं कपोले ।
च्युतं न कर्णादपि कामिनीनां
शिरीषपुष्पं सहसा पपात ॥ ४८ ॥

यन्त्रप्रवाहैः शिशिरैः परीतान्
रसेन धौतान् मलयोद्भवस्य ।

काणाम् अम्भः नारीनितम्बः प्रमाणमस्य नारीनितम्बद्वयसं बभूव विहारयोग्यमभूदित्यर्थः । प्रमाणे द्वयसजिति द्वयसच्प्रत्ययः ॥ ४६ ॥

वनेष्विति । वनेषु विजृम्भणेन विकासेन उद्गन्धिषु उत्कटसौरभेषु । गन्धस्येत्यादिना समासान्त इकारादेशः । सायन्तनमल्लिकानां कुट्मलेषु सशब्दं यथातथा प्रत्येकमेकैकस्मिन्निक्षिप्तपदो मकरन्दलोभादित्यर्थः भ्रमरः एषां कुट्मलानां संख्यां गणनां चकारेव ॥ ४७ ॥

स्वेदेति । स्वेदानुविद्धमार्द्रं नूतनं नखक्षतमङ्को यस्य तस्मिन् कामिनीनां कपोले भूयिष्ठम् अत्यर्थं सन्दष्टशिखं संश्लिष्टकेसरम् अतएव कर्णात् च्युतमपि शिरीषपुष्पं सहसा न पपात ॥ ४८ ॥

यन्त्रेति । ऋद्धिमन्तो धनिकाः धारागृहेषु यन्त्रधारागृहेषु शिशिरैर्यन्त्रप्रवाहैः यन्त्रसञ्चारितसलिलपूरैः परीतान् व्याप्तान् मलयोद्भवस्य रसेन चन्दनोदकेन धौतान् क्षालितान् शिलाविशेषान् मणिमया-

शिलाविशेषानधिशय्य निन्युः
धारागृहेष्वातपमृद्धिमन्तः ॥ ४९ ॥

*स्नानार्द्रमुक्तेष्वनुधूपवासं
विन्यस्तसायन्तनमल्लिकेषु।
कामो वसन्तात्ययमन्दवीर्य्यः
केशेषु लेभे बलमङ्गनानाम् ॥ ५० ॥

आपिञ्जरा बद्धरजःकणत्वात्
मञ्जर्य्युदारा शुशुभेऽर्जुनस्य।
दग्ध्वापि देहं गिरिशेन रोषात्
खण्डीकृता ज्येव मनोभवस्य ॥ ५१ ॥

मनानि अधिशय्य तेषु शयित्वा आतपं निन्युः आतपपरिहारं चक्रुः ॥ ४९ ॥

स्नानेति। वसन्तस्य आत्मसहकारिणोऽत्ययेनातिक्रमेण मन्दवीर्योऽपि सः कामः स्नानार्द्राश्च ते मुक्ताश्च धूपवासार्थमित्यर्थः तेषु अनुधूपवासं धूपवासानन्तरं विन्यस्ताः सायन्तनमल्लिकाः येषु तेषु अङ्गनानां केशेषु बलं लेभे तैरुद्दीपित इत्यर्थः ॥ ५० ॥

आपिञ्जरेति। बद्धरजःकणत्वात् आबद्धरजःकणत्वात् आपिञ्जरा उदारा द्राघीयसी अर्जुनस्य ककुभवृक्षस्य। इन्द्रद्रुः ककुभोऽर्जुन इत्यमरः। मञ्जरी, देहं दग्ध्वापि रोषात् गिरिशेन गिरिशन्तस्य निवासत्वेन गिरिशेन, लोमादित्वात् शप्रत्ययः। गिरौ शेते इति विग्रहे तु गिरौ डित्वाद्धस्वस्य छन्दसि विधानात् लोके प्रयोगानुपपत्तिः स्यात् तस्मात् पूर्वोक्तमेव विग्रहवाक्यं न्याय्यम्। खण्डीकृता मनोभवस्य ज्या मौर्वीव, शुशुभे ॥ ५१ ॥

*मनोज्ञगन्धं सहकारभङ्गं
पुराणशीधुं नवपाटलञ्च।
सम्बध्नता कामिजनेषु दोषाः
सर्वे निदाघावधिना प्रमृष्टाः ॥५२॥

जनस्य तस्मिन् समये विगाढ़े
बभूवतुर्द्वौ सविशेषकान्तौ।
तापापनोदक्षमपादसेवौ
स चोदयस्थौ नृपतिः शशी च ॥५३॥

मनोज्ञेति। मनोज्ञगन्धमिति सर्व्वत्र सम्बध्यते सहकारभङ्गं चूतपल्लवखण्डं पुराणं वासितं शेरते अनेनेति शीधुः इक्षुरसप्रकृतिकः सुराविशेषस्तम्। शीङोधुक् लुगणादिसूत्रेण शीङस्तस्मे इहस्वाद्धातो र्धुक्प्रत्ययः। पक्वैरिक्षुरसैरन्यो शीधुः पक्वरसः शिवदृति यादवः। नवं पाटलायाः पुष्पं पाटलञ्च सम्बध्नता सङ्घट्टयता निदाघावधिना ग्रीष्मकालेन। अवधिस्त्ववधाने स्यात् सीम्नि काले विलेऽपि चेति विश्वः। कामिजनेषु विषये सर्वे दोषाः तापादयः प्रमृष्टाः परिहृताः ॥५२॥

जनस्येति। तस्मिन् समये ग्रीष्मे विगाढ़े कठिने सति जनस्य द्वौ सविशेषं सातिशयं यथा तथा कान्तौ बभूवतुः, कौ द्वौ, तापापनोदे क्षमा योग्या पादयोरङ्घ्र्योः पादानां रश्मीनाञ्च सेवा ययो स्तौ उदयस्थौ अभ्युदयस्थौ स च नृपतिः शशी च ॥५३॥

अथेति। अथ ऊर्म्मिषु लोलाः सतृष्णाः उन्मदाः राजहंसाः यस्मिन् तस्मिन्। लोलश्चलसतृष्णयो रित्यमरः। 'रोधोलतापुष्पाणां

अथोर्म्मिलोलोन्मदराजहंसे
रोधोलतापुष्पवहे सरय्वाः ।
विहर्त्तुमिच्छा वनितासखस्य
तस्याम्भसि ग्रीष्मसुखे बभूव ॥ ५४ ॥

स तीरभूमौ विहितोपकार्य्या-
मानायिभिस्तामपकृष्टनक्राम् ।
विगाहितुं श्रीमहिमानुरूपं
प्रचक्रमे चक्रधरप्रभावः ॥ ५५ ॥

सा तीरसोपानपथावतारा-
दन्योन्यकेयूरविघट्टिनीभिः ।

वहे तादृशे। [illegible]। ग्रीष्मे सुखे सुखकरे सरय्वा अम्भसि जले तस्य वनितासखस्य वनिताभिः सहितस्य विहर्त्तुमिच्छा बभूव ॥ ५४ ॥

स इति। चक्रधरप्रभावः विष्णुतेजाः स नृपः तीरभूमौ विहिता उपकार्य्या यस्यास्ताम् आनायो जालमेषामस्तीति आनायिनो जालिकाः। जालमानाय इति निपातः। आनायः पुंसि जालं स्यादित्यमरः। तैरपकृष्टनक्रामपकृष्टा नक्रा यस्यास्तां तां सरयूं श्रीमहिम्नोः अनुरूपं योग्यं यथा तथा विगाहितुं प्रचक्रमे। अत्र [illegible] [illegible] ॥ ५५ ॥

सेति। सा [illegible] तीरसोपानपथैरवतारात् [illegible] अन्योन्यकेयूरविघट्टिनीभिः [illegible]

सनूपुरक्षोभपदाभिरासी-
दुद्विग्नहंसा सरिदङ्गनाभिः ॥ ५६ ॥

परस्पराभ्युक्षणतत्पराणां
तासां नृपो मज्जनरागदर्शी ।
नौसंश्रयः पार्श्वगतां किराती-
मुपात्तबालव्यजनां बभाषे ॥ ५७ ॥

पश्यावरोधैः शतशो मदीयैः
विगाह्यमानो गलिताङ्गरागैः ।
सन्ध्योदयः साभ्र इवैष वर्णं
पुष्यत्यनेकं सरयूप्रवाहः ॥ ५८ ॥

भाणि सनूपुरस्खलनानि पदानि यासां ताभिरङ्गनाभिर्हेतुभिः उद्विग्नहंसा भीतहंसा आसीत् ॥ ५६ ॥

परस्परेति । नौसंश्रयः परस्परमभ्युक्षणे सेचने तत्पराणाम् आसक्तानां तासां स्त्रीणां मज्जने रागोऽभिलाषस्तद्दर्शी नृपः पार्श्वगतामुपात्तबालव्यजनां गृहीतचामरां किरातीं चामरग्राहिणीं बभाषे । किरातस्तथा, स्त्रियां चामरवाहिन्यां मतृस्वजात्यन्तरे द्वयोरिति केशवः ॥ ५७ ॥

पश्येति । गलिताङ्गरागैर्मदीयैः शतशोऽवरोधैः विगाह्यमानो विलोड्यमान एषः सरयूप्रवाहः, साभ्रः समेघः सन्ध्योदयः सन्ध्याविर्भाव इव, अनेकं नानाविधं वर्णं रक्तपीतादिकं पुष्यति पश्य । वाक्यार्थः कर्म ॥ ५८ ॥

विलुप्तमिति । नौलुलिताभि र्नौक्षुभिताभिरङ्गैः अन्तःपुरसुन्द-

विलुप्तमन्तःपुरसुन्दरीणां
यदञ्जनं नौलुलिताभिरद्भिः।
तद्बध्नतीभिर्मदरागशोभां
विलोचनेषु प्रतिमुक्तमासाम् ॥५९॥

*एता गुरुश्रोणिपयोधरत्वा-
दात्मानमुद्वोढुमशक्नुवत्यः।
गाढाङ्गदैर्बाहुभिरप्सु बालाः
क्लेशोत्तरं रागवशात् प्लवन्ते ॥ ६० ॥

अमी शिरीषप्रसवावतंसाः
प्रभ्रंशिनो वारिविहारिणीनाम्।

[illegible] यदञ्जनं [illegible] विलुप्तं [illegible] तदञ्जनं विलोचनेषु नयनेषु मदेन या रागशोभा तां बध्नतीभिः घटयन्तीभिः अद्भिः आसां प्रतिमुक्तं [illegible]। [illegible] तत्कार्यकारित्वात् [illegible] ॥ ५९ ॥

एता इति। गुरु दुर्वहं श्रोणिपयोधरं यासामिति विग्रहः। गुरुश्रोणिपयोधरत्वात् आत्मानं उद्वोढुं अशक्नुवत्यः एता बालाः [illegible] बाहुभिः [illegible] तु [illegible] तथा [illegible] राग- [illegible] ॥ ६० ॥

अमी इति। [illegible] निम्न- [illegible]

पारिप्लवाः स्रोतसि निम्नगायाः
शैवाललोलान् छलयन्ति मीनान् ॥६१॥

*आसां जलास्फालनतत्पराणां
मुक्ताफलस्पर्द्धिषु शीकरेषु।
पयोधरोत्सर्पिषु शीर्य्यमाणः
संलक्ष्यते न च्छिदुरोऽपि हारः ॥६२॥

*आवर्त्तशोभा नतनाभिकान्तेः
भङ्गो भ्रुवां द्वन्द्वचरास्तनानाम्।
जातानि रूपावयवोपमाना-
न्यदूरवर्त्तीनि विलासिनीनाम् ॥६३॥

लोलान् जलनीलीप्रियान्। जलनीली तु शैवालमित्यमरः। मीनान् छलयन्ति प्रादुर्भावयन्ति, शैवालप्रियत्वात् शिरीषेषु शैवाल भ्रमात् प्रादुर्भवन्तीत्यर्थः ॥ ६१ ॥

आसामिति। जलस्यास्फालने तत्पराणामासक्तानाम् आसां स्त्रीणां मुक्ताफलस्पर्द्धिषु मौक्तिकानुकारिषु पयोधरेषु स्तनेषु उत्सर्पन्ति उत्पतन्ति ये तेषु शीकरेषु शीकराणां मध्ये शीर्य्यमानो गलन् हारः अतएव छिदुरः स्वयं छिन्नोऽपि न संलक्ष्यते। विदिभिदिच्छिदेः कुरजिति कुरच्प्रत्ययः। शीकरसंसर्गात् छिन्नइति न ज्ञायतइति भावः ॥ ६२ ॥

आवर्त्तेति। विलासिनीनां विलसनशीलानां स्त्रीणाम्। वौ कषल-सत्थस्रम्भइति घिनुण् प्रत्ययः। रूपावयवानाम् उपमेयानां यानि

तीरस्थलीबर्हिभिरुत्कलापैः
प्रस्निग्धकेकैरभिनन्द्यमानम् ।
श्रोत्रेषु संमूर्च्छति रक्तमासां
गीतानुगं वारिमृदङ्गवाद्यम् ॥६४॥

सन्दष्टवस्त्रेष्वबलानितम्बे-
ष्विन्दुप्रकाशान्तरितोडुतुल्याः ।
अमी जलापूरितसूत्रमार्गाः
मौनं भजन्ते रशनाकलापाः ॥६५॥

उपमानानि लोकप्रसिद्धानि तानि अदूरवर्त्तीनि अन्तिकगतानि जातानि, कस्य स्मितमुपमानमित्याकाङ्क्षायां, नतनाभिकान्ते निम्ननाभिशोभायाः आवर्त्तशोभा । स्यादावर्त्तोऽम्भसां भ्रमः इत्यमरः । भ्रुवां भङ्गकान्तेः, स्तनानां द्वन्द्वस्य चक्रवाकाः, उपमानमिति सर्वत्र सम्बध्यते ॥६३॥

तीरेति । उत्कलापैः उन्नतबर्हैः प्रस्निग्धाः मधुराः केकाः येषां तैः तीरस्थलीषु स्थितैः बर्हिभिः मयूरैः अभिनन्द्यमानं रक्तं श्राव्यं गीतानुगं गीतानुसारि आसां स्त्रीणां सम्बन्धि वार्येव मृदङ्गः तस्य वाद्यं वाद्यध्वनिः श्रोत्रेषु संमूर्च्छति व्याप्नोति ॥६४॥

सन्दष्टेति । सन्दष्टवस्त्रेषु जलक्लेदात् संश्लिष्टांशुकेषु अबलानां नितम्बेषु [illegible] इन्दुप्रकाशेन अन्तरितानि तिरोहितानि यानि उडूनि नक्षत्राणि तत्तुल्याः [illegible] भावः, [illegible] जलेन आपूरिताः सूत्रमार्गाः [illegible] अमी रशनाकलापाः [illegible] मौनं भजन्ते [illegible] ॥६५॥

[illegible]

एताः करोत्पीड़ितवारिधाराः
दर्पात् सखीभिर्वदनेषु सिक्ताः ।
वक्रेतराग्रैरलकैस्तरुण्य-
श्चूर्णारुणान् वारिलवान् वमन्ति ॥६६॥

उद्बन्धकेशश्च्युतपत्रलेखो
विश्लेषिमुक्ताफलपत्रवेष्टः ।
मनोज्ञ एव प्रमदामुखाना
मम्भोविहाराकुलितोऽपि वेषः ॥६७॥

स नौविमानादवतीर्य्य रेमे
विलोलहारः सह ताभिरप्सु ।
स्कन्धावलग्नोद्धृतपद्मिनीकः
करेणुभिर्वन्य इव द्विपेन्द्रः ॥६८॥

वारिधारा याभिस्ताः स्वयमपि पुन स्तथैव सखीभि र्वदनेषु सिक्ताः एता स्तरुण्यो वक्रेतराग्रैः जलसेकादृज्वग्रैः अलकैः करणैः चूर्णैः कुङ्कुमादिभिः अरुणान् वारिलवान् उदकविन्दून् वमन्ति वर्षन्ति ॥ ६६ ॥

उद्बन्धेति । उद्बन्धा उद्भृटाः केशाः यस्मिन् सः च्युतपत्रलेखः च्युतपत्ररचनः विश्लेषिणो विस्रंसिनः मुक्ताफलपत्रवेष्टाः मुक्तामयताड़ङ्काः यस्मिन् सः एवमम्भोविहाराकुलितोऽपि प्रमदामुखानां वेषो नेपथ्यं मनोज्ञएव । रम्याणां विकृतिरपि श्रियं तनोतीति भावः ॥ ६७ ॥

स इति । स कुशः नौ र्विमानमिव, नौविमानम् उपमितसमासः, तस्मादवतीर्य्य विलोलहारः सन् ताभिः स्त्रीभिः सह, करेणुभिः सह

ततो नृपेणानुगताः स्त्रियस्ता
भ्राजिष्णुना सातिशयं विरेजुः।
प्रागेव मुक्ता नयनाभिरामाः
प्राप्येन्द्रनीलं किमुतोन्मयूखम्॥६९॥

वर्णोदकैः काञ्चनशृङ्गमुक्तै-
स्तमायताक्ष्यः प्रणयादसिञ्चन्।
तथागतः सोऽतितरां बभासे
सधातुनिष्यन्द इवाद्रिराजः॥७०॥

तेनावरोधप्रमदासखेन
विगाहमानेन सरिद्वरां ताम्।

[illegible]

[illegible]

[illegible]

[illegible]

आकाशगङ्गारतिरप्सरोभि-
र्वृतो मरुत्वाननुयातलीलः ॥७१॥
यत् कुम्भयोनेरधिगम्य रामः
कुशाय राज्येन समं दिदेश।
तदस्य जैत्राभरणं विहर्त्तु-
रज्ञातपातं सलिले ममज्ज ॥७२॥
स्नात्वा यथाकाममसौ सदार-
स्तीरोपकार्य्यां गतमात्र एव।
दिव्येन शून्यं वलयेन बाहुम्
अपोढनेपथ्यविधिर्ददर्श ॥७३॥

इमां सरयूं विगाहमानेन तेन कुशेन आकाशगङ्गायां रतिः क्रीडा यस्य सः अप्सरोभिर्वृतः आवृतो मरुत्वानिन्द्रः अनुयातलीलः अनुकृतश्रीरभूदिति शेषः इन्द्रमनुकृतवानित्यर्थः ॥ ७१ ॥

यदिति। यदाभरणं रामः कुम्भयोनेरगस्त्यात् अधिगम्य प्राप्य कुशाय राज्येन समं दिदेश ददौ, राज्यसममूल्यमित्यर्थः, सलिले विहर्त्तुः क्रीड़तः अस्य कुशस्य तज्जैत्राभरणं जयशीलस्याभरणम् अज्ञातपातं सत् ममज्ज बुबोड़ ॥ ७२ ॥

स्नात्वेति। असौ कुशः सदारः सन् यथाकामं यथेच्छं स्नात्वा विगाह्य तीरे या उपकार्य्या पूर्वोक्ता तां गतमात्रो गतएव अपोढ़नेपथ्यविधिः अकृतप्रसाधनएव दिव्येन वलयेन शून्यं बाहुं ददर्श ॥ ७३ ॥

जयेति। यतः कारणात् तदाभरणं जयश्रियः संवननं वशी-

जयश्रियः संवननं यतस्त-

दामुक्तपूर्व्वं गुरुणा च यस्मात्।

सेहेऽस्य न भ्रंशमतो न लोभात्

स तुल्यपुष्पाभरणो हि धीरः ॥७४॥

ततः समाज्ञापयदाशु सर्व्वान्

आनायिनस्तद्विचये नदीष्णान्।

वन्ध्यश्रमास्ते सरयूं विगाह्य

तमूचुरम्लानमुखप्रसादाः ॥७५॥

कृतः प्रयत्नो न च देव लब्धं

मग्नं पयस्याभरणोत्तमं ते।

[illegible] ॥ ७४ ॥

[illegible] ॥ ७५ ॥

[illegible]

नागेन लौल्यात् कुमुदेन नून-
मुपात्तमन्तर्ह्रदवासिना तत् ॥७६॥

ततः स कृत्वा धनुराततज्यं
धनुर्द्धरः कोपविलोहिताक्षः।
गारुत्मतं तीरगतस्तरस्वी
भुजङ्गनाशाय समाददेऽस्त्रम् ॥७७॥

तस्मिन् ह्रदः संहितमात्र एव
क्षोभात् समाविद्धतरङ्गहस्तः।
रोधांसि निघ्नन्नवपातमग्नः
करीव वन्यः परुषं ररास ॥७८॥

लब्धं किन्तु तदाभरणम् अन्तर्ह्रदवासिना कुमुदेन कुमुदाख्येन नागेन पन्नगेन लौल्यात् लोभादुपात्तं गृहीतं नूनमिति वितर्कः ॥ ७६ ॥

तत इति। ततो धनुर्धरः कोपविलोहिताक्षः तरस्वी बलवान् सः कुशः तीरगतः सन् धनुराततज्यम् अधिज्यं कृत्वा भुजङ्गस्य कुमुदस्य नाशाय गारुत्मत गरुत्मद्दैवताकम् अस्त्रं समाददे ॥ ७७ ॥

तस्मिन्निति। तस्मिन्नस्त्रे संहितमात्रे सत्येव ह्रदः क्षोभाद्धेतोः समाविद्धाः सङ्कुचितास्तरङ्गाएव हस्ता यस्य सः रोधांसि निघ्नन् पातयन्, अवपाते गजग्रहणगर्त्ते मग्नः पतितः। अवपातस्तु हस्त्यर्थे गर्त्तश्छन्नस्तृणादिनेति यादवः। वन्यः करीव परुषं घोरं ररास दध्वान ॥ ७८ ॥

तस्मादिति। मथ्यमानात्समुद्रादिव उद्वृत्तनक्रात् क्षुभितग्राहात्

तस्मात् समुद्रादिव मथ्यमानात्
उद्वृत्तनक्रात् सहसोन्ममज्ज ।
लक्ष्म्येव सार्द्धं सुरराजवृक्षः
कन्यां पुरस्कृत्य भुजङ्गराजः ॥७९॥

विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥८०॥

त्रैलोक्यनाथप्रभवं प्रभावात्
कुशं द्विषामङ्कुशमस्त्रविद्वान् ।
मानोन्नतेनाप्यभिवन्द्य मूर्ध्ना
मूर्द्धाभिषिक्तं कुमुदो बभाषे ॥८१॥

तस्मात् ह्रदात्, [illegible] ॥ ७९ ॥

विभूषणेति । [illegible] ॥ ८० ॥

त्रैलोक्येति । [illegible]

अवैमि कार्य्यान्तरमानुषस्य
विष्णोः सुताख्यामपरां तनुं त्वाम्।
सोऽहं कथं नाम तवाचरेय-
माराधनीयस्य धृतेर्व्विघातम्॥८२॥

कराभिघातोत्थितकन्दुकेय-
मालोक्य बालातिकुतूहलेन।
ह्रदात् पतज्ज्योतिरिवान्तरिक्षात्
आदत्त जैत्राभरणं त्वदीयम्॥८३॥

त्रयो लोकाः त्रैलोक्यम्। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः। त्रैलोक्यनाथो रामः प्रभवो जनको यस्य तम् अतएव प्रभावात् द्विषाम् अङ्कुशं निवारकं मूर्द्धाभिषिक्तं राजानं कुशं मानोन्नतेनापि मूर्ध्ना अभिवन्द्य प्रणम्य बभाषे॥ ८१॥

अवैमीति। त्वाम्, ओदनान्तरसखण्डलडतिवत कार्य्यान्तरः कार्य्यार्थः। स्यानात्मीयान्यनादर्थ्यरन्धान्त्यर्थेषु चान्तरमिति शाश्वतः। स चासौ मानुषश्चेति तस्य विष्णोः रामस्य सुताख्यां पुत्रसंज्ञाम् अपरां तनुं मूर्त्तिमवैमि, आत्मा वै पुत्रनामासीति श्रुतेरित्यर्थः। स जानन्नहम् आराधनीयस्योपास्यस्य तव धृतेः प्रीतेः। धृ प्रीताविति धातोः स्त्रियां क्तिन्। विघातं कथं नाम आचरेयम् असम्भावितमित्यर्थः॥ ८२॥

करेति। कराभिघातेनोत्थित ऊर्द्धं गतः कन्दुको यस्याः सा कन्दुकार्थम् ऊर्द्धं पश्यन्तीत्यर्थः इयं बाला अतिकुतूहलेनात्यन्तकौतुकेन, अन्तरिक्षात् ज्योतिर्नक्षत्रमिव। ज्योतिर्भद्योतदृष्टिष्वित्यमरः। ह्रदात् पतत् त्वदीयं जैत्राभरणमालोक्य आदत्त अग्रहीत्॥ ८३॥

तदेतदाजानुविलम्बिना ते
ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमे-
रुपैतु योगं पुनरंसलेन ॥ ८४ ॥

इमां स्वसारञ्च यवीयसीं मे
कुमुद्वतीं नार्हसि नानुमन्तुम् ।
आत्मापराधं नुदतीं चिराय
शुश्रूषया पार्थिव पादयोस्ते ॥ ८५ ॥

इत्यूचिवानुपहृताभरणः क्षितीशं
श्लाघ्यो भवान् स्वजन इत्यनुभाषितारम् ।

तदिति । तदेतदाभरणम् आजानुविलम्बिना दीर्घेण ज्याघातेन [illegible] भुजेन रक्षापरिघेण [illegible] । [illegible] अंसलेन [illegible] ते भुजेन पुनर्योगं [illegible] । [illegible] ॥ ८४ ॥

इमामिति । [illegible] पार्थिव ते पादयोः चिराय शुश्रूषया [illegible] । [illegible] ॥ ८५ ॥

[illegible]

संयोजयां विधिवदास समेतवन्धुः
कन्यामयेन कुमुदः कुलभूषणेन ॥ ८६॥

तस्याः स्पृष्टे मनुजपतिना साहचर्य्याय हस्ते
माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य।
दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगन्तान्
गन्धोदग्रं तदनु ववृषुः पुष्पमाश्चर्य्यमेघाः॥ ८७॥

इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं
लब्ध्वा बन्धुं तमपि च कुशः पन्नगं तक्षकस्य।

उपहृताभरणः प्रत्यर्पिताभरणः कुमुदः, हे कुमुद भवान् श्लाघ्यः स्वजनो बन्धुः इत्यनुभाषितारम् अनुवक्तारं क्षितीशं कुशं समेतबन्धुः युक्तबन्धुः सन् कन्यामयेन कन्यारूपेण कुलयोर्भूषणेन विधिवत् संयोजयामास। न केवलं तदीयमेव किन्तु स्वकीयमपि भूषणं तस्मै दत्तवानिति ध्वनिः। आम् प्रत्ययानुप्रयोगयोर्व्यवधानं प्रागेव समाहितम्॥ ८६॥

तस्यादिति। मनुजपतिना कुशेन साहचर्य्याय सहधर्म्माचरणायेत्यर्थः माङ्गल्या मङ्गले साधु या ऊर्णा। ऊर्णा मेषादिलोम्नि स्यादित्यमरः, अत्र लक्षणया तन्निर्म्मितं सूत्रमुच्यते। तया वलयिनि वलयवति तस्याः कुमुद्वत्याः हस्ते पाणौ उच्छिखस्य उदर्च्चिषः पावकस्य पुरोऽग्रे स्पृष्टे गृहीते सति, दिगन्तान् व्यश्नुवानो व्याप्नुवन् दिव्यः तूर्यध्वनिः उदचरदुत्थितः, तदनु आश्चर्य्या अद्भुताः मेघाः गन्धेनोदग्रमुत्कटं पुष्पं पुष्पाणि। जात्यभिप्रायेणैकवचनम्। ववृषुः। आश्चर्यशब्दस्य रौद्रन्तूग्रमसी त्रिषु चतुर्द्दशेत्यमरवचनात् त्रिलिङ्गत्वम्॥ ८७॥

इत्थमिति। इत्थं नागः कुमुदः त्रयाणां भुवनानां समाहारस्त्रि-

एकः शङ्कां पितृवधरिपोरत्यजद्वैनतेयात्
शान्तव्यालामवनिमपरः पौरकान्तः शशास ॥ ८८ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
कुमुद्वतीपरिणयो नाम षोडशः सर्गः ॥

पुत्रम्। तद्धितार्थेत्यादिना तत्पुरुषः। अदन्तद्विगुत्वेऽपि पात्राद्यन्तत्वान्नपुंसकत्वम्। पात्राद्यन्तैरनेकार्थो द्विगुर्लक्ष्यानुसारतइत्यमरः। तस्य गुरुः रामः तस्य औरसं धर्मपत्नीजं पुत्रम्। औरसो धर्मपत्नीज इति याज्ञवल्क्यः। मैथिलेयं कुशं बन्धुं लब्ध्वा, कुशोऽपि च तक्षकस्य पञ्चमं पुत्रं कुमुदं बन्धुं लब्ध्वा, एवं तयोरन्यतरः कुमुदः पितृवधरिपोर्वैनतेयात् गरुडात्। गुरुणा वैष्णवांशेन रामेण [illegible]त्वादिति भावः। शङ्कां भयमत्यजत्, अपरः कुशः शान्ता व्यालाः सर्पा यस्यां ताम् शीतसर्पभयामवनिम् अतएव पौरकान्तः पौरप्रियः सन् शशास। ८८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीविनीसमाख्यायां षोडशः सर्गः।



सप्तदशः सर्गः ।



अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमाद्यामिनीयामात् प्रसादमिव चेतना ॥ १ ॥
स पितुः पितृमान् वंशं मातुश्चानुपमद्युतिः ।
अपुनात् सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥ २ ॥
तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात् पार्थिवकन्यानां पाणिमग्राहयत् पिता ॥ ३ ॥

नमो रामपदाम्भोजं रेणवो यत्र सन्ततम् ।
कुर्वन्ति कुमुदप्रीतिमरण्यस्थलसेविनः ॥

अतिथिमिति । कुमुद्वती काकुत्स्थात् कुशात् अतिथिं नाम पुत्रम् चेतना बुद्धिः पश्चिमादन्तिमात् यामिन्या रात्रे र्यामात् प्रहरात् । द्वौ यामप्रहरौ समावित्यमरः । प्रसादं वैशद्यमिव, प्राप । ब्राह्मे सर्वेषां बुद्धिवैशद्यं भवतीति प्रसिद्धिः ॥ १ ॥

सइति । पितृमान् । प्रशंसार्थे मतुप् । शुचिपितृक इत्यर्थः । अनुपमद्युतिः । सवितुश्चेदं विशेषणम् । सोऽतिथिः पितुः कुशस्य मातुः कुमुद्वत्याश्च वंशम्, सविता उत्तरदक्षिणौ उभौ मार्गाविव, अपुनात् पवित्रीकृतवान् ॥ २ ॥

तमिति । अर्थान् शब्दार्थान् दानसंप्रहारादिक्रियाप्रयोजनानि च विदन्तीत्यर्थविदः तेषां वरः श्रेष्ठः पिता कुशः तमतिथिम् आदौ प्रथमं

जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कुशः।
अमन्यतैकमात्मानमनेकं वशिना वशी ॥४॥
स कुलोचितमिन्द्रस्य साहायकमुपेयिवान्।
जघान समरे दैत्यं दुर्ज्जयं तेन चावधि ॥५॥
तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी ॥६॥

कुलविद्यानाम् आन्वीक्षिकीत्रयीवार्त्तादण्डनीतीनाम् अर्थमभिधेयम् अग्राहयत् अबोधयत, पश्चात पार्थिवकन्यानां पाणिम् अग्राहयत् स्वीकारितवान् उदवाहयदित्यर्थः। ग्रहेर्ण्यन्तस्य सर्वत्र द्विकर्मकत्वमस्तीत्युक्तं प्राक् ॥ ३ ॥

जात्यइति। जातौ भवो जात्यः कुलीनः शूरः वशी कुशः अभिजातेन कुलीनेन। अभिजातः कुलीनः स्यादित्यमरः। शौर्य्यवता वशिना तेनातिथिना करणेन एकमात्मानम् एको न भवतीत्यनेकस्तम् अमन्यत सर्वगुणसाम्यादात्मजम् आत्मनएव रूपान्तरममंस्तेत्यर्थः ॥ ४ ॥

सइति। स कुशः कुलोचितं कुलाभ्यस्तम् इन्द्रस्य साहायकं सहकारित्वम्। योपधादित्यादिना वुञ्। उपेयिवान् प्राप्तः सन् समरे नामतोऽर्थतश्च दुर्ज्जयं दैत्यं जघानावधीत् तेन दैत्येनावधि हतश्च। लुङि चेति हनो वधादेशः ॥ ५ ॥

तमिति। कुमुदस्य नागराजस्य स्वसा कुमुद्वती कुशपत्नी, कुमुदानन्दं शशाङ्कं कौमुदी ज्योत्स्नेव, तं कुशम् अन्वगात्। कुशस्तु कुः पृथ्वी तस्याः मुत् प्रीतिः सैवानन्दो यस्येति कुमुदानन्दः परानन्देन स्वयमानन्दतीत्यर्थः ॥ ६ ॥

तयोर्दिवस्पतेरासीदेकः सिंहासनार्द्धभाक्।
द्वितीयापि सखी शच्याः पारिजातांशभागिनी॥ ७॥

तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥ ८॥

ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः।
विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितम्॥ ९॥

तत्रैनं हेमकुम्भेषु सम्भृतैस्तीर्थवारिभिः।
उपतस्थुः प्रकृतयो भद्रपीठोपवेशितम्॥ १०॥

तयोरिति। तयोः कुशकुमुद्वत्योर्मध्ये एकः कुशः दिवस्पतेरिन्द्रस्य सिंहासनार्द्धं सिंहासनैकदेशः तद्भागासीत्, द्वितीया कुमुद्वत्यपि शच्याः इन्द्राण्याः पारिजातांशस्य भागिनी ग्राहिणी। संपृचेत्यादिना घिनुण् प्रत्ययः। सखी आसीत्। कस्कादित्वाद्दिवस्पतिः साधुः॥ ७॥

तदिति। संग्रामं यायिनः संग्रामं यास्यतः। आवश्यकार्थे णिनिः, अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठी निषेधः। भर्त्तुः स्वामिनः कुशस्य पश्चिमामन्तिमामाज्ञां विपर्य्यते पुत्रोऽभिषेक्तव्य इत्येवंरूपां स्मरन्तो मन्त्रिवृद्धाः तदात्मसम्भवमतिथिं राज्ये समादधुर्निदधुः॥ ८॥

तदिति। ते मन्त्रिणः तस्यातिथेः अभिषेकाय शिल्पिभिः उद्वेति उन्नतवेदिकं चतुःस्तम्भप्रतिष्ठितं चतुर्षु स्तम्भेषु प्रतिष्ठितं नवं विमानं मण्डपं कल्पयामासुः॥ ९॥

तत्रेति। तत्र विमाने भद्रपीठे पीठविशेषे उपवेशितम् एनमतिथिं हेमकुम्भेषु सम्भृतैः संगृहीतैः तीर्थवारिभिः करणैः प्रकृतयो मन्त्रिण उपतस्थुः॥ १०॥

नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः।
अन्वमीयत कल्याणं तस्याविच्छिन्नसन्तति ॥११॥
दूर्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरान्।
ज्ञातिवृद्धैः प्रयुक्तान् स भेजे नीराजनाविधीन् ॥१२॥
पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्व्वभिः।
उपचक्रमिरे पूर्व्वमभिषेक्तुं द्विजातयः ॥१३॥
तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत।
सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ॥१४॥

नदद्भिरिति। आहतं पुष्करं मुखं येषां तैः। पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखेऽपि चेत्यमरः। स्निग्धं मधुरं गम्भीरञ्च नदद्भिः तूर्य्यैः तस्यातिथेः अविच्छिन्नसन्तति अविच्छिन्नपारम्पर्यं कल्याणं शुभम् अन्वमीयत अनुमितम् ॥ ११ ॥

दूर्व्वेति। सोऽतिथिः दूर्वाश्च यवाङ्कुराश्च प्लक्षत्वचश्च अभिन्नपुटाः बालपल्लवाश्च उत्तराणि प्रधानानि येषु तान्। अभिन्नपुटानि मधुक-पुष्पाणीति केचित्, कमलानीत्यन्ये। ज्ञातिषु ये वृद्धास्तैः प्रयुक्तान् नीराजनाविधीन् भेजे ॥ १२ ॥

पुरोहितेति। पुरोहितपुरोगाः पुरोहितप्रमुखाः द्विजातयो ब्राह्मणा जिष्णुं जयशीलं तमतिथिं जैत्रैर्जयशीलैः अथर्वभिः मन्त्र विशेषैः करणैः पूर्व्वमभिषेक्तुमुपचक्रमिरे ॥ १३ ॥

तस्येति। तस्यातिथे मूर्ध्नि सशब्दं निपतन्ती ओघमहती महा-प्रवाहा अभिषिच्यतेऽनेनेत्यभिषेको जलं तस्य श्रीः सम्पद्भिः, त्रिपुर-द्विषः शिवस्य मूर्ध्नि निपतन्ती गङ्गेव, व्यरोचत। त्रयाणां पुराणां द्वेष्टीति विग्रहः ॥ १४ ॥

स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वन्दिभिः।
प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः॥१५॥
तस्य सन्मन्त्रपूताभिः स्नानमद्भिः प्रतीच्छतः।
ववृधे वैद्युतस्याग्ने र्वृष्टिसेकादिव द्युतिः॥१६॥
स तावदभिषेकान्ते स्नातकेभ्यो ददौ वसु।
यावतैषां समाप्येरन् यज्ञाः पर्य्याप्तदक्षिणाः॥१७॥
ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन्।
सा तस्य कर्म्मनिर्वृत्तैर्दूरं पश्चात्कृता फलैः॥१८॥

स्तूयमानइति। तस्मिन् क्षणे अभिषेककाले वन्दिभिः स्तूयमानः सोऽतिथिः, प्रवृद्धः प्रवृद्धवान्। कर्त्तरि क्तः। अतएव सारङ्गैश्चातकैरभिनन्दितः पर्ज्जन्यो मेघइव, अलक्ष्यत॥१५॥

तस्येति। सन्मन्त्रैः पूताभिः शुद्धाभिः अद्भिः स्नानं प्रतीच्छतः कुर्वतस्तस्य, वृष्टिसेकात् विद्युतोऽयं वैद्युतस्तस्य अविन्धनस्याग्नेरिव, द्युति र्ववृधे॥१६॥

सइति। सोऽतिथिः अभिषेकान्ते स्नातकेभ्यो गृहस्थेभ्यः तावत्तावत्परिमाणं वसु धनं ददौ यावता वसुना एषां स्नातकानां पर्य्याप्त दक्षिणाः समग्रदक्षिणाः यज्ञाः समाप्येरन्॥१७॥

तइति। प्रीतमनस ते स्नातकाः तस्मै अतिथये यामाशिषमुदैरयन् व्याहरन् सा आशीः तस्यातिथेः कर्म्मनिर्वृत्तैः पूर्वपुण्यनिष्पन्नैः फलैः साम्राज्यादिभि र्दूरं दूरतः पश्चात्कृता, सफलदानस्य तदानीमनवकाशात् कालान्तरोद्वीक्षणं चकारेत्यर्थः॥१८॥

वन्ध्येति। सोऽतिथिः बद्धानां बन्धच्छेदं वधार्हाणाम् अवध्यतां

बन्धच्छेदं स बद्धानां वधार्हाणामवध्यताम् ।
धुर्याणाञ्च धुरो मोक्षमदोहञ्चादिशद्गवाम् ॥१९॥
क्रीडापतत्त्रिणोऽप्यस्य पञ्जरस्थाः शुकादयः ।
लब्धमोक्षास्तदादेशात् यथेष्टगतयोऽभवन् ॥२०॥
ततः कक्ष्यान्तरन्यस्तं गजदन्तासनं शुचि ।
सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः ॥२१॥
तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः ।
आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥२२॥

धुरं वहन्तीति धुर्याः बलीवर्दादय स्तेषां धुरो भारस्य मोक्षं गवामदोहं वत्सानां पानार्थं दोहनिवृत्तिं चादिशत् आदिदेश ॥ १९ ॥

क्रीडेति । पञ्जरस्थाः शुकादयः अस्यातिथेः क्रीडापतत्त्रिणोऽपि किमुतान्ये इत्यपिशब्दार्थः, तदादेशात् तस्यातिथेः शासनात् लब्धमोक्षाः सन्तो यथेष्टं गतिर्येषां ते स्वेच्छाचारिणोऽभवन् ॥ २० ॥

ततइति । ततः सोऽतिथि र्नेपथ्यग्रहणाय प्रसाधनस्वीकाराय कक्ष्यान्तरं हर्म्याङ्गनविशेषः । कक्ष्या प्रकोष्ठे हर्म्यादेरित्यमरः । तत्र न्यस्तं स्थापितं शुचि निर्मलं सोत्तरच्छदम् आस्तरणसहितं गजदन्तस्यासनं पीठम् अध्यास्त तत्रोपविष्टइत्यर्थः ॥ २१ ॥

तमिति । तोयेन निर्णिक्तपाणयः चालितहस्ताः प्रसाधका अलङ्कर्त्तारः धूपेन गन्धद्रव्यधूपेन आश्यानकेशान्तं शोषितकेशपाशान्तं तमतिथिं तैस्तैः आकल्पस्य नेपथ्यस्य साधनै र्गन्धमाल्यादिभिः उपसेदुरुपतस्थुरलञ्चक्रुरित्यर्थः ॥ २२ ॥

तेऽस्येति । ते प्रसाधकाः मुक्तागुणेन मौक्तिकसरेण उन्नद्धमुद्बद्धम्

तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम्।
प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना॥२३॥
चन्दनेनाङ्गरागञ्च मृगनाभिसुगन्धिना।
समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम्॥२४॥
आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान्।
आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः॥२५॥
नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये।
विरराजोदिते सूर्ये मेरौ कल्पतरोरिव॥२६॥

अन्तर्गतस्रजम् अस्यातिथेः मौलिं धम्मिल्लं प्रभामण्डलशोभिना पद्मरागेण माणिक्येण प्रत्यूपुः प्रत्युप्तं चक्रुः॥ २३॥

चन्दनेनेति। किञ्च मृगनाभ्या कस्तूरिकया सुगन्धिना चन्दनेन अङ्गरागमङ्गविलेपनं समापय्य समाप्य ततोऽनन्तरं विन्यस्ता रोचना गोरोचना यस्मिंस्तत् पत्रं पत्ररचनं चक्रुः॥ २४॥

आमुक्तेति। आमुक्ताभरणः आसञ्जिताभरणः स्रजोऽस्य सन्तीति स्रग्वी। अस्मायामेधास्रजोविनिरिति विनिप्रत्ययः। हंसा श्चिह्नमस्येति हंसचिह्नं यद्दुकूलं तद्वान्। अत बहुव्रीहिणैवार्थसिद्धेर्मतुबानर्थक्येऽपि सर्वधनीत्यादिवत् कर्म्मधारयादपि मत्वर्थीयं प्रत्ययमिच्छन्ति एमन्यत्रापि द्रष्टव्यम्। राज्यश्रीरेव वधू र्नवोढ़ा तस्याः वरो वोढा। वधूः स्नुषा नवोढा स्त्री वरो जामातृषिङ्गयोरिति विश्वः। सोऽतिथिः अतिशयेन प्रेक्ष्यो दर्शनीयः आसीत्। वरोप्येवं विशेषणः॥ २५॥

नेपथ्येति। हिरण्मये सौवर्णे आदर्शे दर्पणे नेपथ्यदर्शिनो वेषं पश्यतः तस्यातिथेश्छाया प्रतिविम्बम्, उदिते सूर्ये दर्पणकल्पे मेरौ

स राजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः।
ययावुदीरितालोकः सुधर्म्मानवमां सभाम्॥२७॥
वितानसहितं तत्र भेजे पैतृकमासनम्।
चूड़ामणिभिरुद्घृष्टपादपीठं महीक्षिताम्॥२८॥
शुशुभे तेन चाक्रान्तं मङ्गलायतनं महत्।
श्रीवत्सलक्षणं वक्षः कौस्तुभेनेव कैशवम्॥२९॥

यः कल्पतरुः तस्य छायेव, विरराज। तस्य सूर्य्यसंक्रान्तबिम्बस्य सम्भवान्नेराविल्यक्तम्॥ २६॥

स इति। सोऽतिथिः राजककुदानि राजकचिह्नानि छत्रचामरादीनि। प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियामित्यमरः। तेषु व्यग्राः पाणयो येषां तैः पार्श्ववर्त्तिभिः जनैः उदीरितालोक उच्चारितजयशब्दः। आलोको जयशब्दः स्यादिति हलायुधः। सुधर्म्मायाः देवसभायाः अनवमामन्यूना सभामास्थानीं ययौ। स्यात्सुधर्म्मा देवसभेत्यमरः॥ २७॥

वितानेति। तत्र सभायां वितानेनोल्लोचेन सहितम्। अस्त्री वितानमुल्लोच इत्यमरः। महीक्षितां राज्ञां चूड़ामणिभिः शिरोरत्नैः उद्घृष्टमुल्लिखित पादपीठं यस्य तत् पितुरिदं पैतृकम्। ऋतठञ्ञिति ठञ्प्रत्ययः। आसनं सिंहासनं भेजे॥ २८॥

शुशुभे इति। तेन चाक्रान्तं श्रीवत्सो नाम रेखाविशेषः तल्लक्षणं श्रीवत्सरूपम्। श्रीवत्सनन्द्यावर्त्तादिविच्छेदा वहवोद्रवोरिति सज्जनः। महदधिकं मङ्गलायतनं मङ्गलगृहं सभारूपम्, कौस्तुभेन मणिना आक्रान्तं श्रीवत्सलक्षणं केशवस्येदं कैशवं वक्ष इव, शुशुभे॥ २९॥

बभौ भूयः कुमारत्वादधिराज्यमवाप्य सः।
रेखाभावादुपारूढः सामग्र्यमिव चन्द्रमाः॥३०॥
प्रसन्नमुखरागं तं स्मितपूर्व्वाभिभाषिणम्।
मूर्त्तिमन्तममन्यन्त विश्वासमनुजीविनः॥३१॥
स पुरं पुरुहूतश्रीः कल्पद्रुमनिभध्वजाम्।
क्रममाणश्चकार द्यां नागेनैरावतौजसा॥३२॥
तस्यैकस्योच्छ्रितं छत्रं मूर्ध्नि तेनामलत्विषा।
पूर्व्वराजवियोगौष्म्यं कृत्स्नस्य जगतो हृतम्॥३३॥

बभाविति। सोऽतिथिः कुमारत्वात् बाल्यात् भूयः यौवराज्यमवाप्यैवानन्तरम् अधिराजस्य भावः अधिराज्यम् अवाप्य, रेखाभावादैन्दुत्वमवाप्यैव सामग्र्यम् उपारूढः पूर्णतां गतश्चन्द्रमा इव, बभौ इति व्याख्यानं, तदपि यौवराज्याभावनिश्चये ज्याय एव॥३०॥

प्रसन्नेति। प्रसन्नो मुखरागो मुखकान्तिर्यस्य तं स्मितपूर्व्वं यथा तथा अभिभाषिणमाभाषणशीलं तमतिथिम् अनुजीविनः मूर्त्तिमन्तं विग्रहवन्तं विश्वासं विस्रम्भम् अमन्यन्त। समौ विश्वासविस्रम्भावित्यमरः॥३१॥

स इति। पुरुहूतश्रीः सोऽतिथिः कल्पद्रुमाणां समानाः ध्वजाः यस्यास्तां पुरम् अयोध्याम् ऐरावतस्य ओज इवौजो बलं यस्य तेन नागेन कुञ्जरेण क्रममाणः चरन्। अनुपसर्गाद्वेति वैकल्पिकमात्मनेपदम्। द्यां चकार स्वर्गलोकसदृशीं चकारेत्यर्थः। द्यौः स्वर्गे सुरवर्त्मनोरिति विश्वः॥३२॥

तस्येति। तस्यैकस्य मूर्ध्नि छत्रमुच्छ्रितमुन्नमितम्, अमलत्विषा तेन छत्रेण कृत्स्नस्य जगतः पूर्व्वराजस्य कुशस्य वियोगेन यदौष्म्यं

धूमादग्नेः शिखाः पश्चादुदयादंशवो रवेः।
सोऽतीत्य तेजसां वृत्तिं सममेवोत्थितो गुणैः॥२४॥
तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः।
शरत्प्रसन्नैर्ज्योतिर्भि र्विभावर्य इव ध्रुवम्॥२५॥
अयोध्यादेवताश्चैनं प्रशस्तायतनार्च्चिताः।
अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैः॥२६॥
यावन्नाश्यायते वेदिरभिषेकजलाप्लुता।
तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः॥२७॥

सन्तापः तत् हृतं नाशितम्। अत्र छत्रोन्नमनसन्तापहरणलक्षणयोः कारणकार्य्ययोर्भिन्नदेशत्वादसङ्गतिरलङ्कारः ॥ २३ ॥

धूमादिति। अग्नेर्धूमात् पश्चादनन्तरमित्यर्थः शिखाः ज्वालाः, रवेः उदयात् पश्चादनन्तरम् अंशवः उत्तिष्ठन्तीति शेषः। सोऽतिथिः तेजसामग्न्यादीनां वृत्तिं स्वभावमतीत्य गुणैः समं सहैवोत्थितः उदितः। अपूर्वमिदमित्यर्थः ॥ २४ ॥

तमिति। पौरयोषितः प्रीत्या विशदैः प्रसन्नैः नेत्रैः करणैः तमतिथिम् अन्वयुः अनुजग्मुः दृष्टिप्रसारमद्राक्षुरित्यर्थः। कथमिव, शरदि प्रसन्नैः ज्योतिर्भिः नक्षत्रैः विभावर्य्यो रात्रयो ध्रुवमिव। ध्रुव पाशबद्धत्वात्ताराचक्रस्येत्यर्थः ॥ २५ ॥

अयोध्येति। प्रशस्तेषु आयतनेषु आलयेषु अर्च्चिता अयोध्यादेवताश्च अनुध्येयम् अनुग्राह्यमेनमतिथिं प्रतिमागतैः अर्चासंक्रान्तैः सान्निध्यैः सन्निधानैः अनुदध्युरनुजगृहुः। अनुध्यानमनुग्रहः इत्युत्पलमालायाम्। तदनुग्रहबुद्ध्या सन्निदधुरित्यर्थः ॥ २६ ॥

यावदिति। अभिषेकजलैराप्लुता सिक्ता वेदिः अभिषेकवेदिः यावत्

वशिष्ठस्य गुरोर्मन्त्राः सायकास्तस्य धन्विनः ।
किन्तत् साध्यं यदुभये साधयेयुर्न सङ्गताः ॥ ३८ ॥

स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान् व्यवहाराननतन्द्रितः ॥ ३९ ॥

ततः परमभिव्यक्तसौमनस्यनिवेदितैः ।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः ॥ ४० ॥

नाज्ञायते न क्रुध्यति । कर्त्तरि क्तः । दण्ड्येष्वस्य राज्ञो क्रोधः प्रतापो वेतालं वेतालस्यैतत् भावः ॥ ३७ ॥

वशिष्ठस्येति । गुरोर्वशिष्ठस्य मन्त्राः धन्विनस्तस्य सायकाः शराः उभये सङ्गताः सन्तो यत्साध्यं न साधयेयुः तत् तादृक् साध्यं किं न किञ्चिदित्यर्थः । तेषामसाध्यं नास्तीति भावः ॥ ३८ ॥

स इति । धर्मे तिष्ठन्तीति धर्मस्थाः सभ्याः राज्ञा सभासदः कार्याः रिपौ मित्रे च ये समा इत्युक्तलक्षणाः तेषां सखा धर्मस्थसखः सत-न्द्रित इत्यर्थः अतन्द्रितोऽनलसः स नृपः शश्वत् सर्वदा अर्थिनां वादिनां प्रत्यर्थिनां प्रतिवादिनाञ्च संशयच्छेद्यान् संशयादेः छेद्यान् परिच्छेद्यान् सन्दिग्धानिति यावत् व्यवहारान् ऋणादानादिविवादान् स्वयं ददर्श अनुसन्दधौ तत्त्वं निर्णीतवानित्यर्थः । अत्र याज्ञवल्क्यः व्यवहारान् नृपः पश्येद्विद्वद्भि-र्ब्राह्मणैः सहेति ॥ ३९ ॥

तत इति । ततः परं व्यवहारदर्शनानन्तरं भृत्याननुजीविनः अभिव्यक्तं मुखप्रसादादिलिङ्गैः स्फुटीभूतं यत् सौमनस्यं चित्तप्र-सन्नत्वं तेन निवेदितैः सूचितैः पाकाभिमुखैः सिद्ध्युन्मुखैः विज्ञाप-नानां विज्ञप्तीनां फलैः प्रेप्सितार्थैः युयोज योजयामास । अत्र भर्त्तु-स्तुतिः निपुणः कर्मनिष्पत्तौ विज्ञप्तौ च वक्तृत्वम् । तस्मात् ...

प्रजास्तद्गुरुणा नद्यो नभसेव विवर्द्धिताः।
तस्मिंस्तु भूयसीं वृद्धिं नभस्ये ता इवाययुः॥४१॥
यदुवाच न तन्मिथ्या यद्ददौ न जहार तत्।
सोऽभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन्॥४२॥
वयोरूपविभूतीनामेकैकं मदकारणम्।
तानि तस्मिन् समस्तानि न तस्योत्सिषिचे मनः॥४३॥

मौनयं तु नवोऽप्यक्षोभ्यता व्रजेदिति। कविश्च वक्ष्यति अक्षोभ्य इति। अत्र सौमनस्यफलयोजनादिभि र्नृपस्य वृत्तसमाधिर्ध्वन्यते इत्यनुसन्धेयम्॥४०॥

प्रजा इति। प्रजाः तस्यातिथेर्गुरुणा पित्रा कुशेन नभसा श्रावणमासेन नद्य इव विवर्द्धिताः, तस्मिन्नतिथौ तु नभस्ये भाद्रपदे मासे ता इव भूयसीं वृद्धिम् अभ्युदयमाययुः प्रजापोषणेन पितरमतिशयितवानित्यर्थः॥४१॥

यदिति। सोऽतिथिः यद्वाक्यं दानादिविषयम् उवाच तन्मिथ्या अनृतं नाभूत्, यद्वस्तु ददौ तन्न जहार न पुनराददे। किन्तु शत्रूनुद्धृत्योत्खाय प्रतिरोपयन् पुनः स्थापयन् भग्नव्रतो भग्ननियमोऽभूत्॥४२॥

वय इति। वयोरूपविभूतीनां यौवनसौन्दर्य्यैश्वर्य्याणां मध्ये एकैकं मदकारणं मदहेतुः, तानि मदकारणानि तस्मिन् राज्ञि समस्तानि मिलितानीति शेषः, तथापि तस्यातिथेः मनो नोत्सिषिचे न जगर्व। सिञ्चतेः करितेत्वात् आत्मनेपदम् अत्र वयोरूपादीनां गर्वहेतुत्वात् मदस्य च मदिराकार्य्यत्वेन अतत्कारकत्वात् मदशब्देन गर्वो लक्ष्यत इत्याहुः। उक्तञ्च ऐश्वर्य्यरूपतारुण्यकुलविद्याबलैरपि। इष्टलाभादिना ऽन्येषामवज्ञा गर्व ईरितः। मदस्त्वानन्दसम्मोहः सम्भेदो

इत्थं जनितरागासु प्रकृतिष्वनुवासरम्।
अक्षोभ्यः स नवोऽप्यासीत् दृढमूल इव द्रुमः ॥४४॥
अनित्याः शत्रवो वाह्याः विप्रकृष्टाश्च ते यतः।
अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद्रिपून्॥४५॥
प्रसादाभिमुखे तस्मिन् चपलापि स्वभावतः।
निकषे हेमरेखेव श्रीरासीदनपायिनी॥४६॥
कातर्य्यं केवला नीतिः शौर्य्यं श्वापदचेष्टितम्।
अत. सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः॥४७॥

मदिराक्षतदृति। अतएव कविनापि उत्क्षिप्तेचे इत्युक्तं न तूत्ममादेति ॥ ४३ ॥

इत्थमिति। इत्थम् अनुवासरमन्वहं प्रकृतिषु प्रजासु जनितरागासु सतीषु स राजा नवोऽपि दृढमूलो द्रुमइव अक्षोभ्यः अप्रधृष्यः आसीत् ॥ ४४ ॥

अनित्यादृति। यतो वाह्याः शत्रवः प्रतिन्दपाः अनित्याः द्विषन्ति-च्छिद्यन्ति चेत्यर्थः, किञ्च ते वाह्याः विप्रकृष्टाः दूरस्थाश्च। अतः सः अभ्यन्तरानन्तर्वर्तिनो नित्यान् षट् रिपून् कामक्रोधादीन् पूर्वमजयत्। अन्तःशत्रुजये वाह्या अपि न दुर्जयादृति भावः ॥ ४५ ॥

प्रसादेति। स्वभावतश्चपला चञ्चलापि श्रीः प्रसादाभिमुखे तस्मिन् नृपे, निकषे निकषोपले हेमरेखेव, अनपायिनी स्थिरा आसीत् ॥ ४६॥

कातर्य्यमिति। केवला शौर्य्यवर्ज्जिता नीतिः कातर्य्यं भीरुत्वम्। शौर्य्यं केवलमित्यनुषञ्जनीयम्। केवलं नीतिरहितं शौर्य्यं श्वापदचेष्टितं व्याघ्रादिचेष्टाप्रायमित्यर्थः। व्याघ्रादयो वनचराः पशवः श्वापदा

न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत् किञ्चित् व्यभ्रस्येव विवस्वतः ॥ ४८ ॥
रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥ ४९ ॥
मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः ।
स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ॥ ५० ॥

मता इति हलायुधः । अतो हेतोः सोऽतिथिः समेताभ्यां सङ्गताभ्याम् उभाभ्यां नीतिशौर्य्याभ्यां सिद्धिं जयप्राप्तिम् अन्विवेष गवेषितवान् ॥ ४७ ॥

न तस्येति । न्यस्ताः सर्वतः प्रहिताः प्रणिधय श्चारा एव दीधितयो रश्मयो यस्य तस्य । प्रणिधिः प्रार्थने चार इति शाश्वतः । तस्य राज्ञः, व्यभ्रस्य निर्मेघस्य विवस्वतः सूर्य्यस्येव, मण्डले स्वविषये किञ्चिदल्पमपि अदृष्टम् अज्ञातं नाभवत् नासीत् । स चारचक्षुषा सर्वमपश्यदित्यर्थः ॥ ४८ ॥

रात्रिन्दिवेति । रात्रौ च दिवा च रात्रिन्दिवम् । अचतुरेत्यादिना अधिकरणार्थे द्वन्द्वेऽच् प्रत्ययान्तो निपातः । अव्ययान्तत्वादव्ययत्वम् । अत्र षष्ठ्यर्थलक्षणया रात्रिन्दिवमिति अहोरात्रयोरित्यर्थः तयोर्विभागाः अंशाः प्रहरादयः तेषु महीक्षितां राज्ञां यदादिष्टम् इदमस्मिन् काले कर्त्तव्यमिति मन्वादिभिरुपदिष्टं तत् स राजा विकल्पपराङ्मुखः संशयरहितः सन् नियोगेन निश्चयेन सिषेवे अनुष्ठितवानित्यर्थः । अत्र कौटिल्यः कार्य्याणां नियोगविकल्पसमुच्चयाः भवन्ति अनेनैवोपायेन नान्येनेति नियोगः अनेन अन्येन वेति विकल्पः अनेन चेति समुच्चय इति ॥ ४९ ॥

मन्त्र इति । तस्य राज्ञः प्रतिदिनं मन्त्रिभिः सह मन्त्रो विचारो

परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥ ५१ ॥
दुर्गाणि दुर्ग्रहाण्यासंस्तस्य रोद्धुरपि द्विषाम् ।
न हि सिंहो गजास्कन्दी भयाद्गिरिगुहाशयः ॥ ५२ ॥
भव्यमुख्याः समारम्भाः प्रत्यवेक्ष्या निरत्ययाः ।
गर्भशालिसधर्म्माणस्तस्य गूढं विपेचिरे ॥ ५३ ॥

बभूव । स मन्त्रः सेव्यमानोऽपि अन्वहमावर्त्त्यमानोऽपि जातु कदाचिदपि न सूच्यते न प्रकाश्यते । तत्र हेतुः गुप्तद्वार इति संवृतेङ्गिताकारादिज्ञानमार्ग इत्यर्थः ॥ ५० ॥

परेष्विति । यथाकालमुचितकालानतिक्रमेण स्वपन्नपि सोऽतिथिः परेषु शत्रुषु स्वेषु स्वकीयेषु च मन्त्र्यादितीर्थेष्विति शेषः क्षिप्तैः प्रहितैः अविज्ञाताः परस्परे येषां तैः अन्योन्याविज्ञातैरित्यर्थः अपसर्पैश्चरैः । अपसर्पश्चर इत्यमरः । जजागार चारमुखेन सर्वमज्ञासीदित्यर्थः । अत्र कामन्दकः, चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च । पाषण्डादीनविज्ञातानन्योन्यमितरैरपीति ॥ ५१ ॥

दुर्गाणीति । द्विषां रोद्धुः रोधकस्यापि नतु स्वयं रोध्यस्येत्यर्थः तस्य राज्ञो दुर्ग्रहाणि परैर्दुर्द्धर्षाणि दुर्गाणि नदीदुर्गादीनि आसन् । नच निर्भीकस्य किं दुर्गैरिति वाच्यम् इत्यर्थान्तरन्यासमुखेनाह नहीति. गजानास्कन्दति हिनस्तीति गजास्कन्दी सिंहो भयाद्धेतोः गिरिगुहासु शेते इति गिरिगुहाशयो नहि किन्तु स्वभावत एवेति शेषः । अधिकरणे शेतेरित्यच्प्रत्ययः । अत्र मनुः, धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरमिति ॥ ५२ ॥

भव्येति । भव्यमुख्याः कल्याणप्रधानाः नतु विपरीताः प्रत्यवेक्ष्याः

अपथेन प्रवव्टते न जातूपचितोऽपि सः।
वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः॥५४॥
कामं प्रकृतिवैराग्यं सद्यः शमयितुं क्षमः।
यस्य कार्य्यः प्रतीकारः स तन्नैवोदपादयत्॥५५॥

एतावत् कृतमेतावत् कर्त्तव्यमित्यनुसन्धानेन विचारणीयाः अतएव निरत्ययाः निर्बाधाः गर्भेऽभ्यन्तरे पच्यन्ते ये शालयः तेषां सधर्माणः अतिनिगूढा इत्यर्थः। धर्मादनिच् केवलादित्यनिच् प्रत्ययः समासान्तः। तस्य राज्ञ' समारभ्यन्तइति समारम्भा' कर्माणि गूढसप्रकाशं विपेचिरे फलितादत्यर्थः। फलानुमेयाः प्रारम्भाइति भावः॥५३॥

अपथेनेति। सोऽतिथिः उपचितो वृद्धिं गतोऽपि सन् जातु कदाचिदपि अपथेन कुमार्गेण न प्रवव्टते न प्रवृत्तः मर्य्यादां न जहावित्यर्थ.। तथाहि लवणाम्भसो लवणसागरस्य वृद्धौ पूरोत्पीड़े सत्या नदीमुखेनैव नदीप्रवेशमार्गेणैव प्रस्थानं निःसरणं नत्वन्यथेत्यर्थः॥५४॥

काममिति। प्रकृतिवैराग्यं प्रजाविरागं दैवादुत्पन्नमिति शेषः सद्यः कामं सम्यक् शमयितुं क्षमः शक्तः स राजा यस्य प्रकृतिवैराग्यस्य प्रतीकारः कार्य्यः कर्त्तव्यः अनर्थहेतुत्वादित्यर्थः तद्वैराग्यं नोदपादयत्। उत्पन्नप्रतीकारादनुत्पादनं वरमिति भावः। अत्र कौटिल्यः क्षीणाः प्रकृतयो लोभं लुब्धा यान्ति विरागताम्। विरक्ता यान्त्यमित्र वा भर्त्तारं घ्नन्ति वा स्वयम्। तस्मात् प्रकृतीनां विरागकारणानि नोत्पादयेदित्यर्थः॥५५॥

शक्येष्विति। शक्तिमतः शक्तिसम्पन्नस्यापि सतः तस्य राज्ञः शक्येषु शक्तिविषयेषु स्वस्माद्धीनबलेष्वेव विषये यात्रा दण्डयात्रा अभ-

शक्येष्वेवाभवद्यात्रा तस्य शक्तिमतः सतः।
समीरणसहायोऽपि नाम्भःप्रार्थी दवानलः॥ ५६ ॥
न धर्म्ममर्थकामाभ्यां बबाधे नच तेन तौ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ॥ ५७ ॥
हीनान्यनुपकर्त्तॄणि प्रवृद्धानि विकुर्व्वते।
तेन मध्यमशक्तीनि मित्राणि स्थापितान्यतः॥ ५८ ॥
परात्मनोः परिच्छिद्य शक्त्यादीनां बलाबलम्।
ययावेभिर्बलिष्ठश्चेत् परस्मादास्त सोऽन्यथा॥ ५९ ॥

वत् नतु समधिकेष्वित्यर्थः। तथाहि समीरणसहायोपि दवानलः अम्भःप्रार्थी जलान्वेषी न दग्धुमिति शेषः किन्तु तृणकाष्ठादिकमेव अन्विष्यतीत्यर्थः। अत्र कौटिल्यः, समज्यायोभ्यां सन्दधीत हीनेन विगृह्णीयादिति॥ ५६ ॥

न धर्म्ममिति। स राजा अर्थकामाभ्यां धर्म्मं न बबाधे न नाशितवान्, तेन धर्म्मेण च तावर्थकामौ न, अर्थं कामेन कामं वा अर्थेन न बबाधे एकत्रैवासक्तो नाभूदित्यर्थः। किन्तु त्रिषु धर्म्मार्थकामेषु सदृशस्तुल्यवृत्तिरभूदित्यर्थः॥ ५७ ॥

हीनानीति। मित्राणि हीनान्यतिक्षीणानि चेदनुपकर्तॄणि अनुपकाराणि, प्रवृद्धान्यतिसमृद्धानि चेत् विकुर्वते विरुद्धं चेष्टन्ते अपकुर्वतइत्यर्थः। 'अकर्म्मकाच्चेत्यात्मनेपदम्। अतः कारणात् तेन राज्ञा मित्राणि सुहृदः। मित्रं सुहृदि मित्रोऽर्के इति विश्वः। मध्यमशक्तीनि नातिक्षीणोच्छ्रितानि यथा तथा स्थापितानि॥ ५८ ॥

शक्येष्वेवाभवद्यात्रेत्यादिनोक्तमर्थं सोपस्कारमाह।

परेति। सोऽतिथिः परात्मनोः शत्रो रात्मनश्च शक्त्यादीनां

कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः।
अम्बुगर्भो हि जीमूत श्चातकैरभिनन्द्यते ॥६०॥
परकर्म्मापहः सोऽभूदुद्यतः स्वेषु कर्म्मसु।
आवृणोदात्मनोरन्ध्रं रन्ध्रेषु प्रहरन् रिपून्॥६१॥

शक्तिदेशकालादीनां बलाबलं न्यूनाधिकभावं परिच्छिद्य निश्चित्य, एभिः शक्त्यादिभिः परस्मात् शत्रोर्वलिष्ठः स्वयमतिशयेन बलवांश्चेत्। बल-शब्दान्मतुवन्तादिष्ठन् प्रत्ययः विन्मतोर्लुगिति मतुपो लुक्। ययौ यात्रा चक्रे, अन्यथा अवलिष्ठश्चेत् आस्त अतिष्ठत् न ययौ इत्यर्थः। अत्र मनुः, यदा मन्येत भावेन हृष्टपुष्टबलं स्वकम्। परस्य विपरीतं चेत्तदा यायादरीन् प्रति। यदा तु स्यात्परिक्षीणो वाहनेन बलेन च। तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीनिति ॥ ५९ ॥

कोशेनेति। कोशेनार्थचयेन आश्रयणीयत्वं भवतीति शेषः इति हेतो स्तस्य राज्ञः अर्थसंग्रहः नतु लोभादित्यर्थः। तथाहि, अम्बु गर्भे यस्य सोऽम्बुगर्भः जीवनस्य जलस्य मूतः पुटबन्धो जीमूतो मेघः। मूङ् बन्धने पृषोदरादित्वात्साधुः। चातकैरभिनन्द्यते सेव्यते। अत्र कामन्दकः, धर्म्महेतो स्तथार्थाय भृत्यानां रक्षणाय च। आपदर्थञ्च संरक्ष्यः कोशो धर्म्मवता सदेति ॥ ६० ॥

परकर्म्मेति। स राजा परेषां कर्म्माणि सेतुवार्त्तादीनि अपहन्तीति परकर्म्मापहः सन्। अन्येभ्योपि दृश्यतइति अपिशब्दस्य सामर्थ्याद्धन्ते र्डप्रत्ययः। स्वेषु कर्म्मसु उद्यतः उद्युक्तोऽभूत्, रिपून् रन्ध्रेषु प्रहरन् आत्मनो रन्ध्रं व्यसनादिकमावृणोत् संवृतवान्। अत्र मनुः, नास्य च्छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु। गूहेत् कूर्म्म इवाङ्गानि परान्द्विवरमात्मनइति ॥ ६१ ॥

पित्रेति। दण्डो दमः सैन्यं वा तद्वतो दण्डवतो दण्डमभ्यन्नस्य

पित्रा संवर्द्धितो नित्यं कृतास्त्रः साम्परायिकः।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत॥६२॥
सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः।
स चकर्ष परस्मात्तत् अयस्कान्त इवायसम्॥६३॥
वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु॥६४॥
तपो रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च सम्पदः।
यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक्॥६५॥

तस्य राज्ञः पित्रा कुशेन नित्यं संवर्द्धितः पुष्टः कृतास्त्रः शिक्षितास्त्रः सम्परायो युद्धम्। युद्धायत्योः सम्पराय इत्यमरः। तमर्हतीति साम्परायिकः। तदर्हतीति ठक्प्रत्ययः। दण्डः सैन्यम्। दण्डो यमे मानभेदे लगुड़े दमसैन्ययोरिति विश्वः। स्वदेहान्न व्यशिष्यत नाभिद्यत। स्वदेहेपि विशेषणानि योज्यानि। मूलबलं स्वदेहमिवारक्षदित्यर्थः॥ ६२॥

सर्पस्येति। सर्पस्य शिरोरत्नमिव अस्य राज्ञः शक्तित्रयं परः शत्रुर्न चकर्ष, स तु परस्माच्छत्रोः तत् शक्तित्रयम् अयस्कान्तो मणिविशेषः आयसं लौहविकारमिव चकर्ष॥ ६३॥

वापीष्विति। स्रवन्तीषु नदीषु वापीषु दीर्घिकास्विव। वापी तु दीर्घिकेत्यमरः। वनेष्वरण्येषु उपवनेषु आरामेष्विव। आरामः स्यादुपवनमित्यमरः। अद्रिषु स्वकीयेषु वेश्मस्विव, सार्थाः वणिक् प्रभृतयः स्वैरं स्वेच्छया चेरुः चरन्ति स्म॥ ६४॥

तप इति। विघ्नेभ्यस्तपो रक्षन् तस्करेभ्यः सम्पदश्च रक्षन् स राजा आश्रमैर्ब्रह्मचर्य्यादिभिर्वर्णैरपि ब्राह्मणादिभिश्च यथास्वं स्वमनति-

खनिभिः सुषुवे रत्नं क्षेत्रैः शस्यं वनैर्गजान् ।
दिदेश वेतनं तस्मै रक्षासदृशमेव भूः ॥६६॥
स गुणानां बलानाञ्च षण्णां षण्मुखविक्रमः ।
बभूव विनियोगज्ञः साधनीयेषु वस्तुषु ॥६७॥
इति क्रमात् प्रयुञ्जानो राजनीतिं चतुर्विधाम् ।
आतीर्थादप्रतीघातं स तस्याः फलमानशे ॥६८॥

क्रम्य षड़ंशभाक् चक्रे यथाक्रममाश्रमैस्तपसः वर्णैः सम्पदाञ्च षष्ठांशभाक् कृत इत्यर्थः । षष्ठोंऽशः षड़ंशः संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वमुक्तं प्राक् ॥ ६५ ॥

खनिभिरिति । भूर्भूमि स्तस्मै राज्ञे रक्षासदृशं रक्षानुरूपमेव वेतनं भृतिं दिदेश ददौ । कथं, खनिभिराकरैः । खनिः स्त्रियामाकरः स्यादित्यमरः । रत्नं माणिक्यादिकं सुषुवे अजीजनत्, क्षेत्रैः शस्यम्, वनैर्गजान् हस्तिनः सुषुवे ॥ ६६ ॥

स इति । षण्मुखविक्रमः स राजा षण्णां गुणानां सन्धिविग्रहादीनां बलानां मौलभृत्यादीनाञ्च साधनीयेषु वस्तुषु साध्येष्वर्थेषु विनियोगं जानातीति, विनियोगस्य ज्ञः इति वा, विनियोगज्ञः । कर्म्मविवक्षायामुपपदसमासः, आतोऽनुपसर्गे क इति कप्रत्ययः । शेष विवक्षायां षष्ठीसमासः, इगुपधेत्यादिना कप्रत्ययः । बभूव, इदमत्र प्रयोक्तव्यमित्यादि जानातीत्यर्थः ॥ ६७ ॥

इतीति । इति चतुर्विधां सामाद्युपायैरिति शेषः राजनीतिं दण्डनीतिं क्रमात् सामादिक्रमादेव प्रयुञ्जानः स राजा आतीर्थात् मन्त्राद्यष्टादशात्मकतीर्थपर्य्यन्तम् । योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादिति हलायुधः । तस्याः

* कूटयुद्धविधिज्ञेऽपि तस्मिन् सन्मार्गयोधिनि।
भेजेऽभिसारिकावृत्तिं जयश्रीर्वीरगामिणी॥६९॥

प्रायः प्रतापभग्नत्वादरीणां तस्य दुर्लभः।
रणो गन्धद्विपस्येव गन्धभिन्नान्यदन्तिनः॥७०॥

प्रवृद्धौ हीयते चन्द्रः समुद्रोऽपि तथाविधः।
स तु तत्समवृद्धिश्च न चाभूत्ताविव क्षयी॥७१॥

सन्तस्तस्याभिगमनादत्यर्थं महतः कृशाः।
उदधेरिव जीमूताः प्रापुर्दातृत्वमर्थिनः॥७२॥

नीतेः फलम् अप्रतीघातम् अप्रतिबन्धं यथा तथा आनर्श प्राप्तवान्। मन्त्रप्रादिषु वसुद्दिश्य य उपायः प्रयुज्यते स तस्य फलतीत्यर्थः॥ ६८॥

कूटेति। कूटयुद्धविधिज्ञेऽपि कपटयुद्धप्रकाराभिज्ञेऽपि सन्मार्गेणयोधिनि धर्मयोद्धरि तस्मिन्नतिथौ वीरगामिणी जयश्रीः अभिसारिकावृत्तिं भेजे। कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेत्यमरः। जयश्रीस्तमन्विष्य आगच्छदित्यर्थः॥ ६९॥

प्रायइति। अरीणां सर्वेषां प्रतापेन अतितेजसैव भग्नत्वात् तस्य राज्ञः,गन्धेन मदगन्धेन भिन्ना भग्ना अन्ये दन्तिनो येन तस्य गन्धद्विपस्येव, प्रायः प्रायेण रणो दुर्लभः। खलर्थयोगेपि शेषविवक्षायां षष्ठीति च्छन्तीत्युक्तम्॥ ७०॥

प्रवृद्धाविति। प्रवृद्धौ सत्यां चन्द्रो हीयते समुद्रोऽपि तथाविधः चन्द्रवदेव प्रवृद्धो हीयते। प्रवृद्ध इति वा पाठः। स राजा तु ताभ्यां चन्द्रसमुद्राभ्यां समा वृद्धिर्यस्य स तत्समवृद्धिश्चाभूत् तौ चन्द्रसमुद्राविव क्षयी। जिदृक्षीत्यादिना इनिप्रत्ययः नाभूत्॥ ७१॥

सन्तइति। अत्यर्थं कृशा दरिद्राः अतएवार्थिनो याचनशीलाः

स्तूयमानः स जिह्राय स्तुत्यमेव समाचरन्।
तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः॥ ७३॥
दुरितं दर्शनेन घ्नन् तत्त्वार्थेन नुदंस्तमः।
प्रजाः स्वतन्त्रयाञ्चक्रे शश्वत् सूर्य्य इवोदितः॥ ७४॥
इन्दोरगतयः पद्मे सूर्यस्य कुमुदेऽंशवः।
गुणास्तस्य विपक्षेऽपि गुणिनो लेभिरेऽन्तरम्॥ ७५॥

सन्तो विद्वांसः महतस्तस्य राज्ञोऽभिगमनात्, उदधेरभिगमनाज्जीमूता इव, दातृत्वं प्रापुः, अर्थिषु दानभोगपर्य्याप्तं धनं प्रयच्छतीत्यर्थः॥ ७२॥

स्तूयमानइति। स राजा स्तुत्यं स्तोत्रार्हमेव यत् तदेव समाचरन् अतएव स्तूयमानः सन् जिह्राय ललज्ज, तथापि ह्रीणत्वेपि तत्कारिणः स्तोत्रकारिणो द्वेष्टीति तत्कारिद्वेषिणः तस्य राज्ञो यशो ववृधे। गुणाढ्यस्य पुंसः स्तुतौ लज्जैव भूषणमिति भावः॥ ७३॥

दुरितमिति। स राजा उदितः सूर्य्यइव दर्शनेन दुरितं घ्नन् निवर्त्तयन्। तथा च स्मर्य्यते, अग्निचित् कपिला सती राजा भिक्षुर्महोदधिः। दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशइति। तत्त्वस्य वस्तुतत्त्वस्य अर्थेन समर्थनेन प्रकाशेन च तमोऽज्ञानं ध्वान्तञ्च नुदन् शश्वत् प्रजाः स्वतन्त्रयाञ्चक्रे स्वाधीना श्चकार॥ ७४॥

इन्दोरिति। इन्दोरंशवः पद्मे अगतयः प्रवेशरहिताइत्यर्थः, सूर्य्यस्यांशवः कुमुदे अगतयः। गुणिनस्तस्य गुणास्तु विपक्षे शत्रावपि अन्तरमवकाशं लेभिरे प्रापुः॥ ७५॥

परेति। अश्वमेधाय जिगीषोरस्य विचेष्टितं दिग्विजयरूपं यद्यपि पराभिसन्धानपरं शत्रुवञ्चनप्रधानं तथापि तद्धर्म्यं धर्मादनपेत-

पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्।
जिगीषोरश्वमेधाय धर्म्म्यमेव बभूव तत्॥७६॥
एवमुद्यन् प्रभावेण शास्त्रनिर्द्दिष्टवर्त्मना।
वृषेव देवो देवानां राज्ञां राजा बभूव सः॥७७॥
पञ्चमं लोकपालानामूचुः साधर्म्म्ययोगतः।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम्॥७८॥
दूरापवर्जितच्छत्रै स्तस्याज्ञां शासनार्पिताम्।
दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव॥७९॥

मेव। धर्मपथ्यर्थन्यायादनपेतइति यत्प्रत्ययः। बभूव। मन्त्रप्रभावोत्साहशक्तिभिः परान् सन्दध्यादिति कौटिल्यः॥ ७६॥

एवमिति। एवं शास्त्रनिर्दिष्टवर्त्मना शास्त्रोपदिष्टमार्गेण प्रभावेण कोशदण्डजेन तेजसा। स प्रभवः प्रतापश्च यत्तेजः कोशदण्डजमित्यमरः। उद्यन् उद्युञ्जान. सः, वृषा वासवो देवानां देवो देवदेव इव, राज्ञा राजा राजराजो बभूव॥ ७७॥

पञ्चममिति। तं राजानमिति शेषः, साधर्म्ययोगतः यथाक्रमं लोकसंरक्षणपरोपकारभूधारणरूपसमानधर्म्मत्वबलात् लोकपालानामिन्द्रादीनां चतुर्णां पञ्चममूचु. महतां भूतानां पृथिव्यादीनां पञ्चानां षष्ठमूचुः कुलभूभृतां कुलाचलानां महेन्द्रमलयादीनां सप्तानामष्टममूचुः॥ ७८॥

दूरेति। भूपालाः शासनेषु अर्पितामुपन्यस्तां तस्य राज्ञः आज्ञाम्, देवा. पौरन्दरीमैन्द्रीमाज्ञामिव, दूरापवर्जितच्छत्रैः दूरात्परिहृतातपत्रै. शिरोभिर्दधुः॥ ७९॥

ऋत्विजइति। स राजा महाक्रतावश्वमेधे ऋत्विजो याजकान्

ऋत्विजः स तथानर्च्च दक्षिणाभिर्महाक्रतौ।
यथा साधारणीभूतं नामास्य धनदस्य च ॥८०॥

इन्द्राद्‌वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमो ऽभूत्
यादोनाथः शिवजलपथः कर्म्मणे नौचराणाम्।
पूर्व्वापेक्षी तदनु विदधे कोषवृद्धिं कुवेरः
तस्मिन् दण्डोपनतचरितं भेजिरे लोकपालाः॥८१॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अतिथिवर्णनो नाम सप्तदशः सर्गः ॥

दक्षिणाभिः तथा आनर्च अर्च्चयामास। अर्च्चतेर्भौवादिकाल्लिट्। यथा अस्य राज्ञो धनदस्य च नाम साधारणीभूतमेकीभूतम्, उभयोरपि धनदसंज्ञा यथा स्यात्तथेत्यर्थः ॥ ८० ॥

इन्द्रादिति। इन्द्राद्‌वृष्टिरभूत्, यमः नियमिता निवारिता गदस्य रोगस्योद्रेकएव वृत्तिर्येन सोऽभूत्, यादोनाथो वरुणः नौचराणां नाविकानां कर्म्मणे सञ्चाराय शिवजलपथः सुचरजलमार्गोऽभूत्, तदनु पूर्व्वापेक्षी रघुरामादिमहिमाभिज्ञः कुवेरः कोषवृद्धिं विदधे, इत्थं लोकपालाः तस्मिन् राज्ञि विषये दण्डोपनतस्य शरणागतस्य चरितं वृत्तिं भेजिरे। दुर्व्वलो वलवत्सेवी विरुद्धाच्छङ्कितादिभिः। वर्त्तेत दण्डोपनतो भर्त्तर्य्येवमवस्थितइति कौटिल्यः ॥ ८१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायां
सप्तदशः सर्गः।



अष्टादशः सर्गः ।



स नैषधस्यार्थपतेः सुतायाम्
उत्पादयामास निषिद्धशत्रुः ।
अनूनसारं निषधान्नगेन्द्रात्
पुत्रं यमाहुर्निषधाख्यमेव ॥ १ ॥

तेनोरुवीर्य्येण पिता प्रजायै
कल्पिष्यमाणेन ननन्द यूना ।
सुवृष्टियोगादिव जीवलोकः
शस्येन सम्पत्तिफलोन्मुखेन ॥ २ ॥

यत्पदाम्बुजसम्पर्कादहल्यासीदपांशुला ।
कारुण्यसिन्धवे तस्मै नमो वैदेहिवल्लभे ॥

स इति । निषिद्धशत्रु र्निवारितरिपुः सोऽतिथिः नैषधस्य निषधदेशाधीश्वरस्य अर्थपतेः राज्ञः सुतायां निषधात् निषधाख्यात् नगेन्द्रात् पर्व्वतादनूनसारम् अन्यूनबलं पुत्रम् उत्पादयामास, यं पुत्रं निषधाख्य निषधनामकमेवाहुः ॥ १ ॥

तेनेति । उरुवीर्य्येण अतिपराक्रमेण अतएव प्रजायै लोकरक्षार्थं कल्पिष्यमाणेन तेन यूना निषधेन पिता अतिथिः, सुवृष्टियोगात् सम्पत्तिफलोन्मुखेन पाकोन्मुखेन शस्येन जीवलोक इव, ननन्द जहर्ष ॥ २ ॥

शब्दादि निर्व्विश्य सुखं चिराय
तस्मिन् प्रतिष्ठापितराजशब्दः।
कौमुद्वतेयः कुमुदावदातैः
द्यामर्ज्जितां कर्म्मभिराररोह ॥३॥

पौत्रः कुशस्यापि कुशेशयाख्यः
ससागरां सागरधीरचेताः।
एकातपत्रां भुवमेकवीरः
पुरार्गलादीर्घभुजो बुभोज ॥४॥

तस्यानलौजास्तनयस्तदन्ते
वंशश्रियं प्राप नलाभिधानः।

शब्दादीति। कुमुद्वत्याः अपत्यं पुमान् कौमुद्वतेयः अतिथिः शब्दादि शब्दस्पर्शादि सुखं सुखसाधनं विषयवर्गं निर्विश्योपभुज्य चिराय तस्मिन् निषधाख्ये पुत्रे प्रतिष्ठापितराजशब्दः दत्तराज्यः सन् कुमुदावदातैः निर्म्मलैः कर्म्मभि रश्वमेधादिभिः अर्ज्जितां द्यां स्वर्गमारुरोह ॥ ३ ॥

पौत्र इति। कुशेशयाक्षः शतपत्रलोचनः। शतपत्रं कुशेशयमित्यमरः। सागरधीरचेताः समुद्रगम्भीरचित्तः एकवीरोऽनन्यसहायशूरः पुरस्यार्गला कपाटविष्कम्भः। तद्विष्कम्भोऽर्गलं न नेत्यमरः। तद्वद्दीर्घभुजः कुशस्य पौत्रो निषधोऽपि ससागराम् एकातपत्रां भुवं बुभोज पालयामास। भुजोऽनवनऽभ्यवहारे इत्यात्मनेपदम् ॥ ४ ॥

तस्येति। अनलौजाः नलाभिधानो नलाख्यः तस्य निषधस्य तनयः तस्य निषधस्यान्तेऽवसाने वंशश्रियं राज्यलक्ष्मीं प्राप। नलिनाभनेत्रो

यो नड्वालानीव गजः परेषां
बलान्यमृद्नान्नलिनाभवक्त्रः ॥५॥
नभश्चरैर्गीतयशाः स लेभे
नभस्तलश्यामतनुं तनूजम्।
ख्यातं नभःशब्दमयेन नाम्ना
कान्तं नभोमासमिव प्रजानाम्॥६॥
तस्मै विसृज्योत्तरकोशलानां
धर्मोत्तरस्तत्प्रभवे प्रभुत्वम्।
मृगैरजर्य्यं जरसोपदिष्टम्
अदेहबन्धाय पुनर्बबन्ध ॥७॥

यो नलः, गजो नड्वलानि नड्प्रायस्थलानीव। नडशादात् ड्वलजिति ड्वलच् प्रत्ययः। परेषां बलानि अमृद्नात् ममर्द ॥ ५ ॥

नभइति। नभश्चरैः गन्धर्वादिभिः गीतयशाः स नलः नभस्तलश्यामतनुं नभःशब्दमयेन नाम्ना ख्यातं नभःशब्दसंज्ञकमित्यर्थः, नभोमासमिव श्रावणमासमिव प्रजानां कान्तं प्रियं तनूजं पुत्रं लेभे ॥६॥

तस्मैइति। धर्मोत्तरो धर्मप्रधानो नलः प्रभवे समर्थाय तस्मै नभसे तत् उत्तरकोशलानां प्रभुत्वम् आधिपत्यं विसृज्य दत्त्वा जरसा जरया उपदिष्टं वार्द्धके चिकीर्षितमित्यर्थः मृगैरजर्य्यं तैः सह सङ्गतम्। अजर्य्यं सङ्गतमिति निपातः। पुनरदेहबन्धायपुनर्देहसम्बन्धनिवृत्तये बबन्ध मोक्षार्थं वनं गतइत्यर्थः। अदेहबन्धायेत्यत्र प्रसज्यप्रतिषेधेऽपि नञ्समासइष्यते ॥ ७ ॥

तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः।
शान्ते पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥८॥

स क्षेमधन्वानममोघधन्वा
पुत्रं प्रजाक्षेमविधानदक्षम्।
क्ष्मां लम्भयित्वा क्षमयोपपन्नं
वने तपः क्षान्ततरश्चचार ॥९॥

अनीकिनीनां समरेऽग्रयायी
तस्यापि देवप्रतिमः सुतोऽभूत्।

तेनेति। तेन नभसा, द्विपानां पुण्डरीको दिग्गजविशेष इव, राज्ञामजय्यो जेतुमशक्यः। क्षय्यजय्यौ शक्यार्थे इति निपातः। पुण्डरीकः पुण्डरीकाख्यः पुत्रोऽजनि जनितः, पितरि शान्ते स्वर्गते सति व्याहृतपुण्डरीका गृहीतश्वेतपद्मा श्रीः यं पुण्डरीकं पुण्डरीकाक्षं विष्णुमिव श्रिता ॥ ८ ॥

स इति। अमोघं धनुर्यस्य सोऽमोघधन्वा। धनुषश्चेत्यनङादेशः समासान्तः। स पुण्डरीकः प्रजानां क्षेमविधानदक्षं क्षमयोपपन्नं शान्तियुक्तं क्षेमं धनुर्यस्य तं क्षेमधन्वानं नाम पुत्रम्। वा संज्ञायामित्यनङादेशः। क्ष्मां लम्भयित्वा प्रापय्य। लभेर्गत्यर्थत्वाद् द्विकर्मकत्वम्। शान्ततरोऽत्यन्तनिःस्पृहः सन् वने तपश्चचार ॥ ९ ॥

अनीकिनीनामिति। तस्य क्षेमधन्वनोऽपि समरे अनीकिनीनां चमूनाम् अग्रयायी देवप्रतिमः इन्द्रादिकल्पः सुतोऽभूत्। अनीक

व्यश्रूयतानीकपदावसानं
देवादि नाम त्रिदिवेऽपि यस्य ॥ १० ॥
पिता समाराधनतत्परेण
पुत्रेण पुत्री स यथैव तेन ।
पुत्रस्तथैवात्मजवत्सलेन
स तेन पित्रा पितृमान् बभूव ॥ ११ ॥
पूर्व्वस्तयोरात्मसमे चिरोढ़ाम्
आत्मोद्भवे वर्णचतुष्टयस्य ।
धुरं निधायैकनिधिर्गुणानां
जगाम यज्वा यजमानलोकम् ॥ १२ ॥

पदावसानम् अनीकशब्दान्तं देवादि देवशब्दपूर्वं यस्य नाम देवानीक इति नामधेयं त्रिदिवे स्वर्गेऽपि व्यश्रूयत विश्रुतम् ॥ १० ॥

पितेति । स पिता क्षेमधन्वा समाराधनतत्परेण शुश्रूषापरेण तेन पुत्रेण यथैव पुत्री बभूव तथैव स पुत्रो देवानीकः आत्मज वत्सलेन तेन पित्रा पितृमान् बभूव । लोके पितृत्वपुत्रत्वयोः फलमनयोरेवासीदित्यर्थः ॥ ११ ॥

पूर्वइति । गुणानामेकनिधिः यज्वा विधिवदिष्टवान् तयोः पितृपुत्रयोर्मध्ये पूर्वः पिता क्षेमधन्वा आत्मसमे स्वतुल्ये आत्मोद्भवे पुत्रे देवानीके चिरोढ़ां चिरधृतां वर्णचतुष्टयस्य धुरं रक्षाभारं निधाय यजमानलोकं यष्टृलोकं नाकं जगाम ॥ १२ ॥

वशीति । तस्य देवानीकस्य वशी समर्थः सुतः अहीनगुर्नामेति

वशी सुतस्तस्य वशंवदत्वात्
स्वेषामिवासीत् द्विषतामपीष्टः ।
सकृद्विविग्नानपि हि प्रयुक्तं
माधुर्य्यमीष्टे हरिणान् ग्रहीतुम् ॥१३॥

अहीनगुर्नाम स गां समग्राम्
अहीनबाहुद्रविणः शशास ।
यो हीनसंसर्गपराङ्मुखत्वात्
युवाप्यनर्थैर्व्यसनैर्विहीनः ॥१४॥

गुरोः स चानन्तरमन्तरज्ञः
पुंसां पुमानाद्य इवावतीर्णः ।

देवानीकनामकः वशं वशकरं मधुरं वदतीति वशंवदः । प्रियवशे वदः खजिति खच् प्रत्ययः । तस्य भावस्तत्त्वं तस्मात् इष्टवादित्वात् स्वेषामिव द्विषतामपि इष्टः प्रिय आसीत् । तथाहि, प्रयुक्तमुच्चारितं माधुर्य्यं सकृदेकवारं विविग्नान् भीतानपि हरिणान् ग्रहीतुं वशीकर्तुम् ईष्टे शक्नोति ॥ १३ ॥

अहीनगुरिति । अहीनबाहुद्रविणः समग्रभुजपराक्रमः । द्रविणं काञ्चनं वित्तं द्रविणञ्च पराक्रमः इति विश्वः । हीनसंसर्गपराङ्मुखत्वात् नीचसंसर्गविमुखत्वाद्धेतोः युवापि अनर्थैरनर्थकरैः व्यसनैः पानद्यूतादिभिः विहीनो रहितो यः अहीनगुर्नाम स पूर्वोक्तो देवानीकसुतः समग्रां कृत्स्नां गां भुवं शशास ॥ १४ ॥

गुरोरिति । पुंसामन्तरज्ञो विशेषज्ञः चतुरो निपुणः सोऽहीन-

उपक्रमैरस्खलितैश्चतुर्भिः
चतुर्दिगीशश्चतुरो बभूव ॥१५॥
तस्मिन् प्रयाते परलोकयात्रां
जेतर्यरीणां तनयं तदीयम् ।
उच्चैःशिरस्त्वाज्जितपारियात्रं
लक्ष्मीः सिषेवे किल पारियात्रम् ॥१६॥
तस्याभवत् सूनुरुदारशीलः
शिलः शिलापट्टविशालवक्षाः ।
जितारिपक्षोऽपि शिलीमुखैर्यः
शालीनतामव्रजदीड्यमानः ॥१७॥

गुरुश्च गुरोः पितुरनन्तरम्, अवतीर्णो भुवं प्राप्त आद्यः पुमान् विष्णुरिव, अस्खलितैरप्रतिहतैश्चतुर्भिरुपक्रमैः सामाद्युपायैः । सामादिभिरुपक्रमैरिति मनुः । चतुर्दिगीशः चतसृणां दिशामीशो बभूव ॥ १५ ॥

तस्मिन्निति । अरीणां जेतरि तस्मिन्नहीनगौ परलोकयात्रां प्रयाते प्राप्ते सति उच्चैःशिरस्त्वादुन्नतशिरस्त्वात् जित पारियात्रः कुलशैलविशेषो येन तं पारियात्रं पारियात्राख्यं तदीयं तनयं लक्ष्मीः राज्यलक्ष्मीः सिषेवे किल ॥ १६ ॥

तस्येति । तस्य पारियात्रस्य उदारशीलो महावृत्तः । शीलं स्वभावे सद्वृत्ते इत्यमरः । शिलापट्टविशालवक्षाः शिलः शिलाख्यः सूनुरभवत् । यः सूनुः शिलीमुखैर्बाणैः । अलिबाणौ शिलीमुखाविल्यमरः । जितारिपक्षोऽपि ईड्यमानः स्तूयमानः सन् शालीनता-

तमात्मसम्पन्नमनिन्दितात्मा
कृत्वा युवानं युवराजमेव ।
सुखानि सोऽभुङ्क्त सुखोपरोधि
वृत्तं हि राज्ञामुपरुद्धवृत्तम् ॥१८॥

* तं रागबन्धिष्ववितृप्तमेव
भोगेषु सौभाग्यविशेषभोग्यम् ।
विलासिनीनामरतिक्षमापि
जरा वृथा मत्सरिणी जहार ॥१९॥

अधृष्टतां लज्जामव्रजत् अगच्छत्। स्यादधृष्टे तु शालीन इत्यमरः। शालीनकौपीने इति निपातः ॥ १७ ॥

तमिति। अनिन्दितात्मा अगर्हितस्वभावः स पारियात्रः आत्मसम्पन्नं बुद्धिसम्पन्नम्। आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्युभयत्राप्यमरः। युवानं तं शिलं युवराजं कृत्वैव सुखान्यभुङ्क्त. न त्वकृत्वेत्येवकारार्थः। किमर्थं युवराजकरणमित्याशङ्क्य, अन्यथा सुखोपभोगो दुर्लभ इत्याह सुखोपरोधीति। हि यस्माद्राज्ञां वृत्तं प्रजापालनादिरूपं सुखोपरोधि बहुलत्वात् सुखप्रतिबन्धकम् अतएवो-परुद्धवृत्तम् कारादिबद्धसदृशमित्यर्थः। उपरुद्धस्य स्वयमूढ़ भारस्य च सुखं नाप्नोतीति भावः ॥ १८ ॥

तमिति। रागं बध्नातीति रागबन्धिनः रागप्रवर्त्तका इत्यर्थः तेषु भोगेषु विषयेषु अवितृप्तमेव सन्तं किन्तु विलासिनीनां भोक्त्रीणां सौभाग्यविशेषेण सौन्दर्यातिशयेन हेतुना भोग्यं भोगार्हम्। चजोः कु घिण्ण्यतोरिति कुत्वम्। तं पार्थिवादं रतिक्षमा न भवतीत्यरतिक्ष-

उन्नाभ इत्युद्गतनामधेय-
स्तस्यायथार्थोन्नतनाभिरन्ध्रः।
सुतोऽभवत् पङ्कजनाभकल्पः
कृत्स्नस्य नाभिर्नृपमण्डलस्य ॥२०॥

ततः परं वज्रधरप्रभाव-
स्तदात्मजः संयति वज्रघोषः।
बभूव वज्राकरभूषणायाः
पतिः पृथिव्याः किल वज्रणाभः ॥२१॥

सापि अतएव दृथा मत्सरिणी रतिक्षमासु विलासिनीष्वित्यर्थः जरा जहार वशीचकार ॥ १९ ॥

उन्नाभइति। तस्य शिलाख्यस्य उन्नाभइति उद्गतनामधेयः प्रसिद्धनामा अयथार्थं यथा तथा उन्नतं नाभिरन्ध्रं यस्य स गम्भीरनाभिरित्यर्थः। तदुक्तम्,, स्वरः सत्त्वञ्च नाभिश्च गाम्भीर्यं त्रिषु शस्यते। पङ्कजनाभकल्पः विष्णुसदृशः कृत्स्नस्य नृपमण्डलस्य नाभिः प्रधानम्। नाभिः प्रधाने कस्तूरीमदेऽपि क्वचिदीरितइति विश्वः। सुतोऽभवत्। अच्प्रत्यन्ववपूर्वात्सामलोम्नइत्यत्राजिति योगविभागादुन्नाभपद्मनाभादयः सिद्धाः॥ २० ॥

ततइति। ततः परं वज्रधरप्रभावः इन्द्रतेजाः संयति संग्रामे वज्रघोषः अशनितुल्यध्वनिः वज्रणाभो नाम तस्योन्नाभस्यात्मजः वज्राणां हीरकाणामाकराः खनयएव भूषणानि यस्याः तस्याः पृथिव्याः पतिर्बभूव किल॥ २१॥

तस्मिन्निति। तस्मिन् वज्रणाभे सुकृतोपलब्धां धर्मोर्ज्जितां द्यां

तस्मिन् गते द्यां सुकृतोपलब्धां
तत्सम्भवं शङ्खणमर्णवान्ता ।
उत्खातशत्रुं वसुधोपतस्थे
रत्नोपहारैरुदितैः खनिभ्यः ॥२२॥

तस्यावसाने हरिदश्वधामा
पित्र्यं प्रपेदे पदमश्विरूपः ।
वेलातटेषूषितसैनिकाश्वं
पुराविदो यं व्युषिताश्वमाहुः ॥२३॥

आराध्य विश्वेश्वरमीश्वरेण
तेन क्षितेर्विश्वसहो विजज्ञे ।
पातुं सहो विश्वसखः समग्रां
विश्वम्भरामात्मजमूर्त्तिरात्मा ॥२४॥

स्वर्गं गते सति, उत्खातशत्रुमुद्धृतशत्रुं शङ्खणं नाम तत्सम्भवं तदात्मजम् अर्णवान्ता वसुधा खनिभ्यः आकरेभ्य उदितैरुत्पन्नैः रत्नोपहारैरुत्कृष्टवस्तुसमर्पणैः उपतस्थे सिषेवे । जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयत इति भरतमिश्रः ॥ २२ ॥

तस्येति । तस्य शङ्खणस्यावसानेऽन्ते हरिदश्वधामा सूर्यतेजाः अश्विनोरिव रूपमस्येत्यश्विरूपोऽतिसुन्दरः तत्सुत इति शेषः पित्र्यमिति स्वार्थिकष्यञ्प्रत्ययात्, पित्र्यं पदं प्रपेदे । वेलातटेषु उषिताः निविष्टाः सैनिकाः अश्वाश्च यस्य तम् अन्वर्थनामानमित्यर्थः यं पुरा पुराविदो वृद्धाः व्युषिताश्वमाहुः ॥ २३ ॥

अंशे हिरण्याक्षरिपोः स जाते
हिरण्यनाभे तनये नयज्ञः।
द्विषामसह्यः सुतरां तरूणां
हिरण्यरेता इव सानिलोऽभूत्॥२५॥

पिता पितॄणामनृणस्तमन्ते
वयस्यनन्तानि सुखानि लिप्सुः।
राजानमाजानुविलम्बिबाहुं
कृत्वा कृती वल्कलवान् बभूव॥२६॥

आराध्येति। तेन क्षितेरीश्वरेण व्युषिताश्वेन विश्वेश्वरं काशीपतिम् आराध्योमास्य विश्वसहो नाम विश्वसखः समग्रां सर्व्वां विश्वम्भरां भुवं मातुं रक्षितुं सहतइति सहः क्षमः। पचाद्यच्। आत्मजमूर्त्तिः पुत्ररूपी आत्मा स्वयमेव। आत्मा वै पुत्रनामासीति श्रुतेः। विजज्ञे सुषुवे। विपूर्व्वो जनि गर्भविमोचने वर्त्तते। यथाह भगवान् पाणिनिः, स मां विजायते इति॥ २४॥

अथेति। नयज्ञो नीतिज्ञः स विश्वसहः हिरण्याक्षरिपोः विष्णोरंशे हिरण्यनाभे नाम्नि तनये जाते सति, तरूणां सानिलो हिरण्यरेता हुतभुगिव, द्विषां सुतरामसह्योऽभूत्॥ २५॥

पितेति। पितॄणामनृणः निवृत्तपितृऋणइत्यर्थः। प्रजया पितृभ्यइति श्रुतेः। अतएव कृती कृतकृत्यइत्यर्थः पिता विश्वसहः अन्ते वयसि वार्द्धके अनन्तानि अविनाशानि सुखानि लिप्सुः मुमुक्षुरित्यर्थः आजानुविलम्बिबाहुं दीर्घबाहुं भाग्यसम्पन्नमिति भावः तं हिरण्यनाभं राजानं कृत्वा वल्कलवान् बभूव वनं गतइत्यर्थः॥ २६॥

कौशल्य इत्युत्तरकोशलानां
पत्युः पतङ्गान्वयभूषणस्य ।
तस्यौरसः सोमसुतः सुतोऽभूत्
नेत्रोत्सवः सोम इव द्वितीयः ॥२७॥

यशोभिराब्रह्मसभं प्रकाशः
स ब्रह्मभूयं गतिमाजगाम ।
ब्रह्मिष्ठमाधाय निजेऽधिकारे
ब्रह्मिष्ठमेव स्वतनुप्रसूतम् ॥२८॥

कौशल्य इति । उत्तरकोशलानां पत्युः पतङ्गान्वयभूषणस्य सूर्यवंशाभरणस्य सोमसुतः सोमं सुतवतः यज्वन इत्यर्थः । सोमे सुञ इति क्विप् । तस्य हिरण्यनाभस्य द्वितीयः सोम इव चन्द्र इव नेत्रोत्सवो नयनानन्दकरः कौशल्य इति प्रसिद्धः औरसः धर्मपत्नीजः सुतोऽभूत् ॥ २७ ॥

यशोभिरिति । आ ब्रह्मसभायाः आब्रह्मसभं ब्रह्मलोकपर्यन्तम् । अभिविधावव्ययीभावः । यशोभिः प्रकाशः प्रसिद्धः स कौशल्यः स्वतनुप्रसूतं स्वात्मजं ब्रह्मिष्ठं ब्रह्मविदतिशयम् । ब्रह्मशब्दान्मतुबन्तादिष्ठन् प्रत्यये विन्मतोर्लुगिति मतुपो लुक्, नस्तद्धित इति टिलोपः । ब्रह्मिष्ठं ब्रह्मिष्ठाख्यं स्वतनुप्रसूतं स्वात्मजमेव निजे अधिकारे [illegible] आधाय निधाय ब्रह्मणो भावो ब्रह्मभूयं ब्रह्मत्वं तदेव गतिं तामाजगाम मुक्तोऽभूदित्यर्थः । स्याद्ब्रह्मभूयं ब्रह्मत्वमित्यमरः । भुवो भावे क्यप् ॥ २८ ॥

तस्मिन्निति । कुलापीडनिभे कुलशेखरतुल्ये विपीडमिति

तस्मिन् कुलापीड़निभे विपीड़ं
सम्यग्महीं शासति शासनाङ्काम्।
प्रजाश्चिरं सुप्रजसि प्रजेशे
ननन्दुरानन्दजलाविलाक्ष्यः ॥२९॥
पात्रीकृतात्मा गुरुसेवनेन
स्पष्टाकृतिः पत्त्ररथेन्द्रकेतोः।
तं पुत्त्रिणां पुष्करपत्त्रनेत्रः
पुत्त्रः समारोपयदग्रसङ्ख्याम् ॥३०॥
वंशस्थितिं वंशकरेण तेन
सम्भाव्य भावी स सखा मघोनः।

खराविव्यमरः। सुप्रजसि सत्सन्तानवति। नित्यमसिच् प्रजामेधयो-रित्यसिच् प्रत्ययः। तस्मिन् प्रजेशे क्षितीशे शासनाङ्कां शासनचिह्नां महीं विपीडं निर्बाधं यथा तथा सम्यक् शासति सति आनन्दजलावि-लाक्ष्यः आनन्दवाष्पाकुलनेत्राः प्रजाश्चिरं ननन्दुः ॥ २९ ॥

पात्रीकृतेति। गुरुसेवनेन पित्रादिशुश्रूषया पात्रीकृतात्मा। योग्यभाजनयोः पात्रमित्यमरः। पत्त्ररथेन्द्रकेतोर्गरुड़ध्वजस्य स्पष्टा-कृतिः स्पष्टवपुः तत्सरूपइत्यर्थः। आकृतिः कथिता रूपे सामान्य वपु-षोरपीति विश्वः। पुष्करपत्त्रनेत्रः पद्मदलाक्षः पुत्त्रः पुत्त्राख्यो राजा, यद्वा पुत्त्रशब्द आवर्त्तनीय. पुत्त्र. पुत्त्राख्य. पुत्त्रः सुतः, तं क्षितिपं पुत्त्रिणाम् अग्रसंख्यां समारोपयत् अग्रगण्यं चक्रे इत्यर्थः ॥ ३० ॥

वंशेति। स्पृश्यन्ते इति स्पर्शाः विषयाः तेभ्यो निवृत्तलौल्यः निवृ-त्ततृष्णः अतएव मघोनः इन्द्रस्य सखा मित्रं भावी भविष्यन् स्वर्गं

उपस्पृशन् स्पर्शनिवृत्तलौल्य-
स्त्रिपुष्करेषु त्रिदशत्वमाप ॥३१॥

तस्य प्रभानिर्जितपुष्परागं
पौष्यां तिथौ पुष्यमसूत पत्नी ।
तस्मिन्नपुष्यन्नुदिते समग्रां
पुष्टिं जनाः पुष्य इव द्वितीये ॥३२॥

महीं महेच्छः परिकीर्य सूनौ
मनीषिणे जैमिनयेऽर्पितात्मा*।
तस्मात् सयोगादधिगम्य योगम्
अजन्मनेऽकल्पत जन्मभीरुः ॥३३॥

जिगमिषुरित्यर्थः स वज्रिणो वंशकरेण वंशप्रवर्तकेन तेन पुत्रेण संग- [illegible] समाप्य तस्मात् त्रिषु पुष्करेषु तीर्थविशेषेषु । त्रिपुष्करेषु संज्ञायामिति समासः । उपस्पृशन् स्नानं कुर्वन् त्रिदशत्वं देवभूयमाप ॥ ३१ ॥

तस्येति । तस्य पुत्रस्य पत्नी पौष्यां पुष्यनक्षत्रयुक्तायां पौर्णमास्यां तिथौ । पुष्येण युक्ता पौर्णमासी पौषीत्यण् । नक्षत्रेण युक्तः काल इत्यण् प्रत्ययः टिड्ढाणञिति ङीप् । प्रभया निर्जितः पुष्परागो मणिविशेषो येन तं पुत्रं पुष्याख्यम् असूत । द्वितीये पुष्ये पुष्यनक्षत्र इव तस्मिन्नुदिते सति जनाः समग्रां पुष्टिं वृद्धिम् अपुष्यन् ॥ ३२ ॥

महीमिति । महेच्छो महाशयः । महेच्छस्तु महाशय इत्यमरः । [illegible] सूनौ पुत्रे महीं परिकीर्य निक्षिप्य मनीषिणे [illegible] जैमिनये अर्पितात्मा [illegible]

ततःपरं तत्प्रभवः प्रपेदे
ध्रुवोपमेयो ध्रुवसन्धिरुर्वीम् ।
यस्मिन्नभूज्ज्यायसि सत्यसन्धे
सन्धिर्ध्रुवः सन्नमतामरीणाम् ॥३४॥

सुते शिशावेव सुदर्शनाख्ये
दर्शात्ययेन्दुप्रियदर्शने सः ।
मृगायताक्षो मृगयाविहारी
सिंहादवापद्विपदं नृसिंहः ॥३५॥

स्वर्गामिनस्तस्य तमैकमत्यात्
अमात्यवर्गः कुलतन्तुमेकम् ।

स योगाद्योगिनः तस्मात् जैमिने योगं योगविद्यामधिगम्य अजन्मने जन्मनिवृत्तये मोक्षाय अकल्पत समपद्यत । क्लृपेः सम्पद्यमाने चतुर्थी वक्तव्या । मुक्त इत्यर्थः ॥ ३३ ॥

तत इति । ततः परं, स पुष्यः प्रभवः कारणं यस्य स तत्प्रभवः तदात्मज इत्यर्थः ध्रुवेणौत्तानपादिना उपमेयः । ध्रुव औत्तानपादिः स्यादित्यमरः । ध्रुवसन्धिः उर्वीं प्रपेदे । ज्यायसि श्रेष्ठे सत्यसन्धे सत्यप्रतिज्ञे यस्मिन् प्रवत्स्यौ सन्नमतामनुद्धतानामित्यर्थः अरीणां सन्धिः ध्रुवः स्थिरोऽभूत् । ततः सार्थकनामेत्यर्थः ॥३४॥

सुते इति । मृगायताक्षो नृसिंहः पुरुषश्रेष्ठः स ध्रुवसन्धिः दर्शात्ययेन्दुप्रियदर्शने प्रतिपच्चन्द्रनिभे सुदर्शनाख्ये सुते शिशौ सत्येव मृगयाविहारी सन् सिंहात् विपदं मरणमवापत् । व्यसनासक्तिरनर्थ वहेति भावः ॥ ३५ ॥

स्वरिति । स्वर्गामिनः स्वर्यातस्य तस्य ध्रुवसन्धेः अमात्यवर्गः

अनाथदीनाः प्रकृतीरवेक्ष्य
साकेतनाथं विधिवच्चकार ॥३६॥

नवेन्दुना तन्नभसोपमेयं
शावैकसिंहेन च काननेन।
रघोः कुलं कुड्मलपुष्करेण
तोयेन चाप्रौढनरेन्द्रमासीत् ॥३७॥

लोकेन भावी पितुरेव तुल्यः
सम्भावितो मौलिपरिग्रहात् सः।
दृष्टो हि वृण्वन् कलभप्रमाणो-
ऽप्याशाः पुरोवातमवाप्य मेघः ॥३८॥

अनाथाः नाथहीनाः अतएव दीनाः [illegible] प्रकृतीः प्रजाः [illegible] एकम् [illegible] विधि-वत् साकेतनाथम् अयोध्याधीश्वरं चकार । ३६ ।

नवेति । अप्रौढनरेन्द्रं [illegible] रघोः कुलं नवेन्दुना [illegible] नभसा [illegible] । [illegible] काननेन च, [illegible] तोयेन च उपमेयम् आसीत् । [illegible] । ३७ ।

लोकेनेति । स बालो मौलिपरिग्रहात् [illegible] लोकेन [illegible] भावी [illegible] । [illegible] । ३८ ।

ततःपरं तत्प्रभवः प्रपेदे
ध्रुवोपमेयो ध्रुवसन्धिरुर्वीम् ।
यस्मिन्नभूज्ज्यायसि सत्यसन्धे
सन्धिर्ध्रुवः सन्नमतामरीणाम् ॥३४॥
सुते शिशावेव सुदर्शनाख्ये
दर्शात्ययेन्दुप्रियदर्शने सः ।
मृगायताक्षो मृगयाविहारी
सिंहादवापद्विपदं नृसिंहः ॥३५॥
स्वर्गामिनस्तस्य तमैकमत्यात्
अमात्यवर्गः कुलतन्तुमेकम् ।

संयोगाद्योगिनः तस्मात् जैमिने र्योगं योगविद्यामधिगम्य अजन्मने जन्मनिवृत्तये मोक्षाय अकल्पत समपद्यत । क्लृपेः सम्पद्यमाने चतुर्थी वक्तव्या । मुक्तइत्यर्थः ॥ ३३ ॥

ततइति । ततः परं, स पुष्यः प्रभवः कारणं यस्य स तत्प्रभवः तदात्मजइत्यर्थः ध्रुवेणौत्तानपादिना उपमेयः । ध्रुव औत्तानपादिः स्यादित्यमरः । ध्रुवसन्धिः उर्वीं प्रपेदे । ज्यायसि श्रेष्ठे सत्यसन्धे सत्यप्रतिज्ञे यस्मिन् प्रवसन्धौ सन्नमतामनुद्धतानामित्यर्थः अरीणां सन्धिः ध्रुवः स्थिरोऽभूत् । ततः सार्थकनामेत्यर्थः ॥३४॥

सुते इति । मृगायताक्षो नृसिंहः पुरुषश्रेष्ठः स ध्रुवसन्धिः दर्शात्ययेन्दुप्रियदर्शने प्रतिपच्चन्द्रनिभे सुदर्शनाख्ये सुते शिशौ सत्येव मृगयाविहारी सन् सिंहात् विपदं मरणमवापत् । व्यसनासक्तिरनर्थवहेति भावः ॥ ३५ ॥

स्वरिति । स्वर्गामिनः स्वर्यातस्य तस्य ध्रुवसन्धेः अमात्यवर्गः

अनाथदीनाः प्रकृतीरवेक्ष्य
साकेतनाथं विधिवच्चकार ॥३६॥

नवेन्दुना तन्नभसोपमेयं
शावैकसिंहेन च काननेन ।
रघोः कुलं कुड्मलपुष्करेण
तोयेन चाप्रौढनरेन्द्रमासीत् ॥३७॥

लोकेन भावी पितुरेव तुल्यः
सम्भावितो मौलिपरिग्रहात् सः ।
दृष्टो हि वृण्वन् कलभप्रमाणो-
ऽप्याशाः पुरोवातमवाप्य मेघः ॥३८॥

[illegible] । ३६ ।

[illegible] । ३७ ।

[illegible] । ३८ ।

तं राजवीथ्यामधिहस्ति यान्तम्
आधोरणालम्बितमग्र्यवेशम्।
षड्वर्षदेशीयमपि प्रभुत्वात्
प्रैक्षन्त पौराः पितृगौरवेण ॥३९॥

कामं न सोऽकल्पत पैतृकस्य
सिंहासनस्य प्रतिपूरणाय।
तेजोमहिम्ना पुनरावृतात्मा
तद्व्याप चामीकरपिञ्जरेण ॥४०॥

तस्मादधः किञ्चिदिवावतीर्णा-
वसंस्पृशन्तौ तपनीयपीठम्।

तमिति। राजवीथ्यां राजमार्गे अधिहस्ति हस्तिनि। विभक्त्यर्थेऽव्ययीभावः। यान्तं गच्छन्तं हस्तिनमारुह्य गच्छन्तमित्यर्थः आधोरणालम्बितं शिशुत्वात् सादिना गृहीतम् अग्र्यवेशम् उदारनेपथ्यं षड्वर्षाणि भूतः षड्वर्षः। तद्धितार्थेति समासः। तमधीष्टोभृतो भूतोभावीत्यधिकारे चित्तवति नित्यमिति तद्धितस्य लुक्। ईषदसमाप्तः षड्वर्षः षड्वर्षदेशीयः। ईषदसमाप्तावित्यादिना देशीय प्रत्ययः। तं षड्वर्षदेशीयमपि बालमपि तं सुदर्शनं पौराः प्रभुत्वात् पितृगौरवेण प्रैक्षन्त पितरि यादृग्गौरवं तादृशेनैव ददृशुरित्यर्थः ॥ ३९ ॥

काममिति। स सुदर्शनः पैतृकस्य सिंहासनस्य कामं सम्यक् प्रतिपूरणाय नाकल्पत बालत्वाद्व्याप्तुं न पर्याप्तइत्यर्थः। चामीकर पिञ्जरेण कनकगौरेण तेजोमहिम्ना पुनः तेजःसम्पदा तु आवृतात्मा विस्तारितदेहः सन् तत् सिंहासनं व्याप व्याप्तवान् ॥ ४० ॥

तस्मादिति। तस्मात् सिंहासनादपादानादधः अधोदेशं प्रति

सालक्तकौ भूपतयः प्रसिद्धैः
ववन्दिरे मौलिभिरस्य पादौ ॥४१॥

मणौ महानील इति प्रभावात्
अल्पप्रमाणेऽपि यथा न मिथ्या।
शब्दो महाराज इति प्रतीतः
तथैव तस्मिन् युयुजेऽर्भकेऽपि ॥४२॥

पर्य्यन्तसञ्चारितचामरस्य
कपोललोलोभयकाकपक्षात्।
तस्याननादुच्चरितो विवादः
चस्खाल वेलास्वपि नार्णवानाम् ॥४३॥

किञ्चिदिदानतीतौ ईषल्लम्बौ तपनीयपीठं काञ्चनपीठम् असंस्पृशन्तौ एतत्कलात् व्याप्तौ सालक्तकौ लाक्षारसाविभक्तौ अस्य सुदर्शनस्य पादौ भूपतयः प्रसिद्धैः उज्ज्वलैः मौलिभिः मुकुटैः ववन्दिरे प्रणेमुः ॥ ४१ ॥

मणाविति। अल्पप्रमाणेऽपि मणौ इन्द्रनीले प्रभावात् तेजिष्ठत्वाद्धेतोः महानील इति शब्दो यथा मिथ्या निरर्थको न तथैव अर्भके शिशावपि तस्मिन् सुदर्शने प्रतीतः प्रसिद्धो महाराज इति शब्दो न मिथ्या युयुजे ॥ ४२ ॥

पर्य्यन्तेति। पर्य्यन्तयोः पार्श्वयोः सञ्चारिते चामरे यस्य तस्य बालस्य सुदर्शनस्य कपोलयोः लोलौ उभयकाकपक्षौ यस्य तस्मादाननादुच्चरितो विवादो वचनम् अर्णवानां वेलास्वपि न चस्खाल [illegible] तस्मात् [illegible]। [illegible]

निर्घृष्टजाम्बूनदपट्टशोभे
न्यस्तं ललाटे तिलकं दधानः।
तेनैव शून्यान्यरिसुन्दरीणां
मुखानि स स्मेरमुखश्चकार ॥४४॥
शिरीषपुष्पाधिकसौकुमार्य्यः
खेदं स यायादपि भूषणेन।
नितान्तगुर्वीमपि सोऽनुभावात्
धुरं धरित्र्या बिभराम्बभूव ॥४५॥
न्यस्ताक्षरामक्षरभूमिकायां
कार्त्स्न्येन गृह्णाति लिपिं न यावत्।

ध्वनिः। उभयकाकपच्चादित्यत्र वृत्तिविषये उभयपुत्र इतिवदुभशब्द-स्थाने उभयशब्दप्रयोग इत्युक्तं प्राक् ॥ ४३ ॥

निर्घृष्टेति। निर्घृष्टा जाम्बूनदपट्टशोभा यस्य तस्मिन् हृतकनक पट्टबन्धे ललाटे न्यस्तं तिलकं दधानः स्मेरमुखः स्मितमुखः स राजा अ-रिसुन्दरीणां मुखानि तेनैव तिलकेनैव शून्यानि चकार। अखिलमपि शत्रुवर्गमवधीदिति भावः ॥ ४४ ॥

शिरीषेति। शिरीषपुष्पाधिकसौकुमार्य्यः कोमलाङ्ग इत्यर्थः अत-एव स राजा भूषणेनापि खेदं श्रमं यायात् गच्छेत्, एवंभूतः स नितान्तगुर्वीमपि धरित्र्याः धुरं भुवो भारम् अनुभावात् सामर्थ्यात् बिभराम्बभूव बभार। भीह्रीभृहुवां श्लुवच्चेति विकल्पादाम् प्रत्ययः ॥ ४५ ॥

न्यस्तेति। अक्षरभूमिकायाम् अक्षरलेखनस्थले न्यस्ताक्षरां रचि-

सर्वाणि तावत् श्रुतवृद्धयोगात्
फलान्युपायुङ्क्त स दण्डनीतेः ॥४६॥

* उरस्यपर्य्याप्तनिवेशभागा
प्रौढीभविष्यन्तमुदीक्षमाणा।
सञ्जातलज्जेव तमातपत्र-
च्छायाच्छलेनोपजुगूह लक्ष्मीः ॥४७॥

अनश्नुवानेन युगोपमानम्
अबद्धमौर्व्वीकिणलाञ्छनेन।

तावदपत्यजिरेयान्यासां लिपिं यद्यागच्छति तमिमां मातृकां मातृकेन यावद्व्यञ्जनानि स सुदर्शनस्तावत् श्रुतवृद्धयोगात् विद्या वृद्धसंसर्गात् सर्वाणि दण्डनीतेर्दण्डशास्त्रस्य फलानि उपायुङ्क्त अन्वभूत्। यानि वृद्धजनस्य तस्य मन्त्रादभ्यस्यमानं शास्त्रं [illegible] ॥ ४६ ॥

उरसीति। उरसि अपर्याप्तो निवेशभागो निवासावकाशो यस्याः सा अतएव प्रौढीभविष्यन्तं वर्द्धिष्यमाणम् उदीक्षमाणा प्रौढं वपुस्तावत् प्रतीक्षमाणेति [illegible] लक्ष्मीः सञ्जातलज्जेव [illegible] सुदर्शनं तं सुदर्शनम् आतपत्रच्छायाच्छलेन उपजुगूह आलिलिङ्ग। छत्रच्छाया लक्ष्मीरूपेति प्रसिद्धिः। प्रौढाङ्गनायाः प्रौढपुरुष[illegible] [illegible] ॥ ४७ ॥

अनश्नुवानेनेति। युगोपमानं युगसदृशत्वम् अनश्नुवानेन अप्राप्नुवता [illegible]

असृष्टखड्गत्सरुणापि चासीत्
रक्षावती तस्य भुजेन भूमिः ॥४८॥
न केवलं गच्छति तस्य काले
ययुः शरीरावयवा विवृद्धिम्।
वंश्या गुणाः खल्वपि लोककान्ताः
प्रारम्भसूक्ष्माः प्रथिमानमापुः ॥४९॥
स पूर्व्वजन्मान्तरदृष्टपाराः
स्मरन्निवाक्लेशकरो गुरूणाम्।
तिस्रस्त्रिवर्गाधिगमस्य मूलं
जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥५०॥

विधेनापि च तस्य सुदर्शनस्य भुजेन भूमिः रक्षावती आसीत्। शिशोऽपि तस्य तेजस्तादृगित्यर्थः ॥ ४८ ॥

नेति। काले गच्छति सति तस्य केवलं शरीरावयवाएव विवृद्धिं प्रसारं न ययुः, किन्तु वंशे भवाः वंश्याः लोककान्ता जनप्रियाः प्रारम्भे आदौ सूक्ष्माः तस्य गुणाः शौर्य्यौदार्य्यादयोऽपि प्रथिमानं पृथुत्वमापुः खलु ॥ ४९ ॥

स इति। स सुदर्शनः पूर्व्वस्मिन् जन्मान्तरे जन्मविशेषेदृष्टपाराः स्मरन्निव गुरूणामक्लेशकरः सन् त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः तस्य अधिगमस्य प्राप्तेर्मूलं तिस्रो विद्याः त्रयीवार्त्तादण्डनीतीः पित्र्याः पितृसम्बन्धिनीः प्रकृतीः प्रजाश्च जग्राह स्वायत्तीचकार। अत्र कौटिल्यः। धर्माधर्मौ त्रय्याम् अर्थानर्थौ वार्त्तायां नयानयौ दण्डनीत्यामिति। अत्र दण्डनीति र्नयद्वारा काममूलमिति द्रष्टव्यम्। आन्वीक्षिक्या अनुपादानं त्रय्यन्तर्भावमभ्युपेत्य। यथाह कामन्दकः

व्यूह्य स्थितः किञ्चिदिवोत्तरार्द्धम्
उन्नद्धचूडोऽञ्चितसव्यजानुः ।
आकर्णमाकृष्टसबाणधन्वा
व्यरोचतास्त्रेषु विनीयमानः ॥५१॥

*अथ मधु वनितानां नेत्रनिर्वेशनीयं
मनसिजतरुपुष्पं रागबन्धप्रवालम् ।
अकृतकविधि सर्वाङ्गीनमाकल्पजातं
विलसितपदमाद्यं यौवनं स प्रपेदे ॥५२॥

[illegible] ॥ ५० ॥

[illegible] । ५१ ।

[illegible] । ५२ ।

* प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः।
अधिविविदुरमात्यैराहृता स्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः॥५३॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
वंशानुक्रमो नाम अष्टादशः सर्गः।

प्रतिकृतीति। दूतिभिः कन्यापरीक्षणार्थं प्रेषिताभिः सन्दर्शिताभ्यो दूतिसन्दर्शिताभ्यः प्रतिकृतीनां तूलिकादिलिखितकन्याप्रतिमानां रचनाभ्यो विन्यासेभ्यः। पञ्चमी विभक्ते इति पञ्चमी। समधिकतररूपाः चित्रनिर्म्माणादपि रमणीयनिर्म्माणा इत्यर्थः शुद्धसन्तानकामैरमात्यैराहृता आनीताः राजकन्या. यूनस्तस्य सुदर्शनस्य सम्बन्धिन्यौ प्रथमपरिगृहीते श्रीभुवौ श्रीश्च भूश्च ते अधिविविदुः अधिविन्ने चक्रुः आत्मना सपत्नीभावं चक्रुरित्यर्थः। कृतसापत्निकाध्यूढाधिविन्नेत्यमरः॥ ५३॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायाम्
अष्टादशः सर्गः।



एकोनविंशः सर्गः ।



अग्निवर्णमभिषिच्य राघवः
स्वे पदे तनयमग्नितेजसम् ।
शिश्रिये श्रुतवतामपश्चिमः
पश्चिमे वयसि नैमिषं वशी ॥१॥

तत्र तीर्थसलिलेन दीर्घिका-
स्तल्पमन्तरितभूमिभिः कुशैः ।
सौधवासमुटजेन विस्मृतः
संचिकाय फलनिःस्पृहस्तपः ॥२॥

[illegible] ।
[illegible] ।

अग्निवर्णमिति । [illegible]

तत्रेति । तत्र [illegible] दीर्घिका [illegible]

लब्धपालनविधौ न तत्सुतः
खेदमाप गुरुणा हि मेदिनी।
भोक्तुमेव भुजनिर्जितद्विषा
न प्रसाधयितुमस्य कल्पिता ॥३॥
सोऽधिकारमभिकः कुलोचितं
काश्चन स्वयमवर्त्तयत् समाः।
सन्निवेश्य सचिवेष्वतःपरं
स्त्रीविधेयनवयौवनोऽभवत् ॥४॥
कामिनीसहचरस्य कामिन-
स्तस्य वेश्मसु मृदङ्गनादिषु।

लब्धेति। तत्सुतः सुदर्शनपुत्रोऽग्निवर्णः लब्धपालनविधौ लब्धस्य राज्यस्य पालनकर्मणि खेदं नाप अक्लेशेनापालयदित्यर्थः। कुतः, हि यस्मात् भुजनिर्जितद्विषा गुरुणा पित्रा मेदिनी अस्याग्निवर्णस्य भोक्तुमेव कल्पिता प्रसाधयितुं न। प्रसाधनं कण्टकशोधनम्, अलङ्कृतिर्ध्वन्यते। तथाच, यथालङ्कृत्य नीता युवतिः केवलमुपभुज्यते तद्वदिति भावः ॥ ३ ॥

स इति। अभिकः कामुकः। अनुकाभिकाभीकः कमितेति निपातः। कम्रः कामयिताभीकः कमनः कामनोऽभिकइत्यमरः। सोऽग्निवर्णः कुलोचितमधिकारं प्रजापालनं काश्चन समाः कतिचिद्वत्सरान् स्वयमवर्त्तयत् अकरोत्। अतःपरं सचिवेषु सन्निवेश्य निधाय स्त्रीविधेय स्त्र्यधीनं वनं यौवनं यस्य सोऽभवत् स्त्र्यासक्तोऽभूदित्यर्थः ॥४॥

कामिनीति। कामिनीसहचरस्य कामिनस्तस्य मृदङ्गनादिषु मृद-

ऋद्धिमन्तमधिकर्द्धिरुत्तरः
पूर्व्वमुत्सवमपोहदुत्सवः ॥५॥

इन्द्रियार्थपरिशून्यमक्षमः
सोढुमेकमपि स क्षणान्तरम् ।
अन्तरेव विहरन् दिवानिशं
न व्यपैक्षत समुत्सुकाः प्रजाः ॥६॥

गौरवाद्यदपि जातु मन्त्रिणां
दर्शनं प्रकृतिकाङ्क्षितं ददौ ।
तद्गवाक्षविवरावलम्बिना
केवलेन चरणेन कल्पितम् ॥७॥

[illegible] ॥ ५ ॥

इन्द्रियेति । [illegible] ॥ ६ ॥

गौरवादिति । [illegible] ॥ ७ ॥

तदिति । [illegible]

तं कृतप्रणतयोऽनुजीविनः
कोमलात्मनखरागरूषितम् ।
भेजिरे नवदिवाकरातप-
स्पृष्टपङ्कजतुलाधिरोहणम् ॥८॥

* यौवनोन्नतविलासिनीस्तन-
क्षोभलोलकमलाश्च दीर्घिकाः ।
गूढमोहनगृहास्तदम्बुभिः
स व्यगाहत विगाढमन्मथः ॥९॥

* तत्र सेकहृतलोचनाञ्जनैः
धौतरागपरिपाटलाधरैः ।
अङ्गनास्तमधिकं व्यलोभयन्
अर्पितप्रकृतकान्तिभिर्मुखैः ॥१०॥

रूषितम् अतएव नवदिवाकरातपेन स्पृष्टं व्याप्तं यत्पङ्कजं तस्य तुलां साम्यमधिरोहतीति तुलाधिरोहणं तं चरणम् अनुजीविनः कृतप्रणतयः कृतनमस्काराः सन्तो भेजिरे सिषेविरे ॥ ८ ॥

यौवनेति । विगाढमन्मथः प्रौढमदनः सोऽग्निवर्णः यौवनेन हेतुना उन्नतानां विलासिनीस्तनानां क्षोभेणाघातेन लोलानि चञ्चलानि कमलानि यासां ताः तदम्बुभिः तासां दीर्घिकाणामम्बुभिः गूढान्यन्तरितानि मोहनगृहाणि सुरतभवनानि यासु ताश्च दीर्घिकाः व्यगाहत । स्त्रीभिः सह दीर्घिकासु विजहारेत्यर्थः ॥ ९ ॥

तत्रेति । तत्र दीर्घिकासु अङ्गनाः सेकेन हृतं लोचनाञ्जनं नेत्र

* घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः ।
अभ्यपद्यत स वासितासखः
पुष्पिताः कमलिनीरिव द्विपः ॥११॥

* सातिरेकमदकारणं रहः
तेन दत्तमभिलेषुरङ्गनाः ।
ताभिरप्युपहृतं मुखासवं
सोऽपिबद्बकुलतुल्यदोहदः ॥१२॥

कज्जलं येषां तैः रज्यतेऽनेनेति रागः रागद्रव्यं लाक्षादि रागस्य परिपाटलोऽङ्गगुणः। गुणे शुक्लादयः पुंसीत्यमरः। धौतो रागपरिपाटलो येषां ते तथोक्ता अधरा येषां तैः निवृत्तसाङ्क्रमिकरागैरित्यर्थः अतएव अर्पितप्रकृतकान्तिभिरभिव्यञ्जितस्वाभाविकरागैरित्यर्थः एवंभूतै मुंखैः तमग्निवर्णम् अधिकं व्यलोभयन् प्रलोभितवत्यः ॥ १० ॥

घ्राणेति । प्रियासखः सोऽग्निवर्णः घ्राणकान्तेन घ्राणतर्पणेन मधुगन्धेन कर्षिणीः मनोहारिणीः रच्यन्त इति रचनाः पानभूमय एव रचनाः रचिताः पानभूमय इत्यर्थः, वासितासखः करिणीसहचरः। वासिता स्त्रीकरिण्योश्चेत्यमरः। द्विपः पुष्पिताः कमलिनीरिव, अभ्यपद्यत अभिगतः ॥ ११ ॥

सातिरेकेति। अङ्गनाः रहो रहसि सातिरेकस्य सातिशयस्य मदस्य कारणं तेनाग्निवर्णेन दत्तं मुखासवम् अभिलेषुः, बकुलेन तुल्य दोहदस्तुल्याभिलाषः। अथ दोहदम् इच्छाकाङ्क्षा स्पृहेहा तृड्-

तं कृतप्रणतयोऽनुजीविनः
कोमलात्मनखरागरूषितम् ।
भेजिरे नवदिवाकरातप-
स्पृष्टपङ्कजतुलाधिरोहणम् ॥८॥

* यौवनोन्नतविलासिनीस्तन-
क्षोभलोलकमलाश्च दीर्घिकाः ।
गूढमोहनगृहास्तदम्बुभिः
स व्यगाहत विगाढमन्मथः ॥९॥

* तत्र सेकहृतलोचनाञ्जनैः
धौतरागपरिपाटलाधरैः ।
अङ्गनास्तमधिकं व्यलोभयन्
अर्पितप्रकृतकान्तिभिर्मुखैः ॥१०॥

छुरितम् अतएव नवदिवाकरातपेन स्पृष्टं व्याप्तं यत्पङ्कजं तस्य तुलां साम्यमधिरोहतीति तुलाधिरोहणं तं चरणम् अनुजीविनः कृतप्रणतयः कृतनमस्काराः सन्तो भेजिरे सिषेविरे ॥ ८ ॥

यौवनेति । विगाढमन्मथः प्रौढमदनः सोऽग्निवर्णः यौवनेन हेतुना उन्नतानां विलासिनीस्तनानां क्षोभेणाघातेन लोलानि चञ्चलानि कमलानि यासां ताः तदम्बुभिः तासां दीर्घिकाणामम्बुभिः गूढान्यन्तरितानि मोहनगृहाणि सुरतभवनानि यासु ताश्च दीर्घिकाः व्यगाहत । स्त्रीभिः सह दीर्घिकासु विजहारेत्यर्थः ॥ ९ ॥

तत्रेति । तत्र दीर्घिकासु अङ्गनाः सेकेन हृतं लोचनाञ्जनं नेत्र

* घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः।
अभ्यपद्यत स वासितासखः
पुष्पिताः कमलिनीरिव द्विपः ॥११॥

* सातिरेकमदकारणं रहः
तेन दत्तमभिलेषुरङ्गनाः।
ताभिरप्युपहृतं मुखासवं
सोऽपिबद्बकुलतुल्यदोहदः॥१२॥

कज्जलं येषां तैः रज्यतेऽनेनेति रागः रागद्रव्यं लाक्षादि रागस्य परिपाटलोऽङ्गगुणः। गुणे शुक्लादयः पुंसीत्यमरः। धौतो रागपरिपाटलो येषां ते तथोक्ता अधरा येषां तैः निवृत्तराङ्क्रमिकरागैरित्यर्थः अतएव अर्पितप्रकृतकान्तिभिरभिव्यञ्जितस्वाभाविकरागैरित्यर्थः एवंभूतैः मुखैः तमग्निवर्णम् अधिकं व्यलोभयन् प्रलोभितवत्यः ॥ १० ॥

घ्राणेति। प्रियासखः सोऽग्निवर्णः घ्राणकान्तेन घ्राणतर्पणेन मधुगन्धेन कर्षिणीः मनोहारिणीः रच्यन्तइति रचनाः पानभूमयएव रचनाः रचिताः पानभूमयइत्यर्थः, वासितासखः करिणीसहचरः। वासिता स्त्रीकरिण्योश्चेत्यमरः। द्विपः पुष्पिताः कमलिनीरिव, अभ्यपद्यत अभिगतः ॥ ११ ॥

सातिरेकेति। अङ्गनाः रहो रहसि सातिरेकस्य सातिशयस्य मदस्य कारणं तेनाग्निवर्णेन दत्तं मुखासवम् अभिलेषुः, बकुलेन तुल्य दोहदस्तुल्याभिलाषः। अथ दोहदम् इच्छाकाङ्क्षा स्पृहेहा तृड्-

* अङ्कमङ्कपरिवर्त्तनोचिते
तस्य निन्यतुरशून्यतामुभे ।
वल्लकी च हृदयङ्गमस्वना
वल्गुवागपि च वामलोचना ॥१३॥

* स स्वयं प्रहतपुष्करः कृती
लोलमाल्यवलयो हरन्मनः ।
नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥१४॥

त्यमरः । वकुलद्रुमस्याङ्गनामद्यार्थित्वात्तुल्याभिलाषत्वम् । सोऽपि ताभिरङ्गनाभिरुपहृतं दत्तं मुखासवमपिबत् ॥ १२ ॥

अङ्कमिति । अङ्कपरिवर्त्तनोचिते उत्सङ्गविहारार्हे उभे तस्याग्निवर्णस्य अङ्कम् अशून्यतां पूर्णतां निन्यतुः । के उभे, हृदयङ्गमस्वना मनोहरध्वनि वल्लकी वीणा च वल्गुवाक् मधुरभाषिणी वामलोचना कामिन्यपि च । हृदयं गच्छतीति हृदयङ्गमः सुप्युपसंख्यानात् खच् प्रत्ययः । अङ्काधिरोपितयो र्वीणावामाक्ष्योर्वाद्यगीताभ्यामरंस्तेत्यर्थः ॥ १३ ॥

स इति । कृती कुशलः स्वयं प्रहतपुष्करः वादितवाद्यमुखः लोलानि माल्यानि वलयानि च यस्य स तथोक्तः मनो हरन् नर्त्तकीनामिति शेषः सोऽग्निवर्णः अभिनयातिलङ्घिनीः अभिनयेषु स्खलन्तीरित्यर्थः नर्त्तकीर्विलासिनीः । शिल्पिनि ष्वुन् इति ष्वुन् प्रत्ययः । षिद्गौरादिभ्यश्चेति ङीष् । नर्त्तकीलासिके समे इत्यमरः । गुरुषु नाट्याचार्य्येषु पार्श्ववर्त्तिषु समीपस्थेषु सत्स्वेव अलज्जयत् लज्जामगमयत् ॥ १४ ॥

* चारु नृत्यविगमे च तन्मुखं
स्वेदभिन्नतिलकं परिश्रमात् ।
प्रेमदत्तवदनानिलः पिबन्
अत्यजीवदमरालकेश्वरौ ॥१५॥

* तस्य सावरणदृष्टसन्धयः
काम्यवस्तुषु नवेषु सङ्गिनः ।
वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषयाः समागमाः ॥१६॥

चार्विति। किञ्च, चारु सुन्दरं नृत्यविगमे लास्यावसाने परिश्रमान्नर्त्तनप्रयासात् स्वेदेन भिन्नतिलकं विशीर्णतिलकं तन्मुखं नर्त्तकीमुखं प्रेम्णा दत्तवदनानिलः प्रवर्त्तितमुखमारुतः पिबन् अमराणामलकायाश्च ईश्वरौ इन्द्रकुवेरौ अत्यजीवत् अतिक्रम्याजीवत् ततोऽप्युत्कृष्ट जीवित आसीदित्यर्थः। इन्द्रादेरपि दुर्लभमीदृशं सौभाग्यमिति भावः ॥ १५ ॥

तस्येति। उपसृत्य अन्यत्र गत्वा नवेषु नूतनेषु काम्यवस्तुषु शब्दादिष्विन्द्रियार्थेषु सङ्गिन आसक्तिमतः सतस्तस्य सावरणाः प्रच्छन्नाः दृष्टाः प्रकाशाश्च सन्धयः साधनानि येषु ते समागमाः सङ्गमाः वल्लभाभिः प्रेयसीभिः सामिभुक्तविषयाः अर्द्धोपभुक्तेन्द्रियार्थाश्चक्रिरे। यथेदं भुक्तश्चेत्तर्हि अयं निस्पृहः सन् अस्मत्समीपं नायास्यतीति भावः। अत्र गोनर्द्दीयः सन्धिर्द्विविधः सावरणः प्रकाशश्च। सावरणो भिक्षुकादिना प्रकाशः स्वयमुपेत्येति। इतः स्वयमुपसृत्य विशेषार्थं तत्र स्थितोऽनुपजाप स्वयं सन्धेयइति वात्स्यायनः। अन्यत्र गतं कथ-

* अङ्गुलीकिसलयाग्रतर्जनं
भ्रूविभङ्गकुटिलञ्च वीक्षितम् ।
मेखलाभिरसकृच्च बन्धनं
वञ्चयन् प्रणयिनीरवाप सः ॥१७॥

* तेन दूतिविदितं निषेदुषा
पृष्ठतः सुरतवाररात्रिषु ।
शुश्रुवे प्रियजनस्य कातरं
विप्रलम्भपरिशङ्किनो वचः ॥१८॥

* लौल्यमेत्य गृहिणीपरिग्रहा-
न्नर्तकीष्वसुलभासु तद्वपुः ।

च्छिद्रत्वाद पुनरनुपगतावाहौपमयोगेन अनिष्टत्वहेतुः चक्षुरिन्द्रियैः ॥ १६ ॥

अङ्गुलीति । सोऽग्निवर्णः प्रणयिनीः प्रेयसीः वञ्चयन् अन्यत्र गच्छन् अङ्गुल्यः किसलयानि तेषामग्राणि तैस्तर्जनं भर्त्सनं भ्रूविभङ्गेन भ्रूभेदेन कुटिलं वक्रं वीक्षितं मेखलाभिर्बन्धनञ्च अवाप । अपराधिनो दण्ड्याः इति भावः ॥ १७ ॥

तेनेति । सुरतस्य वारो वासरः तस्य रात्रिषु दूतीनां विदितं यथा तथा पृष्ठतः प्रियजनस्य पश्चाद्भागे निषेदुषा तेनाग्निवर्णेन विप्रलम्भपरिशङ्किनो विरहशङ्किनः प्रियश्चासौ जनश्च प्रियजनः तस्य कातरं वचः प्रियागमनेन मां यापयिष्यतीत्यादि दीनवचनं शुश्रुवे ॥ १८ ॥

लौल्यमिति । यक्षिणीपरिग्रहाद् राज्ञीभिः स्वकीयत्वाद्धेतोः नर्तकीषु वेश्यासु असुलभासु दुर्लभासु सतीषु लौल्यमौत्सुक्यमेत्य प्राप्य

वर्त्तते स्म स कथञ्चिदालिख-
न्नङ्गुलीक्षरणसन्नवर्त्तिकः ॥१६॥

* प्रेमगर्व्वितविपक्षमत्सरा-
दायताच्च मदनान्महीक्षितम्।
निन्युरुत्सवविधिच्छलेन तं
देव्य उज्झितरुषः कृतार्थताम् ॥२०॥

* प्रातरेत्य परिभोगशोभिना
दर्शनेन कृतखण्डनव्यथाः।
प्राञ्जलिः प्रणयिनीः प्रसादयन्
सोऽदुनोत् प्रणयमन्थरः पुनः ॥२१॥

अङ्गुल्योः क्षरणेन स्वेदनेन सन्नवर्त्तिको विगलितशलाकः सोऽग्निवर्णः तासां नर्त्तकीनां वपुरालिखन् कथञ्चिद्वर्त्तते स्म अवर्त्तत ॥ १६ ॥

प्रेमेति। प्रेम्णा स्वविषयेण प्रियस्यानुरागेण हेतुना गर्व्विते विपक्षे सपत्नजने मत्सरात् वैरात् आयतात् प्रवृद्धात् मदनाच्च हेतोः देव्यो राज्ञ्यः उज्झितरुषस्त्यक्तरोषाः सत्यः तं महीक्षितम् उत्सवविधिच्छलेन महोत्सवकर्मव्याजेन कृतोऽर्थः प्रयोजनं येन स कृतार्थः तस्य भावस्तत्तां निन्युः। मदनमहोत्सवव्याजानीतेन तेन स्वमनोरथं कारयामासुरित्यर्थः ॥ २० ॥

प्रातरिति। सोऽग्निवर्णः, प्रातरेत्यागत्य परिभोगशोभिना दर्शनेन हेतुना। दृशेर्ण्यन्ताल्ल्युट्। कृता खण्डनव्यथा यासां तास्तथोक्ताः खण्डिता इत्यर्थः। तदुक्तं ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति। प्रणयिनीः, प्राञ्जलिः प्रसादयन् तथापि प्रणयमन्थरः

* स्वप्नकीर्त्तितविपक्षमङ्गनाः
प्रत्यभैत्सुरवदन्त्य एव तम् ।
प्रच्छदान्तगलिताश्रुविन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तनैः ॥२२॥

* क्लृप्तपुष्पशयनान् लतागृहान्
एत्य दूतिकृतमार्गदर्शनः ।
अन्वभूत् परिजनाङ्गनारतं
सोऽवरोधभयवेपथूत्तरम् ॥२३॥

* नाम वल्लभजनस्य ते मया
प्राप्य भाग्यमपि तस्य काङ्क्ष्यते ।

प्रणयेन नर्त्तकीगतेन मन्थरः अलसः अत शिथिलप्रयत्नः सन्नित्यर्थः पुनरङ्गनोद् पर्य्यतापयत् ॥ २१ ॥

स्वप्नेति । स्वप्ने कीर्त्तितो विपक्षः सपत्नजनो येन तं तमग्निवर्णम् अवदन्त्य एव त्वया गोत्रस्खलन कृतमित्यनुपालम्भमाना एव प्रच्छदस्या-स्तरणपटस्यान्ते मध्ये गलिता अश्रुविन्दवो येषु तैः क्रोधेन भिन्नानि वलयानि येषु तै विवर्त्तनैः पराङ्विलम्बनैः प्रत्यभैत्सुः प्रतिचक्रुः तिर-स्चक्रुरित्यर्थः ॥ २२ ॥

क्लृप्तेति । सोऽग्निवर्णः दूतिभिः कृतमार्गदर्शनः सन् क्लृप्तपुष्प शयनान् लतागृहानेत्य अवरोधादन्तःपुरजनाद् भयेन यो वेपथुः कम्पः तदुत्तरं तत्प्रधानं यथा तथा परिजनाङ्गनारतं दासीरतम् अन्व-भूत् । परिजनस्यासावङ्गना चेति विग्रहः ॥ २३ ॥

नामेति । मया ते वल्लभजनस्य प्रियजनस्य नाम प्राप्य नन्वात्मा

लोलुपं ननु मनो ममेति तं
गोत्रविस्खलितमूचुरङ्गनाः ॥२४॥
* चूर्णबभ्रु लुलितस्रगाकुलं
छिन्नमेखलमलक्तकाङ्कितम्।
उत्थितस्य शयनं विलासिन-
स्तस्य विभ्रमरतान्यपावृणोत् ॥२५॥

आह्वानं लब्ध्वा तस्य त्वद्वल्लभजनस्य यदाह्वानम्, तत्परिहासकारण-मिति शेषः, तदपि काङ्क्षते। ननु बत मम मनो लोलुपं स्पृहु इत्य-नेन प्रकारेण गोत्र नाम्नि विस्खलितं स्खलितवन्तं तमग्निवर्णमूचुः। गोत्रं नाम्नि कुलेऽचलइति यादवः। तन्नामलाभे सति तदाह्वानमपि काङ्क्षिणो मनः अहो हृष्यतीति लोलुपत्वमुपालभ्यन्तेत्यर्थः ॥ २४ ॥

चूर्णेति। चूर्णबभ्रु चूर्णैः व्यानतकरणैरधोमुखावस्थितायाः स्त्रियाश्चिकुरगलितैः कुङ्कुमादिभिः बभ्रु पिङ्गलम्। बभ्रु स्यात् पिङ्गले त्रिष्वित्यमरः। लुलितस्रगाकुलं करिपदाख्यबन्धे स्त्रिया भूमिगतमस्तकतया पतिताभिर्लुलितस्रग्भिराकुलम्, छिन्नमेखलं हरि-विक्रमकरणैः स्त्रियाः उत्क्षिप्तैकचरणत्वात् गलितमेखलम्, अलक्त-काङ्कितं धेनुकबन्धे भूतलनिहितकान्ताचरणत्वात् लाक्षारागरूषितं शयनं कर्त्तृ उत्थितस्य शयनादिति भावः विलासिन स्तस्याग्निवर्णस्य विभ्रमरतानि लीलारतानि सुरतबन्धविशेषानित्यर्थः अपावृणोत् स्फुटीचकार। व्यानतादीनां लक्षणं रतिरहस्ये। व्यानतं रतमिदं प्रिया यदि स्यादधोमुखचतुष्पदाकृतिः। तत्कटिं समधिरुह्य वल्लभः स्यादृषादिपशुसंस्थितस्थिति.। भूगतस्तनभुजास्यमस्तकामुन्नता स्य-मधोमुखीं स्त्रियम्। क्रामति स्वकरकृष्टमेहने वल्लभे करिपदन्तदु-च्यते। योषिदेकचरणे प्रमुत्थिते ज्ञायते हि हरिविक्रमाह्वयः।

* स स्वयं चरणरागमादधे
योषितां नच तथा समाहितः।
लोभ्यमाननयनः श्लथांशुकै-
र्मेखलागुणपदै र्नितम्बिभिः ॥२६॥

* चुम्बने विपरिवर्त्तिताधरं
हस्तरोधि रशनाविघट्टने।
विघ्नितेच्छमपि तस्य सर्व्वतो
मन्मथेन्धनमभूद्वधूरतम् ॥२७॥

* दर्पणेषु परिभोगदर्शिनी-
र्नर्म्मपूर्व्वमनुपृष्ठसंस्थितः।

न्यस्तहस्तयुगला निजे पदे योषिदेति कटिरूढवल्लभा। अग्रतो यदि शनैरधो मुखी धेनुकं वृषवदुन्नते प्रिये इति ॥ २५ ॥

स इति। सोऽग्निवर्णः स्वयमेव योषितां चरणयोः रागं लाक्षा-रसम् आदधे अर्पयामास। किन्तु श्लथांशुकैः प्रियाङ्गस्पर्शादिति भावः नितम्बिभि र्नितम्बवद्भिः मेखलागुणपदै र्जघनैः। पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरतस्त्यमरः। लोभ्यमाननयनः आकृष्य-माणदृष्टिः सन् तथा समाहितोऽवहितो नादधे यथा सम्यग्रागरचना स्यादिति भावः ॥ २६ ॥

चुम्बनइति। चुम्बने प्रवृत्ते सति विपरिवर्त्तिताधरं परिहृतोष्ठं रशनाविघट्टने ग्रन्थिविस्रंसने प्रसक्ते सति हस्तं रुणद्धि वारयतीति हस्तरोधि इत्थं सर्व्वतः सर्व्वत्र विघ्नितेच्छं प्रतिहतमनोरथमपि वधूनां रतं सुरतं तस्याग्निवर्णस्य मन्मथेन्धनं कामोद्दीपनमभूत् ॥ २७ ॥

दर्पणेष्विति। सोऽग्निवर्णो दर्पणेषु परिभोगदर्शिनीः सम्भोग

छायया स्मितमनोज्ञया वधू-
र्ह्रीनिमीलितमुखी श्चकार सः ॥२८॥

* कण्ठसक्तमृदुबाहुबन्धनं
न्यस्तपादतलमग्रपादयोः।
प्रार्थयन्त शयनोत्थितं प्रियाः
तं निशात्ययविसर्गचुम्बनम् ॥२९॥

* प्रेक्ष्य दर्पणतलस्थमात्मनो
राजवेषमतिशक्रशोभिनम्।
पिप्रिये न स तथा यथा युवा
व्यक्तलक्ष्म परिभोगमण्डनम् ॥३०॥

चिह्नानि पश्यन्तीः वधूः नर्मपूर्वं परिहासपूर्वम् अनुपृष्ठं तासां पृष्ठभागे संस्थितः सन् स्मितेन मनोज्ञया छायया दर्पणगतेन स्वप्रतिबिम्बेन ह्रीनिमीलितमुखी र्लज्जावनतमुखीश्चकार, तमागतं दृष्ट्वा लज्जिता इत्यर्थः ॥ २८ ॥

कण्ठेति। प्रियाः शयनादुत्थितं तमग्निवर्णं कण्ठसक्तं कण्ठार्पितं मृदुबाहुबन्धनं यस्मिंस्तत् अग्रपादयोः स्वकीययोर्न्यस्ते पादतले यस्मिंस्तत् निशात्यये विसर्गो विसृज्य गमनं तत्र यच्चुम्बनं तत्प्रार्थयन्त। दुह्याच्चित्यादिना द्विकर्मकत्वम्। अत्र गोनर्दीयः रतावसाने यदि चुम्बनादि प्रयुज्य यायान्मदनोऽस्य वास इति ॥ २९ ॥

प्रेक्ष्येति। युवा सोऽग्निवर्णः अतिशक्रं यथा तथा शोभमानम् अतिशक्रशोभिनं दर्पणतलस्थं दर्पणसंक्रान्तम् आत्मनो राजवेषं प्रेक्ष्य

* मित्रकृत्यमपदिश्य पार्श्वतः
प्रस्थितं तमनवस्थितं प्रियाः।
विद्म हे शठ पलायनच्छला-
न्यञ्जसेति रुरुधुः कचग्रहैः ॥ २१॥
* तस्य निर्दयरतिश्रमालसाः
कण्ठसूत्रमपदिश्य योषितः।

तथा न पिप्रिये न तुतोष यथा व्यक्तानन्न प्रकटचिह्नं परिभोगमण्डनं प्रेक्ष्य पिप्रिये ॥ २० ॥

मित्रेति। मित्रकृत्यं सुहृत्कार्य्यम् अपदिश्य व्याजीकृत्य पार्श्वतः प्रस्थितम् अन्यतो गन्तुमुद्युक्तम् अनवस्थितमस्थानुरागं तमग्निवर्णं प्रियाः हे शठ हे गूढ़विप्रियकारिन्। गूढविप्रियकृच्छठ इति दश-रूपके। तव पालयनस्य छलानि अञ्जसा तत्त्वतः। तत्त्वे त्वद्धाञ्जसा द्वयमित्यमरः। विद्म जानीम। विदोलटोवेति वैकल्पिक मादेशः। इति उक्तेति शेषः कचग्रहैः केशाकर्षणैः रुरुधुः। अत्र गोनर्द्दीयः स्तुत्याताभिगमने मित्रकार्य्यं तथापटि। निष्प्रतेषु प्रियतमः वत्तव्य इति अञ्जसा विरक्तलक्षणप्रस्तावे वात्स्यायनः। मित्रकृत्यञ्चापदिश्या-न्यत्र शेतइति ॥ २१ ॥

तस्येति। निर्दयरतिश्रमेण अलसा निश्चेष्टाः योषितः कण्ठसूत्रम् आलिङ्गनविशेषम् अपदिश्य व्याजीकृत्य पीवरस्तनाभ्यां विलुप्तचन्दनं प्रच्छाङ्गरागं तस्याग्निवर्णस्य हृत्कुञ्जान्तरम् अध्यशेरत वक्षःस्थले शेरते स्म। कण्ठसूत्रलक्षणन्तु याः कुर्व्वते वक्षसि वल्लभस्य स्तनाभि-घातं निविड़ोपगूहात्। परिश्रमार्थं शनकैर्विदग्धास्तत्कण्ठसूत्रं प्रवदन्ति सन्तः। इदमेव रतिरहस्ये स्तनालिङ्गनमित्युक्तम्। तथाच,

अध्यशेरत बृहद्भुजान्तरं
पीवरस्तनविलुप्तचन्दनम् ॥३२॥

* सङ्गमाय निशि गूढचारिणं
चारदूतिकथितं पुरोगताः ।
वञ्चयिष्यसि कुतस्तमोवृतः
कामुकेति चकृषुस्तमङ्गनाः ॥३३॥

* योषितामुडुपतेरिवार्चिषां
स्पर्शनिर्वृतिमसाववाप्नुवन् ।
आरुरोह कुमुदाकरोपमां
रात्रिजागरपरो दिवाशयः ॥३४॥

उरसि च प्रियमुच्चैरालिङ्गति वराङ्गी स्तनयुगमुपधत्ते स्तनालिङ्गनन्ता-दिति वदन्ति ॥ ३२ ॥

सङ्गमायेति । सङ्गमाय सुरतार्थं निशि गूढम् अज्ञातं चरति दूष्ट-वरहं प्रति गच्छतीति गूढचारी तं चारदूतिकथितं चरन्तीति चाराः गूढचारिण्यः, ज्वलितिकसन्तेभ्योणइति णप्रत्ययः । चाराश्च ताः दूतयश्च चारदूतयः ताभिः कथितं निवेदितं तमग्निवर्णम् अङ्गनाः पुरोऽग्रे गताः अवरुद्धमार्गाः सत्यइत्यर्थः. हे कामुक तमसा वृतो गूढः सन् कुतो वञ्चयिष्यसि इति उपालभ्येति शेषः चकृषुः स्ववासं निन्यु-रित्यर्थः ॥ ३३ ॥

योषितामिति । उडुपतेरिन्दोरर्चिषां भासामिव । ज्वाला-भासो नपुंस्यर्चिरित्यमरः । योषिता स्पर्शनिर्वृतिं स्पर्शसुखमवाप्नु-वन् किञ्च रात्रिषु जागरपरः दिवा दिवसेषु शेते स्वपितीति दिवा-

* वेणुना दशनपीड़िताधराः
वीणया नखपदाङ्कितोरवः।
शिल्पकार्य्य उभयेन वेजिता-
स्तं विजिह्मनयता व्यलोभयन् ॥३५॥

* अङ्गसत्त्ववचनाश्रयं मिथः
स्त्रीषु नृत्यमुपधाय दर्शयन्।
स प्रयोगनिपुणैः प्रयोक्तृभिः
सञ्जघर्ष सह मित्रसन्निधौ ॥३६॥

शयः। अधिकरणे शेतेरित्यच् प्रत्ययः। असावग्निवर्णः कुमुदाकरस्य उपमां साम्यमारुरोह प्राप ॥ ३४ ॥

वेणुनेति। दशनैः पीड़िताधराः दष्टोष्ठाः नखपदैः नखक्षतै रङ्कितोरवश्चिह्नितोत्सङ्गाः व्रणिताधरोरुत्वाटक्षमा इत्यर्थः तथापि वेणुना वीणया चेत्युभयेन अधरोरुपीड़ाकारिणेत्यर्थः वेजिताः पीडिताः शिल्पं वेणुवीणावाद्यादिकं कुर्वन्तीति शिल्पकार्य्यो गायिकाः। कर्मण्यस्त्यण् टिड्ढाणञिति ङीप्। तं विजिह्मनयनाः कुटिलदृष्टयः सत्यः स्वं चेष्टितं जानन्नपि वृथा नः पीड़यतीति साभिप्रायं पश्यन्त्य इत्यर्थः व्यलोभयन्। तथाविधालोकनमपि तस्याकर्षकमेवाभूदिति भावः ॥ ३५ ॥

अङ्गेति। अङ्गं हस्तादि सत्त्वमन्तःकरणं वचनं गेयञ्च आश्रयः कारणं यस्य तदङ्गसत्त्ववचनाश्रयम् आङ्गिकसात्त्विकवाचिकरूपेण त्रिविधमित्यर्थः। यथाह भरतः, सामान्याभिनयो नाम ज्ञेयो वागङ्गसत्त्वज इति। नृत्यमभिनयं मिथो रहसि स्त्रीषु नर्त्तकीषु उपधाय निधाय दर्शयन् सः मित्रसन्निधौ सहचरसमक्षं प्रयोगे अभिनये नि-

* अंसलम्बिकुटजार्जुनस्रज-
स्तस्य नीपरजसाङ्गरागिणः।
प्रावृषि प्रमदबर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः॥३७॥

* विग्रहाच्च शयने पराङ्मुखीः
नानुनेतुमबलाः स तत्वरे।
आचकाङ्क्ष घनशब्दविक्लवा-
स्ता विवृत्य विशतीर्भुजान्तरम्॥३८॥

पुणैः कृतिभिः प्रयोक्तृभिः अभिनयार्थप्रकाशकैः नाट्याचार्य्यैः सह सङ्घर्षं सङ्घर्षं कृतवान्। सङ्घर्षः पराभिभवेच्छा॥ २६॥

इतः प्रभृति तस्य कृत्रिमाद्रिषु विरचितविहारप्रकारमाह

अंसेति। प्रावृषि अंसलम्बिन्यः कुटजानामर्ज्जुनानाञ्च स्रजो यस्य तस्य नीपानां कदम्बकुसुमानां रजसा अङ्गरागिणोऽङ्गरागवतस्तस्याग्निवर्णस्य प्रमदबर्हिणेषून्मत्तमयूरेषु कृत्रिमाद्रिषु विहारएव विभ्रमो विलासः अभूत्॥ ३७॥

विग्रहादिति। प्रावृषीत्यनुषज्यते, सोऽग्निवर्णः विग्रहात् प्रणयकलहात् शयने पराङ्मुखीरबलाः अनुनेतुं न तत्वरे त्वरितवान्, किन्तु घनशब्देन घनगर्जितेन विक्लवाश्शङ्किताः अतएव विवृत्य स्वयमेवाभिमुखीभूय भुजान्तरं विशतीः प्रविशन्तीः। आच्छीनद्योर्नुमिति नुम् विकल्पः। ताः अबलाः आचकाङ्क्ष, स्वयंग्रहादेव सांमुख्यमैच्छदित्यर्थः॥ ३८॥

कार्त्तिकीष्विति। कार्त्तिकस्येमाः कार्त्तिक्यः। तस्येदमित्यण्।

* कार्त्तिकीषु सवितानहर्म्यभाक्
यामिनीषु ललिताङ्गनासखः।
अन्वभुङ्क्त सुरतश्रमापहां
मेघमुक्तविशदां स चन्द्रिकाम्॥३९॥

* सैकतञ्च सरयूं विवृण्वतीं
श्रोणिबिम्बमिव हंसमेखलम्।
स्वप्रियाविलसितानुकारिणीं
सौधजालविवरै र्व्यलोकयत्॥४०॥

* मर्म्मरैरगुरुधूपगन्धिभिः
व्यक्तहेमरशनैस्तमेकतः।

तासु यामिनीषु निशासु शरद्रात्रिष्वित्यर्थः सवितानानि उपरिवस्त्राच्छादितानि हर्म्याणि भजतीति सवितानहर्म्यभाक्। भजेर्ण्विप्रत्ययः। हिमवारणार्थं सवितानमुक्तम्। ललिताङ्गनासखः सोऽग्निवर्णः सुरतश्रमापहां मेघमुक्ता चासौ विशदा च ताम्। बहुलग्रहणात् सविशेषणसमासः। चन्द्रिकामन्वभुङ्क्त॥३९॥

सैकतमिति। किञ्च, हंसाएव मेखला यस्य तत्सैकतं पुलिनं श्रोणिबिम्बमिव विवृण्वतीम् अतएव स्वप्रियाविलसितानि अनुकरोतीति तद्विधां सरयूं सौधस्य जालानि गवाक्षा स्तएव विवराणि तै र्व्यलोकयत्॥४०॥

मर्म्मरैरिति। मर्म्मरैः संस्कारविशेषाच्छब्दायमानैः। अथ मर्मरः स्वनिते वस्त्रपर्णानामित्यमरः। अगुरुधूपगन्धिभिः व्यक्तहेमरशनैः लौल्यात्सुच्यमाणकनकमेखलागुणैः हैमनैर्हेमन्ते भवैः। सर्वत्राण् च

जह्रुरग्रथनमोक्षलोलुपं
हैमनैर्निवसनैः सुमध्यमाः ॥४१॥

* अर्पितस्तिमितदीपदृष्टयो
गर्भवेश्मसु निवातकुक्षिषु।
तस्य सर्व्वसुरतान्तरक्षमाः
साक्षितां शिशिररात्रयो ययुः ॥४२॥

* दक्षिणेन पवनेन सम्भृतं
प्रेक्ष्य चूतकुसुमं सपल्लवम्।
अन्वनैषुरवधूतविग्रहाः
तं दुरुत्सहवियोगमङ्गनाः ॥४३॥

तल्लोपश्चेति हेमन्तशब्दादण् प्रत्ययस्तल्लोपश्च। निवसनैरंशुकैः सुमध्यमाः स्त्रियः एकतो नितम्बैकदेशे आग्रथनमोक्षयो र्नीवीबन्धविस्रंसनयो र्लौलुपमासक्तं तं जहुराचक्षुः ॥ ४१ ॥

अर्पितेति। निवाताः वातरहिताः कुक्षयोऽभ्यन्तराणि येषां तेषु गर्भवेश्मसु गृहान्तर्गृहेषु अर्पिताः दत्ताः स्तिमिताः निवातत्वान्निस्चला दीपाएव दृष्टयो याभि स्ताः। अत्रानिमिषदृष्टित्वञ्च गम्यते। सर्वसुरतान्तरक्षमाः तापस्वेदापनोदनत्वाद्दीर्घकालत्वाच्च सर्वेषां सुरतान्तराणां सुरतभेदानां क्षमाः क्रियार्हाः शिशिररात्रयः तस्याग्निवर्णस्य साक्षितां ययुः। विविक्तकालदेशत्वाद्यथेच्छं विजहारेत्यर्थः ॥ ४२ ॥

दक्षिणेनेति। अङ्गनाः दक्षिणेन पवनेन मलयानिलेन सम्भृतं जनितं सपल्लवं चूतकुसुमं प्रेक्ष्य अवधूतविग्रहा स्त्यक्तविरोधाः सत्यः

* ताः स्वमङ्कमधिरोप्य दोलया
प्रेङ्खयन् परिजनापविद्धया ।
मुक्तरज्जु निविडं भयच्छलात्
कण्ठबन्धनमवाप बाहुभिः ॥ ४४ ॥

तं पयोधरनिषिक्तचन्दनैः
मौक्तिकग्रथितचारुभूषणैः ।
ग्रीष्मवेषविधिभिः सिषेविरे
श्रोणिलम्बिमणिमेखलैः प्रियाः ॥ ४५ ॥

यत् स लग्नसहकारमासवं
रक्तपाटलसमागमं पपौ ।

दुरुल्लङ्घवियोगं दुःसहविरहं तम् अन्वनैषुः तद्विरहमसहमानाः स्वयमेवानुनीतवत्य इत्यर्थः ॥ ४३ ॥

ताइति । ताः अङ्गनाः स्वमङ्कं स्वकीयमुत्सङ्गम् अधिरोप्य परिजनेनापविद्धया संप्रेषितया दोलया मुक्तरज्जु त्यक्तदोलासूत्रं यथा तथा प्रेङ्खयन् चालयन् भयच्छलात् पतनभयमिषात् बाहुभिर्भुजैः निविडं कण्ठबन्धनम् अवाप प्राप स्वयंग्रहाश्लेषसुखमन्वभूदित्यर्थः ॥ ४४ ॥

तमिति । प्रियाः पयोधरेषु स्तनेषु निषिक्तम् उक्षितं चन्दनं येषु तैः मौक्तिकैर्ग्रथितानि प्रोतानि चारुभूषणानि येषु तैः मुक्ताप्रायाभरणैरित्यर्थः श्रोणिलम्बिन्यः मणिमेखलाः मरकतादिमणियुक्ताः कटिसूत्राणि येषु तादृशैः ग्रीष्मवेषविधिभिः उष्णकालोचितनेपथ्यविधानैः शीतलोपायैरित्यर्थः, तमग्निवर्णं सिषेविरे ॥ ४५ ॥

यदिति । सोऽग्निवर्णः लग्नः सहकारः चूतपल्लवो यस्मिन् तं

तेन तस्य मधुनिर्गमात् कृशः
चित्तयोनिरभवत् पुनर्नवः ॥४६॥
एवमिन्द्रियसुखानि निर्विशन्
अन्यकार्य्यविमुखः स पार्थिवः।
आत्मलक्षणनिवेदितानृतून्
अत्यवाहयदनङ्गवाहितः ॥४७॥
तं प्रमत्तमपि न प्रभावतः
शेकुराक्रमितुमन्यपार्थिवाः।
आमयस्तु रतिरागसम्भवो
दक्षशापइव चन्द्रमक्षिणोत् ॥४८॥

रक्तपाटलस्य पाटलकुसुमस्य समागमो यस्य तम् आसवं मद्यं पपौ इति यत् तेनासवपानेन मधुनिर्गमाद्वसन्तापगमात् कृशो मन्दवीर्य्यः तस्य चित्तयोनिः कामः पुनर्नवः प्रबलोऽभवत् ॥ ४६ ॥

एवमिति। एवम् अनङ्गवाहितः कामप्रेरितः अन्यकार्य्यविमुखः स पार्थिवः इन्द्रियाणां सुखानि सुखकराणि शब्दादीनि निर्विशन् अनुभवन् आत्मनो लक्षणैः कुटजस्रग्धारणादिचिह्नैः निवेदितान् अयमृतुरिदानीं वर्त्तते इति ज्ञापितान् ऋतून् वर्षादीन् अत्यवाहयत् अगमयत् ॥ ४७ ॥

तमिति। प्रमत्तं व्यसनासक्तमपि तं नृपं प्रभावतः अन्यपार्थिवाः आक्रमितुमभिभवितुं न शेकुः न शक्ताः, रतिरागसम्भव आमयो व्याधिस्तु क्षयरोगइत्यर्थः, दक्षस्य दक्षप्रजापतेः शापः चन्द्रमिव, अक्षिणोत् अकर्शयत्। शापोऽपि रतिरागसम्भवइति। दक्ष' किल अन्याः

दृष्टदोषमपि तन्न सोऽत्यजत्
सङ्गवस्तु भिषजामनाश्रवः ।
स्वादुभिस्तु विषयैर्हृतस्ततो
दुःखमिन्द्रियगणो निवार्य्यते ॥ ४९ ॥

तस्य पाण्डुवदनाल्पभूषणा
सावलम्बगमना मृदुस्वना ।
राजयक्ष्मपरिहानिराययौ
कामयानसमवस्थया तुलाम् ॥ ५० ॥

स्वकन्या उपेक्ष्य रोहिण्यामेव रममाणं राजानं सोमं शशाप पश्चाद्-द्यापि क्षयरूपेण तं क्षिणोतीत्युपाख्यायते ॥ ४८ ॥

दृष्टेति । भिषजां वैद्यानामनाश्रवो वचसि न स्थितः । वचने स्थित आश्रव इत्यमरः । अविधेय इत्यर्थः स दृष्टदोषमपि रोगजननादिति शेषः तत् सङ्गस्य वस्तु सङ्गवस्तु स्त्रीमद्यादिकं सङ्गजनकं वस्तु नात्यजत् । तथाहि, इन्द्रियगणः स्वादुभि र्विषयैः हृतस्तु हृतश्चेत् तत स्तेभ्यो विषयेभ्यो दुःखं कृच्छ्रेण निवार्य्यते, दुस्त्यजाः खलु विषया इत्यर्थः ॥ ४९ ॥

तस्येति । तस्य राज्ञः पाण्डुवदना अल्पभूषणा परिमिताभरणा सावलम्बं दासादिहस्तावलम्बसहितं गमनं यस्यां सा सावलम्बगमना मृदुस्वना हीनस्वरा राज्ञः सोमस्य यक्ष्मा राजयक्ष्मा क्षयरोगस्तेन या परिहानिः क्षीणावस्था, कामयते विषयानिच्छति कामयानः । कर्म्मणि-ङन्तात् शानच् । अनित्यमागमशासनमिति मुमागमाभावः । एत-देवाभिप्रेत्योक्तम् वामनेनापि कामयानशब्दः सिद्धोनादिश्चेति । तस्य समवस्थया कामुकावस्थया तुलां साम्यमाययौ प्राप । कालकृतो विशेषोऽवस्था । विशेषः कालिकोऽवस्थेत्यमरः ॥ ५० ॥

व्योम पश्चिमकलास्थितेन्दु वा
पङ्कशेषमिव घर्म्मपल्वलम्।
राज्ञि तत्कुलमभूत् क्षयातुरे
वामनार्च्चिरिव दीपभाजनम् ॥५१॥

बाढमेष दिवसेषु पार्थिवः
कर्म्म साधयति पुत्रजन्मने।
इत्यदर्शितरुजोऽस्य मन्त्रिणः
शश्वदूचुरघशङ्किनीः प्रजाः ॥५२॥

स त्वनेकवनितासखोऽपि सन्
पावनीमनवलोक्य सन्ततिम्।
वैद्ययत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥५३॥

व्योमेति। राज्ञि क्षयातुरे सति तत्कुलं रघुकुलं पश्चिमकलायां स्थित इन्दुर्यस्मिंस्तत् कलाविशिष्टेन्दु व्योम वा व्योमेव। वाशब्द इवार्थे यथाह दण्डी इववद्वायथाशब्दाविति। पङ्कशेषं घर्मपल्वलमिव, वामनार्च्चिः अल्पशिखं दीपभाजनं दीपपात्रमिव, अभूत् ॥५१॥

बाढमिति। बाढं सत्यम् एष पार्थिवः दिवसेषु पुत्रजन्मने पुत्रोदयार्थं कर्म जपादिकं साधयति इत्येवम् अदर्शितरुजो निगूहितरोगाः सन्तोऽस्य राज्ञो मन्त्रिणः अघशङ्किनीः व्यसनशङ्किनीः प्रजाः शश्वत् ऊचुः ॥५२॥

स इति। सतु अग्निवर्णः अनेकवनितासखः सन्नपि, पावनीं

तं गृहोपवनएव सङ्गताः
पश्चिमक्रतुविदा पुरोधसा ।
रोगशान्तिमपदिश्य मन्त्रिणः
सम्भृते शिखिनि गूढमादधुः ॥५४॥

तैः कृतप्रकृतिमुख्यसंग्रहै-
राशु तस्य सहधर्म्मचारिणी ।
साधु दृष्टशुभगर्भलक्षणा
प्रत्यपद्यत नराधिपश्रियम् ॥५५॥

तस्यास्तथाविधनरेन्द्रविपत्तिशोका-
दुष्णैर्विलोचनजलैः प्रथमाभितप्तः ।

पितृऋणमोचनीं सन्ततिमनवलोक्य पुत्रमनवाप्येत्यर्थः, वैद्ययत्नपरिभाविनं गदं रोगं प्रदीपो वायुमिव नात्यगात् नातिचक्राम ममारेत्यर्थः ॥ ५३ ॥

तमिति । पश्चिमक्रतुविदा अन्त्येष्टिविधिज्ञेन पुरोधसा सङ्गताः समेताः मन्त्रिणः गृहोपवनएव गृहारामएव । आरामः स्यादुपवनमित्यमरः । रोगशान्तिमपदिश्य शान्तिकर्म व्यपदिश्य तमग्निवर्णं सम्भृते समृद्धे शिखिनि अग्नौ गूढमप्रकाशम् आदधुः निदधुः ॥ ५४ ॥

तैरिति । आशु शीघ्रं कृतः प्रकृतिमुख्यानां पौरजनप्रधानानां संग्रहः सन्निपातनं यैस्तादृशैः तैर्मन्त्रिभिः साधु निपुणं दृष्टशुभगर्भलक्षणा परीक्षितशुभगर्भचिह्ना तस्याग्निवर्णस्य सहधर्मचारिणी नराधिपश्रियं प्रत्यपद्यत राज्यलक्ष्मीं प्राप ॥ ५५ ॥

तस्यादिति । तथाविधया नरेन्द्रविपत्त्या यः शोकस्तस्मादुष्णै-

निर्वापितः कनककुम्भमुखोज्झितेन
वंशाभिषेकविधिना शिशिरेण गर्भः ॥ ५६ ॥


तं भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजानाम्
अन्तर्गूढं क्षितिरिव नभोवीजमुष्टिं दधाना ।
मौलैः सार्द्धं स्थविरसचिवैर्हैमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥ ५७ ॥

विलोचनजलैः प्रथमाभितप्तः तस्याः गर्भः कनककुम्भानां मुखैरुज्झितेन शिशिरेण शीतलेन वंशाभिषेकविधिना तच्छायाया अभिषेकजलेन निर्वापितः आप्यायितः ॥ ५६ ॥

तमिति । प्रसवो गर्भमोचनं फलञ्च विवक्षितम् । स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः । तस्य यः समयः तदाकाङ्क्षिणीनां प्रजानां भावार्थं भावाय भूतये इत्यर्थः । भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुष्विति यादवः । क्षितिः अन्तर्गूढं नभोवीजमुष्टिमिव श्रावणमासुप्तं वीजमुष्टिं यथा धत्ते तद्वदित्यर्थः । मुष्टिशब्दो द्विलिङ्गः । अस्त्रीवौ मुष्टिमुस्तकाविति यादवः । अन्तर्गूढमन्तर्गतं तं गर्भं दधाना हेमसिंहासनस्था अव्याहताज्ञा राज्ञी मौलैर्मूले भवैः मूलागतैर्वा आप्तैरित्यर्थः स्थविरसचिवैः वृद्धामात्यैः सार्द्धं भर्तुः राज्यं विधिवद्विध्यर्हं यथाशास्त्रमित्यर्थः । अर्हार्थे वतिप्रत्ययः । अशिषत् शासितस्म । सर्त्तिशास्त्यर्त्तिभ्यश्चेति च्लेरङ् शास इदङ्हलोरितीकारः ॥ ५७ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
अग्निवर्णशृङ्गारो नाम एकोनविंशः सर्गः ।

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
रघुवंशव्याख्यायां सञ्जीवनीसमाख्यायामेकोनविंशः सर्गः ।



सम्पूर्णम् ।